310

॥ अथ श्रीमद्भागवते दशमस्कंधे उत्तरार्धप्रारंभः ॥

॥ श्रीगणेशायनमः ॥ सच्छास्त्रस्यासच्छास्त्रेणेवकतिपयेष्वध्यायेषुश्रीकृष्णस्यजरासंधेनसहसंग्रामंवर्णयति तत्त्वनिर्णयेनसदसतांभक्तिद्वेषाभ्यांउद्बुद्धाभ्यांविहितनिर्वाणावाप्तिर्भवति तत्रकथांप्रसंजयितुमाह अस्तीति अस्तिप्राप्तिशब्दाभ्यांअविद्यायाद्वैरूपेसंशयविपरीतज्ञाननामनीउच्येते तत्रसंशयेज्ञानसत्तामात्रमस्ति विपरीतेतदपिनास्तीत्यस्तिप्राप्ती असभुविभूसत्तायामितिधातोः यद्वा निश्चायकप्रमाणाभावेननिश्चयज्ञानाभावात्संशयविपरीतज्ञानवाचकावेतौ असुनिरसनइतिधातोः कंसस्यमहिष्यौ कंसिहिंसायामितिधातोः हिंसात्मनोऽधर्मस्यमहिमबंधकत्वेनसंबंधिन्यौ षिञ्बधंनइतिधातोः कृष्णनाम्नाधर्मेणभर्तरिस्वनिर्वाहकेकंसनाम्न्यधर्मेहतेविनाशितेस्वपितुःस्वपोषकस्यजरासंधस्य जृवयोहानावितिधातोर्वयोहानिहेतुभूताशैवीशास्त्रसंहिताजरेत्युच्यते तस्यांसंधामरणापत्तावपिनमुंचामीतिप्रतिज्ञायस्यसतथा तस्यगृहान्प्रमेयविशेषानीयतुःप्राप्यस्थिते शब्दशक्तिविचक्षणैःपुरुषैरध्यात्मविषयतयाअत्रार्थोज्ञातव्यइति ग्रंथबाहुल्यभीरुणामयानप्रदर्श्यतइति १ आत्मवैरूप्यकारणम् आत्मवैधर्म्यादिनिमित्तम् अन्यत्रप्रतिपादनासामर्थ्यम् २ नृनयइतिधातोःनृन्नयान्शैवशास्त्रोक्तान्पिबतीतिनृपःशास्त्रज्ञः यःप्रतिसंभूमेत्याभिधानात्योविष्णुःसएवादोदुष्टदंडकस्तंवांतिशरणंगच्छं

श्रीशुकउवाच ॥ अस्तिप्रास्तीतिकंसस्यमहिष्यौभरतर्षभ ॥ हतेभर्तरिदुःखार्तेईयतुःस्वपितुर्गृहान् १ पित्रेमगधराजायजरासंधायदुःखिते ॥ वेदयांचक्रतुःसर्वमात्मवैरूप्यकारणम् २ सतदप्रियमाकर्ण्यशोकामर्षयुतोनृपः ॥ अयादर्वीमहींकर्तुंचक्रेपरममुद्यमम् ३ अक्षौहिणीभिर्विंशद्भिस्तिसृभिश्चापिसंवृतः ॥ यदुराजधानींमथुरांन्यरुणत्सर्वतोदिशम् ४ निरीक्ष्यतद्बलंकृष्णउद्वेलमिवसागरम् ॥ स्वपुरंतेनसंरुद्धंस्वजनंचभयाकुलम् ५ चिंतयामासभगवान्हरिःकारणमानुषः ॥ तद्देशकालानुगुणंस्वावतारप्रयोजनम् ६ हनिष्यामिबलंह्येतद्भुविभारंसमाहितम् ॥ मागधेनसमानीतंपश्यतांसर्वभूभृताम् ७ अक्षौहिणीभिःसंख्यातंभटाश्वरथकुंजरैः ॥ मागधोऽपिनहंतव्योभूयःकर्त्ताबलोद्यमम् ८ एतदर्थोवतारोऽयंभूभारहरणायमे ॥ संरक्षणायसाधूनांकृतोऽन्येषांवधायच ९ अन्योऽपिधर्मरक्षायैदेहःसंभ्रियतेमया ॥ विरामायह्यधर्मस्यकालेप्रभवतःक्वचित् १० एवंध्यायतिगोविंदेमगधाधिपतिर्बली ॥ मथुरांसवनोद्यानांरुरोधबहुसैनिकः ११ कलिंगश्चेकितानश्चदंतवक्रविदूरथौ ॥ उल्मुकोवेणुदारीचशाल्वश्चैद्यश्चदुर्मतिः १२ पूर्वद्वारंसमासाद्यरुरुधुर्मागधाज्ञया ॥ विंदानुविंदावावंत्यौविराटोदरदस्तथा १३

तीतियादवाःवैष्णवाःतद्रहिताम् ३ एकस्थानमारभ्यषोडशस्थानेयासंख्यासाऽक्षौहिणीत्युच्यतेइति अन्येगजानांसप्तसहस्राणिद्विशतीसाशीतिः एवंरथानामपिसंख्या अश्वानामेकविंशतिसहस्रीपंचशतीविंशतिश्च पदातीनांपंचत्रिंशत्सहस्रंविंशतिभिश्चेत्यक्षौहिणीसंख्यांब्रुवते एकोगजएकोरथस्त्रयोऽश्वाःपंचपदातयइतिदशसंख्यापात्तिर्नाम त्रिगुणितापत्तिःसेनामुखमितिभिन्नंवापदं सेनामुखंत्रिगुणोगुल्मनामा तत्त्रिगुणोगणनामा गणत्रिगुणावाहिनीनाम वाहिनीत्रिगुणापृतना तत्त्रिगुणाचमूः त्रिगुणिताचमूरनीकिनी दशानीकिनीत्यक्षौहिणीतिकेचित् एकैकरथान्यश्वापत्तिःपंचपदातयः पत्यंगैस्त्रिगुणैःसर्वैःक्रमादाख्यायथोत्तरम् सेनामुखंगुल्मगणौवाहिनीपृतनाचमूः अनीकिनीदशानीकिन्यक्षौहिणीत्यमरः ४ ५ ६ ७ ८ ९ अन्योपिदाराहादिरापि स्वकालेप्रभवतःवर्धमानस्याधर्मस्यविरामायविनाशाय १० मथुरायोग्यानांपरमानंददात्रींवेदांतविद्यां तस्याश्चतुर्द्वाराणिऋगादीनि पाखंडशैववीरादयः लिंगादिशब्दिताबहवःसैनिकाःसेनारक्षकाःपस्यसतथा सेनारक्षाश्चसैनिकाइत्यमरः ११ १२ १३

१४ १५ १६ १७ १८ १९ क्ष्वेलंतःअट्टहासंकुर्वंतः २० कदंबःसमूहः २१ सपरिच्छदौसोपस्करणौ २२ सहस्रमराणिदलानियस्यतत्तथा २३ कौमद्गीमोदकोनारायणःतस्यविद्यमानाकौमोद
की त्रिषुस्थानेषुकोटिद्वयेमध्येचनतंवक्त्रंत्रिनतं कार्मुकंतुचतुर्हस्तमितिपादवःशार्ङ्गंशृंगविकृतं गुणेनज्यपाअन्वितंसहितम् २४ २५ २६ २७ त्वावतांत्वद्युक्तानां पद्मा त्वंअवःरक्षकोयेषांतेत्वावंतः

एकलव्योबाह्लिकश्चतथापंचनदेश्वरः ॥ रुरुधुर्दक्षिणद्वारंपौंड्रकश्चमहाबलः १४ युधामन्युर्बृहत्क्षत्रःशाल्वोभूरिश्रवास्तथा ॥ उत्तमौजाश्चरुक्मीचद्रुम
श्चैवसुदक्षिणः १५ एतेनियुक्ताराजानोजरासंधेनभारत ॥ पश्चिमद्वारमासाद्यरुरुधुर्मथुरांपुरीम् १६ द्रुपदःशिशुपालश्चत्रिगर्तोऽथजयद्रथः ॥ शकुनिःसो
मदत्तश्चकुर्णिदश्चमहाबलः १७ जरासंधेनसहिताःसर्वेमदबलान्विताः ॥ उत्तरद्वारमासाद्यरुरुधुर्भरतर्षभ १८ तेनिरुद्धचचतुर्द्वाराण्युद्वेलांभोधिसन्नि
भाः ॥ सिंहनादंचकुर्वंतोदध्मुःशंखाननेकशः १९ क्ष्वेलंतोयुद्धसन्नद्धाजघ्नुर्भेरीःसहस्रशः २० तद्वीरभूपालकदंबजृंभितंयुगावसानार्णवघूर्णितोपमम् ॥ नि
शम्यकृष्णोनचचालचेतसास्मृगालघोषंमृगराडिवोद्धतः २१ एतस्मिन्नेवकालेतुगगनात्सूर्यवर्चसौ ॥ रथावुपस्थितौसद्यःससूतौसपरिच्छदौ २२ आयु
धानिचदिव्यानिपुराणानियदृच्छया ॥ चक्रंसुदर्शनंघोरंसहस्रारंमनोरमम् २३ गदाकौमोदकीगुर्वीनाम्नाकौमोदकीशुभा ॥ त्रिनतंकार्मुकश्रेष्ठंशार्ङ्गसंज्ञं
गुणान्वितम् २४ तीक्ष्णधारःशितमुखःखड्गोनंदकसंज्ञितः ॥ लघूशराचितौरम्यौतूणौचाक्षयसायकौ २५ तुरगाःशैव्यसुग्रीवमेघपुष्पबलाहकाः ॥ हलं
चबलभद्रस्यमुसलंचदृढंगुरु २६ इत्येतान्यायुधान्याजौगगनादागतानिसः ॥ दृष्ट्वाराजन्हृषीकेशःसंकर्षणमथाऽब्रवीत् २७ पश्यार्यव्यसनंप्राप्तंयदूनांत्वाव
तांप्रभो ॥ एषतेरथआयातोदयितान्यायुधानिच २८ यानमास्थायजह्येतद्व्यसनात्स्वान्समुद्धर ॥ एतदर्थंहिनौजन्मसाधूनामीशसत्कृतम् २९ त्रयोविंश
त्यनीकानांभूमेर्भारमपाकुरु ॥ एवंसंमंत्र्यदाशार्हौदंशितौरथिनांवरौ ३० दंशितैश्चयदुश्रेष्ठैर्बहुभिश्चसमन्वितौ ॥ निर्जग्मतुःपुरवराद्बलेनाल्पीयसानृप
३१ निर्गत्यसदनात्कृष्णोवृष्णीनाहूयसर्वशः ॥ आज्ञापयामासतूर्णंचतुर्द्वारस्यपालने ३२ वसुदेवंचनिशठंकृतवर्माणमुद्धवम् ॥ कृष्णोनिर्यातयामा
सपूर्वद्वारेणभारत ३३ उग्रसेनंसुदामानंपृथुंविपृथुमेवच ॥ हरिर्निर्यातयामासद्वारेणानुत्तरेणवै ३४ सात्यकिंचगदंचैवप्रसेनंगांदिनीसुतम् ॥ हरिःप्र
तीचीद्वारेणप्रेषयामासदुर्मदान् ३५ गोविंदस्तुमहातेजाःस्वयंदारुकसारथिः ॥ आत्ताभीष्टप्रहरणःसंकर्षणसहायवान् ३६ उत्तरेणविनिर्गम्यद्वारेणजगदी
श्वरः ॥ शंखंदध्मौमहाप्राणंदैत्यदानवभीषणम् ॥ आहदारुकमासीनंरथाग्रेमाधवःस्मयन् ३७

तेषांत्वावत्तामितिपाठश्छांदसः २८ साधूनांसाधुभिःसत्कृतम् कृद्योगेषष्ठी २९ त्रयोविंशत्यनीकानांत्रयोविंशत्यक्षौहिणीनांसमुत्पन्नंभूमेर्भारम् ३० ३१ ३२ ब्रह्मसूत्रादयोवसुदेवादिशब्दवाच्याः
३३ ३४ दुःखंमंदयंतिअल्पीकुर्वतीतिदुर्मदास्तान् नुमागमाभावच्छांदसः ३५ ३६ महाप्राणंमहाघोषम् ३७

युद्धदुर्मदान् युद्धेदुष्टमदान् ३८ ३९ ४० वसुदेवादिभिश्चतुर्भिः कलिंगाद्यष्टानां कदङ्कदार्हसार्थाविति धातुः कदनंयुद्धम् ४१ गोविंदेनाध्मातमाश्वासितंचेतोयेषांतेतथा तेषांराजन्यानांकटकेनसैन्येन सैन्येपिकटकोऽस्त्रियामित्यभिधानम् समूहेनवा ४२ ४३ ४४ ४५ माधवौमधुकुलेजातौसैन्येनयानध्वजै·रथध्वजैर्वाजिभिरश्वैःसारथिभिश्चसहितौ वाजीत्वश्वेशरेखगेइति अभ्रैःजलधरैरेणुभिश्च ४६ सुपर्णतालध्वजाभ्यांचिह्नितौअंकितौ हरिरामयोःकृष्णबलभद्रयोःरथौ विलक्षयंत्योःपश्यंत्योःपुरंगृहम् अट्टालकंगृहोपरिष्टकादिविरचितचतुरस्रस्थलं हर्म्यधनिनांवासः गोपुरंपुरद्वारम् अल्पवयसौ

श्रीभगवानुवाच ॥ रथंवाहयधर्मज्ञयत्रैतौचैद्यमागधौ ॥ तर्पयामिनृपान्मर्वान्सायकैर्युद्धदुर्मदान् ३८ श्रीशुक उवाच ॥ इत्युक्तोदारुकस्तेनहयांस्तूर्णमचोदयत् ॥ व्यनदत्सिंहनादंचगोविंदःपरवीरहा ३९ शंखमाध्मायरामोऽपिसिंहनादंव्यनीनदत् ॥ ततोऽभूत्परसैन्यानांहृदिचिंतासवेपथुः ४० पूर्वद्वारिनृपैःसार्द्धंयदूनांकदनंमहत् ॥ आसीच्चतुर्भिरष्टानांतदद्भुतमिवाभवत् ४१ दक्षिणद्वार्यपितथागोविंदाध्मातचेतसाम् ॥ आसीद्यदूनांकदनंराजन्यकटकेनवै ४२ अपरद्वार्यपितथायदूनांदृढधन्विनाम् ॥ आसीद्राजसमाजेनसंग्रामोरोमहर्षणः ४३ तेहन्यमानायदवोराजभिःशक्रविक्रमैः ॥ न चेलुःसंगराद्राजन्लोकद्वयजिगीषवः ४४ तत्रयादवशार्दूलोविष्णुस्त्रैलोक्यवल्लभः ॥ आससादमहाघोरौयत्रतौचैद्यमागधौ४५जरासुतस्तावभिवीक्ष्यमाधवौमहाबलौघेनबलीयसावृणोत् ॥ ससैन्ययानध्वजवाजिसारथीसूर्यानलौवायुरिवाभ्रेरेणुभिः ४६ सुपर्णतालध्वजचिह्नितौरथौविलक्षयंत्योहरिरामयोर्मृधे ॥ स्त्रियःपुराट्टालकहर्म्यगोपुरंसमाश्रिताःसंमुमुहुःशुचार्दिताः ४७ हरिःपरानीकपयोमुचांमुहुःशिलीमुखात्युल्बणवर्षपीडितम् ॥ स्वसैन्यमालोक्यसुरासुरार्चितंव्यधूर्णयच्छार्ङ्गशरासनोत्तमम् ४८ गृह्णन्निषंगादथसंदधच्छरान्विकृष्यमुंचञ्छितबाणसंचयम् ॥ निघ्नन्रथान्कुंजरवाजियूथपान्निरंतरंयद्वदलातचक्रम् ४९ ततःशशांकाकृतिपांचजन्यंमहारवंदैत्यकुलापचारम् ॥ मुखेनिधायाशुपुपूरयादवानाश्वासयन्क्षत्रियकूटघट्टितान् ५० नृपास्तदाकर्ण्यतुकर्णनिष्ठुरंक्रमेणनिर्भिन्नहृदोबभूविरे ॥ यदुप्रवीराश्चसमुद्यतायुधारणेनृपाञ्जघ्नुरनीकसंयुताः ५१ ततश्चतुर्द्वारगतान्महीपतीन्यदुप्रवीराःपरिभूयसर्वशः ॥ चक्रुःशरौघैःसहसैकवाहिनआप्यायिताःशार्ङ्गरवेणशौरिणा ५२ ततोहरिंचैद्यपतिर्मंडलीकृतकार्मुकः ॥ भर्त्सयन्कृष्णकृष्णेतितिष्ठतिष्ठेतिचाब्रवीत् ५३ तमभ्यधावद्गोविंदोविमुंचन्सायकान्बहून् ॥ मंडलीकृतकोदंडस्तैलधौताञ्छितान्शरान् ५४ ततःपंचशरान्घोरानादायदमघोषजः ॥ चतुर्भिस्तुरगानाशुविव्याधैकेनसारथिम् ५५

अल्पसेनौकृष्णरामौमागधंप्रलयार्णवोपमसेनंदृष्ट्वासमुत्पन्नयाशुचा ४७ व्यधूर्णयत्विस्फारयामास परानीकपयोमुचांशत्रुसेनामेघानाम् ४८ श्रीकृष्णस्यहस्तलाघवंकथयति गृह्णन्निति निषंगात्तूणीरात् भ्राम्यमाणमलातचक्रंउल्मुकमंडलंनिरंतरंछिद्रदर्शनंदुःशकंयद्वत्तद्वत् ४९ दैत्यकुलस्यापचारंनाशकरं क्षत्रियाणांकूटनसमूहेन घाट्टितान्सवोष्टितान् ५० क्रमेणतत्तद्योग्यतानुसारेण ५१ एकवाहिनःएकवाहनगतान् पृष्ठवाहनहीनानित्यर्थः ५२ ५३ ५४ दमघोषजःशिशुपालः ५५

सिंहनादंव्यनदत्सिंहनादंचकार ५६ वीरःशूरोसितबलवान्शक्तिमानसि ५७ धानुष्मत्त्वंधनुष्मतांमाहात्म्यम् ५८ आशुगैःशरैः ५९ ६० पदून्नंदयतिबलेनसमर्द्धयतीतियदुनंदनः ६१ ६२ ६३ ६४ कालांतमारुतेनप्रलयकालवायुना ६५ ६६ निर्भिन्नकुंभाःविदलीकृतमूर्धानः अनीकशःराशिशः करिप्रभृतयोनिर्भिन्नकुंभादयोबभूवुरित्यन्वयः ६७ अंगप्रसूताःदेहोत्पन्नाःअसृगापगाःरुधिरनद्यः भुजाएवाहयोयासुतास्तथा एवमुत्तरत्रापि कच्छपाःकूर्माःद्वीपाएवद्वीपाःअंतरद्वीपाः हयाएवग्रहाग्राहाः ६८ धनुस्तरंगैःआयुधगुल्मैश्चसंकुलाः आस्फूर्जिताः उन्नतस्थलादधः तज्जलध्वनयःतैराव र्त्तैःजलभ्रमणैश्चभयानकाःभयप्रदाः वृत्तफलकध्वनयोवास्फूर्जितास्तएवआवर्त्ताः महामणिप्रवेकाःप्रवेकाउत्तमाएवाश्मानःआभरणान्येवशर्कराःयासुतास्तथा ६९ संकर्षणेनएवंविधाअ

भूयोदशाशुसंधायविव्याधमधुसूदनम् ॥ व्यनदत्सिंहनादंचतदद्भुतमिवाभवत् ५६ ततस्तमाहगोविंदःसाधुसाध्वितिपूजयन् ॥ भोभोचैद्यमहेष्वास वीरोऽसिबलवानसि ५७ अतोमेपश्यदुर्बुद्धेधानुष्मत्त्वंस्वयंरणे ॥ इतिब्रुवतिगोविंदेराजानःसर्वएवते ५८ विव्यधुर्निशितैर्बाणैर्योगपद्येनमाधवम् ॥ तांस्तान्प्रत्येकशःकृष्णोविद्ध्वापंचभिराशुगैः ५९ सारथिंचतुरोवाहाननयद्यमसादनम् ॥ त्रिभिस्त्रिभिःशरैर्भूयोप्येकैकंनृपतीन्रणे ६० वक्षस्यास्येल लाटेचविव्याधयदुनंदनः ॥ ततश्चत्रिंशतांराज्ञांत्रिंशत्कार्मुकमाहवे ६१ त्रिंशद्भिःसायकैराशुचिच्छेदयदुपुंगवः ॥ दमघोषसुतस्यापिधनुश्छित्त्वात्रिभिः शरैः ६२ ध्वजंचमुकुटच्छत्रेचकर्त्तप्रहसन्निव ॥ ततोदशहरिर्भल्लान्शार्ङ्गेसंधायमाधवः ६३ आकर्णांतंसमाकृष्यचैद्यंविव्याधसंगरे ॥ तेनराजन्यकटकंवि भ्रांतंशरताडितम् ६४ कालांतमारुतोद्भूतशैलद्रुमलतोपमम् ॥ त्रातारंनाध्यगच्छद्वैहताश्वरथसारथि ६५ शरान्विमुञ्चञ्जलजंचपूरयन्विस्फूर्जय न्कार्मुकमुग्रपौरुषः ॥ विलोकयन्मागधसैन्यमाहवेनिरंतरंयद्वदलातचक्रम् ६६ निर्भिन्नकुंभाःकरिणोनिपेतुरनीकशोऽश्वाःशररुग्णकंधराः ॥ रथाहता श्चध्वजसूतनायकाःपदातयश्छिन्नभुजोरुकंधराः ६७ संछिद्यमानद्विपदेभवाजिनामंगप्रसूताःशतशोऽसृगापगाः ॥ भुजाहयाःपूरुषशीर्षकच्छपाहतद्विप द्वीपहयग्रहाकुलाः ६८ करोरुमीनानरकेशशैवलाधनुस्तरंगायुधगुल्मसंकुलाः ॥ आस्फूर्जितावर्त्तभयानकामहामणिप्रवेकाभरणाश्मशर्कराः ६९ प्रवर्त्ति ताभीरुभयावहामृधेमनस्विनांहर्षवहाःपरस्परम् ॥ विनिघ्नतारीन्मुसलेनदुर्मदान्संकर्षणेनापरिमेयतेजसा ७० बलंतदंगार्णवदुर्गभैरवंदुरंतपारंमगधेंद्रपा लितम् ॥ क्षयंप्रणीतंवसुदेवपुत्रयोर्विक्रीडितंतज्जगदीशयोःपरम् ७१ स्थित्युद्भवांतंभुवनत्रयस्ययःसमीहतेऽनंतगुणःस्वलीलया ॥ नतस्यचित्रंपरप क्षनिग्रहस्तथापिमर्त्यानुविधस्यवर्ण्यते ७२

सृगापगाः प्रवर्तिताइत्यन्वयः ७० अंगहेविष्णुरात यन्मगधेंद्रेणपालितंअर्णवदुर्गअतएवभैरवंदुरंतपारंचक्षुरविषयतीरांतरंअनवसितसमाप्तिंवा तद्बलंकृष्णरामाभ्यांक्षयंप्रणीतमित्यन्वयः जगदी श्वराभ्यामनायासेनकृतमेतद्युद्धमित्याह वसुदेवपुत्रयोरिति जगदीशयोःवसुदेवपुत्रयोःतद्युद्धंपरंकेवलंविक्रीडितं क्रीडामात्रमेव ७१ योनंतगुणोभुवनत्रयस्यस्वलीलयास्थित्युद्भवांतंसमीहतकरोति स्थि तिःउद्भवश्चअंतश्चतत्तथामिथोविरुद्धत्वादेकवद्भावः यद्यपितस्यहरेःपरपक्षनिग्रहःचित्रंनभवति तथापिमर्त्यानुविधस्यमनुष्यधर्ममनुकुर्वतोहरेस्तद्युद्धंबुद्ध्यवतारार्थंवर्ण्यतेप्रशस्यतइत्यन्वयः ७२

सीरिणंबलभद्रमापेतिशेषः ७३ ७४ ७५ व्यंसयित्वा वंचयित्वा ७६ ७९ हतानीकश्चहतसेनश्चअवशिष्टासुश्चअवशिष्टप्राणश्चसतथातं हतानीकावशिष्टास्वितिपाठेक्रियाविशेषणम् ७८ ७९ मुक्तोविसृष्टः ८० ८१ ८२ ८३ पुरंप्रविशतिसातिदुंदुभ्यादयोनेदुरित्यन्वयः ८४ कौतुकाभिर्दंडमालाभिराबद्धतोरणाम् ८५ निचीयमानःराशीक्रियमाणः ८६ यदुराजा

हतेषुसर्वसैन्येषुजरासंधोमहाबलः ॥ विद्रुतेष्ववशिष्टेषुरथेनैकेनसीरिणम् ७३ तावुभौगिरिसंकाशौमत्ताविवमहागजौ ॥ परस्परमयुध्येतांसामर्षौबलशालिनौ ७४ मागधस्तुगदांगुर्वीमादायामर्षविह्वलः ॥ भ्रामयित्वाशतगुणंचिक्षेपबलवक्षसि ७५ तामापतंतींतरसागदांशृंगोपमांगिरेः ॥ व्यंसयित्वाहलधरोमुधाचक्रेस्मयन्निव ७६ व्यर्थीकृत्यगदांतस्यमुसलेनहलायुधः ॥ पोथयित्वारथेक्षुब्धोनिहत्यरथसारथी ७७ जग्राहविरथंरामोजरासंधंमहाबलम् ॥ हतानीकावशिष्टासुंसिंहःसिंहमिवौजसा ७८ बध्यमानंहतानीकंपाशैर्वारुणमानुषैः ॥ वारयामासगोविंदस्तेनकार्यचिकीर्षया ७९ समुक्तोलोकनाथाभ्यांव्रीडितोवीरसंमतः ॥ वनंविविक्षुस्तपसेवारितःपथिराजभिः ८० हतेषुसर्वानीकेषुनृपोबार्हद्रथस्तदा ॥ उपेक्षितोभगवतामागधोदुर्मनाययौ ८१ मुकुंदोप्यक्षतबलोनिस्तीर्णारिबलार्णवः ॥ गृहीत्वामागधेंद्रस्यधनंस्त्रीकोशवाहनम् ८२ विकीर्यमाणःकुसुमैस्त्रिदशैरनुमोदितः ॥ माथुरैरभिसंगम्यविज्वरैर्मुदितात्मभिः ॥ उपगीयमानविजयःसूतमागधबंदिभिः ८३ शंखदुंदुभयोनेदुर्भेरीतूर्याण्यनेकशः ॥ वीणावेणुमृदंगानिपुरंप्रविशतिप्रभौ ८४ सिक्तमार्गांहृष्टजनांपताकाभिरलंकृताम् ॥ निर्घुष्टांब्रह्मघोषेणकौतुकाबद्धतोरणाम् ८५ निचीयमानोनारीभिर्माल्यदध्यक्षतांकुरैः ॥ निरीक्ष्यमाणःसस्नेहंप्रीत्युत्कलितलोचनैः ८६ आयोधनगतंवित्तमनंतंवीरभूषणम् ॥ यदुराजायतत्सर्वमाहृतंप्रादिशत्प्रभुः ॥ ८७ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्द्धेएकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ श्रीशुकउवाच ॥ तृतीयेमासिभूयश्चराजाबार्हद्रथोबली ॥ दिवानिशंतप्यमानःस्मरन्पूर्वपराभवम् १ आहूयसर्वभूपालान्चकारकलहोद्यमम् ॥ समस्त्यान्मालवांश्चेदीन्कुरुपांचालकेरलान् २ कुलिंदकुंतलावंतिकाशिगांधारसृंजयान् ॥ कलिंगकेकयानांध्रान्दशार्णान्वंगसैंधवान् ३ माद्रान्त्रिगर्तान्सौवीरान्पार्वतेयांश्चसर्वशः ॥ आहूयाक्षौहिणिगणैस्त्रयोविंशतिभिर्युतः ४ समागधानतिक्रम्यपश्चिमामिमुखोययौ ॥ आकर्षन्निवभूपालान्गजाश्वरथवल्लभान् ५ आगत्यमथुरांरोद्धुंप्राविशद्यमुनातटे ॥ स्कंधावारेणमहताराजभिर्बहुभिर्वृतः ६ उपगीयमानोन्यरमत्सूतमागधबंदिभिः ॥ तदाकर्ण्यरणोद्योगंमागधस्यबलीयसः ७ मंत्रयामासशर्वर्योकृष्णःसंकर्षणादिभिः ॥ वसुदेवोद्धवाक्रूरशैनेयाहुकसारणैः ८ एभिरालोच्यशर्वर्योसम्यङ्निर्द्धारितक्रियः ॥ उषस्यनुदितेसूर्येसमाहूयभटोत्तमान् ९

यउग्रसेनाय ॥ ८७ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटीकायामेकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥७॥ ॥ १ २ ३ ४ ५ स्कंधावारेणसैन्यनिवेशार्थंवस्त्रविरचितपुरांतःपुरादिगृहनिचयेन ६ ७ ८ ९

१० ११ १२ १३ १४ १५ १६ हयगताविति धातुः हयत्यनेनेतिहयः वैराणंपल्याणंअश्वपृष्ठासनमित्यर्थः श्रेणीबद्धाः पंक्तिबद्धाः पंजरंगजानांपृष्ठेशत्रुमुक्तशरस्तंभियंत्रयुतं १७ अनादत्तप्रहरणाः
अस्थीकृतायुधाः १८ पीतवाससःश्रीकृष्णस्यप्रवेशेप्रवेशसमये १९ विभ्रांतमनवस्थानं २० २१ तदाजरासंधसेनावस्थामप्रकारंकथयति केचिदिति २२ पर्याणमुभयपार्श्वावलंबकमापदंक

त्रिधाविभज्यगोविंदःस्वसेनांचतुरंगिणीम् ॥ न्ययोजयदमेयात्मामागधेंद्रबलंप्रति १० संकर्षणंचहार्दिक्यंगदंसारणमेवच ॥ वामेनप्रेषयामासमार्गेणम
धुसूदनः ११ सात्यकिंविपृथुंचैवपृथुमुद्धवमेवच ॥ दक्षिणेनैवमार्गेणप्राहिणोत्सेनयासह १२ स्वयंकतिपयैर्युक्तोरथैःकमललोचनः ॥ अग्रेमगधराजस्यप्र
विवेशमहद्बलम् १३ सासेनाबहुनागाश्वरथपादातिसंकुला ॥ प्रसुप्तायमुनातीरेविस्रब्धारमतेसुखम् १४ उदयाद्रिसमारोहत्यर्केतमसिनश्यति ॥ नी
डस्थेष्वेवकूजत्सुविहंगेषुततस्ततः १५ विकसत्सुसरोजेषुगायत्स्वलिकुलेषुच ॥ प्रविवेशबलंभीमंमागधेंद्रस्यदुर्जयम् १६ हयाश्चाबद्धवैराणाःश्रेणी
बद्धाःसमंततः ॥ कुंजराश्चतदाराजन्नारोपितपंजराः १७ अनादत्तप्रहरणाभटाश्चाबद्धनूर्धजाः ॥ अप्रविष्टाससंनाहास्तदानारूढवाहनाः १८ रथाश्चा
बद्धतुरगाःसर्वतोनुद्धृतध्वजाः ॥ सेनायांमगधेंद्रस्यप्रवेशेपीतवाससः १९ त्रिदिक्ष्वापतितंसैन्यंदृष्ट्वातद्राजमंडलम् ॥ इतिकर्तव्यतामूढंविभ्रांतंसमप
द्यत २० केचिद्भटाःसमापेतुर्भयात्केचिच्चदुद्रुवुः ॥ केचिदात्तप्रहरणास्त्वभिसस्रुररीन्रणे २१ केचिद्विभिन्नवर्माणश्छिन्नपादोरुबाहवः ॥ रिपूनेवा
भ्यवर्तंतक्रोधोद्वृत्तारुणेक्षणाः २२ केचिद्वयानपर्याणानारुह्यदृढविक्रमाः ॥ मर्दयंतोरिपून्युद्धेविमलंलोभिरेयशः २३ राजानःसहसोद्धुध्यदृष्ट्वासैनिकसं
क्षयम् ॥ विनारणोपस्करणंचक्रुःकेचनसंगरम्२४ केचिद्विसृज्यशिबिरंविविशुर्गहनंवनम् ॥ केचिन्मागधमासाद्यविजयस्वेतिचाब्रुवन् २५ रथेनैकेनगोविंदः
प्रविश्यरिपुवाहिनीम् ॥ जघानसुबहून्वीरान्सायुधान्सरणोद्यमान् २६ संकर्षणोपिबलवान्महत्यासेनयावृतः ॥ बलंप्रविश्यवामेनमर्दयामास
मागधम् २७ शैनेयोपिमहाबाहुर्दक्षिणेनैववर्त्मना ॥ प्रविश्यचतुरंगेणसैन्येनमहताऽर्दयत् २८ एवंसाव्यथितासेनामागधेंद्राभिरक्षिता ॥ दुद्रावत्रा
स्यमानावैक्षणमात्रेंदिशोदश २९ तामनुद्रुत्यवार्ष्णेयःसात्यकिःपंचयोजनम् ॥ निहत्यमागधंसैन्यंजयीव्यावर्त्ततादृवात् ३० मतंगजान्पर्वतसन्निभा
न्बहून्निगृह्यसोपस्करतोमरांकुशान् ॥ रथांश्चशस्त्रध्वजवाजिसंयुतान्निनायकृष्णोमथुरांमनोरमाम् ३१ छत्राणिहेमांबररत्नमिश्रितान्यनेकवालव्यजना
निमाधवः ॥ किरीटपट्टांगदकुंडलांशुकान्यवापकृष्णोऽगणितानिसंयुगे ३२ हलायुधोमागधकोशवाहनप्रजावरोधा युधभूषणादिकम् ॥ नियोजितः
कंसभिदारणाजितंयदुप्रवीरायधनंन्यवेदयत् ३३ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपंचाशत्तमोऽध्यायः ॥ ५० ॥ ॥ छ ॥

विकावा २३ रणोपस्करणंयुद्धसाधनं २४ २५ २६ २७ २८ २९ मगधस्यअधिपतिःमागधःतस्यमागधस्य विद्यमानमपिमागधंसैन्यं अन्यथामागधंनिहत्येत्यनन्वितंस्यात्
३० ३१ हेमांबरादीनिछत्राणीत्यस्यविशेषणानि ३२ ३३ इतिश्रीभागवतेमहापुराणेदशमस्कंधउत्तरार्धेविजयध्वजकृतटीकायांपंचाशत्तमोऽध्यायः ५०

रणश्लाघीअत्युत्कटरणमाकांक्षमाणः १ २ वारकांताकदंबैःगणिकास्त्रीनिकरैः ३ मांगल्यैर्मंगलद्योतकैः ४ ५ ६ ७ ८ द्वंद्वेनयुद्धेन ९ १० सत्क्रियांसत्कारं ११ राज सैन्यसहितं दृष्टंदर्शनकौतुकंस्वप्नकौतुकंयेनसतथास्वप्नेकौतुकंदृष्ट्वाकौतूहलबुद्धिर्भवति तथाबाणसंपदंदृष्ट्वानित्यर्थः दर्शनंचक्षुषिस्वप्नेबुद्धिशास्त्रोपलब्धिष्विति १२ १३ १४ रथानांनियुतंलक्षं १५

श्रीशुकउवाच ॥ मागधस्तुरणश्लाघीमाधवेनपराजितः ॥ जगामशोणितपुरंबाणंद्रष्टुंबलेःसुतम् १ तंतथायांतमाकर्ण्यवृतराजन्यमंडलम् ॥ मित्रंपरा जितंयुद्धेविष्णुनादानवेश्वरः २ अलंकृतैर्गजैरश्वैर्विचित्रस्यंदनैर्भटैः ॥ वारकांताकदंबैश्चसूतमागधबंदिभिः ३ ध्वजैःपताकैश्छत्रैश्चमांगल्यैःपटहस्वनैः ॥ सुवर्णतोरणैश्चित्रैर्दीपैःकलशदर्पणैः ४ उपतस्थेजरासंधंबाणोबाहुसहस्रवान् ॥ तौदृष्ट्वापरमस्निग्धौपरस्परमनोऽनुगौ ५ पूजांचक्रतुरन्योन्यमन्योन्य प्रियकारिणौ ॥ ततोऽब्रवीज्जरासंधोबाणमाभाष्यसंसदि ६ दानवेंद्रनिबोधेदंगोपेनाधर्मचारिणा ॥ रात्रौचौर्यप्रतापेनवंचितोऽस्मिदुरात्मना ७ गृही तावहवस्तुंगामातंगामदशालिनः ॥ तुरंगमाश्चबहवोरथाश्चसपरिच्छदाः ८ द्वंद्वेनसज्जमानंमामिमेभूपानसेहिरे ॥ निरुद्धस्तैरहंभूपैरेतैःसमसुखासुखैः ९ त्वत्सन्निधिमिहायातःसाहाय्यंकुरुमेप्रभो ॥ इत्युक्तस्तंनिजपुरंप्रवेश्यबलिनंदनः १० सराजमंडलायाशुकारयामाससत्क्रियाम् ॥ भोजनस्नानशयन गंधतांबूलपूर्वकैः ११ अर्हणैरर्हयामाससराजन्यंजरासुतम् ॥ तंभुक्तवंतंविश्रांतंदृष्टदर्शनकौतुकम् १२ अलंकृतंसहनृपैरासीनंकांचनासने ॥ उवाचदान वपतिर्नृपानाभाष्यसादरम् १३ बाणउवाच ॥ जरासंधनिबोधेदंनमृषाकथ्यतेमया ॥ एतेगजाइमेअश्वाइदंराज्यमिमाःप्रजाः ॥ त्वदधीनमिदंविश्वंय च्चान्यद्वस्तुविद्यते १४ श्रीशुकउवाच ॥ इत्युक्त्वाप्रददौतस्मैमागधायबलेःसुतः ॥ गजानांषष्टिसाहस्रंरथानांनियुतंतथा ॥ प्रयुतंचतुरंगाणांमनोमारु तरंहसाम् १५ दानवानांप्रसिद्धानांमायासंग्रामवेदिनाम् ॥ त्रिशतंस्वात्मसाम्यानांददौबाणोबलेःसुतः १६ विचित्रशिबिकाछत्रव्यजनाकल्पवाससाम् ॥ असंख्यातंददौराजन्भांडशय्यासनादिकम् १७ कुंभांडंकूपकर्णंचमंत्रिणौदैत्यसत्तमौ ॥ आज्ञापयामासबाणःसाहाय्यार्थंकुरूद्वह १८ क्रसुरासुरसंघा तसंहारणपटुर्हरिः ॥ कुंभांडकूपकर्णौक्रवराकौबाणमंत्रिणौ १९ अजानतोविष्णुशक्तिंभूपालाविनशिष्णवः ॥ चक्रुर्भूयोरणोद्योगंमागधेनप्रचोदिताः २० बाणेनसमनुज्ञातोमागधःशोणितात्पुरात् ॥ निर्गत्यानेकभूपालचतुरंगबलान्वितः ॥ दिनैःकतिपयैर्भूयोमथुरामन्वपद्यत २१ संनिरुध्यपुरद्वारं गोपुराट्टालतोरणैः ॥ दीर्घिकोपवनोद्यानैरुपेतंसालभूषितम् २२ कुंतैःकुठारैःकुद्दालैर्दंडभारैश्चभूरिभिः ॥ कर्षणस्थैश्चपाषाणैर्वभंजपरितःपुरम् २३ भज्यमानेपुरेतस्मिन्श्रुत्वामागधमागतम् ॥ सन्नाहभेरीःसन्नाद्यरामकृष्णावमार्षणौ २४

१६ १७ १८ अथजरासंधेनसहयोद्धुंश्रीकृष्णस्याशक्यमितिमंदाशंकांपरिहरति केति वराकौषंढातिलनिःसारौ १९ २० २१ सालैःप्राकारैःभूषितं २२ दंडभारैर्दीर्घाकृतनिशितपाग्रस्त्रर्वमयदं डैःकर्षणस्थैःपाषाणयंत्रनिहितैः२३ २४

रथाश्वकुंजरानीकैःसायुधैःसपरिच्छदैः ॥ सात्यकिंकृतवर्माणमुग्रसेनंतथागदम् २५ आहुकंवसुदेवंचपुरस्कृत्यमहाबलौ ॥ निर्जग्मतुरसंभ्रांतौदीप्तौकेसरिणौयथा २६ मथुरायाविनिर्गत्यकृष्णःकमललोचनः ॥ पांचजन्यंमहाशंखंप्रदध्मौरिपुभीषणम् २७ ततःप्रवृतेयुद्धंयदूनांक्षत्रियैःसह ॥ कुंभांडकूपकर्णौचदानवौबाणमंत्रिणौ २८ दैत्यसैन्येनमहतावृतौमायाविशारदौ ॥ युयुधातेमहावीर्यौमाययावृष्णिभिःसह २९ स्वसैन्यंमाययाक्लिष्टंदृष्ट्वायादवसत्तमः ॥ विज्ञानास्त्रेणतन्मायामपास्यनिमिषांतरे ॥ सात्यकिंकृतवर्माणंप्रोवाचाहवलालसौ ३० आभ्यांभवंतौरणदुर्मदाभ्यांरणंसुघोरंकुरुतांरणप्रियौ ॥ तावेवमुक्तौकदनंभयानकंमहाबलौसंप्रतिचक्रतुर्नृप ३१चापेनैकेनगोविंदःक्षत्रियैःशतसंमितैः ॥ युयुधेनाहितश्चित्ररांजन्विश्वात्मनोहरः ३२केचिद्धताःसमापेतुःकुंजराश्छिन्नपुष्कराः॥ निपेतुर्बहवोराजंस्तुरंगाकृत्तकंधराः ३३ विशीर्णैरास्तृतापृथ्वीस्यंदनैश्छिन्नबंधनैः ३४ भटाश्चरुधिराक्तागात्राश्छिन्नपादोरुबाहवः ॥ पेतुःकृत्तमहामूलाःकिंशुकाइवपुष्पिताः ३५शार्ङ्गमुक्ताःशरगणाःकंकबर्हिणवाससः ॥ तैलाक्तानतपर्वाणःस्वर्णपुंखाअयोमुखाः ॥एकैकस्मिन्दशदशभटेचाश्वेशतंशतम् ३६ रथेरथेचमाहस्रमयुतंचगजेगजे ॥ अदृश्यंतपरानीकेतदद्भुतमिवाभवत् ३७ तथातैर्ह्यमानेषुचतुरंगेषुमागधः ॥ रथेनक्रोडचिह्नेनबलभद्रमुपाद्रवत् ३८ सपूर्ववैरंनृपतिःस्मरन्रुषारथंमहाकांचनतालकूबरम् ॥ आलक्ष्यदूरादधिगम्यरंहसाजरासुतःप्राहहलायुधंगदी ३९ आदत्स्वतेमुसलंरामतूर्णंयेनाहितानिच्छसिजेतुमाहवे॥ बलंचबाह्वोस्तवदर्शयाशुमेयावद्वदांनप्रहराम्यहंत्वयि ४० इत्येवमुक्तोमगधेश्वरेण संकर्षणोमर्षणविह्वलेक्षणः॥ आदायघोरंमुसलंतडित्प्रभंदंडंयथासूर्यसुतोयुगक्षये ४१ आवर्त्तयित्वामुसलंहलायुधःसहस्रकृत्वोरिपुदर्पहारिणम् ॥ धूमांकुरोद्वारिणमाशुतस्मैचिक्षेपराजन्व्यनदद्वरिर्यथा ४२ रामबाहुविमुक्तेनमुसलेनजरासुतः ॥ साश्वसूतेरथेक्षुब्धेक्षणेनव्यंसितःस्वयम् ४३ ततःकालायसींगुर्वींगिरिकूटोपमांगदाम् बिभ्रद्गुर्वींपदापृथ्वींचालयन्नभ्यगाद्बलम् ४४ तमापतंतमालोक्यविरथंरोहिणीसुतः ॥ तमेवाभ्यद्रवत्पद्भ्यांविसृज्यस्यंदनंरणे ४५ पश्यतांसर्वभूतानांमागधःक्रोधविह्वलः ॥ आवर्त्तयन्गदांगुर्वींमयःसारमयींदृढाम् ॥ अभ्येत्यगदयारामंप्रजहारननादच ४६ तांगदांपतितांवक्षस्यश्मकुट्टनिभांदृढाम् ॥ वामेनजगृहेरामःस्वहस्तेनकुरूद्वह ४७ विसृज्यसगदांतूर्णमुरस्याहत्यमागधम् ॥ जग्राहाश्लिष्यबलिनंबलवान्रोहिणीसुतः ४८ बबंधपद्भ्यांजठरंमागधस्यहलायुधः ॥ चकारकुक्षौतत्कंठंततस्तौपेततुर्भुवि ४९

ष्ठानांबर्हिणांमयूराणांपक्षाएववासांसियेषांते ३६ २७ क्रोडचिह्नेनवराहलक्षणेनध्वजेन ३८ कांचनतालश्चकूबरःयुगंधरश्चयस्मिन्सतथा ३९ ४० सूर्यसुतोयमः ४१ हरिःसिंहः ४२ स्वयंमागधोव्यंसितोवंचितः ४३ कालायसींकृष्णगायोमयीम् ४४ ४५ ४६ अश्मकुट्टनिभांअश्मसारसमाम् ४७ ४८ ४९

तयोर्निपतितोराजन्नुपर्यासीद्बलायुधः ॥ तंमागधःक्षणेनाधश्चकारामितविक्रमः ५० ततउत्थायतौवीरौक्रोधसंरक्तलोचनौ ॥ भूयोजग्राहतुर्घोरौमत्तौद्वा विवकुंजरौ ५१ तावुभौपरमक्रुद्धौपरस्परवधैषिणौ ॥ उरसोरःसमाहत्यभीमौचक्रुषतूरणे ५२ एवंधनुःशतशतंतावाकृष्यपरस्परम् ॥ निकटस्थान्द्रुमान्शैलांश्चूर्णयामासतुर्नृप ५३ तंविमृज्यजरासंधोगदामादायदुर्मदः ॥ उदातिष्ठदमेयात्मारामोपिसमहाबलः ॥ क्षणादादत्तमुसलंप्रहर्तुमुपचक्रमे ५४ तंकामपालोमुसलेनमूर्ध्निजत्रुण्यंमेभुजयोर्नाभिदेशे ॥ ऊरौचजानौजठरेचवक्षस्यनेकशोवैप्रजहारयुद्धे ५५ तंमागधोवक्षसिकंधरेचमुखेललाटेचुबुकेतथांऽसे ॥ नाभौनितंबेचतथैवपार्श्वेसमंसमानीप्रजहाररामम् ५६ एवंप्रहरतोस्तत्ररामंमागधयोर्मृधे ॥ राजानोरणसंविग्नाबभूवुर्भृशपीडिताः ३७ क्रमेणतेविमनसोनिवृत्तकदनोद्यमाः ॥ आसन्नासन्ननिधनंमन्वानामागधेश्वरम् ५८ सात्यकिस्तुमहातेजाःसंगरेबाणमंत्रिणा ॥ युध्यमानस्त्रिभिर्बाणैःकुंभांडेनसमर्दितः ५९ सोऽतिविद्धोमहाबाहुःक्रुद्धःसर्पइवश्वसन् ॥ आददेपंचनाराचान्कुंभांडंहंतुमाहवे ६० ततोहाहारवोजज्ञेसेनायांदैत्यमंत्रिणः ॥ सात्यकिंरतंमहाबाहुराकृष्याकर्णमाशुगैः ६१ विव्याधकुरुशार्दूलंकुंभांडंबाणमंत्रिणम् ॥ नाभौकंठेललाटेचहृदिमूर्ध्न्यपिदानवम् ६२ अभिविद्धारथोपस्थेनिषसादविचेतनः ॥ तंविचेतनमालोक्यदुर्मनास्तस्यसारथिः ॥ अपोवाहरणात्तूर्णंरथेनभरतर्षभ ६३ कूपकर्णस्तुदैतेयःप्रसक्तःकृतवर्मणा ॥ गतंकुंभांडमालोक्यप्राप्तंचप्राणसंशयम् ॥ विसृज्यकृतवर्माणमपायात्समरांगणात् ६४ तौविसृज्यरणेदैत्यावनापृच्छ्यचभूपतिम् ॥ अविसृष्टौमागधेनहतशेषबलान्वितौ ॥ दैत्यौतेनैवमार्गेणजग्मतुःशोणितंपुरम् ६५ इतिश्रीभागवतेमहा०दशमस्कंधेउ०एकपंचाशत्तमोध्यायः ॥ ५१ ॥ श्रीशुकउवाच ॥ बाणसेनांगतांदृष्ट्वाशस्त्रौघेनभृशार्दिताः ॥ राजपुत्राविमनसोबभूवुर्नृपसत्तम १ गतांचदानवींसेनांश्रांतांश्चशरणार्थिनः ॥ दृष्ट्वाकृष्णंचयुध्यंतंराम स्यवदधेबलम् २ समागधंगृहीत्वाजौमौलौवामेनपाणिना ॥ प्रहर्तुमैच्छच्छिरसिमुसलेनहलायुधः ३ ततोंऽतरिक्षेवनघोषघर्घरांशुश्रावघोरांविशदाशरीरिणीम् ॥ नरामवध्योभवताजरासुतःसुखीनिवर्त्तस्वरणादितिस्फुटम् ४ वचस्तदाकर्ण्यहलायुधोबलीविसृज्यचास्थायरथंरणांगणात् ॥ न्यवर्ततब्रह्मर्षिसिद्धसंघैरभिष्टुतोमागधसूतबंदिभिः ५ जरासुतःसंप्रतिनम्रकंधरोनृपैश्चयुद्धाभिजितैःसमन्वितः ॥ हतावशिष्टाल्पबलेनसंवृतोनिवृतयुद्धःप्रययौस्वकंपुरम् ६ श्रीशुकउवाच ॥ गोविंदस्तुमहातेजाःसपत्न्यांऽछरसंचयैः ॥ आच्छाद्यभूपान्विद्राव्यहत्वाचसुबहून्रणे ७

तिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटीकायामेकपंचाशत्तमोऽध्यायः ५१ विमनसःयुद्धविरतमनसः १ दानवस्यबाणस्यविद्यमानाम् २ मौलौसंयतकेशे मौलिःसंयतकेशेषुचूडायांमुकुटेप्ययमिति ३ घर्घरांगंभीरां गांभीर्येनूपुरारावेघर्घरःसमुदाहृतइति अशरीरिणींशरीरहीनांदेवीमित्यर्थः ४ ५ ६ ७

सम्यक्प्रीतपुरुषैःमहतीविद्याशास्त्रविषयायेषांतेतथातैः ८ ९ १० ११ १२ १३ १४ १५ मथुरांरक्षितुंनिर्गम्यनिधार्य पंचम्यर्थेवाद्वितीया १६ गिरौवनोद्देशेवनेउन्नतप्रदेशे वृक्षमूलेनिवासिनंकृता
वासं कंचनलोकविलक्षणम् १७ १८ १९ फलंलाभःआनंदःचेतनस्यमूलंज्ञानंतेएवकृतेपूर्णेआहारोपस्पसतथातम् २० प्रणामंचक्रतुरित्यादिनाप्रतीयमानःकृष्णभार्गवरामयोःनम्यनंतृभावोभेदावि

संस्तूयमानःसंतुष्टैःसूतमागधबंदिभिः ॥ ब्राह्मणैश्चमहाविद्यैःस्तोत्रंकुर्वद्भिरुच्चकैः ८ अन्वीयमानोभगवान्प्राविशन्मथुरांपुरीम् ॥ हृष्टपुष्टजनाकीर्णांतुंगप्रा
कारतोरणाम् ९ चलत्कदलिकोपेतांदीपांकुरविराजिताम् ॥ प्रविशन्राजमार्गेणस्त्रीभिःप्रासादसंस्थितैः १० पुष्पैश्चलाजांजलिभिःकीर्यमाणोव्यराजत ॥
उपायनानिदिव्यानिपुष्पस्रगनुलेपनान् ११ प्रियंकरामाधवाभ्यामुपजहुःपुरौकसः ॥ एवंसराजमार्गेणगत्वायादवसत्तमः १२ सभांप्रविश्यविपुला
मुपविश्यवरासने ॥ रामेणसहितोवीरःशैनेयेनचयमिता १३ पूजितोयदुभिर्विप्रैर्दिविशक्रइवामरैः ॥ तत्रासीनैर्बुद्धिमद्भिर्यदुवृद्धैर्महात्मभिः १४ उग्रसे
नोद्धवमुखैरक्रूरप्रमुखैर्हरिः ॥ समाभाष्याभ्यनुज्ञातःसंकर्षणसहायवान् १५ द्रष्टुकामोमहादुर्गे गोमंतंपर्वत्तोत्तमम् ॥ निर्गम्यमथुरांप्रातर्दक्षिणाभिमुखो
ययौ १६ सरामानुगतःश्रीमानुत्तीर्ययमुनांहरिः ॥ देशान्बहूनतिक्रम्यपर्वतान्सरितोगिरौ १७ गच्छन्क्वचिद्वनोद्देशेवृक्षमूलनिवासिनम् ॥ ददर्शकंचन
मुनिंजटामंडलमंडितम् १८ चीरकृष्णाजिनधरंकमंडलुविराजितम् ॥ माधवौसमुपाविष्टंतेजसाभास्करोपमम् १९ फलमूलकृताहारंवृतंशिष्यशतै
र्मुनिम् ॥ दृष्ट्वापरमसंतुष्टौरामकृष्णौजगत्पती २० प्रणामंचक्रतुर्वीरौयथान्यायमतंद्रितौ ॥ इदंचोवाचभगवान्कृष्णस्तंमुनिपुंगवम् २१ नमस्तेभार्ग
वश्रीमन्जामदग्न्यतपोधन ॥ रामकृष्णौस्मृतावावांक्वचित्तेश्रवणंगतौ २२ इत्युक्तस्तेनधर्मात्मावासुदेवेनभार्गवः ॥ निरीक्ष्यमाधवौप्राहप्रीत्युत्फुल्लमुखे
क्षणः २३ स्वागतंतेयदुश्रेष्ठसाग्रजायमहात्मने ॥ जानेत्वांयदुपूत्पन्नंभगवंतमधोक्षजम् २४ कार्याणांकारणंपूर्वंजगतामादिपूरुषम् ॥ नमस्तेपुंडरीका
क्षविश्वलोकैककारण २५ किमर्थमिहसंप्राप्तौभवंतौविश्ववंदितौ ॥ इत्युक्तौजामदग्न्येनप्राहतूरामकेशवौ २६ गोमंतंद्रष्टुमिच्छावोदुर्गहेतोरिहप्रभो ॥
तदाकर्ण्याब्रवीद्रामोजामदग्न्योजनार्दनम् २७ एवमस्तुमहाबाहोगोमंतंगच्छसाग्रजः ॥ करवीरपुरंनामतन्मूलेपरिपालितम् २८ शृगालवासुदेवेनसयु
वांनसहिष्यति ॥ तंहत्वासमरेशैलंगोमंतंसाध्ववाप्स्यथ २९ इत्युक्तौतेनरामेणजामदग्न्येनमाधवौ ॥ तमनुज्ञाप्यसर्वज्ञंजग्मतुर्दक्षिणामुखौ ३० तौ
तथायदुशार्दूलौगच्छंतौदक्षिणापथम् ॥ ददर्शतुश्चगोमंतमभ्रंकषमहाद्रुमम् ३१

नाभावंगमयति तत्कथमुभयोर्विष्णुत्वेसंगच्छतइत्याशंक्य सर्वावतारामिन्नोपिसर्वशक्तिरपिस्वयं पूज्यपूजकनीचोच्चंमोहनायदुरात्मनां अखंडैकरसोविष्णुर्दर्शयेत्तत्रतत्रहीतिषाड्गुण्यवचनेनपरिहर
णीयेति २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० अभ्रंकषामहांतोद्रुमाःयस्मिन्सतथातं अभ्राणिमेघान्कषंत्युल्लिखंतीत्यभ्रंकषाः कषतेर्धातोरभ्रादिषूपपदेषुस्रग्प्रत्ययोभवति ३१

३२ ३३ ३४ ३५ पदातिनौपादैःसंचरमाणौ रथादिरहितावित्यर्थः ३६ ३७ वासुदेवौवसुदेवपुत्रौकृष्णशृगालौ ३८ वासुदेवस्यशृगालनाम्नः ३९ ४० प्रियसुहृद्यथातथापूजितौ ४१ तदी यैस्तस्यविद्यमानैः ४२ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटीकायांद्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ सालःसर्ज्जः तालस्तृणराजः तमालःकालस्कंधःप्रियालोराजादनःअ शोकोवंजुलःसालंसर्जचसूरयः तृणराजस्तालःकथ्यते कालस्कंधस्तमाल स्यात् राजादनःप्रियालःस्यात्वंजुलोऽशोकउच्यते १ कदंबोहरिप्रियः निंब :पिचुमंद: पिचुमंदस्तुनिंबःस्यात् हिंतालोवन

करवीरपुरंचैवतन्मूलेतुंगतोरणम् ॥ दृष्ट्वाविचित्रप्राकारंहर्म्यप्रासादगोपुरम् ३२ शंखमाध्मापयामासशंखचक्रगदाधरः ॥ तस्यशंखध्वनिंश्रुत्वाबभूव क्रोधविह्वलः ३३ शृगालोवासुदेवाख्यःप्रत्यगाद्यदुनंदनौ ॥ सोऽभ्येत्यबहुपादातितुरंगरथकुंजरः ३४ अभ्यवर्षच्छरौघेणछादयन्निवमाधवौ ॥ तद नीकमनाधृष्यंदृष्ट्वायादवसत्तमौ ३५ योधयामासतुर्वीरौद्यावेवाजौपदातिनौ ॥ सैन्यंचबाणपूगेनव्यथितंभृशविह्वलम् ३६ दृष्ट्वाशृगालभूपालस्तावधा वदमर्षणः ॥ तमायांतमभिप्रेक्ष्यरथिनंधृतकार्मुकम् ॥ न्यवारयद्वासुदेवोवेलेववरुणालयम् ३७ तावुभौपरमक्रुद्धौवासुदेवौमहाबलौ ॥ युयुधातेतथाऽ न्योन्यमन्योन्यवधकांक्षिणौ ३८ सतथाविद्यमानस्यवासुदेवस्यसंगरे ॥ शिरोजहारगोविंदःक्षणेनमुकुटोज्ज्वलम् ३९ ततस्तत्सैनिकाःसर्वेहतशेषाः कुरूद्वह ॥ कृष्णेनस्वामिनिहतेदुद्रुवुःसर्वतोदिशम् ४० ततस्तौरामगोविंदौकरवीरपुरंमहत् ॥ प्रविश्यपूजितौविप्रैर्वाणिग्भिश्चयथाप्रिय : ४१ तद्वजाश्वर थानीककोशादिधनसंचयम् ॥ मथुरांप्रेषयामासतदीयैर्भृत्यपूरुषैः ४२ इतिश्रीभागवतेमहापुराणेदशमस्कंधोद्विपंचाशत्तमोऽध्यायः ५२ श्रीशुकउवाच गोमंतंपर्वतश्रेष्ठंतुंगद्रुमलतान्वितम् ॥ सालतालतमालाढ्यंप्रियालाशोकशोभितम् १ कदंबनिंबहिंतालपूगपुन्नागशोभितम् ॥ आरुह्यकदलीखंडमंडि तंमत्तकोकिलम् २ भ्रमद्भ्रमरसंघातप्लवंगाकंपितद्रुमम् ॥ फलभारनतैःस्कंधैर्नारिकेलैर्विराजितम् ३ बहुप्रस्रवणोपेतंसुच्छायंनिर्मलोदकम् ॥ रम्यंदृ शतुर्वीरौप्रदेशंरामकेशवौ ४ तत्रप्रवर्षणंनामशृंगंपर्वतमूर्धनि ॥ अवापतुर्यत्रमेघानित्यंवर्षंत्यविक्लवाः ५ तत्रारुह्यदुश्रेष्ठौपरयंतौहिदिशोदश ॥ रम माणौयथाकाममूषतुःपर्वतोत्तमे ६ एतस्मिन्नेवकालेतुक्षीरोदेसागरोत्तमे ॥ निवासेदेवदेवस्यशंखचक्रगदाभृतः ७ उपासीनोमहाबाहुःश्रीमान्वैरोचनो बलिः ॥ जहारदेवदेवस्यकिरीटंरत्नाचित्रितम् ८ इंद्रनीलसहस्राढ्यंगोमेदकशताचितम् ॥ पद्मरागमहानीलमुक्ताफलविराजितम् ९ पुष्परागप्रवाला ढ्यंदिव्यकांचननिर्मितम् ॥ हृतंदानववीरेणविदित्वापुरपालकः ॥ तमन्वधावत्त्वरितंवैनतेयोविहंगराट् १०

क्रमुकः नागःनागकेसरः पूगोतिसारोग्रामक्रमुकः पुन्नागःसुरपर्णिका २ ३ बहुभिःप्रस्रवणैर्निर्झरैरुपेतं ४ ५ ६ ७ उपासीनोमहाबाहुरित्यादिनामुक्तगम्येक्षीरसागरेबलिनादानवेंद्रेणहरेःकिरीटहरणं गरुडेनतंजित्वाकिरीटमादायागच्छतामार्गेगोमंतेवसंतंश्रीकृष्णंदृष्ट्वाकिरीटहीनेतच्छिरसितन्निधानमुच्यते तत्रसंशयः अमुक्तस्यबलेर्गमनं अजमनिद्रस्वप्नमितिश्रुतेः नित्यनिरस्तनिद्रस्यहरेःकिरीट नयनमित्यादिकंकथंसंगच्छतइतीयमाशंका बहूनिस्थानजातानिकृष्णस्यक्षीरसागरइत्यादिमाहात्म्यवचनेनपरिहृतेतिज्ञातव्यम् ८ ९ १०

११ १२ १३ नमोनमइतिपुनरुक्तिरादरार्था पुरुषायेत्युक्तेजीवायेतिशंकास्यात् अतस्तन्निरासार्थकारणेतिकारणंबंधमोक्षयोरितिश्रुतेः जीवस्यापिकारणत्वप्रतीतेर्निरतुषत्वेनशंकानिवृत्तयेनारायणा
येति अयंशब्दोदेवदत्तादिशब्दवत्सांकेतिकोनभवति किंतुगुणनिबद्धइतिभावेनाह अखिलेति नतर्हिशौर्यादिगुणयोगोस्येत्यत्राह सुरारिराक्षसवत्संहारीवेत्रकोप्येनमाश्रयतीत्यत्राह नारायणेति
नारोनरसमुदायस्तदाश्रयोनारायणःतस्मै ननुसर्वाश्रयत्वंराजवद्धिस्थत्वेनोतांतःस्थत्वेनाहोस्विद्वायुवदुभयरूपेण नाद्यः अंतर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थितइतिश्रुतिव्याकोपात् नद्वितीयः
कर्मभोगप्राप्तेः नतृतीयः अखंडात्मनोद्वितीयत्वानुपपत्तेरितितत्राह अखिलेति १४ सृष्टिसंहारयोश्चतुर्मुखपंचमुखहेतुत्वोक्तेरस्याखंडहेतुत्वंकथमितितत्राह हिरण्यगर्भत्वमिति मूलेआदिकालेहिर

तमंतरेसमासाद्यदानवेंद्रंदुरासदम् ॥ कृत्वायुद्धंमहाघोरंजित्वादानवपुंगवम् ११ गृहीत्वारत्ननिचयंकिरीटंभास्करोपमम् ॥ आगच्छन्दद्दशेदेवंदेवकीनंदनं
हरिम् १२ वसंतंसाग्रजंरम्येगोमंतेपर्वतोत्तमे ॥ तस्यमूर्ध्निनिधायाशुकिरीटंदिव्यभूषणम् ॥ प्रणम्यपादयोर्मूर्ध्नास्तोतुंसमुपचक्रमे १३ गरुडउवाच ॥
नमोनमःकारणपूरुषायनारायणायाखिलवल्लभाय ॥ सुरारिसंहारणकारणायनारायणायाखिलकर्मसाक्षिणे १४ हिरण्यगर्भत्वमुपेत्यमूलेसृजस्यशेषं
भुवनंसएव ॥ नारायणात्मन्परिपासिभूयोजहारचांतेभगवन्नशिवात्मन् १५ तंत्वायदोर्वंशकरंसुरेशंजानेऽवतीर्णंभुवनेवृषाकपिम् ॥ अहंहिभृत्यस्तव
वैनतेयोवूहिक्रियांकिंकरवाणिदेव १६ श्रीशुकउवाच ॥ इत्युक्त्वादेवदेवेशंप्रणिपत्यविहंगराट् ॥ जानुनीधरणींकृत्वातस्थौप्रांजलिरग्रतः१७ तंदृष्ट्वायाद
वश्रेष्ठोगरुडंपांक्षपुंगवम् ॥ प्रीत्युत्फुल्लमुखोदोर्भ्यांपस्पर्शांगंतदुत्तमम् १८ गच्छभद्रयथाकाममेहिकालेमयास्मृतः ॥ इत्युक्त्वातंविसृज्योभावीश्वरौ
रामकेशवौ १९ फलमूलकृताहारौपीतनिर्झरवारिणौ ॥ अवरुह्यगिरेःशृंगात्करवीरपुरंगतौ २० तत्रतौचतुरोमासानुषित्वाभरतर्षभ ॥ महत्यासेनयासा
र्धंजग्मतुर्मथुरांपुरीम् २१ शृगालंनिहतंश्रुत्वामागधःक्रोधविह्वलः ॥ आजगामकुरुश्रेष्ठमहत्यासेनयावृतः २२ तेनसार्धमभूद्युद्धंसप्ताहंरामकृष्णयोः ॥
तदापराजितोयुद्धेमागधोबहुसैनिकः २३ जगाममागधानेववहुभिःक्षत्रियैःसह ॥ रामकृष्णौचधर्मज्ञौसूतमागधबंदिभिः २४ स्तूयमानौविविशतुः
सानुगौमथुरांपुरीम् ॥ एवंसप्तदशकृत्वस्तावदक्षौहिणीबलः २५ युयुधेमागधोराजायदुभिःकृष्णपालितैः ॥ अक्षिण्वतबलंसर्ववृष्णिभिःकृष्णतेजसा
२६ हतेषुतेष्वनीकेषुत्यक्तोऽयादरिभिर्नृप ॥ अष्टादशमसंग्रामेआगामिनितदंतरा २७ नारदप्रेषितोवीरोयवनःप्रत्यदृश्यत ॥ रुरोधमथुरामेत्य
तिसृभिर्म्लेच्छकोटिभिः २८

ण्यगर्भसृष्ट्रातदंतर्यामित्वेनतन्नामवाच्यत्वमुपेत्य भूयःपश्चान्नारायणात्मन्नारायणनामपरमात्मन्पुनःशिवात्मानंसृष्ट्रातदंतर्यामित्वेनतन्नामवाच्यं तदुक्तं ब्रह्मस्थोब्रह्मनामासौरुद्रस्थोरुद्रनामकइत्यादि
१५ एवंविधोविष्णुस्त्वमित्याह तंत्वेति भुवनेप्रसिद्धंवृषाकपिंविष्णुमवतीर्णंतत्सृष्ट्यादिहेतुंचजानइत्यन्वयः विष्णौरुद्रेवृषाकपिरित्यतोयदोर्वंशकरमित्यादिक्रियाविशेषणंकर्तव्यं धर्मप्रेरकत्वेनफलवर्ष
णाद्वृषः कस्यसुखस्यापातृत्वात्कपिः यद्वाअकादुःखात्शरणागतंजगत्पातीतिवृषाकपिरिति १६ १७ तस्यउत्तममंगंउत्तमांगंशिरइत्यर्थः १८ १९ २० २१ २२ २३
२४ २५ अक्षिण्वत अक्षीयत २६ २७ २८

नृलोकेचाप्रतिद्वंद्वोवृष्णीन्श्रुत्वात्मसंमतान् ॥ तंदृष्ट्वाऽचिंतयत्कृष्णःसंकर्षणसहायवान् २९ अहोयदूनांवृजिनंप्राप्तंह्युभयतोमहत् ॥ यवनोऽयंनिरुद्वेऽस्मानद्यश्वोवामहाबलः ३० मागधोऽप्येतिदुष्टात्मापरश्वोनैवसंशयः ॥ आवयोर्युध्यतोरस्ययद्यागच्छेज्जरासुतः ३१ बंधून्वधिष्यत्यथवानेष्यतेस्वपुरंबली ॥ तस्मादद्यविधास्यामोदुर्गंद्विपददुर्गमम् ३२ तत्रज्ञातीन्समाधाययवनंघातयामहे ॥ इतिसंमंत्र्यभगवान्दुर्गंद्वादशयोजनम् ३३ अंतःसमुद्रेनगरंकृष्णोऽद्भुतमचीकृपत् ॥ दृश्यतेयत्रहित्वाष्ट्रंविज्ञानंशिल्पनैपुणम् ३४ रथ्याचत्वरवीथीभिर्ययावास्तुविनिर्मितम् ॥ सुरद्रुमलतोद्यानविचित्रोपवनान्वितम् ३५ हेमशृंगैर्दिविस्पृग्भिःस्फाटिकाट्टालगोपुरैः ॥ राजतारपुटैःकोष्ठैर्जुष्टंहैमैःस्वलंकृतैः ३६ रत्नकूटैर्गृहैर्हैमैर्महामरकतस्थलैः ॥ वास्तोष्पतीनांचगृहैर्वलभीभिश्चनिर्मितम् ३७ चातुर्वर्ण्यजनाकीर्णंयदूनांचगृहैर्लसत् ॥ सुधर्मांपारिजातंचमहेंद्रःप्राहिणोद्धरेः ३८ यत्रचावस्थितोमर्त्योमर्त्यधर्मैर्वियुज्यते ॥ यत्प्रियंदेवदेवस्यविष्णोःक्षीरोदवासिनः ३९ श्यामैककर्णान्वरुणोहयान्शुक्लान्मनोजवान् ॥ ददौसहस्रसंख्यातान्देवदेवायतोयराट् ४० अष्टौनिधिपतिःकोशान्रत्नपूर्णानविक्षयान् ॥ तथान्येलोकपालाश्चदद्युःस्वाधिकृतंधनम् ४१ यद्यद्भगवतादत्तमाधिपत्यंस्वसिद्धये ॥ सर्वं प्रत्यर्पयामासुर्हरौभूमिगतेनृप ४२ तत्रयोगप्रभावेणनीत्वास्वान्भगवान्हरिः ॥ मथुरायाश्चरामेणकृष्णःसमनुमंत्रितः ४३ निर्जगामपुरद्वारात्पद्ममाली निरायुधः ४४ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेत्रिपंचाशत्तमोऽध्यायः ५३ ॥ श्रीशुकउवाच ॥ तंविलोक्यविनिष्क्रांतमुज्जिहानमिवोडुपम् ॥दर्शनीयतमंश्यामंपीतकौशेयवाससम् १ श्रीवत्सवक्षसंभ्राजत्कौस्तुभामुक्तकंधरम् ॥ पृथुदीर्घचतुर्बाहुंनवकंजारुणेक्षणम् २ नित्यप्रमुदितंश्रीमत्सुकपोलंशुचिस्मितम् ॥ मुखारविंदंबिभ्राणंस्फुरन्मकरकुंडलम् ३ वासुदेवोह्ययमितिपुमान्श्रीवत्सलांछनः ॥ चतुर्भुजोऽरविंदाक्षोनवमाल्यतिसुंदरः ४ लक्षणैर्नारदप्रोक्तैर्नान्योभवितुमर्हति ॥ निरायुधश्चरन्पद्भ्यांयोत्स्येऽनेननिरायुधः ५

२९ उभयतोमागधाद्यवनाच्चप्राप्तंवृजिनंदुःखम् ३० अस्येतिषष्ठीतृतीयार्थे अनेनसह चावयोर्युध्यतोः ३१ दुःखंगच्छत्यस्मिन्नितिदुर्गं सुदुरोरधिकरणइतिगमेर्डप्रत्ययः विशिनष्टि द्विपदेति द्वेपदेयेषांतेतथाद्विपदः पदेतिनिपातोविवक्षितः मनुष्यैरगम्यामित्यर्थः ३२ ३३ त्वष्टुर्विश्वकर्मणोविद्यमानंत्वाष्ट्रम् किंतद्विज्ञानमत्राह शिल्पनैपुणमिति शिल्पविद्यापटुत्वम् ३४ रथ्याराजमार्गः वीथीवणिजांमार्गः यथावास्तुवास्तुलक्षणमनतिक्रम्य दिविस्पृग्भिःहृद्युभ्यामुपसंख्यानमित्यलुक्समासः ३५ राजतैःरजतमयैररपुटैर्लोहविशेषैः क्लृप्तैःकोष्ठैरंतर्गृहैः ३६ रत्नकूटैःरत्न

शृंगैः वास्तोष्पतीनांवास्तुदेवतानाम् ३७ ३८ मर्त्यधर्मैर्जरादिलक्षणैःक्षीरोदशायिनोविष्णोर्यत्प्रियंहृद्यंतदपिददौ ३९ ४० निधिपतिःकुबेरः अष्टौकोशान्निधीन् अविक्षयानव्ययान्स्वाधिकृतंस्वकीयत्वेनाभिमतम् ४१ क्षीरोदधिमथनेहरिणादत्तम् ४२ योगप्रभावेणमथुरास्थितपदार्थराशिर्यथाद्वारकास्थितोभवतितथाकरणसामर्थ्येनरामेणसमनुमंत्रितःसहितः ४३ ४४ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांत्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ ७ ॥ ॥ उज्जिहानमुद्यंतम् १ २ ३ ४ ५

जिघृक्षुर्ग्रहणेच्छुः ६ दूरमद्रिकंदरंप्रतिनीतःपदेपदेहस्तप्राप्तमिवात्मानंदर्शयित्वेतिशेषः दर्शयताआत्मानमितिशेषः ७ अहताशुभः अनष्टपापः ८ ९ १० ११ १२ कस्यपुत्रइतिशेषः यवनमर्दित
वान्हिंसितवान् १३ १४ तेषांसुराणांरक्षाम् १५ स्वःपालंस्वर्गरक्षाकरं परिपालनाज्जातात्कृच्छ्रात् १६ उज्झितास्त्यक्ताः १७ तुल्यकालीनास्तत्कालसमानजाताः कालिताःकालेनविना

इतिनिश्चित्ययवनःप्राद्रवंतंपराङ्मुखम् ॥ अन्वधावाजिवृक्षुस्तंदुरापमपियोगिनाम् ६ हस्तप्राप्तमिवात्मानंहरिणासपदेपदे ॥ नीतोदर्शयतादूरंयवने
शोऽद्रिकंदरम् ७ पलायनंयदुकुलेजातस्यतवनोचितम् ॥ इतिक्षिपन्ननुगतोनैनंप्रापाहताशुभः ८ एवंक्षिप्तोपिभगवान्प्राविशद्गिरिकंदरम् ॥ सोपिप्रविष्ट
स्तत्रान्यंशयानंददृशेनरम् ९ नन्वसौदूरमानीयशेतेमामिहसाधुवत् ॥ इतिमत्वाच्युतंमूढस्तंपदासमताडयत् १०सउत्थायचिरंसुप्तःशनैरुन्मील्यलोचने ॥
दिशोविलोकयन्पार्श्वेतमद्राक्षीदवस्थितम् ११ सतावत्तस्यरुष्टस्यदृष्टिपातेनभारत ॥ देहजेनाग्निनादग्धोभस्मसादभवत्क्षणात् १२ ॥ राजोवाच ॥
कोनामसपुमान्ब्रह्मन्कस्यकिंवीर्यएववा ॥ कस्माद्गुहागतःशिश्येकिंतेजोयवनार्दनम् १३ श्रीशुकउवाच ॥ सइक्ष्वाकुकुलेजातोमांधातृतनयो
महान् ॥ मुचुकुंदइतिख्यातोब्रह्मण्यःसत्यसंगरः १४ सयाचितःसुरगणैरिंद्राद्यैरात्मरक्षणे ॥ असुरेभ्यःपरित्रस्तैस्तद्रक्षांसोऽकरोच्चिरम् १५ लब्ध्वागु
हंतेस्वःपालंमुचुकुंदमथाऽब्रुवन्॥राजन्विरमतांकृच्छ्राद्भवान्नःपरिपालनात् १६ नरलोकंपरित्यज्यराज्यंनिहतकंटकम् ॥ अस्मान्पालयतोवीरकामास्तेसर्वउ
ज्झिताः १७ सुतामहिष्योभवतोज्ञातयोऽमात्यमंत्रिणः ॥ प्रजाश्चतुल्यकालीनानाधुनासंतिकालिताः १८ कालोबलीयान्बलिनांभगवानी
श्वरोऽव्ययः ॥ प्रजाःकालयतेक्रीडन्पशुपालोयथापशून् १९ वरंवृणीष्वभद्रंतेऋतेकैवल्यमात्मनः ॥ एकएवेश्वरस्तस्यभगवान्विष्णुरव्ययः २०
एवमुक्तःसवैदेवानभिवाद्यमहायशाः ॥ अयाचतगुहाविष्टोनिद्रांतुबहुकालिकीम् २१ तथेत्युक्तस्तुतैर्देवैर्मुचुकुंदोमहामनाः ॥ अशयिष्टगुहावि
ष्टोनिद्रयादेवदत्तया २२ यवनेभस्मसान्नीतेभगवान्सात्वतर्षभः ॥ आत्मानंदर्शयामासमुचुकुंदायधीमते २३ तमालोक्यघनश्यामंपीतकौशे
यवाससम् ॥ श्रीवत्सवक्षसंभ्राजत्कौस्तुभेनविराजितम् २४ चतुर्भुजंरोचमानंवैजयंत्याचमालया ॥ चारुप्रसन्नवदनंस्फुरन्मकरकुंडलम् २५ प्रेक्षणी
यंत्रिलोकस्यसानुरागस्मितेक्षणम् ॥ अपीच्यवयसंमत्तमृगेंद्रोदारविक्रमम् २६ पर्यपृच्छन्महाबुद्धिस्तेजसातस्यविस्मितः ॥ शंकितःशनकैराजाद्दुर्धर्ष
मतितेजसा २७ मुचुकुंदउवाच ॥ कोभवानिहसंप्राप्तोविपिनेगिरिगह्वरे ॥ पद्भ्यांपद्मपलाशाभ्यांविचरस्युरुकंटके २८

शिताः १८ कालयतेउभयपदी कालःकइतितत्राह भगवानिति अव्ययःस्वरूपतोऽवयवतोगुणतोपिनाशरहितः १९ २० आत्मनस्तुबहुकालिकींबहुकालभोग्याम् २१ २२ २३ २४ २५ त्रिलोकस्य
मध्येदर्शनीयगुणम् २६ अतितेजसाअधिकतेजसा २७ गिरिगह्वरेप्रवेष्टुमशक्ये २८

तेजस्विनांज्योतिष्मतांपुंजीभूतमेकंतेजःकिंरिवत् सामान्योक्तंविशिनष्टि भगवानिति २९ त्रयाणांब्रह्मविष्णुशिवानांमध्येपुरुषर्षभंपुरुषश्रेष्ठंविष्णुंमन्ये यद्वा त्रयाणांब्रह्मरुद्रेंद्राणांत्रेताग्नीनांवा तत्रहेतुमाह यदिति गुहाध्वांतमित्युपलक्षणं ब्रह्मांडगुहाव्यापितिमिरमपि प्रदीपोनगृहांतर्वर्तिज्योतीरूपंपरंनगृह्यते किंतुसूर्योपि ३० अव्यलीकंसत्यंशुश्रूषतांश्रोतुकामानाम् ३१ ऐक्ष्वाकाइक्ष्वाकुकुले जाताः ३२ ३३ ३४ हतौजसःनष्टतेजसः ३५ ह्रादःनिःस्वनः ३६ मातुंसंख्यातुंनशक्यंतेकुतः अनंतत्वात् अतोनंतानामनंताइत्येवपरिसंख्यानमन्यथानंतत्वहानिः ३७ अनंतत्वमाह कश्चिदिति कश्चित्कइवब्रह्मेवसोऽपिमेजन्मानिगुणकर्माभिधानानिनविममे ३८ अनुक्रमंतःनिरंतरंपठंतः ३९ ४० भारायमाणानांभारवदाचरतां कर्तुःक्यङ्सलोपश्चेतिपाणिनिः गृहेभार्यालक्षणे ४१ निमित्तंकथयति वसुदेवेति ४२ तिग्मचक्षुषाचंडनेत्राग्निना ४३ ४४ ४५ ४६ अनर्थदृक्स्वपुरुषार्थदर्शीनभवतीत्यर्थः यद्वा अनर्थसंसारमर्थंपश्यतीति दुःखप्रभवेषुदुःखहेतुषुपुरुषेणवंचितायोषित्तयापुनः पुरुषश्चवंचितः ४७ मायया मोहितत्वमुपपादयति लब्ध्वेति अत्रकर्मभूमौ मानुषमंगंदेहं असत्सुविषयेषुमतिर्यस्यसतथाअंधकूपेपतितःपशुर्यथास्वदेहपंनभजतितथागृहलक्षणांधकूपे ४८

किंस्वित्तेजस्विनांतेजोभगवांस्त्वंविभावसुः ॥ सूर्यःसोमोमहेंद्रोवालोकपालोऽपरोपिवा २९ मन्येत्वांदेवदेवानांत्रयाणांपुरुषर्षभम् ॥ यद्रासमेगुहाध्वांतंप्रदीपःप्रभयायथा ३० शुश्रूषतामव्यलीकमस्माकंनरपुंगव ॥ स्वजन्मकर्मगोत्रंवाकथ्यतांयदिरोचते ३१ वयंतुपुरुषव्याघ्रऐक्ष्वाकाःक्षत्रबंधवः ॥ मुचुकुंदइतिप्रोक्तोयौवनाश्वात्मजःप्रभो ३२ चिरंप्रजागरश्रांतोनिद्रयोपहतेंद्रियः ॥ शयेऽस्मिन्विजनेकामंकेनाप्युत्थापितोऽधुना ३३ सोपिभस्मीकृतोनूनमात्मीयेनैवपाप्मना ॥ अनंतरंभवान्श्रीमान्लक्षितोऽमित्रशासनः ३४ तेजसातेऽविषह्येणभूरिद्रष्टुमशक्नुमः ॥ हतौजसोमहाभागमाननीयोऽसिदेहिनाम् ३५ एवंसुभाषितोराज्ञाभगवान्भूतभावनः ॥ प्रत्याहप्रहसन्वाण्यामेघह्रादगभीरया ३६ श्रीकृष्णउवाच ॥ जन्मकर्माभिधानानिसंतिमेऽगसहस्रशः ॥ नशक्यंतेऽनुसंख्यातुमनंतत्वान्ममापिहि ३७ कश्चिद्रजांसिविममेपार्थिवान्युरुजन्मभिः ॥ गुणकर्माभिधानानिनमेजन्मानिकर्हिचित् ३८ कालत्रयोपपन्नानिजन्मकर्माणिमेनृप ॥ अनुक्रमंतोनैवांतंगच्छंतिपरमर्षयः ३९ तथाप्यद्यतनान्यंगशृणुष्वगदतोमम ॥ विज्ञापितोविरिंचेनपुराऽहंधर्मगुप्तये ४० भूमेर्भारायमाणानामसुराणांक्षयायच ॥ अवतीर्णोयदुकुलेगृहआनकदुंदुभेः ४१ वदंतिवासुदेवेतिवसुदेवसुतंहिमाम् ॥ कालनेमिर्हतःकंसःप्रलंबाद्याश्चसद्विषः ४२ अयंचयवनोदग्धोराजंस्तेतिग्मचक्षुषा ॥ सोहंतवानुग्रहार्थंगुहामेतामुपागतः ४३ प्रार्थितःप्रचुरंपूर्वंत्वयाहंभक्तवत्सलः ॥ वरान्वृष्णीष्वराजर्षेसर्वान्कामान्ददामिते ४४ मांप्रपन्नोजनःकश्चिन्नभूयोऽर्हतिशोचितुम् ४५ श्रीशुकउवाच ॥ इत्युक्तस्तंप्रणम्याहमुचुकुंदोमुदान्वितः ज्ञात्वानारायणंदेवंगर्गवाक्यमनुस्मरन् ४६ मुचुकुंदउवाच ॥ विमोहितोऽयंजनईशमायया त्वदीययात्वांनभजत्यनर्थदृक् ॥ सुखायदुःखप्रभवेषुसज्जते गृहेषुयोषित्पुरुषश्चवंचितः ४७ लब्ध्वाजनोदुर्लभमत्रमानुषंकथंचिदप्यंगमयत्नतोऽनघ ॥ पादारविंदंनभजत्यसन्मतिर्गृहांधकूपेपतितोयथापशुः ४८

मर्त्यात्मबुद्धेर्देहात्मबुद्धेः ४९ देहात्मबुद्धित्वंदर्शयति कलेवरइति दुरंतविषयचिंतयादुष्टोमदोविद्याभिजनलक्षणोपस्यसतथा ५० धनादिनिमित्तमदस्यदुष्टत्वंकथमत्राह प्रमत्तमिति क्षुधाजिह्वयासृक्किणीलेलिहन् ५१ किमत्रप्रमाणमित्यतःप्रत्यक्षमेवेत्याह पुरेति योदेहःपुरानरदेवसंज्ञितः सएवदेहोदुरत्ययेनकालेनविट्कृमिभस्मसंज्ञितोभवतीतिशेषः श्वादिभक्षितोविष्ठासंज्ञितोभवति अदग्धःकृमिसंज्ञितः दग्धःभस्मसंज्ञितइतिविशेषः ५२ इदंचलज्जाकरमित्याह निर्जित्येति दिक्चक्रंदिङ्मंडलम् अभूतविग्रहःअजातयुद्धः वयसाकुलेनदानेनविद्ययाचसमैराजभिर्वंदितःबहिरेवंविधःपुरुषोमैथुन्यपरेषुग्राम्यसुखमात्ररतेषुयोषितांक्रीडामृगोगीयतइत्यन्वयः ५३ त्वद्भक्तिरहितस्यपुंसःकर्मकरणंगजस्नानतुल्यमितिभावेनाह करोतीति हेमहीशनिवृत्तभोगः तदपेक्षयातेषांभोगानांसजातीयभोगेच्छयासुनिष्ठितस्तद्योग्यदेवतापूजासुनितरांस्थिरोयःकर्माणितदनुगुणंतपश्चकरोति सपुनश्चधनाददद्भूयायभूयसेमहसेराधसेसंपदेप्रवृद्धतर्षः अत्युद्रिक्तनृष्णः सुखायनकल्पतेइत्यन्वयः सुखंनाममुक्ति

ममैषकालोऽजितनिष्फलोगतोराज्यश्रियोन्नद्धमदस्यभूपतेः ॥ मर्त्यात्मबुद्धेःसुतदारकोशेष्वासज्जमानस्यदुरंतचिंतया ४९ कलेवरेऽस्मिन्वटकुड्यसन्निभेनिरूढमानोनरदेवइत्यहम् ॥ वृतोरथेभाश्वपदात्यनीकैपर्गोपर्यटंस्त्वामगणय्यदुर्मदः ५० प्रमत्तमुच्चैरितिकृत्यचिंतयाप्रवृद्धलोभंविषयेषुलालसम् ॥ त्वमप्रमत्तःसहसाभिपद्यसेक्षुल्लेलिहानोऽहिरिवाखुमंतकः ५१ पुरारथैर्हेमपरिष्कृतैश्चरन्मतंगजैर्वानरदेवसंज्ञितः ॥ सएवकालेनदुरत्ययेनवैकलेवरोविट्कृमिभस्मसंज्ञितः ५२ निर्जित्यदिक्चक्रमभूतविग्रहोवरासनस्थःसमराजवंदितः ॥ गृहेषुमैथुन्यपरेषुयोषितांक्रीडामृगःपूरुषईशगीयते ५३ करोतिकर्माणितपःसुनिष्ठितोनिवृत्तभोगस्तदपेक्षयाददत् ॥ पुनश्चभूयायमहीशराधसेप्रवृद्धतर्षोनसुखायकल्पते ५४ भवापवर्गोभ्रमतोयदाभवेज्जनस्यतर्ह्यच्युतसत्समागमः ॥ सत्संगमोयर्हितदैवसद्गतौपरावरेशेत्वयिजायतेमतिः५५मन्येममानुग्रहईशतेकृतोराज्यानुबंधापगमोयदृच्छया ॥ यःप्रार्थ्यतेसाधुभिरेकचर्ययावनंविविक्षुद्भिरखंडभूमिपैः ५६ नकामयेऽन्यंतवपादसेवनादकिंचनप्रार्थ्यतमाद्वरंविभो ॥ आराध्यकस्त्वांह्यपवर्गदंहरेर्वृणीतआर्योवरमात्मबंधनम् ५७ तस्माद्विसृज्याशिषईशसर्वतोरजस्तमःसत्त्वगुणानुबंधनाः ॥ निरंजनंनिर्गुणमव्ययंपरंत्वांज्ञप्तिमात्रंपुरुषंव्रजाम्यहम् ५८ चिरमिहवृजिनार्तस्तप्यमानोऽनुपापैरविवृषउरुकृच्छ्रेलब्धशांतिःकथंचित् ॥ शरणदसमुपेतस्त्वत्पदाब्जंपरात्मन्नभयमृतमशोकंपाहिमापन्नमीश ५९

लक्षणम् तर्हिकदामोक्षःस्यादत्राह भवेति हेअच्युतनानायोनिषुभ्रमतोजनस्ययदासत्संगमः तर्हितदाभवापवर्गःस्यात् भगवज्ज्ञानफलंमोक्षःकथमन्यतःस्यादितितत्राह सत्संगमइति यर्हियदासत्संगमःस्यात्तदैवत्वयिश्रवणादिलक्षणःसंगमःस्यात् तस्मात्परावरेशेमुक्तामुक्तस्वामिनित्वयिमतिस्त्वत्प्रसादजनकंज्ञानंस्यात् ५५ अतोज्ञानद्वारासत्संगमोमुक्तिसाधनमसत्संगमोऽनर्थहेतुरितिगृहादिसंगत्यागःसत्संगहेतुरित्याशयेनाह मन्यइति तेत्वयाराज्यानुबंधापगमःराज्यस्यतदनुबंधकस्यकोशादेश्चापगमस्त्यागः एकचर्यया एकएवचरेद्भिक्षुरितिवचनात्एकाकित्वेनचरणंअखंडभूमिपैःसार्वभौमैःविविक्षुद्भिःप्रवेष्टुमिच्छद्भिः ५६ फलितमाह नेति आर्योज्ञानी आत्मनःस्वस्यबंधनंसंसारकारणंवरम् ५७ तर्हिकिंकरोषीतितत्राह तस्मादिति आशिषःस्वर्गादिसंपदः रजसामानुषः तमसाराक्षसादिः सत्त्वेनदेवादिः ज्ञप्तिमात्रंज्ञानघनम् ५८ अधुनाकर्तव्यंकिंतत्राह चिरमिति वृजिनार्तःदुःखक्लिष्टः एतदेवविवृणोति तप्यमानइति अविवृषःसतृष्णःउरुकृच्छ्रविषयेकथंचिल्लब्धशांतिःलब्धमोक्षःप्राप्तत्यागइत्यर्थः ऋतंशश्वदेकप्रकारम् आपन्नंसंसारकूपेपतितम् उरुकृच्छ्रेवृजिनार्तइतिवा ५९

६० वरैःप्रलोभितइतियत्तदप्रमादायाविद्धि नैतच्चित्रमित्याशयेनाह नेति ६१ क्षीणादुष्कर्मवासनायास्मिन्तत्तथा उत्थितंविषयाभिमुखम् ६२ ६३ ६४ केवलंमाम् केवलोनिर्गुणश्चेतिश्रुतेः ६५ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांचतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥ इक्ष्वाकोर्वंशंनंदयतीतिइक्ष्वाकुनंदनःसन्नम्यसम्यङ्नत्वा १ क्षुल्लकान्गुणतःपरिमाणतश्चाल्यमानान् २ इदंतत्त्वमुतातत्त्वमिदमितिसंशयोमुक्तोयेनसतथा ३ ४ प्रकृतमनुसरति भगवानिति यवनेनाहृतमानीतम् ५ त्रयोविंशत्यनीकपःत्रयोविंशदक्षौहिणीपतिः ६ रथनागाश्वपत्तिम

श्रीभगवानुवाच ॥ सार्वभौममहाराजमतिस्तोविमलोर्जिता ॥ वरैःप्रलोभितस्यापिनकामैर्विहतायतः ६० प्रलोभितोवरैर्यत्त्वमप्रमादायविद्धितत् ॥ नधीर्मय्येकभक्तानामाशीर्भिर्भिद्यतेक्वचित् ६१ ज्ञानिनामेकभक्तानांप्राणायामादिभिर्मनः ॥ नक्षीणवासनंराजन्दृश्यतेक्वचिदुत्थितम् ६२ विचरस्व महींकामंमय्यावेशितमानसः ॥ अस्त्वेवनित्यदातुभ्यंभक्तिर्मय्यनपायिनी ६३ क्षत्रधर्मस्थितोजंतूनवधीर्मृगयादिभिः ॥ समाहितस्तत्तपसाजह्यंमामुपाश्रितः ६४ जन्मन्यनंतरेराजन्सर्वभूतसुहृत्तमः ॥ भूत्वाद्विजवरस्त्वंवैमामुपेष्यसिकेवलम् ६५ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धे चतुःपंचाशत्तमोऽध्यायः ५४ श्रीशुकउवाच ॥ इत्थंसोऽनुगृहीतोंगकृष्णेनेक्ष्वाकुनंदनः ॥ तंपरिक्रम्यसन्नम्यनिश्चक्रामगुहामुखात् १ सवीक्ष्यक्षुल्लकान्मर्त्यान्पशून्वीरुद्वनस्पतीन् ॥ मत्वाकलियुगंप्राप्तंजगामादिशमुत्तराम् २ तपःश्रद्धायुतोवीरोनिःसंगोमुक्तसंशयः ॥ समाधायमनःकृष्णेप्राविशद्गंधमादनम् ३ बदर्याश्रममासाद्यनरनारायणाश्रमम् ॥ सर्वद्वंद्वसहःशांतस्तपसाराधयद्धरिम् ४ भगवान्पुनराव्रज्यमथुरांयवनाहृतम् ॥ हत्वाम्लेच्छबलंनिन्येतदीयंद्वारकांधनम् ५ नीयमानेधनेगोभिर्नृभिश्चाच्युतचोदितैः ॥ आजगामजरासंधस्त्रयोविंशत्यनीकपः ६ ततोराजाजरासंधःकालांतानलसन्निभः ॥ विधायमकरव्यूहंरथनागाश्वपत्तिमत् ॥ अंतश्चकारगोविंदंव्यूहस्यनिमिषांतरे ७ ततोविलोक्यगोविंदोवृक्षमुत्पाटयंरहसा ॥ गजानरथान्हयान्युद्धेपोथयामासदुर्मदः ८ कृष्णेनहन्यमानास्तेवृक्षेणरिपुकुंजराः ॥ पेतुर्गतासवोभूमौवज्रनुन्नाइवाद्रयः ९ रथाश्चरथिभिर्युक्ताःसतुरंगाःसचोदकाः ॥ निष्पिष्टाइवनक्वापिदृश्यंतेकुरुसत्तम १० रामस्तुमुष्टिनाचाजौकुंजरान्मदशालिनः ॥ जघानकुपितःशैलान्वज्रेणेवसुरेश्वरः ११ राममुष्टिप्रहारेणविकीर्णस्यंदनानृप ॥ नव्यदृश्यंतभूपृष्ठेचूर्णिताःशीर्णपर्णवत् १२ यवनस्यधनंविश्वंगच्छंतंद्वारकामनु ॥ निहत्ययादवान्विश्वांस्तद्गृहीत्वाजरासुतः १३ अभ्यवर्ततसंग्रामेरामकृष्णौकुरूद्वह ॥ विलोक्यवेगरभसंरिपुसैन्यस्यमाधवौ १४ तंचापतंतमालोक्यसहितंसबलैर्नृपैः ॥ कीर्यमाणौशरौघेणवृष्ट्येवकरिपोतकौ १५ विरथौविप्रहरणौविवर्माणौविसैनिकौ ॥ मनुष्यचेष्टामापन्नौराजन्दुद्रुवतुर्द्रुतम् १६

दितिक्रियाविशेषणम् रथादिमंतमितिव्यत्ययेनवायोज्यम् ७ दुर्मदोयथाजंतून्हंतितथा लुप्तोपमम् ८ अद्रयोगिरयः अद्रयोर्कगिरिद्रुमाइति ९ सतुरंगाःसचोदकाःससादिनः निष्पिष्टाः हताः १० ११ १२ यादवैर्द्वारकांगच्छंतंनीयमानंयवनस्यविश्वंधनंदृष्ट्वाअनुद्रुत्ययादवान्निहत्यनिर्जित्य १३ वेगरभसंवेगंसभ्रमम् १४ १५ १६

॥ १७ ॥ प्रमाणंज्ञानबलेपत्तांनवेत्तीतिअप्रमाणवित् ॥१८॥ १९ ॥ गोमंतंपर्वतमारुह्य ॥२०॥ प्रवर्षणाख्यंतस्यगोमंतस्यशृंगमापतुरितिशेषः तत्रशृंगेआसतुःउपविविशतुः ॥ २१ ॥ २२ ॥ २३ ॥

विहायवित्तंप्रचुरमभीतौभीरुमीतवत् ॥ पद्भ्यांपद्मपलाशाभ्यांचेरतुर्बहुयोजनम् १७ पलायमानौतौदृष्ट्वामागधःप्रहसन्बली ॥ अन्वधावद्रथानीकैरी शयोरप्रमाणवित् १८ प्रहृत्यवीरौविश्रांतौकरवीरपुरेनिशि ॥ तावारुरुहतुर्वीरौगोमंतमुदितेरवौ १९ सिद्धचारणगंधर्वविद्याधरनिषेवितम् ॥ आरुह्य शैलंगोमंतंरामकृष्णौत्वरान्वितौ २० प्रवर्षणाख्यंतच्छृंगंयत्राब्दानित्यवर्षिणः ॥ तत्रतावासतूराजन्फलमूलाशनौसुखम् २१ जरासंधस्तुतुष्टात्माता वनुद्रुत्यमाधवौ ॥ रुरोधशैलंगोमंतंमहत्यासेनयावृतः २२ समूपालान्समाहूयस्वानुगान्युद्धदुर्मदान् ॥ कलिंगंकुंजरपतिंसुराष्ट्राधिपतिंतथा २३ जयद्र थंसिंधुपतिंसोमदत्तंचकौरवम् ॥ गांधारराजंशकुनिंवैदर्भंरुक्मिणमेवच २४ सुदक्षिणंचकांबोजंविराटंमत्स्यभूपतिम् ॥ एतानाज्ञापयामासपूर्वस्यांदिशि भूपतीन् २५ पांचालराजंद्रुपदंदमघोषंचचेदिपम् ॥ ब्रह्मदत्तंचशाल्वेशमेकलव्यंनिषादपम् २६बाह्लिकंचकुरुश्रेष्ठंयुधामन्युंचदुर्जयम् ॥ विंदानुविंदावा वंत्यौकाशिराजंचपौंड्रकम् २७ आज्ञापयामासनृपानेतान्वीरोजरासुतः ॥ गिरिंगोमंतमारोढुंदक्षिणस्यांदिशिप्रभो २८ द्रुमंकिंपुरुषाधीशंदंतवक्रंसहानु जम्॥ वीरंविदेहराजानंभूरिश्रवसमेवच २९ करूषेशंबृहद्बापंदाशार्णंचशतध्वजम् ॥ शैब्यंसुवीरराजानंदरदंचमहारथम३०एतान्महीपतीन्राजाजरासं धोऽमितद्युतिः ॥ प्राहगोमंतमारोढुंपश्चिमस्यांदिशिद्रुतम् ३१ त्रिगर्तंवसुशर्माणंबलिनंवेणुदारिणम्॥ कुलिंदंचमहासत्वंकेकयानपिभूपतीन् ३२ शिशु पालंचभूपालंभीष्मकंचापिदुर्जयम् ॥ पुरस्कृत्यारुरोहाशुकौबेर्यांमागधोदिशि ३३ एवंगोमंतमारुह्यसर्वर्तुफलपादपम् ॥ विचित्यतत्रसर्वत्राप्यधःशृं गात्प्रवर्षणाद् ३४ चिच्छिदुःसकलान्वृक्षान्नापश्यन्नाममाधवौ ॥ गिरौविलीनावाज्ञायनाधिगम्यपदंनृप ३५ ददाहगिरिमेधोभिःसमंतादग्निमुत्सृजन् ततउत्प्लुत्यतरसादह्यमानात्तुतावुभौ ३६ दशैकयोजनोत्तुंगान्निपेततुरधोभुवि ॥ अलक्ष्यमाणौरिपुणासानुगेनयदूत्तमौ ३७ स्वपुरींपुनरायातौसमुद्रपरि खांनृप ॥ सोऽपिदग्धाविति मृषामन्वानोबलकेशवौ ३८ बलमाकृष्यसुमहन्मगधान्मागधोययौ ॥ अष्टादशेतुसंग्रामेजित्वायादवसत्तमौ ३९ हृष्टःस्वराष्ट्रेन्यवसज्जितदिङ्मंडलोनृप ॥ माधवौतुमहात्मानौप्रविश्यद्वारकांपुरीम् ४० स्तूयमानौदिवारात्रंसूत मागधबंदिभिः ॥ वृतावानंदबहुलैर्बंधु भिःसुखमूषतुः ४१ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेपंचपंचाशत्तमोऽध्यायः ५५ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ एधोभिःकाष्ठैः ॥ ३६ ॥ ३७ ॥ समुद्रएवपरिखासातंनदीयस्याःसातथा ॥ ३८ ॥ ३९ ॥ ॥ ४० ॥ ४१ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांपंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥ छ ॥

परापूर्वेषांसरूप्यांवृणक्तिवितर्तुराणोअपरेभिरेतीत्यादिश्रुत्यर्थदीपकन्यायेनदर्शयत्यस्मिन्नध्याये तत्रश्रीकृष्णोयुद्धेकुंतीसुतैर्बद्धंपांचालभूपतिंश्रुत्वाहृष्टस्तद्वृत्तांतविवित्सयातत्समीपेकृतवर्माणंप्रेषयामा सेति कथयति कदाचिदिति १ ब्राह्मणैरुक्तम् २ ३ ४ ५ ६ वासुदेवंशृगालनामानं वरुणालयेसमुद्रे ७ ८ ९ १० ११ १२ १३ १४ १५ आनंदनिर्भरः आनंदपूर्णोबभूवेत्यनेनपूर्णानंदत्वं सदातनंनकादाचित्कमितिसूचयति भूसत्तायामितिधातोः सत्तायाःसदातनत्वादिति १६ १७ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वज०टीकायांषट्पंचाशत्तमोऽध्यायः ॥ ५६॥

वि० अ० ५६

श्रीशुकउवाच ॥ कदाचिद्देवकीपुत्रोरामश्चैनेयसंयुतः ॥ सेव्यमानःसभायांवैनानादेशेश्वरैर्नृपैः १ पांचालराजंद्रुपदंबालैःकुंतीसुतैर्मृधे ॥ बद्धंशुश्राव कौरव्यब्राह्मणैःसत्रयाजिभिः २ तच्छ्रुत्वाहृष्टहृदयःकृतवर्माणमच्युतः ॥ नगरंहस्तिनपुरंप्रेषयामासवेदितुम् ३ सगत्वाहस्तिनपुरंवृद्धंकुरुपितामह म् ॥ ददर्शद्रोणविदुरधृतराष्ट्रकृपैर्वृतम् ४ युधिष्ठिरंचराजानंचतुर्भिर्भ्रातृभिर्वृतम् ॥ सभाजयामासभृशंकुंतींचहृदिकात्मजः ५ युधिष्ठिरोऽपिपप्रच्छसानुगंकेसमर्दनम् ॥ हतंचकालयवनंजरासंधंचनिर्जितम् ६ वासुदेवंचनिहतंकरवीरपुरेश्वरम् ॥ द्वारवत्याश्चकरणंनगर्यावरुणालये ७ हतौचहंसाडिभकौ ब्रह्मदत्तंचदुर्जयम् ॥ श्रुत्वाहार्दिक्यवचनाद्यथार्थेनयुधिष्ठिरः ८ मेनेत्रैलोक्यसाम्राज्यंस्वहस्तगतमक्षयम् ॥ सभाजितश्चहार्दिक्यःसुखसंभाषणादि भिः ९ पांडुपुत्रैस्तथाकुंत्यासौहार्दस्रुतबाष्पया ॥ हार्दिक्यस्ताननुज्ञाप्यबांधवान्पृथयासह १० मातृष्वसेयान्धर्मज्ञानभिवाद्ययथावयः ॥ गांगेये नाभ्यनुज्ञातोधृतराष्ट्रेणचानघ ११ विदूरेणांगराजेनद्रोणेनचकृपेणच ॥ प्राज्ञेनाचार्यपुत्रेणतथादुर्योधनेनच १२ कृतवर्माभ्यनुज्ञातोनिर्गत्यगजसाह्व याद् ॥ द्वारकांवृष्णिनिलयामाजगामादिनात्यये १३ सप्रविश्यसभांदिव्यामनेकनृपसेविताम् ॥ दृष्ट्वागोविंदमासीनंकांचनेपरमासने १४ वीजच्चामर संघातसहितंवनमालिनम् ॥ आचचष्टेऽखिलंतस्ययथादृष्टंयथाश्रुतम् १५ वृत्तांतंकौरवेयाणांनगरेगजसाह्वये ॥ तदाकर्ण्यहरिःसर्ववृत्तांतंजगदीश्वरः १६ पौरुषंपांडुपुत्राणांबभूवानंदनिर्भरः १७ इतिश्रीभागवतेमह्यपुराणेदशमस्कंधेउत्तरार्धेषट्पंचाशत्तमोऽध्यायः ५६ श्रीशुकउवाच ॥ आनर्ताधिप तिःश्रीमान्रेवतोरेवतींसुताम् ॥ ब्रह्मणाचोदितःप्रादाद्बलायेतिपुरोदितम् १ राजोवाच ॥ रेवतोनामराजासौब्रह्मणाचोदितःकथम् ॥ तदहंश्रोतुमि च्छामिविस्तरेणमहामुने २ श्रीशुकउवाच ॥ रेवतोनामराजासीत्पुराधर्मार्थतत्त्ववित् ॥ रेवतीनामतस्यैकाजज्ञेकन्यायशस्विनी३ सब्रह्माणंययौप्रष्टुंकस्मै दास्यामितामिति ॥ अदत्त्वायाच्यमानोपिनानाजनपदेश्वरैः ४ सभायांब्रह्मणस्तत्रगंधर्वौद्वौहाहाहूहू ॥ तास्मिन्नगायतांकालेग्राममूर्छाविचक्षणौ ५

अनित्यत्वात्संसारोहेयस्तदर्थकामक्रोधादिनिलयादेहात्संविदेवाहर्तव्येतिदर्शनायोत्तराध्यायत्रयस्यप्रारंभः आनर्तविषयाधिपतिः १ २ धर्मार्थौधर्मविषयोविष्णुस्तस्यतत्त्ववेत्तीति धर्मस्यअर्थस्यचतत्त्ववे त्तीति धर्मस्यार्थस्यतत्त्वंहरिविषयत्वलक्षणंवेत्तीतिवा ३ येयंममकन्यातांप्रतियाचकत्वसंभवात् कुतोनदत्तेत्यत्राह अदत्त्वेति ब्रह्मणःसर्वस्यगुरुत्वात्गुर्वनुज्ञापूर्वंकंक्रियमाणंसर्वफलवादित्यभिसंधायया चकेभ्योनदत्तेतिभावः ४ तत्रतस्मिन्नवसरे ग्राममूर्छाविचक्षणौसप्तस्वरगानविशेषविदग्धौ स्वराणांमंडलंग्रामआरोहावरोहः मूर्छासप्तस्वरात्रयोग्रामाएकविंशतिमूर्छनाइतिभरतः ५

अल्पार्थेकिंचेदित्यव्ययं अल्पकालमित्यर्थः६ ७ ८ त्वदभीष्टवरोनास्तितदानींतनकालीयानामतीतत्वादितिब्रह्मावक्ति तंप्राहेति तवतेतुभ्यंमनुष्यस्यसुबहूनियुगानिक्षणमात्रमिवगतानीति ९ तत्रनिमित्तमाह आश्चार्य्यमिति १० तर्हिकिंकर्त्तव्यमिति तत्राह इदानीमिति ११ १२ आदियुगंकृतंनाम १३ १४ १५ १६ तेषांपारंयथा तस्यहरेर्विवाहलक्षणंवरितंश्रोतुमिच्छामि १७ माध्वीःमधु

राजाऽतिष्ठद्बहिःकिंचित्तद्विरामप्रतीक्षया ॥ गीतावसानेपप्रच्छप्रणिपत्यपितामहम् ६ एषामेभगवन्कन्याकस्मैदास्यइमामिति ॥ तंप्राहपद्मभूःकस्ते राजपुत्रोविरोचते ७ तत्रान्यांश्चमहीपालानाचक्ष्वेतिकुरूद्वह ॥ ततस्तान्रेवतःप्राहभूपालान्विषयेश्वरान् ८ सतानाकर्ण्यनृपतीन्प्रहस्योवाचरेवतम् ॥ युगानितुबहून्यत्रगतानितवभूपते ९ क्षणमात्रमिवाश्चार्य्यंशृण्वतोगीतमेतयोः ॥ क्वेदानींतवतेभूपाःसुतायाःसदृशावराः १० इदानींराजशार्दूलयदुवंशविवर्द्धनौ ॥ वसुदेवगृहेजातौरामकृष्णाह्वयौप्रभू ११ तन्नसंकर्षणायेमांकन्यांयच्छस्वभूपते ॥ इत्युक्तस्तेनभूपालस्तंप्रणम्यपुरंगतः ॥ रामायप्रददौकन्यांरुपिणींबाहुशालिने १२ तामादियुगसंभूतांदीर्घदेहांमहाभुजः ॥ आकृष्यलांगलेनांसेसमांचक्रेहलायुधः १३ भगवानपिगोविंदउपयेमेकुरूद्वह ॥ वैदर्भीभीष्मकसुतामिंदिरांशांस्वयंवरे १४ प्रमथ्यतरसाराज्ञःशाल्वादींश्चैद्यपक्षगान् ॥ पश्यतांसर्वभूतानांतार्क्ष्यपुत्रःसुधामिव ॥ १५ ॥ राजोवाच ॥ भगवन्भीष्मकसुतांरुक्मिण्णींरुचिराननाम् ॥ राक्षसेनाविवाहेनउपयेमइतिश्रुतम् १६ भगवन्श्रोतुमिच्छामिकृष्णस्यामिततेजसः ॥ यथामागधशाल्वादीन्निर्जित्वातत्पारमागमत् १७ ब्रह्मन्विष्णुकथाःपुण्यामाध्वीर्लोकमलापहाः ॥ कोनुतृप्येतशृण्वानःश्रुतज्ञोनित्यनूतनाः १८ श्रीशुकउवाच ॥ राजासीद्भीष्मकोनामविदर्भाधिपतिर्महान् ॥ तस्यपंचाभवन्पुत्राःकन्यैकाचवराननाः १९ रुक्म्यग्रजोरुक्मरथोरुक्मबाहुरनंतरः ॥ रुक्मकेशोरुक्ममालीरुक्मिण्येषांस्वसासती २० सोपश्रुत्यमुकुंदस्यरूपवीर्यगुणश्रियः ॥ गृहागतैर्गीयमानास्तंमेनेसदृशंपतिम् २१ तांबुद्धिलक्षणौदार्यरूपशीलगुणाश्रयाम् ॥ कृष्णश्चसदृशींभार्यांसमुद्वोढुंमनोदधे २२ बंधूनामिच्छतांदातुंकृष्णायभगिनींनृप ॥ रुक्मीनिवार्यकृष्णद्विट्चैद्यायसमकल्पयत्२३ तदवेत्यासितापांगीवैदर्भीदुर्मनाभृशम् ॥ विचिंत्याप्तंद्विजंकंचित्कृष्णायप्राहिणोद्रुतम् २४ द्वारकांससमभ्येत्यप्रतीहारैःप्रवेशितः ॥ अपश्यदाद्यंपुरुषमासीनंकांचनासने २५ दृष्ट्वाब्रह्मण्यदेवस्तमवरुह्यनिजासने ॥ उपवेश्यार्हयांचक्रेयथात्मानंदिवौकसः २६ तंभुक्तवंतंविश्रांतमुपगम्यसतांगतिः ॥ पाणिनाऽभिमृशन्पादावव्यग्रस्तमपृच्छत २७ कच्चिद्द्विजवरश्रेष्ठधर्मस्तेवृद्धसंमतः ॥ वर्ततेनातिकृच्छ्रेणसंतुष्टमनसःसदा २८ संतुष्टोयर्हिवर्त्तेतब्राह्मणोयेनकेनचित् ॥ अहीयमानःस्वाद्धर्मात्सह्यस्याखिलकामधुक् २९ असंतुष्टःसुखंविप्रनाप्नोत्यपिसुरेश्वरः ॥ अकिंचनोपिसंतुष्टःशेतेसर्वांगविज्वरः ३०

राः १८ वरंमनोहरंआननंयस्याःसातथा १९ २० गृहागतैर्जनैः २१ २२ २३ असितापांगीनीलकटाक्षस्थला आप्तंविश्वस्तम् २४ २५ २६ अव्यग्रःअसंभ्रांतः २७ २८ यःस्वाद्धमादहयिमानःस्वधर्मत्यागीनस्यात् २९ सुरेश्वरोप्यसंतुष्टःसुखंनाप्नोति अकिंचनोदरिद्रोपिसंतुष्टःअलंबुद्धिः ३०

स्वतोलाभोयस्यधनस्यतत्तथातेन ३१ तस्यविषयेराष्ट्रे सराजामेप्रियः ३२ आगमनकारणंपृच्छतियतइति यत्तःकारणात्तत्सर्वंकारणम् ३३ परमेष्ठिनासर्वोत्तमेन ३४ धर्मःआत्मास्वरूपं
यस्यसतथां सुकृतविषयोवा स्पृहयन्निवकामयमानइव ३५ हेभुवनसुंदर श्रोतृणांकर्णविवरंनिर्विश्यांगतापंशरीरसंतापंहरतःसम्यग्गमोव्याप्तिर्येषांतेतथातान् स्वरूपाभिज्ञान्वातेतवगुणान्
श्रुत्वातेतवभुवनमंगलमंगलंपरमुत्कृष्टंरूपंचश्रुत्वामेचित्तंत्वय्यपत्रपमाविशति ३६ महतीविशाला मनोगुणेनेतिशेषः धामतेजः कुलवतीशुद्धवंशा नरलोकोमुक्तामुक्तप्रपंचस्तस्यमनोभिरा
मंमनांस्यभिरमयतीति ३७ अभिवृतःआभिमुख्येनवृतः एतद्वक्तप्रियत्वादिकं पादसरोजदास्याम यतोंऽघ्रिप्रणतास्मि ३८ तत्तस्मात्हेअंगहेअंबुजाक्षमांजायांविधेहिचशब्दएवार्थे अस्याः

विप्रान्स्वलाभसंतुष्टान्साधून्भूतसुहृत्तमान् ॥ निरहंकारिणःशांतान्नमस्येशिरसाऽसकृत् ३१ कच्चिद्वःकुशलंब्रह्मन्नराजतोयस्यहिप्रजाः ॥ सुखंवसंतिवि
षयेपाल्यमानाःसमेप्रियः ३२ यतस्त्वमागतोदुर्गंनिस्तीर्येहयदृच्छया ॥ सर्वंमेब्रूह्यगुह्यंचेत्किकार्यंकरवामते ३३ एवंसंपृष्टसंप्रश्नोब्राह्मणःपरमेष्ठि
ना ॥ विधायलिखितंपत्रंपादयोःप्रणनामतम् ३४ तदादायजगन्नाथःस्मितसुंदरलोचनः ॥ वाचयामासधर्मात्मासादरंस्पृहयन्निव ॥ ३५ ॥ रुक्मिण्यु
वाच ॥ श्रुत्वागुणान्भुवनसुंदरसंगमांस्तेनिर्विश्यकर्णविवरंहरतोंगतापम् ॥ रूपंपरंभुवनमंगलमंगलंतेत्वय्यच्युताविशतिचित्तमपत्रपंमे ३६ कात्वामु
कुंदमहतीगुणशीलरूपविद्याववयोद्रविणधामभिरात्मतुल्यम् ॥ व्रीडावतीकुलवतीनवृणीतकन्याकालेनृसिंहनरलोकमनोभिरामम् ३७ सत्वंमयाप्यभि
वृतःपतिरिंदिरायाभक्तप्रियःकृपणलोकशरण्यईशः ॥ मत्वैतदंगतवपादसरोजदास्याःकामंकुरुप्रियतमप्रणतास्मितेंऽघ्रिम् ३८ तन्मेभवान्खलुवृ
तःपतिरंगजायामात्मार्पितश्चभवतोऽत्रविभोविधेहि ॥ मावीरभागमभिमर्शतुचैद्यआराद्गोमायुवन्मृगपतेर्बलिमंबुजाक्ष ३९ पूर्तेष्टदत्तनियमव्रतदेवविप्र
गुर्वर्चनादिभिरलंभगवान्परेशः ॥ आराधितोयदिगदाग्रजएत्यपाणिंगृह्णातुमेनदमघोषसुतादयोन्ये ४० श्वोभाविनित्वमजितोद्वहनोविदर्भान्गुप्तां
समेत्यपृतनापतिभिःसमेतैः ॥ निर्मथ्यचैद्यमगधेंद्रबलंप्रसह्यमांराक्षसेनविधिनोद्वहवीर्यशुल्काम् ४१ अंतःपुरांतरचरान्निहत्यबंधूंस्त्वामुद्वहेकथमितिप्रव
दाम्युपायम् ॥ पूर्वेद्युरस्तिमहतीकुलदेवियात्रायस्यांबहिर्नववधूर्गिरिजामुपेयात् ४२ तत्रैत्यमांरथपदातिगजाश्वयुक्तःसंमथ्यशाल्वमगधान्सहचेदिभू
पान् ॥ आदायमांसहचरीभिरथोरमेशोगृह्णातुपाणिमुपनीयपुरींस्वकीयाम् ४३ यस्यांघ्रिपंकजरजस्तवनंमहांतोवांछंत्युमापतिरिवात्मतमोनिहत्यै ॥
यद्बंबुजाक्षनलभेयभवत्प्रसादंजह्यामसून्व्रतकृशाशतजन्मभिःस्याम् ४४

मेममात्मादेहःभवतोर्पितएव वीरस्यतवभागमात्मानं आरात्दूरात् स्थातुंयोग्यश्चैद्योमाऽभिमर्शतुमास्पृशतुतत्रदृष्टांतमाह गोमायुवदिति गोमायवःशृगालाःमृगपतेःसिंहस्यबलिमुपहारम् ३९ ४०
उद्वहनेविवाहेश्वोभाविनिश्चःप्रभातेभविष्यतिसतिसमेतैःपृतनापतिभिःगुप्तांविदर्भान्समेत्यराक्षसेनविधिनाबलात्कन्याहरणलक्षणेन वीर्यशुल्कंमौल्यंयस्याःसातथातांमाम् ४१ नववधूर्दर्शनाय ४२ ४३
यथोमापतिःश्रीहरिचरणसरसिजस्तुतिंकरोतितस्यतवयदिभवत्प्रसादंपज्यानुग्रहंनलभेय तर्हिअसून्प्राणान्जह्यांत्यक्ष्यामि किंचशतजन्मभिःव्रतकृशातवभार्यैवस्यामित्यर्थः ४४

४५ ४६ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांसप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ ७ ॥ १ ममद्वेषाद्रुक्मिणाविवाहोनिवारितइतामिमर्थंअहंवेदवेद्मि २ एधसः काष्ठादग्रेःशिखांज्वालां ३ उद्वाहर्क्षंविवाहनक्षत्रं ४ हयैर्युक्तं ५ ६ कार्याणिविवाहयोगकार्याणिअकारयत् ७ उक्तमेवस्पष्टयति पुरमिति प्राक्संमृष्टारत्यक्तावस्कराःपश्चात्संसिक्ताःगोमयोदकादिभिःक्षिताभागार्दयोयस्मिंस्तत्तथा ८ ९१०सुस्नाताऽभूदितिशेषः कृतंकौतुकंकुतूहलेमहोत्सवेमंगलंयस्याःसातथा यद्वा कृतंकौतुकंहस्तसूत्रलक्षणंमंगलंयस्याःसातथा आबध्नंतिकरेसूत्रमांगल्यार्थंयनव

श्रीशुकउवाच ॥ इतिपत्रगतंविश्वंविमृश्यमधुसूदनः ॥ संदेशंराजक न्यायास्तंब्राह्मणमवैक्षत ॥ ब्राह्मणउवाच ४५ इत्येतेगुह्यसंदेशायदुदेवमयाहृताः ॥ विमृश्ययुक्तंयच्चात्रक्रियतांतदनंतरम् ४६ इतिश्रीभागवतेमहापुराणेद शमस्कंधेसप्तपंचाशत्तमोध्यायः ५७ श्रीशुकउवाच ॥ वैदर्भ्याःसतुसंदेशंनिशम्ययदु नंदनः ॥ प्रगृह्यपाणिनापाणिंप्रहसन्द्विजमब्रवीत् १ श्रीभगवानुवाच ॥ तथाऽहमपिताच्चित्तोनिद्रांनाध्यगमंनिशि ॥ वेदाहंरुक्मिणाद्वेषान्ममोद्वाहो निवारितः २ तामानयिष्येउन्मथ्यराजन्यापसदान्मृधे ॥ मत्परामनवद्यांगीमेधसोऽग्नेःशिखामिव ३ उद्वाहर्क्षंचविज्ञायरुक्मिण्यामधुसूदनः ॥ रथः संयुज्यतामाशुदारुकेत्याहसारथिम् ४ सचाश्वैःशैब्यसुग्रीवमेघपुष्पबलाहकैः ॥ युक्तंरथमुपानीयतस्थौप्रांजलिरग्रतः ५ आरुह्यस्यंदनंशौरिर्द्विजमारोप्यतूर्णगैः ॥ आनर्तादेकरात्रेणविदर्भानगमद्धयैः ६ राजासकुंडिनपतिःपुत्रस्नेहवशंगतः ॥ शिशुपालायस्वांकन्यांदास्यन्कार्याण्यकारयत् ७ पुरं संमृष्टसंसिक्तमार्गरथ्याचतुष्पथम् ॥ चित्रध्वजपताकाभिस्तोरणैःसमलंकृतम् ८ स्रग्गंधमाल्याभरणैर्विरजांबरभूषणैः ॥ जुष्टंस्त्रीपुरुषैःश्रीमद्गृहैरगुरुधूपितैः ९ पितॄन्देवान्समभ्यर्च्यविप्रांश्चविधिवन्नृप ॥ भोजयित्वायथान्यायंवाचयामाससमंगलम् १० सुस्नातासुदतीकन्याकृतकौतुकमंगला ॥ अहतांशुकयुग्मेनभूषिताभूषणोत्तमैः ११ चक्रुःसामर्ग्यजुर्मंत्रैर्वध्वारक्षांद्विजोत्तमाः ॥ पुरोहितोऽथर्वविद्वैजुहावग्रहशांतये १२ हिरण्यरूप्यवासांसितिलांश्चगुडमिश्रितान् ॥ प्रादाद्धेनूश्चविप्रेभ्योराजाविधिविदांवरः १३ एवंचैद्यपतीराजादमघोषःसुतायवै ॥ कारयामाससमंत्रज्ञैःसर्वमभ्युदयोचितम् १४ मदच्युद्भिर्गजानीकैःस्यंदनैर्हेममालिभिः ॥ पत्त्यश्वसंकुलैःसैन्यैःपरीतःकुंडिनंययौ १५ तंवैविदर्भाधिपतिःसमेत्याभिपूज्यच ॥ निवेशयामाससमुदाकल्पितान्यनिवेशने १६ तत्रशाल्वोजरासंधोदंतवक्रोविदूरथः ॥ आजग्मुश्चैद्यपक्षीयाःपौंड्रकाद्याःसहस्रशः १७ कृष्णरामद्विषोयत्ताःकन्यांचैद्यायसाधितुम् ॥ यद्यागत्यहरेत्कृष्णोरामाद्यैर्यदुभिर्वृतः १८

स्त्रियइति कौतुकंविषयाभोगेहस्तसूत्रेकुतूहले कामेख्यातेमंगलेचेतियादवः अहतांशुकयुग्मेननूतनवस्त्रयुगलेन अंशुकंकेवलेवस्त्रेसूक्ष्मवस्त्रोत्तरीययोरितिच ११ गृहानेतान्रक्षयाविवृणोमीत्याद्यथर्ववेदोक्तवित् १२ रूप्यंरजतं १३ सुतायशिशुपालाय १४ पूर्वोक्तयात्राशेषंकथयति मदच्युद्भिरिति मदच्युद्भिःमदजलस्राविभिः १५ तदर्थंकल्पितेन्यस्मिन्निवेशनेगृहे १६ तत्रकुंडिनपुरे १७ १८

१९ २० २१ वरोवरणीयआरोहोजघनप्रदेशोयस्याःसातथा प्रत्यापत्तिपुनरागमनं २२ त्रियामांतरितःरात्रिमात्रव्यवहितःअल्पराधसःमंदीभूतकार्यसिद्धेः २३ २४ २५ गौरोरुणेसितेपीतइति गौरीशब्दस्यादंतस्यानेकार्थवाचित्वेनानिश्चयइत्यतोरुद्राणीति सामान्यविवक्षायांगंगायाअपितत्पत्नीत्वेनसंशयानिस्तारइत्यतोगिरिजेति गिरिजामेनकात्मजेत्यभिधानं नन्वभिधानस्ययोगबलानुसारित्वेनप्रवृत्तेर्नद्याअपिगिरिजात्वादित्यतःसतीति सतीयोगविसृष्टदेहातांजन्मनाशैलवधूंप्रपेदेइति ध्यानकालज्ञा २६ वामऊरुरस्फुरत् नेत्रभुजावस्फुरतां प्रियभाषिणःअभीष्टकार्यशंसिनः २७

योत्स्यामःसहिताःसर्वेइतिनिश्चितमानसाः ॥ आजग्मुर्भूभुजःसर्वेसमग्रबलवाहनाः १९ श्रुत्वैतद्भगवान्रामोविपक्षीयनृपोद्यमम् ॥ कृष्णंचैकंगतंहर्तुंकन्यांकुलहशंकितः २० बलेनमहतासार्द्धंभ्रातृस्नेहपरिप्लुतः ॥ त्वरितःकुंडिनंप्रागाद्गजाश्वरथपत्तिभिः२१भीष्मकन्यावरारोहाकांक्षंत्यागमनंहरेः ॥ प्रत्यापत्तिमपश्यंतीद्विजस्यार्चिंतयत्तदा २२ अहोत्रियामांतरितउद्वाहोमेऽल्पराधसः ॥ नागच्छत्यरविंदाक्षोनाहंवेद्मयत्रकारणम् २३ सोपिनावर्त्ततेऽद्यापिमत्संदेशहरोद्विजः ॥ अपिमय्यनवद्यात्मादृष्ट्वार्किंचिज्जुगुप्सितम् २४ मत्पाणिग्रहणेनूनंनायातिहिकृतोद्यमः ॥ दुर्भगायानमेधातानानुकूलोमहेश्वरः २५ देवीवाविमुखागौरीरुद्राणीगिरिजासती ॥ एवंचिंतयतीबालागोविंदहृतमानसा ॥ न्यमीलयतकालज्ञानेत्रेऽश्रुकलाकुले २६ एवंवध्वाःप्रतीक्षंत्यागोविंदागमनंनृप ॥ वामऊरुर्भुजोनेत्रमस्फुरन्प्रियभाषिणः २७ अथकृष्णविनिर्दिष्टःसएवद्विजसत्तमः ॥ अंतःपुरचरांदेवीराजपुत्रींददर्शह २८ सातंप्रहृष्टवदनमव्यग्रात्मगतिंसती ॥ आलक्ष्यलक्षणाभिज्ञातमपृच्छच्छुचिस्मिता २९ आवेदयामासतस्यैसंप्राप्तंयदुनंदनम् ॥ उक्तंचसत्यवचनमात्मोपनयनंप्रति ३० तमागतंसमाज्ञायवैदर्भीहृष्टमानसा ॥ नपश्यंतीब्राह्मणायप्रियमन्यन्ननामसा ३१ प्राप्तौश्रुत्वास्वदुहितुरुद्वाहप्रेक्षणोत्सुकौ ॥ अभ्ययात्तूर्यघोषेणरामकृष्णौसमर्हणैः ३२ मधुपर्कमुपानीयवासांसिरुचिराणिसः ॥ उपायनान्यभीष्टानिविधिवत्समपूजयत् ३३ तयोर्निवेशनंश्रीमदुपकल्प्यमहामतिः ॥ बाह्योद्यानेकुंडिनस्ययथायोगंसुविस्तृतम् ३४ आवेद्यपूर्णनगरंजरासंधादिभिर्नृपैः ॥ ससैन्ययोःसानुगयोरातिथ्यंविदधेयथा ३५ एवंराज्ञांसमेतानांयथावीर्यंयथावयः ॥ यथाबलंयथावित्तंसर्वैःकामैःसमर्हयत् ३६ कृष्णमागतमाकर्ण्यविदर्भपुरवासिनः ॥ आगत्यनेत्रांजलिभिःपपुस्तन्मुखपंकजम् ३७ अस्यैवभार्याभवितुंरुक्मिण्यर्हतिनापरा ॥ असावप्यनवद्यात्माभैष्म्याःसमुचितःपतिः ३८ किंचित्सुचरितंयत्नस्तेनतुष्टस्त्रिलोककृत् ॥ अनुगृह्णातुगृह्णातुवैदर्भ्याःपाणिमच्युतः ३९ श्रीशुकउवाच ॥ एवंप्रेमकलाबद्धावदंतिस्मपुरौकसः ॥ कन्याचांतःपुरात्प्रागाद्भटैर्गुप्तांऽबिकालयम् ४० पद्भ्यांविनिर्ययौद्रष्टुंभवान्याःपादपल्लवम् ॥ परिवारैःकतिपयैर्युक्तोयादवनंदनः ४१

२८ अव्यग्रात्मगतिमसंभ्रांतनिजगमनं २९ ३० ३१ ३२ ३३ ३४ किमितिनगरप्रवेशाप्रदानंकृष्णरामयोरितितत्राह आवेद्येति जरासंधादिराजभिर्नगरंपूर्णंनिबिडमनवकाशमित्यावेद्याविज्ञाप्य ३५ ३६ ३७ ३८ ३९ ४० ४१

वेत्रपाणिझर्झराश्चराजाज्ञासूचकपट्टपश्चहस्तेपुपेषांततथातैःकंचुकिभिःदौवारिकैश्चान्तर्लिंगैः ४२ ४३ ४४ ४५ धौतपादकरांबुजाप्रक्षालितपादहस्तपद्मा ४६ प्रवयसोवृद्धाःविधिज्ञाःस्त्रीशास्त्रकुशलाः
४७ ४८ ४९ पतिमतीःभर्तृमत्यः ५० शेषाःअक्षताःअविशिष्टाराजस्त्रियोवा ५१ मुनिव्रतंमौनव्रतं उपकंठेसमीपे पौलोम्याःशच्याः ५२ ५३ ५४ देवमायांलक्ष्मीं श्यामांद्रच्य

साचानुध्यायतीसम्यङ्मुकुंदचरणांबुजम् ॥ यतवाङ्मातृभिःसार्धंसखिभिःपरिवारिता ४२ गुप्तराजभटैःशूरैःसन्नद्धैरुद्यतायुधैः ॥ वेत्रझर्झरहस्तैश्च वृद्धैःकंचुकिभिस्तथा ॥ मृदंगशंखपणवास्तूर्यभेरीश्चजघ्निरे ४३ नानोपहारबलिभिर्वारमुख्याःसहस्रशः ॥ स्रग्गंधवस्त्राभरणैर्द्विजपत्न्यःस्वलंकृताः ४४ गायंतश्चस्तुवंतश्चगायकावाद्यवादकाः ॥ परिवार्यवधूंजग्मुःसूतमागधवंदिनः ४५ आसाद्यदेवसदनंधौतपादकरांबुजा ॥ उपस्पृश्यशुचिः शांताप्रविवेशांबिकांतिकम् ४६ तांविप्रवयसोबालांविधिज्ञाविप्रयोषितः ॥ भवानींवंदयांचक्रुर्भवपत्नींभवान्विताम् ४७ नमस्येत्वांऽबिकेभीक्ष्णंस्व संतानयुतांशिवाम् ॥ भूयात्पतिर्मेभगवान्कृष्णस्तदनुमोदताम् ४८ अद्भिर्गंधाक्षतैर्धूपैर्वस्त्रमाल्यविभूषणैः ॥ नानोपहारबलिभिःप्रदीपाबलिभिःपृथक् ४९ विप्रस्त्रियःपतिमतीस्तथातैःसमपूजयत् ॥ लवणापूपतांबूलकंठसूत्रफलेक्षुभिः ५० तस्यैस्त्रियस्ताःप्रददुःशेषायुयुजुराशिषः ॥ ताभ्योदेव्यैनमश्चक्रेशेषाश्चजगृहेवधूः ५१ मुनिव्रतमथत्यक्त्वानिश्चक्रामांबिकागृहात् ॥ उपकंठेसुरेशस्यपौलोम्याश्चनिकेतनम् ५२ तौविदर्भप्रसूतानांनृपाणांकुलदेवते ॥ तदंतिकमुपागम्यशचींसुरपतिप्रियाम् ५३ चिराराधितपादाब्जांसाप्रणम्यविनिर्ययौ ॥ प्रगृह्यपाणिनाधात्रीरत्नमुद्रोपशोभिताम् ॥ धृतानेकातपत्राद्यांवीजच्चामरसंकुलाम् ५४ तांदेवमायामिववरिमोहिनींसुमध्यमांकुंडलमंडिताननाम् ॥ श्यामांनितंबार्पितरत्नमेखलांव्यंजत्स्तनींकुंतल शंकितेक्षणाम् ५५ शुचिस्मितांबिंबफलाधरद्युतिशोणायमानद्विजकुंदकुड्मलाम् ॥ पदाचलंतींकलहंसगामिनींसिंजत्कलंनूपुरपादशोभिताम् ५६ विलोक्यवीरामुमुहुःसमागतायशस्विनस्तत्कृतहृच्छयार्दिताः ॥ यांवीक्ष्यतेनृपतयस्तदुदारहासव्रीडावलोकहृतचेतसउज्झितास्त्राः ५७ पेतुःक्षितौगजरथाश्वगतावि मूढायात्राच्छलेनहरयेऽर्पयतींस्वशोभाम् ॥ सैवंशनैश्चलयतीपदपद्मकोशौप्राप्तिंतदामगवतःप्रसमीक्षमाणा ५८ उत्सार्यवामकरजैरलकानपांगैःप्राप्तान्हियैक्षतनृपान्ददृशेऽच्युतंसा ॥ तांराजकन्यांरथमारुरुक्षतींजहारकृष्णोद्विषतांसमीक्षताम् ५९ रथंसमारोप्यसुपर्णलक्षणंराजन्यचक्रंपरिभूय माधवः ॥ ततोययौरामपुरोगमैःशनैःशृगालमध्यादिवनागहृद्धरिः ६० ॥ इतिश्रीभा०महापुराणेदशमस्कंधेउत्तरार्धेअष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥
श्रीशुकउवाच ॥ तंमानिनःस्वाभिभवंयशःक्षयंपरेजरासंधवशानसेहिरे ॥ अहोधिगस्मद्यशआत्तधन्विनांगोपैर्हृतंकेसरिणांमृगैरिव १

ष्टवपीं कुंतलैरावरकैःशंकितमिवेक्षणंयस्याःसातथातां ५५ ५६ ५७ ५८ ५९ नागहृद्गजहरोहरिःसिंहः ६० इतिश्रीभागवतेमहापुराणेविजयध्वजकृतटीकायांअष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ ७ ॥ यःअरिभिःकृतःतं केकेपरेइतितत्राह जरासंधइति ॥ १ ॥

॥ २ ॥ यादवानामनीकानांयूथानिसमूहास्तान्पांतिरक्षंतीतियादवानीकयूथपाः ॥ ३ ॥ अश्वपृष्ठादिषुस्थित्वा ॥ ४ ॥ आसारोवेगवान्वर्षइति सुमध्यमारुक्मिणीऐक्षदैक्षतदृष्टवती ॥ ५ ॥ ६ ॥७ ॥ ८ ॥
करभाःकनिष्ठिकायामूलप्रदेशाः गर्दभादश्वायांजातोऽश्वतरः ॥९ ॥ आत्मनोजयकांक्षिभिः जयप्रकाशकैःजयेच्छुभिर्वा ॥ १० ॥ हृतदारंबलादपहृतभार्यंपुरुषं ॥ ११ ॥ प्रियाप्रिययोःसुखदुःखयो
र्निष्ठाव्यवस्थानियतत्वं निष्ठोत्कर्षेव्यवस्थ.यामिति ॥ १२ ॥ कुहकेच्छयामायिकेच्छया ॥ १३ ॥ योहंत्रयोविंशतिभिःसैन्यैरक्षौहिणीभिःशौरेःसप्तदशसंयुगानिसप्तदशसंयुगेषुपराजितः परंपश्चा

इतिसर्वेसुसंरब्धावाहानारुह्यदंशिताः ॥ स्वैःस्वैर्बलैःपरिक्रांताअन्वीयुर्धृतकार्मुकाः २ तानापततआलोक्ययादवानीकयूथपाः॥ तस्थुर्वैसन्मुखाराजन्व
रफूर्यस्वधनूंषिते ३ अश्वपृष्ठेगजस्कंधेरथोपस्थेचकोविदाः ॥ मुमुचुःशरवर्षाणिमेघाअद्रिष्वपोयथा ४ पत्युर्बलंशरासारैश्छन्नंवीक्ष्यसुमध्यमा ॥ सव्रीड
मैक्षत्तद्वक्त्रंभावविह्वललोचना ५ प्रहस्यभगवानाहमाभैस्त्वंवामलोचने ॥ विनंक्ष्यत्यधुनैवैतत्तावकैःशात्रवंबलम् ६ तेषांतद्विक्रमंवीरागदसंकर्षणादय
यः ॥ अमृष्यमाणानाराचैर्जघ्नुर्हयगजान्रथान् ७ पेतुःशिरांसिरथिनामश्विनांगजिनांभुवि ॥ सकुंडलकिरीटानिसोष्णीषाणिचकोटिशः ८ हस्ताःसासि
गदेष्वासाःकरभाऊरवोऽघ्रयः ॥ अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरांसिच ९ हन्यमानबलानीकावृष्णिभिर्जयकांक्षिभिः ॥ राजानोविमुखाजग्मुर्जरासं
धपुरःसराः १० शिशुपालंसमेत्याथहृतदारमिवातुरम् ॥ नष्टत्विषंगतोत्साहंशुष्यद्वदनमब्रुवन् ११ राजानऊचुः ॥ भोभोपुरुषशार्दूलदौर्मनस्यमिदं
त्यज ॥ नप्रियाप्रिययोराजन्निष्ठादेहिषुदृश्यते १२ यथादारुमयीयोषिन्नृत्यतेकुहकेच्छया ॥ एवमीश्वरतंत्रोऽयमीहतेसुखदुःखयोः १३ शौरेःसप्तदशा
हंवैसंयुगानिपराजितः ॥ त्रयोविंशतिभिःसैन्यैर्जिग्यएवमहंपरम् १४ तथाप्यहंनशोचामिनप्रहृष्यामिकर्हिचित् ॥ कालेनदैवयोगेनजानान्विद्रावितंजग
त् १५ अधुनापिवयंसर्ववीरयूथपयूथपाः ॥ पराजिताःफल्गुतंत्रैर्यदुभिःकृष्णपालितैः १६ रिपवोजिग्युरधुनाकालआत्मानुसारिणि ॥ तदावयंतुजे
ष्यामोयदाकालःप्रदक्षिणः १७ श्रीशुकउवाच ॥ एवंसंबोधितोमित्रैश्चैद्योऽगात्सानुगःपुरम् ॥ हतशेषाःपुनस्तेऽपिययुःस्वंस्वंपुरंनृपाः १८ रुक्मीतुराक्ष
सोद्वाहंकृष्णद्विडसहन्स्वसुः ॥ पृष्ठतोऽनुगमत्कृष्णमक्षौहिण्यावृतोबली १९ रुक्म्यमर्षीसुसंरब्धःशृण्वतांसर्वभूभुजाम् ॥ प्रतिजज्ञेमहाबाहुर्दंशितःस
शरासनः २० अहत्वासमरेकृष्णमप्रत्यूह्यचरुक्मिणम् ॥ कुंडिनंनप्रवेक्ष्यामिसत्यमेतद्ध्रुवंमिवः २१ श्रीशुकउवाच ॥ इत्युक्त्वारथमारुह्यसारथिंप्राह
सत्वरः ॥ चोदयाश्वान्यतःकृष्णस्तस्यमेसंयुगंभवेत् २२ अद्याहंनिशितैर्बाणैर्गोपालस्यसुदुर्मतेः ॥ नेष्येवीर्यमदंयेनस्वसामेप्रसभंहृता २३ विकत्थ
मानःकुमतिरीश्वरस्याप्रमाणवित् ॥ रथेनैकेनगोविंदमन्वधावतरंहसा २४

त्सोहंतावतीभिःसंभूयैकंसेनादिविकलंकृष्णंजिग्ये तथाप्युभयथापिएकमष्टादशंसंग्रामंवा ॥ १४ ॥ १५ ॥ फल्गुतंत्रैःअल्पसेनादिपरिच्छदैः ॥ १६ ॥ प्रदक्षिणःअनुकूलः ॥ १७ ॥ १८ ॥ अस
हनसहमानः ॥ १९ ॥ २० ॥ अप्रत्यूह्यअनावृत्य अन्यस्यादत्त्वेतिवा ॥ २१ ॥ २२ ॥ २३ ॥ २४

॥ २५ ॥ अरेनीचसंबोधनंतदेवव्यनक्ति यदूनामिति ॥ २६ ॥२७॥ ततःपूर्वमेवमुंच ॥ २८ ॥ २९ ॥ ३० ॥ परिघंपरिघातनं पट्टिशंलोहदंडं शक्तितोमरैःसहचिच्छेदद्विभुस्तोमरः ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ परित्रासेनपरितोभयेनकंपितमंगंयस्याःसातथातया शुष्यन्मुखाचरुद्धकंठाचतया करुणःकरुणाकरः ॥ ३७ ॥ श्मश्रुवपनंमुंडनंकुर्वन्व्यरूपयत् सौंदर्यहीनमकरोत् ॥ ३८ ॥ ३९ ॥ ४० ॥ श्मश्रुकेशानांवपनलक्षणंवैरूप्यंसुहृदोबंधोर्वधंकृतवान् ॥ ४१ ॥ इदानींरुक्मिणींसांत्वयति मैवेति हेसाध्विरुक्मिणिअस्मान्प्रति स्वस्मादन्यःअत्रहेतुर्यतइति ॥ ४२ ॥ नन्व स्तुसुखादेःस्वयंहेतुरथापिबंधोर्देहवियोगकरणलक्षणोवधोलोकाचारोनभवति जुगुप्सितत्वादितितत्सत्यमित्याह बंधुरिति वधार्होदोषोयस्यसतथा द्वितीयबंधुशब्दोहेत्वर्थः तत्रोंककर्तव्यमित्यत्राह

सगत्वानर्मदांदेवीतरंतंमधुसूदनम् ॥ आसाद्ययुद्धसन्नद्धस्तिष्ठतिष्ठेतिचाब्रवीत् २५ धनुर्विकृष्यसुदृढंजघ्नेकृष्णंत्रिभिःशरैः ॥ आहचारेक्षणंतिष्ठयदूनांकुलपांसन २६ कुत्रयासिस्वसारंमेमुषित्वाघ्वांक्षवद्धविः ॥ हरिष्येऽद्यमदंमंदमायिनःकूटयोधिनः २७ यावन्नमेहतोबाणैःशयीथामुंचदारिकाम् ॥ धनुर्विकृष्यसुदृढंजघ्नेकृष्णंत्रिभिःशरैः २८ स्मयन्कृष्णोधनुश्छित्त्वाषड्भिर्विव्याधरुक्मिणम् ॥ अष्टभिश्चतुरोवाहान्द्वाभ्यांसूतंध्वजंत्रिभिः २९ सचान्यद्धनुरादायकृष्णंविव्याधपंचभिः ॥ तैस्ताडितःशरौघैस्तुचिच्छेदधनुरच्युतः ३० पुनरन्यदुपादत्ततदप्यच्छिनदच्युतः ॥ परिघंपट्टिशंशूलंचर्मासीशक्तितोमरैः ३१ यद्यदायुधमादत्ततत्सर्वंसोऽच्छिनद्विभुः ॥ ततोरथादवप्लुत्यगृहीत्वाखड्गचर्मणी ३२ कृष्णमभ्यद्रवत्क्रुद्धःपतंगइवपावकम् ॥ तस्यचापततःखड्गंतिलशश्चर्मचेषुभिः ३३ छित्त्वाऽसिमाददेतिग्मंरुक्मिणंहंतुमुद्यतः ॥ दृष्ट्वाभ्रातृवधोद्योगंरुक्मिणीभयविह्वला ॥ पतित्वापादयोःपत्युरुवाचकरुणंसती ३४ रुक्मिण्युवाच ॥ योगेश्वराप्रमेयात्मन्देवदेवजगत्पते ॥ हंतुंनार्हसिकल्याणभ्रातरंमेमहाभुज ३५ श्रीशुकउवाच ॥ इत्युक्त्वाजगृहेपादौकृपणादीनभाषिणी ॥ भ्रातरंत्रातुकामासाकृष्णस्यजगतीपतेः ३६ तयापरित्रासविकंपितांगयाशुचाचशुष्यन्मुखरुद्धकंठया ॥ कातर्यविस्रंसितहेममालयागृहीतपादःकरुणोन्यवर्तत ३७ चैलेनबद्ध्वातमसाधुकारिणंसश्मश्रुकेशंव्यरूपयद्वपन्व्यरूपयत् ॥ तावत्समीयुर्जितशत्रुसैन्यायदुप्रवीरानलिनींयथागजाः३८ कृष्णांतिकमुपव्रज्यददृशुस्तत्ररुक्मिणम् ॥ तथाभूतंहतप्रायंदृष्ट्वासंकर्षणोविभुः ३९ विमुच्यबद्धंकरुणोभगवान्कृष्णमब्रवीत् ४० बलभद्रउवाच ॥ असाध्विदंत्वयाकृष्णकृतमस्मिन्जुगुप्सितम् ॥ वपनंश्मश्रुकेशानांवैरूप्यंसुहृदोवधम् ४१ मैवास्मान्साध्व्यसूयेथाभ्रातुर्वैरूप्यचिंतया ॥ सुखदुःखदोन चान्योस्तियतःस्वकृतभुक्पुमान् ४२ बंधुर्वधार्हदोषोपिनबंधुर्वधमर्हति ॥ त्याज्यःस्वेनैवदोषेणहतःकिंहन्यतेपुनः ४३ क्षत्रियाणामयंधर्मःप्रजापतिविनिर्मितः ॥ भ्रातापिभ्रातरंहन्याद्येनघोरतरस्ततः ४४ राज्यस्यभूमेर्वित्तस्यश्रियोमानस्यतेजसः ॥ मानिनोऽन्यस्यवाहेतोःश्रीमदांधाःक्षिपंतिहि ४५

त्याज्यइति त्यागोदेशनिर्यातनादिलक्षणः किंत्याज्यइत्यतोमृतमारणदोषापत्तेरितिभावेनाह हतइति ॥ ४३ ॥ तर्ह्येतदीदृशंकर्मकिमितिक्रियतइतिअतोऽयंन्यायः क्षत्रियेभ्योन्यत्रनक्षत्रियाणामित्याह क्षत्रियाणामिति कोसौधर्मइत्यत्राह भ्रातापीति ततस्तस्माद्राजाथेनकर्मणाघोरतरइत्युच्यते धर्मविषयोवाऽघोरतरोधर्मइति ४४ ननुतर्हिसर्वःसर्वंहन्यादित्यतिप्रसंगइत्यत्राह राज्यस्येति मानिनःदेहाभिमानवंतःअन्यस्यस्त्रीजनस्यवाक्षिपंतिग्रंथंति राज्यादेःसर्वस्यहेतोरितिसंबंधः ४५

किमतइत्यतःस्वस्थश्रीहर्यधीनत्वकल्पनामंतरेणस्वकपोलकल्पनाबुद्धिभ्रमएवेत्याह आत्मेति देहएवात्मेतिमानंज्ञानंयेषांतेतथातेषांनृणां निरपेक्षत्वेनोपकर्त्तासुहृत् स्वसुखनाशकर्त्ताशत्रुस्तदुभयकर्त्तृत्वशून्यउदासीनइत्येषआत्ममोहोमनोभ्रमः देवस्यहरेर्मायययावंधकशक्त्याकल्प्यतेततःसुहृच्छत्रूउभयोरितरउदासीनइतिस्वकपोलकल्पनाइत्याद्येतिभावः ॥ ४६ ॥ देवःकीदृशइतितत्स्वरूपमाह एक एवेति आत्मापरः परमात्मानियामकइतिशेषः नन्वेकत्वेसच्चासच्चाभवादितिनानाभावःकथमितितत्राह नानेति ॥ ४७ ॥ देहात्मत्वंभ्रमनिमित्तमित्यत्रहेतुमाह देहइति द्रव्याणिपंचभूतानिपंचप्राणास्त्रयोगुणाः देहआत्मान मौतिकत्वाद्घटवदिति आत्मनिजीवेअविद्ययाहरीच्छयाअज्ञानेनवादोहिनंदेहात्मदर्शनंसंसारयातिसंसारिणंकरोति तत्करोतीत्युपसंख्यानमितिणिच् ॥ ४८ ॥ देहःस्वेतरवृत्तिनित्यनिष्ठाधिकरणमेयत्वाद्घटवदितितत्राह यथेति शयानःस्वप्नंपश्यन्नात्मानंविषयान्फलंदुःखादिलक्षणंयथाऽनुभुंक्तेवासनानुगुणमनुभवतिअर्थेविषयेतदानीमसत्यप्यविद्यमानेपितथात्माजीवोध्रुवोऽ

आत्ममोहोनृणामेषकल्प्यतेदेवमायया॥ सुहृच्छत्रुरुदासीनइतिदेहात्ममानिनाम् ४६एकएवपरोह्यात्मासर्वेषामपिदेहिनाम् ॥ नानेवगृह्यतेमूढैर्यथाज्यो तिर्यथानभः ४७ देहआद्यंतवानेषद्रव्यप्राणगुणात्मकः ॥ आत्मन्यविद्ययाक्षिप्तःसंसारयतिदेहिनम् ४८ यथाशयानआत्मानंविषयान्फलमेवच ॥ अनुभुंक्तेप्यसत्यर्थेतथात्मापिध्रुवोऽध्रुवान् ४९ तस्मादज्ञानजंशोकमात्मबोधविमोहनम् ॥ तत्त्वज्ञानेननिर्हृत्यस्वस्थाभवशुचिस्मिते ५० एवंभगव तातन्वीरामेणप्रतिबोधिता ॥ वैमनस्यंपरित्यज्यमनोबुद्ध्यासमादधे ५१ प्राणावशेषउत्सृष्टोद्विड्भिर्हतबलप्रभः ॥ स्मरन्विरूपकरणंवितथात्ममनो रथः ॥ चक्रेभोजकटंनामनिवासायमहत्पुरम् ५२ अहत्वादुर्मतिंकृष्णमप्रत्यूह्यययवीयसीम्॥ कुंडिनंनप्रवेक्ष्यामीत्युक्त्वातत्रावसद्दुषा ५३ भगवान्भी ष्मकसुतामेवंनिर्जित्यभूमिपान् ॥ पुरमानीयविधिवदुपयेमेकुरूद्वह ५४ तदामहोत्सवोनृणांयदुपुर्यांगृहेगृहे ॥ अभूदनन्यभावानांकृष्णेयदुपतौनृप ५५ नरानार्यश्चमुदिताःप्रमृष्टमणिकुंडलाः ॥ पारिबर्हमुपाजह्रुर्वरयोश्चित्रवाससोः ५६ सांवृष्णिपुर्युत्तभितेंद्रकेतुभिर्विचित्रमाल्यांबररत्नतोरणैः ॥ ब भौप्रतिद्वार्युपयुक्तमंगलैरापूर्णकुंभागरुधूपदीपकैः ५७ सिक्तमार्गमदच्युद्भिराहूतप्रेष्ठभूभुजाम् ॥ गजैर्वास्तुपरामृष्टारंभापूगोपशोभिता ५८ कुरुसृंजय कैकेयविदर्भयदुकुंतयः ॥ मिथोमुमुदिरेतस्मिन्संभ्रमात्परिधावतः ५९ रुक्मिण्याहरणंश्रुत्वागीयमानंततस्ततः ॥ राजानोराजकन्याश्चबभूवुर्भृशविस्मिताः ६० द्वारकायामभूद्राजन्महामोदःपुरौकसाम् ॥ रुक्मिणीरमणोपेतांदृष्ट्वाकृष्णंश्रियःपतिम् ॥६१ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्त रार्धेरुक्मिणीहरणंनामएकोनषष्टितमोऽध्यायः ५९

ध्रुवानानित्यान्देहादीननुभुंक्तइत्यन्वयः देहःस्वस्वेतरवृत्त्यनित्यनिष्ठाधिकरणमितिप्रत्यनुमानपराहृतंतदनुमानमितिसंतोष्टव्यम् ॥ ४९ ॥ उपसंहरति तस्मादिति ५० बुद्ध्याकदाप्यतिरोहितज्ञानेन ॥ ५१ ॥ रुक्मीतत्रकिंचकारेतितत्राह प्राणेति ॥ ५२ ॥ अप्रत्यूह्यअनिवर्तयित्वा यवीयसीमनुजाम् ॥ ५३ ॥ ५४ ॥ यदुतकृष्णेअनन्यभावानांअन्यःशत्रुरितिभावरहितानांनिरतिशयभक्तियुक्तानामित्यर्थः ॥ ५५ ॥ ५६ ॥ उत्तभितेंद्रकेतुभिःउत्क्षिप्तेंद्रध्वजैः ५७ आहूतप्रेष्ठभूभुजांगजैर्जुष्टेतिशेषः वास्तुपरामृष्टागृहदेवतासंयुक्ता यद्वा वास्तुपरामृष्टात्यक्तरजोगृहा ५८ तस्मिन्नगरेपरिधावतइतस्ततोधावंतः ५९ ६० ६१ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांएकोनषष्टितमोऽध्यायः ५९

त्रिविक्रमावतारस्यनिरपेक्षभक्तानुकंपिनोयदुनंदनस्यएतज्जन्मानुष्ठितकर्मनिमित्तदुर्यशःशमनहेतुविक्रममनुक्रामत्यस्मिन्नध्याये तत्रपरीक्षितःप्रश्नबीजमुत्थापयति सत्राजिदिति सत्रेणहिरण्यादिदान लक्षणतपसासूर्यस्थितंहरिंजितवान्वशीकृतवानित्यतःसत्राजिदितिनामलब्धवान् पञ्चभेदेसदादानेसत्रमाच्छादनेवनइति कृताकिल्बिषःकृतापराधः मणिनासहस्वयमुद्यम्ययाचनादिपरप्रेरणामंत रेणमत्कन्यांतुभ्यंदास्यामीतिवचनादिप्रयत्नंविधाय सत्राजितोऽतरात्मा सत्रविषयेअजितइतिवा १ २ भक्तस्यसत्राजितःसखा ३ तेजसाऽर्चिषानोपलक्षितोनदृष्टः ४ अक्षैर्देवनांगैर्दीव्यतेद्यूतक्री डांकुर्वते ५ ६ गभस्तिचक्रेणरश्मिमंडलेन तिग्मरुक्सूर्यः ७ विबुधर्षभाःदेवश्रेष्ठाःत्रिलोक्या।तेमार्गमन्विच्छंतिमृगयंते ननु तेष्वजःसूर्यअद्ययदुषुगुह्यज्ञात्वाद्दृष्टुंयात्यायाति अजायलोकत्रयभावना

श्रीशुकउवाच ॥ सत्राजित्तनयांतन्वींकृष्णायकृतकिल्बिषः ॥ स्यमंतकेनमणिनास्वयमुद्यम्यदत्तवान् १ राजोवाच ॥ सत्राजितःकिमकरोद्ब्रह्मन्कृष्ण स्यकिल्बिषम् ॥ स्यमंतकःकुतस्तस्यकस्माद्दत्तासुताहरेः २ श्रीशुकउवाच ॥ आसीत्सत्राजितःसूर्योमक्तस्यपरमःसखा ॥ प्रीतस्तस्मैमणिंप्रादात्सूर्यस्तु ष्टःस्यमंतकम् ३ सतंबिभ्रन्मणिंकंठेभ्राजमानोयथारविः ॥ प्रविष्टोद्वारकांराजंस्तेजसानोपलक्षितः ४ तंविलोक्यजनादूरात्तेजसामुष्टदृष्टयः ॥ दीव्यतेऽक्षैर्भगवतेशशंसुःसूर्यशंकिताः ५ नारायणनमस्तेस्तुशंखचक्रगदाधर ॥ दामोदरारविंदाक्षगोविंदयदुनंदन ६ एषआयातिसवितात्वांदिदृक्षुर्जगत्पते ॥ मुष्णन्गभस्तिचक्रेणनृणांचक्षूंषितिग्मरुक् ७ नन्वन्विच्छंतितेमार्गंत्रिलोक्यांविबुधर्षभाः ॥ ज्ञात्वाद्यगूढंयदुषुद्रष्टुंत्वांयात्यजःप्रभो ८ श्रीशुकउवाच ॥ निशम्यबालवचनंप्रहस्यांबुजलोचनः ॥ प्राहनासौरविर्देवःसत्राजिन्मणिनाज्वलन् ९ सत्राजित्स्वगृहंश्रीमत्कृतकौतुकमंगलम् ॥ प्रविश्यदेवसदनेमणिं विप्रैर्न्यवेशयत् १० दिनेदिनेस्वर्णभारानष्टौसृजतिप्रभो ॥ दुर्भिक्षमार्यरिष्टानिसर्वेपिव्याधयोऽशुभाः ११ नसंतिमायिनस्तत्रयद्राष्ट्रेऽभ्यर्चितोमणिः ॥ सयाचितोमणिंक्वापियदुराजायशौरिणा १२ नैवार्थकामुकःप्रादाद्याच्ञाभंगमतर्कयत् ॥ तमेकदामणिंकंठेप्रतिमुच्यमहाप्रभम् १३ प्रसेनोहयमा रुह्यमृगयांव्यचरद्वने ॥ प्रसेनंसहयंहत्वामणिमाच्छिद्यकेसरी १४ बिलंविशन्जांबवतानिहतोमणिमिच्छता ॥ सोपिचक्रेकुमारस्यमणिंक्रीडनकंबिले १५ अपश्यन्भ्रातरंभ्रातासत्राजित्पर्यतप्यत ॥ प्रायःकृष्णेननिहतोमणिग्रीवोवनंगतः १६ भ्रातामेतिच्छ्रुत्वाकर्णेकर्णेऽजपन्जनाः ॥ भगवांस्तदुपश्रु त्यदुर्यशोलिप्तमात्मनि १७ मार्ष्टुंप्रसेनपदवीमन्वपद्यतनागरैः ॥ हतंप्रसेनमश्वंचवीक्ष्यकेसरिणावने १८ तंचाद्रिपृष्ठेनिहतमृक्षेणददृशुर्जनाः ॥ ऋक्ष राजबिलंभीममंधेनतमसावृतम् १९

येतिवचनात् ८ ९ गृहेदेवसदनेदेवस्थाने न्यवेशयत्प्रतिष्ठितवान् १० पंचविंशतितुलात्मकोभारःतानष्टौभारान्सृजतिददाति माराअकालमृत्युः अरिष्टंमृत्युविघ्नं ११ क्वापिकदाचित् १२ अतर्कयत् अनिरूपयत्प्रतिमुच्यबद्ध्वा १३ आच्छाद्यस्वीकृत्य १४ क्रीडनकंलीलासाधनं १५ शौरेर्याच्ञाभंगदोषादिदमनथजातमभूत्अन्यथामणिमाहात्म्यस्तवनंव्यर्थमितितात्पर्यमवगंतव्यं मणिःग्रीवायांयस्यसतथा १६ ममभ्राताकृष्णेननिहतइतियत्तच्छ्रुत्वा १७ १८ ऋक्षेणजांबवता १९

२० २१ २२ २३ अविश्रमंनिरंतरम् २४ २५ सर्वभूतानांप्राणादिप्रदंप्राणःप्राणनंचेष्टाशक्तिःओजःअवष्टंभशक्तिःसहःशरीरसामर्थ्यं बलंस्थौल्यम् २६ सृष्टानामधिपःसृष्टेपुवसन्कालःसंहर्ता आत्मांचेतनानांपरः आत्मापरमचेतनः नित्योनित्यानामितिश्रुतिः २७ उत्कलितेनउन्नतेनरोषेणजातैः कटाक्षमोक्षैर्नेत्रांतपातैःक्षोभितानक्रास्तिमिंगिलाश्रयस्मिन्सतथा स्वयशोरूपः उज्ज्वलितादग्धा

एकोविवेशभगवानवस्थाप्यबहिःप्रजाः ॥ तत्रद्दष्ट्वामणिश्रेष्ठंबालक्रीडनकंकृतम् ॥ हर्त्तुंकृतमतिस्तस्मिन्नवतस्थेऽर्भकांतिके २० तमपूर्वंनरंदृष्ट्वाधात्रीचुक्रोशभीतवत् ॥ तच्छ्रुत्वाभ्यद्रवत्क्रुद्धोजांबवान्बलिनांवरः २१ सवैभगवतातेनयुयुधेस्वामिनात्मनः ॥ पुरुषंप्राकृतंमत्वाकुपितोनानुभाववित् २२ द्वंद्वयुद्धंसुतुमुलमुभयोर्विजिगीषतोः ॥ आयुधाश्मद्रुमैर्दोर्भिःक्रव्यार्थेश्येनयोरिव २३ आसीत्तदष्टविंशाहमितरेतरमुष्टिभिः ॥ वज्रनिष्पेषपरुषैरविश्रममहर्निशम् २४ कृष्णमुष्टिविनिष्पातनिष्पिष्टांगोरुबंधनः ॥ क्षीणसत्त्वःस्विन्नगात्रस्तमाहातीवविस्मितः २५ जानेत्वांसर्वभूतानांप्राणओजःसहोबलम्॥ विष्णुंपुराणंपुरुषंप्रभविष्णुमधीश्वरम् २६ त्वंहिविश्वसृजांस्रष्टासृष्टानामधिपोवसन् ॥ कालःकलयतामीशपरआत्मातथात्मनाम् २७ यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्मादिशत्क्षुभितनक्रतिमिंगिलोब्धिः ॥ सेतुःकृतःस्वयशउज्ज्वलिताचलंकारक्षःशिरांसिभुविपेतुरिषुक्षतानि २८ इतिविज्ञातविज्ञानमृक्षराजानमच्युतः ॥ व्याजहारमहाराजभगवान्देवकीसुतः २९ अभिमृष्यारविंदाक्षःपाणिनाशंकरेणतम् ॥ कृपयापरयाभक्तंमेघगंभीरया गिरा ३० मणिहेतोरिहप्राप्तावयमृक्षपतेबिलम् ॥ मिथ्याभिशापंप्रमृजन्नात्मनोमणिनामुना ३१ इत्युक्तःस्वांदुहितरंकन्यांजांबवतींमुदा ॥ अर्हणार्थंसहमणिंकृष्णायोपजहारसः ३२ अदृष्ट्वानिर्गमंशौरेःप्रविष्टस्यबिलंजनाः ॥ प्रतीक्ष्यद्वादशाहानिदुःखितास्तेपुरंययुः ३३ निशम्यदेवकीदेवीरुक्मिण्यानकदुंदुभिः ॥ सुहृदोज्ञातयोऽशोचन्बिलात्कृष्णमनिर्गतम् ३४ सत्राजितंशपंतस्तेदुःखिताद्वारकौकसः ॥ उपतस्थुर्महामायांदुर्गांकृष्णोपलब्धये ३५ तेषांतुदेव्युपस्थानात्प्रत्यादिष्टाशिषांभवत् ॥ प्रादुर्बभूवसिद्धार्थःसदारोहर्षयन्हरिः ३६ उपलभ्यहृषीकेशंमृतंपुनरिहागतम् ॥ सहपत्न्यामणिग्रीवंसर्वेजातमहोत्सवाः ३७ सत्राजितंसमाहूयसभायांराजसन्निधौ ॥ प्राप्तिंचाख्यायभगवान्मणितस्मैन्यवेदयत् ३८ सचातिव्रीडितोरत्नंगृहीत्वाऽवाङ्मुखस्ततः ॥ अनुतप्यन्स्वभवनमगमत्स्वेनपाप्मना ३९ सोनुध्यायंस्तदेवाघंबलवद्विग्रहाकुलः ॥ कथंमृजाम्यात्मरजःप्रसीदेद्वाच्युतःकथम् ४० किंकृत्वासाधुमह्यंस्यान्नशपेद्वाजनोयथा ॥ अदीर्घदर्शनंधिङ्मांमूढंद्रविणलोलुपम् ४१

इषुक्षतानि शरच्छिन्नानि २८ २९ शंकरेणसुखकरेण ३० ३१ ३२ ३३ ३४ उपतस्थुःअभजन् ३५ ततःकिमभूदत्राह तेषामिति हरिस्तेषांप्रादुर्बभूवेत्यन्वयः देव्याउपस्थानान्निषेवणात्प्रत्यादिष्टाशिषांअभ्यागताभ्युदयानां भवन्पूज्यः सिद्धार्थःनित्यलब्धप्रयोजनः प्रत्यादिष्टाशिषइतिपाठेयेप्रथमंनष्टकृष्णारूपाशिषोभवन्तेषां तुशब्दोहेत्वर्थः देव्युपस्थानाद्धेतोरित्यर्थः अनेनापदिप्राप्तायांदेवता शरणंकर्तव्यमित्युक्तंभवति ३६ ३७ आख्यायोक्त्वा ३८ स्वेनपाप्मनानुतप्यन्पश्चात्तापंकुर्वन् ३९ ४० मह्यंममअदीर्घदर्शनंभविष्यज्ज्ञानहीनम् ४१

तस्यपापस्य ४२ ४३ ४४ फलभागिनःप्रयोजनांशमेवस्वीकुर्मः ॥ ४५ ॥ इ०भा०द०वि०टी०षष्टितमोऽध्यायः ॥ ६० ॥ अज्ञानिनांतमःप्राप्तिसाधनंज्ञानिनांभगवद्वृत्तयुद्रेककारणंलोकविडंबनार्थं भगवच्चरितविशेषंपूर्वाध्यायार्थबीजंनिरूपयत्यस्मिन्नध्याये अपिनासंदेहंनिवारयति कुल्पंशवदहनानंतरंतदुःखजिहासयातद्दहनमनंतस्यकरणेतन्निमित्तीकृत्येत्यर्थः १ २ अंतरमवकाशम् ३ भ्रातरंप्रसेनमन्वियात्अनुगतःस्यात्मृतोस्तुतंहन्मीत्यर्थः ४ ५ क्रंदंतीनांवैक्लव्यस्वरंकुर्वतीनां सौनिकवन्मारकवत्राक्षसवदित्यर्थः ६ ७ प्रास्यनिक्षिप्य ८ अस्राक्षीअश्रुजलकलिलेक्षणी ९ १०

दास्येदुहितरंतस्मैस्त्रीरत्नंरत्नमेवच ॥ उपायोयंसमीचीनस्तस्यशांतिर्नचान्यथा ४२ एवंव्यवसितोबुद्ध्यासत्राजित्स्वसुतांशुभाम् ॥ मणिंचस्वयमुद्यम्यकृष्णायोपजाहरताम् ४३ तांसत्यभामांभगवानुपयेमेयथाविधि ॥ बहुभिर्याचितांशीलरूपौदार्यगुणान्विताम् ४४ भगवानाहनमणिंप्रतीच्छामो वयंनृप ॥ तवास्तुदेवभक्तस्यवयंहिफलभागिनः ४५ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेषष्टितमोध्यायः ॥ ६० ॥ श्रीशुकउवाच ॥ विज्ञातार्थोपिगोविंदोदग्धानाकर्ण्यपांडवान् ॥ कुंतींचकुल्यकरणेसहरामोययौकुरून् १ भीष्मंनृपंसविदुरंगांधारींद्रोणमेवच ॥ समदुःखौसमागम्यहाकष्टमितिहोचतुः २ लब्ध्वैतदंतरंराजन्शतधन्वानमूचतुः ॥ अक्रूरकृतवर्माणौमणिःकस्मान्नगृह्यते ३ योस्मभ्यंसंप्रतिश्रुत्यकन्यारत्नंविगर्ह्यनः ॥ कृष्णायादात्ससत्राजित्तस्माद्भ्रातरमन्वियात् ४ एवंभिन्नमतिस्ताभ्यांसत्राजितमसत्तमः ॥ शयानमवधील्लोभात्सपापःक्षीणजीवितः ५ स्त्रीणांविक्रोशमानानांक्रंदंतीनामनाथवत् ॥ हत्वापशून्सौनिकवन्मणिमादायजग्मिवान् ६ सत्यभामाचपितरंहतंवीक्ष्यशुचार्पिता ॥ व्यलपत्तातताते तिहाहतास्मीतिमुह्यती ७ तैलद्रोण्यांमृतंप्रास्यजगामगजसाह्वयम् ॥ कृष्णायविदितार्थायतप्ताचरूयौपितुर्वधम् ८ तदाकर्ण्यैश्वरौराजन्ननुसृत्यनृलोकताम् ॥ अहो नःपरमंकष्टमित्यस्राक्षौविलेपतुः ९ आगम्यभगवांस्तस्माद्भार्ययासाग्रजःपुरम् ॥ शतधन्वानमोरभ्रेहंतुंहर्तुंचतंमणिम् १० ततःपांचालनगराद्याज्ञसेन्याःस्वयंवरम् ॥ घुष्यतायज्ञसेनेनप्रेषितोदूतआगतः ११ आहूतस्तेनगोविंदोगत्वापांचालकेपुरे ॥ ददर्शसाग्रजस्तत्रकिशोरान्पांडुनंदनान् १२ अदृष्टपूर्वान्सुव्यक्तंब्रह्मरूपधरान्नृपान् ॥ तैर्विद्धलक्ष्यैःपौरुष्यप्रतिलब्धमनोरथैः १३ कुंभकारस्यशालायांसमागम्याभिवंद्यच ॥ पितृष्वसामनुज्ञाप्य राजानंचयुधिष्ठिरम् १४ निहंतुंशतधन्वानंतूर्णद्वारावतीमियात् ॥ सोपिकृष्णोद्यमंज्ञात्वाभीतःप्राणपरीप्सया १५ साहाय्येकृतवर्माणमयाचतसचाब्रवीत् ॥ नाहमीश्वरयोःकुर्यांहेलनंरामकृष्णयोः १६ कोनुक्षेमायकल्पेततयोर्वृजिनमाचरन् ॥ कंसःसहानुगोवीरोयद्वेषात्त्याजितःश्रिया १७ जरासंधःसप्तदशसंयुगाद्विरथोगतः ॥ प्रत्याख्यातःसचाक्रूरंपार्ष्णिग्राहमयाचत १८

याज्ञसेन्याःद्रौपद्याः ११ १२ ब्रह्मरूपधरान्ब्राह्मणवेषंबिभ्राणान् पौरुषेणपराक्रमेणप्रतिलब्धोमनोरथोयेषांतेतथातैः १३ पितृष्वसांपितृष्वसारंकुंतीम् १४ १५ १६ वृजिनमपराधं अपराधकार्यं त्वेनिमित्तानिकथयति कंसइति १७ प्रत्याख्यातोनिराकृतःकृतवर्मेतिशेषः पार्ष्णिग्राहंपृष्ठबलं १८

१९ २० २१ उच्छिलींध्रंछत्राकारं २२ २३ शतयोजनगंशतयोजनगमनसमर्थम् २४ गरुडोध्वजेयस्यसतथातंरथं २५ मिथिलानगर्याः २६ पद्भ्यामावित्रःसततंगमनंयस्यसतथा तस्य तिग्मनेमिनाचंडधाराग्रेण व्यचिनोत्अन्वेषणंकृतवान् २७ २८ अन्वेषन्मार्गणंकुर्वन् २९ ३० अर्हण्यंपूज्यं ३१ कालेकृष्णवियोगसमये ३२ ३३ बंधोःसत्राजितःसांपरायिकाः प्रेतविषयाः ३४ व्यूषतुःप्रवासंचक्रतुःप्रयोजकौ शतधन्वनःप्रेरकौ ३५ ३६ ३७ इतिशब्दःप्रकारवचनः अंगेतिसंबोधनं एकेकेचित् पूर्वपुरुषैरुक्तंपुराणवचनमुपदिशंतिप्रवदंति कथमितित्राह

सोप्याहकोविरुध्येतविद्वानीश्वरयोर्बलम् ॥ यंकैलासाश्रयःशंभुर्ननामशिरसाहरिम् १९ योहंसडिंभकौयुद्धेजितवान्वरदुर्मदौ ॥ आशीविषोमहानागो येननिर्वासितोह्रदात् २० यइदंलीलयाविश्वंसृजत्यवतिहंतिच ॥ चेष्टांविश्वसृजोयस्यनविदुर्मोहितायया २१ यःसप्तहायनःशैलमुत्पाट्यैकेनपाणिना दधारलीलयाबालउच्छिलींध्रमिवार्भकः २२ नमस्तस्मैभगवतेकृष्णायाद्भुतकर्मणे ॥ अनंतायादिभूतायकूटस्थायात्मनेनमः २३ प्रत्याख्यातःसतेना पिशतधन्वामहामणिम् ॥ तस्मिन्यस्याश्वमारुह्यशतयोजनगंयया २४ गरुडध्वजमारुह्यरथंरामजनार्दनौ ॥ अन्वयातांमहावेगैरश्वैराजन्गुरुद्रुहम् २५ मिथिलायाउपवनेविसृज्यपतितंहयम् ॥ पद्भ्यामधावत्संत्रस्तःकृष्णोऽन्वभ्यद्रवद्रुषा २६ पदातेर्धावतस्तस्यपदातिस्तिग्मनेमिना ॥ चक्रेणशिरउत्कृत्य वाससोर्व्यचिनोन्मणिम् २७ अलब्धमणिरागत्यकृष्णआहाग्रजांतिकम् ॥ वृथाहतःशतधनुर्मणिस्तत्रनविद्यते २८ ततआहबलोनूनंसमणिःशतध न्वना ॥ कस्मिंश्चित्पुरुषेन्यस्तस्तमन्वेषन्पुरंव्रज २९ अहंवैदेहमिच्छामिद्रष्टुंप्रियतरंमम ॥ इत्युक्त्वामिथिलांराजन्विवेशयदुनंदनः ३० तंदृष्ट्वासह सोत्थायमैथिलःप्रीतमानसः॥ अर्हयामासविधिवदर्हण्यंवैसमर्हणैः ३१ उवासतस्यांकतिचिन्मिथिलायांसमाविभुः ॥ ततोऽशिक्षद्रदांकालेधार्तराष्ट्रःसुयो धनः३२ मानितःप्रीतियुक्तेनजनकेनमहात्मना ॥ केशवोद्वारकामेत्यनिधनंशतधन्वनः ॥ अप्राप्निचमणेःप्राहप्रियायाःप्रियकृद्विभुः ३३ ततःसकार्यामास क्रियांबंधोर्मृतस्यवै ॥ साकंसुहृद्भिर्भगवान्न्यायाःस्युःसांपरायिकाः ३४ अक्रूरकृतवर्माणौश्रुत्वाशतधनोर्वधम्॥व्यूषतुर्भयवित्रस्तौद्वारकायाःप्रयोजकौ३५ अक्रूरेप्रोषितेऽरिष्टान्यासन्द्वारकौकसाम् ॥ शारीरामानसास्तापामुहुर्दैविकभौतिकाः ३६ ततोऽपृच्छद्भरिर्वृद्धानुग्रसेनपुरोगमान् ॥ कस्मादिहारिष्टान्या सन्महतासुचिरेणनः३७इत्यंगोपदिशंत्येकेविस्मितावैगदाभृतः ॥ निवासनिकटेकिंवाघटेतारिष्टदर्शनम् ३८ देवेऽवर्षतिकाशीशःश्वफल्कायागतायगाम् ॥ स्वसुतांगांदिनींप्रादात्ततोवर्षत्स्मकाशिषु ३९ तत्सुतस्तत्प्रभावोसावक्रूरोयत्रतत्रसः ॥ देवोऽभिवर्षतेतत्रनोपतापानमारिकाः ४०

गदाभृतइति श्रीकृष्णस्यनिवासनिकटेअरिष्टदर्शनमशुभदर्शनंघटेतकिंचनघटेत ३८ स्वराष्ट्रेदेवेपर्ज्जन्येऽवर्षतिकाशीशःकाशिराजः स्वराष्ट्रंप्रत्यागतायश्वफल्कायअक्रूरपित्रे गांस्वविषयभूमिं नाम्नागांदिनींस्वसुतांचप्रादात् ३९ किमनेनेतित्राह तत्सुतइति तत्प्रभावःश्वफल्कप्रभावः अतोक्रूरोयत्रदेशेतत्रदेवोभिवर्षतितस्मिन्देशेउपतापादयोनभवंति ४०

अवर्षणादिसंभवेन्यच्चनिमित्तमस्तीतिभावेनोच्यते नैतावतेति इहअवर्षणादावेतावदक्रूरप्रवासनमेवकारणंनभवति किंतु स्यमंतकगमनंचकारणमितिचवृद्धवचः श्रुत्वाक्रूरंवरामंचसमानीयानायित्वा ४१ ४२ ४३ किंकृत्वास्वीकुर्युरितितत्राह निनीषेति अपःपिंडांश्चनिनीयदत्त्वाअशेषतःपित्रादिविषयमृणंचविमुच्यगृह्णीयुरितिपूर्वेणान्वयः ४४ तर्हितथास्त्वितेत्याह किंत्वितिप्रत्येतिविश्वासंकरोति प्र. त्ययस्तुख्यातिरंघ्रविश्वासाधीनहेतुष्विति शांतिंमंगलं शांतिःप्रशममंगलइति ४५ वर्ततेतथेतिशेषः रुक्मवेदयःसुवर्णमेखलाःआरब्धःउक्तः ४६ रजोमिथ्यावादलक्षणांधूलिं ४७ तदर्थमणिनिमित्तं ४८ स्वात्मनाइतितृतीयाषष्ठ्यर्थे ४९ स्नेहाद्विस्रब्धंविश्वस्तं ५० ५१ फलमाह यइति शांतिमुक्तिं ५२ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्द्धेविज०एकषष्टितमोऽध्यायः ॥ ६१ ॥ तत्तदधिकारि

इतिवृद्धवचःश्रुत्वानैतावदिहकारणम् ॥ इतिदूतैःसमानीयरामाक्रूरौजनार्दनः ४१ अक्रूरंमानयन्कृष्णःकथयित्वाप्रियाःकथाः ॥ विज्ञाताखिलतत्त्वज्ञः स्मयमानउवाचह ४२ ननुदानपतेन्यस्तस्त्वय्यसौशतधन्वना ॥ स्यमंतकोमणिःश्रीमान्विदितःपूर्वमेवनः ४३ सत्राजितोऽनपत्यत्वाद्दुहितुःसुताः ॥ दायंनिनीषापःपिंडान्विमुच्यर्णमशेषतः ॥ तथापिदुर्धरोह्यन्यैस्त्वय्यास्तांप्रापितोमणिः ४४ किंतुमामग्रजःसम्यङ्प्रत्येतिमणिंप्रति ॥ दर्शयस्वमहाभागबंधूनांशांतिमावह ४५ अन्युच्छिन्नामखास्तेद्यवर्ततेतेरुक्मवेदयः ॥ एवंसामभिरारब्धःश्वफल्कतनयोमणिम् ४६ आदायवास साच्छन्नंददौसूर्यसमप्रभम् ॥ स्यमंतकंदर्शयित्वाज्ञातिभ्योरजआत्मनः ४७ मार्ज्जयामासलोकेशअभिभाष्यहलायुधम् ॥ दृष्ट्वामणिंहलधरस्तदर्थप्रो ष्यआगतः ४८ योग्योहमितिमन्वानश्चकमेकुरुपुंगव ॥ सत्यभामापितृधनंमन्वानास्वात्मनोचितम् ४९ ग्रहीतुमैच्छद्विस्रब्धंहरेश्चित्तमजानती ॥ जांबवत्यपिशुल्कार्थंपित्रादत्तंममेतिह ५० स्पृहांचक्रेमणौतस्मिन्सर्वेविज्ञायमाधवः ॥ अक्रूरस्यकरेभूयोमणिंप्रत्यर्पयद्विभुः ५१ यस्त्वेतद्भगवतईश्वर स्यविष्णोर्वीर्याख्यंवृजिनहरंसुमंगलंच ॥ आख्यानंपठतिशृणोत्यनुस्मरेद्वादुष्कीर्तिंदुरितमपोह्ययातिशांतिम् ५२ इतिश्रीभागवतेमहापुराणेदशमस्कं धेउत्त०एकषष्टितमोऽध्यायः ॥६१॥ श्रीशुकउवाच ॥एकदापांडवान्द्रष्टुंप्रतीतान्पुरुषोत्तमः॥इंद्रप्रस्थंगतःश्रीमान्युयुधानादिभिर्वृतः १दृष्ट्वातमागतंपार्थामु कुंदमखिलेश्वरम् ॥ उत्तस्थुर्युगपद्वीराःप्राणंमुख्यमिवागतम् २ परिष्वज्याच्युतंवीराअंगसंगहतैनसः ॥ सानुरागस्मितंवक्त्रंवीक्ष्यतस्यमुदंययुः ३ युधि ष्ठिरस्यभीमस्यकृत्वापादाभिवंदनम् ॥ फाल्गुनंपरिरभ्याथयमाभ्यामभिवंदितः ४ परमासनमासीनंकृष्णाकृष्णमनिंदिता ॥ नवोढाव्रीडिताकिंचि च्छनैरेत्याभ्यवंदत ५ तथैवसात्यकिःपार्थैःपूजितश्चाभिवंदितः ॥ निषसादासनेन्येचपूजिताःपर्युपासते ६

णांतत्तद्योग्यगुणोपसंहारार्थभक्तवात्सल्यादिविशेषंकथयति कतिपयेष्वध्यायेषु तत्रादौहरेर्भक्तवात्सल्यंदर्शयितुमाह एकदेति एकदाकस्मिंश्चिदवसरेप्रतीतान्शौर्यादिगुणेनप्रख्यातान्कोविदान्वा भग वद्भक्त्याभरणेनभूषिताम्वा प्रतीतोभूषितेख्यातेज्ञानेप्रत्यर्थितेबुधइतियादवः प्रतीतःप्रथितेख्यातेवित्तविज्ञानकोविदइत्यमरः १ मुकुंदंमुक्तिप्रदं शरीरंप्रत्यागतंप्रविष्टंमुख्यप्राणंदृष्ट्वाचक्षुरादींद्रिया णियथोत्तिष्ठंति २ अच्युतस्यांगसंगेन ३ ४ कृष्णाद्रौपदी ५ ६

तस्यैकृताभिवंदनः अभिरंभितःआलिंगितः परिपृष्टबांधवस्तयेतिशेषः ७ क्लेशापायात्मदर्शनंक्लेशनाशकरस्वरूपदर्शनं जतुगृहादावनुभूतांस्तांश्चबहून्क्लेशान्स्मरंतीतंकृष्णमाहेत्यन्वयः ८ किमत्राह तदेवेति हेकृष्ण यच्चदास्मरतांनोवृत्तंज्ञातुंत्वयायदामेभ्राताऽक्रूरःप्रेषितः तदैवास्माकंकुशलमभूदित्यन्वयःकथमेतदत्राह यदिति यदित्युत्तरत्रापिसंबध्यतेहेतुत्वेन अस्मत्कुशलंस्मरतात्वयासनाथाः स्वामिवंतःकृताइतियत्पांडवानामुपद्रवोनकर्तव्यःयतस्तेकृष्णनाथाअस्मान्न्रंतीति ९ किंच यदास्वयंवरकृतेपांचालेषुस्थितानस्माननुस्मृत्य यस्त्वमागतःतदातेनत्वयात्वद्गुणानुसंस्मृत्याहंसुस्रोषिताआसंइत्यन्वयः १० इदानीमागमनविलंबःकिमितिकृतइतिकुंत्याहार्दशंकांपरिहरन्नाह इतीति ११ १२ सीरधरोहलधरःबलभद्रइत्यर्थः १३ १४ कार्यंयंत्रितःकार्यवशः ईश्वरस्यतवइदंवचनंलोकचेष्टा

पृथांसमागम्यकृताभिवंदनस्तयातिहार्दार्द्रदृशाऽभिरंभितः ॥ आपृष्टवांस्तत्कुशलंसहस्नुषांपितृष्वसारंपरिपृष्टबांधवः ७ तमाहप्रेमवैक्लव्यरुद्धकंठाश्रु लोचना ॥ स्मरंतीतान्बहून्क्लेशान्क्लेशापायात्मदर्शनम् ८ तदैवकुशलंनोभूद्यत्सनाथाःकृतावयम् ॥ ज्ञातुंनःस्मरताकृष्णभ्रातामेप्रेषितस्त्वया ९ पां चालेषुस्थितानस्मान्स्वयंवरकृतेयदा ॥ अनुस्मृत्यागतोयस्त्वंतेनस्मासंसुखोषिता १० इत्युक्तायांतदाकुंत्यांप्राहयोगेश्वरःस्वयम् ॥ पांचालेषुस्थिता नेत्यसुतांस्तेछद्मरूपिणः ११ कुंभकारस्यशालायामुषितान्सहभार्यया ॥ दृष्ट्वागतोहंदिवसेतस्मिन्नेवाविलंबितः १२ निहंतुंशतधन्वानंसत्यभामापितु र्हितम् ॥ शतधन्वनिदुर्बुद्धौहतेसीरधरोऽग्रजः १३ कुपितोमामनादृत्यविदेहान्विमनाययौ ॥ एतावतंमहाकालंतदागमनकांक्षया १४ पुरएवावसंका पिनागच्छंकार्ययंत्रितः ॥ इत्येवंवादिनंकुंतीप्राहस्नेहपरिप्लुता १५ नतेस्तिस्वःपरइतिविश्वस्यसुहृदात्मनः ॥ तथापिस्मरतांसर्वान्क्लेशान्हंसिहृदि स्थितः १६ इतिवैवार्षिकान्मासान्राज्ञासोभ्यर्चितःसुखम् ॥ जनयन्नयनानंदंमींद्रप्रस्थौकसांविभुः १७ एकदारथमारुह्यविजयोवानरध्वजम् ॥ गां डीवंधनुरादायतूणौचाक्षयसायकौ १८ साकंकृष्णेनसन्नद्धोविहर्तुंविपिनंवनम् ॥ बहुव्यालमृगाकीर्णंप्राविशत्परवीरहा १९ तत्राविंध्यच्छरैर्व्याघ्रान्सू करान्महिषान्रुरून् ॥ शरभान्गवयान्खड्गान्हरिणाञ्छशशल्यकान् २० तान्निघ्नुःकिंकराराज्ञेमेध्यान्पर्वण्युपागते ॥ तृट्परीतःपरिश्रांतोबीभत्सुर्य मुनामगात् २१ तत्रोपस्पृश्यविशदंपीत्वामृष्टमणिप्रभम् ॥ कृष्णौददर्शतुःकन्यांचरंतींचारुदर्शनाम् २२ तामासाद्यवरारोहांसुदतींरुचिराननाम् ॥ प प्रच्छप्रेषितःसख्याफाल्गुनःप्रमदोत्तमाम् २३ कात्वंकस्यासिसुश्रोणिकुतोवार्किंचिकीर्षसि ॥ मन्येत्वांपतिमिच्छंतींकन्यांकथयशोभने २४

नुसारिनतुतथ्यमितिभावेनप्रतिवक्ति इतीति १५ स्वःस्वकीयःपरःपरकीयःशत्रुपक्षभवःशत्रुमित्रविभागाभावेजनार्दनोमुरारिर्मधुसूदनःपार्थसारथिरित्यादीनिनामानिविक्रमानिमित्तानिकथमत्राह तथापी ति १६ इतिसंलापेवार्षिकान्वर्षाकालसंबंधिनः राज्ञाभ्यर्चितःउवासेतिशेषः १७ १८ विपिनंगंभीरम् १९ महिषान्वनमहिषान् रुरून्कृष्णमृगान् शरभानष्टपदान् खड्गान्मृगविशेषान् हरिणान्सामान्य मृगान् शल्यकान्शललान् २० राज्ञेयुधिष्ठिरायपर्वणिश्राद्धोचितेयजनकालेवा २१ कृष्णौयादवेंद्रार्जुनौ २२ सख्याकृष्णेन २३ कन्यांदीप्तामुत्पन्नरजसं अतएवपतिंकामयमानां कनदीप्तावितिधातुः अनवाप्तपतिःकन्याजातवीर्यावरार्थिनीत्युत्पलमाला २४

वरेण्यंप्रार्थनीयम् २५ अनाथवत्सलः २६ २७ गुडाकेशःघनकेशःजितनिद्रोवा यथाकालिंदीऊचेतथासोपिवासुदेवाय २८ २९ ३० ३१ ३२ ३३ ३४ राजाधिदेव्याःराजाधिदेवीति नामधेयायाः ३५ नीलेत्याह्वयोनामयस्याःसानीलेत्याह्वया आप्रगृह्णःस्मृतीवाक्येष्वास्तुसंतापकोपयोरितिपादवः ३६ वीरान्शूरान्गंधयंतिहिंसयंतीतिवीरगंधाः तान् गंधोलेशेचहिंसायां घ्राणग्राहेप्रकीर्तितइति वीरस्यराहोर्गंधइवगंधोयेषांतेतथातान् वीरोराहौहरौशक्रइतिवा महांतोघनामेघायथानीलास्तेतथातान् यद्वा महाकठिनान्महामुद्गरानिवास्थितान्वा घनाःखलीनसं पातमेघकाटिन्यमुद्गराइति ३७ वृषजिल्लुभ्यांलब्धुंयोग्याम् सैन्येनसेनासमूहेन ३८ गुरुणाबहुमानेनमहत्त्वेन ३९ अभिमतमभीष्टंवरंवरणयोग्यरूपम् वरोनारूपजामात्रोर्देवादेरीप्सि

कालिंद्युवाच ॥ अहंदेवस्यसवितुर्दुहितापतिमिच्छती ॥ विष्णुंवरेण्यंवरदंतपःपरममास्थिता २५ नान्यंपतिंवृणेवीरतमृतेश्रीनिकेतनम् ॥ तुष्यतांमे सभगवान्मुकुंदोऽनाथवत्सलः २६ कालिंदीतिसमाख्यातावसामियमुनाजले ॥ निर्मितेभवनेपित्रायावदच्युतदर्शनम् २७ तथाऽवदद्गुडाकेशोवासुदे वायसोपिताम् ॥ रथमारोप्यतद्विद्वान्धर्मराजमुपागमत् २८ वसंस्तत्रहृषीकेषःशक्रप्रस्थेयथासुखम् ॥ विश्वकर्माणमाहूयशिल्पविद्याविशारदम् २९ अद्भुतंकारयामासनगरंधर्मसूनवे ॥ सप्रासादपुरद्वारगोपुराट्टालतोरणम् ३० पुरंदरपुरप्रख्यंस्वानांप्रियचिकीर्षया ॥ अथपार्थैरनुज्ञातःसुहृद्भिःस्वजना न्वितः ३१ आययौद्वारकांभूयःसात्यकिप्रमुखैर्वृतः ॥ अथोपयेमेकालिंदींपुण्येनक्षत्रऋर्जिते ३२ रूपयौवनसंपन्नांमनोनयननंदिनीम् ॥ वितन्वन्पर मानंदंस्वानांपरममंगलम् ३३ विंदानुविंदावावंत्यौदुर्योधनवशानुगौ ॥ स्वयंवरेस्वभगिनींकृष्णकामांन्यषेधताम् ३४ राजाधिदेव्यास्तनयांमित्रवृंदा पितृष्वसुः ॥ प्रसह्यहृतवान्कृष्णोराजन्राज्ञांप्रपश्यताम् ३५ नग्नजिन्नामकौशल्यआसीद्राजाऽतिधार्मिकः ॥ तस्यसत्याऽभवत्कन्याराजन्नीलेतिआह्व या ३६ तांनशेकुर्नृपावोढुमजित्वासप्तगोवृषान् ॥ तीक्ष्णशृंगान्सुदुर्द्धर्षान्वीरगंधान्महाबलान् ३७ तांश्रुत्वावृषजिल्लुभ्यांभगवान्सात्वतांपतिः ॥ जगाम कौशलपुरंसैन्येनमहतावृतः ३८ सकौशलपतिःप्रीतःप्रत्युत्थानासनादिभिः ॥ अर्हणेनापिगुरुणापूजयन्प्रत्यनंदत ३९ वरंत्रिलोक्याभिमतंसमागतं नरेंद्रकन्याचकमेरमापतिम् ॥ भूयादयंमेपतिराशिषांपतिःकरोतुसत्योयदिमेधृतव्रतः ४० अर्चितंपुनरित्याहनारायणजगत्पते ॥ आत्मनादेवपूर्णस्य करवाणिकिमल्पकः ४१ यत्पादपंकजरजःशिरसाबिभर्तिश्रीरब्जजश्चगिरिशःसहलोकपालैः ॥ लीलातनुःस्वकृतसेतुपरीप्सयायःकालेदधत्सभगवा न्स्वकृतेनतुष्येत् ४२ श्रीशुकउवाच ॥ तमाहभगवान्कृष्णःकृतासनपरिग्रहः ॥ मेघगंभीरयावाचासस्मितंकुरुनंदन ४३

तावृताविति आशिषांभार्याभिलाषाणांपतिःसाधकः आशीरुरगदंष्ट्रायांशुभवाक्याभिलाषयोः यदिमेमयाव्रतःव्रतसमूहोधृतःअनुपयुक्तत्वेननिधिवत्भवत्कृतस्तर्हिससत्यःसच्चिदानंदात्माश्रीकृष्णः करोतुममपाणिग्रहणंकरोत्वितिशेषः व्रतानांसमूहइत्यास्मिन्नर्थेअच्प्रत्ययः यदिसत्योधृतव्रतोस्तितर्हिसव्रतःस्वफलत्वेनकृष्णंनःपतिंकरोत्वितिवा ४० आत्मनास्वलाभेन ४१ स्वकृतसेतुपरीप्स यास्वकल्पितवर्णाश्रमलक्षणसेतुपालनेच्छया मयिस्थितः स्वेनैवकृतेनकर्मणा ४२ ४३

विदुषोविद्वांसः स्वयंवरादन्यत्रकालेअयाचितारंवरमुत्तममाहुः पुरुषार्थभागिनांप्रयोजनांशभाजांप्रभूणांमध्येसअर्थार्थीतांवेलांकालंविनाह्वाययत्यात्मानंमितिशेषः आह्वानमितिपाठेसोयाचितास्वयंवरकालंविनापिस्वहृतिंप्रभूणामाह्वानमर्हतीतिशेषः वेलेतिपाठेप्रभूणामाह्वानंविनापिसएववेलाकालःस्वयंवराख्यइत्याहुरित्यर्थः ४४ सामान्यमुक्तावितिशिनष्टि नरेंद्रेति राजन्यबंधोःराज्ञांवंशेजातस्य निजधर्मवर्तिनःक्षात्रधर्ममनुवर्तमानस्य शुल्कदावेतनप्रदाः ४५ ४६ कन्यायाःवरपरीप्सयावरेच्छया ४७ दुर्दांताःअशक्याशिक्षाः दुरवग्रहाग्रहीतुमशक्याः ४८ ४९

श्रीभगवानुवाच ॥ अन्यत्रकालेविदुषःस्वयंवरादयाचितारंवरमाहुरुत्तमम् ॥ साहिप्रभूणांपुरुषार्थभागिनांवेलांविनाह्वाययतिक्षितिश्वर ४४ नरेंद्रयाच्ञाकविभिर्विगर्हितारा जन्यबंधोर्निजधर्मवर्तिनः॥ तथापियाचेतवसौहृदेच्छयाकन्यांत्वदीयांनहिशुल्कदावयम्४५ राजोवाच ॥ कोन्यस्तेभ्यधिकोनाथ कन्यावरइहेप्सितः ॥ गुणैकधाम्नोयस्यांगेश्रीर्विसृज्यनपायिनी ४६ किंत्वस्माभिःकृतःपूर्वंसमयःसात्वतर्षभ ॥ पुंसांवीर्यपरीक्षार्थंकन्यावरपरीप्सया ४७ सप्तैतेगोवृषावरिदुर्दांतादुरवग्रहाः ॥ एतैर्भग्नाःसुबहुशोभिन्नगात्रानृपात्मजाः ४८ यदिमेनिगृहीताःस्युस्त्वयैवयदुनंदन ॥ वरोभवानभिमतोदुहितुर्मे श्रियःपते ४९ श्रीशुकउवाच ॥ एवंसमयमाकर्ण्यबद्ध्वापरिकरंप्रभुः ॥ आत्मानंसप्तधाकृत्वान्यगृह्णाल्लीलयैवतान् ५० बद्ध्वातान्दामभिःशौरिर्भग्नवीर्यान्हतौजसः ॥ व्यकर्षल्लीलयाबद्धान्बालोदारुमयान्यथा५१ततःप्रीतःसुतांराजन्ददौकृष्णायविस्मितः ॥ तांप्रत्यगृह्णाद्भगवान्विधिवत्सदृशींप्रभुः ५२ राजपत्न्यःस्वदुहितृःकृष्णंलब्ध्वाप्रियंपतिम् ॥ लेभिरेपरमानंदंजातश्चपरमोत्सवः ५३ शंखभेर्यानकानेदुर्गीतवाद्यद्विजाशिषः॥ नरानार्यःप्रमुदिताःसुवासःस्रगलंकृताः ५४ दशधेनुसहस्राणिपारिबर्हमदाद्विभुः ॥ युवतीनांत्रिसाहस्रंनिष्कग्रीवसुवाससाम् ५५ नवनागसहस्राणिनागाच्छतगुणान्रथान् ॥ रथाच्छतगुणानश्वानश्वाच्छतगुणान्नरान् ५६ दंपतीरथमरोप्यमहत्यासेनयावृतौ ॥ स्नेहप्लुतहृदयोयापयामासकौशलः ५७ पारिबर्हंचसंगृह्यद्वारकामेत्यसत्यया ॥ रेमेयदूनामृषभोभगवान्देवकीसुतः ५८ श्रुतकीर्तेःसुतांभद्रामुपयेमेपितृष्वसुः ॥ कैकेयींभ्रातृभिर्दत्तांकृष्णःसंतर्दनादिभिः ५९ सुतांचमद्राधिपतेर्लक्ष्मणांलक्षणैर्युताम् ॥ स्वयंवरेजहारैकःससुपर्णःसुधामिव ६० अन्याश्चैवंविधाभार्याःकृष्णस्यासन्सहस्रशः ॥ भौमंहत्वातन्निरोधादाहृताश्चारुदर्शनाः ६१ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेद्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥ राजोवाच ॥ यथाहतोभगवताभौमोनीतायथास्त्रियः ॥ निरुद्धायास्तदाचक्ष्वविक्रमंशार्ङ्गधन्वनः ॥ १ श्रीशुकउवाच ॥ द्वारवत्यांमहाभागेनिवसत्यच्युतेनृप ॥ दीनेनोद्विग्नचित्तेनसमागम्यत्रिविष्टपाद् २

परिकरंचैलोष्णीषादिलक्षणं ५० ५१ ५२ ५३ गीतवाद्यानिद्विजाशिषश्चतथाप्रमुदिताअभूवन्नितिशेषः ५४ पारिबर्हस्त्रीधननिकायं ५५ ५६ ५७ ५८ ५९ ६० भौमंहत्वातस्यभौमस्य निरोधात्तत्कारागृहादाहृताःआनीताः ६१ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांद्विषष्टितमोऽध्यायः ॥ ६२ ॥ यथाकथंपृष्टंतत्सर्वं १ २

हृतेकुंडलेयस्यसहृतकुंडलः हृतकुंडलोबंधुर्मातायस्यसतथातेननरकेणहृतंअमराद्रौमेरोस्थानंयस्यसतथा ३ प्राग्ज्योतिषपुरंनरकस्यनगरम् ४ कुत्रतन्नगरमत्राह हिमाद्राविति जलेन अग्निनानिलेनवायुनादुर्गमंगंतुमशक्यं मुरपाशानामयुतैःअनकैःषट्सहस्रैरित्यर्थः यद्वा मुरपाशैरयुतैरसंख्यैःपृथक्कृतैःशस्त्रदुर्गैःदुर्गमपिगिर्यादिक्रमेण ५ ६ अमंदमनल्पम् ७ ८ ९ १०

हृतच्छत्रेणशक्रेणहृतकुंडलबंधुना ॥ हृतामराद्रिस्थानेनज्ञापितोभौमचेष्टितम् ३ इंद्रमाश्वास्यगोविंदःसुसंपूज्यविसृज्यच ॥ सभार्योगरुडारूढःप्राग्ज्योतिषपुरंययौ ४ हिमाद्रौतुंगशिखरेजलाग्न्यनिलदुर्गमम् ॥ गिरिदुर्गैःशस्त्रदुर्गैर्मुरपाशायुतैर्वृतम् ५ ससंप्राप्यभटैर्गुप्तंदानवेंद्रपुरंमहत् ॥ गदयानिर्बिभेदाद्रिंप्राकाराकारसंस्थितम् ६ तन्निर्भिद्यप्रविश्यांतःशस्त्रदुर्गाणिसायकैः ॥ चकर्तमौरवंपाशंचक्रेणामंदमच्छिनत् ७ क्षुरमालांतथाघोरांनिचकर्तासिनाहरिः ॥ वायव्यास्त्रेणसलिलंवारुणास्त्रेणपावकम् ८ हरिर्निमिषमात्रेणनाशयामासभारत ॥ शंखनादेनतीव्रेणमनांसिचमनस्विनाम् ९ पांचजन्यध्वनिंकृत्वायुगांताशनिभीषणम् ॥ मुरःशयानउत्तस्थौदैत्यःपंचाशिराजलात् १० त्रिशूलमुद्यम्यसुदुर्निरीक्ष्योयुगांतसूर्यानलरोचिरुज्ज्वलः ॥ ग्रसंस्त्रिलोकानिवपंचभिर्मुखैरभ्यद्रवत्ताक्ष्यसुतंयथोरगः ११ आविध्यशूलंतरसागरुत्मतेनिरस्यवक्त्रैर्व्यनदन्सपंचभिः ॥ खंरोदसीसर्वदिशोंतरंमहानापूरयन्नंडकटाहमावृणोत् १२ तमापतंतंत्रिशिखंगरुत्मतेचकर्तबाणद्वितयेनकेशवः ॥ मुखेषुतस्यापिशरान्समर्पयन्पुनर्गदांसोप्यमुचन्मधुद्विषे १३ तामापतंतींगदयागदाग्रजोगदांमृधेनिर्बिभिदेसहस्रधा ॥ उद्यम्यबाहूनभिधावतोदिशःशिरांसिचक्रेणजहारलीलया १४ व्यसुःपपातांभसिकृत्तकंधरोनिकृत्तपक्षोद्रिरिवेंद्रतेजसा ॥ पपातविष्णोःशिरसिप्रमोदिनीप्रसूनवृष्टिर्निहतेमुरेसुरे १५ तस्यात्मजाःसप्तपितुर्वधातुराश्चिक्रीर्षवस्तस्यरणेप्रतिक्रियाम् ॥ ध्रुवश्चविष्णुःश्रवणोविभावसुर्नभोवसुस्वानरुणश्चसप्तमः १६ रथान्समारुह्यवृषप्रयुक्तान्भौमप्रयुक्ताभवनान्निराक्रमन् ॥ अयुंजतासज्यशरासनान्भटाःशक्त्यर्ष्टिशूलानजितेरुषोल्बणान् १७ तच्छत्रुकूटंभगवान्समार्गणैरमोघवीर्यस्तिलशश्चकर्तह ॥ तान्योद्धुमिच्छूननयद्यमक्षयंनिकृत्तशीर्षोरुभुजांघ्रिकार्मुकान् १८ ततोद्रुततरंगत्वाभटाराजपुरंमहत् ॥ हतान्मुरसुतान्सर्वान्नरकायन्यवेदयन् १९ स्वानीकपानच्युतचक्रसायकैर्हतान्निशम्याशु चुकोपभूमिजः ॥ निरीक्ष्यदुर्मर्षणमास्रवन्मदैर्गजैःपयोब्धिप्रभवैर्निराक्रमत् २० रथैरनेकसाहस्रैर्गजैश्चबहुभिर्वृतः ॥ महत्यासेनयायुक्तश्चायादायोधनंबली २१ दृष्ट्वासभार्यंगरुडोपरिस्थितंसूर्योपरिष्टात्सतडिद्घनंयथा ॥ गृहीतकोदंडमुदारशंखकौमोदकीचक्रधरंचतुर्भुजम् २२ नीलजीमूतसंकाशंदृष्ट्वातंगजवाहनम् ॥ शंखमाध्मायगोविंदःसिंहनादंव्यनीनदत् २३

११ निरस्यमुक्त्वा आपूरयन्नादेनेतिशेषः १२ १३ १४ प्रमोदिनीसंतोषजननी १५ १६ भौमेनप्रयुक्ताःप्रेरिताःनिराक्रमन्निर्गताः आसज्यज्यामारोप्य १७ कूटंसमूहम् १८ १९ २० आयोधनंयुद्धस्थानम् २१ सूर्योपरिष्टात्स्थितंतंतडितासहितंघनंमेघम् २२ २३

वरूथिनीदैत्यपतेःसुघोरान्शरान्ववर्षाच्युतमूर्ध्निदुर्जया ॥ कृष्णेसभौमोव्यसृजच्छतघ्नींलोहायसींतेनभृशंसविव्यथे २४ अनेकबाणान्निर्मुक्तान्नरकेणस्म यन्निव ॥ चकर्तबाणैर्युगपत्तदद्भुतमिवाभवत् २५ ततोनुसैन्यंभगवान्गदाग्रजोविचित्रपत्रैर्निशितैःशरौघैः ॥ निकृत्तबाहूरुशिरोंघ्रिविग्रहंचकारतूर्णंनृपसाश्वकुंजरम् २६ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेत्रिषष्टितमोध्यायः ॥६३ ॥ श्रीशुकउवाच ॥ यानियोधैःप्रयुक्तानिशस्त्रास्त्राणिकुरूद्वह ॥ अच्छिनत्केशवस्तीक्ष्णैःशरैरेकैकशस्त्रिभिः ॥ ऊह्यमानःसुपर्णेनपक्षाभ्यांनिघ्नतान्गजान् १ गरुत्मताहन्यमानास्तुंडपक्षनखैर्गजाः ॥ तुरंगमाश्चदुर्द्धर्षाःपेतुरुव्यांगतासवः २ दृष्ट्वाविद्रावितंसैन्यंगरुडेनार्दितंस्वकम् ॥ तंभौमःप्राहरच्छक्त्यावज्रेणेवहरिर्गिरिम् ३ तयातिविद्धोगरुडोमालाविद्धइवद्विपः ॥ नकिंचिदपिराजेंद्रचचालनरकाहवे ४ ततःकार्मुकमादायनरकःशरसंचयान् ॥ मुमोचकृष्णेतान्सर्वानच्छिनत्केशवःशरैः ५ ततोर्धचंद्रंनरकंसुसंधायशरासने ॥ आकृष्टुकामंविज्ञायतच्चापंकेशवोच्छिनत् ६ ततःकालायसमयींगदांगुर्वींधरासुतः ॥ आददेतांक्षुरप्रेणचकर्तमधुसूदनः ७ ततोनिशातंपरशुंभौमःपरबलार्दनः ॥ प्राहिणोद्विष्णवेतंचचिच्छेदश्रीधरोऽसिना ८ ततःकृष्णायचिक्षेपतोमरान्पंचसप्ततिम् ॥ चकारसिंहनादंचनरकःपरवीरहा ९ तांस्तोमरान्कुरुश्रेष्ठशरैरेकेनकेशवः ॥ चिच्छेदयौगपद्येनतदद्भुतमिवाभवत् १० शूलंभौमोच्युतंहंतुमाददेवितथोद्यमः ॥ तद्विसर्गात्पूर्वमेवनरकस्यशिरोहरिः ॥ अपाहरद्गजस्थस्यचक्रेणक्षुरनेमिना ११ सकुंडलंचारुकिरिटभूषितंबभौपृथिव्यांपतितंसमुज्ज्वलत् ॥ हाहेतिसाध्वित्यृषयःसुरेश्वरामाल्यैर्मुकुंदंविकिरंतईडिरे १२ हत्वाहरिर्नरकंदैत्यवर्यंमरुद्गणैःसहितोलोकपालैः ॥ समाहृतःपौरमुख्यैःसभार्यःप्राग्ज्योतिषंप्राविशद्दृष्टुकामः १३ तत्रापश्यद्वदुश्रेष्ठोविचित्रंमणिपर्वतम् ॥ छत्रंचवारुणंहृद्यंसलिलस्राविभारत १४ शक्रायप्राहिणोद्भूयःकेशवोमणिपर्वतम् ॥ वरुणायतथाछत्रंप्राहिणोद्दैत्यकिंकरैः १५ तान्विसृज्यहरिर्देवान्स्वयमेवजगत्पतिः ॥ प्राविशद्भौमसदनंपुरंदरपुरोपमम् १६ ततोधराकृष्णमुपेत्यकुंडलेप्रतप्तजांबूनदरत्नभास्वरे ॥ पौत्रंचवीरंभगदत्तसंज्ञितंनिवेद्यमालामपिवैजयंतीम् १७ अस्तौषीदथविश्वेशंदेवींदेववरार्चितम् ॥ प्रांजलिःप्रणताराजन्भक्तिप्रवणयाधिया १८ पृथिव्युवाच ॥ नमस्तेदेवदेवेशशंखचक्रगदाधर ॥ भक्तेच्छोपात्तरूपायपरमात्मन्नमोस्तुते १९ नमःपंकजनाभायनमःपंकजमालिने ॥ नमःपंकजनेत्रायनमस्तेपंकजांघ्रये २०

ध्यायः ॥ ६३ ॥ गरुडस्यपक्षाभ्यांनिघ्नतान्निहतान्गजानच्छिनत् १ २ हरिरिंद्रः ३ ४ ५ आकृष्टुकामंआकर्णपूर्णमाकर्षणेच्छुं ६ नाम्नाक्षुरप्रेणशरेण ७ ८ ९ १० क्षुरनेमिनानिशितनेमिना ११ १२ १३ १४ १५ १६ १७ भक्त्याप्रवणया सततयाधियाबुद्धया १८ भक्तेच्छयाउपात्तंस्वीकृतंरूपं १९ २०

वासुदेवायसर्वत्रस्थित्याद्योतमानाय विष्णवेसच्चिदानंदरूपाय पुरुषायपूर्णबोधायादेर्ब्रह्मणोबीजायव्यंजकाय २१ अस्यप्रपंचस्यजनयित्रेउत्पादकाय अजायनेवेदादिशब्दराशिवेद्याय सर्वशब्द
वाच्यत्वेहेतुमाह अनंतेति अनंतावैवेदाइतिश्रुतेः चराचरात्मन् चराचरमात्मादेहःप्रतिमास्थानीयोयस्यसतथा परमात्मन्प्रत्यक्स्वरूप २२ सिसृक्षुःसृष्टुकामः उत्कटस्त्वंरजोगुणंबिभर्षिउपाद
त्सेनिरोधायसंहारायसंवृतंज्ञानसंवरणकारणंतमोगुणं स्थानाय जगत्स्थित्यैसत्त्वगुणं कालःप्राणिनामदृष्टपाचकः एवंविधःकइतित्राह प्रधानइति प्रधानःपुरुषोसिपुरुषोत्तमोसीत्यर्थः उत्तमः
पुरुषस्त्वन्यइतिस्मृतेः पुरुषत्वेपिपरिच्छिन्नत्वंनास्तीत्याह अपारइति यद्वा जगत्कारणंप्रधानपुरुषइतिकेचित्संगिरंते तदाशंकांनिवारयति प्रधानइति प्रधानशब्दवाच्यः पुरुषशब्दवाच्यश्चत्वमेव
तर्हिपरिशिष्यमाणःकइत्यत्राह अस्येति अस्यप्रपंचस्यपारःपरिशिष्यमाणःसंसारनदीपारःतीरांतरशब्दवाच्यस्त्वमित्यर्थः २३ सृष्ट्यादिकर्तात्वमित्युक्त्वैवाखंडकर्तृत्वप्रतीतावपिधात्रादिशब्दाभ्यां
विरिंचादेरपिकर्तृत्वशंकामिदानींनिवारयति अहामिति अहंनाम्नापृथिवी मीयंतइतिमात्राणिशब्दादिविषयाः मानंस्वविषयज्ञानंस्वसत्त्वेनत्रायंतइतिवा देवाइंद्रियाभिमानिनः कर्ताअहंकाराभिमानी

नमोभगवतेतुभ्यंवासुदेवायविष्णवे॥ पुरुषायादिबीजायपूर्णबोधायतेनमः२१अजायजनयित्रेस्यब्रह्मणेनंतशक्तये ॥ चराचरात्मन्लोकेशपरमात्मन्नमोस्तु
ते २२ त्वंवैसिसृक्षूरजउत्कटःप्रभोतमोनिरोधायबिभर्षिसंवृतम् ॥ स्थानायसत्त्वंजगतोजगत्प्रभोकालःप्रधानःपुरुषोऽस्यपारः २३ अहंपयोज्योतिरथोनि
लोनभोमात्राणिदेवामनइंद्रियाणि ॥ कर्तामहानित्यखिलंतुकारणंत्वय्यद्वितीयेभगवन्नयंभ्रमः२४ तस्यात्मजोयंतवपादपंकजंभीतःप्रपन्नार्तिहरंप्रसादितुम्
तत्पालयैनंकुरुहस्तपंकजंशिरस्यमुष्याखिलकल्मषापहम् २५ श्रीशुकउवाच ॥ इतिभूम्यार्चितोवाग्भिर्भगवान्भक्तिनम्रया ॥ प्रसन्नःप्रददौतस्मैभग
दत्तायचाभयम् २६ राज्येनियोज्यतंवंश्येतदमात्यांश्चतत्पदे ॥ भौमावरोधकांतानांश्रेणींसंप्राविशद्धरिः २७ तत्रराजन्यकन्यानांषट्सहस्राधिकायुतम्॥भौ
माहृतानांविक्रम्यराजभ्योदद्दशेहरिः २८ तंप्रविष्टंस्त्रियोवीक्ष्यताःसर्वानवयौवनाः ॥ स्वलंकृताविचित्रांग्योनरवर्यविमोहिताः २९ मनसावव्रिरेऽभीष्टं
पतिंदैवोपपादितम् ॥ भूयात्पतिरयंमह्यंधातातमनुमोदताम् ३० इतिसर्वेश्वरेकृष्णेतानार्योहृदयंदधुः ॥ ताःप्राहिणोद्द्वारवतींसुमृष्टरुचिरांबराः ३१ ख
रैरुष्ट्रैर्महाकोशान्रथांश्चद्रविणंमहत् ॥ ऐरावतकुलेभांश्चचतुर्दंताम्मदोत्कटान् ३२

महान्महत्तत्त्वाभिमानीविरिंचःतुशब्दएवार्थे इतिशब्दःसमाप्तिवचनःमहदाद्यभिमान्यंतमखिलकारणंअद्वितीयेचत्वय्येवत्वमेवधारयसीत्यर्थः आतिथ्यवत्कदाचिन्नेत्याह भगवन्निति हेऐश्वर्यादिगुणार्णव
अयंजगद्भ्रमःचक्रभ्रमणवद्विश्वस्यपरिवर्तनंत्वन्नियतमित्यर्थः भ्रमशब्दस्यारोपार्थत्वांगीकारेअर्थाक्रियानुपपत्तिरिति २४ सांप्रतंतवकिंविधेयमित्यत्राह तस्येति अयंपुरोवर्तीतस्यनरकस्यात्मजःऔरसः
पुत्रइतिजानीहीतिशेषः तर्हिकिमितिमत्प्रणामंनकरोतीत्यत्राह तवेति तवप्रपन्नार्तिहरंपादपंकजंप्राप्यत्वांप्रसादयितुंभीतस्त्रस्तइत्यन्वयः ततःकिमत्राह तदिति यतोभीतस्तत्तस्मात्तत्पालनंचैतदेवेत्याह
कुर्विति अनेनकिंफलंस्यादित्याशंक्यपापनिमित्तंसर्वमनर्थजातंतन्नाशेसर्वसुखंस्यादितिभावेनाह अखिलेति यद्वा प्रपन्नार्तिहरंभगवंतंप्रसादयितुंतवपादपंकजंभीतःसंचलितःप्राप्तइत्यर्थः भीतिभयसंचल
नयोरितिधातुः अतोरक्षेत्याह तदिति २५ २६ वंश्येवंशप्राप्ते तत्पदेअमात्यपदे श्रेणींपंक्तिशालांवा २७ २८ २९ ३० ३१ ऐरावतकुलेजातानिभान् ३२

पांडुरान्श्वेतदेहान् ३३॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्द्धेविजयध्वजकृतटीकायांचतुःषष्टितमोऽध्यायः ॥ ६४ ॥ १ २ ३ गतज्वरैःनष्टसंतापैः ४ ५ उपतस्थेसमीपेतस्थौ ६ भामतेजः अस्याःअस्तीतिभामिनी चिरकालदृष्टम् ७ श्वश्वाःभर्तुर्मातुः ८ ९ सत्यभामामाशिषायोजयति नतेजरेति वैरूप्यंसौंदर्याभावः विप्रियंकलहः १० ११ हृद्यगंधंहृदयप्रियगंधम् १२ काम्यतेवनसं पदितिशेषः कामइतिवा १३ १४ सारंगनादितान् भृंगनादितान् १५ १६ विविधंचित्रंमुख्यंमिश्रफलंयस्मिन्सविचित्रः चित्रमालेख्यमिश्रयोरिति मिश्रमाविलमुख्ययोरितिच १७ एतस्यवृक्षस्यफ

भगदत्तायदत्वैकंसुप्रतीकंततोपरान् ॥ पांडुरांश्चचतुःषष्टिंप्रेषयामासकेशवः ३३ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेचतुःषष्टितमोऽध्यायः ॥ ॥६४॥ श्रीशुकउवाच ॥ हत्वानरकमत्युग्रंदानवंदानवांतकः ॥ आरुह्यगरुडंप्रायात्प्राग्ज्योतिषपुरान्नृप १ सगच्छन्गगनेविष्णुर्वेदितुंदेवमातरम् ॥ जगामत्रिदशावासंसहितःसत्यभामया २ स्वर्गद्वारंगतोविष्णुर्दध्मौशंखंमहास्वनम् ॥ उपाजग्मुस्तदाकर्ण्यसार्घ्यपाद्यादिवौकसः ३ पूजितस्तैःसुरैःकृष्णो भक्तिनम्रैर्गतज्वरैः ॥ सुरेंद्रभवनंदिव्यंप्रविवेशमनोरमम् ४ तत्रशक्रःसमंशच्यापूजयामासकेशवम् ॥ रत्नैरामरणैर्दिव्यैर्गंधमाल्यैश्चशोभनैः ५ ततःप्रायात्पुरीमातुरदित्याःसहभार्यया ॥ दृष्ट्वोपतस्थेतंदेवीपुत्रमायांतमच्युतम् ६ ववंदेतांहरिस्तंसापूजयामासभामिनी ॥ आशीर्भिःपरमप्रीताचिरंदृष्टंयदूत्तमम् ७ सत्यभामापिकौरव्यश्वश्वाःकृष्णेनचोदिता ॥ पादयोःकुंडलेतस्यानिधायप्रणनामवै ८ सुषामाश्लिष्यसंतुष्टासापुनर्लब्धकुंडला ॥ आनंदबाष्पप्रचुराप्राहेदंकश्यपप्रिया ९ नतेजरानवैरूप्यंकांतेनसहविप्रियम् ॥ भूयात्कल्याणिसुव्यक्तंमत्प्रसादात्कदाचन १० ततोनुज्ञाप्यतांदेवींत्रिदशानपिकेशवः ॥ आरुह्यप्रययौतार्क्ष्यसहितःसत्यभामया ११ महात्मनागगनेदेवदेव्यौगरुत्मतानीयमानौविचित्रम् ॥ अपश्यतांनंदनंचारुगुप्तंशचीभर्तुर्दयितंहृद्यगंधम् १२ वनंदृष्ट्वादिव्यगंधंसुपुष्पंकृष्णंसत्याप्राहपाणौगृहीत्वा ॥ प्रविश्यास्मिन्साधुचित्रंविहर्तुंमुहूर्तंमेकाम्यतेकेशवेति १३ अथावरुह्यगरुडात्तस्यावचनगौरवात् ॥ प्रविवेशवनंकृष्णःपालितंशक्रकिंकरैः १४ तत्रापश्यत्तरून्दिव्यान्मत्तसारंगनादितान् ॥ फलभारनतान्भूरिप्रसूनरजसावृतान् १५ चलत्किसलयोपेतान्विहंगध्वनिशोभितान् ॥ विचरंतीतथातत्रपारिजातंमहाद्रुमम् १६ दृष्ट्वापप्रच्छगोविंदंविस्मयाकुललोचना ॥ कोनामायंतरुर्देवविचित्रोभुवनत्रये १७ सत्यमेतस्यवृक्षस्यकृतार्थाःफलभागिनः ॥ प्रवालमूलोविपुलोजातरूपमहातनुः १८ इंद्रनीलच्छदच्छन्नोलसद्वैदूर्यवेदिकः ॥ माणिक्यपुष्पोविविधमुक्ताफलफलान्वितः १९

लभागिनःकृतार्थाः इतिसत्यमित्यन्वयः वैचित्र्यंकथयति प्रवालेति प्रवालोरत्नविशेषएवमूलंशिफायस्यसतथा विपुलोविस्तृतः जातरूपंसुवर्णमेवमहातनुर्यस्यसतथा १८ इंद्रनीलमेवच्छदःपत्रंइंद्रनीलच्छदःतेनछन्नःसंवृतः लसद्वैदूर्यरत्नमेववेदिःपरिष्कृताभूमिर्यस्यसलसद्वैदूर्यवेदिकः माणिक्यरत्नान्येवपुष्पाणियस्यसमाणिक्यपुष्पः विविधानितारतम्योपेतानिमुक्ताफलान्येवफलानिविविधमुक्ताफलानितैरन्वितः १९

गोमेदरत्नान्येवपक्वानिगोमेदपक्वानितेषांप्रकारायस्यसतथा वज्ररत्नान्येवकिंजल्कानिवज्रकिंजल्कानितैरंजितोऽरुणीकृतः स्थूलाःशाखाःस्फुरंतिमरकतरत्नान्येवस्थूलशाखाःस्फुरन्मरकतस्थूलशाखाः तासांशतेनविराजितः २० २१ मंस्यंतिनिरूपयंति २२ २३ तस्मात्तमुद्राज्ञातानांफलानांभोक्तृभिः २४ २५ जयकांक्षिभिःजयेच्छुभिःजितयुद्धैर्वा २६ व्यलीकैःकपटवचनैः २७ तरूत्पयनेनिमित्तमाह

गोमेदपक्वप्रकरोवज्रकिंजल्करंजितः ॥ स्फुरन्मरकतस्थूलशाखाशतविराजितः २० तरुरेषजगन्नाथमनोमेहरतेभृशम् ॥ नेतव्योयंपुरींवृक्षोयद्यहंतेप्रियाप्रओ २१ छायायामुपविष्टांमामन्यपत्न्यस्तवानघ ॥ दृष्ट्वामंस्यंतिदयितांसर्वाभ्योमांतवाच्युत २२ इत्युक्तोदेवकीपुत्रःसत्ययाप्रियकांतया ॥ प्राहनायंतरुर्भद्रेनेतव्योनंदनाद्वनात् २३ पुराक्षीरांबुधेर्जातोमथ्यमानात्सुरासुरैः ॥ शक्रायदत्तःसकलैःसदातत्फलभोक्तृभिः २४ तन्नाहार्यमनादृत्यमयामित्रंशतक्रतुम् ॥ तरुरत्नंसरोजाक्षिधर्ममेवानुतिष्ठता २५ नीयमानेचवृक्षेस्मिन्पारिजातेशुचिस्मिते ॥ संग्रामोजायतेघोरस्त्रिदशैर्जयकांक्षिभिः २६ इत्युक्तादेवदेवेनसत्यभामापुनर्हरिम् ॥ प्राहभीषयसेकिंमांव्यलीकैःकंसमर्दन २७ नाभ्यनंदद्धुराचाराशचीमांगृहमागताम् ॥ हेतुर्हिवृक्षस्तस्यायंभर्तृपौरुषगर्विता २८ नेतव्यःसर्वथावृक्षःपारिजातोयमच्युत ॥ प्रियाहंतवचेन्नाथनोचेद्विरमसांप्रतम् २९ इत्युक्तःसत्ययाकृष्णस्तानाद्दत्यरक्षकान् ॥ उत्पाट्यारोपयामासपारिजातंगरुत्मति ३० ततोनिवारयामासुर्गोविंदंवनपालकाः ॥ केचिद्द्रुततरंजग्मुर्देवेंद्रायनिवेदितुम् ३१ कृष्णकृष्णनहर्तव्यस्तरुरेषोऽमरार्चितः ॥ हरसेयदितस्यत्वंफलंसद्योनुभोक्ष्यसि ३२ प्राप्तोपिनपुरींकृष्णसहानेनमहीरुहा ॥ सद्यःपश्यसिदेवेंद्रं पृष्ठतोऽभ्युद्यतायुधम् ३३ सुरेंद्रांतिकमासाद्यद्रुतंतेवनरक्षकाः ॥ उपविष्टंसमंशच्याशक्रंदृष्ट्वाऽब्रुवन्नृप ३४ ॥ वनरक्षकाऊचुः ॥ अवज्ञायाखिलान्देवा निंद्राणीचत्वयासह ॥ जहारकृष्णदयितापारिजातंमहाद्रुमम् ३५ उक्ताऽस्माभिर्भृशंदेववारयद्भिर्हरिप्रिया ॥ उपालभ्याहरद्वृक्षंभर्तृपौरुषगर्विता ३६ श्रीशुकउवाच ॥ इत्याकर्ण्यांप्रियंशक्रोदंडाहतइवोरगः ॥ शचींविलोक्यपार्श्वस्थांनामृष्यत्तत्पराभवम् ३७ सन्नाहोद्योगमाघोष्यसन्निपात्यचसैनिकान् ॥ लोकपालान्समाहूयनिश्चक्रामसुरेश्वरः ३८ ऐरावंतंचतुर्दंतमारुह्यवरवारणम् ॥ गृहीतवज्रंगच्छंतमनुजग्मुर्दिवौकसः ३९ वैश्वानरस्तुतुरगमारुह्यदृढदंशितः॥ घोरांशतघ्नीमादायस्रुवपुच्छांययौरणम् ४० यमस्त्वारुह्यमहिषंदंडमादायवीर्यवान् ॥ मृत्युकालादिभिर्युक्तोयुद्धार्थीशक्रमन्वगात् ४१ निर्ऋतिश्चमहातेजाघोरमारुह्यपौरुषम् ॥ असिहस्तोमहाबाहुर्युद्धायप्रययौनृप ४२ मकरंभीषणाकारमारुह्यवरुणस्त्वरन् ॥ पाशोद्यतकरःप्रायायुद्धायानुशचीपतिम् ४३ वायुःकृष्णमृगारूढोदंशितस्तोमरायुधः ॥ सुरेश्वरमनुप्रायाद्योद्धुंचक्रभृतासह ४४

नेति २८ विरम प्रियभाषणमितिशेषः २९ ३० ३१ ३२ ३३ ३४ ३५ उपालभ्यभर्त्सयित्वा ३६ ३७ सन्नाहोयुद्धोद्योगार्थंविद्यमानंगोमुखं सन्निपात्यसंमेलयित्वा सैनिकान्सेनानायकान् ३८ ३९ स्रुवंपुच्छेयस्याःसाताम् ४० मृत्युकालादिभिःप्रभृतिभिः ४१ ४२ ४३ चक्रभृताकृष्णेन ४४

ऊढांचतुर्भिःपुरुषैःशिबिकांनरवाहनः ॥ योद्धुकामस्त्वरन्प्रायाद्विष्णुनामुद्ररायुधः ४५ ईशानोवृषभंतुंगमारुह्यशितशूलभृत् ॥ वासवेनसमंप्रायाद्भूत कोटिसमन्वितः ४६ भेरीशंखमृदंगैश्चपणवानकगोमुखैः ॥ सुवर्णसुषिरैर्दिव्यैःकांस्यतालैश्चभूरिभिः ४७ रथनेमिनिनादैश्चहयानांखरनिःस्व नैः ॥ क्ष्वेलितास्फोटितैर्वीरैःसंग्रामाह्वानगर्जनैः ४८ तिष्ठतिष्ठेतिमायाहिक्कयासीतिपुनःपुनः ॥ प्रवदद्भिःसुरगणैःशतशोथसहस्रशः ४९ कंपयद्भि श्चशस्त्रौघैःप्रेषयद्भिश्चवाहनम् ॥ पुरोहमितिगच्छद्भिःशतशोथसहस्रशः ५० घोरैर्ज्यावातनिर्घोषैःसिंहनादैश्चभूरिभिः ॥ अभिदुद्रुवुरुद्वृत्ताःसिंहंगोमायवो यथा ५१ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेपंचषष्टितमोऽध्यायः ॥ ६५ ॥ श्रीशुकउवाच ॥ सुरानभिद्रुतान्दृष्ट्वासत्यामाहजगत्पतिः ॥ इ मेप्राहुणिकाःप्राप्तास्तववृंदारकाइति १ तथाब्रुवाणेदेवेशेप्रेषितादेवसैनिकाः ॥ नदंतोमुमुचुःकृष्णेशरवृष्टिंकुरूद्वह २ ततःशार्ङ्गंसमादायसत्याव्यसनविह्व वा ॥ मुक्तांश्चिच्छेदबाणौघैस्ताञ्छरान्देवसैनिकैः ३ ततोवैश्रवणःश्रीमान्बहुभिर्गुह्यकैर्वृतः ॥ विस्फारयंस्तालमात्रंकार्मुकंकनकाटवि ४ स्वर्णपुंखान्शरा न्मुञ्चन्सिंहवद्व्यनदन्मुहुः ॥ अभिदुद्रावसमरेतिष्ठतिष्ठेतिचाब्रवीत् ५ तैःपंचभिःशरैःसत्यानिशितैर्मर्ममेदिभिः ॥ अर्पयामासवेगेनविशालेजठरेनृप ६ सोति विद्धोरणेबाणैस्त्रिभिर्भल्लैर्हरिप्रियाम् ॥ अयोधयद्धनपतिःसिंहनादंव्यनीनदत् ७तानप्राप्तानर्धचंद्रैस्त्रिभिश्चिच्छेदसाशरैः ॥ भूयोष्टभिःशरैर्देवीवत्सदंतैर्मनोज वैः ८ विव्याधगुह्यकपतेर्ललाटेकुरुपुंगव ॥ पीडितस्तैर्भृशंबाणैःपौलस्त्यःक्रोधविह्वलः ९ संदधेनिशितान्बाणानेकविंशतिमंयुगे ॥ तानंतरेसत्यभामासाय कैःसप्तभिर्नृप १० चिच्छेदनिमिषार्धेनत्रिधैकैकंहरिप्रिया ॥ सत्यभामाततःक्रुद्धापौलस्त्यस्यमहद्धनुः ११ अर्धचंद्रेणचिच्छेदमुष्टिदेशेद्विधानृप ॥ ततोन्यच्चापमादायसज्यंकृत्वाधनेश्वरः १२ ववर्षशरजालानिक्रोधात्सर्पइवश्वसन् ॥ सर्वांस्तान्सायन्कान्संख्येशरैःसन्नतपर्वभिः १३ चिच्छेदलीलयादेवी तदद्भुतमिवाभवत् ॥ ततःक्रुद्धोवैश्रवणःसत्यभामांविलोक्यच १४ प्राहपश्यहनिष्यामित्वामद्यममपौरुषम् ॥ इत्युक्त्वातालमात्रेतुचापेगुह्यकसत्तमः ॥ १५ पश्यतांसर्वदेवानांमार्ष्टुकामःपराभवम् ॥ संदधेसूदितुंदेवीमर्धचंद्रंशरोत्तमम् १६ तदवेत्यमनस्तस्यक्षुरप्रेणहरिप्रिया ॥ चिच्छेदकार्मुकंतस्यमुष्टि देशेकुरूद्वह १७ ततोमुद्गरमादायघोरंदानवभीषणम् ॥ भ्रामयित्वाशतगुणंदेव्यैचिक्षेपवित्तपः १८

कायांपंचषष्टितमोऽध्यायः ॥ ६५ ॥ ॥ ७ ॥ ॥ प्राहुणिकाःसंभावनयाभोजयितव्याःवृंदारकादेवाः १ २ ३ कनकाविद्वाटवी,कोटिर्यस्यतत्तथा ४ ५ विशालेजठरेविस्तृतोन्नतोदरे ओदन मेवेतिशेषः ६ ७ वत्सदंतैःशरविशेषैः ८ ९ अंतरेमध्ये १० ११ १२ १३ १४ १५ १६ १७ १८

तंमुद्गरंमहाघोरमायांतंकुरुपुंगव ॥ वामेनपाणिनाकृष्णोजग्राहोच्चैर्जहासच १९ ततोनिवृत्तसंग्रामोविदुद्रावधनेश्वरः ॥ शशंसदेवींकृष्णश्चसमाश्लिष्या भिपूजयन् २० पलायितेधनपतौसंग्रामेकंसवैरिणा ॥ वरुणोभ्यद्रवत्कृष्णंपाशमुद्यम्यसंयुगे २१ तमायांतमभिप्रेक्ष्यताक्ष्योमकरवाहनम् ॥ अभ्यद्र वन्महासत्त्वःशार्दूलइवगोवृषम् २२ तयोःसमभवद्युद्धंघोरंताक्ष्यजलेशयोः ॥ यथादेवासुरेयुद्धेबलिवासवयोरिव २३ तत्रकाश्यपपुत्रस्यकंठेपाशंज लेश्वरः ॥ क्रुद्धश्चकर्षविन्यस्यसिंहःसिंहमिवौजसा २४ तंपक्षकोट्यागरुडःसमुद्धृत्यजलेश्वरम् ॥ पद्भ्यांगृहीत्वामकरंचिक्षेपवरुणालये २५ कृच्छ्राद्गृही तपाशस्तुवरुणोगतवाहनः ॥ पदातिरेवसंग्रामाद्विदुद्रावयथागतम् २६ तथागतेवार्धिपतौसंग्रामेवायुपावकौ ॥ सममेवाभ्यवर्तेतांगोविंदंकुरुसत्तम २७ पावकःपंचभिर्बाणैर्मारुतश्चतथात्रिभिः ॥ आयोधयद्वृषीकेशंतदद्भुतमिवाभवत् २८ ततःप्रहस्यगोविंदोबाणेनैकेनपावकम् ॥ विव्याधसप्तभिश्चैवस मीरणमरिंदमः २९ एकेनाग्निःक्षुरप्रेणगाढंवक्षसिताडितः ॥ तमसाधारणंमत्वाविदुद्रावरणाद्द्रुतम् ३० दृष्ट्वासमीरणो युद्धादपयांतंहुताशनम् ॥ सा यकाचितसर्वांगमात्मानंचातिविह्वलः ३१ विदित्वापुंडरीकाक्षंसंग्रामेप्रत्युपस्थितम् ॥ न्यवर्ततकुरुश्रेष्ठप्राणत्राणपरायणः ३२ ततोमाहिषमारुह्यदंड मुद्यम्यभास्वरम् ॥ कृष्णमभ्यद्रवद्युद्धेयमःक्रोधारुणेक्षणः ३३ तमुद्यतमहादंडंदृष्ट्वाकमललोचनः ॥ गदांविसृज्यतद्धस्तात्पातयामासभूतले ३४ गद यातांडितेदंडेत्रस्तहस्तःपरेतराट् ॥ विदुद्रावपरावृत्यमहिषेणकुरूद्वह ३५ वैवस्वतंगतंदृष्ट्वानिर्ऋतिर्भयविह्वलः ॥ नाभ्यवर्ततगोविंदंयोद्धुंविदितत द्बलः ३६ शंकरस्तुमहातेजास्त्रिशूलीवृषवाहनः ॥ अनेकभूतसंघातैःकृष्णमभ्यद्रवद्रणे ३७ तावुभौलोकविख्यातौबलिनौवीर्यशालिनौ ॥ चक्रातेकदनं घोरंपरस्परजयैषिणौ ३८ ईशानोदशभिर्बाणैःकृष्णंताक्ष्यंचपंचभिः ॥ विव्याधसमरेराजन्तिष्ठतिष्ठेतिचावदत्३९ततःशार्ङ्गंसमादायकृष्णःपरपुरंजयः ॥ त्रिंशद्भिर्युगपद्बाणैर्विव्याधवृषवाहनम् ४० गरुडःपन्नगरिपुःपद्भ्यांद्राभ्यांचसंयुगे ॥ पक्षाभ्यांचंचुकोट्याचमर्दयामासतंवृषम् ४१ भूयोपिकृष्णोना राचैःपंचाशत्प्रमितैर्नृप ॥ योधयामाससमरेशंकरंलोकशंकरम् ४२ ततस्त्रिशूलमाविध्यनिशितंघोरदर्शनम् ॥ प्राहिणोद्वासुदेवायकुपितोधूर्जटिर्नृप ४३ दृष्ट्वात्रिशूलमायांतंकेशवस्तंनिवारितुम् ॥ गदांकौमोदकींगुर्वीप्राहिणोद्दैत्यमर्दनीम् ४४ तेवैकौमोदकीशूलेकृत्वानभसिसंगरम् ॥ ज्वलमानेम हाघोरेपेततुःसममंबुधौ ४५ निपात्याब्धौत्रिशूलंतद्गदाकौमोदकीपुनः ॥ आससादकरंविष्णोस्त्रिशूलमपिशूलिनः ४६

तसर्वांगं शरसंचितसर्वावयवम् ३१ ३२ ३३ ३४ परेतराट्यमः ३५ ३६ ३७ कदनंयुद्धम् ३८ ३९ ४० चंचुकोट्या तुंडकोट्या वृषनंदिकेश्वरम् ४१ ४२ धूर्जटिःशंकरः ४३ ४४ ४५ ४६

पन्नगभूषणःसर्पालंकारःशिवःपार्ष्णिम्यामास्फालनेनचोदयन्प्रेरयन् ४७ शूलपाणिनासाहितंनांदिनं ४८ त्रिशूलित्वंगणस्यापिसंभवतीति वृषवाहनइति ४९ ॥ इतिश्रीभागवतेम०दशमस्कंधेउत्तरार्धेवि जयध्वजकृतटीकायांषट्षष्टितमोध्यायः ॥ ६६ ॥ १ २ ३ ४ ततवयुक्तंन्याय्यंस्त्रीजित स्येतिशेषः न्याय्येसंयुक्तमितियादवः ५ सःहइतिच्छेदःसशक्रःयुद्धप्रारंभे ६ ७ गात्रंगात्राण्यवयवान्सावृती

ततउद्यम्यनिशितंखड्गंपन्नगभूषणः ॥ कृष्णमभ्यद्रवत्संख्येपार्ष्णिभ्यांचोदयन्वृषम् ४७ तूर्णंगृहीत्वाबाहुभ्यांविषाणेतस्यनंदिनः ॥ सशूलपार्णिंचिक्षेप वैनतेयोधनुःशतम् ४८ ततोविसृज्यसंग्रामंत्रिशूलीवृषवाहनः ॥ प्रमथैःसहितःप्रायात्कुरुश्रेष्ठ यथागतम् ४९ ॥ इतिश्रीभागवतेम०दशमस्कंधेउत्त०षट्ष ष्टितमोऽध्यायः ॥६६॥ श्रीशुकउवाच ॥ ततःस्वयंदेवपतिस्तुंगमारुह्यवारणम् ॥ किरीटीबद्धतूणीरःप्रगृहीतशरासनः १ अभ्यद्रवद्रणेकृष्णंगजःकेस रिणंयथा ॥ पारिजातकृतेराजन्पौलोम्यावचनंस्मरन् २ तमायांतमभिप्रेक्ष्यहरिःपरपुरंजयः ॥ शंखंदध्मौमहानादंदिशःसमभिपूरयन् ३ तमभिद्रुत्यदे वेंद्रोमहद्विस्फारयन्धनुः ॥ क्षुरप्रेणसुतीक्ष्णेनकृष्णंविव्याधसंगरे ४ हरिर्विद्धःक्षुरप्रेणदेवराजेनवक्षसि ॥ प्रहस्यसाधुशक्रोसियुक्तइतिचाब्रवीत् ५ भूयोपिबाणान्दशदेवराजःसंधायचापेभुजगेंद्रकल्पे ॥ आकर्णपूर्णंविनिकृष्यकृष्णेमुमोचचक्रेसहसिंहनादम् ६ तानंतरेकंसरिपुर्महात्माछित्त्वात्रिभैकेनश रणेबाणान् ॥ विव्याधबाणैर्दशभिःसुधौतैःपुरंदरंभारतलीलयैव ७ तेशरादेवराजस्यगात्रंनिर्भिद्यसावृति ॥ शोणिताक्ताःप्रदृश्यंतेभूयोवेगेननिर्गताः ८ पु नश्चशक्रःकोदंडेशरान्संधायषोडश ॥ मुमोचाकृष्यगोविंदस्तांश्चकर्तशरैस्त्रिभिः ९ भूयोपिबाणैस्त्रिंशद्भिःसुरराजानमाहवे ॥ आयोधयद्धरिस्तेचममज्जुः शक्रवक्षसि १० ततश्चुकोपदेवेंद्रोदंडाहतइवोरगः ॥ प्रेषयामासतोत्रेणतार्क्ष्यंप्रतिमहागजम् ११ सगजःप्राप्यगरुडंपाकशासनचोदितः ॥ चतुर्भिर्घटया मासदंतैर्बाहुयुगांतरे १२ ततस्तुंडेनगरुडःपक्षाभ्यांचतथानखैः ॥ अर्दयामासकौरव्यगजमैरावताह्वयम् १३ शक्रस्तुवज्रमुद्यम्यघोरंदानवभीषणम् ॥ पश्यतांसर्वभूतानांप्रजहारवृषाकपिम् १४ तमागतंमधुरिपुर्वज्रंदुश्चयवनायुधम् ॥ वामेनपाणिनाविष्णुर्जग्राहप्रजहासच १५ निरायुधःसुरपतिर्गरुडा र्दितवाहनः ॥ व्यावर्ततरणाद्राजन्व्रीडावनतकंधरः १६ तंदृष्ट्वाभ्रष्टसंकल्पंपलायनपरायणम् ॥ सत्यभामासुरपतिंप्रहसंतीदमब्रवीत् १७ सत्यभामो वाच ॥ एहिशक्रनिवर्तस्वमायाहिकुलिशायुध ॥ पलायनमयुक्तंहिपौलोम्यावल्लभस्यते १८ ऐश्वर्यमत्तापौलोमीभर्तृपौरुषगर्विता ॥ अवमंस्यतिसद्य स्त्वांभार्यारणपराजितम् १९ इत्थंदेव्यागिरंशक्रःसोपालंभमुदीरिताम् ॥ निशम्याभिमुखोभूत्वाप्राहदेवींशुचिस्मिताम् २०

तिक्रियाविशेषणं सकवचंनिर्भिद्य ८ ९ आहवेयुद्धे १० तोत्रेणगजताडनचर्मणा ११ बाहुयुगांतरेवक्षसि १२ १३ १४ दुश्चयवनायुधंइंद्रायुधं अजेयप्रहारार्थमायुधंसमाप्तमितिदर्श यितुं पुनर्वचनमितिज्ञातव्यं १५ १६ १७ निवर्तस्व पुनरागच्छ मायाहि मागच्छ प्रहसंतीत्यस्यतात्पर्यंदर्शयति पौलोम्येति १८ अवमंस्यतिअवज्ञास्यति १९ २०

गतासुरावेशइंद्रःप्रतिवाक्ति येनेति २१ तनुबलःअल्पबलःमातर्यूधस्येतिपाठःऊधस्यमूधसिजातंक्षीरंमातरिविरोधंहेपिशिताशनि याज्ञियान्नेचमांसेचापिशितंदेवभोजनमिति २२ २३ २४ भूरिवा

इंद्रउवाच ॥ येनामरासुरमहोरगयक्षसिद्धागंधर्वकिन्नरपिशाचनिशाचराद्याः ॥ सृष्टास्त्रिलोकगुरुणारणमूर्ध्नितेनकोवानयातिपरिभूतिमलंविरुध्य २१ वत्सोयथातनुबलःसकृदेत्यमातुरूधस्यपानसमयेकुरुतोविरोधम् ॥ तद्वद्वयंचनिजशैशवमप्रमेयेनाथेविरुध्यापिशिताशनिदर्शयाम २२ ॥ इतिसत्राजितः पुत्रीमुक्त्वाभारतसत्तम॥कृतांजलिःप्रणम्याहवासुदेवंपुरंदरः२३ इंद्रउवाच॥ नमस्तेदेवदेवेशपुंडरीकाक्षमाधव॥क्षमस्वमत्कृतंविश्वमपराधंजगत्पते २४ नमांत्वदेकशरणंशरणागतवत्सल॥भूरिवालिशमक्षांतंपरित्यक्तुंत्वमर्हसि २५ ऐरावतश्चकुलिशंपारिजातश्चपादपः ॥ देवराज्यंचभगवन्त्रियंचाप्यमरावती २६ त्वदधीनामिदंविश्वमहमाज्ञाकरस्तव ॥ अत्रयद्रोचतेनेतुंनीयतांतद्यथेच्छया २७ किंतुवक्ष्यामिगोविंदमूलंत्वयिविरुध्यतः ॥ रमसेमानुषेलोकेभगवं स्त्वमनन्यधीः २८ तत्रनीतेपारिजातेभवताकल्पपादपे ॥ तेनसाजायतेस्वर्गान्निर्विशेषावसुंधरा २९ तेनाहंयदुशार्दूलविरोधंकृतवांस्त्वयि ॥ तत्क्षंतव्यंत्वयादेवकार्याकार्यंविजानता ३० श्रीशुकउवाच ॥ इत्युक्तोदेवराजेनदेवदेवोजनार्दनः ॥ पुरंदरंकुरुश्रेष्ठप्राहप्रहसिताननः ३१ श्रीभगवा नुवाच ॥ अपराधस्त्वयाशक्रनकश्चिदपिचेष्टितः ॥ यत्कृतंतन्मयैवागस्त्वभेदादावयोःपरम् ३२ यत्त्वयाद्यसहस्राक्षचेष्टितंसाध्वसाधुवा ॥ मयैवतत्कृतं सर्वेनात्रकार्याविचारणा ३३ पारिजातस्तरुश्रेष्ठोमय्यारूढेतरुर्दिवम् ॥ मन्निदेशात्सहस्राक्षस्वयमेष्यतिनंदनम् ३४ इत्युक्तोवासुदेवेनदेवराजःकुरूद्वह ॥ गोविंदंसत्यभामांचप्रसाद्यगरुडंतथा ३५ पुत्रोमेरक्षितव्यस्तेश्यालोबलिमत्सुरित्यपि ॥ भूयोभूयःप्रार्थयित्वाकृतानुज्ञःपुरंदरः ३६ सार्धंसकलदिक्पालै र्लब्धवज्रःपुरंययौ ॥ पुरंदरंसदिक्पालंविसृज्ययदुनंदनः ३७ गरुडंप्राहकौरव्ययास्यामोद्वारकामिति ॥ गोविंदंसत्यभामांचपारिजातंचपादपम् ३८ गरुडःपन्नगरिपुर्लीलयैववहन्ययौ ॥ संप्रविश्यपुरींरम्यांद्वारतोरणभूषिताम् ३९ पताकामालिनींदिव्यांसिक्तसंमृष्टभूतलाम् ॥ ऊढोपायनतांबूलस्रग्गं धकलशाक्षतैः ४० उपस्थितैर्यदुश्रेष्ठैःपूजितश्चाभिवंदितः ॥ तूर्यमंगलनिर्घोषैर्वेदस्वाध्यायनिःस्वनैः ४१ प्रविवेशसभांदिव्यांसुधर्मांवृद्धसेविताम् ॥ आहुकंवसुदेवंचबलमद्रंतथाग्रजम् ४२ अभिवाद्ययथान्यायंपूजितस्तैर्यथोचितम् ॥ उपविष्टःसभामध्येकांचनेपरमासने ४३ रराजराजशार्दूलबृहस्पतिपु रोगमैः ॥ लोकपालैरुपासीनैर्दिविवज्रधरोयथा ४४ प्रांगणेसत्यभामायाःपारिजातंमहाद्रुमम् ॥ स्थापयामासगोविंदःसर्वतोमणिकुट्टिमे ४५

लिशंअधिकमूर्खम् २५ २६ २७ मूलंनिमित्तं अनन्यधीःतत्रैवनिरतबुद्धिः २८ २९ ३० ३१ त्वयायत्कृतंतदागःमयैवकृतंविद्धि आवयोःपरमत्यभेदात्त्वयिस्थित्वात्वयैवापराधंकारयित्वापरिहरीमा त्यर्थः एतदेवविवृणोतियत्त्वयेति ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ मणिकुट्टिमेमणिबद्धस्थाने ४५

योषित्सार्थेननिरंतरपत्न्यासहेतिशेषः४६ ४७ ४८ ४९एकानंगादुर्गा सुभद्राचित्रातारेतिच अनुत्पन्नरजास्यामातदृष्टावरवर्णिनी अप्रसूताभवेद्वीरीतिच ५० आनीतःप्रमदानांसार्थोयेनसतथातं ५१ ५२ ५३ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ सोयंमनुष्यलोकः पुत्रेण जय्यइतिश्रुतिविहितसदाचारोभुव्यवतीर्णैर्देवादिभिरनुष्ठेयइतिदर्शयितुं श्रीकृष्णस्यतदनुष्ठानप्रकारंशंबरासुरवधलक्षणंविक्रमंचकथयत्यस्मिन्नध्याये लोकस्यजनस्यशंसुखंकरोतीतिलोकशंकरःतं देवदेवोनारायणःईशःस्वामीयस्यसतथातं आराध्यलोकदृष्ट्याइतिशेषः १ २ ३ प्राग्रुद्रमन्युनादग्धोयःकामःभूयस्तमेवरुद्रमेवदेहोत्पत्तयेप्रत्यपद्यत ४ सएवकामःकृष्णवीर्यसमुद्भवोवैदर्भ्यांजातःउपात्तदेहः कर्हिशःवासुदेवस्यांशः प्रद्युम्नोयस्मिन्नाविष्टःसतथाअतएवतदाभि

आयांतंदेवकीपुत्रंयोषित्सार्थेनभूरिणा ॥ श्रुत्वाद्रष्टुमुपाजग्मुःसकलायादवस्त्रियः ४६ वसुदेवस्तुकौरव्यरोहिण्याद्याःस्त्रियोखिलाः ॥ आजग्मुःकेशवंद्रष्टुंजितशत्रुमनामयम् ४७ सदृष्ट्वामातरोविष्णुर्देवक्यासहसंगताः ॥ चक्रेप्रणाममाशीर्भिस्ताश्चतंप्रत्यपूजयन् ४८ रुक्मिण्याद्यास्तथासप्तमहिष्यः कृष्णवल्लभाः ॥ प्रणेमुर्देवमभ्येत्यदिव्यरूपाःस्वलंकृताः ४९ रेवतीरामदयितात्रिवक्राचयशस्विनी ॥ एकानंगाचतन्वंगीचित्राचवरवर्णिनी ५० अन्याश्च कुरुशार्दूलभोजवृष्ण्यंधकस्त्रियः ॥ आनीतप्रमदासार्थंजितशत्रुमनामयम् ५१ गोविंदंसत्यभामांचाप्यानतिममरद्रुमम् ॥ प्रीत्युत्फुल्लमुखाःसर्वेकौतुकाद्रष्टुमीयुः ५२ वंसमेतायथाजोषंलाजप्रसवतंदुलैः ॥ स्पृष्ट्वामूर्ध्निमुकुंदस्यजग्मुःस्वंस्वंनिवेशनम् ५३ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ श्रीशुकउवाच ॥ आराध्यदेवदेवेशंशंकरंलोकशंकरम् ॥ तपसातोषयित्वातंकैलासगिरिवासिनम् १ रुक्मिण्यांतनयंलेभेदग्धकामंपुनर्हरिः ॥ वीरंप्रद्युम्ननामानंरूपौदार्यगुणान्वितम् २ राजोवाच ॥ पुत्रार्थमीश्वरंदृष्ट्वास्वयंलब्धवरोहरिः ॥ अवापकीदृशंपुत्रंकिंनामानंवदस्वमे ३ श्रीशुकउवाच ॥ कामस्तुवासुदेवांशोदग्धःप्राग्रुद्रमन्युना ॥ देहोपपत्तयेभूयस्तमेवप्रत्यपद्यत ४ सएवजातोवैदर्भ्यांकृष्णवीर्यसमुद्भवः ॥ प्रद्युम्नइतिविख्यातःसर्वतोऽनवमःपितुः ५ तंशंबरःकामरूपीहृत्वातोकमनिर्दशम् ॥ सविदित्वात्मनःशत्रुंप्रास्योदन्वत्यगाद्गृहम् ६ तंनिर्जगारबलवान्मीनःसोप्यपरैःसह ॥ वृतोजालेनमहतागृहीतोमत्स्यजीविभिः ७ तंशंबरायकैवर्ताउपाजह्रुरुपायनम् ॥ सूदामहानसंनीत्वाऽवद्यन्स्वधितिनाऽद्भुतम् ८ दृष्ट्वातदुदरे बालंमायावत्यैन्यवेदयन् ॥ नारदोऽकथयत्सर्वंतस्याःशंकितचेतसः ९ बालस्यतत्त्वमुत्पत्तिंमत्स्योदरनिवेशनम् ॥ साचकामस्यवैपत्नीरतिर्नामयशस्विनी १० पत्युर्निर्दग्धदेहस्यदेहोत्पत्तिंप्रतीक्षती ११ निरूपिताशंबरेणसासूपौदनसाधने ॥ कामदेवांशिशुंबुद्ध्वाचक्रेस्नेहंसदार्भके १२

धानमेवास्याभिधानमित्याह प्रद्युम्नइति सर्वतोवर्यादिभिः पितुरनवमःकृष्णस्यपुत्रत्वेयोग्यः ५ तोकंसद्योजातंशिशुं निर्गतोदशमोदिवसोयस्मात्सनिर्दशःतं उदन्वतिसमुद्रे ६ अपरैर्मत्स्यैर्जालेनासिचा वृतः संस्यूतः मत्स्यजीविभिर्दाशैः ७ कैवर्ताःमत्स्यमारकाः कैवर्तीदाशधीवराविंतिच महानसंपाकस्थानं स्वधितिनापरशुना परश्वधःकुठारःस्यात्परशुःस्वधितिस्तथा अवद्यन्अवाद्यन्अखंडयन् दोअवखंडनइति धातुः ८ मायावतीशंबरस्यमहानसाध्यक्षस्त्री ९ किमकथयदत्राह बालस्येति मत्स्योदरनिवेशनंमत्स्योदरप्रवेशम् १० ११ पक्वानांसूपानांमुद्गानांबाह्युपदंशानामोदनस्यचसाधनेसंस्कारे यद्वा सूपादिसाधनेअध्यक्षतयासाधनेसेवकसाधनेविध्युपायनिवृत्तिषु मरणेमृतसंस्कारेवाचननेनूनमेवच सेनाग्रेयातनायांचसेचनेस्फूर्तिसेवयोरिति १२

कृष्णस्यापत्यंकार्ष्णिःविभ्रमंविकारं यद्वा देवाद्यन्यतमइतिविशिष्टभ्रमं १३ रतिरात्मनोयनैस्तंपतिमुपतस्थेअभिमुखेनतस्थौ किमात्मधनानिमुवर्णानीनिनेत्याह सव्रीडेति व्रीडयासाहतोहासः सव्रीडहासःउत्तमोविभ्रमःउत्कृष्टशृंगारचेष्टा ईक्षणंकटाक्षनिरीक्षणंतैः १४ मातृभावंमातुःस्वभावं सुरतकामिनी १५ अधिकृतापत्नीवधूत्तमा १६ त्वांनिर्दशंइतिपाठः १७ मोहनशोषणद्रावणाभिर्मायाभिः १८ कुररस्यस्त्रीकुररी उत्क्राशःकुररोमतइति मृतप्रजानष्टापत्या १९ महामायामहासामर्थ्या २० ओष्ठमवष्टभ्यदंष्ट्रादंशैरितिशेषः २१ २२ नादमितिक्रियाविशेषणं वज्रानिष्पेषःस्फूर्ज

नातिदीर्घेणकालेनसकार्ष्णीरूढयौवनः ॥ जनयामासनारीणांवीक्षंतीनांचविभ्रमम् १३ सातंपतिंपद्मदलायतेक्षणंप्रलंबबाहुंनरलोकसुंदरम् ॥ सव्रीडहासोत्तमविभ्रमेक्षितैःप्रीत्योपतस्थेरतिरात्मनोयनैः १४ तामाहभगवान्कार्ष्णिर्मातस्तेमतिरन्यथा ॥ मातृभावमतिक्रम्यवर्तसेकामिनीवमे १५ रतिरुवाच ॥ भवान्नारायणसुतःशंबरेणहृतोगृहात् ॥ अहंतेऽधिकृतापत्नीरतिःकामोभवान्प्रभो १६ एषत्वानिर्दशांसिंधावक्षिपच्छंबरोसुरः ॥ मत्स्योऽग्रसीत्तदुदरादिहप्राप्तोभवान्प्रभो १७ तमिमंजहिदुर्धर्षंदुर्जयंशत्रुमात्मनः ॥ मायाशतविदंत्वंचमायाभिर्मोहनादिभिः १८ परिशोचतितेमाताकुररीवमृतप्रजा ॥ पुत्रस्नेहाकुलादीनाविवत्सागौरिवातुरा १९ प्रभाष्यैवंददौविद्यांप्रद्युम्नायमहात्मने ॥ मायावतीमहामायासर्वमायाविनाशिनीम् २० सचशंबरमभ्येत्यसंयुगायसमाह्वयत् ॥ अवष्टभ्योष्ठमाक्षेपैःक्षिपन्संजनयन्कलिम् २१ सोधिक्षिप्तोदुर्वचोभिःपदाहतइवोरगः ॥ निश्चक्रामगदापाणिरमर्षात्ताम्रलोचनः २२ गदामाविध्यतरसाप्रद्युम्नायमहात्मने ॥ प्राक्षिप्यव्यनदन्नादंवज्रनिष्पेषनिष्ठुरम् २३ तामापतंतींभगवान्प्रद्युम्नोगदयागदाम् ॥ अपास्यशत्रवेक्रुद्धःप्राहिणोत्सगदांनदन् २४ सचमायांसमाश्रित्यदैतेयीमयदर्शिताम् ॥ निर्ममेऽममयंवर्षंकार्ष्णौवैहायसोऽसुरः २५ बाध्यमानोऽश्मवर्षेणरौक्मिणेयोमहारथः ॥ सत्वात्मिकांमहाविद्यांसर्वमायोपमर्दिनीम् २६ ततोगौह्यकगांधर्वपैशाचोरगराक्षसीः ॥ प्रायुंक्तशतशोदैत्यःकार्ष्णिर्व्यधमयत्सताः २७ निशातमसिमुद्यम्यसकिरीटंसकुंडलम् ॥ शंबरस्यशिरःकायात्ताम्रश्मश्रुजहारतत् २८ आकीर्यमाणोदिविजैःस्तुवद्भिःकुसुमोत्करैः ॥ भार्ययांऽबरचारिण्यापुरंनीतोविहायसा २९ अंतःपुरवरंराजन्ललनाशतसंकुलम् ॥ विवेशपत्न्यागगनाद्विद्युतेवबलाहकः ३० तंदृष्ट्वाजलदश्यामंपीतकौशेयवाससम् ॥ प्रलंबबाहुंताम्राक्षंसुस्मितंरुचिराननम् ३१ अलंकृतमुखांभोजंनीलवक्त्रालकालिभिः ॥ कृष्णंमत्वास्त्रियोभीतानिलिल्युस्तत्रतत्रह ३२ उपधार्यशनैरीषद्वैलक्षण्येनयोषितः ॥ उपजग्मुःप्रमुदिताःसस्त्रीरत्नंशुचिस्मिताः ३३ अथतत्रासितापांगीवैदर्भीवल्गुभाषिणी ॥ अस्मरत्स्वसुतंनष्टंस्नेहस्नुतपयोधरा ३४

थुस्तद्वन्निष्ठुरोनादोयथाभवतितथाऽयनदत् स्फूर्जथुर्वज्रनिष्पेषइतिहलायुधः २३ २४ दैतेयीदैत्यानांकुलदेवतामिवाविद्यमानांवैहायसःविहायसिगगनेस्थितः २५ सत्वात्मिकांबलज्ञाननिधिर्विष्णुदैवत्यांमहाविद्यांविज्ञानास्त्रसंज्ञां २६ गौह्यकादीन्यस्त्राणिप्रायुंक्त गुह्यकास्त्रंगौह्यकंव्यधमयदनाशयत् २७ ताम्रश्मश्रुकपिलरुचिरश्मश्रु २८ २९ बलाहकोमेघः ३० ३१ निलिल्युःनिलीनाः ३२ वैलक्षण्येनकृष्णलक्षणविपरीतलक्षणनिकरेण ३३ असितापांगीनीलरुचिरकांतनेत्रांता ३४

नरवैदूर्यःनरश्रेष्ठःनराकारंवैदूर्यरत्नमिवशोभमानइतिवा कस्यपुत्रः कयास्त्रियाधतोगर्भइतिशेषः इयंकाकेनवालब्धा ३५ प्रकारांतरेणशंकते ममेति ३६ सारूप्यंसादृश्यं सारूप्यं केनेतितत्राह आकृत्येति ३७ नूनंनिश्चयः ३८ मीमांसमानायांविचारयंत्यां ३९ ४० ४१ ४२ ४३ नारीणांविभ्रमंजनयामासेति यदुक्तंनतच्चित्रंमंतव्यमित्याह यंवाइति यंदृष्ट्वात स्यप्रद्युम्नस्यमातरःहरेःपत्न्यःमनसिजार्द्रहृदाकामरसक्लिन्नमनस्कत्वेनोरुभावाःबहुविधशृंगारचेष्टायुक्ताः अंगुष्ठनखमुखमूलेनकरयुगपीडनादिविकारलक्षणलक्षिताअभूवन्नित्यन्वयः किंविशिष्टाः पितृस रूपतयापितृसारूप्येणनिजेशोऽस्मत्पतिरयमितिभावोभिप्रायोयासांतास्तथाताः तस्मिन्कामेमदनेतच्चित्रंनखलु काम्यतइतिकामस्तस्मिन्कामेअक्षविषयेचक्षुर्गोचरेकिमुइतोपिचित्रंनेत्याह रमेति र

कोन्वयंनरवैदूर्यःकस्यवाकमलेक्षणः ॥ धृतःकयावाजठरेकेयंलब्धाथकेनवा ३५ ममचाप्यात्मजोनष्टोनीतोवासूतिकागृहात् ॥ एतत्समवयोरूपोय दिजीवतिकुत्रचित् ३६ कथंत्वनेनसंप्राप्तंसारूप्यंशार्ङ्गधन्वनः ॥ आकृत्यावयवैर्गत्यास्वरहासावलोकनैः ३७ सएववाभवेन्नूनंयोमेगर्भेधृतोर्भकः ॥ अमुष्मिन्प्रीतिरधिकावामःस्फुरतिमेभुजः ३८ एवंमीमांसमानायांवैदर्भ्यांदेवकीसुतः ॥ देवकीवसुदेवाभ्यांनारदेनमहात्मना ३९ अन्यैश्चया दवश्रेष्ठैरुत्तमश्लोकआविशत् ॥ विदितार्थोपिभगवांस्तूष्णीमासजनार्दनः ४० नारदोऽकथयत्सर्वंशंबराहरणादिकम् ॥ तच्छ्रुत्वामहदाश्चर्यंकृष्णांतः पुरयोषितः ४१ देवकीवसुदेवश्चकृष्णरामौतथास्त्रियः ॥ दंपतीतौपरिष्वज्यरुक्मिणीचययुर्मुदम् ४२ नष्टंप्रद्युम्नमायांतमाकर्ण्यद्वारकौकसः ॥ अहोमृतइवायातोबालोदिष्ट्येतिचाब्रुवन् ४३ यंवैमुहुःपितृसरूपनिजेशभावात्न्मातरोमनसिजार्द्रहृदोरुभावाः ॥ चित्रंनतत्खलुरमास्पदबिंबभूतेका मेस्मरेऽक्षविषयेकिमुतान्यनार्यः४४ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेशंबरदैत्यवधोनामाष्टषष्टितमोऽध्यायः ॥६८॥ श्रीशुकउवाच ॥ पौंड्र कोनामराजावैतस्मिन्कालेकुरूद्वह ॥ द्वारकांवृष्णिनिलयांनिरुध्यबहुसैनिकः१अर्दयामासकृष्णेनाविदित्वारहितांनिशि ॥ तंकामपालःशैनेयोवसुदेवोद्धवा दयः २ उग्रसेनश्चकौरव्ययेचान्येयदुपुंगवाः ॥ अर्पयामासुरायांतंकालयोग्यमिवातिथिम् ३ ॥ राजोवाच ॥ कश्चासौपौंड्रकोनामकस्मिन्देशेमहीप तिः ॥ कस्यवातनयोब्रह्मन्सर्वमेतद्वदस्वमे ४ ॥ श्रीशुकउवाच ॥ अपुत्रःकाशिराजोवैकन्यांसुतनुसंज्ञिताम् ॥ प्रायच्छद्वसुदेवायराज्यशुल्कांकुरूद्व ह ५ तत्रजज्ञेमहाबाहुर्दिवाकरसमद्युतिः ॥ कुमारःपौंड्रकोनामबलवीर्यमदान्वितः ६ वसुदेवसुतत्वाच्चवासुदेवेतिशब्दितः ॥ जातेतस्मिन्महाराजो वसुदेवोमहाद्युतिः ७ राज्यंतस्मिन्समारोप्यसकोशबलवाहनम् ॥ उवाहकंसावरजांदेवकींदेवतोपमाम् ८

मास्पदस्यलक्ष्मीमूर्तेःश्रीकृष्णस्यबिंबादखंडलक्षणोपेतादेहादुद्भूतेजातेआत्मावैपुत्रनामासीतिश्रुतेः श्रीकृष्णस्यबिंबस्ययल्लक्षणंतत्सर्वमस्यबिंबस्यनिधीयतइतिश्रीकृष्णदेहप्रतिबिंबभूतइत्यर्थः बिंबोल्लीमं डलसमप्रतिमामुखलक्ष्मसु प्रतिरूपेप्रतिकृतौस्याद्बिंबकापालइति अन्यनार्यःतन्मातृव्यतिरिक्ताःस्त्रियःस्मृतेपिविमुह्यंति दृष्ट्वाकिमुतदिदंसर्वंकृष्णमाहात्म्यविलासइतिसमर्थविशेषंवाइत्यनेनदर्शयति ४४ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटीयांअष्टषष्टितमोऽध्यायः ॥ ६८ ॥ नयस्यस्वःपरइतीममर्थंसत्यंकर्तुंपौंड्रकवधलक्षणंविक्रमंकथयितुमुत्तराध्यायप्रारंभः तस्मिन्काले १ कृष्णरहितांविदित्वा कामपालोबलभद्रः २ अर्पयामासुःशरानितिशेषः ३ ४ राज्यमेवशुल्कंयस्यांसातथातां ५ ६ नामांतरमाह वसुदेवेति ७ ८

९ उद्विजतेभीतिंकरोति भयकरणमात्मनएवफलतीतिद्योतनायस्मरमाणइति १० द्वारकांसमेत्यापमृत्यु ११ परशवयामपररात्रउषःकाल १२ १३ १४ १५ बालरूपमस्तानगुणेनप्रस्तुतोमूढाक्षेपमुक्तोवा १६ १७ १८ अस्मच्चिह्नानिचक्रादीनि मांशरणमेहि १९ कत्थनंव्यर्थभाषणं २० अनुअनंतरंउत्स्रक्ष्येत्याजपिष्येत्वदीयानिचिह्नानि २१ २२ स्वा

निरुद्धोभोजराजेनकंसेनानकदुंदुभिः ॥ कदाचिदपिनप्रायात्करवीरपुरीमपि ९ अमह्यंमातृमापत्न्यमभ्रातृत्वंतथात्मनः ॥ स्मरमाणःसकाशीशोयदू नुद्विजतेऽनिशम् १० सकृष्णरहितांश्रुत्वासमेत्यद्वारकांनिशि ॥ विमृद्यबलभद्रेणशैनेयेनापिनिर्जितः ११ निहतानेकसाहस्रहयकुंजरसैनिकः ॥ जगा मपरशर्वर्यांपुरींवाराणसींनृप १२ प्रभातायांतुशर्वर्यांहरिर्बंदारिकाश्रमात् ॥ आययौताक्ष्यमारुह्यद्वारकांरामपालिताम् १३सपताकैःसाध्यपाद्यैर्यदुवृष्ण्यं धकादिभिः ॥ अभिवर्णितवृत्तांतःप्राविशत्केशवःसभाम् १४ कदाचित्पौंड्रकोनामकाशिराजःप्रतापवान् ॥ वासुदेवोहमित्यज्ञोदूतंकृष्णायप्राहिणो त् १५ त्यंवासुदेवोभगवानवतीर्णोजगत्पतिः ॥ इतिप्रस्तोभितोबालैर्मेनेस्वात्मानमच्युतम् १६ दूतस्तुद्वारकामेत्यसभायामास्थितंहरिम् ॥ कृष्णं कमलपत्राक्षंराजसंदेशमब्रवीत् १७ वासुदेवोवतीर्णोहमेकएवनचापरः ॥ भूतानामनुकंपार्थंत्वंतुमिथ्याभिधांत्यज १८ यानित्वमस्मच्चिह्नानिमौढ्या द्बिभर्ष्यभीतवत् ॥ त्यक्त्वैहिमांत्वंशरणंनोचेद्देहिममाहवम् १९ कत्थनंतदुपाकर्ण्यपौंड्रकस्याल्पमेधसः ॥ उच्चकैरुग्रसेनाद्याःसभ्याःप्रजहसुस्तदा २० उवाचदूतंभगवान्परिहासकथामनु ॥ उत्स्रक्ष्येमूढचिह्नानियैस्त्वमेवंविकत्थसे २१ मुखंतवविधायाज्ञकंकगृध्रबकैर्वृतम् ॥ शयिष्यसेहतस्तत्रभ विताशरणंशुनाम् २२ इतिदूतस्तदाक्षेपंस्वामिनेसर्वमाहरत् ॥ कृष्णोपिरथमारुह्यप्रायात्काशींससैनिकः २३ पौंड्रकोपितदुद्योगमुपलभ्यमहारथः ॥ अक्षौहिणीभिःसहितोनिश्चक्रामपुराद्भुतम् २४ तमायांतंरथोपस्थेसुवर्णगरुडेस्थितम् ॥ सुवर्णबाहुयुगलमपश्यत्पौंड्रकंहरिः २५ शंखार्यसिगदाशार्ङ्गैद धच्छ्रीवत्सलक्षितम् ॥ बिभ्राणंकौस्तुभमणिंवनमालाविभूषितम् २६ कौशेयवाससीपीतेवसानंगरुडध्वजम् ॥ आमुक्तमाल्याभरणंस्फुरन्मकरकुंडल म् २७ दृष्ट्वातमात्मनासाम्यंकृत्रिमंवेषमास्थितम् ॥ यथानटंरंगगतंविजहासभृशंहरिः २८ क्षणेनतंकाशिपतेःसैनिकाहढधन्विनः ॥ शरैराच्छादया मासुर्मेघाःशैलमिवांभसा २९ केचिद्गजान्रथानश्वानास्थायरणमूर्द्धनि ॥ शूलैर्गदाभिःपरिघैःशक्तयृष्टिप्रासतोमरैः ॥ असिभिःपट्टिशैर्बाणैःप्रहरन्नरयोह रिम् ३० तस्यकाशीपतेर्मित्रंपार्ष्णिग्राहोपरोनृपः ॥ अक्षौहिणीभिस्तिसृभिरुपायान्नृपसंगरम् ३१ कृष्णस्तुतत्पौंड्रककाशिराजयोर्बलंगजस्यंदनवा जिपत्तिमत् ॥ गदासिचक्रेषुभिरार्दयद्दृशंयथायुगांतेहुतभुक्प्रभाज्वलन् ३२

मिनेपौंड्रकाय २३ २४ २५ २६ आमुक्तमाल्याभरणंबद्धमालालंकारम् २७ २८ २९ ऋष्टिःखड्गविशेषः प्रहरन्प्राहरन् ३० पार्ष्णिग्राहंपृष्ठतोगोप्तारम् ३१ प्रभयाज्वलन् ३२

यदायोधनंयुद्धस्थानंतद्भावित्यन्वयः अवखंडितैरुच्छिन्नैःखंडिखंडने द्विपदःपदातयः मनस्विनांशूराणांमानवर्धनंभूतपतेराक्रीडनंश्मशानम् ३३ किमाह शौरिरितित्राह यदिति भवान्दूतवाक्येन वासुदेवोवर्तीर्णोहमित्यादिलक्षणेनयन्मामाह तत्सत्यमेतिशेषः किंतदितित्राह तानीति यान्युत्सृजेतिभवानाहरगेतान्यस्त्राण्युत्सृजामिमुंचामि ३४ अद्यत्वयाहंयदेववासुदेवेत्यभिधानंमृषाकृतंत त्त्वांत्याजयिष्येप्रहारविष्यामि यदिसंयुगंनेच्छामितर्हित्वांशरणंव्रजामीति ३५ ३६ ३७ ३८ संशायिरेसंशयंचक्रिरे ३९ ४० संस्थाविधिंप्रेतक्रियां अपचितिंअनृणत्वंप्रतिक्रियांवा अर्चनायामपाचि

आयोधनंतद्रथवाजिकुंजरद्विपत्खरोष्ट्रैरिपुणावखंडितैः ॥ बभौचतन्मानवहंमनस्विनामाक्रीडनंभूतपतेरिवोल्बणम् ३३ अथाहपौंड्रकंशौरिर्भोभोपौंड्रकयद्भवान् ॥ दूतवाक्येनमामाहतान्यस्त्राण्युत्सृजामिते ३४ त्याजयिष्येऽभिधानंमेयत्त्वयाद्यमृषाकृतम् ॥ व्रजामिशरणंतेद्ययदिनेच्छामिसंयुगम् ३५ इतिक्षिप्त्वाशितैर्बाणैर्विरथीकृत्यपौंड्रकम् ॥ शिरोऽहरद्रथांगेनवज्रेणेंद्रोयथागिरेः ३६ तथाकाशिपतेःकायाच्छिरउत्कृत्यपत्रिभिः ॥ न्यपातयत्काशिपुर्यांपद्मकोशमिवानिलः ३७ एवंमत्सरिणंहत्वापौंड्रकंससखंहरिः ॥ द्वारकामाविशत्सिद्धैर्गीयमानकथामृतः ॥ ३८ ॥ श्रीशुकउवाच ॥ शिरःपतितमालोक्यराजद्वारिसकुंडलम् ॥ किमिदंकस्यवावक्त्रमितिसंशयिरेजनाः ३९ राज्ञःकाशिपतेर्ज्ञात्वामहिष्यःपुत्रबांधवाः ॥ पौराःशोकहताराजन्नाथनाथेत्युपाद्रवन् ४० सुदक्षिणस्तस्यसुतःकृत्वासंस्थाविधिंपितुः ॥ निहत्यपितृहंतारंयास्याम्यपचितिंपितुः ४१ इत्यात्मनाभिसंधायसोपाध्यायोमहेश्वरम् ॥ सुदक्षिणोऽर्चयामासपरमेणसमाधिना ४२ प्रीतोऽविमुक्तेभगवांस्तस्मैवरमदाद्भवः ॥ पितृहंतुर्वधोपायंसवव्रेवरमीप्सितम् ४३ दक्षिणाग्निंपरिचरब्राह्मणैःसहऋत्विजः ॥ आभिचारविधानेनसचाग्निःप्रमथैर्वृतः ४४ साधयिष्यतिसंकल्पमब्रह्मण्येप्रयोजितः ॥ इत्यादिष्टस्तथाचक्रेकृष्णायाभिचरन्नृप ४५ ततोग्निरुत्थितःकुंडान्मूर्तिमानतिभीषणः ॥ तप्ताम्रशिखाश्मश्रुरंगारोद्गारिलोचनः ४६ दंष्ट्रोग्रभ्रुकुटीदंतकठोरास्यःस्वजिह्वया ॥ आलिहन्सृक्किणीरक्तेविधुन्वन्त्रिशिखंज्वलत् ४७ पद्भ्यांतालप्रमाणाभ्यांकंपयन्धरणीतलम् ॥ सोभ्यधावद्वृतोभूतैर्द्वारकांप्रदहन्दिशः ४८ तमाभिचारदहनमायांतंद्वारकौकसः ॥ विलोक्यतत्रसुःसर्ववनदाहेयथामृगाः ४९ अक्षैःसभायांक्रीडंतंभगवंतंभयातुराः ॥ त्राहित्राहीतिलोकेशंवह्नेःप्रदहतःपुरम् ५० श्रुत्वातज्जनवैक्लव्यंदृष्ट्वास्वानांचसाध्वसम् ॥ धरणीशःप्रहस्याहमाभैष्टेत्यवितास्म्यहम् ५१ सर्वस्यांतर्बहिःसोथकृत्यांमाहेश्वरींविभुः ॥ विज्ञायतद्विघातार्थंपार्श्वस्थंचक्रमादिशत् ५२

तिःप्रेतक्षयेनिष्कृतौव्ययइति ४१ आत्मनामनसाइत्यभिसंधायसंकल्प्य ४२ अविमुक्तेकाश्यां अविमुक्तेश्वरनामक्षेत्रविशेषेवाप्रीतः ४३ दक्षिणाग्निमन्वाहार्यनामानंपरिचरपूजय आभिचारविधानेनक्षुद्रप्रयोगप्रकारेण ४४ अब्रह्मण्येब्राह्मणाचारविरुद्धाचारेप्रयोजितः आदिष्टःईश्वरेणेतिशेषः अभिचरन्कृत्याप्रयोगंकुर्वन् ४५ ४६ त्रिशिखंशूलमितिशेषः ४७ ४८ आभिचारदहनंकृत्यालक्षणाग्निम् ४९ अक्षैर्देवरैः ५० धरणीशःभूमीशःधरणंयस्यतद्रूपिणस्यचैलोक्यस्यवा अतिवत्सलत्वात् ५१ ५२

सुदर्शनंनामचक्रंअस्त्रं खंबिलंब्योमवा खींमद्रियोदेविब्योन्नितात्रेद्वाराभ्युपायपोरितियादवः ५३ अभिचारःकृत्याग्निः ५४ तदनुसुदर्शनदहनानंतर अतःग्रावष्ट काष्ठमतशृह वस्त्रयस्यउ
ष्णिशालाम् ५५ ५६ एतच्चरित्रश्रवणादिफलमाह यइति ५७ तावुभौश्रोताश्रावयिताचब्रह्महत्यादिभिरुपलक्षितेभ्योऽशुभेभ्यः ५८ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटी
कायांएकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ ॥ तीर्थयात्रायांबहुविधंपुण्यंनिमित्तंकालेततोपिविशिष्टं तत्रस्नानात्तत्पात्रत्यागात्संदर्शनात्पुण्यवतांपुण्यराशेरितरेषामप्यघक्षयाच्छुद्धांतःकरणत्वे
ननिर्मलाकृष्णविषयाभक्तिःमुक्तावानंदविशेषंमुक्तिंचददातीतिकृत्वालौकिकाचारंविडंबयतः कृष्णस्यतीर्थयात्रादिलक्षणंचरितंकथयत्यस्मिन्नध्याये तत्रादौतीर्थयत्रायांनिमित्तमाह अथेति कल्पक्षयइत्य

तत्सूर्यकोटिप्रतिमंसुदर्शनंजाज्वल्यमानंप्रलयानलप्रभम् ॥ स्वतेजसाखंककुभोथरोदसीचक्रंमुकुंदस्यझटित्यपूरयत् ५३ कृत्यानलःप्रतिहतःसरथांगपा
णेरस्त्रौजसानृपविमग्नमुखोनिवृत्तः ॥ वाराणसींप्रतिसमेत्यसुदक्षिणंतंसन्निर्जितंसमदहत्स्वकृतोभिचारः ५४ चक्रंचविष्णोस्तदनुप्रविष्टंवाराणसीं
साट्टसभालयापणाम् ॥ सगोपुराट्टालककोष्ठतोरणांसकोशहस्त्यश्ववरूथमंदिराम् ५५ दग्ध्वावाराणसींसर्वांविष्णुचक्रंसुदर्शनम् ॥ भूयःपार्श्वमुपातिष्ठ
त्कृष्णस्याक्लिष्टकर्मणः ५६ यएतच्छ्रावयेन्मर्त्यउत्तमश्लोकविक्रमम् ॥ समाहितोवाशृणुयात्सर्वपापैःप्रमुच्यते ५७ तावुभौसर्वपापेभ्योब्रह्महत्यादिभिर्नृ
प ॥ विमुच्यदेहावसानेविष्णुलोकंप्रयास्यतः ५८ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउ०एकोनसप्ततितमोऽध्यायः ॥६९॥ श्रीशुकउवाच ॥ अथैक
दाद्वारवत्यांवसतोरामकृष्णयोः ॥ सूर्योपरागःसुमहानासीत्कल्पक्षयेयथा १ तंज्ञात्वामनुजाराजन्पुरस्तादेवसर्वशः ॥ स्यमंतपंचकंक्षेत्रंजग्मुःश्रेयोविधित्स
या २ निःक्षत्रियांमहींकुर्वन्नरामःशस्त्रभृतांवरः ॥ नृपाणांरुधिरौघेणयत्रचक्रेमहाह्रदान् ३ ईजेचभगवान्रामोयत्रास्पृष्टोपिकर्मणा ॥ लोकस्यसंग्रहायैषो
यथान्योघापनुत्तये ४ महत्यांतीर्थयात्रायांतत्रागुर्भारतीःप्रजाः ॥ कृष्णःषोडशसाहस्रमहिषीशिबिकान्वितः ५ पुत्रपौत्रजनानीकैर्वारकांताकरेणुभिः ॥
नगरस्त्रीकदंबैश्चप्रियासार्थैश्चसंयुतः ६ वृष्णयश्चतथाक्रूरवसुदेवगदादयः ॥ ययुर्भारततत्क्षेत्रंस्वमवंक्षपयिष्णवः ७ शठप्रद्युम्नसांबाश्चसुबभ्रोद्धवसा
रणाः ॥ आहुकंकृतवर्माणंसंस्थाप्यपुररक्षणे ८ तेरथैर्देवविरुद्यातैर्हयैश्चतरलप्रभैः ॥ गजैर्बृहद्भिरभ्रामैर्नृभिर्विद्याधरद्युभिः ९ व्यरोचंतमहाभागाः
पथिकांचनमालिनः ॥ वेदवादित्रनिर्घोषैःशंखदुंदुभिनिःस्वनैः १० गायंतःकृष्णकृष्णेतिगोविंदेतिचसंततम् ॥ ककुभःपूरयन्नादैर्जग्मुःसर्वेकुरूद्वह ११
स्यमंतपंचकंप्राप्यक्षेत्रंत्रैलोक्यविश्रुतम् ॥ तृणैःपर्णैस्तथाकाष्ठैश्चक्रिरेभवनानिच १२

नेनसर्वग्रासंलक्षयति १ पुरस्तादुपरागादितिशेषः स्यमंतपंचकंकुरुक्षेत्रं स्यमंतानांह्रदानांपंचकंयस्मिंस्तत्तथा २ एतदेवस्पष्टयति निःक्षत्रियामिति निषिद्धाःक्षत्रियायस्यांसातथाताम्
यत्रदेशे यत्पंचमहाह्रदांश्चक्रेतत्स्यमंतपंचकं ३ कर्मणाहत्यानिमित्तपापोत्पत्तेन अस्पृष्टोपिलोकसंग्रहायेति विकर्मणेतिकेचित्पठंति ४ भारतीःभारतखंडेविद्यमानाः ५ वारकांताःगणिका
स्तदाढ्यढकरेणुभिः ६ ७ ८ तरलानांतरंगाणांप्रभावत्प्रभायेषांतेतथा अतिधवलप्रभाइत्यर्थःतैर्विद्याधरद्युतिभिः ९ १० ११ १२

कंबलाजिनवस्त्राणांवितानैरितिशेषः १२ अनेकइतिपदच्छेदः बहवइत्यर्थः निंदिताश्चतुर्वर्णेभ्यःपृथक्कृताः १४ शंसितव्रताःनिर्मलव्रताःस्नातकाःदंडसोदककमंडलुधराःगृहमेधिनःपंचयज्ञाधिकारिणः १५ कुब्जाःवक्रांगाःवामनाह्रस्वावयवाःपंडकाःक्लीबाःव्यंगाःहस्ताद्यवयवहीनाःकिंसाध्यामितितत्राह कर्मेति १६ कटकंवलयः १७ १८ वासांसिस्रजश्चरुक्ममालाःस्वर्णमालाःआसांसंतीतिवासःस्रयुक्ममालिन्यःताः १९ २० २१ २२ २३ २४ सचापलाश्चांचल्येनसहिताःअपांगदृशःकटाक्षवीक्षणानियासांतास्तथा अभिरेभिरेआलिंगनंचक्रुः २५ २६ २७ केयंकथेतितत्राह

कंबलाजिनवस्त्राणांशिबिराणिमहीभृताम् ॥ आसन्विचित्ररूपाणिशतशोथसहस्रशः १३ तत्राजग्मुर्नृपाऽनेकेब्राह्मणाश्चसहस्रशः ॥ वैश्याःशूद्राश्च
निःसंख्यायेचान्येवर्णानिंदिताः १४ ऋषयश्चमहात्मानोविख्याताःशंसितव्रताः ॥ सोपाध्यायाःसाग्निहोत्राःस्नातकागृहमेधिनः १५ अंधाश्चबधिराश्चैवकुब्जावामनपंडकाः ॥ व्यंगाजडाश्चमूकाश्चकर्मक्षयपरीप्सवः १६ गोविंदचरणांभोजरेणुरंजितमस्तकाः ॥ कटकांगदकेयूरहारकुंडलभूषणाः १७ स्रग्गंधादिव्यवसनाःकलत्रैःखेचराइव ॥ तत्रस्नात्वामहाभागाउपोष्यसुसमाहिताः १८ ब्राह्मणेभ्योदद्धुर्धेनूर्वासःस्रयुक्ममालिनीः ॥ रामह्रदेषुविधिवत्पुनराप्लुत्यवृष्णयः १९ ददुःस्वर्णंद्विजाग्र्येभ्यःकृष्णेनोभक्तिरास्त्विति ॥ स्वयंचतदनुज्ञाताबृष्णयःकृष्णदेवताः २० भुक्त्वोपविविशुःकामंस्निग्धच्छायांघ्रिपाघ्रिषु ॥ तत्रागतांस्तेददृशुःसुहृत्संबंधिनोनृपान्२१मत्स्योशीनरकौशल्यविदर्भकुरुसृंजयान् ॥ कांबोजकैकयान्मद्रान्कुंतिगांधारकेरलान्२२ अन्यांश्चैवात्मपक्षीयान्पराश्चशतशोनृपान् ॥ नंदादीन्सुहृदोगोपान्गोपीश्चोत्कंठिताश्चिरम् २३ अन्योन्यसंदर्शनहर्षरंहसाप्रोत्फुल्लहृद्वक्त्रसरोरुहश्रियः ॥ आश्लिष्यगाढंनयनैःस्रवज्जलाहृष्यत्त्वचोरुद्वगिरोययुर्मुदम् २४ स्त्रियश्चसंवीक्ष्यमिथोतिसौहृदाःसचापलापांगदृशोऽभिरेभिरे ॥ स्तनैःस्तनान्कुंकुमपंकरूषितान्निहत्यदोर्भ्यांप्रणयाश्रुलोचनाः २५ ततोभिवाद्यतेवृद्धान्यवीयैरभिवादिताः ॥ स्वागतंकुशलंपृष्ट्वाचक्रुःकृष्णकथांमिथः २६ पृथाभ्रातॄन्स्वमूर्वीक्ष्यतत्पुत्रान्पितरावपि ॥ भ्रातृपत्नीर्मुकुंदंचजह्रौसंकथयाशुचः २७ कुंत्युवाच ॥ आर्यभ्रातरहंमन्येआत्मानमकृताशिषम् ॥ यद्वाआपत्सुमद्वार्तानानुस्मरथसत्तमाः २८ सुहृदोज्ञातयःपुत्राभ्रातरःपितरावपि ॥ नानुस्मरंतिस्वजनंयस्यदैवमदक्षिणम् २९ वसुदेवउवाच ॥ अंबमास्मानसूयेथादेवक्रीडनकान्नरान् ॥ ईशस्यहिवशेलोकःकुरुतेकार्यतेथवा ३० कंसप्रतापिताःसर्वेवयंयातादिशोदश ॥ एतर्ह्येवपुनःस्थानंदैवेनासादिताःस्वसः ३१ श्रीशुक उवाच ॥ वसुदेवोग्रसेनाद्यैर्यदुभिःसेवितानृपाः ॥ आसन्नच्युतसंदर्शपरमानंदनिर्भराः ३२ भीष्मोद्रोणोंऽबिकापुत्रोगांधारीसुतातथा ॥ सदाराःपांडवाःकुंतीसंजयोविदुरःकृपः ३३ कुंतिभोजोविराटश्चभीष्मकोनग्नजिन्महान् ॥ पुरुजिद्द्रुपदःशैब्योधृष्टकेतुश्चकाशिराट् ३४

आर्योति आर्यभ्रातर्ज्येष्ठभ्रातःवसुदेवअकृताशिषंअचीर्णपुण्यम् अस्मदापत्सुमद्वार्तानानुस्मरथेतियत्तस्मादितिशेषः २८ तत्रकिंकारणमितितत्राह यस्येति अदक्षिणंविपरीतवृत्ति २९ देवक्रीडनकान्देवस्येश्वरस्यक्रीडोपकरणभूतान्ईशस्यवशेस्थितोलोकःकर्माणिकुरुते संगेनकार्यतेवा कार्यतेह्यवशइतिस्मृतेः ३० कंसेनप्रतापिताःसंतापंप्रापिताःएतर्हिइदानींस्वसःहेभगिनि

३५ ३६ कृष्णपरिग्रहान्कृष्णाश्रयान् ३७ ३८ तुशब्दोऽवधारणार्थःचशब्दःसमाहारार्थःयस्यकृष्णस्यवदनाब्जंःसृतवेदवागात्मकशास्त्रब्रह्मसूत्रादिलक्षणइदंजगत्पुनात्यत्र यत्पादावनेजन
पयश्चपुनाति कालाग्निनाभर्जितभगानिदंग्धवीर्याभूःयस्यांघ्रिपद्मस्पर्शेनइद्धासमृद्धाशक्तिर्यस्याःसातथासाऽस्मदर्थेखिलार्थानभिवर्षति तंकृष्णमसकृत्पश्यथेतियस्मात्तस्माज्जन्मभाजइतिगतेनान्वयः ३९
इतोपियूयंजन्मभाजइत्याशेयनाह तद्दर्शनेति निरयवर्त्मनिइष्टप्रदेवविरहितमार्गे अतएवदुःखविषयेगृहेवर्ततांवर्तमानानांस्वर्गापवर्गविरमःदुःखासंभिन्नप्रदेशःस्वर्गःकर्मसाध्यप्रदेशःअपवर्गोमोक्षः
तयोर्विरामोयस्मात्सतथा मुक्तेरेवदातेत्यर्थः अपवर्गःक्रियासाध्येफलात्रीत्यागमोक्षयोरिति यद्वा विशेषेणरमणंयस्मात्सतथा ज्ञानादेवस्वर्गोज्ञानादेवापवर्गःइतिश्रुतेःकिमुतसंन्यासेनामितिचशब्दःएवं
विधोविष्णुःस्वयमंशावेशमंतरेणयेषांयुष्माकंगृहेआस्ते यूयंतस्यहरेर्दर्शनंचस्पर्शनंचानुपथश्चानुगमनंचप्रजल्पश्चशय्याचआसनंचभशनंचतानिइमानियस्यसयौवनस्यपिंडस्यदेहस्यसंतिसतथातस्यापि

दमघोषोविशालाक्षोमैथिलोमद्रकैकयाः ॥ युधामन्युःसुशर्माचससुताबाह्लिकादयः ३५ राजानोन्येचराजेंद्रयुधिष्ठिरपुरोगमाः ॥ श्रीनिकेतंवपुःशौरेः
सस्त्रीकावीक्ष्यविस्मिताः ३६ अथतेकृष्णरामाभ्यांसम्यक्प्राप्तसमर्हणाः ॥ प्रशशंसुर्मुदायुक्तास्तुष्टाःकृष्णपरिग्रहान् ३७ अहोभोजपतेयूयंजन्मभाजो
नृणामिह ॥ यत्पश्यथासकृत्कृष्णंदुर्दर्शमपियोगिनाम् ३८ यन्निःसृतंवेदमयंपुनातिपादवनेजनपयस्तुवचश्चशास्त्रम् ॥ भूःकालभर्जितभगापियदंघ्रि
पद्मस्पर्शेद्धशक्तिरभिवर्षतिनोखिलार्थान् ३९तद्दर्शनस्पर्शनानुपथप्रजल्पशय्यासनाशनसयौवनपिंडबंधाः॥येषांगृहेनिरयवर्त्मनिवर्ततांचस्वर्गापवर्गविर
मःस्वयमासविष्णुः ४० नंदस्तत्रयदून्प्राप्तान्श्रुत्वाकृष्णपुरोगमान् ॥ तत्रागमद्वृतोगोपैस्तरसातद्दिदृक्षया ४१ तंदृष्ट्वावृष्णयोहृष्टास्तन्वःप्राणमिवोत्थिताः
॥ परिषस्वजिरेगाढंचिरदर्शनकातराः४२वसुदेवःपरिष्वज्यसंप्रीतःप्रेमविह्वलः ॥ स्मरन्कंसकृतान्क्लेशान्पुत्रन्यासंचगोकुले ४३ कृष्णरामौपरिष्वज्यापित
रावभिवाद्यच ॥ नकिंचनोचतुःप्रेम्णासाश्रुकंठौकुरुद्वह ४४ तावुत्संगंसमारोप्यबाहुभ्यांभरिरम्यच ॥ यशोदाचमहाभागासुतौविजहतुःशुचः ४५
रोहिणीदेवकीचैवपरिष्वज्यव्रजेश्वरीम् ॥ स्मरंत्यौतत्कृतांमैत्रींबाष्पकंठ्यौसमूचतुः ४६ कोविस्मरेतवांमैत्रीमनुवृत्तांव्रजेश्वरि ॥ अथवार्ष्णैद्रमैश्वर्यैय
स्यानेहप्रतिक्रिया ४७ एतावदृष्टपितरौयुवयोःस्मपित्रोःसंप्रीणनाभ्युदयपोषणपालनानि ॥ प्राप्योषतुर्भवतिपक्ष्महयद्वदक्षगोर्न्यस्तावकुत्रचभयौनस
तांपरस्ताद् ४८

डस्यबंधःदृढालिंगनंयेषांतेतथा तस्माज्जन्मसाफल्यंयुष्माकमितिशेषः ४० ४१ ४२ ४३ कृष्णरामयोर्जनमोहनाविडंबंकथयति कृष्णरामाविति ४४ ४५ व्रजेश्वरींयशोदाम् समूचतुःसंभाषणंच
क्रतुः ४६ यस्याः मैत्र्याः वांयुवयोः ४७ एतौकृष्णरामौयुवयोःपित्रोःसमीपेन्यस्तौयुवयोःसंप्रीणनादीनिप्राप्यऊषतुःसंप्रीणनं संप्रीतिःअभ्युदयोजातकाद्यभिवृद्धिकर्म रसायनादिपुष्टिकरणंपो
षणम् कीदृशौअदृष्टपितरौपितशब्दास्पदास्मद्दर्शनमप्राप्तौ सतांपरस्तात्सज्जनेभ्योन्यत्राकुतश्चनभयौकुत्राचित्भययुक्तौनभवतः कुत्रचेत्युक्तंसांक्षेपातिनकारेण सत्सुभययुक्तावित्यर्थः ब्राह्मणादिसज्ज
नवधाद्विभ्यतौ यद्वा बाल्येविडंबनार्थंसज्जनमंतरेणदृष्टेभ्योनाकुत्रचभयौनबिभ्यतावित्यर्थःतत्रदृष्टांतमाह पक्ष्मेति यद्वद्यथासमीपन्यस्तत्वात्पक्ष्मेत्येकवचनंद्विवचनार्थे पक्ष्मणीअक्ष्णोःनेत्रयोः
कुतश्चिद्भयनिवारके तथायुवामितिशेषः ४८

गोप्यश्चिरकालादृष्टंकृष्णमुपलभ्यदृष्ट्वासद्यःदृग्भिः हृदिकृतंअलंपरिरभ्यतद्भावंतस्मिन्योग्यांभक्तिमापुरित्यन्वयः कीदृशंनित्ययुजांनित्यमनोयोगिनामपिदुरापम् दुरापमित्यनेनभक्तेरेवप्राधान्यंसूचयति यागोप्यःयत्प्रेक्षणेतादर्थ्येसप्तमी प्रेक्षणार्थंदृष्टिषुनेत्रेषुपक्ष्मणांकृतंनिमेषलक्षणंकर्मशपंति पक्ष्मकर्तारंविधिंचेत्यनेनभक्त्यातिशयोदर्शितः ४९ ५० स्वानांयदूनामर्थंचिकीर्षवःअभीष्टंकर्तुकामाःअन्यासंगादन्यकार्यासक्तेश्चिरायितान्चिरादनागतान् कृपणेषुचेतोयासांतास्तथा ५१ यथायथावदवबुध्यास्मास्विदमेवविशंकये किंतदितित्राह नूनमिति ५२ एतदेवाविवृणोति वायुरिति ५३ श्रेष्ठवियोगादस्वाकंअनुतापइतित्राह मयीति ५४ ममपरिच्छिन्नत्वेमद्वियोगशंकातदैक्यनास्तिसर्वगतत्वादितिहिशब्दसूचितंहेतुंव्यनक्ति अहंहीति आदिः कारणम् अंतः संहर्ता आद्यंतकालेवर्तमानोवा ननूक्तशंकायाःकःपरिहारइतित्राह अंतरमिति हेअंगनाःयथाखादिभूतानिभौतिकानांघटकविवक्षयैकवचनम् ५५ आत्मनापरमात्मनाततइतिखादीनिततानिजीवस्ततइतियोज्यम् विध्यविध्यभावादौपचारिकोव्यपदेशइतित्राह उभयमिति यत्यदुक्तंशास्त्रीयंअथतस्मादुभयंजीवभूतशब्दवाच्यंतत्त्वंपरेसर्वोत्तमेअक्षरेब्रह्मणिमय्याततामितिपश्यथेत्यन्वयःअनेनेदंश्रद्धेयमितिआयातमितिज्ञायते

गोप्यश्चकृष्णमुपलभ्यचिरादभीष्टंयत्प्रेक्षणेदृशिषुपक्ष्मकृतंशपंति ॥ दृग्भिर्हृदीकृतमलंपरिरभ्यसद्यस्तद्भावमापुरपिनित्ययुजांदुरापम् ४९ भगवांस्तास्तथाभूताविविक्तउपसंगताः ॥ आश्लिष्यानामयंपृष्ट्वाप्रहसन्निदमब्रवीत् ५० अपिस्मरथनःसख्यःस्वानामर्थचिकीर्षवः ॥ गतांश्चिरायितान्यासंगात्कृपणचेतसः ५१ अवबुध्ययथास्मासुइदमेवाविशंकये ॥ नूनंभूतानिभगवान्युनक्तिवियुनक्तिच ५२ वायुर्यथाघनानीकंतृणतूलरजांसिच ॥ संयोज्यक्षिपतेभूयस्तथाभूतानिभूतकृत् ५३ मयिभक्तिर्हिभूतानाममृतत्वायकल्पते ॥ दिष्ट्यासीन्मयिसुस्नेहोभवतीनांमुदावहः ५४ अहंहिसर्वभूतानामादिरंतोंतरंबहिः ॥ भौतिकानांयथाखंवार्भूर्वायुर्ज्योतिरंगनाः ५५ एवमेतानिभूतानिभूतेष्वात्मात्मनाततः ॥ उभयंमय्यथपरेपश्यथाततमक्षरे ५६ श्रीशुकउवाच ॥ अध्यात्मशिक्षयागोप्यएवंकृष्णेनशिक्षिताः ॥ तदनुस्मरणध्वस्तजीवकोशास्तमध्यगुः ५७ नताःस्मतेनाथपदारविंदंयोगेश्वरैर्हृदिविचिंत्यमगाधबोधैः ॥ संसारकूपपतितोत्तरणावलंबंगेहंजुषामपिमनस्युदियात्सदानः ५८ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्द्धेसप्ततितमोऽध्यायः ॥ ७० ॥ श्रीशुकउवाच ॥ तथानुगृह्यभगवान्गोपीनांसगुरुर्गतिः ॥ युधिष्ठिरमथापृच्छत्सर्वोश्चसुहृदोव्ययम् १

५६ स्त्रीणामयंउपदेशोघटपृष्ठसालिलासेकवद्व्यर्थइतित्राह अध्यात्मेति देहमधिकृत्यवर्तमानानांपरमात्मादित्वानांशिक्षयोपदेशलक्षणयाशिक्षिताः विद्योपादानंकारिताः तदनुस्मरणेनतत्स्यकृष्णस्यनिरंतरोपासनयाजातज्ञानाग्निनाध्वस्तोदग्धःजीवकोशःलिंगशरीराभिमानोयासांतास्तथा तम् कृष्णमध्यगुःतंज्ञातवत्यः ५७ ज्ञातकृष्णतत्वाइदंजगुरित्याह नताःस्मेतिअसभुवीत्यस्याशिषिप्रयोगः नताभवामेतिप्रार्थयामहे जन्मांतरेपित्वत्पादाब्जनमनमाशास्महइत्यर्थः ननुकिमस्यमाहात्म्यंयेनतन्मनमर्थनीयमितित्राह योगेश्वरैरिति यत्याश्रमिवत्ज्ञानदुर्बलानेत्याह अगाधेति किमर्थंविचिंत्यमितिहेतुगर्भविशेषणमाह संसारेति संसारकूपपतितानांअस्मादुत्तरणावलंबंऊर्ध्वगमनलक्षणाधिश्रेणिहस्ताधारं किंच गेहंजुषांगेहाख्यदेहपोषणनिरतानामपिनोमनसिसदोदियान्निरंतरमुदेतु त्वत्स्वरूपमितिशेषः ॥ ५८ ॥ इतिश्रीभागवतेमहा०दशमस्कंधेउत्त०वि०टीकायांसप्ततितमोऽध्यायः ॥ ७० ॥ श्रोत्रादीनांभक्त्यतिशयजननायाविस्मरणायातीताध्यायेषुउक्तंकृष्ण[illegible]

तस्यहरेः पादक्षयाचरणानिरीक्षणेनहतांहसः निर्मूलपापाः २ किंविधांकथामूचुरित्यत तत्राह कुतइति तज्जनाः कर्णपुटैः महन्मनस्तोमुखान्निःसृतंकचित्कस्मिंश्चित्प्रसंगेपिअलंपिबंतिअलंबुद्धिराहित्येनसेवंते तेषामशिवः अशुभः पंथाः कुतः स्यादित्यन्वयः कीदृशोशिवमार्गइतितत्राह देहंभृतइति देहंभृतः उदरंभराः तत्कृतमशिवमार्गप्राप्तंव्यसनंप्रेक्ष्यउच्छ्वसंतिदीर्घंश्वसंति यद्वा येदेहभृतः शरीरिणः कर्णपुटैः त्वच्चरणांबुजासवंपिबंति तत्तस्यतवकृतंचरितमुच्छ्वसंतिलोकेउपदिश्यविकासयंतिविस्तारयंतितेषामशिवः कुतइति ३ ननुनारायणचरणकमलामृतपायिनामर्मंगलंनास्तीत्यनेनान्येषामस्तीत्यापाततश्रभवंतः केइतितत्राह तंत्वेति तंत्वानताः स्मइत्यन्वयः यस्यपादाब्जसुधापायिनामंगलं नास्तितं अस्यदेवदत्तवदन्यापीनत्वेकिमेतत्रमनफलमित्यत्राहुः आत्मधामआत्मैवधामगृहलक्षणंआश्रयोयस्यसतथातं स्वाश्रयमित्यर्थः स्वाश्रयत्वंचेतोपिमहतादेवाद्यन्यतमेनानियतेनकिन्नस्या दत्राहुः विदुर्धेति विदुषानामात्मागतिः स्वभावगमकंस्वामिनमाश्रयंवा स्वभावगमकत्वंकथमत्राहुः व्यवस्थमिति तिस्रोवस्थाजाग्रदाद्यायस्मात्सतथातं अनेनदेवानांजाग्रल्लक्षणानिर्निमिषस्वभावं दैत्यानांसुप्तिलक्षणाज्ञानस्वभावंमनुष्याणांस्वप्नलक्षणमिश्रज्ञानस्वभावंगमयतीतिज्ञातव्यं नन्ववस्थात्रयनिपंतृत्वेतत्कृतंश्रमलक्षणंदुःखमनिवारितमापतेदेवदत्तवदत्राहुः आनंदेति आनंदानांसंप्लवोम

तएवंलोकनाथेनपरिपृच्छ्यसुसत्कृताः ॥ प्रत्यूचुर्हृष्टमनसस्तत्पादेक्षाहतांहसः २ कुतोशिवस्त्वच्चरणांबुजासवंमहन्मनस्तोमुखनिःसृतंक्वचित् ॥ पिबंतियेकर्णपुटैरलंप्रभोदेहंभृतस्तत्कृतमुच्छ्वसंतिहि ३ तंत्वात्मधामविदुषात्मगतिंव्यवस्थमानंदसंप्लवमखंडविकुंठबोधम् ॥ कालोपसृष्टनिगमावपनात्त योगमायाकृतिंपरमहंसगतिंनताःस्म ४ इत्युत्तमश्लोकशिखामणिजनेष्वभिष्टुवत्स्वच्युतकौरवस्त्रियः ॥ समेत्यगोविंदकथांमिथोऽगृणन्नृलोकगीतांशृणु वर्णयामिते ५ द्रौपद्युवाच ॥ हेवैदर्भ्यच्युतोभद्रेहेजांबवतिकौशले ॥ हेसत्यभामेकालिंदिशैब्येरोहिणिलक्ष्मणे ६ हेकृष्णपत्न्यएतन्नोब्रूतवोभगवान्स्वयम् ॥ उपयेमेयथालोकमनुकुर्वन्स्वमायया ७ रुक्मिण्युवाच ॥ चैद्यायमार्ऽपयितुमुद्यतकार्मुकेषुराजस्वशेषभटशेखरितांघ्रिरेणुः ॥ निन्येमृगेंद्रइवभागमजावियूथात्तच्छ्रीनिकेतचरणाब्जसमर्चनाय ८॥ सत्यभामोवाच ॥ योमेसनाभिवधतप्तहृदातनेनलिप्साभिशापमपमार्ष्टुमुपाजहार ॥ जित्वर्क्षराजमथरत्नमदात्सतेननीतच्छिदादिशतमांप्रभवेपिदत्ताम् ९

हौघोयस्मिन्सतथातंपूर्णानंदमित्यर्थः नन्वनुभवलक्षणसाधनाभावात्पाषाणानामपिपूर्णानंदःकिंनस्यादत्राहुःअखंडेतिअखंडःनिरंतरःअविकुंठःविभ्रिश्रः बोधोयस्यसतथातंस्वामिन्निष्कल्मषज्ञानमित्यर्थः नन्वेवंविधस्यजननंकिमर्थमत्राहुः कालेति कालेनगुणेनोपसृष्टउत्सन्नोनिगमोवेदादिशास्त्रनिचयस्तस्यावपनायपुनरभिव्यक्तिलक्षणांकुरीकरणायात्तांगीकृतायोगमायाकृतिःस्वरूपभूतेच्छया देहोयेनसतथातं आकारोदेहआकृतिरितियादवः उक्तार्थसर्वस्वेकिंप्रमाणमत्राहुः परमेति परमहंसानांवेदांतैकनिष्ठानांसंन्यासिनांगतिर्ज्ञानंयस्मिन्सतथातं भगवत्स्वरूपविषयंपरमहंसज्ञानप्रमाणमितरेषामित्यर्थः ४ अच्युतस्यकौरवाणांचस्त्रियःसमेत्यएकत्रमिलित्वायांकथामगृणन्तांवर्णयामित्वंशृणु ५ प्रश्नप्रतिवचनपूर्वकांशृण्विति नगानवदन्नेतिविवेकायाह द्रौपदीति हेषोडशसहस्रकृष्णपत्न्यःपृथङ्नामग्रहणंबाहुल्यान्नकृतं स्वेच्छयालोकमज्जनमनुकुर्वन्अच्युतोभगवान्स्वयंवोयुष्मान्यथायेनविधिनाउपयेमेतंविधिमस्माकं ब्रूतेत्यन्वयः ६ ७ राजसुजरासंधादिषुमांमांअशेषभटानामित्युपलक्षणं राज्ञांशेखरितःमूर्द्धसुशेखरइवअंघ्रिरेणुर्येनसतथा भागंतदर्थत्वेनक्लृप्तांशं नग्राम्यभोगेच्छपेत्यत्राह श्रीनिकेतेति श्रीत्यनेनतद्भागंसूचयति अजानामवीनांयथा ८ सनाभेःसहोदरस्यप्रसेननाम्नोवधेनतप्तहृदासंतप्तहृदयेन मेतवेनतातेनपित्राऽलिप्साभिशापंकथितामिथ्यादोषंअपमार्ष्टुंपरिहर्तुंऋक्ष राजानंजांबवंतंजित्वारत्नमुपाजहार अथतेनकृष्णेनभगवतानीत

च्छित्प्राप्तभेदलक्षणापराधःसमेपितामां प्रभवेकर्तुमकर्तुमन्यथाकर्तुंसमर्थायआदिशतदत्तवान्रत्वंचादात् कीदृशीमामन्यस्मैवाचादत्तामपि यद्वा ऋक्षराजंजित्वारत्नमाहरत् आहृत्यचतद्रत्नंमत्रित्रेअदात्ते नरत्नेनसहभगवतानीतच्छित्सपितातस्मैप्रभवेआदिशतेत्यन्यत्समं ९ देहविकृतिंपरिमाणतोवर्णतश्चविलक्षणदेहंकृष्णंप्रत्यक्षदृष्ट्याआज्ञायसम्यक्ज्ञात्वाअनेनश्रीकृष्णेनत्रिनवाहानिसप्तविंशतिदिनान्य भियुध्यएनंकृष्णंनिजनाथदैवंस्वकुलस्वामिदेवताभूतंसीतापतिंपुनर्ज्ञात्वामेपिताजांबवान्अवधीरणंअवज्ञानमर्हंगंअपराधपरिहारयोग्यंपूजासाधनंमांमणिनासहपादौप्रगृह्योपाहरत्कृष्णायेतिशेषः यद्वा अवधिरवधानंनिश्चयज्ञानंयत्तस्येरणंप्रेरणंयेनसोवधीरणःदशरथपुत्रोवतीर्णोयमितिविशिष्टज्ञानजनकइत्यर्थः तं पराजितइतिवापाठः अज्ञायेतिच त्वममुष्याधुनाकीदृशीत्यत्राह अहमिति अपिमाषंमषं कुर्याच्छंदोभंगंनकारयेदितिवचनात्त्रिनवहानीति यद्वोत्तराकारगुणस्तैर्ज्ञास्यकल्पतोगुणइत्यनेनपूर्वपरस्थानयोःगुणादेशेनरूपंसिद्धंभवति १० याहमिदानीं तद्गृहमार्जनीतांमांस्वपादस्पर्शकाम्यया तपश्चरंतींविज्ञायसख्यार्जुनेनसहोपेत्यममपाणिमग्रहीत् याकृष्णदेवताममपाणिमग्रहीत्अहंतद्गृहमार्जनीतिवा यायइतिव्यत्ययेनान्वयोवा ११ यःकृष्णःद्विपारिःसिंहःश्वयूथंविजित्यात्मनेरूपंबलि

जांबवत्युवाच ॥ आज्ञायदेहविकृतिंनिजनाथदैवंसीतापतिंत्रिनवहान्यमुनाभियुध्य ॥ ज्ञात्वावधीरणमुपाहरदर्हणंमांपादौप्रगृह्यमणिनाहममुष्यदासी १० कालिंद्युवाच ॥ तपश्चरंतीमाज्ञायस्वपादस्पर्शकाम्यया ॥ सख्योपेत्याग्रहीत्पाणिंयाहंतद्गृहमार्ज्जनी ११ मित्रविंदोवाच ॥ योमांस्वयंवरमु पेत्यविजित्यभूपान्त्रिन्येश्वयूथमिवचात्मबलिंद्विपारिः ॥ भ्रातृंश्चमेऽपकुरुतःस्वपुरंश्रियोगात्तस्यास्तुमेनुभवमंघ्र्यवनेजनांभः १२ नीलोवाच ॥ सप्तो क्षणोतिबलवीर्यसुतीक्ष्णशृंगान्पित्राकृतान्क्षितिपवीर्यपरीक्षणाय ॥ तान्वीरदुर्मदहनस्तरसानिगृह्यक्रीडन्बबंधहयथाशिशवोऽजतोकान् १३ यइत्थंवी र्यशुल्कांमांदासीभिश्चतुरंगिणीम् ॥ पथिनिर्जित्यराजन्यान्त्रिन्येतद्दास्यमस्तुमे १४ भद्रोवाच ॥ पितामेमातुलेयायस्वयमाहूयदत्तवान् ॥ कृष्णेकृ ष्णायतच्चित्तामक्षौहिण्यासखीजनैः १५ तस्यमेपादसंस्पर्शोभवेज्जन्मनिजन्मनि ॥ कर्मभिर्भ्राम्यमाणायायेनतच्छ्रेयआत्मनः १६ लक्ष्मणोवाच ॥ ममापिराज्यच्युतजन्मकर्मचश्रुत्वासुहुर्नारदगीतमासह ॥ चित्तंमुकुंदेकिलपद्महस्तयावृतःस्वयंयस्तुविहायलोकपान् १७ ज्ञात्वाममममतंसाध्विपिता दुहितृवत्सलः ॥ बृहत्सेनइतिख्यातस्तत्रोपायमचीकरत् १८

मुपहारमिव स्वयंवरेभूपानुपेत्यविजित्यभ्रातॄन्अपकुरुतोऽपकुर्वतःसतःमांनिन्येस्वपुरंचागात् अनुभवंजन्मनिजन्मनिममतस्यहेररंघ्यवनेजनांभोस्त्वित्यन्वयः अपकरणेहेतुःश्रियइति संपदोहेतोः श्रीःपद्मायांकांतिसंपदोरिति तस्याअंशंमामितिवा १२ अत्यधिकेबलवीर्येसुतिक्ष्णानिशृंगाणिचयेषांतेतथातान् बलशक्तिवीर्यविक्रमदुर्मदान्घ्नंतीतिदुर्मदहनःअजतोकान्छागशिशून् १३ ततःकिमकारीतितत्राह यइति दासीभिःसहमांनिन्ये १४ हेकृष्णेद्रौपदि १५ येनपादस्पर्शेनात्मनोमेतच्छ्रेयः स्यात् सपादस्पर्शोभवेत् १६ हेराज्ञिद्रौपदि यस्तुलोकपालिंद्रादीन्विहायपद्महस्तया स्वयंवृतः तस्मिन्मुकुंदेममचित्तमासेत्यन्वयः १७ द्रौपदीस्वयंवरेद्रौपद्याः पार्थवरेच्छयामत्स्यः कृतो यथातथामेपितातत्रोपायमचीकरत् १८ इदमुपायमतोविशिनष्टि अयंत्विति तुशब्देनान्याशक्यं दर्शयति अयंमत्स्योदीर्घस्थूणशिखरेऽवलंबितोबहिराच्छन्नः व्यवहितसर्वांगः अदर्शनाद्वेधोऽसुकरइतितत्राह दृश्यतइति समत्स्यः परंकेवलंजलेदृश्यतेवेणुनालनिर्गतच्छाययाजलेप्रतिबिंबितत्वेनच क्षुर्विषयइत्यर्थः तदनेनाधोमुखेनजलेछायामवलोक्यवेद्धव्यइतिपार्थकृतलक्षवेधादधिकासुकरमितिज्ञायते १९

उपाध्यायाआचार्याः पुरोहितावा २० हेपार्थेति सिद्धेकार्येभोगार्थमपिधिपोपेपांतेमाद्धिपः २१ व्यसृजन्मुक्तवंतः आकोटचांधनुरग्रपर्यंतं २२ तस्यमत्स्यस्यस्वरूपावस्थितिंनाविंदन्नज्ञातवंतः २३ मत्स्याभासंमत्स्याकारं यत्तोऽभयेनबाणानसृजत्नाच्छिनच्च तर्हींकंकृतमत्राह पस्पृशइति २४ २५ अभिजितिदिनमध्यमुहूर्तेसति २६ भुविजयशब्दोऽपततत्व्याप्तोभूत् २७ दिशइतिलक्षणयादिक्षुस्थितान्नृपान्भ्रमयतीकामविकारसूचकनानाचेष्टाकुलान्कारयंती तद्रंगंतत्स्वयंवरस्थलं चलेनपादविक्षेपेणपेशलाभ्यांसुंदराभ्यां वृत्तेस्वरूपेस्वेतरवस्तु

यथास्वयंवरेराज्ञिमत्स्यःपार्थेच्छयाकृतः ॥ अयंतुबहिराच्छन्नोदृश्यतेसजलेपरम् १९ श्रुत्वैतत्सर्वतोभूपाआययुर्मत्पितुःपुरम् ॥ सर्वास्त्रशस्त्रतत्त्वज्ञाः सोपाध्यायाःसहस्रशः २० पित्रासंपूजिताःसर्वेयथावीर्ययथावयः ॥ आददुःसशरंचापंवेद्धुंपार्थतिमाद्धियः २१ आदायव्यसृजन्केचित्सज्जीकर्तुमनीश्वराः ॥ आकोटचांज्यांसमाकृष्यपेतुरेकेमुनाहताः २२ सज्यंकृत्वापरेवीराःप्राग्ज्योतिमगवेश्वरौ ॥ भीमोदुर्योधनःकर्णोनाविंदंस्तदवस्थितिम् २३ मत्स्याभासंजलेदृष्ट्वाज्ञात्वाचतदवस्थितिम् ॥ पार्थोयत्तोसृजद्बाणान्नाच्छिनत्पस्पृशेपरम् २४ राजन्येषुनिवृत्तेषुभग्नमानेषुमानिषु ॥ भगवान्धनुरादायसज्यंकृत्वाऽथलीलया २५ तस्मिन्संधायविशिखंमत्स्यंवीक्ष्यसकृज्जले ॥ छिन्नेषुणाऽपातयत्तंसूर्येचाभिजितिस्थिते २६ दिविदुंदुभयोनेदुर्जयशब्दोपतद्भुवि ॥ देवाश्चकुसुमासारान्मुमुचुर्हर्षविह्वलाः २७ तद्रंगमाविशमहंकलनूपुराभ्यांपद्भ्यांदिशोभ्रमयतीचलपेशलाभ्याम् ॥ वृत्तेपिधायपरिधायचकौशिकाग्र्येसव्रीडहासवदनाकबरीधृतस्रक् २८ उन्नीयवक्त्रमुरुकुंडलकुंतलत्विड्गंडस्थलंशिशिरहासकटाक्षमोक्षम् ॥ राज्ञोनिरीक्ष्यपरितःशनकैर्मुरारेरंसेनुरक्तहृदयाविदधेस्वमालाम् २९ ततोमृदंगपटहाःशंखभेर्यानकादयः ॥ निनेदुर्नटनर्तक्योननृतुर्गायकाजगुः ३० एवंवृतेभगवतिमायेशेनृपयूथपाः ॥ नसेहिरेयाज्ञसेनिस्पर्धिनोहृच्छयातुराः ३१ मांरथंससमारोप्यलसद्वयचतुष्टयम् ॥ शार्ङ्गमुद्यम्यसनद्धस्तस्थावीशश्चतुर्भुजः ३२ दारुकश्चोदयामासकांचनोपस्करंरथम् ॥ मिषतांद्विषतांराज्ञिवृकाणांमृगराडिव ३३ तेत्वसज्जंतराजन्यानिषेद्धुंपथिकेचन ॥ संयत्ताउद्धृतेष्वासाग्रामसिंहा यथाहरिम् ३४ तेशार्ङ्गच्युतबाणौघैर्नुन्नबाह्वंघ्रिकंधराः ॥ निपेतुःप्रधनेकेचिदेकेसंत्यज्यदुद्रुवुः ३५ ततःपुरींपतिजयभूत्यलंकृतांरविच्छदध्वजपटचित्रतोरणाम् ॥ कुशस्थलींदिविभुविचाभिसंस्तुतांतदासमाविशत्तरणिरिवस्वकेतनम् ३६ पितामेपूजयामाससुहृत्संबंधिबांधवान् ॥ महार्हवासोलंकारैः शय्यासनपरिच्छदैः ३७ दासीभिःसर्वसंपद्भिर्भटेभरथवाजिभिः ॥ आयुधानिमहार्हाणिददौपूर्णस्यभक्तितः ३८

भ्योव्यावृत्तरूपे कौशिकाग्र्येकृमिकोशोत्पन्नतंतुकृतवस्त्रश्रेष्ठे पद्भावृत्तेजघनेपरिधाय वृत्तेपीनेस्तनद्वयेपिधायवा कबर्यांधृतास्रक्मालायस्याःसातथा २८ शिशिरवत्तुषारवद्धवलोहासःस्निग्धोवा २९ ३० हेयाज्ञसेनिद्रौपदि ३१ ईशःशिवोनेत्याह चतुर्भुजइति ३२ ३३ ग्रामसिंहाःसारमेयाःहरिंसिंहम् ३४ नुन्नाःछिन्नाःबाहवश्चांघ्रयश्चकंधराश्चयेषांतेतथा प्रधनेयुद्धे ३५ पत्युःस्वामिनःकृष्णस्य जयभूत्याजयश्रियाअलंकृतां यथाजयलक्ष्मीरुत्कृष्टातथालंकृतांवा रविच्छदध्वजपटाश्चचित्रतोरणाश्चयस्यांसातथातां रविंछादयंतीतिरविच्छदाःआतपप्रतिषेधकाःचित्रानानावर्णास्तोरणाः स्वकेतनं आत्मीयोदयशिखरिशिखरम् ३६ ३७ पूर्णस्यअन्यपालकरहितस्य ३८

दासित्वंचतपआदिपुण्यनिचयेनप्राप्तमितिज्ञापनायोक्तं सर्वेति अद्धायथार्थभूतया अद्धाप्रत्यक्षसत्ययोरिति ३९ षोडशसहस्रस्त्रियःस्वविवाहप्रकारंकथयंति भौममिति यःकृष्णःक्षितिजयेभूमंडलविज
येराज्ञोनिर्मथ्यहृतराजकन्याःज्ञात्वासगणंभौमंनिहत्यतेननरकेणरुद्धाःनिरोधलक्षणसंसृतेर्मोक्षंस्मरंतीर्नोस्मान्पादांबुजंपरिनिनाययसमीपंप्रापयामास पादांबुजंसेवयितुमूढवान्वा नकामुकबुद्ध्या कुतः आ
प्तकामः ४० वयमपिभगवत्पादरजःसेवामंतरेणनान्यदैश्वर्यपदमाशास्महेइत्याहुः नवयमिति साम्राज्यमुत्तरदेशराज्यं स्वाराज्यं पूर्वदेशराज्यं भौज्यंदक्षिणदेशराज्यं वैराज्यंपश्चिमदेशराज्यं पारमे
ष्ठ्यंचक्रवर्तिपदं आनंत्यंसर्वदेशाधिपत्यंवा हरेःपदंइंद्रपदंवासाम्राज्यंचक्रवर्तिपदं स्वाराज्यंस्वर्गराज्यंभौज्यमंतरिक्षराज्यं वैराज्यंपातालराज्यं अणिमादिराज्यंवा पारमेष्ठ्यंब्रह्मपदं आनंत्यंमोक्षंवा
नकामयामहेकिंतुगदाभृतोहरेःपदंकामयामहे ४१ किमर्थमत्राह एतस्योति एतस्यगदाभृतःश्रीमत्पादरजःमूर्ध्निवोढुं कीदृशांश्रियोलक्ष्म्याःकुचलिप्तकुंकुमरजोगंधाढ्यम् ४२ व्रजस्त्रियः

आत्मारामस्यतस्येमावयंवैगृहदासिकाः ॥ सर्वसंगनिवृत्त्याद्धातपसाचबभूविम ३९ महिष्यऊचुः ॥ भौमंनिहत्यसगणंयुधितेनरुद्धाज्ञात्वाथनःक्षिति
जयेहृतराजकन्याः ॥ निर्मथ्यसंसृतिविमोक्षमपिस्मरंतीःपादांबुजंपरिनिनाययआप्तकामः४० नवयंसाध्विसाम्राज्यंस्वाराज्यंभौज्यमप्युत ॥ वैराज्यंपारमे
ष्ठ्यंवाआनंत्यंवाहरेःपदम् ४१ कामयामहएतस्यश्रीमत्पादरजःश्रियः ॥ कुचकुंकुमगंधाढ्यंमूर्ध्नावोढुंगदाभृतः ४२ व्रजस्त्रियोयद्वांछंतिपुलिंद्यस्तृणवीरु
धः ॥ गावश्चारयतोगोपैःपादस्पर्शंमहात्मनः ४३ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्द्धेएकसप्ततितमोध्यायः७१॥श्रीशुकउवाच॥श्रुत्वापृथासु
बलपुत्र्यथयाज्ञसेनीमाधव्यइत्थमनुयाःपरमप्रतीताः ॥ कृष्णेखिलात्मनिहरौप्रणयानुबंधंसर्वाविसिस्म्युरलमश्रुकलाकुलाक्ष्यः १ इतिसंभाष्यमाणा
सुस्त्रीभिःस्त्रीषुनृभिर्नृषु ॥ आययुर्मुनयस्तत्रकृष्णरामदिदृक्षया २ द्वैपायनोनारदश्चच्यवनोदेवलोसितः ॥ विश्वामित्रःशतानंदोभारद्वाजोथगौतमः ३
रामःसशिष्योभगवान्वसिष्ठोगालवोभृगुः ॥ पुलस्त्यःकश्यपोत्रिश्चमार्कंडेयोबृहस्पतिः ४ द्वितस्त्रितश्चैकतश्चब्रह्मपुत्रस्तथांगिराः ॥ अगस्त्योयाज्ञव
ल्क्यश्चवामदेवादयोपरे ५ तान्दृष्ट्वासहसोत्थायप्रागासीनान्नृपादयः ॥ पांडवाःकृष्णरामौचप्रणेमुर्लोकवंदितान् ६ तानानर्चुर्यथासर्वेसहरामोच्युतो
र्चयत् ॥ स्वागतासनपाद्यार्घमाल्यधूपानुलेपनैः ७ उवाचसुखमासीनान्भगवान्धर्मगुप्तनुः ॥ सदसस्तस्यमहतोयतवाचोनुशृण्वतः ८ श्रीभगवानु
वाच ॥ अहोवयंजन्मभृतोलब्धकात्स्न्र्येनतत्फलम् ॥ देवानामपिदुष्प्रापंयद्योगेश्वरदर्शनम् ९ किंस्वल्पतपसांनृणामर्चायांदेवचक्षुषाम् दर्शनस्पर्श
नप्रश्नप्रह्वपादार्चनादिकम् १०

यत्पादरजोवांछंति नकेवलंव्रजस्त्रियएववांछंतिपुलिंद्यादयोपीत्याहुःपुलिंद्यइति गावःगाः ४३ इतिश्रीभागवतेमहा०दशमस्कंधेउत्तरार्धेविज०टीकायांएकसप्ततितमोध्यायः ७१॥७॥ हरेर्ज्ञानिप्रियत्वं
यज्ञस्यतदेकविषयत्वंतत्प्रीतेर्मुक्तिसाधनत्वंपुत्रमित्रादिस्नेहस्यसंसारमूलत्वमित्यादिकमध्यायद्वयेकथयति तत्रव्यासादिमुनीनांआगमनंवक्तुंपृथादिस्त्रीणांसंतोषोद्रेकंकथयति पृथेत्यादिना यामाधव्यः
माधवपत्न्यःतासांकृष्णेप्रणयानुबंधंदृष्ट्वेतिशेषः विसिस्म्युःविस्मिताःअभवन्नित्यन्वयः सत्यादीनांभक्तिप्रवाहंदृष्ट्वावा १ इदानीमृषीणामागमनप्रकारंवक्ति इतीति २ ३ ४ द्वितस्त्रितैकताःसहोदराः
त्रितःकूपेवहितोदेवान्हवतऊतयइतिश्रुतेः ५ प्रागुत्थायाथानर्चुः नमनादिनेतिशेषः ६ ७ धर्मगुप्धर्मगोपत्रीतनुर्यस्यसतथा ८ तत्फलंजन्मफलं ९ नृणांयुष्मद्दर्शनादिकंदुष्प्रापमितिकिंवक्तव्य
मित्याह स्वल्पेति अर्चायामितिसप्तमीप्रथमार्थे अर्चाप्रतिमैवदेवइति चक्षुर्दर्शनंयेषांतेतथा अर्चापूजाप्रतिष्ठयोरिति १०

ननुबहिर्मुखानांनृणांतीर्थादिदर्शनादेर्जन्मनःसाफल्यंस्यात्किंसाधुदर्शनादिनेतित्राह तइति तत्रसन्निहितास्तेदेवाअप्युरुकालेनकालक्षपकत्वेवपुनात नतुतदानामव तत्राकारणमत्यस्यदर्शनं कलनमेवकालःज्ञानंतावदंतःकलज्ञानइतिधातुः उरुणागुरुणोपदिष्टज्ञानेनतत्स्वरूपंतन्मंत्रतदंगाचरणादिकंज्ञात्वा समुपास्यतदर्शनंप्राप्यतत्प्रसादेनाघक्षयइत्यतोगुरूपदेशःकारणमित्यर्थः प्रकृतेकि मनेनेत्यत्राह दर्शनादिति साधवःस्वदर्शनादन्यथाज्ञानमपगमयंति एवशब्दःगुरूपदेशंव्यवच्छिनत्ति ११ नन्ववद्यनिमित्तमन्यथाज्ञानंजापतेतत्राभ्यादयःस्व दर्शनादघंक्षपयित्वाऽन्यथाज्ञानंनाशयंति ततोजन्मसाफल्यमितितत्राह नेति कस्याघंनहरंतीत्यतउक्तं भेदकृतःअन्यथाज्ञानिनःपुंसःदाहकत्वादिशक्तिदर्शनादयमेवाग्निशब्दप्रवृत्तिहेतुरित्यन्यथाज्ञानंबहिर्मुखानांजायते मनःमनोभिमानीदेवः मनोब्रह्मेत्युपास्तेतिश्रुतिः एवकारेणकियत्कालोव्यवच्छिन्नइतितत्राह मुहूर्तेति अत्रप्रतीतार्थमपहायतत्रसन्निहितदेवताकल्पनंनिष्प्रमाणकामित्यादिशंका प्राकृतैर्दृश्यमानंतुनद्रवंतीर्थमुच्यतेइत्यादि नापरिहर्तव्या भेदस्यान्यथाज्ञानत्वंचभिन्नस्याभेदतोदृष्टिरितिप्रमाणसिद्धं नन्विषंव्यवस्थाकृतःऋष्यादिभ्योदेवानांउत्तमत्वादित्यतः उत्तमाअपिदेवेशाअवरान्विदुषोनृणां पूजायैसंप्रयच्छंतिपरोक्ष त्वप्रियायतइत्यादेः १२ इतोपिविद्वज्जनपूजानृभिःकार्यत्याशयेनाह यस्येति यस्यपुरुषस्यत्रिधातुकेप्राधान्यात्पृथिव्यप्तेजःकृतेवातपित्तश्लेष्माकुलेवा कृमिविशेषवदचेतनदेहेआत्मबुद्धिःअहमितिज्ञानं

नह्यम्मयानितीर्थानिनदेवामृच्छिलामयाः ॥ तेपुनंत्युरुकालेनदर्शनादेवसाधवः ११ नाग्निर्नसूर्योनचचंद्रतारकंनभूर्जलंखंश्वसनोथवाङ्मनः ॥ उपा
सिताभेदकृतोहरंत्यघंविपश्चितोघ्नंतिमुहूर्तसेवया १२ यस्यात्मबुद्धिःकुणपेत्रिधातुकेस्वधीःकलत्रादिषुभौमइज्यधीः ॥ यत्तीर्थबुद्धिश्चजलेनकर्हिचिज्जने
ष्वभिज्ञेषुसएवगोखरः १३ श्रीशुकउवाच ॥ निशम्येत्थंभगवतःकृष्णस्याकुंठमेधसः ॥ वचोदुरन्वयंविप्रास्तूष्णीमासन्भ्रमद्धियः १४ चिरंविमृ
श्यमुनयइश्वरस्येशितव्यताम् ॥ जनसंग्रहइत्यूचुःस्मयंतस्तंजगद्गुरुम् १५ ऋषयऊचुः ॥ यन्माययातत्त्वविदुत्तमावयंविमोहिताविश्वसृजामधीश्वरम् ॥
यदीशितव्यायतिगूढईहयाअहोविचित्रंभगवद्विचेष्टितम् १६ अनीहएतद्बहुधैकआत्मनासृजत्यवत्यत्तिनबध्यतेयथा ॥ भौमैर्हिभूमिर्बहुनामरूपिणीअ
होविभूम्नश्चरितंविडंबनम् १७

देहोहमित्यन्यथाज्ञानमित्यर्थः यस्य चकलत्रादिषुअसद्भार्यादिषुस्वधीः मदीयाएतेअहमेषांभर्तानान्यइतिस्वकीयत्वबुद्धिः विषयभोगलौल्यंतत्रनिमित्तं यस्यभौमेभूविकारेशिलादौइज्यधीःपूज्यबुद्धिः यच्चस्यजलेद्रवरूपेतीर्थबुद्धिःअघक्षयबुद्धिः यस्याभिज्ञेषुशास्त्रतत्त्वज्ञेषुकर्हिचिदापिनपूज्यत्वबुद्धिःसगोखरःगविपृथिव्यांगर्दभःनापरः गोस्पर्शनादिनाशुद्धिःस्यादितिगौश्चासौखरश्चेतिविग्रहोनसंगच्छतइ त्युक्तएवार्थः १३ अकुंठमेधसःअप्रतिहतज्ञानस्य दुरन्वयंअन्वेतुमशक्यंदुर्ज्ञेयमित्यर्थः भ्रमंतीअनवस्थाधीर्येषांतेतथा १४ मुनयःकिमकुर्वन्पुनरितितत्राह चिरमिति ईश्वरस्यजगन्नियंतुरीशितव्य तांविद्वज्जनान्प्रतिदास्यभावंचिरंविमृश्यअयंजनसंग्रहःउन्मार्गेप्रवृत्तिरिवाचारलक्षणइतिमत्वातंजगद्गुरुमूचुरित्यन्वयः १५ अहोहरेर्विडंबनमितिकुतूहलादुत्पन्नमंदस्मितंकुर्वतःकिंस्वाश्रमगमनमुतबाल कथामाहोस्वित्तत्त्वविषयंकिंचिदूचुरित्याशंक्यतत्त्वविषयमेवेत्याह यन्मायेति तत्त्वविदुत्तमावयंयस्यमायया विमोहिताः सभवानीहयालोकचेष्टयागूढःईशितव्यायतिअनीशवदाचरतीति यस्मादहोभ गवतोविचेष्टितंविचित्रं लोहितादिडाज्म्यःक्यषितिक्यषप्रत्ययः १६ चेष्टायामतकर्यत्वमुपपादयति अनीहइति आत्मनापरप्रेरणामंतरेण यथाभूमिःभौमैःस्वविकृतैःपदार्थैर्बहुनामरूपिणीकार्यरूपे णबध्यतेयथा तथाभवान्नबध्यतइत्यन्वयः योभवाननीहः कूटस्थएतज्जगद्बहुधासृजत्यवत्यत्तीति तस्मादहोविभूम्नश्चरितं कीदृशंविडंबयतीतिविडंबनम् १७

यद्यपिलोकविडंबनशक्तयामोहयसि तथापि कालसञ्जनोपप्लवसमयेवेदपथंचाबिभर्षि वर्णाश्रमात्मावर्णाश्रमास्थापनाचार्यः १८ यतोवेदमार्गप्रणेतावतस्त्वंतवब्राह्मणकुलंशुक्लत्वंचकस्मादित्यत्राह यत्रेति यत्रब्राह्मणकुलेअव्यक्तंपरंब्रह्ममुव्यक्तंव्यवधानमंतरेणउपलब्धंदृष्टंयत्तस्मात्शास्त्रयोनेःवेदप्रतिपाद्यस्यात्मनस्तवसद्धामप्रशस्तंस्थानंयतःसंभावयति यत्तस्माद्भवान्ब्रह्मण्यगुणः ब्राह्मणप्रियत्वगुणलक्षणशिखामणिः १९ २० नकेवलंजन्मनएवसाफल्यमासीत् किंतुविद्यादेरपीति तत्रानिमित्तत्वयासंगम्येति त्वंनःत्वत्संगत्याश्रेयसांसकाशात्परःपुरुषार्थइतियत् २१ २२ एकस्त्वमेवारामःक्रीडावनंयेषांतेतथा २३ अघौघंमर्षयतिनाशयतीत्यघौघमर्षतादृशस्यतीर्थस्यगंगाशब्दवाच्यस्यास्पदंस्थिराश्रयंसुष्ठुविपक्काःपरिपाकंप्राप्ताःयोगाध्यानलक्षणाःतैःउत्सिक्तया उद्रिक्तयाभक्त्याउपहृतःसम्यगुन्मूलितआशयःस्थानंयस्यसतथा सजीवकोशःजीवाख्यसन्निधानस्थानीयंलिंगशरीरंयेषांतेतदुत्सिक्तभक्त्युन्मूलितस्थानलिंगशरीराःभवतोगतिंस्थानंवैकुंठलक्षणम् २४ २५ उपसंगृह्यअनुज्ञामितिशेषः बभाषइदंव्यत्ययोबहुलमितिसूत्रात् बभाषेइदमितिछांदसः २६ सर्वेदेवायेषुसंनिहितास्तेसर्वेदेवास्तेभ्यः सर्वत्रदेवोदेवनंप्रकाशनंयेषांतेतथातेभ्यइतिवानिर्हारो

अथापिकालेस्वजनाभिगुप्त्यैबिभर्षिसत्त्वंखलनिग्रहाय ॥ स्वलीलयावेदपथंसनातनंवर्णाश्रमात्मापुरुषःपरोभवान् १८ ब्रह्मतेहृदयंशुक्लंतपःस्वाध्यायसंयमैः ॥ यत्रोपलब्धंसुव्यक्तमव्यक्तंचततःपरम् १९ तस्माद्ब्रह्मकुलंब्रह्मन्शास्त्रयोनेस्तवात्मनः ॥ समाजयसिसद्धामतद्ब्रह्मण्यगुणोभवान् २० अद्यनोजन्मसाफल्यंविद्यायास्तपसोदृशः ॥ त्वयासंगम्यसंगत्यायत्त्वंनःश्रेयसांपरः २१ नमस्तस्मैभगवतेकृष्णायाकुंठमेधसे ॥ स्वयोगमाययाच्छन्नमहिम्नेपरमात्मने २२ नयंविदंत्यमीभूपाएकारामाश्चवृष्णयः ॥ मायाजवनिकाच्छन्नमात्मानंकालमीश्वरम् २३ तस्याद्यतेदृदृशिमांघ्रिमघौघमर्षंतीर्थास्पदंहृदिधृतंसुविपक्वयोगैः ॥ उत्सिक्तभक्त्युपहृताशयजीवकोशाआपुर्भवद्गतिमथानुगृहाणभक्तान् २४ श्रीशुकउवाच ॥ इत्यनुज्ञाप्यदाशार्हंधृतराष्ट्रंयुधिष्ठिरम् ॥ राजर्षिवर्यांस्तान्गंतुंमुनयोदधिरेमनः २५ तद्वीक्ष्यताननुव्रज्यवसुदेवोमहायशाः ॥ प्रणम्यचोपसंगृह्यबभाषेदंसुयंत्रितः २६ वसुदेवउवाच ॥ नमोवःसर्वदेवेभ्योऋषयःश्रोतुमर्हथ ॥ कर्मणाकर्मनिर्हारोयथास्यान्नस्तदुच्यताम् २७ नारदउवाच ॥ नातिचित्रमिदंविप्रावसुदेवोबुभुत्सया॥ कृष्णंमत्वार्भकंयन्नःपृच्छतिश्रेयआत्मनः २८ सन्निकर्षोहिमर्त्यानामनादरणकारणम् ॥ गांगंहित्वायथान्योऽभस्तत्रत्योयातिशुद्धये २९ यस्यानुभूतिःकालेनलयोत्पत्त्यादिनास्यवै ॥ स्वतोन्यस्माच्चगुणतोनकुतश्चनरिष्यति ३० तंक्लेशकर्मपरिपाकगुणप्रवाहैरव्याहतानुभवमीश्वरमद्वितीयम् ॥ प्राणादिभिःस्वविषयैरुपगूढमज्ञोमेनेससूर्यमिवमेघहिमोपरागैः ३१

मूलच्छदः ९७ आत्मनःस्वस्यश्रेयःशिवंनःपृच्छतीतियत्तदिदंनातिचित्रंमर्त्यस्वभावादितिशेषः २८ कोयंमर्त्यस्वभावइतितत्राह सन्निकर्षइति तत्रगंगातीरेस्थितोन्यःपृथग्जनःबालिशःशुद्धंपद्भ्यांगंगासंबंधिजलंहित्वाऽन्यांभःतटाकादिस्थंजलंयथायातितथायंविचारइत्यर्थः २९ यस्यानुभूतिःस्वरूपचैतन्यं कालेनास्यजगतोलयोत्पत्त्यादिनातदंतःपातित्वेनस्वतःस्वनिमित्तेनान्यस्मात्सत्त्वादिगुणाच्चकुतश्चनान्यतोऽधर्मतोनरिष्यतिनहिंसितंननष्टंस्यात् रिषहिंसायामितिधातुः ३० अज्ञःअज्ञानिवद्वसुदेवःस्वविषयै.स्वेनगृह्यमाणैःप्राणादिभिरिंद्रियादिभिःप्राकृतैर्गूढंमेनइत्यन्वयः क्लेशैरविद्यास्मितरागद्वेषाभिनिवेशैः कर्मपरिपाकैः पुण्यापुण्यफलैस्त्याज्यानुभोगैः परितापेतिपाठेअध्यात्मिकाभिधेयैर्विकारैः भौतिकैर्गुणप्रवाहैः सृष्ट्यादिभिरव्याहतोऽनभिभूतोनुभवः अनुभावोमाहात्म्यंयस्यसतथातं अत्रहेतुगर्भविशेषणद्वयमाह ईश्वरमद्वितीयमिति उपरागोराहुणामेघादिभिराच्छन्नप्रकाशरूपंसूर्यमप्रकाशंमन्यतेयथातथेति ३१

प्रश्नप्रतिवचनमकृत्वापरिकथितकथनंकिंकेनसंगतमितिमंदाशंकांपरिहर्तुमाह अथेति ३२ साधुभिः विद्वद्भिर्निरूपितः ३३ कर्मणाकर्मनिर्वापणंपंकाभसापंकप्रक्षालनमिवानुपपन्नमित्याशंक्यब्रह्मार्पणबुद्ध्यानुष्ठितंसत्समर्थभवति चिकित्सितद्रव्यमिवेत्याशयेनाह चित्तस्येति कविभिःशमोपनिषदाबुद्धेरितिशास्त्रचक्षुषाप्रयश्चित्तस्योपशमोभगवदेकनिष्ठालक्षणोदर्शितः सुगमोयोगउपायश्चिकित्सा लक्षणः आत्मनः परमात्मनोमुदावहः सैतोषजनकोधर्मश्चाहिंसालक्षणः कर्मनिर्वापणसाधनं ३४ उक्तंनिगमयति अयमिति अयंब्रह्मार्पणबुद्ध्यानुष्ठितः स्वस्तिमंगलस्यनिष्पापस्यमोक्षस्यवाअयनमाश्रयः द्विजातेस्त्रैवार्णिकस्यगृहमेधिनः गृहस्थस्य आप्तवित्तेनन्यायार्जितधनेनशुक्लेननिर्मलेन ३५ इदानींशुद्धांतःकरणस्यसंन्यासप्रकारंनिरूपयति वित्तेषणामिति बुधः संसारस्यासारतांविद्वान्यज्ञदानैरनुष्ठितैर्वित्तैषणांवित्तेच्छांविसृजेदितिसर्वत्रयोज्यं गृहैर्गृहस्थाश्रमैःसहदारसुतैषणां आत्मनइहामुत्रलोके धीरास्त्यागशक्तिमंतःग्रामेग्राम्यविषयेत्यत्रैषणाइत्येननब्रह्मचारिणामपिसंन्यासंसूचयतिंयदहेरवविरजेत्तदहरेवप्रव्रजेदितिविधिः ३६ तत्रातिशयितवैराग्याभावेएवंविधस्यसंन्यासानधिकारइतिस्मार्तपक्षमाहुः ऋणैरिति त्रिभिर्ऋणैर्युक्तोजातः तानृणविशेषाननिस्तीर्यगृहादित्यजन्नधःपतेत्

अथोचुर्मुनयोराजन्नाभाष्याऽनकदुंदुभिम् ॥ सर्वेषांशृण्वतांराज्ञांतथैवाच्युतरामयोः ३२ कर्मणाकर्मनिर्हारएषसाधुनिरूपितः ॥ यच्छ्रद्धयायजेद्विष्णुं सर्वयज्ञेश्वरंमखैः ३३ चित्तस्योपशमोयोवैकविभिःशास्त्रचक्षुषा ॥ दर्शितःसुगमोयोगोधर्मश्चात्ममुदावहः ३४ अयंस्वस्त्ययनःपंथाद्विजातेर्गृहमेधिनः ॥ यच्छ्रद्धयाप्तवित्तेनशुक्लेनेज्येतपूरुषम् ३५ वित्तैषणांयज्ञदानैर्गृहैर्दारसुतैषणाम् ॥ आत्मलोकैषणामेवंकालेनविसृजेद्बुधः ॥ ग्रामेत्यक्तैषणाःसर्वेययुर्धीरास्तपोवनम् ३६ ऋणैस्त्रिभिर्द्विजोजातोदेवर्षिपितृणांप्रभो ॥ यज्ञाध्ययनपुत्रैस्ताननिस्तीर्यत्यजन्पतेत् ३७ ब्रह्मचर्यसुताभ्यांवैऋषिपित्रोर्महामते ॥ यज्ञैर्देवर्णमुन्मुच्यनिर्ऋणोशरणोभवेत् ३८ वसुदेवमवाचूनंभक्त्यापरमयाहरिम् ॥ जगतामीश्वरंभेजेसयद्वांपुत्रतांगतः ३९ इतिश्रीभागवतेमहापुराणे दशमस्कंधेउत्तरार्धेद्विसप्ततितमोध्यायः ॥७२॥ श्रीशुकउवाच ॥ इतितद्वचनंश्रुत्वावसुदेवोमहामनाः ॥ तानृषीनृत्विजोवव्रेमूर्ध्नानम्योपसृत्यच १ तएव मृषयोराजन्वृताधर्मेणधार्मिकम् ॥ तस्मिन्नयाजयन्क्षेत्रेमखैरुत्तमकल्पकैः २ तद्दीक्षायांप्रवृत्तायांवृष्णयःपुष्करस्रजः ॥ स्नाताःसुवाससोराजन्राजानःसुष्ठ्वलंकृताः ३ तन्महिष्यश्चमुदितानिष्ककंठ्यःसुवाससः ॥ दीक्षाशालामुपाजग्मुरालिप्तावस्तुपाणयः ४ नेदुर्मृदंगपटहशंखभेर्यानकादयः ॥ ननृतुर्नटनर्तक्यस्तुष्टुवुस्तत्रमागधाः ५ जगुःसुकंठ्योगंधर्व्यःसुगीतंसहभर्तृकाः ॥ तमभ्यषिंचन्विधिवद्वृत्तमव्यग्रमृत्विजः ६

ऋणबीजभर्जनवैराग्याग्न्यभावादितिशेषः ३७ तत्रऋणनिवारणप्रकारमाह ब्रह्मचर्योति अनेनवेदाध्ययनंसूचयति अशरणः गृहरहितः ३८ कर्मनिर्हारणप्रश्नस्यप्रतिवचनमुक्त्वाजनसंग्रहणायेदंत्वयापृष्टमस्माभिरितितदनुस्मृत्यप्राक्तं भवतस्तज्जन्मांतरानुष्ठानशुद्धस्यनेदानींकर्तव्यमस्तीतिममत्वंध्वनयंतः संबोधयंति वसुदेवेति नूनंनिश्चयः यद्यस्मात्भेजइत्यनेनलिटानद्यतनेननपरोक्षवाचिना बहूनिपुरातनानिहरिभक्तिनिमित्तानिजन्मानिसूचितानि बहूनांजन्मनामंतेज्ञातवान्मांप्रपद्यतइतिस्वोक्तेः ३९ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेवि०टीकायांद्विसप्ततितमोऽध्यायः ॥ ७२ ॥ १ धर्मेणकालोक्तेनविधिना उत्तमकल्पकैः राजसूयसमैः ईषदसमाप्तोकल्पब्देश्यदेशीयरइतिसूत्रात् २ दीक्षास्याद्व्रतसंग्रहइति पुष्करस्रजः कमलबीजमालाऽवलंबिकंठाः ३ आलिप्ताश्चंदनेनेतिशेषः हिरण्यादिवस्तुपाणयः हिरण्यंरजतंवापिपृहीत्वाऽक्षमुकंफलं शालांविशेद्यज्ञपत्नीशपेयुस्त्वन्यथासुराइतिवचनात् ४ ५ अव्यग्रमव्याकुलं ६

७ होतापोतानेष्टाप्रशास्ताअध्वर्युराग्नीध्रोमैत्रावरुणइत्येवमादयोऋत्विजःषोडश दीक्षितस्त्वेक इतिसप्तदश सदस्येनवासह वृत्रहणःइंद्रस्ययज्ञे ८ जीवानामीशौस्वरूपभूताभिर्विभूतिभिः मूर्तिमतीभिः अणिमामहिमागरिमालघिमाप्राप्तिरेवच ईशित्वंचवशित्वंचतथाप्राकाम्यमेवचेतिसमाख्याताभिःनानाविधचेतनराशिसमुदायेनतत्तद्योग्यतानुसारेणसभाजनसमयेऽपेक्षिताभिः ९ द्रव्यज्ञानोपपदयोःक्रिययोर्यज्ञलक्षणयोःईश्वरं द्रव्ययज्ञदानयज्ञयोःस्वामिनमित्यर्थःकथमीजइतितत्राह अनुयज्ञेति अनुशब्दोवीप्सावचनःतंतंयज्ञंप्रति विधिनाकल्पोक्तप्रकारेणअग्निहोत्रादिलक्षणैःअग्निहोत्रेष्ट्यादिचिह्नैः प्राकृतैर्यज्ञैःसप्तक्रतुभिःवैकृतैर्यज्ञैःसौत्रामण्यादिभिरुत्तरक्रतुभिः १० यथाम्नातंयथाकथितं महांतिधनानियासांतास्तथा ११ पत्नीसंयाजःपत्नीभिःक्रियमाणः काश्चनदेवताउद्दिश्ययजनं अवभृथःसमाप्तिःकर्मस्थानंउभयत्रेष्टिविशेषाश्चभवंति तैश्चरित्वातांश्चकृत्वेत्यर्थः १२ पूजयदपूजयत् स्त्रियःस्त्रीभ्यः १३ पारिबर्हेणपूजाद्रव्येणविदर्भादींश्चापू

पत्नीभिरष्टादशभिःसोमराजमिवोडुभिः ॥ ताभिर्दुकूलवलयहारनूपुरकुंडलैः ॥ स्वलंकृताभिर्विभवैर्दीक्षितोजनसंवृतः ७ तस्यर्त्विजोमहाराजनूत्न कौशेयवाससः ॥ सप्तदशविरेजुस्तेयथावृत्रहणोध्वरे ८ तदारामश्चकृष्णश्चस्वैस्वैर्बंधुभिरन्वितौ ॥ रेजतुःस्वसुतैःदारैर्जीवेशौस्वविभूतिभिः ९ ईजेऽनुयज्ञंविधिनाअग्निहोत्रादिलक्षणैः ॥ प्राकृतैर्वैकृतैर्यज्ञैर्द्रव्यज्ञानक्रियेश्वरम् १० अथर्त्विग्भ्योऽददात्कालेयथाम्नातंसुदक्षिणाः ॥ स्वलंकृतेभ्योलंकृत्यगोभूकन्यामहाधनाः ११ पत्नीसंयाजावभृथैश्चरित्वाथमहर्षयः ॥ सस्नूरामहदेविप्रायजमानपुरःसराः १२ स्नातोलंकारवासांसिबंदिभ्योदात्तथा स्त्रियः ॥ ततःस्वलंकृतान्वर्णानाश्वभ्योन्नेनपूजयत् १३ बंधून्सदारान्ससुतान्पारिबर्हेणभूयसा ॥ विदर्भकोशलकुरून्काशिकेकयसृंजयान् १४ सदस्यर्त्विक्सुरगणान्नृभूतसूतचारणाः ॥ श्रीनिकेतमनुप्राप्यशंसंतःप्रययुःक्रतुम् १५ धृतराष्ट्रोनुजोद्रोणोभीष्मोद्रौणिःकृपस्तथा ॥ नारदोभगवान्व्यासः सुहृत्संबंधिबांधवाः १६ बंधून्परिष्वज्ययदून्सौहृदाक्लिन्नचेतसः ॥ ययुर्विरहकृच्छ्रेणस्वदेशांश्चापरेजनाः १७ नंदस्तुसहगोपालैर्महत्यापूजयार्चितः ॥ कृष्णरामोग्रसेनाद्यैर्न्यवसद्बंधुवत्सलः १८ वसुदेवोजसोत्तीर्यमनोरथमहार्णवम् ॥ सुहृद्वृतःप्रीतमनाइदमाहकरेस्पृशन् १९ वसुदेवउवाच ॥ भ्रातरीशकृतःपाशोनृणांयःस्नेहसंज्ञितः ॥ तंदुस्त्यजमहंमन्येसुराणामपियोगिनाम् २० अस्मास्वप्रतिकल्पोयंयत्कृतंज्ञानसत्तमैः ॥ मैत्र्यार्पिताफलावापिननिवर्तेतकर्हिचित् २१ प्रागकल्पास्तुकुशलंभ्रातर्वोनाचरेमहि ॥ अधुनाश्रीमदांधाक्षानपश्यामपुरःसतः २२ माराज्यश्रीरभूत्पुंसःश्रेयस्कामस्यमानद ॥ स्वजनान्भृत्यबंधून्वानपश्यतिययांधदृक् २३ एवंसौहृदशैथिल्यचित्तआनकदुंदुभिः ॥ रुरोदतत्कृतांमैत्रींस्मरन्नश्रुविलोचनः २४

जयदितिशेषः १४ सदस्यर्त्विगादयःप्रययुरित्यन्वयः १५ अनुजोविदुरः १६ १७ १८ १९ २० युष्माभिर्ज्ञानेनसत्तमैरस्मासुयत्कृतंसोयंस्नेहपाशोऽप्रतिकल्पः असदृशः याचास्माभिर्युष्मास्वर्पितामैत्रीअफलावापिनिष्फलावापिकर्हिचिदपिननिवर्तेतानिवृत्त्यास्मत्तइतिशेषः २१ एतदेवविवृणोति प्रागिति हेभ्रातःप्राग्वःकुशलंनाचरेमहि कुतः अकल्पा असमर्थाः कंसेनोपद्रुतत्वात् अधुनाश्रीमदांधाक्षाःवयंपुरःसतःपुरस्थितान्नपश्यामइतियदतइतिशेषः २२ ययाराज्यश्रिया २३ सौहृदेनस्नेहेनशैथिल्यंशिथिलस्वभावंप्राप्तंचित्तंयस्यसतथा २४

२५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटीकायांत्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ सुखंगुणोपसंहारार्थसम्यक्तत्वविज्ञानेहरोमांक्रांव
धानंसुशकमितिपुनरपिहरेर्माहात्म्यंनिगद्यतेऽस्मिन्नध्याये तदर्थवसुदेवःकृष्णरामौसंबोध्यवक्ति अथेति १ पुत्रयोःकृष्णरामयोःधात्रस्तेजसःमाहात्म्यलक्षणस्यसूनकंवदतांमुनिनांवचःश्रुत्वातयो
र्वीर्येमाहात्म्येजातविश्रंभः पुनरंकुरितविश्वासः २ अहंवांप्रधानपुरुषौजानेवांयथाऽस्यविश्वस्यसकाशात्परौविलक्षणत्वेनोत्तमौभवतस्तथेति यद्वास्यजगतस्तत्त्वंजाने ३ तत्कथमितितत्राह यत्रेति
यत्रयस्मिंस्तिष्ठति यस्मिन्निदमितिश्रुतिः येनजातानिजीवंतीतिश्रुतिः यतोवाइमानिभूतानिइतियस्यब्रह्मचक्षत्रंचोभेभवतओदनःमृत्युर्यस्योपसेचनमितिकाठकाः यस्माइदंक्रियतइति सच्चत्यच्चाभव
दिति यथास्थितंयदाकालेइदंस्यात् तथातदाऽस्मात् ब्रह्मेवेदंविश्वमितिश्रुतिः इदंजगत्साक्षात्स्पष्टंनिर्विचारंप्रधानपुरुषेश्वरशब्दवाच्योभगवानेवस्यात्तत्सत्तायाअपितदधीनत्वात् यद्वा य

नंदस्तुसख्युःप्रियकृत्प्रेम्णागोविंदरामयोः ॥ अद्यश्वइतिमासांस्त्रीन्यदुभिर्मानितोवसत् २५ ततःकामैःपूर्यमाणःसव्रजःसहबांधवः ॥ पराध्यांम
रणक्षौमनानानर्घ्यपरिच्छदैः २६ वसुदेवोग्रसेनाभ्यांकृष्णार्जुनबलादिभिः ॥ आदायपारिबर्हंतंयापितोयदुभिर्ययौ २७ तदागोप्यश्चगोपाश्चगो
विंदचरणांबुजे ॥ मनःक्षिप्तंपुनर्हर्तुमनीशामथुरांययुः २८ द्रोणोभीष्मोंगराजश्चबाह्लीकविदुरादयः ॥ सपुत्रोधृतराष्ट्रश्चजग्मुःस्वंस्वंनिकेतनम् २९ अ
न्येचसर्वराजानोदेवयात्रार्थमागताः ॥ गतेमासत्रयेभूयःस्वानेवविषयान्ययुः ३० पांडवाश्चमहात्मानःपृथाचनृपसत्तम ॥ अनुज्ञाताःकेशवेनबाष्पगद्गद
भाषिणः३१शक्रप्रस्थंययुःसर्वेस्वजनैःपरिवारिताः ॥ बंधुषुप्रतियातेषुवृष्णयःकृष्णदेवताः ३२ परिवार्यहृषीकेशंययुर्द्वारवतींपुरीम् ३३ ॥ इतिश्रीभागवते
महापुराणेदशमस्कंधेउत्तरार्धेत्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ श्रीशुकउवाच ॥ अथैकदात्मजौप्राप्तौकृतपादाभिवंदनौ ॥ वसुदेवोभिनंद्याहप्रीत्यासंकर्षणा
च्युतौ १ मुनीनांवदतांश्रुत्वापुत्रयोर्धामसूचकम् ॥ तद्वीर्यजातविश्रंभःपरिष्वज्याभ्यभाषत २ कृष्णकृष्णमहायोगिन्संकर्षणसनातन ॥ जानेवामस्यय
त्साक्षात्प्रधानपुरुषौपरौ ३ यत्रयेनयतोयस्ययस्मैयद्यद्यथायदा ॥ स्यादिदंभगवान्साक्षात्प्रधानपुरुषेश्वरः ४ एतन्नानाविधंविश्वमात्मसृष्टमधोक्षज ॥
आत्मनानुप्रविश्यात्मन्प्राणान्जीवोबिभर्ष्यजः ५ प्राणादीनांविश्वसृजांशक्तयोयाःपरस्यताः ॥ पारतंत्र्याद्वैसादृश्याद्ययोःश्रेष्ठचचेष्टितम् ६ कांतिस्तेजः
प्रभासत्ताचंद्राग्न्यर्कसविद्युताम् ॥ यत्स्थैर्यंभूभृतांभूमेर्वृत्तिर्गंधोऽर्थतोभवान् ७

त्रयस्मिन्नधिष्ठानेयेनसाधनेनयतोमृदःयस्यसंबंधेनयस्मैदेवदत्तायपदार्थस्तुयथाप्रकारेणयदायस्मिन्काले ४ तदिदंकथितमेवस्पष्टत्वाय कथयति एतदिति आत्मनात्वयासृष्टंआत्मनाअनुपहतस्वरूपेणआ
त्मन्नात्मनिप्राणादिंद्रियाणिजीवोजीवनप्रदः ५ प्राणादीनांमुख्यप्राणादीनांयाःशक्तयस्ताःपरस्यहरेर्विद्यमानाः तत्रहेतुः पारतंत्र्येति वैसादृश्याद्वैलक्षण्यात् तदुपपादयति द्वयोरिति द्वयोर्जीवे
शयोःश्रेष्ठअतिशयेनोत्तमेहरौचेष्टितंयस्मात्तस्मादित्यर्थः यथावायोःशक्त्यातृणपर्णादीनांचालनंयथावापुरुषस्यशक्त्याशरादीनांवेगवत्तीगतिस्तथाप्रकृतेइतिभावः ६ पदार्थगुणानांतदधीनत्वमाह
कांतिरित्यादिना चंद्राग्न्यर्कीणांसविद्युतांस्वद्योतादीनांमध्येचंद्रस्ययाकांतिः अग्नेर्यत्तेजः सूर्यस्ययाप्रभा विद्युदादीनांयासत्ता भूभृतांयत्स्थैर्यं भूमेर्यावृत्तिः सस्यादीनांजीवनत्वं योगंधोगुणस्तत्सर्व
मर्थतोभिधेयत्वंयद्ववान्यः ७

किंचापांयत्तर्पणं तृप्तिः प्राणनंचेष्टा द्रवत्वंस्यंदनं ताआपश्च तासांरसो गुणश्च वायोःयेओजआदयः तेसर्वंतवाधीनप्रवृत्तिनिमित्ताःओजोवष्टंभः सहोमर्षणं बलंशक्तिःचेष्टास्पंदनम् गतिःसर्पणम् ८ यो दिशामवकाशः सत्वंयश्चस्फोटोव्योमनिआश्रयःसत्वं निर्दोषःशब्दआगमइतिवचनात् वर्णक्रमलक्षणोर्थव्यंजकःशब्दस्त्वं किंच स्फोटोवेणुदारणादौजन्योध्वनिराश्रयःशंखादिजन्यस्त्वमित्यर्थः अव स्वरातिगर्गरइतिश्रुतेः आकृतीनांब्रह्मादिप्राणिनांदेवानांयाःपृथकृतीःपृथक्क्रियाः अनिमेषादिलक्षणास्ताश्चत्वदधीनाः ९ इंद्रियाणामिंद्रियमिंद्रवर्णंतदनुग्राहकादेवाःसूर्यादयश्चत्वंबुद्धेरवबोधोज्ञान जननशक्तिःजीवस्यसत्यनुस्मृतिःस्मरणशक्तिश्चभवान् १० पंचभूतानांकारणंभूतादिस्तामसाहंकारः चक्षुरादींद्रियाणांकारणंतैजसाहंकारः विकल्पानांजरादिशून्यत्वेनपरमात्मव्यपदेशानांविविधाःक ल्पाःन्यायाःयेषांतेषांवादेवानांकारणंवैकारिकाहंकारः संकल्पविकल्पानांमनोवृत्तीनांवा अनुशायिनांजीवानांकारणंप्रधानंप्रकृतिस्त्वंमहदादीनांवा ११ सर्वभावानामादिस्त्वमितिनिरूप्याधुनांतका लावस्थायित्वंचतवेतिसमर्थयते नश्वरेष्विति इहनश्वरेषुनाशशीलेषुभावेषुपदार्थेषुयोऽनश्वरःअविनाशीभावस्तद्द्रव्यंत्वमसि सूक्ष्मार्थत्वान्निदर्शनेनावगमयति तथाहि द्रव्यंप्रधानंत द्विकारेषुपृथिव्यादिषुपदार्थेषुप्रलयेनश्वरेषुद्रव्यमात्रंकेवलंस्वरूपभूतंप्रधानमेवानिरूपितं तत्त्वज्ञैरितिशेषःयद्वा द्रव्यंपरमाणुतत्संयुक्तेषुघटादिपदार्थेषुनश्वरंद्रव्यमात्रंपरमाणुमात्रंनिरूपितम् परमाणुत्व वादिभिरितिशेषः १२ नन्वेवंतर्हिप्रधानादेर्नित्यत्वेनपरमात्मनियतत्वमायातमितितत्राह सत्वामिति इतिशब्दोहेत्वर्थः जगदुत्पत्त्यादिहेतवःसत्वादयोगुणायेयाश्चतेषांगुणानांवृत्तयोव्यापाराःते

तर्पणंप्राणनंचापांद्रवत्वंताश्चतद्रसः ॥ ओजःसहोबलंचेष्टागतिर्वायोस्तवेश्वर ८ दिशांत्वमवकाशोसिशब्दस्त्वंस्फोटआश्रयः ॥ नादोवर्णस्त्वमोंकार आकृतीनांपृथक्कृतीः ९ इंद्रियंत्विंद्रियाणांत्वंदेवाश्चतदनुग्रहाः ॥ अवबोधोभवान्बुद्धेर्जीवस्यानुस्मृतिःसती १० भूतानामसिभूतादिर्रिंद्रियाणांचतै जसम् ॥ वैकारिकंविकल्पानांप्रधानमनुशायिनाम् ११ नश्वरेष्विहभावेषुतदसित्वमनश्वरः ॥ यथाद्रव्यविकारेषुद्रव्यमात्रंनिरूपितम् १२ सत्त्वंरज स्तमइतिगुणास्तद्वृत्तयश्चयाः ॥ त्वय्यद्धाब्रह्मणिपरेकल्पितायोगमायया १३ तस्मान्नसंत्यमीभावायर्हित्वय्यविकल्पिताः ॥ त्वंचामीषुविकारेषुसन्स दाव्यावहारिकः १४ गुणप्रवाहएतस्मिन्नबुद्ध्वात्वखिलात्मनः ॥ गतिंसूक्ष्मामबोधेनसंसरंतीहकर्मभिः १५

ताश्चपरेब्रह्मणितद्वचाप्नेतदव्याप्नेचदशेव्याप्नेत्वायिअद्धाअनिर्वचनीयत्वेनकल्पिताःसमर्थिताः एतस्मिन्खल्वक्षरेगार्ग्याकाशओतश्चप्रोतश्चेत्यादिवेदांतवाक्यैः सत्वादिगुणानांप्रधानस्वरूपत्वेनतेषां तदाधारत्वकथनेप्रधानस्यतदाश्रयत्वंकिमुवक्तव्यमिति परमाणुपक्षेशुक्लवर्णेनसत्वेनाप्याःरजसापार्थिवाः सतमसावरकेणवायवीयाःपरमाणवोलक्ष्यंते इतिशब्देनादित्यवाचिनातैजसालक्षिताइति चतुर्विधागुणास्तंतुस्थानीयाःपरमाणवोयास्तद्वृत्तयःसंयोगलक्षणास्त्वयिकल्पिताःत्वत्प्रेरितत्वेनकार्यकरणक्षमत्वेनसमर्थिताइत्यर्थः किमनेननियमेनेत्यतउक्तं योगमायययेति योगमायया स्वसमवेते च्छया १३ व्यतिरेकंदर्शयति तस्मादिति यर्हियदामीभावास्त्वय्यविकल्पिताःत्वदाधारत्वेननिरूपिताःतदातस्मादनाधारतयानसंति स्वरूपतएवनश्यंति तस्मात्तत्सत्तापित्वदधीनेत्यर्थः ए तदेवविशदयति त्वंचेति अमीषुविकारेषुविविधप्रकारेषुपदार्थेषुत्वंचत्वमेवसन्सद्भावंकुर्वन्सदाव्यावहारिकःहानादिव्यवहारनिर्वाहकःनान्यइत्यर्थः १४ नन्वेवंतर्हिकस्मादेतस्यसंसारइतितत्राह गुणेति एतस्मिन्गुणप्रवाहेसंसारेअखिलात्मनः अखंडस्वामिनःतवसूक्ष्मामतींद्रियांगतिं स्थितिं सर्वव्यापीसर्वनियामकइत्यादिलक्षणामबुद्ध्वाऽज्ञात्वातेनाबोधेनाज्ञानेनइहकर्मभिः संसरंतीत्यन्वयः तत्त्वाज्ञानात्संसारइतिभावः १५

ननुभवतुमनुष्यत्वलाभात्ज्ञानंसुलभंतस्मान्मोक्षोपिस्यादित्याशंक्यसर्ववेत्वत्प्रसादमंतरेणदुर्लभमित्याह यदृच्छयेति यदृच्छयाभगवदिच्छया तत्राबुद्धेश्चारब्धपुण्यकर्मणा नृतामनुष्यत्वमाप्य२६नु-पर-
रीरित्वन्मायया स्वार्थेप्रमत्तस्यममवयोगतम् वृथेतिशेषः अतःसुकल्पंक्षणंफलप्रदंज्ञानंदुर्लभमभूदितिशेषः नितरांममत्वंत्वन्मायया १६ स्वार्थेप्रमादःकीदृशइतितत्राह असाविति असौदेहोहमस्यदेहस्यान्व
यादिषुइंद्रियकलत्रादिषुममैवेतेसंतइतिसुदृढैर्ममत्वेनबध्नाति नकेवलंमामेव किंतुसर्वमिति भावेनोक्तंसर्वमिति १७ त्वदनुग्रहान्ममकिंचित्ज्ञानमुत्पन्नमितिभावेनाह युवामिति प्रधानपुरुषेश्वरौप्रकृतिज्ञो
वेश्वरौ १८ अतःकिंतत्राह तत्तइति इंद्रियलालसेनइंद्रियाणांशब्दविषयभोगेच्छयामर्त्येमृत्युशिरस्केदेहेआत्मदृक्अहमितिदर्शनम् यत्परेपरमात्मनित्वयिअपत्यबुद्धिः पुत्रत्वज्ञानम् १९ सूतीगृह
इति अजःशुक्रशोणितसंपर्कजन्यशरीररहितः भवान्सूतीगृहेअरिष्टेअहंपशोविष्णुरितिनोजगाद नन्वितियत्तस्मादनुयुगंनिजक्षत्रधर्मरक्षायैनानातनूःसुरनरादिनानाविधशरीराणिविदधत्कुर्वन्त्वंपु
नःरक्षावसानेतास्तनूःजहासितिरोदधासि कथंदधातीत्यतउक्तम् गगनवादिति यथायुगंयुग्मंकार्यकारणद्वयात्मकपदार्थजातमनुअणुबृहदनुकूलत्वेननानाभवति पुनस्तद्गगनंतत्पदार्थजातस्य
कारणावशेषेस्वयमेवैकमेवभवतितथेत्यर्थः हेउरुगायभूम्नःपूर्णानंदस्यतवविभूतीनांमायामाहात्म्यंकोवेद वेदचेत्ब्रह्मैववेतिवायुर्वानान्यःअननगगनादस्यविशेषोदर्शितः २० ब्रह्माद्यन्यतममंत

यदृच्छयानृतांप्राप्यसुकल्पमिहदुर्लभम् ॥ स्वार्थेप्रमत्तस्यवयोगतंत्वन्माययेश्वर १६ असावहंममैवैतेदेहेवास्यान्वयादिषु ॥ स्नेहपाशैर्निबध्नातिभवान्
सर्वमिदंजगत् १७ युवांननःसुतौसाक्षात्प्रधानपुरुषेश्वरौ ॥ भूमारदैत्यक्षपणेअवतीर्णौतथात्विह १८ तत्तेगतोस्म्यरणमद्यपदारविंदमापन्नसंसृतिभयाप
हमार्तबंधो ॥ एतावतालमलमिंद्रियलालसेनमर्त्यात्मदृक्त्वयिपरेयदपत्यबुद्धिः १९ सूतीगृहेननुजगादभवानजोनौयद्यज्ञइत्यनुयुगंनिजधर्मगुप्त्यै ॥
नानातनूर्गगनवद्विदधज्जहासिकोवेदभूम्नउरुगायविभूतिमायाम् २० श्रीशुकउवाच ॥ आकर्ण्यैतत्पितुर्वाक्यंभगवान्सात्वतर्षभः ॥ प्रत्याहप्रश्रयानम्रः
प्रहसन्श्लक्ष्णयागिरा २१ वचोवःसमवेतार्थंतातैतदुपमन्महे ॥ यन्नःपुत्रान्समुद्दिश्यतत्त्वग्रामउदाहृतः २२ अहंयूयमसावार्यइमेचद्वारकौकसः ॥ स
र्वेप्येवयदुश्रेष्ठविश्वंचसचराचरम् २३ आत्माह्येकःस्वयंज्योतिर्नित्योन्योनिर्गुणोगुणैः ॥ आत्मसृष्टैस्तत्कृतेषुभूतेषुबहुधेयते २४ खंवायुर्ज्योतिरापोभू
स्तत्कृतेषुयथाशयम् ॥ आविस्तारोल्पभूर्येकनानात्वंयात्यसावपि २५

रेणप्रत्यक्षंभगवतासल्लापःकस्यसुलभोऽतोवसुदेवस्यभाग्यमतिविचित्रमितिभावेनकृष्णस्यप्रतिवचनप्रकारंकथयति आकर्ण्येत्यादिना २१ समवेतार्थश्रुतिस्मृत्युपपन्नार्थ प्रसिद्धार्थंवा २२
युष्मदादिविश्वमहमेवमदधीनमेवनान्याधीनम् सर्वंखल्विदंब्रह्मेतिश्रुतिसिद्धम् २३ मत्समोनास्तीत्याह एकइति केवलःद्वितीयवर्जितःत्वंवाकइयतउक्तम् आत्मेति आत्मशब्देनकिंदेहउच्य
तइत्यतःस्वयंज्योतिर्नित्यइति अनेनविशेषणद्वयेनजीवोपिव्यावृत्तः तस्यनित्यानभिभूतस्यस्वयंज्योतिष्ट्वाभावाद्धरेस्तद्भावात् ब्रह्मवेदाहंब्रह्मास्मीतिश्रुतेःबलमानंदओजश्चेतिवा अहमेवेत्युक्त्याऽभे
दःकिंनस्यादित्यतउक्तम् अन्यइति अहमस्मादन्योन्यविलक्षणः कुतःनिर्गुणःसत्वादिगुणनिमित्तवैपरीत्याभावात् अन्यस्यतद्भावात् कार्यतेह्यवशःकर्मसर्वःप्रकृतिजैर्गुणैरित्यादेः ननुतर्ह्यप्राप्त
निषेधःकस्मादितितत्राह इंद्रियपूर्णेषुभूतेषुप्राणिदेहेषुबहुधेयतेयथारुचिज्ञायते जनेनेतिशेषः यथात्मनिमितैर्गुणैःपंचभूतैःतैर्विरचितेषु शेषंसमम् २४ एतदेवद्रढयति खंवायुरीति खा
दीनितत्कृतेषुवस्तुषुयथाशयंयथास्थानम् स्थितानिभवंति तथाअसौहरिरपिअल्पेष्वल्पत्वेनभूरिषुमहत्त्वेनाविस्तारः प्रकाशितविस्तारएकनानात्वंएकस्यानेकसंख्याविषयत्वंयातीत्यन्वयः अत्रा
यंभावः स्वसृष्टतत्तद्वस्तुनियमार्थंतत्तद्वस्तुपरिमाणभूतंगृह्णातीतिताच्विकाः २५

विनष्टंनामकुत्सितमाधिर्यस्यसविनष्टनामाधिः नामकुत्सनसंभाव्यप्रकाशेषुनिगद्यतइति २६ अथमंगलाचरितमारभ्यते सर्वादेवतायस्यांसान्निहिताःसातथा २७ समाश्राव्यसंबोध्य २८ २९ मेमत्तःसकाशात् कालेनविध्वस्तधर्मसेतूनाम् ३० भागोभजनंस्वीकारस्तेनगतिंशरणंगतास्मि ३१ पितृस्थानाद्यमलोकात् ३२ ३३ ३४ तथात्मनःस्वस्यसुतरामिष्टदैवम् ३५ तज्जलं पादावनिर्णिक्तजलंयस्यपादजलैराब्रह्मचतुर्मुखपर्यंतंजगत्पुनत्पुनातिशुध्यति छांदसोयंप्रयोगः आदित्यःसुपथाऽकरदित्यादिष्विव ३६ अमृतभक्षणंरसायनभोजनं अमृतंव्योम्निदेवान्नेयज्ञशेषेरसायने अयाचितेजलेजगधौमोक्षणेहेम्निगोरसे क्लीबेनात्वमरेस्त्रीतुगुडूच्यांमद्यभिक्षयोरितियादवप्रकाशःइंद्रसेनोबलिः गोत्रंनाम्निकुलेऽचलेइति आत्मादेहेधृतौजीवेधैर्यइतिवाप्रेमविभिन्नयास्नेहप्रवृद्ध्याधियाभग वत्पदांबुजंभ्रमत्शरणंगच्छन्प्रदक्षिणंकुर्वन्वा हाशुभमितिस्मरन् हाविषादशुभार्तिष्विति बभाषेतिसंभ्रमाद्वचत्ययः बभारेतिपाठे पादांबुजंबभार गद्गदाक्षरंवचोजगादेतियोज्यम्

एवंभगवताराजन्वसुदेवउदाहृतम् ॥ श्रुत्वाविनष्टनामाधिस्तूष्णींप्रीतमनाअभूत् २६ अथतत्रकुरुश्रेष्ठंदेवकीसर्वदेवता ॥ श्रुत्वानीतंगुरोःपुत्रमात्मजा
म्यांशुचिस्मिता २७ कृष्णरामौसमाश्राव्यपुत्रान्कंसविहिंसितान् ॥ स्मरंतीकृपणाप्राहवैक्लव्यादश्रुलोचना २८ देवक्युवाच ॥ रामरामाप्रमेयात्मन्कृ
ष्णयोगेश्वरेश्वर ॥ वेदाहंवांविश्वसृजामीश्वरावादिपूरुषौ २९ कालविध्वस्तसेतूनांराज्ञामुच्छास्त्रवर्त्तिनाम् ॥ भूमेर्भारायमाणानामवतीर्णौक्षयायमे
३० यस्यांशांशांशभागेनविश्वस्थित्युदयौलयः ॥ भवंतिकिलविश्वात्मंस्तंत्वाद्याहंगतिंगता ३१ चिरान्मृतसुतादानेगुरुणाकिलचोदितौ ॥ आनि
न्यथुःपितृस्थानाद्गुरवेगुरुदक्षिणाम् ३२ तथामेकुरुतांकामंयुवांयोगेश्वरेश्वरौ ॥ भोजराजहतान्पुत्रान्कामयेद्रष्टुमाहृतान् ३३ श्रीशुकउवाच ॥ एवंसंचो
दितौमात्रारामकृष्णौकुरुद्वह ॥ सुतलंसंविविशतुर्योगमायामुपाश्रितौ ३४ तस्मिन्प्रविष्टावुपलभ्यदैत्यराड्विश्वात्मदैवंसुतरांतथात्मनः ॥तद्दर्शनाह्लादप
रिप्लुताशयःसद्यःसमुत्थायननामसान्वयः ३५ तयोःसमानीयवरासनंमुदानिविष्टयोस्तत्रमहात्मनोस्तयोः ॥ दधारपादावनिज्यतज्जलंसवृंदआब्र
ह्मपुनद्यदंबुभिः ३६ समर्हयामासमहाविभूतिभिर्महार्हवस्त्राभरणानुलेपनैः ॥ सुगंधूपदीपामृतभक्षणादिभिःस्वगोत्रवित्तात्मसमर्पणेनच ३७
सइंद्रसेनोभगवत्पदांबुजंभ्रमन्मुहुःप्रेमविभिन्नयाधिया ॥ बभाषहानंदजलाकुलेक्षणःप्रहृष्टरोमाकृपगद्गदाक्षरम् ३८ बलिरुवाच ॥ नमोनंतायमहतेनमःकृ
ष्णायवेधसे ॥ सांख्ययोगवितानायब्रह्मणेपरमात्मने ३९ दर्शनंवांहिभूतानांदुष्प्रापमतिदुर्लभम् ॥ रजस्तमःस्वभावानांयन्नःप्राप्तंयदृच्छया ४०
दैत्यदानवगंधर्वसिद्धविद्याधरादयः ॥ यक्षरक्षःपिशाचाश्चभूतप्रमथनायकाः ४१

३७ ३८ वेधसेअश्रमेणकर्त्रेसांख्ययोगयोर्ज्ञानकर्मणोर्वि

तानोविस्तारःयेनसतथातस्मै सांख्ययोगशास्त्रकारायवा दृष्टकपिलादिभ्योव्यावर्तनायाह ब्रह्मणइति नन्वमुनाव्यावृत्तिःकथमत्राह परमात्मनइति ३९ अव्यक्तस्वभावयोर्युवयोर्दर्शनम नुग्रहसाध्यंनतुप्रयत्नसाध्यमितिभावेनाह दर्शनमिति वांदर्शनंभूतानांदुष्प्रापं हियस्मात्तस्माद्रजस्तमःस्वभावानांनोतिदुर्लभंयुष्मद्दर्शनंप्राप्तंतद्यदृच्छयादेवयोर्युवयोरनुग्रहोन्मुखीभूतयेच्छये तिमन्यइतिशेषः ४० रजस्तमःस्वभावफलंप्रकटयन्तामसत्वंनामचूडारत्नंनिर्मलीकर्तुंदर्शनंकृतमित्याशयेनाह दैत्येति येदैत्यदानवास्तेवयंच शास्त्रंवेदादिग्रंथएवशरीरंयतिमालक्षणमस्यास्ती तिशास्त्रशरीरीतस्मिन् शास्त्रंग्रंथनिदेशयोरिति विशुद्धसत्वधाम्निकेवलज्ञाननिधानेत्वयिनित्यनिबद्धवैराः अन्येराक्षसाश्चताद्दशानिबद्धवैराइत्यतोनकोप्यस्मद्गणोयुष्मद्दर्शनइतिशेषः ४१

४२ ननुनित्यानुसंधातल्लक्षणांतःकरणगुणेनाविभूतज्ञानगुणास्तीतिमाशंक्य यतःसुरादीनामपिनास्ति कुतस्त्याकामितिभावेनाह केचनेति केचनचैवादयःउद्बद्धवरणकाचदुद्भतवरणभक्ताःकचनगा
पिजनाःकामतोभक्ताःसन्निकृष्टाःसहवर्तमानाःसत्वसंरब्धाउद्रिक्तसत्वगुणाः प्राणात्ययेप्यनुज्झितयुष्मद्भक्तिनिश्चयाःसुरगंधर्वादयस्तथाऽनादिद्वेषसंरंभादिनाभक्तानभवंतिकिंतुनिश्चलभक्तिसिंधवः ४३
अपित्वथापितेयोगेशाःज्ञानोपायश्चेष्टाःप्रायोबहुलंतवयोगमायांजगत्सृष्ट्याद्यनुसंहितस्वरूपमहात्म्यंनविदंति कथंइदमित्थमेवंभूतमितिनजानंतिवयंकुतोहेतोर्बुध्यामहइति ४४ अधुनास्वाशयंवि
ज्ञापयति तन्नइति यतोयुष्मद्भक्तिज्ञानाभ्यामनुग्रहएवंप्रार्थनीयस्तत्तस्मान्नस्तथाप्रसीद कथं यथाएकउत्तमपुत्रादिस्नेहलक्षणसंघरहितएव सत्वंश्रीनारायणएवसखायेषांतेतथातैर्युष्मद्भक्तेःसहच
रामिवर्तमानोभवामि किंकृत्वाग्रहांधकूपान्निष्क्रम्यनिर्गतोभूत्वा कीदृशोहंशांतःयुष्मन्निष्ठायुक्तः कथमत्राह निरपेक्षैःसंन्यासिभिःविमृग्ययोरन्वेषणीययोर्युष्मत्पदारविंदयोःधिषणाधीर्यस्यसतथा
धिषणंधिष्ण्यंगृहंवा, अस्तुनिवासस्थानंकिंजीवनमत्राह विश्वेति विश्वस्यपक्षपातित्वेनशरणयोरीक्षत्रोरंघ्र्योःसेवयोपलब्धाप्राप्तावृत्तिर्जीविकायस्यसतथा ४५ सत्सेवनमपियुष्माच्छिक्षयै

विशुद्धसत्वधाम्न्यद्धात्वयिशास्त्रशरीरिणि ॥ नित्यंनिबद्धवैरास्तेवयंचान्येचतादृशाः ४२ केचनोद्बद्धवैरेणभक्ताःकेचनकामतः ॥ नतथासत्त्वसंरब्धाः
सन्निकृष्टाःसुरादयः ४३ इदमित्थमितिप्रायस्तवयोगेश्वरेश्वर ॥ नविदंत्यपियोगेशायोगमायांकुतोवयम् ४४ तन्नःप्रसीदनिरपेक्षविमृग्ययुष्मत्पादार
विंदधिषणःस्वगृहांधकूपात् ॥ निष्क्रम्यविश्वशरणांघ्र्युपलब्धवृत्तिःशांतोयथैकउतसत्त्वसखेश्वरासि ४५ शाध्यस्मानीशितव्येशनिष्कामान्कुरुनः
प्रभो ॥ पुमान्यच्छ्रद्धयातिष्ठंश्चोदनायाविमुच्यते ॥ ४६ ॥ श्रीभगवानुवाच ॥ आसन्मरीचेःषट्पुत्राऊर्णायांप्रथमेंतरे ॥ देवलंजहसुर्वीक्ष्यसुताञ्छ
पितुमुद्यतम् ४७ तेनासुरीमगुर्योनिममुनावद्यकर्मणा ॥ हिरण्यकशिपोःशापात्पुत्रास्तेयोगमायया ४८ देवक्याजठरेजाताराजन्कंसविहिंसिताः ॥
सातान्शोचत्यात्मजान्स्वांस्तइमेध्यासतेंतिके ४९ इतएतान्प्रणेष्यामोमातृशोकापनुत्तये ॥ ततःशापविनिर्मुक्तालोकंयास्यंतिविज्वराः ५० स्मरोद्गीथः
परिष्वंगःपतंगःक्षुद्रभृद्घृणी ॥ षडिमेमत्प्रसादेनपुनर्यास्यंतिमद्गतिम् ५१ इत्युक्त्वातान्समादायइंद्रसेनेनपूजितौ ॥ पुनर्द्वारावतीमेत्यमातुःपुत्रानय
च्छताम् ५२ तान्दृष्ट्वाबालकान्देवीपुत्रस्नेहस्नुतस्तनी ॥ परिष्वज्यांकमारोप्यमूर्ध्न्यजिघ्रदमीक्ष्णशः ५३ अपाययत्स्तनंप्रीतासुतस्पर्शपरिस्नुतम् ॥ मो
हितामायया विष्णोर्यथासृष्टिःप्रवर्त्तते ५४ पीत्वामृतंपयस्तस्यापीतशेषंगदाभृतः ॥ नारायणांगसंस्पर्शप्रतिलब्धात्मदर्शनाः ५५

वभाव्यमितिभावेनाह शाधीति यस्मिन्छासनेश्रद्धयातिष्ठन्स्थिरःसन्चोदनायाविधिनिषेधलक्षणायाःसंसृतेर्विमुच्यते ४६ शाधीतिवाक्यंश्रुतवान्कृष्णस्त्वयाधुनेदंकर्तव्यमितिवक्तुमुपक्रमते
आसन्नित्यादिना प्रथमेमन्वंतरेयेपुत्रास्तेकस्मिंश्चित्कालेसुतान्शापितुंशिक्षयितुंउद्यतंदेवलंवीक्ष्यजहसुः ४७ अमुनाअपहासलक्षणापकर्मणानिमित्तेनदेवलेनासुरींयोनिमगुःआपुःकालनेमेः
पुत्रत्वेनइतिशेषः तेकालनेमेर्जाताःपुत्राहिरण्यकशिपोःशापेनयोगमाययादेवक्याउदरेनीताःततोजाताःकंसेनविहिंसिताइत्यन्वयः ४८ सादेवकी अधुनाकुत्र आसतइत्यतआह तइमइति ४९
ततःकिमत्राह इतइति ५० अभिज्ञानार्थं तन्नामानिनिर्दिशति स्मरइत्यादिना मद्गतिंमत्स्थानम् ५१ अयच्छतांदत्तवंतौ ५२ अजिघ्रदाघ्राणंकृतवती ५३ सुतानांस्पर्शेनपरिस्नुतंक्षरितंसृतमित्यर्थः मा
ययामहिम्ना ५४ अमृतमिवस्वादु लुप्तोपमं तस्याःदेवक्यास्तनयस्यगदाभृतःकृष्णस्यकृत्स्नेयोगेषष्ठी नारायणस्यांगस्पर्शेनप्रतिलब्धंआत्मदर्शनंआत्मज्ञानंयेषांतेतथा ५५

५६ कृष्णस्यसंसमीचीनांअबाधितांसुष्ठूचितांनान्यस्येतिकृष्णसंसूचितांमायांमाहिमानम् ५७ अनेनेंद्रजालंभातिदेशेनोपसंहरति एवमिति कृष्णेनसंसूचितेयंमाया अथापिबह्वचःसंतीत्यतोवोपसं हरतिएवामिति ५८ फलमाह यइतिअमृतवन्निर्मलकीर्त्तेः जगतोघंपापंदुःखंवाभिनत्तीतिजगदघभित् भक्तानांसत्प्रशस्तंकर्णपूरंकर्णाभरणं तस्यहरेःक्षेमधाममोक्षलक्षणंस्थानंयाति ५९ इतिश्रीभागव तेम०दशमस्कंधेवि०टीकायांचतुःसप्ततितमोध्यायः ॥ ७४ ॥ प्रेक्षावतांभगवत्तत्वविज्ञानेऽधिकारइतिलक्षणवृत्त्यातन्माहात्म्यंकथमत्यास्मिन्नध्याये तत्रश्रुतभगवन्माहात्म्योराजाविशेषविवित्सयाशुकंपृच्छ तिसर्वासामिति किमत्रसंशयबीजमित्यतउक्तं गोविंदेत्यनेन १ सर्वासुप्रेमवान्मय्येवप्रेमवानूइत्युक्तमुना २ एकस्यांकिमतिप्रतीयतइतिप्रश्नावकाशोनास्तीतिभावेनपरिहरति महिषीणामिति ३ कथंप्रख्यातिरितितांवक्तुमुपक्रमते कदाचिदिति तच्चरितं ४ स्वस्यारुक्मिण्यास्तल्पेतल्पमस्थितं ५ राजन्हरिचरितमतिचित्रमितिभावेनतत्स्वरूपलक्षणमाह यइति ६ यद्गृहंरुक्मिण्यैकल्पंतस्मिन्नं

तेनमस्कृत्यगोविंदंदेवकींपितरंबलम् ॥ मिषतांसर्वभूतानांययुर्धामविहायसा५६तान्दृष्ट्वादेवकीदेवीमृतागमननिर्गमम् ॥ मेनेसुविस्मितामायांकृष्णसंसूचि तांनृप ५७ एवंविधान्यद्भुतानिकृष्णस्यपरमात्मनः ॥ वीर्याण्यनंतवीर्यस्यसंत्यनंतानिभारत ५८ सूतउवाच ॥ यइदमनुशृणोति श्रावयेद्वामुरोरश्चरितम मृतकीर्तेर्वर्णितंव्यासपुत्रैः ॥ जगदघभिदलंतद्भक्तसत्कर्णपूरंभगवतिकृतचित्तोयातितत्क्षेमधाम ५९ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेचतुः ॥ सप्ततितमोऽध्यायः ॥७४॥ राजोवाच ॥ सर्वासांमहिषीणांतुगोविंदासक्तचेतसाम् ॥ मय्येवप्रेमवान्विष्णुरितिनिश्चितचेतसाम् १ समःसर्वासुवाकृष्ण एकस्यांप्रेमवानुत ॥ तन्मेत्वंशंसतच्छ्रोतुंरतिरस्तिममप्रभो २ श्रीशुकउवाच ॥ महिषीणांतुसर्वासांप्रथमाभीष्मनंदना ॥ प्रेमवानधिकंतस्यामिति प्रख्यातिरूर्जिता ३ कदाचित्प्रेमकलहःकेशवेनतयासमम् ॥ कृतस्तच्छृणुकौरव्यकात्स्न्र्येनकथयामिते ४ कर्हिचित्सुखमासीनंस्वतल्पस्थंजगद्गुरुम् ॥ पतिंपर्यचरद्भैष्मीव्यजनेनसखीजनैः ५ यएतल्लीलयाविश्वंसृजत्यत्त्यवतीश्वरः ॥ सहिजातःस्वसेतूनांगोपीथाययदुष्वजः ६ तस्मिन्नंतर्गृहेभ्राजन्मु क्तादामविलंबिना ॥ विराजितेवितानेनदीपैर्मणिमयैरपि ७ मल्लिकादामभिर्दिव्यैर्द्विरेफकुलनादितैः ॥ जालरंध्रप्रविष्टैश्चगोभिश्चंद्रमसोरुणैः ८ पारिजा तवनामोदवायुनोद्यानशालिना ॥ धूपैरागरुवैराजन्जालरंध्रविनिर्गतैः ९ फयःफेननिभेशुभ्रेपर्यंकेकशिपूत्तमे ॥ उपतस्थेसुखासीनंजगतामीश्वरंपतिम् १० वालव्यजनमादायरत्नदंडंसखीकरात् ॥ तेनवीजयतीदेवीउपासांचक्रईश्वरम् ११ सोपाच्युतंकणयतीमणिनूपुराभ्यांरेजेंगुलीयवलयव्यजनाग्रहस्ता ॥ वस्त्रांतगूढकुचकुंकुमशोणहारभासानितंबधृतयाचपराद्धर्यकांच्या १२

तर्गृहेपर्यंकेदंतविहितमंचेकशिपूत्तमेतस्मिन्मृदुवस्त्रप्रावरणास्तरणेसुखासीनंपतिमुपतस्थइत्यन्वयः मुक्तादाम्नांविलंबोस्यास्तीतिमुक्तादामाविलंबितेन उपरिबद्धचित्रपटेनेत्यर्थः ७ अरुणैरित्यने नचंद्रोदयकालभवागावोलक्ष्यंते ८ पारिजातानांमंदाराणांवनस्यकाननस्यामोदेनयुक्तेनवायुनाशोभिते कीदृशेन उद्यानइवशालिनामनोहरेण पारिजातवनस्यसंभजनीयस्यसेव्यस्यामो दस्यसंबंधिनावायुनावा आगरुवैरगुरुसंपृक्तैः ९ पयःफेननिभेजलबुद्बुदवन्मसृणे १० किंकर्मेतितत्राह वालव्यजनमिति ११ उपाच्युतंअच्युतस्यसमीपे उन्नमदवनमतोःपादयोर्मणिनूपुराभ्यां क्वणयती अंगुलीयाख्यवलयेनव्यजनेनचयुक्तंहस्ताग्रंयस्याःसातथा पृथक्कृतेवलयेहस्तमूलेतिवक्तव्यंनतुहस्ताग्रेइति वस्त्रांतेनवस्त्रांचलेनगूढयोःकुचयोःलिप्तकुंकुमचूर्णसंबंधेनशोणस्यरक्तस्यहारस्य मुक्तादाम्नोभासायुक्तोपलक्षणेतृतीया नितंबधृतयाकटिप्रदेशवेष्टितयापराद्धर्यकांच्याअनर्घ्यरशनयाचयुक्ता १२

हरिःनीलनीरदकांतिः श्रीकृष्णःयालीलयाधृततनोर्भगवतः अनुरूपरूपाअनुकूलसौंदर्या अनुगुणवृत्तावा तांरुक्मीणीं आबभाषइत्यन्वयःनिष्कंग्रैवेयकंअलककुंडलाभ्यांनिष्कालंकृतकंठेनचयुक्तवक्त्रउल्लसत्स्मितमेवसुधायस्याःसातथाताम् १३ ईप्सिता प्रार्थिता श्रीमद्भिःश्रीकटाक्षविषयैर्हेराजपुत्रि १४ वरणेगुणानाह प्राप्तानिति वाचादत्ता देववृषोपमान्देवश्रेष्ठसमानान् १५ स्ववरणांगीकारेदोषानाहराजभ्यइति अर्थीत्यादिगुणोपेतान्नृपान्हित्वा राजभ्यइत्यादिदोषयुक्तानस्मान्कस्मात्प्राप्तेत्यन्वयः १६ एवंविधपुरुषप्राप्तौयोषितांभयंभवतीत्याह पुंसामिति अलोकपथमीयुषांलोकविलक्षणमार्गवर्तिनांपुंसांपदवीमास्थिताःयोषितः प्रायःसीदंतीत्यन्वयः १७ अस्माद्दोषाच्चवयंनवरणीयाइत्याह निर्श्किचनाइति आढ्याराजकुमार्यः १८ अयंचैकोहेतुर्लोकेविवाहेइत्याह ययोरिति ऐश्वर्याकृतिरैश्वर्ययुक्ताकारः भवः सौंदर्यं २९ एतद्गुणगुणसर्वस्वं अदीर्घसमीक्षयाअल्पबुद्धया मुधावृथा २० २१ २२ स्मयनुत्तयेअहंकारनिरासाय असतांदुरात्मनांतेजोपहरताअभिमानलक्षण

तांरुक्मिणींश्रियमनन्यगतिंनिरीक्ष्ययालीलयाधृततनोरनुरूपरूपा ॥ प्रीतःस्मयन्नलककुंडलनिष्ककंठवक्त्रोल्लसद्स्मितसुधांहरिराबभाषे १३ श्रीभगवानुवाच ॥ राजपुत्रीप्सितांभूपैर्लोकपालविभूतिभिः ॥ महानुभावैःश्रीमद्भिरूपौदार्यबलोर्जितैः १४ तान्प्राप्तानर्थिनोहित्वाचैद्यादीन्स्मरदुर्मदान् ॥ दत्ताभ्रात्रास्वपित्राचकस्माद्देववृषोपमान् १५ राजभ्योबिभ्यतःसुभ्रुसमुद्रंशरणंगतान् ॥ बलवद्भिःकृतद्वेषान्प्रायस्त्यक्तनृपासनान् १६ अस्पष्टवर्त्मनांपुंसामलोकपथमीयुषाम् ॥ आस्थिताःपदवींसुभ्रुप्रायःसीदंतियोषितः १७ निर्श्किचनावयंशश्वन्निर्श्किचनजनप्रियाः ॥ तस्मात्प्रायेणनोह्याढ्यानभजंति सुमध्यमे १८ ययोरात्मसमंवित्तंजन्मैश्वर्याकृतिर्भवः ॥ तयोर्विवाहोमैत्रीचनोत्तमाधमयोःक्वचित् १९ वैदर्भ्येतदविज्ञायत्वयाऽदीर्घसमीक्षया ॥ वृतावयंगुणैर्हीनाभिक्षुभिःश्लाघितामुधा २० अथात्मनोनुरूपंवैभजस्वक्षत्रियर्षभम् ॥ येनत्वमाशिषःसत्याइहामुत्रचलप्स्यसे २१ चैद्यशाल्वजरासंधदंतवक्त्रादयोनृपाः ॥ द्विषंतिमांवरारोहेरुक्मीचापितवाग्रजः २२ तेषांवीर्यमदांधानांद्दप्तानांस्मयनुत्तये ॥ आनीतासिमयाह्यद्धातेजोपहरताऽसताम् २३ उदासीनावयंनूनंनस्त्रयपत्यार्थकामुकाः ॥ आत्मलब्ध्यास्महेपूर्णानेहात्मसदृशाःक्रियाः २४ एतावदुक्त्वाभगवानात्मानंवल्लभामिव ॥ मन्यमानामविश्लेषात्तद्दर्पघ्नउपारमत् २५ इतित्रिलोकेशपतेस्तदात्मनःप्रियस्यदेव्यश्रुतपूर्वमप्रियम् ॥ आश्रुत्यभीताहृदिजातवेपथुश्चिंतांदुरंतांरुदतीजगामह २६ पदासुजातेननखारुणश्रियाभुवंलिखंत्यश्रुभिरंजनासितैः ॥ आसिंचतीकुंकुमरूषितौस्तनौतस्थावधोमुख्यतिदुःखरुद्धवाक् २७

प्रभावप्रणाशंकुर्वतामयानीतासीत्यन्वयः २३ स्वभावंसूचयति उदासीनाइति उदासीनाविषयव्यापारशून्याः स्वपुष्पादिवदप्रसिद्धावा नस्त्रयपत्यार्थकामुकाःकलत्रपुत्रधनलोलुपान आत्मलब्ध्यास्वरूपलाभेनपूर्णाअलंबुद्धयःआस्महे इहक्रियाश्चआत्मसदृशाःकर्माणिजीवकर्मतुल्यानिनभवंतिअतिमानुषाणीत्यर्थः २४ अविश्लेषान्निरंतरसाहित्येनास्थितेरात्मानंवल्लभामिवमन्यानांप्रियतमाम् २५ यदाहरिणैतादृशंदुःखकरंवचनमुक्तोपरतंतदादेवीआत्मनःप्रियस्यात्रिलोकेशपतेरश्रुतपूर्वमप्रियंवचनमाश्रुत्यदुरंतांचिंतांजगाम प्रत्ययारंभेप्रतिवचनोपक्रमेद्वौइतिवचनात् इतिवचनोपक्रमभीताअएतवद्दिजातवेपथुःउत्पन्नकंपा तल्लक्षणमाह रुदतीति २६ एतदेवविवृणोति पदेति रक्तनखप्रभयाअरुणाश्रीर्यस्यसतथातेनसुजातेनकोमलेनपदाभुवंलिखंती अंजनासितैःकृष्णैःअश्रुभिःकुंकुमरूषितौस्तनौआसिंचतीअधोमुखीभूत्वातस्थावित्यन्वयः २७

सुखदुःखादिभिर्विनष्टाइदंकर्तव्यमित्यपश्यंतीबुद्धिर्यस्याःसातथा श्लथद्विगलद्वलयोयस्यसतथातस्मात् केशान्प्रविकीर्यदेहश्चपपातकीदृशःविभ्यत्संचलन्कंपमानइत्यर्थः रंभाकदली २८ हास्यंनाम शृंगारादिष्वेकोरसःतस्यप्रौढिंसमुद्रेकं करुणःकरुणारसंप्राप्तः अस्यविवरणमन्वकंपतेति २९ चतुर्भुजःकृष्णःद्वाभ्यांभुजाभ्यांउत्थाप्यद्वाभ्यांकेशान्समूह्यएकीकृत्यषड्भावक्रमंप्रमृजत्इतिद्योतनायचतुर्भुजइतिप्रत्युक्तम् ३० अश्रूणांकलाययोस्तेतथा शुचोपहतौकृशौस्तनौच अनन्यविषयांअन्यस्पर्शनायोग्याम् ३१ अतदर्हांप्रेमगर्भविषादवचनायोग्याम् ३२ मामांप्रतिमाऽसूयेथाःगुणेदोषदर्शनंनकुरु तस्याःतववचःश्रोतुकामेनमयाक्ष्वेलयानर्मलक्षणलीलयाचरितंकृतम् ३३ प्रेमसहितसंरंभेणस्फुरिताधरंकंपमानाधरोष्ठंकटाक्षेणतिर्यक्दर्शनेनारुणापांगेनरक्तनेत्रप्रांतेनसुंदरभ्रुकुटीतटम् ३४ कामिवज्जनविडंबनंमयाकारीत्याशयेनाह अयमिति प्रियासहनर्मैःस्नेहगर्भपरिहासवचनैर्यामःकालावयंयोनीयतइतियदयमेवगृहस्थानांगृहेषुपरमोलाभोहीत्यन्वयः ३५ द्विविधंवाक्यंइष्टसाधनावबोधकमेकमेकंदुःखपरिहारात्मकंतत्रपश्चादुक्तंदुःखविनाशकमितिभावेनाह सैवमिति ३६ पूर्वोक्तमभीष्टसाधनावबोधकत्वेनोपादेयमितिसूचयितुमाह बभाषइति ३७ देववृषोपमान्नृपान्हित्वास्मान्कस्माद्धृतवतीत्यत्राह

तस्याःसुदुःखभयशोकविनष्टबुद्धेर्हस्ताच्छ्लथद्वलयतोव्यजनंपपात ॥ देहश्चविक्लवधियःसहसैवबिभ्यद्रंभेववातविहताप्रविकीर्यकेशान् २८ श्रीशुकउवाच ॥ तद्दृष्ट्वाभगवान्कृष्णःप्रियायाःप्रेमबंधनम् ॥ हास्यप्रौढिमजानंत्याःकरुणःसोन्वकंपत २९ पर्यंकादवरुह्याशुतामुत्थाप्यचतुर्भुजः ॥ केशान्समूह्यतद्बक्रंप्रामृजत्पद्मपाणिना३०प्रमृज्याश्रुकलेनेत्रेस्तनौचोपहतौशुचा ॥ आश्लिष्यबाहुनाराजन्ननन्यविषयांसतीम् ३१ सांत्वयामाससांत्वज्ञःकृपयाकृपणांप्रभुः ॥ हास्यप्रौढेर्भ्रमच्चित्तामतदर्हांसतांगतिः ३२ श्रीभगवानुवाच ॥ मामावैदर्भ्यसूयेथाजानेत्वांमत्परायणाम् ॥ त्वद्वचःश्रोतुकामेनक्ष्वेलाचरितमंगने ३३ मुखंचप्रेमसंरंभस्फुरिताधरमीक्षितुम् ॥ कटाक्षेणारुणापांगसुंदरभ्रुकुटीतटम् ३४ अयंहिपरमोलाभोगृहेषुगृहमेधिनाम् ॥ यन्नर्मैर्नीयतेयामःप्रिययाभीरुभाषिणि ३५ सैवंभगवताराजन्वैदर्भीपरिसांत्विता ॥ ज्ञात्वातांपरिहासोक्तिंप्रियत्यागभयंजहौ ३६ बभाषेऋषभंपुंसामीक्षतीभगवन्मुखम् ॥ सव्रीडहासरुचिरस्निग्धापांगेनभारत ३७ रुक्मिण्युवाच ॥ नन्वेतदेवमरविंदविलोचनाहयद्वैभवान्नभवतःसदृशोविभूम्नः ॥ क्वस्वेमहिम्न्यभिरतोभगवांस्त्रयधीशःक्वाहंगुणप्रकृतिरन्यगृहीतपादा ३८

नन्विति यद्वा इहजीवराशौआत्मसदृशानसंति अस्माकंक्रियाश्चनेत्यस्योत्तरमाह नन्विति वाइत्ययंकृष्णोक्तवाक्यार्थारंभेवर्तते नन्वित्यनुमतार्थेभवान्यदाहसमोनास्तीतिएतदेवंनुअनुमतं कथंतत्राह नेति विभूम्नः देशतःकालतोगुणतश्चापरिच्छिन्नस्यव्याप्तस्यभवतः सदृशोन्योनास्ति किंतुभवानेव रामरावणयोर्युद्धमितिवत् मत्सदृशीत्वमसीतिनेत्याह क्वेति भगवानैश्वर्यादिगुणसामग्रीसमुद्रोभवानूक्व राजादिवदन्याधीनत्वंक्वेनस्यादितितत्राह स्वइति अनेनस्वार्थाक्रियानास्तीत्युक्तंभवतिसत्त्वादिगुणप्रवर्तकत्वेनप्रकृतिशब्दवाच्याहंक तर्हित्रिलोक्यांकश्चिन्मत्समःस्यादित्यतोनेतिभावेनाह त्रयधीशइति त्रयाणांलोकानांत्रयाणांवेदानांत्रयाणांगुणानांवा ईशइत्यनेनइंद्रादिनिरासोभूदित्येतल्लोकपालविभूतिभिरित्यस्योत्तरं ब्रह्माद्यन्यतमोपिनेतिभावेनाह अन्योति अन्यैर्ब्रह्मादिभिः अनेन महानुभावैरित्यस्योत्तरं क्वाहमित्यमुनाश्रीमद्भिरित्यादेः ३८

राजभ्योबिभ्यत्तःसुप्तइतियदुक्तंतदर्थांगीकारेणपरिहरति सत्यामिति । हेउरुक्रम बल्पोदरभिमानिजनशिरोरत्नराजिराजितमहापादन्याससमुद्रेऽतःशेतइतिसत्य किंतु राजभ्याबभ्यतइत्यसत्य तद्वचर्थमुक्तंनेत्याह भयादिति राजृदीप्तावितिधातोःकार्यप्रकाशमानेभ्यःस्वशक्तिद्योतकेभ्यःसत्यादिगुणेभ्योभयादिवसज्जनशिक्षार्थइवशब्दः संसारावृत्तिहेतुभ्योगुणेभ्योबिभ्यज्जनःसमुद्रिक्तसुखार्थी समुद्रादिजलवासेनयथातपस्यतितथाहमिति । यद्वा पंचभूतमुद्रासहितत्वात्समुद्रेशरीरेऽतर्हृदिशेतेयत्सत्यंतत् दीप्यत्शब्दादिगुणेभ्योभयादिवांगुष्ठमात्रः । अंगुष्ठमात्रःपुरुषइतिश्रुतेः। शरीरांतस्थस्य जीवादविशेषाज्जननादिकमपिस्यादितितत्राह उपलंभनमात्रइति । केवलचिन्मयः अतोनदहधर्माअस्यस्युरितिभावः । एकत्रस्थितयोर्जीवेशयोर्विशेषःकथमत्राह आत्मेति । आत्मातथाविधस्वभावः किंनामधेयोभवानित्यतोवाह आत्मेति । आत्मासुखमेवाददातिनाण्वपिदुःखमित्यात्मा जीवस्तुशरीरमादायशरीरांतराणिनिर्मिमीतइतितच्छब्दवाच्यः बलवद्भिःकृतद्वेषानित्यस्यतात्पर्यंवक्ति यइ ति यःअनित्यकेंद्रियगुणैःकृतविग्रहःसत्वंताहङ्माहात्म्यः बलवांनिंद्रियग्रामइतिस्मृतेः बलवंतिपरिवर्तनवंतिनानायोनिष्वित्यतोनित्यानींद्रियाणीत्युच्यंते नियंतुमशक्यत्वाद्बलवंतीति भवत्प्रसा दादितरेषांइंद्रियजयोभवतस्तुस्वतइति पराञ्चिखानिव्यतृणात्स्वयंभूरितिश्रुतेः । प्रायस्त्यक्तनृपासनानित्यत्राह त्वत्सेवयेति तवसेवायस्याःसाहंत्वत्सेवातयात्वत्सेवयामयानृपासनंनृपपदंनृपशब्द वाच्यमात्रं ननुनृन्पांतीतिनृपालनरक्षणार्थोपेतं अंधंतमःप्रतिविधुतंतस्यजनंकृतमित्यर्थः तस्माद्भवानेवनृपशब्दमुख्यार्थत्वात्तत्त्वज्ञैःसर्वैस्त्यक्तंदत्तंनृपासनंयस्मैसत्यक्तनृपासनः । शिशुपालादयएवत्य क्तमुज्झितंनृपासनंयैस्तेतथात्वत्सेवयाहेतुनावातेत्यक्ताः ३९ अस्पष्टवर्त्मनामेत्यस्यार्थमाह त्वत्पादेति तवपादपद्ममकरंदसेविनांमुनीनांवर्त्मस्वरूपंस्फुटंस्पष्टंतथापित्वदुक्तंसत्यंनृपशुभिरज्ञानिभि

सत्यंभयादिवगुणेभ्यउरुक्रमांतःशेतेसमुद्रउपलंभनमात्रआत्मा ॥ योनित्यकेंद्रियगुणैःकृतविग्रहस्त्वंत्वत्सेवयानृपपदंविधुतंतमोंधम् ३९ त्वत्पादपद्ममकरंदजुषांमुनीनांवर्त्मस्फुटंनृपशुभिर्ननुदुर्विभाव्यम् ॥ यस्मादलौकिकमिवेहितमीश्वरस्यभूमंस्तवेहितमथोअनुमेमहवंति ४९ निष्किंचनोननुभवान्न यतोऽस्तिकिंचिद्यस्मैबलिंबलिभुजोप्यहरंत्यजाद्याः ॥ नत्वाविदंत्यसुतृपोंऽतिकमाढ्यतांधाःप्रेष्ठःसतांबलिभुजामपियोंऽतरास्से ४१ त्वंवैसमस्तपुरुषा र्थमयःफलात्मायद्वांछयासुमतयोविसृजंतिकृत्स्नम् ॥ तेषांविभोसमुदितोभवतःप्रसादस्वय्यांचयश्चरतयोःसुखदुःखिनोर्न ४२

दुर्विभाव्यंदुर्ज्ञेयंतस्मादस्पष्टमित्युच्यते । यद्वा मुनीनांवर्त्मनृपशुभिःस्फुटंदुर्विभाव्यंकिमुतववर्त्मेति अलोकपथमीयुषामित्यस्याप्ययमर्थइत्याह यस्मादिति । हेभूमन्नीश्वरस्यतवेहितमलौकिकमिवय स्मादथोतस्मात्तवेहितमनुकूलानिममईहितानिभवंति अलौकिकानीतिशेषः तवेहितमनुक्रियमाणानिममेहितान्यलौकिकानियस्मात्तस्मात्किमुतवेहितमलौकिकमितिवा ४० निष्किंचनावय मितदिंनिबोधयतःकिंचित्किंचिन्मात्रंनास्तिकिंतुसर्वमेवास्त्यतोभवान्निष्किंचनइत्युच्यते नत्वनाढ्यत्वंनिष्किंचनत्वमित्याह यस्माइति सर्वप्राणिदत्तबलिभुजोप्यजाद्यायस्मैबलिंहरंति सभवान्नि ष्किंचनइतिविदुषांपरिषदिनशोभतइतिशेषः तस्मात्प्रायेणनोह्याढ्यानभजंतीत्यत्रावधारयामहे नत्वेति आढ्यतांधाःऐश्वर्यमदांधाःत्वात्वांनविदंतिनजानंतिनलभंतेचेत्यन्वयः दूरस्थत्वान्नविदंतीति नेत्याह अंतिकमितिनेदिष्ठं नेदिष्ठमंतिकतमामित्यमरः अत्रहेतुरसुतृपइति स्वेंद्रियपोषणपरत्वात् अंतिकस्थत्वंस्पष्टयति बलिभुजामिति यस्त्वंबलिभुजांब्रह्मादीनामप्यंतरास्सेतिष्ठसिकिमुतेतरेषांनि यंतृत्वेनेतिशेषः अत्रप्रमाणमाह प्रेष्ठइति सतांप्रियतमः प्रियोहिज्ञानिनोऽत्यर्थमहंसचममप्रियइत्यतोज्ञानिदर्शनंप्रमाणं कस्मैदेवायहविषाविधेम इमारुद्रायस्थिरधन्वनेगिरइत्यादिश्रुतिः ४१ ययोरेवसमंवित्तंइत्याद्युक्तमनुवदति त्वंवाइति वैशब्दोहेत्वर्थः त्वंफलात्मासुखात्मा परमानंदस्वरूपोवैयस्मात्तस्मात्समस्तपुरुषार्थमयोऽर्थ्यतइत्यर्थः मयट्प्रत्ययःप्रधानार्थः । सर्वस्मात्मा धान्यस्वरूपः समस्तपुरुषैरर्थ्यमानस्वरूपइत्यर्थः येसुमतयःसम्यग्ज्ञानिनोयस्यतवयांछयाअनुग्रहेच्छयाकृत्स्नंपुत्रमित्रवित्तादिसर्वंविसृजंतिमुंचंति त्यक्तसर्वैषणाइत्यर्थः अनेनप्रकृतेकिमागतमत्राह

तेषामिति हेविभोतेषांसुमतीनांभवतश्चप्रसादःपूर्णसुखलक्षणोगुणःसमुदितःसम्यगुक्तः समानोवानास्तीत्यस्यकोभिप्रायइत्यतउक्तं यश्चेति चोऽप्यर्थे यश्चकोपिनास्तीत्यर्थः ननुयुवयोःकोपिगुणः समोनास्तिकिमत्राह त्रय्यांचेति त्रय्यांचशब्दात्स्मृतिष्वपिचतयोर्युवयोर्यश्चकोपिगुणोस्ति सकइत्यतोरतयोरित्यनेनसूचितः अग्निष्टोमेनस्वर्गकामोयजेतेतिवेदोक्तकर्मकर्तृत्वेनसुमतीनांत्रयीरतत्वं भवतोवेदप्रतिपाद्यत्वेनचेत्येवमाकारेणसमत्वं ननुजीवस्यचेतनत्वेनज्ञानानंदादिगुणोऽस्त्येवातःकथंसमोगुणोनास्तीत्यत्राह सुखदुःखिनोरिति सुखदुःखिनोर्युवयोर्मध्येकेवलपरिपूर्णसुखोभवांस्ते सुमतयोभवज्ज्ञानपर्यंतंदुःखिनइति ननुपश्चात्समगुणत्वमापन्नं योवानंदाद्विमुक्तःज्ञानानंदीभवतीतिश्रुतेरितीयमाशंका अल्पसंपूर्णशक्तित्वादल्पपूर्णसुखत्वतइतिस्मृतिवचनेनपरिहरणीया यद्वा येसुमतयःकृत्स्नंविसृजंतितेषांभवतःपुंसांभवदीयपुरुषाणांयस्त्वंफलात्मापरमानंदमोक्षरूपःसमुदितःसम्यगुक्तः त्रय्यांत्रिवेदविहितमार्गेवर्तमानयोःसुखदुःखिनोःधर्माधर्मानुष्ठानेनतत्तत्फलभुजोर्विहितप्रतिषिद्धकर्त्रोर्यस्त्वंफलात्मानसमुदितःसत्वंमेवृतोसीत्यन्वयः ४२ भिक्षुभिःश्लाघितामुयेत्यस्योत्तरंशृणु त्वमिति न्यस्तोवाङ्मनःकायलक्षणोदंडोयैस्तेन्यस्तदंडाःतैर्मुनिभिःवाचंयमैःनिर्जितेंद्रियग्रामैःयतिभिरित्यर्थः गदितानुभावःस्पष्टीकृतप्रभावस्त्वं अदीर्घसमीक्षयेतियदुक्तंतत्राह आत्मेति जगतामात्मास्वामीभजतामात्मदःसायुज्यमुक्तिप्रदश्चेतिदीर्घसमीक्षयानिश्चित्यमेमयात्वमभिहितःवृतोसि हिर्हेताववधारणइतियादवः भवतःभवज्जायमानमुदीरितमुदीरणंप्रेरणंयस्यसभवद्भवदुदीरितःसचासौकालःभवद्भवदुदीरितकालःतस्यगंधेनध्वस्ताशिषःनिरस्तसंपदःअद्रचो

त्वंन्यस्तदंडमुनिभिर्गदितानुभावआत्मात्मदश्चजगतामितिमेवृतोऽसि ॥ मुक्त्वाभवद्भवदुदीरितकालगंधध्वस्ताशिषोऽञ्जभवनाकपतीन्कुतोऽन्यान् ४३ सत्यंवचस्तवगदाग्रजयश्चभूपान्विद्राव्यशार्ङ्गनिनदेनजहर्थमांत्वम् ॥ सिंहोयथास्वबलिमीशपशुंस्वभागंतेभ्योभयाद्यदुदधिंशरणंप्रपन्नः ४४ यद्वांछया नृपशिखामणयोऽगवैन्यजायंतनाहुषगदादयऐकपत्यम् ॥ राज्यंविसृज्यविविशुर्वनमंबुजाक्षसीदंतिनानुपदवींतइहास्थिताःकिम् ४५ कांक्षीवृणीततवपादसरोजगंधमाघ्रायसन्मुखरितंजनतापवर्गम् ॥ लक्ष्म्यालयंत्वाविगणय्यगुणालयाढ्यंमर्त्याशिषोरुभयमर्थविविक्तदृष्टिः ४६ तंत्वानुरूपमभजंजगतामधीशमात्मानमत्रचपरत्रचकामरूपम् ॥ स्यान्मेतवांघ्रिशरणंश्रुतिभिर्भ्रमत्यायेवैभजंतिउतयांत्यनृतापवर्गम् ४७

जातोब्जःब्रह्मा सोद्रचएवपुरुषंसमुद्भूत्यामूर्छयदितिश्रुतेः भवोरुद्रःनाकपतिरिंद्रःएतान्मुक्त्वा अन्यांश्चैद्यादीन्मुक्त्वेतिकुतःकिमुवक्तव्यमित्यर्थः एषामदीर्घसमीक्षयावृतोसीत्यर्थः ४३ राजभ्योबिभ्यतइत्येतत्प्रकारांतरेणाक्षिपति । सत्यमिति हेगदाग्रज चशब्दएवार्थे यस्त्वमेवशार्ङ्गनिनदेनभूपान्विद्राव्यमांजहर्थहृतवानासि कथमिवयथासिंहःस्वभागंपशुलक्षणंस्वबलिंस्वस्यभरणे योग्यंहरतितथातेभ्योराजभ्योभयाद्यदुदधिंशरणंप्रपन्नइतियत्तत्तत्ववच: सत्यंसाधुभावंत्यजतीति अस्मद्वचामोहनार्थमुक्तमितिभाव: ४४ प्रायःसीदंतियोषितइत्यत्रवाक्ति यद्वांछयेति नृपशिखामणयोऽगादयोयस्यतवश्रीपादनिषेवणवांछयाऐकाधिपत्यंराज्यंसाम्राज्यंविसृज्यवनंविविशुः तेराजानःसीदंतीकिंतवानुपदवींनास्थिताःकिं आस्थायनसीदंतीत्यर्थः अंबुजाक्षेत्यनेननयनयोःस्निग्धंमुणंसूचयति ४५ ४६ स्थिरबुद्धित्वेनपुरुषाणांविषादाभावेपिभीरूणांस्त्रीणांसस्यादितिमंदाशंकांश्लोकद्वयेनपरिहरति केति कांक्षीसततरमणकांक्षिणीजनतायाःजनसमूहस्यापवर्गोमोक्षो यस्मात्सतथातं सद्भिःमुखरितंमुख्यत्वेनेरितंदत्तमुपदिष्टं प्रधानीकृतमित्यर्थः एवंविधंतवपादसरोजगंधमाघ्रायानिषेव्य पुनरत्रपरत्रचकामरूपंत्वामविगणय्यमर्त्याशिषानाशशिरस्कसंपदाकारणेनउरुभयंगुरुतरभीतिमंतंजनंवृणीतेत्यन्वयः कीदृशंत्वां लक्ष्म्याःसकलसंपदआलयंशौर्यादिगुणानामालयंअतएवाढ्यंच यस्त्वमविशेषेणस्त्रीपुरुषाणामर्थनीयगुणरत्नाकरस्तंत्वामभजं चैद्यादीन्हित्वेतिशेषः कथंविधंत्वामनुरूपमनुकूलसौंदर्यं जगतामधीशंजगतामीश्वराणांब्रह्मादीनामपिसंपत्प्रदं अतएवात्मानंतेषांस्वामिनं कीदृशंहंचअर्थीविविक्तदृष्टिःअर्थोयमितिविवेकीकृतदृष्टिः अव्यक्तज्ञानेत्यर्थः

किंबहुनेत्याशयेनाह स्यादिति कीदृश्याःभ्रमत्याःभ्रमःतिअत्रयस्याः साभ्रमतिः तस्याविपरीतज्ञाननामाशक्त्याइत्यर्थः कनयमवगम्यतइत्यतउक्त [illegible] माभ्रमतामत्रीयावेदैरधिगम्यतइत्यादिस्मृत्याच मुखंतुवदनेमुख्यइतियादवः तीत्पन्नमितिश्रुतिः पारत्रिककामरूपत्वंदर्शयति यइति येत्वांभजंतितउतएवानृतापवर्गंसंसारान्मोक्षंयांतीत्यन्वयः तमेवंविद्वानमृतइहभवतीतिश्रुतिर्वैशब्देनगृहीता ४७ नृपाणांहेयत्वेदोषांतरमाह कस्याइति हेअच्युतस्वतःपरतोवाच्युतिरहित्व भवतोपदिष्टानृपाश्चैचादपःकस्याःस्त्रियःस्युः नकस्याअपिभवंतीत्यर्थः सर्वदोषेष्वधिकोदोषोयमितिभावेनाह यत्कर्णमूलमिति हेअरिकर्शन मृडोरुद्रः रुद्रविरिंचसभासुगीतायुष्मत्कथायेषांनृपाणांकर्णमूलंनोपयायान्नोपगच्छतितइतिशेषः तासांस्युरितिपाठेयासांकर्णमूलंतासांस्त्रीणां तेनृपाःस्युरित्यर्थः ४८ एतदेवस्पष्टयति त्वक्श्मश्रुरोमेति यास्त्रीतवपदाब्जमकरंदमजिघ्रतीअसेवमानासाजीवच्छवंजीवन्मृतंपुरुषंभजति तत्रनिमित्तंकाममतिरिति अस्यसंपदमाह बहिस्त्वगादिभिःषिनद्धंबद्धं अंतर्मांसादिभिःसंवृतं ननुविग्रहोप्येतादृशःकृष्णस्यकिंनस्यादविशेषादितिचेन्न आनंदश्मश्रुरानंदकेशइत्यादिश्रुतेर्हेतोः कालात्ययापदिष्टत्वात् ४९ अहमप्येतादृशीनेत्याह अस्तीति चरणघोरनुरागःपराभक्तिरस्तीतिभक्तेःसर्वदैकप्रकारत्वंकथयति मयातवनकोप्यर्थइतिभावेनाह आत्मन्निति आत्मन्नात्मनि ममतुत्वत्तोमहानर्थोस्तीतिभावेनाह मयिचेति मयिमहाधिकारिण्यां भक्तेर्नअतिरिक्तादृष्टिरनुग्रहलक्षणायस्यसतथा भक्त्यनुकूलानुग्रहइत्यर्थस्तस्यचशब्दोभक्तेरन्वयव्यतिरेकसूचकः तत्कुतइतिचेन्नयएपदेवःपरोक्ष रोमरस्तंवाएनमाहुः भक्ताइत्यादिश्रुतिसिद्धत्वात् अनेनैवतारतम्यंसूचयति अथातोभक्तिमीमांसेतिश्रुतिविहितत्वात् अन्योन्यंहेतुहेतुमद्भावंच मिलितौवाएतौभवतोयदनुग्रहश्चभक्तिश्चेतिश्रुतिसिद्धमनुवदति मिलितावन्योन्यंहेतुहेतुमद्भावोपेतौ भक्त्यनुकू

कस्यास्युरच्युतनृपाभवतोपदिष्टाःस्त्रीणांगृहेषुखरगोश्वविडालभृत्याः ॥ यत्कर्णमूलमरिकर्शन नोपयायाद्युष्मत्कथामृडविरिंचसभासुगीता ४८ त्वक्श्मश्रुरोमनखकेशपिनद्धमंतर्मांसास्थिरक्तकृमिविड्भरितांत्रवीतम् ॥ जीवच्छवंभजतिकाममतिर्विमूढायातेपदाब्जमकरंदमजिघ्रतीस्त्री ४९ अस्त्यंबुजाक्षममतेचरणानुरागआत्मन्रतस्यमयिचानतिरिक्तदृष्टेः ॥ यर्ह्यस्यवृद्धयउपात्तरजोतिमात्रोमामीक्षसेतदुहनःपरमानुकंपा ५० नैवालीकंभरत्येववचस्ते मधुसूदन ॥ अंबायाइवहिप्रायःकन्यावादरतिःक्वचित् ५१ मुग्धायाश्चापिपुंश्चल्यामनोभ्येतिनवंनवम् ॥ बुधोसतींनबिभृयात्तांबिभ्रदुभयच्युतः ५२

लानुग्रहविशेषंकथयति यर्हीति यर्हियदास्यजगतोभिवृद्धयेसृष्टिलक्षणायैउपात्तंस्वीकृतंरजोतिमात्रंकेवलंरजोयेनसतथा यद्वा उपात्ताःप्रलयेमूलरजसिअतीताःसंगताःमात्राअंशायेनसतथा मूलरजोगुणोपादानवानित्यर्थः तदुतदेवमामीक्षसे हविशेषतइत्यर्थः यदास्थितिलक्षणायैउपात्तारजसोतिरिक्तामात्रासत्वलक्षणायेनसतथा तदामामीक्षसे यदातिवृद्धिरहितोवर्धनंछेदनंसंहारस्तस्मै उपात्तारजोतिक्रांतामात्रातमोलक्षणायेनसतथा अत्रेक्षणंनामतत्तत्कार्यमनुस्मृत्यरजआदिमदधीनतत्तद्गुणाभिवर्धनमभिप्रेतं तदुक्तं अथत्रिगुणाह्येषाप्रकृतिरगुणोवावविष्णुःसयदाह्यरजारजोस्याउद्वर्धयतीत्यादिश्रुतौनैतत्स्वप्रयोजनमुद्दिश्येतिनःअस्मानुद्दिश्यकृतापरमकृपेतिभावः ५० भगवतिभगवदुक्तेरेवंतात्पर्यप्रकाश्यानिगमयति नैवेति हेमधुसूदनतेतववचःअलीकंअसत्यलक्षणंभारंनभरतिनतुबिभर्त्येव भृञ्भरणइतिधातुः कथमिवअंबायाःकन्यावादरतिरिव यथामातुःकन्याप्रदानकथायांरतिस्तात्पर्याभिनिवेशलक्षणानालीकंभवति प्रायःएवायमर्थोऽनुमतोहि समुच्चयेनुमत्यां चाप्येवसाम्येवधारणइतियादवः क्वापिमातूरतिरलीकंभरातितववचःक्वाप्यलीकंनभवत्येवैतदुक्तं क्वचिदिति क्वचित्क्वापि ५१ इदानींकृष्णस्यनियतदारत्वमात्मनोनियतपातिव्रत्यंचध्वनयंतीदेवीपुंश्चलीमधर्मवादयति मुग्धायाइति अस्यार्थआचार्योक्तोत्रलिख्यते यामसतींबुधोनाबिभृयात् यांचतांबिभ्रदृष्टादृष्टच्युतोभवतितस्याःअपिपुंश्चल्यास्त्वयिमनोनवंनवमभ्येतीति मूर्छयामोहिन्यामूढत्वंयुवयोरपि तत्रतत्रसुलभमुपलब्धमितिमंदाशंका अमुग्धैवतुमुग्धेवत्वदुःखादुःखितेवच श्रीर्दशमेद्वारिश्चैवनैवैतौमोहदुःखिनावित्यादिस्मृत्यापरिहर्तव्या ५२

भगवत्योक्तंभगवताकिमनुमतंविमतामितिविकल्पंपरिहरति साध्विति एतद्वचः प्रलंभितास्तोभिता अन्वर्थमनुकूलार्थम् ५३ हेकामिनिईश्वरियंयंकामंकामयसेसर्वंत्वयिनित्यदासांतिहियस्मात्तस्मात्कांविभूतिंकामयसेनकामपीत्यर्थः यद्वायंयंकामंकामयसेतान्मयिकामयस्व तेषामभावाद्वच्मीत्याह संतीति तस्मात्प्रियवचनमुक्तंकामयति ५४ भर्तुःस्नेहःपातिव्रत्यंचाभीष्टसंपत्प्राप्तौनिमित्तं तत्त्ववास्तीत्याह उपलब्धमिति उपलब्धंदृष्टं तत्रहेतुर्यद्वाक्यैरिति मयिसंलग्नाधीर्नापकर्षिताअन्यत्रननीतायद्यस्मान्नित्यमुक्तत्वादावयोःदांपत्यंनित्यम् ५५ तत्रमुक्तिमंतरेणदांपत्यापेक्षयास्मद्भजनमयुक्तमित्याशयेनाह यइति ५६ ननुतर्हिसंपदर्थेभगवद्भजनंयुक्तंहीतितत्राह मामिति सतःसत्यस्यमोक्षस्यपार्तियेसंपल्लक्षणभोगाः कथंतेषांभोगानांनिरयेसत्त्वांप्राप्तितत्राह मात्रात्मकत्वादिति मात्रात्मकत्वात्तेषांभोगानांशब्दादिविषयाणांविनाभूतत्वान्निरयेसुसंगमःसुलभःसंगमइत्यर्थः ५७ सर्वभक्तेषुत्वमेवमुख्यभक्तेत्याशयेनाह दिष्ट्येति हेगृहेश्वर्ययुतेदेवित्वयामय्यनुवृत्तिःभक्तिःकृतेतियत्तद्दिष्ट्यात्वदन्येषांभवमोचनीवा असावनुवृत्तिःखलैःसुदुष्करादुराशिषःदुष्टेच्छायाःपत्यासहदुर्वाक्यायाःवा असुंभरायाःस्वप्राणपोषणपरायाः विकृतिंजुषःजारलक्षणव्याजसेवमानायाःस्त्रियःसुतरांसुदुष्करादिष्ट्या

श्रीभगवानुवाच ॥ साध्वेतच्छ्रोतुकामैस्त्वंराजपुत्रिप्रलंभिता ॥ मयोदितंयदन्वर्थंसर्वंतत्सत्यमेवहि ५३ यंयंकामयसेकामंमयिकामयकामिनि ॥ संतिह्येकांतभक्तायास्तवकल्याणिनित्यदा ५४ उपलब्धंपतिप्रेमपातिव्रत्यंचतेनघे ॥ यद्वाक्यैश्चोद्यमानायानधर्मिण्यपकर्षिता ५५ येमांभजंतिदांपत्येतपसाव्रतचर्यया ॥ कामात्मानोपवर्गेशंमोहिताममायया ५६ मांप्राप्यमानिन्यपवर्गसंपदंवांछंतियेसंपदएवसत्पतिम् ॥ तेमंदभाग्यानिरयेपियेस्युर्मात्रात्मकत्वान्निरयेसुसंगमः ५७ दिष्ट्यागृहेश्वर्ययुतेमयित्वयाकृतानुवृत्तिर्भवमोचनीखलैः ॥ सुदुष्करासौसुतरांदुराशिषोह्यसुंभरायाविकृतिंजुषःस्त्रियः ५८ नत्वादृशींप्रणयिनींगृहिणींगृहेषुपश्यामिमानिनियय्यास्वविवाहकाले ॥ प्राप्तानृपानविगणय्यरहोरहोमेप्रस्थापितोद्विजउपस्थितसत्कथस्य ५९ भ्रातुर्विरूपकरणंयुधिनिर्जितस्यप्रोद्वाहपर्वणिचतद्वधमक्षगोष्ठ्याम् ॥ दुःखंसमुत्थमसहास्मदयोगभीत्यानैवाब्रवीःकिमपितेनवयंजिताःस्ते ६० दूतस्त्वयात्मलभनेसुविविक्तमंत्रःप्रस्थापितोमयिचिरायतिशून्यमेतद् ॥ मत्वाजिहासुरिदमंगमनन्ययोग्यंतिष्ठेस्ततस्त्वयिवयंप्रतिनंदयामः ६१ श्रीशुकउवाच ॥ एवंसौरतसंलापैर्भगवान्देवकीसुतः ॥ स्वरतोरमयारेमेनरलोकंविडंबयन् ६२ तथाऽन्यासामपिस्त्रीणांगृहेषुगृहवानिव ॥ आस्थितोगृहमेधीयान्धर्मांल्लोकगुरुर्जुषन् ॥ ६३ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेपंचसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

गृहंमंगलमंदिरंच ऐश्वर्ययुतश्चदिष्ट्यागृहैश्वर्ययुतःतस्मिन्नितिवा ५८ श्लोकत्रयेणदेव्याःपूर्वोक्तांभक्तिंलालयति नत्वादृशीमित्यादिनाउपस्थितासमीपंप्रापितात्वत्सत्कथा यस्यसतथातस्यर होरहःअतिरहसि ५९ विरूपकरणंकेशवपनं प्रोद्वाहपर्वणिविवाहलक्षणेउत्सवदिवसेअक्षगोष्ठ्यांद्यूतविशेषक्रीडायां तस्यभ्रातुर्वधं अस्मदयोगभीत्याअस्मद्विरहभयेन ६० आत्मलभनेस्वलाभार्थंसुष्ठुविविक्तमंत्रःस्पष्टीकृतरहोवचनःचिरायतिविलंबनंकुर्वतिसति एतज्जगच्छून्यंअसदमंगलंमत्वाऽनन्ययोग्यंअन्यपुरुषसंगायोग्यमिदंअंगंजिहासुस्तिष्ठेरितियावत् ६१ देव्यागुणाब्रह्मायुषापिवक्तुंनशक्याइतिसंक्षिपतीत्याह श्रीशुकइति सौरतसंलापैःसुरतसंबंधिमिथोभाषणैः नरलोकंमनुष्यजनंविडंबयन्अनुकुर्वन् ६२ इदमन्यत्रातिदिशति तथेति गृहवान्गृहस्थइवआस्थितःउद्वतश्चप्रकाशितः आङ्उद्वमनइतिसूत्रम् ॥ ६३ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटीकायांपंचसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥ ७ ॥

अध्यायद्वयेनलोकविडंबनानुचरितंकथयति तेनसतांज्ञानाभिवृद्धिरसतामन्यथेति तत्रादावेकैकस्यादशदशपुत्राआसन्नित्यादिकथयति एकैकशइति सर्वात्मसपदाअन्यूनदहादस्वभावसमृद्धया १ अ॰ पगंअपगमरहितम् २ एवमापिपराजयःस्त्रीणामेवेत्याह चार्विति ३ स्मायःमंदस्मितंतेनयुक्तोवलोकःस्मायावलोकः तस्यलवेनाल्पेनदर्शितेनभावेनस्पंदनलक्षणक्रिययाहारिणामनोहरेणभ्रुवो र्मंडलवलयेनप्रहिताःसौरतमंत्राः सुरतवर्धनमंत्राः एतैःशौंडैःपटुत्वमाप्तैःकामबाणैःकरणैःसंभोगसाधनैः यस्यहरेरिंद्रियंरेतोलक्षणंविमथितुंआलोडयितुंस्रावयितुंवा वशीकृतकामत्वेनदृढवीर्यत्वात् ४ याःपत्न्यःपक्ष्मकटाक्षैःस्थूणांतरेणस्तंभव्यवधानेनस्वीप्सितंसुतरामभीष्टंकृष्णमैक्षन्अपश्यन्ताइतिशेषः केनउच्यतेलक्ष्म्याःकांत्याएकधामप्रधानगृहंचसरसंसस्नेहंदुतंदीर्घीकृतंसृतंवावीक्षणंदर्शनंलक्ष्म्ये कधामसरसद्भुतवीक्षणंतेन स्वभवनेष्वधिरूढंउत्तुंगमंचारूढंअपिसंभावनार्थं सतीःसत्यःस्थूणांतरेकिमर्थंवीक्षणमित्यतउक्तं नवसंगमेति ५ सुरतादन्यत्रकालेतासांलीलाविशेषमाह रामाइति रामाः

श्रीशुकउवाच ॥ एकैकशस्ताःकृष्णस्यपुत्रान्दशदशाबलाः ॥ अजीजनन्ननवमान्पितुःसर्वात्मसंपदा १ गृहादनपगंवीक्ष्यराजपुत्र्योच्युतंस्थितम् ॥ आत्मनोऽमंसतप्रेष्ठंनतत्तत्त्वविदःस्त्रियः २ चार्वब्जकोशवदनायतचारुनेत्रसप्रेमहासरसवीक्षितवल्गुजल्पैः ॥ संमोहिताभगवतोनमनोविजेतुंस्त्रैर्विभ्रमैः समशकन्वनितावीभूम्नः ३ स्मायावलोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः ॥ पत्न्यस्तुषोडशसहस्रमनंगबाणैर्यस्येंद्रियंविमथितुंकर णैर्नशेकुः ४ याःस्वीप्सितंस्वभवनेष्वधिरूढमुच्चैर्लक्ष्म्येकधामसरसद्भुतवीक्षणेन ॥ ऐक्षन्सतामपिपतिंचसतीःकटाक्षैःस्थूणांतरेणनवसंगमलज्जये व ५ रामागृहेविहरतःपुरतःकराभ्यांबद्वेक्षणाःस्वदयितस्यमुदाहसंत्यः ॥ गात्रांतराण्यपिदधुर्निजपूरुषस्यक्लेशावहान्यपितदंगजभंगभीताः ६ तासांयादशपुत्राणांकृष्णस्त्रीणांपुरोदिताः ॥ अष्टौमहिष्यस्तत्पुत्रान्प्रद्युम्नादीनृगूणंतितान् ७ चारुदेष्णःसुदेष्णश्चचारुदेहश्चवीर्यवान् ॥ सुचारुश्चारु गुप्तश्चभद्रचारुस्तथापरः ८ चारुचंद्रोतिचारुश्चचारुमान्दशमोहरेः ॥ प्रद्युम्नप्रमुखाजातारुक्मिण्यानवमाःपितुः ९ भानुःसुभानुःस्वर्भानुःप्रभानुर्भा नुमांस्तथा ॥ चंद्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः १० स्वर्भानुःप्रतिभानुश्चसत्यभामात्मजादश ॥ सांबःसुमित्रःपुरुजिच्छतजिच्चसहस्रजित् ११ विज यश्चित्रकेतुश्चवसुमान्द्रविणःक्रतुः ॥ जांबवत्याःसुताह्येतेसांबाद्याःपितृसंमताः १२ भानुश्चंद्रोश्वसेनश्चचित्रगुर्वेगवान्वृषः ॥ आमःशंकुर्वसुःश्रीमान्कृतिर्ना ग्नजितेःसुताः १३ श्रुतःकविर्वृषोवीरःसुबाहुर्भद्रएकलः ॥ शांतिर्दर्शःपूर्णमास्यःकालिंद्याःसोमकोपरः १४

स्त्रियःगृहेविहरतःस्वदयितस्यकराभ्यांपुरतोबद्धेक्षणाः मुदारोमांचहेतुहर्षेणहसंत्यःसाट्टहासंकुर्वत्यः निजपूरुषस्यनिजभर्तुःक्लेशावहानिक्लेशाकराण्यपिगात्रांतराणिविषयेभ्यःस्पर्शयोग्येभ्यो गात्रेभ्योऽन्यत्गात्राण्यपिदधुःवस्त्रादिनापिहितानिचक्रुरित्यन्वयःकीदृश्यःतस्यांगजस्याश्लेषलक्षणकामस्यभंगेभीताअपीति ६ इदानींतासांपृथक्पृथक्पुत्रान्वक्तुमुपक्रमते तासामिति दशदश पुत्रायासांताःदशपुत्राः तासांतासांकृष्णस्त्रीणांमध्येयाःपुरोदिताःपूर्वोक्ताःअष्टौमहिष्यस्तासांतान्पुत्रान्प्रद्युम्नादीन्गृणंतितत्रत्याइतिशेषः ७ प्रद्युम्नादन्येकिंनामानइतितत्राह चारुदेष्णइ त्यादिना ८ ९ एवंक्रमेणसत्यभामादिसुताननुक्रामति भानुरित्यादिना एकःशत्रुःचंद्रस्यस्वर्भानूराहुरिवअपरःलोकस्यभानुःसूर्यइवस्वःस्वर्गपुरेस्थितः १० ११ १२ नाग्नजिन्नेःनग्नाजित्पुत्र्याःनीलायाः १३ वृषविशेषणंवीरइतिअपरःसोमकोपिकालिंद्याःसुतः १४

माद्र्याःलक्ष्मणायाः १५ १६ रोहिण्याःभद्रायाः १७ भोजकटेपुरेस्थितस्यरुक्मिणःपुत्र्याम् १८ एतेषांमातरःकृष्णभार्याणांषोडशसहस्राणि १९ अरेःकृष्णस्यपुत्रायप्रद्युम्नाय तंकृष्णं रंध्रमवसरं २० द्विषोःशत्रुभूतयोःवैवाहिकींविवाहसंबंधिनीम् अतीतकथानेदानींवक्तुंशक्येतिनेत्याह अनागतामिति विप्रकृष्टंदूरस्थंव्यवहितंमूर्त्तद्रव्यांतरितम् २१ अर्घांगीकारेणपरिहरति यद्यपीति व्यतरद्दत्तवान् भागिनेयायसहोदर्याःपुत्रायेतिसूचितं प्रियंइष्टं तदेवआचष्टे कुर्वन्निति इदंदानेकारणम् २२ ननुततःपरंवैरंमुक्तवान्किंनततोधिकमभूत्कथमत्राह तदेवेति श्रीशैलनिलयंश्रीपर्वतवासिनंमल्लिकार्जुननामानमित्यर्थः २३ छंदयामासअभीष्टंदत्तवान् वशाभिप्राययोश्छंदइति २४ शत्रुसंघानांमनसेतिशेषः अजेयाच्छेद्यत्वेतथास्तौमित्युक्त्वा तस्यकृष्णभक्तिंद

प्रघोषोगात्रवान्सिद्धोबलःप्रबलउर्ध्वगः ॥ माद्र्याःपुत्रामहाशक्तिःसहओजोपराजितः१५वृकोर्हकोनिलोनीलो बह्वन्नोन्नादएवच ॥ महाशापोवनोवह्निर्मित्रविंदात्मजाःकृतिः १६ संग्रामजिहद्वृत्सेनःशूरःप्रहरणोरिजित् ॥ जयःसुभद्रोभद्राश्वोवामआयुश्चसप्तकः ॥ दीप्तिमांस्ताम्रपत्राद्यारोहिण्यास्तनयाहरेः १७ प्रद्युम्नाश्चानिरुद्धोभूद्रुक्मवत्यांमहाबलः ॥ पुत्र्यांचरुक्मिणोराजन्नाम्नाभोजकटेपुरे १८ एतेषांपुत्रपौत्राश्चबभूवुःकोटिशोनृप ॥ मातरःकृष्णजातानांसहस्राणिचषोडश १९ ॥ राजोवाच ॥ कथंरुक्म्यरिपुत्रायप्रादाद्दुहितरंयुधि ॥ कृष्णेनपरिभूतस्तंहंतुंरंध्रंप्रतीक्षते २० एतदाख्याहिमेब्रह्मन्द्विषोवैवाहिकींक्रियाम् ॥ अनागतमतीतंचवर्तमानमतींद्रियम् ॥ विप्रकृष्टंव्यवहितंसम्यक्पश्यंतियोगिनः २१ श्रीशुकउवाच ॥ यद्यप्यनुस्मरन्वैरंरुक्मीकृष्णावमानितः ॥ व्यतरद्भागिनेयायसुतांकुर्वन्स्वसुःप्रियम् २२ तदेवानुस्मरन्वैरंरुक्मीकृष्णावमानितः ॥ तोषयामासतपसाश्रीशैलनिलयंहरम् २३ तपसाराधितोरुद्रोरुक्मिणावरदर्षभः ॥ वरेणच्छंदयामाससचवव्रेदृढंधनुः २४ अजेयंशत्रुसंघानामच्छेद्यंत्रिदशैरपि ॥ तथेतिकार्मुकंदत्त्वावाक्यंचोवाचशंकरः २५ यदाविरुध्यसेविष्णौतदेतत्कार्मुकंनृप ॥ हित्वातदात्वामामेवप्रतिपत्स्यतिनान्यथा २६ इत्युक्त्वाकार्मुकंदत्त्वाशंकरोनव्यदृश्यत ॥ सोषिलब्धवरोराजाप्राप्यभोजकटंपुरम् २७ तेनचापेनसकलान्नृपान्प्रख्यातपौरुषान् ॥ वशेचकारसंग्रामेरुक्मीकृष्णमृतेनृप २८ विरोद्धुंवासुदेवेनरुक्मीनैवाकरोन्मनः ॥ धनुर्लोभान्महाराजनमैत्रीमप्यकलमषाम् २९ यद्यप्यनुस्मरन्वैरंगिरिशस्यस्मरन्वचः ॥ वृतःस्वयंवरसाक्षादनंगोंगयुतस्तया ३० राज्ञःसमेतान्निर्जित्यजहारैकरथोयुधि ॥ अनिरुद्धोरुक्मवत्यांतस्यांजज्ञेमहारथः ३१ जहारयंचित्रलेखाबाणपुत्र्याप्रचोदिता ॥ सहस्रबाहुर्बाणश्चयत्कृतेद्विभुजोभवत् ३२ रुक्मिण्यास्तनयांराजन्कृतवर्मसुतोबली ॥ उपयेमेविशालाक्षःकन्यांचारुमतींकिल ३३ दौहित्रायानिरुद्धायपौत्रींरुक्म्यददाद्धरेः ॥ रोचनांबद्धवैरोपिस्वसुःप्रियचिकीर्षया ३४ जानन्नधर्मंतद्योगंस्नेहपाशानुबंधनः ॥ तस्मिन्नभ्युदयेराजन्रुक्मिणीरामकेशवौ ३५

र्शयितुंवक्ति वाक्यंचेति २५ २६ २७ २८ तर्हिबंधुमैत्रींनिर्दुष्टात्माकार्षीत्किंनेत्याह मैत्रीमिति अपितुबंधुकृत्याकरणेनकलमषमकरोत् २९ मैत्र्यकरणेविरोधाकरणेचानिमित्तमाह यदीति अनंगश्चेत्किमवलोक्यवृतइत्यतउक्तमंगयुतइति ३० ३१ यमनिरुद्धं ३२ कृतवर्मणःसुतःपुत्रः ३३ रुक्मीस्वदौहित्रायहरेःपौत्रायानिरुद्धायेतिशेषःस्वपौत्रीमदात् ३४ तस्मिन्नभ्युदयेअनिरुद्धविषयेविवाहेप्रवृत्तेसति ३७

३६ बलंबलभद्रं तद्वयसनीद्यूतक्रियापरः ३७ पराजयेपणंग्लहम् ३८ कलिंगःदंतवक्त्रःत्वांजितवान्तानशिक्षतअग्रेइतिभावः ३९ ४० अर्बुदंदशकोटिधनम् ४१ ४२ ४३ आकाशस्थःसता
किमाहेतितत्राह बलेनेति ४४ तामाकाशवाणीं ४५ ४६ अष्टपदेनअक्षफलकेन ४७ ४८ ४९ हरेःश्यालेरुक्मिणिनहतेसति ५० भार्यपासहानिरुद्धंवरंरथंआरोप्यरामादयोदशार्हकाःसिद्धाखिला
र्थाःसंपन्नसमस्ताभीष्टाः तत्रहेतुःमधुसूदनेति ५१ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्त० वि० टीकायांषट्सप्ततितमोऽध्यायः ॥ ७६ ॥ ७ ॥ यथापूर्वमुक्तंतथात्यवासयत् अतीतान्यकरोत् य

पुरंभोजकटंजग्मुःसांबप्रद्युम्नकादयः ॥ तस्मिन्प्रवृत्तउद्वाहेकलिंगप्रमुखानृपाः ३६ दृप्तास्तेरुक्मिणंप्रोचुर्बलमक्षैर्विनिर्जय ॥ अनक्षज्ञोबलोराजन्नपित
द्व्यसनीमहान् ३७ इत्युक्तोबलमाहूयतेनाक्षैरुक्म्यदीव्यत ॥ शतंसहस्रमयुतंरामस्तत्राददेपणम् ३८ तंतुरुक्म्यजयत्तत्रकलिंगःप्राहसद्बलम् ॥ दंता
न्संदर्शयन्नुच्चैर्नामृष्यत्तद्बलायुधः ३९ ततोलक्षंरुक्म्यगृह्णाद्ग्लहंतदजयद्बलः ॥ जितवानहमित्याहरुक्मीकैतवमाश्रितः ४० मन्युनाक्षुभितःश्रीमा
न्समुद्रइवपर्वणि ॥ जातारुणाक्षोतिरुषान्यर्बुदंग्लहमाददे ४१ तंचापिजितवान्रामोधर्मेणच्छलतोब्रवीत् ॥ रुक्मीजितंमयात्रेमेवदंतुप्राश्निकाइति ४२
तथेत्याहकलिंगोपिदंतान्संदर्शयंसीरिणः ॥ ततःकोपपरीतात्मातूष्णीमासीद्बलायुधः ४३ तदाऽब्रवीन्नभोवाणीबलेनैवजितोग्लहः ॥ धर्मतोवचनेनैव
रुक्मीवदतिवैमृषा ४४ तामनादृत्यवैदर्भोदुष्टराजन्यचोदितः ॥ संकर्षणंपरिहसन्बभाषेकालचोदितः ४५ नैवाक्षकोविदायूयंगोपालावनगोचराः ॥
अक्षैर्दीव्यंतिराजानोबाणैश्चनभवादृशाः ४६ रुक्मिणैवमधिक्षिप्तोराजभिश्चोपहासितः ॥ क्रुद्धस्त्वष्टपदेनैनंजघानोद्वाहपर्वणि ४७ कलिंगराजंतरसा
गृहीत्वादशमेपदे ॥ दंतानपातयत्क्रुद्धोयोऽहसद्विवृतैर्द्विजैः ४९ अन्येनिर्भिन्नबाहूरुशिरसोरुधिरोक्षिताः ॥ राजानोदुद्रुवुर्भीताबलेनपरिघार्दिताः ४९
निहतेरुक्मिणिश्यालेनाब्रवीत्साध्वसाधुवा ॥ रुक्मिणीबलयोराजन्स्नेहभंगभयाद्धरिः ५० अथोऽनिरुद्धंसहभार्ययावरंरथंसमारोप्ययय्युःकुशस्थलीम् ॥
रामादयोभोजकटाद्दशार्हकाःसिद्धाखिलार्थामधुसूदनाश्रयाः ५१ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेषट्सप्ततितमोऽध्यायः ॥७६॥ श्रीशुकउ
वाच ॥ तथातामिर्वरस्त्रीभिरममाणोजनार्दनः ॥ दिनानिहतसापत्न्यःसुबहून्यत्यवासयत् १ राजोवाच ॥ तासांषोडशसाहस्रमहिषीणांजनार्दनः ॥ वृ
ष्णिंकथंचकारैकोमानुषंदेहमाश्रितः २ श्रीशुकउवाच ॥ हंततेकथयिष्यामिश्रोतृणांविस्मयावहम् ॥ यथाचकारबह्वीनामेकस्तृष्णिंजनार्दनः ३ नरकंनिह
तंश्रुत्वातथोद्वाहंचयोषिताम् ॥ कृष्णेनैकेनबह्वीनांतद्दिदृक्षुःस्मनारदः ४ चित्रंबतैतदेकेनवपुषायुगपत्पृथक् ॥ गृहेषुद्व्यष्टसाहस्रस्त्रियएकउदावहत् ५
इत्युत्सुकोद्वारवतींदेवर्षिर्द्रष्टुमागमत् ॥ पुष्पितोपवनारामंद्विजालिकुलनादितम् ६

थात्यवासयत् तथातवकथयामीतिवा १ २ ३ नरकंनिहतंश्रुत्वातथाएकेनकृष्णेनबह्वीनांयोषितांचोद्वाहंश्रुत्वानारदस्तद्दृष्टिंदिदृक्षुरभूदित्यन्वयः ४ ततःकिमितितत्राह चित्रमितिएकःएकेनवपुषापृ
थक्गृहेषुद्व्यष्टसाहस्रंस्त्रियएकस्मिन्मुहूर्तेउदावहदितियत्तदिदंविचित्रमाश्चर्यमितिव ५ संतोषादुत्सुकोभूत्व देवर्षिः कृष्णचेष्टितंद्रष्टुंद्वारवतीमागमदित्यन्वयः कीदृशंद्वारवतीनामपुरंपुष्पिता
उपवनारामाद्यस्मिंस्तत्द्विजानामलीनांपक्षिणांकुलेननादितम् ६

उत्फुल्लेंदीवरादिभिःछुरितेषुमिश्रितेषुसरस्सुहंसादिभिरुच्चैःश्रुतस्वरेण कूजितं यद्वा सामान्यतउक्तंनारदागमनंविशिनष्टि पुष्पितेत्यादिना प्रथमतोद्विजादिनादितंपुष्पितोपवनारामंप्राप पश्चादुत्फुल्लेंदीवरादिभिःछुरितेषुसरस्सुहंसादिभिरुच्चैःकूजितंस्थलमाप ७ ततःपश्चात्स्फाटिकराजतैःस्फाटिकादिनिर्मितैःनवभिःनूतनैःप्रासादलक्षणैर्जुष्टंस्थलमाप कीदृशैर्महामरकतप्रख्यैःइंद्रनीलविहितसोपानैःस्वर्णरत्नानिसुवर्णश्रेष्ठानिपरिच्छदायेषांतानियथा अत्युत्तमसुवर्णजलविचित्रितानीत्यर्थःतैः ८ किंच विभक्तैःविभक्तरथ्यापथैःरथमार्गैश्चत्वरैरापणैश्चशोभितांततःपरंशालाभिःसभाभिरतिरुचिरां सुरालयैःदेवगृहैश्चमनोरमांगोमयचंदनोदकादिनासंसिक्तामार्गाश्चांगणानिचवीथ्यश्च गृहपंक्तिपुरोमार्गाश्चसंसिक्तमार्गांगणवीथयः ताश्चगेहानिचास्याःसंतीतिसंसिक्तमार्गांगणवीथिगेहिनीतां पतंत्यःविवरणावरणेकुर्वत्यःपताकायेषांतेपतत्पताकाः तेचध्वजाःपतत्पताकध्वजास्तैःवारितःस्तंभितआतपोयत्रसातथातां एवंविधायांतस्यांकुशस्थल्यामंतर्भागेहरेःपुरंसर्वसंपदापूर्णंस्थानमस्तीतिशेषःसर्वधिष्ण्यपैः

उत्फुल्लेंदीवराम्भोजकल्हारकुमुदोत्पलैः ॥ छुरितेषुसरस्सूच्चैःकूजितंहंससारसैः ७ प्रासादलक्षैर्नवभिर्जुष्टंस्फाटिकराजतैः ॥ महामरकतप्रख्यैःस्वर्णरत्नपरिच्छदैः ८ विभक्तरथ्यापथचत्वरापणैःशालासभाभीरुचिरांसुरालयैः ॥ संसिक्तमार्गांगणवीथिगेहिनींपतत्पताकाध्वजवारितातपाम् ९ तस्यामंतःपुरंश्रीमदार्चितंसर्वधिष्ण्यपैः ॥ हरेःस्वकौशल्यंयत्रत्वष्ट्राकात्स्न्र्येनदर्शितम् १० तत्रषोडशभिःसद्मसहस्रैःसमलंकृतम् ॥ विवेशैकतमंशौरेःपत्नीनांभवनंमहत् ११ विष्टब्धंविद्रुमस्तंभैर्वैदूर्यफलकोत्तमैः ॥ इंद्रनीलमयैःकुड्यैर्जालैर्मरकतोत्तमैः १२ वितानैर्निर्मितैस्त्वष्ट्रामुक्तादामविलंबिभिः ॥ दांतैरासनपर्यंकैर्मण्युत्तमपरिष्कृतैः १३ दासीभिर्निष्ककंठीभिःसुवासोभिरलंकृतम् ॥ पुंभिःसकंचुकोष्णीषसुवस्त्रमणिकुंडलैः १४ रत्नप्रदीपनिकरद्युतिभिर्निरस्तध्वांतं विचित्रवलभीषुशिखंडिनोंग ॥ नृत्यंतियत्रविहितागुरुधूपमक्षैर्निर्यांतमीक्ष्यघनबुद्धयउन्नदंतः १५ तस्मिन्समानगुणरूपवयःसुवेषदासीसहस्रयुतयाऽनुसवंगृहिण्या ॥ विप्रोददर्शचमरव्यजनेनरुक्मदंडेनसात्वतपतिंपरिवीजयंत्या १६ तंसन्निरीक्ष्यभगवान्सहसोत्थितःश्रीपर्यंकतःसकलधर्मभृतांवरिष्ठः ॥ आनम्यपादयुगलंशिरसाकिरीटजुष्टेनसांजलिरवीविशदासनेस्वे १७ तस्यावनिज्यचरणौतदपःस्वमूर्ध्नाबिभ्रज्जगद्गुरुतरोपिसतांपतिर्हि ॥ ब्रह्मण्यदेवइतियद्गुणनामयुक्तंतस्यैवयच्चरणशौचमशेषतीर्थम् १८ संपूज्यदेवऋषिमादिऋषिःपुराणोनारायणोनरसखोविधिनोदितेन ॥ वाण्याभिभाष्यमितयामृतकल्पयाचप्राहप्रभोभगवतःकरवामकिंते १९

समस्तैःब्रह्मादिभिरर्चितं धिष्ण्यंगृहं मध्यगृहपतिर्ब्रह्मा परितःपतयइंद्रादयःयत्रपुरेत्वष्ट्राविश्वकर्मणा ९ १० ततःपरितःकृष्णस्यपत्नीनांषोडशभिःसद्मसहस्रैःगृहसहस्रैःसंदर्शनीयतयालंकृतं भवनानामेकतमं भवनम् ११ कीदृशंतद्गृहमत्राह विष्टब्धमिति मूलेअग्रेचफलकोत्तमानियेषांतेतथातैःजालैःगवाक्षैः १२ मुक्तादामविलंबिभिःअवलंबमानमौक्तिकमालैः दांतैर्गजदंतनिर्मितैः १३ १४ अक्षैर्गवाक्षैःनिर्यांतंनिर्गतंविहितागुरुचूर्णधूपंदृष्ट्वाशिखंडिनोमयूराः १५ चामरव्यजनेनचामराख्यव्यजनेन तस्मिन्भवनेआविवेशउपविष्टः १६ १७ भोपरीक्षित्नैतच्चित्रमित्याह ब्रह्मण्यदेवइतीति यस्यचरणशौचजलमशेषांस्तीर्थपतिशुद्धान्करोतीतिअशेषतीर्थं यद्वाऽशेषाणितीर्थानियांस्मस्तत्तस्यहरेःब्रह्मण्यदेवइतियत्तद्गुणनामतस्यवैयुक्तमित्यवधारयेत्यर्थः १८ शास्त्रोदितेनविधिनासंपूज्य १९

तत्रनारदःप्रतिवक्ति नेति त्वयिअद्भुतंनैवमानादिदानमितिशेषः स्वैरावतारःस्वच्छावतारइतसुष्ठुवदाम २० अद्यदृष्टवान्प्रपुंगलध्यायश्चरामि यथारतिः स्यात्तथानुब्रूहि ... व्यंतंदेवनक्रियांकुर्वतम् २३ अविदुषेवपूर्वंगृहेनारदागमनमजानतेवहरिणाभवान्कदायातइत्यसौनारदःपृष्टः २४ २५ २६ क्वापिगृहेब्राह्मणदत्तावशेषितमन्नम् २७ असिचर्मभ्यांशिष्यवर्त्मसुचरंतंशिष्याञ्छिक्षयंतम् २८ २९ वारमुख्याभिरबलाभिरावृतंवेष्टितम् ३० ददतमितिपाठःदर्दतमितिपाठेददानइत्यस्यधातोःशत्रादेशः ३१ ३२ ३३ ३४ कालेप्राप्तेविधुक्तप्रकारेणउपनायनंउपनयनं स्व

नारदउवाच ॥ नैवाद्भुतंत्वयिविभोखिललोकनाथेमैत्रीजनेषुदधतश्चदमंस्वलानाम् ॥ निःश्रेयसायजगतांस्थितिरक्षणाभ्यांस्वैरावतारउरुगायविदामसुष्ठु २० दृष्टंतवांघ्रियुगुलंजनतापवर्गंब्रह्मादिभिर्हृदिविचिंत्यमगाधबोधैः ॥ संसारकूपपतितोत्तरणावलंबंध्यायंश्चराम्यनुगृहाणयथास्मृतिःस्यात् २१ ततोन्यदाविशद्गेहंकृष्णपत्न्याःस्मनारदः ॥ योगेश्वरेश्वरस्यांगयोगमायांविवित्सया २२ दीव्यंतमक्षमिस्तत्रप्रिययाचोद्धवेनच ॥ पूजितःपरयाभक्त्याप्रत्युत्थानासनादिभिः २३ पृष्टश्चाविदुषेवासौकदायातोभवानिति ॥ क्रियतेकिंतुपूर्णानामपूर्णैरस्मदादिभिः २४ अथापिब्रूहिनोब्रह्मन्जन्मैतच्छोभनंकुरु ॥ सतुविस्मितउत्थायतूर्णमन्यदगाद्गृहम् २५ तत्राप्यचष्टगोविंदंलालयंतंशिशून्सुतान् ॥ ततोन्यस्मिन्गृहेपश्यन्मज्जनायकृतोद्यमम् २६ जुह्वंतंचवितानाग्नीन्यजंतंपंचभिर्मखैः ॥ भोजयंतंद्विजान्क्वापिभुंजानमवशेषितम् २७ क्वापिसंध्यामुपासीनंजपंतंब्रह्मवाग्यतम् ॥ एकत्रचासिचर्मभ्यांचरंतंशिष्यवर्त्मसु २८ अश्वैर्गजैरथैःक्वापिविचरंतंगदाग्रजम् ॥ क्वचिच्छयानंपर्यंकेस्तूयमानंचबंदिभिः २९ मंत्रयंतंचकस्मिंश्चिन्मंत्रिभिश्चोद्धवादिभिः॥ जलक्रीडारतंक्वापिवारमुख्याबलावृतम् ३० कुत्रचिद्द्विजमुख्येभ्योददतंगाःस्वलंकृताः ॥ इतिहासपुराणानिशृण्वंतंमंगलानिच ३१ हसंतंहास्यकथयाक्वाचित्प्रियया गृहे ॥ क्वापिधर्मंसेवमानमर्थकामौचकुत्रचित् ३२ ध्यायंतमेकमात्मानंपुरुषंप्रकृतेःपरम् ॥ शुश्रूषंतंगुरून्क्वापिकामैर्भोगैःसपर्यया ३३ कुर्वंतंविग्रहंकैश्चित्संधिंचान्यत्रकेशवम् ॥ कुत्रापिसहरामेणचिंतयंतंसतांशिवम् ३४ पुत्राणांदुहितॄणांचकालेविध्युपनायनम् ॥ दारैर्वरैस्तत्सदृशैःकल्पयंतंविभूतिभिः ३५ प्रस्थापनोपनयनैरपत्यानांमहोत्सवान् ॥ वीक्ष्ययोगेश्वरेशस्ययेषांलोकाविसिस्मिरे ३६ यजंतंसकलान्देवान्क्वचित्क्रतुभिरूर्जितैः ॥ पूर्तयंतंक्वचिद्धर्मंकूपारामालयादिभिः ३७ चरंतंमृगयांक्वापिहयमारुह्यसैंधवम् ॥ ध्नंतंतीर्थपशून्मेध्यान्परीतंयदुपुंगवैः ३८ अव्यक्तलिंगप्रकृतिमंतःपुरचरादिषु ॥ क्वचिच्चरंतंयोगेशंतत्तद्भावबुभुत्सया ३९ अथोवाचहृषीकेशंनारदःप्रहसन्निव ॥ योगमायाबलंवीक्ष्यमानुषीमीयुषोरतिम् ४०

गृहंप्रत्यानयनंब्राह्मणीकारणंकल्पयंतंपुत्राणांदारैःसहदुहितॄणांवरैःसहयोगंकल्पयंतम् ३५ प्रस्थापनंपरगृहंप्रतिदुहितृप्रेषणंउपनयनंस्वगृहंप्रत्यानयनं येषामितिषष्ठीद्वितीयार्थे लोकाःयानिकर्माणिवीक्ष्यविसिस्मिरेतानिकुर्वंतंकर्मणामाचरणंवीक्ष्येतिवा ३६ कूपादिभिःपूर्तयंतंपूताख्यधर्ममाचरंतम् ३८ सैंधवांसिंधुदेशभवं तीर्थेशास्त्रेविहितान्पात्रेप्राप्तेवायज्ञेवा ३८ अव्यक्तलिंगप्रकृतिंअस्पष्टलक्षणस्वभावं तेषांतेषांभावानांपदार्थानांबुभुत्सयास्वभावजिज्ञासया ३९ मानुषींरतिंमनुष्यक्रीडाम् ४०

आत्मनिरुद्दयेनिर्भातस्वयप्रकाशितस्यभवतःपादयोर्निषेवया ४१ आश्रुतानितिपाठेयशसातीर्थेनस्नातानित्यर्थः ४२ लोकानुकारिचरितदर्शनेननारदस्यान्यथाज्ञानंनिवारयन्निति तत्त्वमुपदिशति ब्रह्मन्निति इमंलोकमास्थितः तंधर्मकर्तारंअनुमोदकःअनुज्ञाता ४३ उपसंहरति इतीति इतिशब्दआदिवचनः ४४ ४५ इत्यर्थधर्मकामेषुअवहितात्मनाकृष्णेन १६ ४७ साक्षान्मोक्षहेतुत्वात् भगवच्चरितमिदंबुभूषुभिरभ्यसनीयमाश्वसनीयंनतुविटवृत्तवदुपेक्षणीयमितिभावेनाह यानीतिअंगविष्णुरात विश्वविलयोद्भववृत्तिषुहेतुर्हरिः यानिअनन्यविषयाणिकर्माणिचकारयस्तुतानिगायतिशृणोतिअनुजानातिवा तस्यपुंसोपवर्गमार्गेभगवतिभक्तिर्भवतिहियस्मात्तस्मादवश्यंमुमुक्षुणासेव्यानीति ४८ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटीकायांसप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ राज्ञांदैनंदिननित्यानियमप्रकारंकथयत्यास्मिन्नध्याये तत्रादौमाधवीनांग्राम्यधर्मलौल्यातिशयंकथयति अथेत्यादिना १ वयांसिकोकिलादीनि बांदिनःकृष्णंबोधयंतीवोपत

नारदउवाच ॥ विदामयोगमायांतेदुर्दर्शामपियोगिनाम् ॥ योगेश्वरात्मन्निर्भातभवत्पादानिषेवया ४१ अनुजानीहिमांदेवलोकांस्तेयशसाश्रुतान् ॥ पर्यटामितवोद्गायन्लीलांभुवनपावनीम् ४२ श्रीभगवानुवाच ॥ ब्रह्मन्धर्मस्यवक्ताहंकर्तारमनुमोदकः ॥ शिक्षयंस्तंलोकमिममास्थितःपुत्रमाखिदः ४३ श्रीशुकउवाच ॥ इत्याचरंतंसद्धर्मान्प्राक्स्रष्टान्गृहमेधिनाम् ॥ तमेवसर्वगेहेषुसंतमेकंददर्शह ४४ कृष्णस्यानंतवीर्यस्ययोगमायामहोदयम् ॥ मुहुर्द्दृष्ट्वाऋषिर्भूद्विस्मितोजातकौतुकः ४५ इत्यर्थधर्मकामेषुकृष्णेनावहितात्मना ॥ सम्यक्सभाजितःप्रीतस्तमेवानुस्मरन्ययौ ४६ एवंमनुष्यपदवीमनुवर्तमानोनारायणोखिलभवायगृहीतशक्तिः॥ रेमेचषोडशसहस्रवरांगनानांसव्रीडसौहृदनिरीक्षणहासजुष्टः ४७यानीहविश्वविलयोद्भववृत्तिहेतुःकर्माण्यनन्यविषयाणिहरिश्चकार॥यस्त्वंगगायतिशृणोत्यनुमोदतेवाभक्तिर्भवेद्भगवतिह्यपवर्गमार्गे ४८॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्त०सप्तसप्ततितमोऽध्यायः ॥७७॥ श्रीशुकउवाच ॥ अथोषस्युपवृत्तायांकुक्कुटान्कूजतोशपन् ॥ गृहीतकंठ्यःपतिभिर्माधव्योविरहातुराः १ वयांस्यरुरुवन्कृष्णंबोधयंतीवबंदिनः ॥ गायत्स्वलिष्वदभ्रेषुमंदारवनवायुभिः २ मुहूर्ततंतुवैदर्भीनामृष्यदपिशोभनम् ॥ परिरंभणविश्लेषात्प्रियबाह्वंतरंगता ३ ब्राह्मेमुहूर्तेउत्थायवार्युपस्पृश्यमाधवः ॥ दध्यौप्रसन्नकरणआत्मानंतमसःपरम् ४ एकंपरंज्योतिरनन्यमद्वयंस्वसंस्थयानित्यनिरस्तकल्मषम् ॥ ब्रह्माख्यमस्योद्भवनादिहेतुभिःस्वलक्षणैर्लक्षितभावनिर्वृतिम् ५ अथाप्लुतोंभस्यमलेयथाविधिक्रियाकलापंपरिधायवाससी ॥ चकारसंध्योपगमादिसत्तमोहुतानलोब्रह्मजजापवाग्यतः ६

स्थुःनित्योद्बुद्धत्वादिवेति मंदारवनवायुभिःपारिजातवनवायुभिःसह २ तंमुहूर्तोपलक्षितकालम् प्रियस्यकृष्णस्यबाह्वंतरंवक्षस्थलम् ३ नित्यप्रसन्नांतःकरणःआत्मानंस्वयमेव ४ इतरवस्तुभ्यआत्मानंव्यावर्तयति एकमिति एकंमुख्यंस्वरूपभेदशून्यंवा आदित्यादिज्योतिर्भ्यःपरंविलक्षणम् परंज्योतीरूपंसंपद्येतिश्रुतिः अनन्यंअन्याधीनस्वभावरहितंनअन्यःस्वतंत्रोयस्मात्सतथावंवा .अद्वयंअसदृशंस्वसंस्थयास्वव्यवस्थयास्वमहिम्नास्वाकारेणवा नित्यनिरस्तदोषं किंतस्यनामधेयमत्राह ब्रह्माख्यामिति स्वलक्षणैःस्वरूपलक्षणैःव्यावर्तकधर्मैःअस्यजगतःउद्भवनादिहेतुभिःसृष्ट्यादिहेतुभिर्लक्षितभावनिर्वृतिःस्वरूपानंदोयस्यसतथातम् यदेषआकाशआनंदोनस्यात्इतिश्रुतेः ५ संध्योपगमादिसंध्योपासनादिकंक्रियाकलापंचकार ब्रह्मजजाप नियतस्वाध्यायाध्ययनंकृतवान् गायत्रीं वा जप्तवान् ६

सआत्मनःकलाःस्वसन्निधानविशेषोपेतान् आत्मवान् स्वाधीनप्रयत्नः स्वाधीनमनावा ७ साध्वीनांपादवंदनादिक्रियानपेक्षाणाम् गृष्टीनांप्रथमप्रसूतानाम् ८ बद्वंबद्वंद्वंद्वंयंएकैकस्मैविप्राय ९ गोविप्र देवताःवयोवृद्धांश्च गुरुभूतान्यश्वत्थादीनिनमस्कृत्य एतत्सर्वंकीदृशमत्राह आत्मेति आत्मनःसंभूतिंसन्निवेःप्रतिमाम् मंगलानितिलादीनि १० नरलोकस्यमुक्तामुक्तस्यभूषणंअलंकारभूतम् ११ आदर्शंदर्पणम् गवादींश्चप्रेक्ष्यदेवताःप्रतिष्ठिताः कामिनामर्थिनांकामान्काम्यान्पदार्थान्किंबहुनासर्वान्कामैःपृथक्पृथक्पतोष्यसंतोषंजनयित्वा स्वयमपिप्रत्यनंदत संतुष्टोभूदित्यन्वयः १२ द्र व्यसंविभागक्रममाह संविभज्येति विप्रादीनुद्दिश्यस्रगादिभिस्तृतीयाचद्वितीयार्थे प्रायुंक्तस्वयंस्वीचकार १३ तावत्तदा १४ १५ स्त्रीणांमनः १६ यत्रिविष्टानांयत्रसभायामुपविष्टानांअ

उपस्थायार्कमुद्यंतंतर्पयित्वात्मनःकलाः ॥ देवानृषीन्पितॄन्वृद्धान्विप्रानभ्यर्च्यचात्मवान् ७ धेनूनांरुक्मशृंगीणांसाध्वीनांमौक्तिकस्रजाम् ॥ पयस्विनी नांगृष्टीनांसवत्सानांसुवाससाम् ॥ ८ ददौरूप्यखुराग्राणांक्षौमाजिनतिलैःसह ॥ अलंकृतेभ्योविप्रेभ्योबद्वंबद्वंदिनेदिने ९ गोविप्रदेवतावृद्धान्गुरुभू तानिसर्वशः ॥ नमस्कृत्वात्मसंभूतिंमंगलानिसमस्पृशत् १० आत्मानंभूषयामासनरलोकविभूषणम् ॥ वासोभिर्भूषणैःस्वीयैर्दिव्यस्रगनुलेपनैः ११ अवेक्ष्याज्यंतथादर्शंगोवृषद्विजदेवताः ॥ कामिनांसर्ववर्णानांपौरांतःपुरचारिणाम् ॥ प्रादात्कामान्पृथक्कामैःप्रतोष्यप्रत्यनंदत १२ संविभज्याग्रतोविप्रान्स क्तांबूलानुलेपनैः ॥ सुहृदःप्रकृतीर्दारान्न्यायुंक्तचततःस्वयम् १३ तावत्सूतउपानीयस्यंदनंपरमाद्भुतम् ॥ सुग्रीवाद्यैर्हयैर्युक्तंप्रणम्यावस्थितोग्रतः १४ गृहीत्वापाणिनापाणिंसारथेरथमारुहत् ॥ सात्यकयुद्धवसंयुक्तःपूर्वाद्रिमिवभास्करः १५ ईप्सितोंतःपुरस्त्रीणांसव्रीडप्रेमवीक्षितैः ॥ कृच्छ्राद्विसृष्टोनिरगा ज्जातहासोहरन्मनः १६ सुधर्माख्यांसभांसर्वैर्वृष्णिभिःपरिवारितः ॥ प्राविशद्यान्निविष्टानांनसंत्यंगषड्भयः १७ तत्रोपविष्टःपरमासनेविभुर्बभौस्वभासा ककुभोवभासयन् ॥ वृतोनृसिंहैर्यदुभिर्यदूत्तमोयथोडुराजोदिवितारकागणैः १८तत्राथमंत्रिणोराजन्नानाहास्यरसैर्विभुम् ॥ उपतस्थुर्नटाचार्यानर्तकयस्तांड वैःसमम् १९ मृदंगवीणामुरजवेणुतालतलस्वनैः ॥ ननृतुर्जगुस्तुष्टुवुश्चसूतमागधबंदिनः २० तत्रस्थाब्राह्मणाःकेचिदासीनाब्रह्मवादिनः ॥ पूर्वेषांपुण्य यशसांराज्ञांचाकथयन्कथाः २१ तत्रैकःपुरुषोराजन्नागतोऽपूर्वदर्शनः ॥ विज्ञापितोभगवतेप्रतीहारैःप्रवेशितः २२ सनमस्कृत्यकृष्णायपरेशा यकृतांजलिः ॥ राज्ञामावेदयद्बंधंजरासंधोपरोधजम् २३ येतुदिग्विजयेतस्यसन्नतिंनायुर्नृपाः ॥ प्रसह्यरुद्धास्तेनासन्नयुतेद्वेगिरिव्रजे २४ ॥ राजानऊ चुः ॥ कृष्णकृष्णाप्रमेयात्मन्प्रपन्नभयभंजन ॥ वयंत्वांशरणंयामोभवभीताःपृथग्धियः २५ लोकोविकर्मनिरतःकुशलेप्रमत्तःकर्मण्ययंत्वदुदितेभवद र्चनेस्वे ॥ यस्तावदस्यबलवानिहजीविताशांसद्यश्छिनत्त्यनिमिषायनमोस्तुतस्मै २६

शनपानादिषड्भयोनसंतिनबाधंते १७ नृसिंहैःपुरुषश्रेष्ठैः १८ नानाविधैःहास्यैःहसनविषयैरसैःरागजनकवचनैः १९ नटादयोननृतुःसूतादयोजगुः २० गानानंतरंकःप्रसंगइत्यत्राह तत्रस्थाइति ष्ठागतिनिवृत्तिवाचिनाशयित्वमुपतिष्ठत्वंवासूच्यते अत्रतयोःकोविवक्ष्यतइत्यतउक्तम् आसीनाइति २१ तत्रतस्यामवस्थायाम् २२ जरासंधेनकृतोपरोधोनिरोधः तस्माज्जातम् २३ गिरिव्रजेनगरे २४ पृथग्धियःयथार्थज्ञानशून्याः २५ अयथार्थज्ञानीकिंकरोतिकिंचतस्यफलमितितत्राह लोकइति उक्तार्थोयम् २६

भगवानत्रकिमर्थमवतीर्णइतितत्राह कालइति चशब्दएवार्थेसमुच्चयेवा सतांरक्षणाय खलानांदुष्टानांनिग्रहाय इदंजगत्अस्मिन्जगतिकलयाऽवतीर्णोभगवानितिकिंवदंती एवद्वयंविनानान्यत् कार्यंकिंनाकिमपि कुतः कालःतत्तत्कालेतत्तत्कार्यसाधनसमर्थत्वात् कःखलःकोवासन्निति विशिनष्टि काश्चिदिति हेईशकाश्चिज्जनस्त्वदीयांनिदेशमतियातिअतिक्रामतिसखलःकिंसुकृतमृच्छति किं स्वित्त्वदीयंनिदेशमतियातिलंघयति सोऽसन्किसुकृतमृच्छतीतिवयंनविद्मः एकःसुखच्छेदकंलोकंएकःसुखकरंऋच्छतीतिभवान्वेत्तीतिवाक्यार्थः अतिस्यादधिकार्थोक्तौप्रशंसायामतिक्रमइति २७ स्व र्गादिसुखस्यनिर्विषयत्वेनराज्यसुखात्परंनकिमपीतिकेषांचित्प्रवादस्तत्राह स्वप्रायितमिति । स्वप्रायितंस्वप्रवत्क्षणिकं तदपिनस्वाधीनमित्याह परतंत्रमिति । तत्रतन्नित्यमित्याशयश्चतन्मरणत योपेतेनमृतकेनशवकल्पेनशरीरेणराज्यधुरंवहामइत्यस्यान्यत्किंसुखमस्तीतितर्हितद्धानौबह्वायासात्क्लेशःस्यादितितत्राह हित्वेति यदनीहलभ्यंनिवृत्तिमार्गस्थैःसाध्यमात्मानिसुखंतद्धित्वाकृपणावयं क्लिश्यामहे एवंविधंज्ञानमस्तिचेत् किमितिक्लेशइत्यतउक्तं तवेति २८ किमिदानीमावश्यकंतद्वदकिंबहुसिद्धानुवादेनेतितत्राह तन्नइति । वियुंक्ष्वावियोजय अयुतमतंगजवीर्यंअयुतगजपराक्रमं

कालोभवान्जगदिदंकलयावतीर्णःसद्रक्षणायखलनिग्रहणायचान्यत् ॥ काश्चित्त्वदीयमतियातिनिदेशमीशकिंवाजनःसुकृतमृच्छतितन्नविद्मः २७ स्वप्रायितंनृपसुखंपरतंत्रमीशशश्वद्भयेनमृतकेनधुरंवहामः ॥ हित्वायदात्मनिसुखंतदनीहलभ्यंक्लिश्यामहेतिकृपणास्तवमाययेति २८ तन्नोभ वान्प्रणतशोकहरांघ्रियुग्मोरुद्धान्वियुंक्ष्वमगधाधिपकर्मपाशात् ॥ योभूभुजोयुतमतंगजवीर्यमेकोबिभ्रद्रुरोधभवनेमृगराडिवावीः २९ योवैत्वया द्विनवकृत्वउदात्तचक्रोभग्नोमृधेखलुभवंतमनंतवीर्यम् ॥ जित्वानृलोकनिरतंसतुरुढदर्पोयुष्मत्प्रजाःक्षिपतिचाशुचताद्विधेहि ३० इतिमागधसंरुद्धाभवद्दर्शनकांक्षिणः ॥ प्रपन्नाःपादमूलंतेदीनानांशंविधीयताम् ३१ ॥ श्रीशुकउवाच ॥ राजदूतेब्रुवत्येवंदेवर्षिःपरमद्युतिः ॥ बिभ्रत्पिंगजटाभारंप्रादुरासीद्यथा रविः ३२ गायन्नगिरामधुरयाप्रियकर्माणिजन्मच ॥ द्रावयन्नवसंवांश्चलोकान्निरमयन्मृशम् ३३ तंदृष्ट्वाभगवान्कृष्णःसर्वलोकेश्वरेश्वरः ॥ ववंदउत्थि तःशीर्ष्णासससभ्यःसानुगोमुदा ३४ सभाजयित्वाविधिवत्कृतासनपरिग्रहम् ॥ बभाषेसूनृतैर्वाक्यैःश्रद्धयातर्पयन्मुनिम् ३५ अपिस्विदद्यलोकानांत्रया णामकुतोभयम् ॥ ननुभूयान्भगवतोलोकान्पर्यटतोगुणः ३६ नहितेऽविदितंकिंचिल्लोकेष्वीश्वरकर्तृषु ॥ अथपृच्छामहेयुष्मान्पांडवानांचिकीर्षितम् ३७ नारदउवाच ॥ दृष्टामयातेबहुशोदुरत्ययामायाविभोविस्रष्टुरजश्रमायिनः ॥ भूतेषुशश्वद्धरतःस्वशक्तिभिर्वह्नेरिवच्छन्नरुचोरुचोद्रुताः ३८ तवेहितं कोर्हतिसाधुवेदितुंस्वमाययेदंसृजतोनियच्छतः ॥ योविद्ययानात्मतयावसीयतेतस्मैनमस्तेस्वविलक्षणात्मने ३९

बिभ्रत् २९ उदात्तंउन्नतंचक्रंसैन्यंयस्यतउदात्तचक्रः आशुचआश्वेव तस्यप्रतिक्रियाम् ३० ३१ ३२ ३३ ३४ ३५ अद्यत्रयाणांलोकानामकुतोभयमपिभयंनास्तिहि लोककुशला कुशलजिज्ञासयापर्यटतोभवतोमहान्गुणोभवतीत्याह नन्विति ३६ पक्षिवत्पर्यटताऽज्ञेनमयाकिंप्रयोजनमत्राह नहीति ईश्वरःकर्तायेषांतथातेषु अथतस्मात् ३७ मायामाहात्म्यानि मायिनःनित्याव्या हतमाहात्म्यस्य दारुषुछन्नरुचःवह्नेरुचइवतवरुचोप्यद्भुताअचिंत्याः ३८ वह्नेरुचोमथनादिनाव्यज्यंतेनतथातवरुचइतिभावेनाह तवेति । कुतोनिर्वेदनमितितत्राह यइति । योभवानविद्ययाऽज्ञानेनात्म तयाअस्वामितयावसीयतेनिश्चीयतेशरीरिभिरितिशेषः । इतियदतोवेदनंदुःशकमित्यर्थः । तर्हितत्सत्यंकिंनेत्याह स्वेति । स्वतोविलक्षणस्वरूपाय तस्मात्स्वामित्वमेवसत्यमितिं तत्राज्ञानमेवकारण मित्यर्थःस्वरूपतोविरुद्धलक्षणस्वामिनेकदाप्यनुपहतस्वामिनइत्यर्थइतिवा ३९

अज्ञानंमांकदापिनस्पृशेत्मत्युतज्ञानमेवनित्यंप्रज्वालितंभूयादितिप्रार्थयते जीवस्येति । अज्ञानतःसंसरतोजीवस्यानर्थवहाच्छरीरतोविमोक्षणंनजायतइतियत्तस्मादेतद्देहहानायलीलावतारैस्त्वस्वयशः प्रदीपकंज्ञानंप्रज्वालयेस्तदर्थमहंशरणंप्रपद्यइत्यन्वयः । अनेनलीलावतारविषयाज्ञानंदूरीकृत्यतत्त्वज्ञानमेवविकसितंकुर्वित्युक्तंभवति ४० यतस्त्वत्प्रसादादस्मदादेर्विज्ञानंतत्रकिंचिदपिविज्ञाप्यंनपश्यामि अथापितथापिअशेषपुरुषार्थप्राप्तौभगवद्भक्तेःमुख्यहेतुत्वेपिनरदेवानांविडंबनंयज्ञकरणम् ४१ पारमेष्ठ्येनउत्तमकल्पेनब्रह्मपदप्राप्तिहेतुनावा ४२ ४३ अंत्यावसायिनःअंत्यजातयोपि ईक्षादर्शनमभि मर्शनंस्पर्शनादिलक्षणंचैषांइतीक्षाभिमर्शिनः ४४ उक्तमेवस्फोरयति यस्येति हेअमलयशःमंगलकीर्त्तन यस्यतवाथकल्याणमतएवानलंनिर्दोषंयशःविश्वंपुनाति ननु मित्त्वेयशसोविश्वपुनानत्वं कथमित्यतउक्तं दिवीत्यादि घटांतरदीपवत्अस्पष्टस्यापिकथमित्यतउक्तं दिशांवितानमितिदिशामंतेपुविशेषेणतानोविस्तारोयस्यतत्तथा तथापिनचोरवदित्याह प्रार्थितमिति । अथजन्मप्रभृ तिश्रीमत्पादलक्षणास्पदंगतातवपादरजोवहोर्मिर्मदाकिनीच विश्वंपुनाति अतस्तवमाहात्म्यंकिंवक्ष्यामीत्यतोनमोनमइत्युपरामीतिवाक्यार्थः ४५ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेवि

जीवस्ययत्संसरतोविमोक्षणंनजायतेनर्थवहाच्छरीरतः ॥ लीलावतारैःस्वयशःप्रदीपकंप्रज्वालयेस्त्वंतदहंप्रपद्ये ४० अथाप्याश्रावयेब्रह्मन्नरदेवविडंबनम् ॥ राज्ञःपैतृष्वसेयस्यभक्तस्यचचिकीर्षितम् ४१ यक्ष्यतित्वांमखेंद्रेणराजसूयेनपांडवः ॥ नृपतिःपारमेष्ठ्येनतद्भवाननुमोदताम् ४२ तस्मिन्देवक्रतुवरेभवंतंवैसुरादयः ॥ दिदृक्षवःसमेष्यंतिराजानश्चयशस्विनः ४३ श्रवणात्कीर्तनाद्ध्यानात्पूयंतेंत्यावसायिनः ॥ तवब्रह्ममयस्येशकिमुतेक्षाभिमर्शिनः ४४ यस्यामलंदिवियशःप्रथितंरसायांभूमौचतेमलयशोथदिशांवितानम् ॥ मंदाकिनीचतवपादरजोवहोर्मिःश्रीमत्पदास्पदगताथपुनातिविश्वम् ४५ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेअष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ श्रीशुकउवाच ॥ इत्युदीरितमाकर्ण्यदेवर्षेरुद्धवोब्रवीत् ॥ सभ्यानांमतमाज्ञायकृष्णस्यचमहामतिः १ उद्धवउवाच ॥ यदुक्तमृषिणादेवसाचिव्यंयक्ष्यतस्त्वया ॥ कार्यंपैतृष्वसेयस्यरक्षाचशरणैषिणाम् २ यष्टव्यंराजसूयेनदिक्चक्रजयिनाविभो ॥ अतोजरासुतवधउभयार्थोमतोहिमे ३ अस्माकंचमहानर्थोह्येतेनैवभविष्यति ॥ यशश्चतवगोविंदराज्ञोबंधाद्विमुच्यतः ४ सर्वैर्दुर्विषहोराजानागायुतसमोबले ॥ बलिनामपिचान्येषांभीमसेनबलंविना ५ द्वैरथेसतुजेतव्योनशताक्षौहिणीयुतः ॥ ब्रह्मण्योभ्यर्थितोविप्रैर्नप्रत्याख्यातिकर्हिचित् ६

जय०टीकायांअष्टसप्ततितमोध्यायः ॥ ७८ ॥ एकांतभक्तानांभक्त्यतिशयजननायहरेर्बंधुकृत्याचरणलक्षणमाहात्म्यंकथयति । तत्रादौकृष्णकटाक्षसूचिततत्कार्यविशेषउद्धवःस्वांनीतिंवक्ति इतीति १ तद्भवाननुमोदतामितिदेवर्षिणायदुक्तंतस्यायमभिप्रायःहेदेवत्वयायक्ष्यतःयागंकरिष्यतःपैतृष्वसेयस्ययुधिष्ठिरस्यसाचिव्यंसाहाय्यंकार्यंकर्तव्यमिति किंचशरणैषिणांराज्ञांरक्षाचकार्या २ कार्यद्वय साधनोपायंवक्ति यष्टव्यमिति । तेनराज्ञाराजसूयेनयज्ञेनयष्टव्यं नऋष्यादिनेवयागमात्रेणतथापित्थंकृत्येनभाव्यामित्याह दिक्चक्रेति । दिङ्मंडलंजितवता तत्रामृत्वाजरासंधःकरंनददातीति यदतोजरासुतवधउभयेषामर्थःप्रयोजनं ३ युधिष्ठिरकार्यंसिद्धवत्कृत्वास्वकार्यमभिष्टौति अस्माकमिति एतेनजरासंधवधेन विमुच्यतःविमोचयतः ४ दुर्बलैर्दुर्विषहोस्तुबलिनांसुविषहइत्यतउक्तं बलिनामिति तर्हीदंदुःखसाध्यंनेत्याह भीमसेनेति ५ द्वैरथेद्वंद्वयुद्धे तत्रोपायमाह ब्रह्मण्यइति ६

तीक्ष्णश्चैवप्रचंडश्चवृकोनामानलोमतः सपांडवस्यजठरंतेनभीमोवृकोदरइति । हननानिश्चयेकोहेतुरित्यतउक्तं तवेति त्वयासहगंतव्यंतदर्थमित्यर्थः ७ तत्कुतइतित्राह निमित्तमात्रमिति । कालइत्याख्यरूपंसंज्ञारूपमस्यास्तीति कालाख्यारूपीतस्य ८ हेकृष्णतत्रेदंकर्मलोकक्षेमकरमितिभावेनाह गायंतीति राज्ञांदेव्यःमहिष्यःचशब्दादेव्यःगृहेषुततवइदंकर्मगायंति इदमित्थंतत्राह स्वशक्तिवति आत्मनःस्वामिनोनिरोधान्मोक्षणं कथंगायंतीत्यतोलुप्तोपमामाह गोप्यइति चशब्दोयथावचनःगोप्यःयथाकुंजरपतेः गजेंद्रस्यनक्राद्विमोक्षणंनक्राख्यवधंच यद्वा कुवलयापीडस्यात्मविमोक्षणं शरीरवियोगलक्षणंमरणं चाणूरादिस्वशत्रुवधंच जनकात्मजायाः सीतायाःरावणबंधाद्विमोक्षणं रावणाख्यशत्रुवधंच मुनयोवाल्मीक्यादयः वयंच तथापित्रोःदेवकीवसुदेवयोःकंसविहितशृंखलायाः विमोक्षणं कंसाख्यशत्रुवधंगायामस्तथेत्यर्थःदेव्योदेवस्त्रियोगृहेषुविमानेषुस्थित्वामोक्षणमित्यादिवा ९ किंबहुनोक्तेनायंजरासंधवधोनेकप्रयोजनोपेतइत्याह जरासंधेति भूभारहरणार्थत्वेना

ब्रह्मवेषधरोभूत्वातंभिक्षेतवृकोदरः ॥ हनिष्यतिनसंदेहोद्वैरथेतवसन्निधौ ७ निमित्तमात्रमीशस्यविश्वसर्गनिरोधयोः ॥ हिरण्यगर्भःशर्वश्चकालाख्यारूपिणस्तव ८ गायंतितेविशदकर्मगृहेषुदेव्योराज्ञांस्वशत्रुवधमात्मविमोक्षणंच ॥ गोप्यश्चकुंजरपतेर्जनकात्मजायाःपित्रोश्चलब्धशरणामुनयोवयंच ९ जरासंधवधःकृष्णभूर्यर्थायोपकल्पते ॥ प्रायःकालविपाकेनतवचाभिमतःक्रतुः १० श्रीशुकउवाच ॥ इत्युद्धववचोराजन्सर्वतोभद्रमच्युतः ॥ देवर्षिर्यदुवृद्धाश्चरामश्चप्रत्यपूजयन् ११ अथादिशत्प्रयाणायभगवान्देवकीसुतः ॥ भृत्यान्दारुकजैत्रादीननुज्ञाप्यगुरून्विभुः १२ सनिर्गम्यावरोधात्स्वात्स्वसुतान्सपरिच्छदान् ॥ संकर्षणमनुज्ञाप्ययदुराजंचशत्रुहा ॥ सूतोपनीतंस्वरथमारुहद्गरुडध्वजम् १३ ततोरथद्विपभटसादिनायकैःकराळयापरिवृतआत्मसेनया ॥ मृदंगभेर्यानकशंखगोमुखैःसंघुष्टयावैककुभोनिराक्रमत् १४ प्रियाश्चकाश्वनशिबिकाभिरच्युतंसहात्मजाःपतिमनुसुव्रतायायुः ॥ वरांबराभरणविलेपनस्रजःसुसंवृतानृभिरसिचर्मपाणिभिः १५ नरोष्ट्रगोमहिषखराश्वतर्यःकरेणुभिःपरिजनवारयोषितः ॥ स्वलंकृताःपटकुटिकंबलांबराद्युपस्करायायुरधियुज्यसर्वशः १६ बलंबृहद्ध्वजपटछत्रचामरैर्वरायुधाभरणकिरीटवर्मभिः ॥ दिवांशुभिस्तुमुलरवंबभौरवेर्यथार्णवःक्षुभिततिमिंगिलोर्मिभिः १७ अथोमुनिर्यदुपतिनासभाजितःप्रणम्यतंहृदिनिदधद्विहायसा ॥ निशम्यागाद्यवसितमाहृतार्हणोमुकुंदसंदर्शननिर्वृतेंद्रियः १८ राजदूतमुवाचेदंभगवान्प्रेमयागिरा ॥ माभैष्टदूतभद्रंवोघातयिष्यामिमागधम् १९ इत्युक्तःप्रस्थितोदूतोयथावदवदन्नृपान् ॥ तेपिसंदर्शनंशौरेःप्रत्यैक्षंतमुमुक्षवः २० आनर्तसौवीरमरुंस्तीर्त्वाविनशनंहरिः ॥ नदीर्गिरीनतीयायपुरग्रामव्रजाकरान् २१

वतीर्णत्वात्तत्रकालांतरेदुर्योधनादिभारावरोपणहेतुत्वेनाभिमतःक्रतुरित्याहमायइति १० सर्वतोभद्रंसर्वप्रकारेणभद्रम् ११ १२ १३ ततःकिमभूदितितत्राह ततइति ककुभःदिशःसंघुष्टयासंघोषयंत्या १४ प्रियाश्चाच्युतंपतिंअनुययुः वस्त्रैःसुसंवृताः असिचर्मपाणिभिःनृभिःपरिवृताः १५ तवोबहिर्नरोष्ट्रादिभिःपरिवृताः परिजनयुतवारयोषितश्च पटकुट्यःवस्त्रनिर्मितमंदिराणि पटकुटिकंबलांबराणिआदिर्येषांतेतथा तेचउपस्कराःपरिकरायेषांतेतथा अधियुज्यसंयुज्यआरोप्यवा १६ रवैरंशुभिःदिवादिनंयथाभातिबृहद्ध्वजपटादेरुदाहरणमिदं क्षुभिततिमिंगिलोर्मिभिरर्णवोयथोतिनरोष्ट्रादेर्निदर्शनम् १७ हरेर्व्यवसितंनिश्चितंनिशम्यागात् १८ प्रेमस्नेहंयातीतिप्रेमयासोमपाशब्दवद्रूपंनेयम् १९ २० विनशनंकुरुक्षेत्रं आकरंरत्नाद्युत्पत्तिस्थानम् २१

दृषद्वतींचक्रनदीम् २२ २३ २४ २५ रमाश्रीरालयाभूःतयोरालयश्चाधिराश्रयोमित्यर्थः विस्मृतःलोकावचमानःवावधभ्रमाधनसतया २६ ममजलनयागाः। तुलोःतुलनाद्भिनेत्र २८ उपसमीपेसमेत्यमंत्रणशीलाः २९ ३० पर्यस्तःपरिवृतः ३१ ३२ चंदनांबुसंसिक्तवर्त्मकुरुराजधामददर्शेत्यन्वयः प्रतिसद्मप्रतिगृहम् ३३ ३४ उच्छ्रतवीक्षितेनसमनिरीक्षणेन ३५ उडुप

ततोदृषद्वतींतीर्त्वामुकुंदोथसरस्वतीम् ॥ पांचालानथमत्स्यांश्चशक्रप्रस्थमथागमत् २२ तमुपागतमाकर्ण्यप्रीतोदुर्दर्शनंनृणाम् ॥ अजातशत्रुर्निरगा
त्सोपाध्यायःसुहृद्वृतः २३ गीतवादित्रघोषेणब्रह्मघोषेणभूयसा ॥ अभ्ययात्सहृषीकेशंप्राणाःप्राणमिवागतम् २४ दृष्ट्वाविक्लिन्नहृदयःकृष्णस्नेहेनपांडवः॥
चिराद्दृष्टंप्रियतमंसस्वजेस्मपुनःपुनः २५ दोर्भ्यांपरिष्वज्यरमालयालयंमुकुंदगात्रंनृपतिर्हताशुभः ॥ लेभेपरांनिर्वृतिमश्रुलोचनोहृष्यत्तनुर्विस्मृतलोक
विभ्रमः २६ तंमातुलेयंपरिरभ्यनिर्वृतोभीमःस्मयन्प्रेमजलाकुलेंद्रियः ॥ यमौकिरीटीचसुहृत्तमंमुदाप्रवृद्धबाष्पाःपरिरेभिरेच्युतम् २७ अर्जुनेनपरिष्व
क्तोयमाभ्यांचाभिवादितः ॥ ब्राह्मणेभ्योनमस्कृत्यवृद्धेभ्यश्चयथार्हतः २८ मानिनोमानयामासकुरुसृंजयकेकयान् ॥ सूतमागधगंधर्वाबंदिनश्चोपमं
त्रिणः २९ मृदंगशंखपटहवीणापणववेणुभिः ॥ ब्राह्मणाश्चारविंदाक्षंतुष्टुवुर्नृतुर्जगुः ३० एवंसुहृद्भिःपर्यस्तःपुण्यश्लोकशिखामणिः ॥ संस्तूयमानो
भगवान्विवेशालंकृतंपुरम् ३१ सांसिक्तवर्त्मकरिणांमदगंधतोयैश्चित्रध्वजैःकनकतोरणपूर्णकुंभैः ॥ मृष्टात्मभिर्वरदुकूलविभूषणस्रग्गंधैर्नृभिर्युवतिभिश्चवि
राजमानम् ३२ उद्दीप्तदीपावलिभिःप्रतिसद्मजालनिर्यातधूपरुचिरंविलसत्पताकम् ॥ मूर्धन्यहेमकलशैरजतोरुशृंगैर्जुष्टंददर्शभवनैःकुरुराजधाम ३३
प्राप्तंनिशम्यनरलोचनपानमात्रमौत्सुक्यविश्लथितकेशदुकूलबंधाः ॥ सद्योविसृज्यगृहकर्मपतींस्वतल्पेद्रष्टुंययुर्युवतयःस्मनरेंद्रमार्गे ३४ तस्मिन्सुसं
कुलइभाश्वरथद्विपद्भिःकृष्णंसभार्यमुपलभ्यगृहाधिरूढाः ॥ नार्योविकीर्यकुसुमैर्मनसोपगुह्यसुस्वागतंविदधुरुच्छ्रितवीक्षितेन ३५ ऊचुःस्त्रियःपथिनि
रीक्ष्यमुकुंदपत्नीस्तारायथोडुपसहाःकिमकार्यमूभिः ॥ यच्चक्षुषांपुरुषमौलिरुदारहासलीलावलोककलयोत्सवमातनोति ३६ तत्रतत्रोपसंगम्यपौरामं
गलपाणयः ॥ चक्रुःसपर्यांकृष्णायश्रेणीमुख्याहतैनसः ३७ अंतःपुरजनैःप्रीत्यामुकुंदःफुल्ललोचनैः ॥ ससंभ्रमैरभ्युपेतःप्राविशद्राजमंदिरम् ३८ पृथा
विलोक्यभ्रात्रेयंकृष्णंत्रिभुवनेश्वरम् ॥ प्रीतात्मोत्थायपर्यंकात्सस्नुषापरिषस्वजे ३९ गोविंदंगृहमानीयदेवदेवेशमावृतः ॥ पूजायांनाविदत्कृत्यंप्रमोदो
पहतोनृपः ४० पितृष्वसुर्गुरुस्त्रीणांकृष्णश्चक्रेभिवादनम् ॥ स्वयंचकृष्णयाराजन्भगिन्याचाभिवादितः ४१ श्वश्वासंचोदिताकृष्णाकृष्णपत्नीःसुवर्च
सः ॥ आनर्च्यरुक्मिणींसत्यांभद्रांजांबवतींतथा ४२ कालिंदींमित्रविंदांचशैब्यांनाग्नजितींसतीम् ॥ अन्याश्चाभ्यागतायास्तावासःस्रङ्मंडनादिभिः ॥
४३ सुखंनिवासयामासधर्मराजोजनार्दनम् ॥ ससैन्यंसानुगामात्यंसभार्यंचनवंनवम् ४४

सहाःउडुपेनचंद्रेणसहिताःताराः अमूभिःकिंशुभमकारि ३६ श्रेणीमुख्याःनगरप्रधानाः ३७ ३८ भ्रात्रेयंभ्रातुःपुत्रम् ३९ ४० भगिन्यासुभद्रयाच ४१ श्वश्वापृथया ४२ ४३ ४४

४५ येनमयेनदिव्यासभाराज्ञआहृताभगवदाज्ञयानिर्मायदत्ता ॥ ४६ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटीकायांनवसप्ततितमोऽध्यायः ॥ ७९ ॥ ॥ ७ ॥ ॥
राजसूययज्ञार्थायपांडवानांदिशांजयोजरासंधवधश्चश्रीनारायणप्रसादायत्तइतितन्माहात्म्यत्वेनप्रतिपादयत्यस्मिन्नध्याये तत्रादौयुधिष्ठिरःआगतंश्रीकृष्णंस्वाचिकीर्षितंविज्ञापयति एकदेति १
आभाष्यअभिमुखीकृत्य एतेषांसर्वेषांश्रोत्रादींद्रियतृप्तिजनकंइदंवक्ष्यमाणंवचनमुवाच हेत्यनेनकर्तव्यतांसूचयति २ पावनीःशुद्धिकरीःभवतःविभूतीःसन्निधानविशेषस्थानेंद्रादिदेवताःयष्टुकामः ३ तत्कार्यंभवदनुग्रहेणैतदुःसाधनमित्याह त्वत्पादुकेति अभद्रनशनेअशुभविध्वंसनसमर्थे परिचरंतिनित्यंपूजयंति व्यवहिताश्चेतिछंदसिव्यवधानेप्युपसर्गाणांक्रियायोगःसिद्धः प्रद्यान्वस्य महतोमहनीत्यादौ अनेनभागवतस्यवेदतुल्यत्वेनाध्येयत्वादौतात्पर्यंदर्शयति भवापवर्गसंसारत्यागंविदंति ननुतर्हिनानेनाभीष्टसिद्धिरितितत्राह आशासतइति यदितेसेवकाःआशासतेआशिष ऐहिकसिद्धीःकामयंते तर्हितांअपिविंदंति अन्येअनुपासकानोभयंविंदंतीतिभयंविंदंतीतिशेषः ४ यतोभवच्चरणसेवाफलमनुभवसिद्धमतोलोकोपिप्रत्यक्षप्रमाणोस्यमाहात्म्यंदग्विषयंकरोत्वि

तर्पयित्वाखांडवेनवह्निंपांडवसंयुतः ॥ मोचयित्वामयंयेनराज्ञोदिव्यासभाहृता ४५ उवासकतिचिन्मासान्राज्ञःप्रियचिकीर्षया ॥ विहरन्रथमारुह्यफाल्गुनेनभटैर्वृतः ॥ इतिश्रीभा०म०द०उ०नवसप्ततितमोऽध्यायः ॥ ७९ ॥ श्रीशुकउवाच ॥ एकदातुसभामध्येआस्थितोमुनिभिर्वृतः ॥ ब्राह्मणैःक्षत्रियैर्वैश्यैर्भ्रातृभिश्चसमन्वितः १ आचार्यैःकुलवृद्धैश्चज्ञातिसंबंधिबांधवैः ॥ सर्वेषामेवचैतेषामाभाष्येदमुवाचह २ ॥ युधिष्ठिरउवाच ॥ क्रतुराजेनगोविंदराजसूयेनपावनीः ॥ यक्ष्येविभूतीर्भवतस्तत्संपादयनःप्रभो ३ त्वत्पादुकेअविरतंपरिरेयेचरंतिध्यायंत्यभद्रनशनेसुधियोगृणंति ॥ विंदंतियेकमलनाभभवापवर्गमाशासतेयदितआशिषईशनान्ये ४ तद्देवदेवभवतश्चरणारविंदसेवानुभावमिहपश्यतुलोकएषः ॥ येत्वांभजंतिनभजंत्यपिवोभयेषांनिष्ठांप्रदर्शयविभोकुरुसृंजयानाम् ५ नब्रह्मणःस्वपरभेदमतिस्तवस्यात्सर्वात्मनःसमदृशःस्वसुखानुभूतेः ॥ संसेवयासुरतरोरिवतेप्रसादःसेवानुरूपउदयोनविपर्ययोत्र ६ श्रीभगवानुवाच ॥ सम्यग्व्यवसितंराजन्भवताशत्रुकर्शन ॥ कल्याणीयेनतेकीर्तिर्लोकाननुभविष्यति ७ ऋषीणांपितृदेवानांसुहृदामपिनःप्रभो ॥ सर्वेषामेवभूतानामीप्सितःक्रतुराडयम् ८ विजित्यनृपतीन्सर्वान्कृत्वाचजगतीवशे ॥ संभृत्यसर्वसंभारानाहरस्वमहाक्रतुम् ९ एतेतु भ्रातरोराजन्लोकपालांशसंभवाः ॥ वशेस्मितवतात्राहंदुर्जयोयोऽकृतात्मभिः १०

त्याह तदिति अपिकृष्णत्वमपिभजदभजतामुभयेषामपिजयलक्षणोत्कर्षव्यवस्थापयेत्याह येत्वामिति निष्ठोत्कर्षव्यवस्थायांनाशेतेव्रतयाच्ञयोरितियादवः अनुभावःप्रभावेस्यादिति ५ सर्वसमस्यहरेर्वैषम्यंमयापाद्यतइतिबिभ्यदिवपरिहरति नेति ब्रह्मणःपूर्णस्यसर्वात्मनः सर्वस्वामिनःन नुपरापूर्वेषांसख्यावृणक्तीत्यादिकथमित्यत्राह समदृशइति यथावस्तुदर्शिनः स्वरूपसुखस्यानुभूतिरनुभवःपूर्णानंदोहमितियस्यसतथातस्य अयमपिस्वपरबुद्ध्यभावेहेतुः नन्वसुराणांदुःखोदयःसुराणांसुखोदयइत्ययंविशेषःकस्मादत्राह संसेवयेति उदयतीत्युदयः अतोत्रजगतिविपर्ययोनविषमोनोदेति ६ येनव्यवसितेनक्रतुराजेनअनुभविष्यति सत्वयाऽनुवर्त्यते ७ नकेवलंतवाभीष्टोयमृष्यादीनांसर्वेषामपिहृदयंगमइत्याह ऋषीणामिति ८ तत्रेत्थंभावमाह विजित्येति सर्वसंभारान्संभृत्यसंपाद्यआहरस्वकुरुष्व ९ सांप्रतंसर्वजयेदुःशकोनेतिभावेनाह एतइति लोकपालांशैःसंभवोयेषांतेतथा योहंअकृतात्मभिःअनुत्पादितमत्प्रसादैः १०

भवतोदुर्जयत्वेनकिमस्माकमितितत्राह नेति मत्परंमद्रकंविभूतिभिरुपस्करसंपद्भिः ११ विष्णोस्तेजसाप्रभावेणउपबृंहितान्पारंपूरितान् १२ १३ यक्ष्यतयष्टुकामाय १४ अत्रादाग्पजर
जरासंधोजितोमारितोवेतितत्प्रसंगोनाकर्णितइतिराज्ञोहार्दाशंकांपरिहरन्निदंदिग्विजयात्प्रागेवतद्वधोवृत्तइतिनात्रप्रसक्तइतिवृत्तंतद्वननमनुवदति श्रुत्वेति ननु दिशांजयादनंतरंतद्वधःकिंनस्याद्यथा
स्थितमन्यथानूद्यतेकिमर्थमितिचेन्न निर्णयग्रंथविरोधात् ननुपूर्वापराभावेकिंप्रमाणंप्रयोजनमितिचेदुच्यते पूर्वाःकथाःपरंबुद्युपराः पूर्वतर्कवच । मोहनार्थायदुष्टानांसर्वव्यत्यासइष्यत इत्यादिवाक्यम्
किंच जरासंधंनिहत्यैवपांडवैस्तुदशोजिताइत्यादिस्पष्टवचनम् भगवतएवजरासंधमजितंश्रुत्वातज्जयःकथमितिष्यायतोयुधिष्ठिरस्योद्धवोयमुपायमुवाच तमाहहरिरित्यन्वयः १५ हेतिसूचित
मितिहासंस्पष्टयति भीमसेनइत्यादिना ब्राह्मलिंगधराःब्राह्मणलक्षणानिबिभ्राणाः यतोयत्र १६ आतिथ्यवेलायांआतिथ्यपूजासमये आदित्येदिनमध्यंगाहमानइत्यर्थः १७ १८ दुर्मर्षदुःसहं

नकश्चिन्मत्परंलोकेतेजसायशसाश्रिया ॥ विभूतिभिर्वाविभवैर्देवोपिकिमुपार्थिवाः ॥ ११ ॥ श्रीशुकउवाच ॥ निशम्यभगवद्गीतंप्रीत्युत्फुल्लमुखांबुजः ॥ भ्रातॄन्दिग्विजयेऽयुंक्तविष्णुतेजोपबृंहितान् १२ सहदेवंदक्षिणस्यामादिशत्सहसृंजयैः ॥ दिशिप्रतीच्यांनकुलमुदीच्यांसव्यसाचिनम् ॥ प्राच्यांवृकोदरंराजन्कैकेयैःसहमद्रकैः १३ तेविजित्यनृपान्वीरानाजह्रुर्दिव्यमंजसा ॥ अजातशत्रवेभूरिद्रविणंनृपयक्ष्यते १४ श्रुत्वाऽजितंजरासंधंनृपतेर्ध्यायतोहरिः ॥ आहोपायंतमेवाद्यउद्धवोयमुवाचह १५ भीमसेनोऽर्जुनःकृष्णोब्रह्मलिंगधरास्ततः ॥ जग्मुर्गिरिव्रजंतातबृहद्रथसुतोयतः १६ तंगत्वाति
थ्यवेलायांगृहेषुगृहमेधिनाम् ॥ ब्रह्मण्यंसमयाचंतराजन्याब्रह्मलिंगिनः १७ राजन्विद्ध्यतिथीनस्मानर्थिनोगृहमागतान् ॥ तन्नःप्रयच्छभद्रंतेयद्वयंकाम
यामहे १८ किंदुर्मर्षीतितिक्षूणांकिमकार्यमसाधुभिः ॥ किंनदेयंवदान्यानांकःपरःसमदर्शिनाम् १९ योऽनित्येनशरीरेणसतांगेयंयशोध्रुवम् ॥ नाचिनो
तिस्वयंकल्पःसवाच्यःशोच्यएवसः २० हरिश्चंद्रोरंतिदेवउंछवृत्तिःशिबिर्बलिः ॥ व्याधःकपोतोबहवोह्यध्रुवेणध्रुवंगताः ॥ २१ ॥ श्रीशुकउवाच ॥ स्व
रैराकृतिभिस्तांस्तुप्रकोष्ठैर्ज्याहतैरपि ॥ राजन्यबंधून्विज्ञायदृष्टपूर्वानचिंतयत् २२ राजन्यबंधवोह्येतेब्रह्मलिंगानिबिभ्रति ॥ ददामिभिक्षितंतेभ्यआ
त्मानमपिदुस्त्यजम् २३ बलेर्नुश्रूयतेकीर्तिर्विततादिक्ष्वकल्मषा ॥ ऐश्वर्याद्भ्रंशितस्यापिविप्रव्याजेनविष्णुना २४ श्रियंजिहीर्षतेंद्रस्यविष्णवेद्विजरूपि
णे॥ जानन्नपिमहींप्रादाद्ब्राह्मणार्थमणोपिदैत्यराट् २५ जीवताब्राह्मणार्थायकोन्वर्थःक्षत्रबंधुना ॥ देहेनपतमानेननेहतांविपुलंयशः २६ इत्युदारमतिःप्राहकृ
ष्णार्जुनवृकोदरान् ॥ हेविप्राव्रियतांकामोददाम्यात्माशिरोपिवः २७ श्रीकृष्णउवाच ॥ युद्धंनोदेहिराजेंद्रद्वंद्वशोयदिमन्यसे ॥ युद्धार्थिनोवयंप्राप्तारा ज
न्यान्नकांक्षिणः २८ असौवृकोदरःपार्थस्तस्यभ्रातार्जुनोह्ययम् ॥ अनयोर्मातुलेयंमांकृष्णंजानीहितेरिपुम् २९

परःशत्रुः परोरिपरमात्मनोरिति १९ आचिनोति संचिनोतिउपार्जितंकरोतिवाच्योनेयः २० अध्रुवेणशरीरेण २१ २२ २३ श्रूयतेकिंश्रूयतेएवहीतियोज्यम् इंद्रस्याश्रियंबलाज्जिहीर्षताहर्तुकामेनावि
ष्णुना ऐश्वर्याद्भ्रंशितस्य २४ वार्धमाणःशुक्रेणेतिशेषः २५ यःक्षत्रबंधुःपतमानेनदेहेनविपुलंयशोनेहतांनेहतेनापादयति तेनब्राह्मणार्थायजीवताक्षत्रबंधुनाकोन्वर्थोभवति नकोपीतिविचिंत्य
२६ २७ द्वंद्वशोयुद्धंद्वंद्वयुद्धम् २८ वीप्सां त्रीन्प्रतिस्पष्टयन्निर्दिशति असाविति २९

३० ३१ अतुल्यःनातिसत्वःनप्रशस्तपराक्रमः ३२ ३३ ३४ रंगिणोरंगगतयोः मंडलैवल्गतोर्वा ३५ अन्योन्ययोःपरस्परसंगतयोः सकटिपादकरोरुजत्रून्प्रतिनिपात्यमानेअर्कस्यगु ल्मस्यशास्त्रे दीप्तसंध्योःप्रकाशितसंधिस्थानयोः ३७ अयःस्पर्शैःस्वमुष्टिभिर्व्यपिष्टांविषेषतुःजघ्नतुरित्यर्थः प्रहतयोःसतोनिर्घातवज्रवान्निष्ठुरः ३८ ३९ जरयाराक्षस्याकृतशरीरशकलसंधानात् ज न्मतद्विघटनान्मरणंचजानन् ४० भीमस्यारिवधोपायंसंज्ञयादर्शयामास केसंज्ञेत्याह विटपामिति ४१ ४२ ४३ ४४ ४५ ४६ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटीकायाम

एवमावोदितोराजाजहासोच्चैःसमागधः ॥ आहचामर्षितोमंदोयुद्धंतर्हिददामिवः३०नत्वयाभीरुणायोत्स्येयुधिविक्लवचेतसा ॥ मथुरांस्वपुरींत्यक्त्वासमुद्रं शरणंगतः ३१ अथंतुवयसाऽतुल्योनातिसत्वोनमेसमः ॥ अर्जुनोनभवेद्योद्धाभीमस्तुल्यबलोमम ३२ इत्युक्त्वाभीमसेनायदत्त्वासमहतींगदाम् ॥ द्वितीयांस्वयमादायनिर्जगामपुराद्बहिः ३३ ततःसमबलौवीरौसंसक्तावितरेतरौ ॥ जघ्नतुर्वज्रकल्पाभ्यांगदाभ्यांरणदुर्मदौ ३४ मंडलानिविचित्राणि सव्यंदक्षिणमेवच ॥ चरतोःशुशुभेयुद्धंनटयोरिवरंगिणोः ३५ ततश्चटचटाशब्दोवज्रनिष्पेषसन्निभः ॥ गदयोःक्षिप्तयोराजन्दंतयोरिवदंतिनोः ३६ तेवै गदेभुजजवेननिपात्यमानेअन्योन्ययोःसकटिपादकरोरुजत्रून् ॥ चूर्णीबभूवतुरुपेत्ययथार्कशाखेसंयुध्यतोर्द्विरदयोरिवदीप्तसंध्योः ३७ इत्थंतयोःप्रहत योर्गदयोर्नृवीरौक्रुद्धौस्वमुष्टिभिरयःस्पर्शैर्व्यपिष्टाम् ॥ शब्दस्तयोःप्रहरतोर्घनयोरिवासीन्निर्घातवज्रपरुषस्तलताडनोत्थः ३८ तयोरेवंप्रहरतोःसमशिक्षा बलौजसोः ॥ निर्विशेषमभूद्युद्धमक्षीणजवयोर्नृप ३९ शत्रोर्जन्ममृतीविद्वान्जीवितंचजराकृतम् ॥ पार्थमाप्याययत्स्वेनतेजसार्चितयद्धरिः ४० संचिंत्या रिवधोपायंभीमस्यामोघदर्शनः ॥ दर्शयामासविटपंपाटयन्निवसंज्ञया ४१ तद्विज्ञायमहासत्वोभीमःप्रहरतांवरः ॥ गृहीत्वापादयोःशत्रुंपातयामासभूतले ४२एकंपादंपदाक्रम्यदोर्भ्यामन्यंप्रगृह्यसः ॥ गुदतःपाटयामासशाखामिवमतंगजः ४३ एकपादोरुवृषणकटिपृष्ठस्तनांसके ॥ एकबाह्वक्षिभ्रूकर्णेशकलेदद्दशुःप्रजाः ४४ हाहाकारोमहानासीन्निहतेमगधेश्वरे ॥ पूजयामासतुर्भीमंपरिरभ्यजयाच्युतौ ४५ सहदेवंतत्तनयंभगवान्भूतभावनः ॥ अभ्य षिंचदमेयात्मामागधानांपतिंप्रभुः ॥ मोक्षयामासराजन्यान्संरुद्धामागधेनये ४६ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेअशीतितमोऽध्या यः ॥८० ॥ श्रीशुकउवाच ॥ अयुतेद्वेशतान्यष्टौलीलयायुधिनिर्जिताः ॥ विनिर्गतागिरिद्रोण्यांमालिनोमलवाससः १ क्षुत्क्षामाःशुष्कवदनाःसंरोधपरिक र्शितः ॥ ददृशुस्तेघनश्यामंपीतकौशेयवाससम् २ श्रीवत्सांकंचतुर्बाहुंपद्मपत्रनिभेक्षणम् ॥ चारुप्रसन्नवदनंस्फुरन्मकरकुंडलम्३पद्महस्तंगदाशंखरथां गैरुपलक्षितम् ॥ किरीटहारकटककटिसूत्रांगदान्वितम् ४ भ्राजद्वरमणिग्रीवंनिवीतंवनमालया ॥ पिबंतइवचक्षुर्भ्यांलिहंतइवजिह्वया ५ जिघ्रंतइव नासाभ्यामीहंतइवचेतसा ॥ प्रणेमुर्हतपाप्मानोमूर्धाभिःपादयोर्हरेः ६

शीतितमोध्यायः ॥ ८० ॥ जरासंधरोधादिलक्षणतपसाप्रसन्नोभगवान्यज्ज्ञानसाध्यंस्वरूपंदर्शितवान् तदुपासकानांभक्त्यतिशयजननार्थंकृतमितिकृत्वातन्माहात्म्यंकथयत्यास्मिन्नध्याये तत्रादौतत्संख्यांनिर्दिशति अयुतेति गिरिद्रोण्यांनिरुद्धास्ततोविनिर्गताः १ २ ३ ४ निवीतंपर्यासितम् ५ चेतसाआलिंगनार्थमीहंतःचेष्टमानाइव ६

७ ८ ९ राज्यच्युतिःकथमनुग्रहोऽभूदित्यत्राह राज्येति कुतोनविंदतेइतितत्राह त्वन्मायामोहिताइति चलाःक्षणिकाःसंपदोनित्याःशश्वद्रूपामन्यंतेयत्तस्मात् १० एतमर्थंनिदर्शय
ति मृगतृष्णामिति मृगतृष्णांअंबरप्रदेशसंसृष्टदिवाकरकरनिकरंदृष्ट्वाउदकाशयंजलाधारंजलपूरमित्यर्थः एवमयुक्तामनोयोगाकुशलाःअज्ञावैकारिकींविकारोपेतांअनित्य ंमायां गोअश्वमहिमेत्याच
क्षतइतिश्रुतेर्महिमानंसंपल्लक्षणंवस्तुप्रतिहतिरहितंनित्यंचक्षतेपश्यंति ११ अस्याःजगत्याःयेवयंपुरःस्थितंमृत्युंत्वामगणय्यस्थिताः १२ तेचवयंकालेनश्रियोविचालिताअभूम तत्तस्माद्भव
तोनुकंपयाचरणौस्मरामहे १३ रजोभुवारजोगुणोत्पन्नेनशश्वत्पततादेहेनराज्येनोपासितव्यमितिस्पृहयामहेमेत्ययत्क्रियाफलंस्वर्गादिकंतदपिनकामयामहे कीदृशंकर्णरोचनंश्रवणसुखजनक

कृष्णसंदर्शनाह्लादध्वस्तसंरोधनक्लमाः ॥ प्रशशंसुर्हृषीकेशंगीर्भिःप्रांजलयोनृपाः ७ राजानऊचुः ॥ नमस्तेदेवदेवेशप्रपन्नार्तिहराव्यय ॥ प्रपन्नान्पाहि
नःकृष्णनिर्विण्णान्घोरसंसृतेः ८ नैवनाथाभ्यसूयामोमागधंमधुसूदन ॥ अनुग्रहोयद्भवतोराज्ञांराज्यच्युतिर्विभो ९ राज्यैश्वर्यमदोन्नद्धानश्रेयोविंद
तेनृपाः ॥ त्वन्मायामोहितानित्यामन्यंतेसंपदश्चलाः १० मृगतृष्णांयथाबालोमन्यतेउदकाशयम् ॥ एवंवैकारिकींमायामयुक्तावस्तुचक्षते ११ व
यंपुराश्रीमदनष्टबुद्धयोजिहिर्षयास्याइतरेतरस्पृधः ॥ घ्नंतःप्रजाःस्वाअपिनिर्घृणाःप्रभोमृत्युंपरंत्वामगणय्यदुर्मदाः १२ तएवकृष्णाद्यगभीररंहसादुरं
तवीर्येणविचालिताःश्रियः ॥ कालेनतद्वैभवतोनुकंपयाविनष्टदर्पाश्चरणौस्मरामहे १३ अथोनराज्यंमृगतृष्णरूपितंदेहेनशश्वत्पततारजोभुवा ॥ उ
पासितव्यंस्पृहयामहेविभोक्रियाफलंप्रेत्यचकर्णरोचनम् १४ तन्नःसमादिशोपायंयेनतेचरणाब्जयोः ॥ स्मृतिर्यथानविरमेदपिसंसरतामिह १५ कृ
ष्णायवासुदेवायहरयेपरमात्मने ॥ प्रणतक्लेशनाशायगोविंदायनमोनमः १६ श्रीशुकउवाच ॥ संस्तूयमानोभगवान्राजभिर्मुक्तबंधनैः ॥ तानाहकरुण
स्तातशरण्यःश्लक्ष्णयागिरा १७ श्रीभगवानुवाच ॥ अद्यप्रभृतिभूपालामय्यात्मन्यखिलेश्वरे ॥ सुदृढाजायतेभक्तिर्बाढमाशांसितंतथा १८ दिष्ट्या
व्यवसितंभूपाभवंतऋतभाषिणः ॥ श्रियैश्वर्यमदोन्नाहंपश्यतोन्मादनंनृणाम् १९ हैहयोनहुषोवेनोरावणोनरकोपरे ॥ श्रीमदाद्ध्वंसितास्थानाहे
वदैत्यनरेश्वराः २० संचिंतयतविज्ञायदेहाद्युत्पाद्यमंतवत् ॥ मांयजंतोऽध्वरैर्यत्ताःप्रजाधर्मेणरक्षथ २१ संतन्वंतःप्रजातंतून्सुखदुःखेभवाभवौ ॥
प्राप्तंप्राप्तंचसेवंतोमच्चित्ताव्यचरिष्यथ २२ उदासीनाश्चदेहादावात्मारामाधृतव्रताः ॥ मय्यावेश्यमनःसम्यङ्मामंतेब्रह्मयास्यथ २३ इत्यादिश्यनृपान्कृ
ष्णोभगवान्भुवनेश्वरः ॥ तेषांन्ययुंक्तपुरुषान्स्त्रियोमज्जनकर्मणि २४ सपर्यांकारयामाससहदेवेनभारत ॥ नरदेवोचितैर्वस्त्रैर्भूषणैःस्रग्विलेपनैः २५

मापातरमणीयमित्यर्थः १४ येनोपायेन १५ १६ १७ बाढमाभिमतमाशांसितमाकांक्षितंचजायते बाढंत्वभिमतेभृशइतिच १८ भवतांव्यवसितंदिष्ट्यामंगलंतत्रहेतुः भवंतइ
ति ऋतभाषिणःब्रह्मवादिनःयथार्थवादिनोवा अनुभवयन्निश्रियेति यूयंश्रियैश्वर्यमदानामुन्नाहमभिवृद्धिमुन्मदनंबुद्धिभ्रंशकरंपश्यत १९ कान्पश्यामइतितत्राह हैहयेति ध्वंसिताःभ्रंशिताः
२० शिक्षयति संचिंतयतेति उत्पाद्यंउत्पत्तियोग्यंअंतवन्नाशवत् २१ भवाभवौमंगलामंगले २२ आत्मारामत्वंविवृणोति मयीति २३ २४ २५

भोगैःस्रक्चंदनादिलक्षणैर्धनैर्वा २६ ग्रहाआदित्यादयः २७ प्रीणय्यप्रीतिंजनयित्वा २८ कृतानिकार्याणि २९ प्रकृतिभ्यःविश्वस्तभृत्येभ्यः ३० ३१ खांडवप्रस्थमिंद्रप्रस्थं दुर्हृदांशत्रूणाम् ३२शांतं मृतं प्राप्तमनोरथोऽभूदितिशेषः ३३ ३४३५ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्त०विजयध्वजकृतटीकायामेकाशीतितमोऽध्यायः ॥८१॥ श्रोतृमनोहरंक्षमाजनकंवीरवर्यिवर्धनंहरेःसमवृत्तिनिद र्शनंशिशुपालवधंनिगदत्यस्मिन्नध्याये तत्रादौयुधिष्ठिरोभगवंतंस्तुत्वातदनुज्ञयाराजसूयप्रारंभणंवक्ति एवमित्यादिना १ यस्यतवत्रिलोकगुरवःब्रह्मादयः २ ईशमानिनांईश्वरोहमहंभोगीत्याद्यभिमानवतां दीनानामात्मतत्त्वज्ञानाभावात्कोष्ठगत्याकृपणानामनुशासनंदुर्मार्गप्रवृत्तित्यागेनसन्मार्गवर्तनम् ३ प्रेक्षावतइवहरेरनुशासनादिप्रवृत्तिःस्वप्रयोजनोद्देशपूर्विकेत्यकृतार्थत्वप्रसंगइतितत्राह नहीति तेजः प्रभावलक्षणाप्रभा कर्मभिःशुभाशुभलक्षणैः नकर्मणावर्धतेनोकनीयानितिश्रुतेः एकस्यापिसमाधिकसद्भावेतौकिंनस्यातामितितत्राह अद्वितीयस्येति अस्यापिपरिच्छिन्नत्वेकथामिति मंदाशंकांपरिहर

भोजयित्वावरान्नेनसुस्नातान्समलंकृतान् ॥ भोगैश्चविविधैर्युक्तांस्तांबूलाद्यैर्नृपोचितैः २६ तेपूजितामुकुंदेनराजानोमृष्टकुंडलाः ॥ विरेजुर्मोचिताः क्लेशात्प्रावृडंतेयथाग्रहाः २७ रथान्सदश्वानारोप्यमणिकांचनभूषितान् ॥ प्रीणय्यसूनृतैर्वाक्यैःस्वदेशान्प्रत्ययापयत् २८ तएवंमोक्षिताःकृच्छ्रात्कृ ष्णेनसुमहात्मना ॥ ययुस्तमेवध्यायंतःकृतानिचजगत्पतेः २९ जगदुःप्रकृतिभ्यस्तेमहापुरुषचेष्टितम् ॥ यथान्वशासद्भगवांस्तथाचक्रुस्तंद्रिताः ३० जरासंधंघातयित्वाभीमसेनेनकेशवः ॥ पार्थाभ्यांसंयुतःप्रायात्सहदेवेनपूजितः ३१ तेगत्वाखांडवप्रस्थंशंखान्दध्मुर्जितारयः ॥ हर्षयंतःस्वसुहृदो दुर्हृदांचासुखावहाः ३२ तच्छ्रुत्वाप्रीतमनसइंद्रप्रस्थनिवासिनः ॥ मेनिरेमागधंशांतंराजाचाप्तमनोरथः ३३ अभिवाद्याथराजानंभीमार्जुनजनार्दनाः ॥ सर्वमाश्रावयांचक्रुरात्मनायदनुष्ठितम् ३४ निशम्यधर्मराजस्तुकेशवेनानुकंपितः ॥ आनंदाश्रुकणान्मुंचन्प्रेम्णानोवाचकिंचन ३५ ॥ इतिश्रीभाग वतेमहापुराणेदशमस्कंधेउत्तरार्धेएकाशीतितमोऽध्यायः ॥ ८१ ॥ श्रीशुकउवाच ॥ एवंयुधिष्ठिरोराजाजरासंधवधात्प्रभो ॥ कृष्णस्यचानुभावंतंश्रुत्वाप्री तस्तमब्रवीत् १ युधिष्ठिरउवाच ॥ यस्यत्रिलोकगुरवःसर्वलोकमहेश्वराः ॥ वहंतिदुर्लभंलब्ध्वाशिरसैवानुशासनम् २ सभवानरविंदाक्षदीनानामी शमानिनाम् ॥ धत्तेनुशासनंभूमंस्तदत्यंतविडंबनम् ३ नह्येकस्याद्वितीयस्यब्रह्मणःपरमात्मनः ॥ कर्मभिर्वर्द्धतेतेजोहसतेचयथारवेः ४ नचतेऽजित भक्तानांममाहमितिमाधव ॥ त्वंतवेतिचनानाधीःपशूनामिव वैकृता ५ इत्युक्त्वायाज्ञियेकालेवव्रेयुक्तान्सऋत्विजः ॥ कृष्णानुमोदितःपार्थोब्राह्मणा न्ब्रह्मवादिनः ६ द्वैपायनोभरद्वाजःसुमंतुर्गौतमोऽसितः ॥ वसिष्ठश्च्यवनःकण्वोमैत्रेयःकवषस्त्रितः ७

ति ब्रह्मणइति बहिस्तथाऽस्तुअंतःपरिच्छिन्नइतितत्राह परमात्मनइति आत्मनोजीवात्परत्वेनपूर्णत्वेनमीयमानस्यपरमात्मनइत्यर्थः रवेःप्रभामंदोष्णत्वादिविशेषःकालोपाधिकोनस्वाभाविकइतिभव त्येवंनिदर्शनं हरेस्त्वुक्तविशेषणसामर्थ्यात्सोपिनेत्यवगमयितव्यं ४ हरेरद्वितीयत्वेंकिपुनर्न्यायेनाह नचेति हेअजितमाधवलक्ष्मीपते तेतवभक्तानांपुत्रादौममेतिदेहादावहमितिदेहांतरेत्वमितितदीयक्षे त्रादौतवेतिनानाधीर्नास्तिचशब्दःसर्वत्रेश्वरसत्तांपश्यतामित्यस्मिन्नर्थेवर्ततेकीदृशीनानाधीःयथापशूनांतत्कारराहितानांबुद्धिर्वैकृताविविधप्रकारास्वार्थेताद्धितः ५ याज्ञियेयज्ञकरणयोग्ये युक्तान्कल्पो क्तन्यायवेदिनः ६ ७

८ ९ उपहूतामुनयः यथान्यैरनुपहूताआपतन्राजगमुःतत्रद्राणादयोप्युपहूताः १० ११ यत्रयज्ञकरणमभीष्टतमं देवयजनस्वर्णलांगलैःपुरुषलांगलैःपुरुषलांगलैः पुरुषैः
तत्रयथान्यांयनृपंदीक्षायांचक्रुरित्यन्वयः १२ वरुणस्यप्रज्ञे वरुणं अनूक्तंसमाहरत्यतात्पर्यात्पुनरुक्तंकरोति इंद्रादयइति १३ १४ १५ १६ प्रचेतसंवरुणं सूत्येसोमाभिषवसंज्ञे
ध्यिन्यहनि पशुसंज्ञपनदिवसेवा १७ अग्रार्हणार्हअग्रपूजास्वीकारयोग्यंविमृशंतःविचारयंतः १८ अनेकांत्यान्नानाबुद्धित्वात्सर्वेषांगुणानामेकत्वानियमाद्वाअच्युतःगुणतःस्वरूपतोवानक्षीणः
श्रेष्ठत्वंगुणन्येष्ठ्योग्याग्रपूजनं गुणाःश्रुताःसुविरुद्धाश्चदेवेसंतीत्यादिश्रुतिवाक्यंहिनामूचयति सात्वतःतंत्रप्रणेतारएतेषांपतिःस्वामीगतिश्च इदंचाग्र पूजायोग्यत्वेलिंगम् २९ इंद्रोवैसर्वेषांश्रेष्ठः अग्निर्वैदे

विश्वामित्रोवामदेवःसुमतिर्जैमिनिःक्रतुः ॥ पैलःपराशरोगर्गोवैशंपायनएवच ८ अथर्वाकश्यपोधौम्योरामोभार्गवआसुरिः ॥ वीतिहोत्रोमधुच्छंदा
वीरसेनोकृतव्रणः ९ उपहूतास्तथाचान्येद्रोणभीष्मकृपादयः ॥ धृतराष्ट्रःसहसुतोविदुरश्चमहामतिः १० ब्राह्मणाःक्षत्रियावैश्याःशूद्रायज्ञ
दिदृक्षवः ॥ तत्रेयुःसर्वराजानोराज्ञांप्रकृतयोनृप ११ ततस्तद्वयजनंब्राह्मणाःस्वर्णलांगलैः ॥ कृष्णातत्रयथान्यायंदीक्षायांचक्रिरेनृपम् १२ हैमःकि
लोपकरणोवरुणस्ययथापुरा ॥ इंद्रादयोलोकपालाविरिंचभवसंयुताः १३ सगणाःसिद्धगंधर्वाविद्याधरमहोरगाः ॥ मुनयोयक्षरक्षांसिखगाःकिन्नरचार
णाः १४ राजानश्चसमाहूताराजपत्न्यश्चसर्वशः ॥ राजसूयंसमीयुःस्मराज्ञःपांडुसुतस्यवै १५ मेनिरेकृष्णभक्तस्यमूपपन्नमविस्मिताः ॥ अयाजय
न्महाराजयाजकादेववर्चसः १६ राजसूयेनाविधिवत्प्रचेतसामिवामराः ॥ सूत्येहन्यवनीपालान्याजकान्सदसस्पतीन् १७ अपूजयन्महा
भागान्यथावत्सुसमाहिताः ॥ सदस्यग्रार्हणार्हंवैविमृशंतःसभासदः १८ नाध्यगच्छन्नैकांत्यात्सहदेवस्तदाब्रवीत् ॥ अर्हतिह्यच्युतःश्रेष्ठंभगवान्सा
त्वतांपतिः १९ एषवैदेवताःसर्वादेशकालधनादयः ॥ यदात्मकमिदंविश्वंक्रतवश्चयदात्मकाः २० अग्निराहुतयोमंत्राःसांख्यंयोगश्चयत्परः ॥ एकएवा
द्वितीयोसावेतदात्म्यमिदंजगत् २१ आत्मनात्माश्रयःसम्याःसृजत्यवतिहंत्यजः ॥ विविधानीहकर्माणिजनयन्ह्यनपेक्षया २२ ईहतेयदयंसर्वंश्रेयोधर्मा
दिलक्षणम् ॥ तस्मात्कृष्णायमहतेदीयतांपरमार्हणम् २३ एवंचेत्सर्वभूतानामात्मनश्चार्हणंभवेत् ॥ सर्वभूतात्मभूतायकृष्णायानन्यदर्शिने २४ देयं
शांतायपूर्णायदत्तस्यानंत्यमिच्छता २५ ॥ श्रीशुकउवाच ॥ इत्युक्त्वासहदेवोभूत्तूष्णींकृष्णानुभाववित् ॥ तच्छ्रुत्वातुष्टुवुःसर्वेसाधुसाध्वितिसत्तमाः
२६ श्रुत्वानुज्ञेरितंराजाज्ञात्वाहार्दंसभासदाम् ॥ समर्हयद्धृषीकेशंप्रीतःप्रणतविह्वलः २७

वानांमुखमित्यादेःइंद्रादिपुसत्स्वस्यकथंसंभवोभवतीतितत्राह एषवाइति योदेवानामितिश्रुतिवाइत्यनेनगृह्णाति अचेतनमपितदधीनसत्ताकमित्याह देशेति किंबहुनासर्वमपितद्वश्यान्नमित्याह यदात्म
कमिति तात्पर्यात्पुनरुक्तंकरोति क्रतवइति २० सांख्यंयथार्थज्ञानं योगःकर्मलक्षणः यःपरोविषयोयस्यसतथा उपसंहरति एकइति एतदात्माधीनम् २१ हेसम्याः एतदात्म्यविवरणमात्मेतिउ
क्तार्थसमर्थनंसृजतीत्यादि २२ फलहेतुत्वाचायमेवात्रयोग्यतमइत्याह यदयमिति २३ एतत्तृप्तौसर्वतृप्तस्यादितिभावेनाह एवंचेति स्वस्मादन्यस्यास्वातंत्र्यंनपश्यतीत्यनन्यदर्शीतस्मै देवैःसहवर्ततइ
तिसहदेवोदेवव्रतोपिग्राह्यः भारतेतद्वचनादग्रपूजादानायुक्तः २४ २५ सत्तमाःसतांश्रेष्ठाः २६ २७

२८ २९ ३० ३१ ईशःकालोदुरत्ययःइतिश्रुतिःसत्यवतीअबाधितार्था तदुपपादयति वृद्धानामिति ३२ मामनूध्वंहेसर्वेसदसस्पतयः किंबालभाषितंतदाह कृष्णइति ३३ ३४ अतिव्रज्याति क्रम्य कुलकर्मणिएतेइत्याह गोपइति ३५ एतदेवविवृणोतिवर्णेति ३६ यदोर्वंशेजातत्वात्कथंकुलाभावइतितत्राह ययातिनेति ३७ अब्रह्मवर्चसःगायत्रीजपसंबंधतेजोरहिताः ब्रह्मवेदस्तत्संबंधवचो युक्तान्देशान्वा समुद्रमित्यादिनादाशसाम्यमापादयति ३८ शिवारुतंसृगालशब्दितम् ३९ ४० कुतोनिर्गमनमितितत्राह निंदामिति ४१ ४२ ४३ स्ववचनंसत्यंकर्तुतावत्ततःपूर्वमेवकृष्णःक्षुरांतच

तत्पादाववनिज्यापःशिरसालोकपावनीः ॥ सभार्यःसानुजामात्यःसकुटुंबोवहन्मुदा २८ वासोभिःपीतकौशेयैर्भूषणैश्चमहाधनैः ॥ अर्हयित्वाश्रुपूर्णाक्षोनाशकत्समवेक्षितुम् २९ इत्थंसभाजितंवीक्ष्यसर्वेप्रांजलयोजनाः ॥ नमोजयेतिनेमुस्तंस्वात्पेतुःपुष्पवृष्टयः ३० इत्थंनिशम्यदमघोषसुतःस्वपीठादुत्थायकृष्णगुणवर्णनजातमन्युः ॥ उत्क्षिप्यबाहुमिदमाहसदस्यमर्षात्संश्रावयन्भगवतेपरुषाण्यभीतः ३१ ईशोदुरत्ययःकालइतिसत्यवतीश्रुतिः ॥ वृद्धानामपियद्बुद्धिर्बालवाक्यैर्विभिद्यते ३२ यूयंपात्रविदांश्रेष्ठामामनूध्वंबालभाषितम् ॥ सदसस्पतयःसर्वेकृष्णोयत्संमतोर्हणे ३३ तपोविद्याव्रतधरान्ज्ञानविध्वस्तकल्मषान् ॥ परमर्षीन्ब्रह्मनिष्ठान्लोकपालांश्चपूजितान् ३४ सदसस्पतीनतिव्रज्यगोपोयंकुलपांसनः ॥ यथाकाकःपुरोडाशंसपर्यांकथमर्हति ३५ वर्णाश्रमकुलापेतःसर्वधर्मबहिष्कृतः ॥ स्वैरवर्तीगुणैर्हीनःसपर्यांकथमर्हति ३६ ययातिनैषांहिकुलंशप्तंसद्भिर्विगर्हितम् ॥ वृथापानरतंमत्तंसपर्यांकथमर्हति ३७ ब्रह्मर्षिसेवितान्देशान्हित्वैतेऽब्रह्मवर्चसः ॥ समुद्रंदुर्गमाश्रित्यबाधंतेदस्यवःप्रजाः ३८ एवमादीन्यभद्राणिबभाषेनष्टमंगलः ॥ नोवाचकिंचिद्भगवान्यथासिंहःशिवारुतम् ३९ भगवान्निंदनंश्रुत्वादुःसहंतत्सभासदः ॥ कर्णौपिधायनिर्जग्मुःशपंतश्चेदिपरुषा ४० निंदांभगवतःशृण्वन्तत्परस्यजनस्यच ॥ ततोनापैतियःसोपियात्यधःसुकृताच्युतः ४१ ततःपांडुसुताःक्रुद्धामत्स्यकैकेयसृंजयाः ॥ उदायुधाःसमुत्तस्थुःशिशुपालजिघांसवः ४२ ततश्चैद्यस्त्वसंभ्रांतोजगृहेखड्गचर्मणी ॥ भर्त्सयन्कृष्णपक्षीयान्राज्ञःसदसिभारत ४३ तावदुत्थायभगवांस्तान्निवार्यस्वयंरुषा ॥ शिरःक्षुरांतचक्रेणजहारापततोरिपोः ४४ शब्दःकोलाहलोप्यासीच्छिशुपालेहतेमहान् ॥ तत्राततायिनोभूपादुद्रुवुर्जीवितैषिणः ४५ चैद्यदेहस्थितंज्योतिर्वासुदेवमुपाविशत् ॥ पश्यतांसर्वभूतानामुल्केवभुविखाच्युता ४६ जन्मत्रयानुगुणितवैरसंरब्धयाधिया ॥ ध्यायंस्तन्मयतांयातोभावोहिभवकारणम् ४७ वर्णितंतदुपाख्यानंमयातेबहुविस्तरम् ॥ वैकुंठवासिनोर्जन्मविप्रशापात्पुनःपुनः ४८

क्रेणक्षुरधारसुदर्शनेनरिपोःशिरोजहारेत्यन्वयः ४४ ४५ ज्योतिर्जयचैतन्यात्मकं खादाकाशाच्युतोल्काभुवीव ४६ जन्मत्रयेनुगुणितेनसंवर्धितेनवैरेणशत्रुभावेनविशिष्टेनेतरेणज्ञानेनसंरब्धयासमुद्रिक्तयाधियाध्यायंस्तन्मयतांद्वेषमयतांअसुरोभगवत्प्रधानतांजयोयातःतथाहि भावोभक्तिर्भवकारणंमांगल्यकारणंभवति ४७ तयोरुपाख्यानंवैकुंठवासिनोर्जयविजययोर्विप्रशापात्पुनःपुनर्जन्म ४८

भगवतेऽग्रपूजासमर्पणेनयुधिष्ठिरःकृतकृत्यःकिमुतऋत्विगादिभ्योपियथाविहितदक्षिणामदादितितत्राह ऋत्विग्भ्यइत्यादिना एकराट्चक्रवर्त्ती ४९ ५० राजसूयावभृथविहितकर्मणा ब्रह्मणांविप्राणां क्षत्राणांमंडलेश्वराणांसभामध्ये स्वराडिंद्रः ५१ ५२ बंधुभूतशिशुपालावधलक्षणंहरेःकर्मनपुण्यसाधनंकिंतुतद्विपरीतकारणामितिमंदाशंकांपरिहरन्फलमाह इदमिति ॥ ५३ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटीकायांद्व्यशीतितमोऽध्यायः ॥ ८२ ॥ अनेनानंतरातीताध्यायोक्तमेवप्रश्नपूर्वकंविस्तृत्यकथयति अजातशत्रोरित्यादिना १ २ ३ ४ ५ ६ ७ ऋत्विजश्चसदस्या

ऋत्विग्भ्यःससदस्येभ्योदक्षिणांविपुलामदात् ॥ सर्वान्संपूज्यविधिवच्चक्रेवभृथमेकराट् ४९ माधयित्वाक्रतुंराज्ञःकृष्णोयोगेश्वरेश्वरः ॥ हत्वाचचेदिपंतत्राविजहारयथासुखम् ५० राजसूयावभृथ्येनस्नातोराजायुधिष्ठिरः ॥ ब्रह्मक्षत्रसभामध्येशुशुभेसुरराडिव ५१ राज्ञासभाजिताःसर्वेसुरमानवखेचराः ॥ कृष्णंक्रतुंचशंसंतःस्वधामानिमुदाययुः ५२ यइदंकीर्त्तयेद्विष्णोःकर्मचैद्यवधादिकम् ॥ राज्ञांमोक्षविधानंचसर्वपापैःप्रमुच्यते ॥ ५३ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्द्धेशिशुपालवधोनामद्व्यशीतितमोऽध्यायः ॥ ८२ ॥ राजोवाच ॥ अजातशत्रोस्तंदृष्ट्वाराजसूयमहोदयम् ॥ सर्वेमुमुदिरेब्रह्मन्देवायेचसमागताः १ दुर्योधनंवर्जयित्वाराजानऋषयःसुराः ॥ इतिश्रुतंनोभगवंस्तत्रकारणमुच्यताम् ॥ २ ॥ श्रीशुकउवाच ॥ पितामहस्यतेयज्ञेराजसूयेमहात्मनः ॥ बांधवाःपरिचर्यायांतस्यासन्प्रेमबंधनाः ३ भीमोमहानसाध्यक्षोधनाध्यक्षःसुयोधनः ॥ सहदेवस्तुपूजायांनकुलोद्रव्यसाधने ४ सतांशुश्रूषणेजिष्णुःकृष्णःपादावनेजने ॥ परिवेषणेद्रुपदजाकर्णोदानेमहामनाः ५ युयुधानोविकर्णश्चहार्दिक्योविदुरादयः ॥ बाह्लीकपुत्राभूर्याद्यायेचसंतर्दनादयः ६ निरूपितामहायज्ञेनानाकर्मविशारदाः ॥ प्रवर्त्ततेस्मराजेंद्रराज्ञःप्रियचिकीर्षया ७ ऋत्विक्सदस्यबहुवित्सुसुहृत्तमेषुस्विष्टेषुसूनृतमहार्हणदक्षिणाभिः ॥ चैद्येचसात्वतपतेश्चरणंप्रविष्टेचकुस्ततस्त्ववभृथस्नपनंद्युनद्याम् ८ मृदंगशंखपणवसतूर्यानकगोमुखाः ॥ वादित्राणिविचित्राणिनेदुरारान्महोत्सवे ९ नर्तक्योननृतुर्हृष्टागायकायूथशोजगुः ॥ वीणावेणुतलोन्नादस्तेषांसदिवमस्पृशत् १० चित्रध्वजपताकाद्यैरिभेंद्रस्यंदनादिभिः ॥ स्वलंकृतैर्भटैर्भूपानिर्ययूरुक्ममालिनः ११ यदुसृंजयकांबोजाःकुरुकोशलकैकयाः ॥ कंपयंतोभुवंसैन्यैर्यजमानपुरःसरैः १२ सदस्यर्त्विग्द्विजश्रेष्ठाब्रह्मघोषेणभूयसा ॥ देवर्षिपितृगंधर्वास्तुष्टुवुःपुष्पवर्षिणः १३ स्वलंकृतानरानार्योगंधस्रग्भूषणांबरैः ॥ विलिंपंतोभिषिंचंतोविजह्रुर्विविधैरसैः १४ तैलगोरसगंधोदहरिद्रासांद्रकुंकुमैः ॥ पुंभिर्लिप्ताःप्रलिंपंत्योविजह्रुर्वारयोषितः १५ गुप्तानृभिर्निरगमन्नुपलब्धुमेतद्देव्योयथादिविविमानवरैर्नृदेव्यः ॥ तामातुलेयसखिभिःपरिषिच्यमानाःसव्रीडहासविकसद्वदनाविरेजुः १६

श्चबहुविदश्चतेतथातेषुसुहृत्तमेषुस्विष्टेषुसुपूजितेषुसत्सु ततःकालव्यवधानमंतरेण ८ आराद्दूरेसमीपेच ९ १० ११ १२ १३ रसैश्चहरिद्रादिरागजलैः १४ एतदेवाह तैलेत्यादिना १५ नृदेव्यःराज्ञः एतद्पालब्धुंचक्षुर्विषयंस्थलंनिरगमन्नित्यन्वयः देव्यःदेवस्त्रियः मातुलेयैःसखिभिश्च १६

दतीभिःजलसेचनपात्रैः मलधियांविषयाविष्टानां रुचिरैर्भूषणैःसमेताः १७ १८ पत्नीसंयाजावभृथ्याख्येष्टिभिश्चरित्वाकृत्वा १९ २० अहते अधौते २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ यस्मिन्पुरेविश्वसृजाकृष्णेनतस्मिन्ताभिःश्रीभिःसहद्रुपदराजसुतापतिमुपतस्थइत्यन्वयः ३२ ३३ स्वचक्षुषास्वदृष्टिभूतेन ३४ ३५ वालव्यजनसकुंलैःचामरस्तिभि

तादेवरानुतसखीन्सिषिचुर्हतीभिःछिन्नांबराविकृतिगात्रकुचोरुमध्याः ॥ औत्सुक्यमुक्तकबरच्यवमानमाल्याःक्षोभंदधुर्मलधियांरुचिरैःसमेताः १७ स सम्राड्रथमारुढःसदश्वंरुक्ममालिनम् ॥ व्यरोचतस्वपत्नीभिःक्रियाभिःक्रतुराडिव १८ पत्नीसंयाजावभृथ्यैश्चरित्वातेतमृत्विजः ॥ आचांतंस्नापयां चक्रुर्गंगायांसहकृष्णया १९ दिविदुंदुभयोनेदुर्नरदुंदुभिभिःसमम् ॥ मुमुचुःपुष्पवर्षाणिदेवर्षिपितृमानवाः २० सस्नुस्तत्रततःसर्ववर्णाश्रमयुताजनाः ॥ अथराजाऽहतेक्षौमेपरिधायस्वलंकृतः २१ ऋत्विक्सदस्यविप्रादीनानर्घ्याभरणांबरैः ॥ बंधून्ज्ञातीन्नृपान्मित्रान्सुहृदोन्यांश्चसर्वशः २२ अभीक्ष्णं पूजयामासनारायणपरोनृपः २३ सर्वेजनाःसुरुचोमणिकुंडलस्रगुष्णीषकंचुकदुकूलमह्यर्घ्यहाराः ॥ नार्यश्चकुंडलयुगालकवृंदजुष्टवक्त्रश्रियःकनक मेखलयाविरेजुः २४ अथर्त्विजोमहाशिक्षाःसदस्याब्रह्मवादिनः ॥ विप्रक्षत्रियविट्शूद्राराजानोयेसमागताः २५ देवर्षिपितृभूतानिलोकपालाः सहानुगाः ॥ पूजितास्तमनुज्ञाप्यस्वधामानिययुर्मुदा २६ हरिदासस्यराजर्षेराजसूयमहोदयम् ॥ नैवातृप्यन्प्रशंसंतःपिबन्मर्त्योयथामृतम् २७ ततो युधिष्ठिरोराजासुहृत्संबंधिबांधवान् ॥ प्रेम्णानिवासयामासकृष्णंचत्यागकातरः २८ भगवानपितत्रांगन्यवात्सीत्तत्प्रियंकरः ॥ प्रस्थाप्ययदुवीरान्स्वान्सा रोराजासुहृत्संबंधिवांधवान् ॥ प्रेम्णानिवासयामा सकृष्णंचत्यागकातरः २८ भगवानपितत्रांगगन्यवात्सीत्तत्प्रियंकरः ॥ प्रस्थाप्ययदुवीरान्स्वान्सां बार्दीश्चकुशस्थलीम् २९ इत्थंराजाधर्मसुतोमनोरथमहार्णवम् ॥ सुसमृद्धंसमुत्तीर्यकृष्णेनासीद्गतज्वरः ३० एकदांतःपुरेतस्यवीक्ष्यदुर्योधनःश्रियम् ॥ अतप्यद्राजसूयस्यमहित्वंचाच्युतात्मनः ४१ यस्मिन्नरेंद्रदितिजेंद्रसुरेंद्रलक्ष्म्योनानाविभांतिकिलविश्वसृजोपकॢप्ताः ॥ ताभिःपतिंद्रुपदराजसुतोपतस्थे यस्यांविषक्तहृदयःकुरुराजएषः ३२ यस्मिंस्तदामधुरिपोर्महिषीसहस्रंश्रोणीभरेणशनकैःक्वणदंघ्रिशोभम् ॥ वक्षःसुचारुकुचकुंकुमशोणहारंश्रीमन्मुखं चचलकुंतलकुंतलाढ्यम् ३३ सभायांमयकृप्तायांक्वापिधर्मसुतोविराट् ॥ वृतोनुजैर्बंधुभिश्चकृष्णेनापिस्वचक्षुषा ३४ आसीनःकांचनेसाक्षादासनेमघवा निव ॥ पाररमेष्ठ्याश्रियाजुष्टःस्तूयमानश्चबंदिभिः ३५ उपास्यमानोविप्रेंद्रैर्नानादेशसमागतैः ॥ दोधूयमानोधवलैर्वालव्यजनसंकुलैः ॥ रराजराजशा र्दूलोदिविदेवपतिर्यथा ३६ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्द्धेत्र्यशीतितमोऽध्यायः ॥ ८३ ॥ श्रीशुकउवाच ॥ तत्रदुर्योधनोराजापरीतो भ्रातृभिःप्रियैः ॥ किरीटमालीन्यविशदसिहस्तःक्षिपन्रुषा १

तवायुभिः दोधूयमानःवीज्यमानः ३६ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधे उत्तरार्धेविजयध्वजकृतटीकायांत्र्यशीतितमोऽध्यायः ॥ ८३ ॥ ७ ॥ द्वित्रेष्वध्यायेषुशाल्ववधमाहात्म्यंकथयति तत्रादौभूभारहरणहेतुर्दुर्योधनस्यतेजःक्षतिंचवक्ति तत्रेत्यादिना तत्रसभायाम् १

आवितंनिवितंव्याप्तमितिहलायुधः २ पुरःअग्रतःस्फाटिकमणिनिबद्धाम् ३ ४ योगेश्वरेणश्रीकृष्णेनानुज्ञातः सान्त्वासांत्ववचनेन ५ ६ ७ आत्मनास्वनवद्यहतचाष्टतआत्मानमनाकुलम्
न्भद्रमितिशेषः तत्रकथांतरंवक्तुंतन्नारदागमनमाह तदेति ८ ९ १० ११ १२ १३ १४ १५ रुक्म्यादीन्राज्ञःसमाजंसंमेलनम् आनृण्यंऋणाभावकरणम् १६ शिशुपालद्रुम

स्थलेप्यमृद्धाद्रस्रांतंहरिनीलोपलाचिते ॥ स्थलंपुष्करिणींमत्वासर्वेवंजहसुर्जनाः २ आगच्छन्नेवमुर्वीशःपुरःपुष्करिणींक्वचित् ॥ विलोक्यस्फाटिकांभू
मिंमन्वानोव्यपतज्जले ३ जहासभीमस्तंदृष्ट्वास्त्रियोभूपाश्चकेचन ॥ निवार्यमाणाअप्यंगराज्ञाकृष्णानुमोदिताः ४ अजातशत्रुराकर्ण्यवस्त्रस्रग्भूषणादि
कम् ॥ संप्रेष्याह्वापयामाससान्त्रायेगेश्वरेणच ५ तदनादृत्यसत्कारंव्रीडावनतकंधरः ॥ जाज्वल्यमानहृदयोनजगामतदंतिकम् ६ सव्रीडितोवाग्व
दनोरुषाज्वलन्निष्क्रम्यतूष्णींप्रययौगजाह्वयम् ॥ हाहेतिशब्दःसुमहानभूत्तदाअजातशत्रुर्विमनाइवाभवत् ७ बभूवतूष्णींभगवान्भुवोभरंजिहीर्षुरात्मे
हितमात्मनिस्मरन् ॥ तदाविरासीज्जगदीशसन्निधौमुनिःसुराराधितपादपंकजः ८ उपेत्यनारदःसर्वैःसदस्यैरभिपूजितः ॥ कृष्णेनाभ्यर्चितःसम्यगुपविष्टोन्ह
पांतिके ९ उवाचधर्मराजस्तंप्रणिपत्ययथाविधि ॥ भवान्सर्वत्रगोब्रह्मन् सर्वकालेष्वसंगतः १० नृपाणांशौर्ययुक्तानांसर्वमंडलवासिनाम् ॥ इदानींकतमःशू
रोनित्योद्योगेनवर्त्तते ११ इतितेनोदितांवाणीमाकर्ण्यमुनिरब्रवीत् १२ नारदउवाच ॥ भग्नदर्पानृपाःसर्वेकृष्णेनाप्रतिमौजसा ॥ वसंतिविषयेस्वेस्वेनष्टचेष्टा
गतश्रियः १३ एकएवमहोत्साहःक्षत्रियाणांदुराग्रही ॥ जातःशाल्वेषुनृपतिर्बहुपादातिवाहनः १४ भ्रातर्युपरतेयुद्धेविष्णुनालोकजिष्णुना ॥
ब्रह्मदत्तसुतेहंसेयमुनायांमहात्मना १५ कृष्णद्विडेत्यराज्ञोसौरुक्म्यादीन्कुंडिनेपुरे ॥ समाजंकारयामासभ्रातुरानृण्यकांक्षया १६ शिशुपालद्रुममुखै
र्दंतवक्त्रपुरःसरैः ॥ पराजितेषुसंग्रामेजरासंधादिषुप्रभो १७ शाल्वःप्रतिज्ञामकरोच्छृण्वतांसर्वभूभुजाम् ॥ अयादवींक्ष्मांकरिष्येपश्यंतुममपौरुषम्
१८ इतिमूढःप्रतिज्ञायतपसेप्राविशद्वनम् ॥ गतेतस्मिन्बहून्वर्षान्प्रतीक्ष्यतदुपागमम् १९ तदनंतरजोमात्यैरभिषिक्तोनृपार्थिभिः ॥ तपस्तप्त्वासनृ
पतिर्देवंपशुपतिंप्रभुम् २० आराधयामासवनेपांसुमुष्टिंसकृत्क्षसन् ॥ संवत्सरांतेभगवान्संतुष्टःसउमापतिः २१ वरेणच्छंदयामासशाल्वंशरणमागतम्
॥ देवासुरमनुष्याणांगंधर्वोरगरक्षसाम् २२ अभेद्यंकामगंवव्रेसयानंवृष्णिभीषणम् ॥ तथेतिगिरिशादिष्टोमयःपरपुरंजयः २३ पुरंनिर्मायशाल्वायप्रा
दात्सौभमयस्मयम् ॥ सलब्ध्वाकामगंयानंतमोधामदुरासदम् २४ आययौस्वंजनपदंसमग्रबलवाहनम् ॥ इदानींराजपुत्राणांसएवोद्योगवान्नृप २५

दुर्मुखैःसहजरासंधादिषुसत्सु १७ १८ १९ तस्यशाल्वस्यानंतरजोऽनुजः २० २१ छंदयामास तृप्तमकरोत् २२ अयस्मयंअयोमयम् अयस्मयादीनिच्छंदसीतिपाणिनिः नीलरश्मिपुं
जात्मकत्वात्तमोधामेत्युच्यते २४ २५

२६ २७ मूनृतैःसूनृताभिः २८ २९ स्वसैनिकान्स्वसेनानायकान् ॥ ३० ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्त०विजयध्वजकृतटीकायांचतुरशीतितमोऽध्यायः ॥ ८४ ॥ ॥ ७ ॥ तथामहोत्सवसमेतत्वेन शाल्वःसंक्रुद्धोभूदितिशेषः १ २ आगत्यचांतरिक्षतंविमानमावसंस्तस्मिन्विमानेस्थितःयुयुधेइत्यन्वयः ३ संप्रहारप्रकारमाह पुरीमिति अट्टालोऽट्टः तोलिकावीथिकागृहपंक्तिमध्यपद्धतिरित्यर्थः ४ विहायसआकाशादासारोवेगवान्वर्षस्तत्सहिताःशर्कराःक्षुद्रपाषाणाः चक्रवातोमंडलवायुः ५ शंसुखम् ६ ७ ८ ९ १० उष्णागावोयस्यसउष्णगुःसूर्यः

इतिधर्मसुतःश्रीमान्श्रुत्वातन्नारदोदितम् ॥ पार्श्वेभगवतःशौरेःशनैर्मुखमवैक्षत २६ निशम्यतद्वासुदेवोधैर्यसारोनिराकुलः ॥ किंचित्प्रहस्यास्तुनामेत्याहसाहिमहात्मता २७ पूजयित्वाऋषिंसम्यक्सूनृतैर्गीर्भिरच्युतः ॥ चिराभिलषितःसोपिप्राप्तःसाध्वित्यचिंतयत् २८ उग्रसेनंयदुपतिंयुयुधानं चमाधवः ॥ अक्रूरंकृतवर्माणमन्यांश्चयदुपुंगवान् २९ प्रेषयामासरक्षायैद्वारवत्याःस्वसैनिकान् ३० ॥ इतिश्रीभा०म०द०उ०चतुरशीतितमोऽध्यायः ॥ ८४ ॥ ॥ श्रीशुकउवाच ॥ तथावसतिगोविंदेशक्रप्रस्थेमहात्मनि ॥ ससानुजेचैवनृपेकृतकृत्येयुधिष्ठिरे १ आकर्ण्यशाल्वःसंक्रुद्धोदमघोषसुतं हतम् ॥ जरासंधंचसुहृदंराजसूयंक्रतुंकृतम् २ ययौद्वारावतींशाल्वोवैरंवृष्णिकृतंस्मरन् ॥ तमावसन्नंतरिक्षेयुयुधेभरतर्षभ ३ पुरींबभंजोपवनान्युद्यानानिचसर्वशः ॥ सगोपुराणिद्वाराणिप्राकाराट्टालतोलिकाः ४ विहायसोविमानाग्र्यान्निपेतुःशस्त्रवृष्टयः ॥ शैलाद्रुमाश्चाशनयःसर्पाआसारशर्कराः ॥ प्रचंडश्चक्रवातोभूद्रजसाच्छादितादिशः ५ इत्यर्द्यमानासौभेनकृष्णस्यनगरीभृशम् ॥ नाभ्यपद्यतशंराजन्त्रिपुरेणयथामही ६ प्रद्युम्नोभगवान्वीक्ष्यमथ्यमानानिजाःप्रजाः ॥ मामैष्टेत्यभ्यधाद्वीरोवाचःपित्रोरनुस्मरन् ७ सात्यकिश्चारुदेष्णश्चसांबोऽक्रूरःसहानुजैः ॥ हार्दिक्योभानुविंदश्चगदश्चशुकसारणौ ८ अपरेचमहेष्वासारथयूथपयूथपाः ॥ निर्ययुर्दंशितागुप्तारथनागाश्वपत्तिभिः ९ ततःप्रवव्रतेयुद्धंशाल्वानांयदुभिःसह ॥ यथासुराणांविबुधैस्तुमुलंरोमहर्षणम् १० तांचसौभपतेर्मायांदिव्यास्त्रैरुक्मिणीसुतः ॥ क्षणेननाशयामासनैशंतमइवोष्णगुः ११ विव्याध पंचविंशत्यास्वर्णपुंखैरयोमुखैः ॥ शाल्वस्यध्वजिनीपालंशरैःसन्नतपर्वभिः १२ शतेनाताडयच्छाल्वमेकैकेनास्यसैनिकान् ॥ विव्याधदशभिर्नेतॄन्वाहनानित्रिभित्रिभिः १३ तदद्भुतंमहत्कर्मप्रद्युम्नस्यमहात्मनः ॥ दृष्ट्वातंपूजयामासुःसर्वेऽस्यपुरवासिनः १४ बहुरूपैकरूपंतद्दृश्यतेनचदृश्यते ॥ मयमायाकृतंयानंदुर्विभाव्यंजनैरभूत् १५ क्वचिद्भौमंक्वचिद्व्योम्निक्वचित्सिंधौक्वचिद्गिरौ ॥ अलातचक्रवद्भ्राम्यत्सौभंतद्दुरवस्थितम् १६ यत्रयत्रोपलक्ष्येततत्रैवाभिपतन्शरैः ॥ शाल्वस्ततस्ततोऽभुंचन्शरान्सात्वतयूथपाः १७ शरैरग्न्यर्कसंकाशैराशीविषदुरासदैः ॥ पीड्यमानःपुरानीकःशाल्वोमुह्यत्परैरिति १८

११ १२ १३ अस्यप्रद्युम्नस्य १४ १५ दुरवस्थितंनैकत्रस्थितमभूदितिशेषः १६ तस्यसौभस्यसैनिकःसेनासहितःशाल्वःयत्रयत्रोपलक्ष्येत सात्वतयूथपाः ततःशरानमुंचन्नित्यन्वयः १७ इतिपरैःशरैःप्रपीड्यमानःपुरस्थितानीकः १८

शाल्वस्यानीकपाः सेनानायकाःतेषांशस्त्राणामाघेः १९ २० रथिनिप्राणंदिग्देसारथींस्यमाहरत् जाववयुद्धतःसाधुयुद्धकमावशारदइतयुद्धभावत् २१ अपसर्पणंअपसरण २२ कुतोसाध्व
त्यतस्तदाह नेति मद्विना २३ धर्मसाधनाद्युद्धादपगतोदंपितृभ्यांपृष्टःतत्रपित्रोरात्मनामयाकृतमक्षमंविनुकथंनुवक्ष्यइत्यन्वयः २४ किंचेदंदुःसहमित्याह व्यक्तमिति जामयःसहोदर्यःकथंकथयं
तीतितत्राह क्लैव्यमिति हेवीरमृधेन्यैःसहकथंक्लैव्यंगतस्तत्कथ्यतामिति २५ कोयंधर्मइतितत्राह सूतइति १६ उपस्पृष्टउपहुतः २७ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउ०विजयध्वजकृतटीकायांपंचा

शाल्वानीकपशस्त्रौघैर्वृष्णिवीराभ्रशार्दिताः ॥ नतत्यजूरणंस्वंस्वंलोकद्वयजिगीषवः १९ शाल्वामात्योद्युमान्नामप्रद्युम्नात्प्राक्प्रपीडितः ॥ आसाद्यगद
यागुर्व्याव्याहत्यव्यनदद्बली २० प्रद्युम्नंगदयाशीर्णवक्षस्थलमरिंदमम् ॥ अपोवाहरणात्सूतोधर्मविद्दारुकात्मजः २१ लब्धसंज्ञोमुहूर्त्तेनकार्ष्णिःसारथि
मब्रवीत् ॥ असाध्विदमहोसूतयद्रणान्मेऽपसर्पणम् २२ नयदूनांकुलेजातःश्रूयतेरणविच्युतः ॥ विनामत्क्लीबचित्तेनसूतेनप्राप्तकिल्बिषात् २३ किन्नु
वक्ष्येभिसंगम्यपितरौरामकेशवौ ॥ युद्धाद्धर्म्यादपक्रांतःपृष्टस्तत्रात्मनाक्षमम् २४ व्यक्तंमेकथयिष्यंतिहसंत्योभ्रातृजामयः ॥ क्लैव्यंकथंगतोवीरसहा
न्यैःकथ्यतांमृधे २५ सूतउवाच ॥ धर्मंविजानतायुष्मत्कृतमेतन्मयाविभो ॥ सूतःकृच्छ्रगतंरक्षेद्रथिनंसारथिंरथी २६ एतद्विदित्वानुभवान्मयाद्यापो
हितोरणात् ॥ उपस्पृष्टःपरेणेतिमूर्च्छितोगदयाहतः २७ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्द्धेपंचाशीतितमोऽध्यायः ॥ ८५ ॥ श्रीशुक
उवाच ॥ इतिसूतोदितंवाणीमाकर्ण्ययदुनंदनः ॥ पुनरात्तप्रहरणःसूतमाहरणांगणे १ पश्यसूतद्युमानेषदंशितोधृतकार्मुकः ॥ नयमांद्युमतःपार्श्वेवीरस्ये
त्याहसारथिम् २ आद्रवंतंस्वसैन्यानिद्युमंतंरुक्मिणीसुतः ॥ प्रतिहत्यरुषाविध्यन्नाराचैरष्टभिःस्मयन् ३ चतुर्भिश्चतुरोवाहान्सूतमेकेनचाहनत् ॥ द्वा
भ्यांचकेतुधनुषीद्युमतोन्येनवैशिरः ४ गदःसात्यकिरक्रूरःसांबश्चशुकसारणौ ॥ वसुदेवोग्रसेनौचजघ्नुःसौभपतेर्बलम् ५ पेतुःसमुद्रेबहवःशाल्वेयाभिन्न
कंधराः ॥ एवंयदूनांशाल्वानांनिघ्नतामितरेतरम् ६ रणंत्रिनवरात्रंतुतुमुलंरोमहर्षणम् ॥ इंद्रप्रस्थंगतःकृष्णआहूतोधर्मसूनुना ७ राजसूयेनिवृत्तेचशि
शुपालेरणेहते ॥ अलक्षयद्दुःशकुनान्घोरान्संग्रामशंसिनः ८ कुरुवृद्धाननुज्ञाप्यमुनींश्चब्राह्मणैःसह ॥ अन्वीयमानःसामात्यैःपांडवैर्निर्ययौपुरात् ९ स
गत्वाकिंचिदध्वानंस्थापयित्वापुरौकसः ॥ पृथासुताननुज्ञाप्यप्रणतानश्रुलोचनान् १० सुवर्णशिबिकारूढैरवरोधवधूजनैः ॥ गजाश्वरथपादातिसह
स्रैरपिसंयुतः ॥ अन्वीतराजकटकःप्रतस्थेपश्चिमामुखः ११ शाल्वोपिकुरुशार्दूलविमानेनखचारिणा ॥ अपावृत्यरणाद्राष्ट्रंस्वमेवाभ्यर्दितोययौ १२
गच्छमानस्यशाल्वस्यसांबोभिद्रुत्यपृष्ठतः ॥ शाल्वामात्यंक्षेमधूर्तिर्बाणैर्निन्येयमक्षयम् १३

शीतितमोऽध्यायः ॥ ८५ ॥ यदूनंदयतीतियदुनंदनः एषद्युमान् दंशितोरणांगणेआस्तेइतिशेषः ततःकिंतत्राह नयेति १ २ ३ ४ ५ ६ त्रिनवरात्रंसप्तविंशद्रात्रं अस्मिन्नवसरेकृष्णागमनंवक्ति
इंद्रप्रस्थमिति ७ ८ ९ १० ११ रणादपावृत्यरणंविहायेत्यर्थः १२ १३

अखिलात्समस्तप्रकृतिजनात्वल्लभांप्रियतमं १४ ससज्जसंगतः १५ १६ १७ १८ सालःप्राकारः प्रतोलीविशिखारथ्येतिहल्लयुधः प्रतोलिरेवप्रतोलिका प्रस्तरापूर्णदीर्घिकापाषाणपूरितपरि
खां गंतुमितिशेषः १९ २० २१ २२ २३ २४ २५ २६ २७ २८ सव्यंहस्तं २९ ३० सख्युर्भार्यांशिशुपालस्यसंक्षत्राजायारुक्मिणी ३१ ३२ अपुनरावृत्तिंमरणंयमगृहंवा ३३ ३४ यस्यत

सेनापतिंविविंदाख्यंशाल्वस्याखिलवल्लभम् ॥ निरुध्यपथिगच्छंतंप्रद्युम्नःप्राहरच्छरैः १४ प्रद्युम्नेनातिविद्धोसौगृहीत्वाखड्गचर्मणी ॥ ससर्जरौक्मिणेयेन तदभूद्रणमद्भुतम् १५ मंडलानिविचित्राणिचरतस्तस्यसंगरे ॥ कृपाणेनयदुश्रेष्ठःशिरःकायादपाहरत् १६ विभ्रष्टमार्गासासेनाहतप्रवरयूथपा ॥ विदुद्रावयथाकामंप्राणत्राणपरायणा १७ देवोपिद्वारकामेत्यवेगेनगरुडध्वजः ॥ ददर्शनगरींभग्नप्रासादाट्टालगोपुराम् १८ विशीर्णतोरणांरुग्णतुंगसालप्रतोलिकाम् ॥ विध्वस्तोपवनोद्यानांप्रस्तरापूर्णदीर्घिकाम् १९ निःस्वाध्यायवषट्काराम्लोक्यद्वारकांपुरीम् ॥ अपृच्छत्कृतवर्माणंकिमेतादिति दुर्मनाः २० तेनोक्तंसर्वमाकर्ण्यशाल्वराजविचेष्टितम् ॥ प्रतिजज्ञेयदुपतिःशृण्वतांसर्वसात्वताम् २१ अनुद्युत्यतमद्यैवसौभंहत्वादुरात्मकम् ॥ सौभंनिपात्यजलधौप्रवेक्ष्येद्वारकामिति २२ सरथंशैब्यसुग्रीवमेघपुष्पबलाहकैः ॥ युक्तंबहुप्रहरणमग्रावस्थितदारुकम् २३ आरुह्यभगवान्विष्णुर्गरुडध्वजमुत्तमम् ॥ प्रययौसौभपदवींमनोमारुतरंहसा २४ तथागत्वासुदूरंतमंभोधेःकुक्षिमाश्रितम् ॥ ददर्शसौभंतन्मध्येशाल्वंचसमलंकृतम् २५ शाल्वश्चकृष्णमालोक्यहतप्रायबलेश्वरः ॥ प्राहरत्कृष्णमूताय शक्तिंभीमांदृढांमृधे २६ तामापतंतींनभसिमहोल्कामिवरंहसा ॥ भासयंतींदिशःशौरिःसायकैःशतधाच्छिनत् २७ तंचषोडशभिर्बाणैर्विद्धासौभंचखेचरम् ॥ अविध्यच्छरसंदोहैःखंसूर्यइवरश्मिभिः २८ शाल्वःशौरेस्ततःसव्यंसशार्ङ्गंशार्ङ्गधन्वनः ॥ बिभेदन्यपतद्धस्ताच्छार्ङ्गमासीत्तदद्भुतम् २९ हाहाकारोमहानासीद्यदूनांतत्रपश्यताम् ॥ विनद्यसौभराड्वैरिदमाहजनार्दनम् ३० यत्त्वयायुधिदुर्बुद्धेभ्रातरौ मेमहाबलौ ॥ निहतौहंसडिभकौयमुनायांदुरात्मना ॥ यद्भूयोमूढनःसख्युर्भार्यांप्यपहृतात्वया ३१ यत्त्वमंदसभामध्येदमघोषसुतःसखा ॥ व्यापादितःक्षत्रियाणांपश्यतांहतचेतसाम् ३२ तंत्वाद्यनिशितैर्बाणैरपराजितमानिनम् ॥ नयाम्यपुनरावृत्तियदितिष्ठेर्ममाग्रतः ३३ इतितेनोदितांवाणीमाकर्ण्यमधुसूदनः ॥ प्राहार्दितोबाणगणैःपुनरात्तशरासनः ३४ वृथात्वंकत्थसेमंदनयस्यास्त्यतिकौतुकम् ॥ पौरुषंदर्शयत्वंनःशूराणांफल्गुभाषणम् ३५ इत्युक्त्वाभगवान्शाल्वंगदयाभीमवेगया ॥ ताडजत्रौसंरब्धःसचकंपेवमन्नसृक् ३६ ततःशाल्वःसमुत्पत्यखड्गनानकदुंदुभेः ॥ उत्कृत्यशिरआदायखस्थंसौभंसमाविशत् ३७

वातिकौतुकमितिव्याख्यातंवीर्यनास्ति सत्वंवृथाकत्थसेपौरुषंअस्तिचेद्दर्शयशूराणांचभाषणंफल्गुमितंवीर्यप्रकटनंबह्वित्यर्थः यद्वा शूराणांपौरुषंदर्शयभाषणंफल्गुतुच्छंविकत्थनमित्यर्थः ३५ ३६
शाल्वस्यशक्तिप्रकटनायतन्मायाप्रकारमाह ततइति ३७

श्रीकृष्णः शाल्वसृष्टांमायांअवलोक्यकिमकरोदत्राह ततइति ततोवसुदेवशिरोहरणानंतरंमुहूर्तकालंतत्रयुद्धेअनुतिष्ठन्अन्वतिष्ठत्अन्ववर्तत कीदृशः प्रकृतोविदानंदघनस्वभावेउपस्थितोपिशाल्वमायांजानन्नपिप्रकृतावुपप्रकृतिसमीपेस्थितःअजानन्निव पुनःकिंचकारेतितत्राह ततोमुहूर्तान्महानुभावःअपरिमितप्रभावः सहरिः स्वजनस्यस्वभक्तजनस्यानुकूलात्संगतःवचनप्रसंगात् तद्वसुदेवशिरोहरणमबुध्यत कथंतदत्राह आसुरीमिति शाल्वेनप्रकृतांप्रयुक्तां मूलबलमाह मयइति मयेनासुररक्षणोदितामुपदिष्टामित्यर्थः तदुक्तं जानन्शाल्वकृतांमायामजानन्निवकेशवः अन्ववर्ततकिंचित्त्वेति बुद्धा किंकृतमत्राह प्रकृताविति कृतीच्छेदनइतिधातोः बुद्धामायाःप्रकृतौनिर्मूलनेसम्यक्स्थितोभूदितिशेषः ततस्तामाहरद्भिमुरितिवचनात् अज्ञानप्रकटनंकस्मादत्राह प्रकृताविति प्रकृतिनिर्मितशरीरस्थ त्वादसुरजनमोहनार्थत्वाच्च एवमेवतुसर्वत्रपरमात्मासनातनः विद्धश्चरुधिरस्रावीकथंचिदजयत्परं इत्यादिदर्शयेद्विष्णुर्मोहयन्मायया जगदिति चिदानंदघनस्वभावइत्येतत्कुतइतिचेन्न चिदानंदघनस्यास्यकुतोवेधादिसंभवेदित्यस्मात्स्वजनानुसंगतइतीदमपिसद्वतेःइतिसिद्धं यदचरस्तन्वावावृधानोबलानींद्रप्रब्रुवाणोजनेषु मायेत्सातेयानियुद्धान्याहुर्नीचशत्रुंननुपुरावविवित्सइत्यादिश्रुतिसिद्धोयमित्यर्थः तथाहि हेइंद्र तन्वावावृधानः स्वरूपेणभृशंवर्धमानस्त्वंबलानिवीर्याणिविक्रमलक्षणानिअचरःअकृतेतियत्स्वजनेषुप्रब्रुवाणःव्याकुर्वाणोवर्तसइतिशेषः तस्मात्स्वभावरहस्यंस्वजनाजानंतीति

ततोमुहूर्तात्प्रकृतावुपस्थितस्तत्रानुतिष्ठद्स्वजनानुसंगतः ॥ महानुभावस्तदबुध्यतासुरीमायांसशाल्वप्रकृतांमयोदिताम् ३८ नतत्रदैत्यंनपितुःकलेवरं प्रबुद्धआत्मातदपश्यदच्युतः ॥ स्वप्नेयथाचांबरचारिणंरिपुंसौभस्थमालोक्यनिहंतुमुद्यतः ३९ एवंवदंतिराजर्षेऋषयःखेचरान्विताः ॥ यत्स्ववाचो विरुध्यंतेतन्नूतंतेस्मरंतिनु ४० क्वशोकमोहौस्नेहोवाभयंवायेऽज्ञसंभवाः ॥ क्वचाखंडितविज्ञानज्ञानैश्वर्यैश्वरोजितः ४१ यत्पादसेवार्जितयात्मविद्ययाहिन्वंत्यनाद्यात्मविपर्ययग्रहम् ॥ लभंतआत्मीयमनंतमैश्वरंकुतोनुमोहःपरमस्यसद्वतेः ४२ इतितैरुदितांवाणीमाकर्ण्यकमलेक्षणः ॥ ससौभंहंतुमारेभेशाल्वंकुरुकुलोद्वह ४३ ततोनिशातमादायचक्रंकृष्णःसुदर्शनम् ॥ आग्नेयास्त्रेणाभिमंत्र्यप्राहिणोत्सौभनाशनम् ४४

त्यर्थः शाल्वादिशत्रुणाक्रियमाणानियानियुद्धानिआहुःपुराणादौएतानित्वामुद्दिश्यसामयोदितामाया इत् इंद्रजाललक्षणैवत्वंपुराप्रथमतामुहूर्तंशत्रुसुखत्रोटनान्मायांनाविवित्सेनज्ञातवानासि अद्याधुना विवित्से ननुपश्चात्सासिद्धाभूदित्यर्थः ३८ एतदेवस्पष्टयति नेति अच्युतःज्ञानच्युतिरहितः तत्पितुःकलेवरंचनापश्यत्प्रबुद्धःमायामितिशेषः आत्मापरमात्मानिदर्शयति स्वप्नइति यथास्वप्नेकश्चिदागादीन्पश्यतिततःप्रबुद्धः तान्पदार्थान्नपश्यति बुद्धाकिंकृतमत्राह अंबरचारिणमिति ३९ तद्वद्दृष्णामृष्यादीनामपिज्ञानलोपोनास्तिकिंपुनःहरेरितिभावेनाह एवमिति कथंवदंतीत्यत्राह यत्स्ववाचइति स्वस्यस्वतंत्रस्यहरेर्वाचोवेदलक्षणायन्मोहादिकंहरिविषयंप्रतिविरुध्यंतेविरोधवंत्योभवंति हरेर्मोहादिकंनसहंतइत्यर्थः अजस्यावक्रचेतसइतिश्रुतेः नूनंतार्किकाउपक्रमादिवेदतात्पर्यलिंगकोविदास्तेवैदिकास्तन्मोहादिकंस्मरंतिनुकिंनैवस्मरंतीत्यर्थः येषांस्ववाचोविरुध्यंतेहरेर्मोहादिवादिन्यःपरस्परविरोधिन्यःस्युःतेशास्त्रप्रणेतारःतादृशीर्वाचः स्मरंतिपुराणादौनैवेतिवा ४० प्रत्युतविपरीतमेववदंतीत्याहक्वेति येशोकादयोऽज्ञानतःसंभवायेषांतेतथा ४१ तदेवद्रढयति यत्पादेति आत्मविद्ययापरमात्मज्ञानेनअनाद्यविद्यालेनआत्मविपर्ययग्रहंमनसिस्थितमन्यथाज्ञानंहिन्वंति नाशयंतिनतावदेव किंतु हरितत्त्वंचजानंतीत्याह लभंतइति आत्मीयमात्मनः परमात्मनोविद्यमानंतमैश्वरमीश्वरत्वंलभंतेजानंति यद्वा स्वयोग्यमैश्वरमीश्वरानुग्रहीतमनंतंमोक्षंलभंतेप्राप्नुवंति ४२ ४३ ४४

आब्रह्मसदनंब्रह्मसदनंब्रह्मलोकपर्यंतम् ४५ ४६ सौभंनामपुरम् ४७ ४८ अनंतैरनेकसंख्यैःहरिःसिंहः ४९ ५० शिरोमणिंकिरीटं रुरोजबिभेद हप्रसिद्धं शतंसहस्रमयुतंनियुतंप्रयुता र्बुदे न्यर्बुदंशंखवृंदेचानेखर्वंखर्वमर्बुदमितियादवः ५१ ५२ ५३ पुरुमायिनःअनेकशतमायावतः ५४ ५५ ५६ ५७ सानंदंआनंदसहितंइत्यर्थोविषयानंदःनस्वरूपानंदइत्यर्थः स्यात्सो नुपपन्नः विज्ञानमानंदंब्रह्मेतिश्रुतेः ५८ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटीकायांषडशीतितमोऽध्यायः ॥ ८६ ॥ नृगस्यकृकलासशरीरान्मोक्षकरणमाहात्म्यं

तत्नारायणहस्ताय्यान्मुक्तमाग्नेयमंत्रितम् ॥ जज्वालाब्रह्मसदनंज्वालामालातिभीषणम् ४५ ततोवैमानिकाःसर्वेतेविहायविहायसम् ॥ सुदर्शनोष्मणा तप्तादुद्दुवुःसर्वतोदिशम् ४६ तदर्कशतसंकाशंसौभंभित्त्वाद्विधापुरम् ॥ भूयोनारायणकरंप्रापभूपसुदर्शनम् ४७ ततःसमुद्रेन्यपतत्पुरंविच्छिन्नबंधनम् ॥ गदापाणिर्दुराधर्षःशाल्वोपिप्रत्यदृश्यत ॥ तांप्रेषयामासगदांकृष्णमुद्दिश्यदुर्मतिः ४८ ततोरथंदैत्यबलोपनीतंसंस्थायशाल्वोबहुशस्त्रसंचयम् ॥ अवा किरन्कृष्णशिरस्यनंतैर्महायुधैश्चव्यनदद्धरिर्यथा ४९ तांगदांप्रेषितांतेनछित्त्वाबाणैस्त्रिधाहरिः ॥ पांचजन्यमुपाध्मायसिंहनादंव्यनीनदत् ५० तंशस्त्र पूगैःप्रहरंतमोजसाशाल्वंशरैःशौरिरमोघविक्रमः ॥ विद्ध्वाऽच्छिनद्धर्मधनुःशिरोमणिंरथंचसूत्रोर्गदयारुरोजह ५१ तत्कृष्णहस्तेरितयाविचूर्णितः पपाततोयेगदयासहस्रधा ॥ विसृज्यतंभूतलमास्थितोगदामुद्यम्यशाल्वोच्युतमभ्यगाद्द्रुतम् ५२ आधावतोभीमगदस्यबाहुंभल्लेनछित्त्वाथरथांगमद्भुत म् ॥ वधायशाल्वस्यलयार्कसन्निभंबिभ्रद्भौमार्कइवोदयाचलः ५३ जहारतेनैवशिरःसकुंडलंकिरीटयुक्तंपुरुमायिनोहरिः ॥ वज्रेणवृत्रस्ययथापुरंदरोब भूवहाहेतिवचस्तदानृणाम् ५४ तस्मिन्निपतितेपापेसौभेचाब्धौनिपातिते ॥ देवदुंदुभयोनेदुर्ववर्षुःपुष्पवृष्टयः ५५ स्तूयमानोमुनिगणैःसूतमागधबंदिभिः ॥ आजगामवृतःसैन्यैःपुरींद्वारवतींहरिः ५६ संप्रविश्यपुरींरम्यांपताकाखंडमंडिताम् ॥ अलंकृतामलंकारैःसिक्तसंमृष्टचत्वराम् ५७ पूजितोयदु भिर्वृद्धैःपौरजानपदैस्तथा ॥ रमयन्द्व्यष्टसाहस्रमहिषीःप्रेमविह्वलाः ॥ उवासदेवकीपुत्रःसानंदंकुरुनंदन ॥ ५८ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधे उत्तरार्द्धेशाल्ववधोनामषडशीतितमोऽध्यायः ॥ ८६ ॥ श्रीशुकउवाच ॥ उपविष्टंसुधर्मायांकदाचित्क्षत्रियैर्वृतम् ॥ विज्ञापयद्येत्रपाणिर्द्वास्थोऽभ्येत्यजनार्दनम् १ शक्रप्रस्थाद्द्विजःकश्चिदागत्यद्वारितिष्ठति ॥ प्रवेशितव्योवादेवनवेतियदुसत्तम २ प्रवेशयेतिकृष्णेनद्वास्थेनोक्तेनसत्वरः ॥ प्रवेशितःप्रण म्याहब्राह्मणःपुरुषोत्तमम् ३ धर्मजोधार्तराष्ट्रेणमूढेनाधर्मचारिणा ॥ अक्षैःपराजितोयातःसभार्यःसानुजोवनम् ४ ब्राह्मणेनोदितांवाणीमित्याकर्ण्यसुदुः श्रवाम् ॥ क्रोधोद्विग्नमनास्तूर्णमुत्तस्थेहरिरासनात् ५ सरथंदारुकानीतमारुह्यसहसत्यया ॥ महत्यासेनयासार्धंययौयत्रपृथासुताः ६

हरेःब्राह्मणप्रियत्वंचार्थवादरूपेणकथयत्यस्मिन्नध्याये तत्रादौयुधिष्ठिरस्यराज्यभ्रंशेनवनवासेनिमित्तंवक्तुमुपक्रमते उपविष्टमित्यादिना १ २ कृष्णेनप्रवेशयेत्युक्तेनद्वास्थेनप्रवेशितः ३ ४ इतिवाणींसुदुःश्रवांश्रोतुमशक्यांकर्णदुःसहामित्यर्थः ५ ६

अनुशोचत्अन्वशोचत्शुचप्रकाशइतिधातोःशोकंप्रकाशयन्नबुसत्यशोकः ७ अनुभुक्तानिअनुभूता।निअन्योन्यव्यसनानि ८ हेतुवाक्यैःइतिहासविषयैःवचनैः ९ सत्यभामयाद्रौपदीसमाश्वास्यत्यतः सत्यभामासमन्वितइत्युक्तम् १० ११ अन्यान्भूकंटकान् १२ १३ विचिन्वंतःअन्वेषणंकुर्वतः सत्वंप्राणिनम् १४ कृकंकलासयतिनर्त्तयतीतिकृकलासः शिरःप्राग्रं

वनेवसंतंराजानंब्राह्मणैःपरिवारितम् ॥ दृष्ट्वानुशोचत्सुभृशंसानुजंयदुनंदनः ७ व्यसनान्यनुभुक्तानिवर्णयित्वापरस्परम् ॥ उषित्वातत्रतांरात्रिंपांडवैःसह केशवः ८ हेतुवाक्यैःसमाश्वास्यधर्मराजंयुधिष्ठिरम् ॥ भीमसेनार्जुनौचैवयमौचयदुनंदनः ९ पांचालींद्रौपदींसाध्वींसत्यभामासमन्वितः ॥ आश्वास्यताननुज्ञाप्यब्राह्मणांश्चसहस्रशः १० सुभद्रामभिमन्युंचरथमारोप्यमाधवः ॥ आजगामवनाद्राजन्पुरींद्वारवतींप्रभुः ११ सप्रविश्यपुरींदिव्यां पार्थविश्लेषदुर्मनाः ॥ उवासपालयन्पृथ्वींधर्मेणान्यांश्चकालयन् १२ एकदोपवनंराजन्जग्मुर्यदुकुमारकाः ॥ विहर्तुंसांबप्रद्युम्नचारुभानुगदादयः ॥ १३ क्रीडित्वासुचिरंतत्रविचिन्वंतःपिपासिताः ॥ जलंनिरुदकेकूपेददृशुःसत्वमद्भुतम् १४ कृकलासंगिरिनिभंवीक्ष्यविस्मितचेतसः ॥ तस्यचोद्धरणेयत्नंचक्रुस्तेकृपयान्विताः १५ चर्मभिस्तंतथापाशैर्बद्ध्वापतितमर्भकाः ॥ नाशकुवन्समुद्धर्तुंकृष्णायाचख्युरुत्सुकाः १६ तत्रगत्वारविंदाक्षोभगवान्विश्वभावनः ॥ वीक्ष्योज्जहारवामेनतंकरेणसलीलया १७ सउत्तमश्लोककराभिमृष्टोविहायसद्यःकृकलासरूपम् ॥ संतप्तचामीकरचारुवर्णःस्वर्गोचितालंकरणांबरस्रक्१८भूत्वामुकुंदस्यपदारविंदंननामभूर्ध्नापतितोधरण्याम् ॥ पप्रच्छविद्वानपितस्यकर्मजनेषुविख्यापयितुंमुकुंदः १९ श्रीभगवानुवाच ॥ कस्त्वंमहाभागवरेण्यरूपोदेवोत्तमंत्वांगणयामिनूनम्॥दशामिमांत्वंकतमेनकर्मणासंप्रापितोह्यतदर्हःसुभद्रः २० आत्मानमाख्याहिविवित्सतांनोयन्मन्यसेऽगक्षममत्र वक्तुम् २१ इतिस्मराजासंपृष्टःकृष्णेनानंतमूर्तिना ॥ प्रतीतःप्रणिपत्याहकिरीटेनार्कवर्चसा २२ नृगउवाच ॥ नृगोनामनरेंद्रोहमिक्ष्वाकुतनयःप्रभो ॥ दानिष्वाख्यायमानेषुयदितेकर्णमस्पृशम् २३ किंतुतेऽविदितंनाथसर्वभूतात्मसाक्षिणः ॥ कालेनाव्याहतदृशोवक्ष्येथापितवाज्ञया २४यावंत्यःसिकताभूमेर्यावंत्योदिवितारकाः ॥ यावंत्योवर्षधाराश्चतावतरिददास्मगाः २५ पयस्विनीस्तरुणीःशीलरूपगुणोपपन्नाःकपिलाहेमशृंगीः ॥ न्यायार्जितारूप्यखुराःसवत्सादुकूलमालाभरणाददावहम्२६स्वलंकृतेभ्योगुणशीलवद्भ्यःसीदत्कुटुंबेभ्यऋतव्रतेभ्यः ॥ तपःश्रुतब्रह्मवदान्यवद्भ्यःप्रादांयुवभ्योद्विजपुंगवेभ्यः ॥ २७गोभूहिरण्यायतनाश्वहस्तिनःकन्याःसदासीस्तिलरूप्यशय्याः ॥ वासांसिरत्नानिपरिच्छदान्रथानिष्टंचयज्ञैश्वरितंचपूर्तैः २८ कस्यचिद्द्विजमुख्यस्यभ्रष्टागौर्ममगोधने ॥ संसृष्टाऽविदुषासाचमयादत्ताद्विजातये २९

कृकंविदुरितिच १५ १६ १७ १८ १९ २० विवित्सतांज्ञातुकामानां यद्यदि २१ २२ तवकर्णमस्पृशंतर्हिज्ञातुंयोग्यइत्यर्थः २३ अन्यथापिज्ञातुंशक्यइत्याह किंत्विति २४ सिकतारजांसि अददास्मअददाम् दादानइतिधातुःसुडागमश्छांदसः २५ २६ २७ २८ भ्रष्टाअभ्यस्तदेशंविहायान्यदेशंगता संसृष्टासंकुलिता अविदुषाअजानता २९

तस्यागोःस्वामीपूर्वतनोनाथःअन्यःप्रतिग्रहीतामममेतिप्रतिगृह्याब्रवीत् ३० विवदमानौविप्रतिपद्यमानौ भासनोपसंभाषाज्ञानयत्नेविमत्युपमंत्रणेषुवदइत्यतआत्मनेपदम् भ्रमःसंभ्रमः ३१ ३२ ३३ अपाक्रमत्अपगतवान् ३४ याम्यैर्यमस्यविद्यमानैः ३५ भुंक्ष्वभोक्ष्यसे ३६ तवदानस्यधर्मस्यअंतंनास्तितज्जन्यलोकान्पश्यइत्युक्तोहंप्राक्अशुभंभुंजेइत्यवदम् इत्युक्तेसयमःतर्हि पतेतिमांप्राह ३७ ३८ ३९ देवगतिंस्वर्गं ४० यत्रक्वापियोनिविशेषेसतःसंभवतः ४१ सर्वभावायसंपूर्णैश्वर्याय सर्वोत्पादनकर्त्रेवा अखंडलीलायेतिवा ४२ ४३ परिजनंपारितउपासमानंजनम् ४४

तांनीयमानांतत्स्वामिदृष्ट्वोवाचममेतिताम् ॥ ममेतिप्रतिग्राह्याहनृगोमेदत्तवानिति ३० विप्रौविवदमानौमामूचतुःस्वार्थसाधकौ ॥ भवान्दाताऽपहर्तेति तच्छ्रुत्वामेऽभवद्भ्रमः ३१ अनुनीतावुभौविप्रौधर्मकृच्छ्रंगतेनमे ॥ गवांलक्षंप्रगृह्णीतांदास्याम्येषाप्रदीयताम् ३२ भवंतावनुगृह्णीतांकिंकरस्याविजानतः ॥ समुद्धरतमांकृच्छ्रात्पतंतंनिरयेऽशुचौ ३३ नान्यांप्रतीच्छेवैराजन्नित्युक्त्वास्वाम्यपाक्रमत् ॥ नान्यंगवामप्ययुतमिच्छामीत्यपरोययौ ॥ ३४ ततोऽहंकालयोगेनमृतःपरममायया ॥ एतस्मिन्नंतरेयाम्यैर्दूतैर्नीतोयमक्षयम् ३५ यमेनपृष्टस्तत्राहंदेवदेवजगत्पते ॥ त्वंपूर्वमशुभंभुंक्ष्वउताहोनृपतेऽशुभम् ३६ नांतंदानस्यधर्मस्यपश्यलोकांश्चभास्वतः ॥ पूर्वमेवाशुभंभुंजइतिप्राहपतेतिसः ३७ तावदद्राक्षमात्मानंकृकलासंपतन्प्रभो ॥ ब्रह्मण्यस्यवदान्यस्यतवदासस्यकेशव ३८ स्मृतिर्नाद्यापिविध्वस्तातवसंदर्शनार्थिनः ॥ देवदेवजगन्नाथगोविंदपुरुषोत्तम ३९ नारायणहृषीकेशपुण्यश्लोकाच्युताव्यय ॥ अनुजानीहिमांकृष्णयातुंदेवगतिंप्रभो ४० यत्रक्वापिसतश्चेतोभूयान्मेत्वत्पदास्पदम् ४१ नमस्तेसर्वभावायब्रह्मणेऽनंतशक्तये ॥ कृष्णायवासुदेवायगोपानांपतयेनमः ४२ इत्युक्त्वातंपरिक्रम्यपादौस्पृष्ट्वास्वमौलिना ॥ अनुज्ञातोविमानाग्र्यमारुहत्पश्यतांनृणाम् ४३ कृष्णः परिजनंप्राहभगवान्देवकीसुतः ॥ ब्रह्मण्यदेवोधर्मात्माराजन्याननुशिक्षयन् ४४ दुर्जरंबतब्रह्मस्वंभुक्तमग्नेर्मनागपि ॥ तेजीयसोपिकिमुतराज्ञामीश्वरमानिनाम् ४५ नाहंहालाहलंमन्येविषंयस्यप्रतिक्रिया ॥ ब्रह्मस्वंहिविषंप्रोक्तंनास्यप्रतिनिधिर्भुवि ४६ हिनस्तिविषमत्तारमग्निरद्भिःप्रशाम्यति ॥ कुलंसमूलंदहतिब्रह्मस्वारणिपावकः ४७ ब्रह्मस्वंदुरनुज्ञातंभुक्तंहंतित्रिपूरुषम् ॥ प्रसह्यातिबलाद्भुक्तंदशपूर्वान्दशापरान् ४८ राजानोराजलक्ष्म्याश्वनात्मपातंप्रचक्षते ॥ निरयेऽभिमन्यंतेब्रह्मस्वंसाधुबालिशाः ४९ गृह्णंतियावतःपांसून्रुदतामश्रुबिंदवः ॥ विप्राणांहृतवित्तानांवदान्यानांकुटुंबिनाम् ५० राजानोराजकुल्याश्चतावंतोब्दानिरंकुशाः ॥ नरकेतुविपच्यंतेब्रह्मदायापहारिणः ५१ स्वदत्तांपरदत्तांवाब्रह्मवृत्तिंहरेतयः ॥ षष्टिर्वर्षसहस्राणिविष्ठायांजायतेकृमिः ५२

अग्नेरपिदुर्जरंजीर्णीकर्तुमशक्यम् मनागल्पमपि किंपुनरन्यस्येत्यर्थः ४५ प्रतिनिधिःप्रतिक्रियानास्ति ४६ ब्रह्मस्वाख्यारणिजन्यपावकः ४७ दुरनुज्ञातंअनुज्ञांविनाभुक्तंअननुज्ञातंवा प्रसह्य अविचार्य ४८ राज्यलक्ष्म्याराजश्रियःपातंनिरयेआत्मपातंचनमचक्षतेनपश्यंति येब्रह्मस्वंसाधुमन्यंतेतेबालिशाः ४९ ५० ५१ ५२

नमेब्रह्मधनंभूयाद्यज्जग्ध्वाल्पायुषोनृपाः ॥ पराजिताश्च्युताःस्थानाद्भवंत्युद्वेजितानृपाः ५३ विप्रंकृतागसमपिनैवद्रुह्यतमामकाः ॥ ध्रुवंबहुशपंतंवानम
स्कुरुतानित्यशः ५४ यथाहंप्रणमेविप्रान्सर्वकालंसमाहितः ॥ तथानमतयूयंचयोऽन्यथामेसदंडभाक् ५५ ब्राह्मणार्थोह्यपहृतोहर्तारंपातयत्यधः ॥ अजा
नंतमपिह्येनंनृगंब्राह्मणगौरिव ५६ एवंविश्राव्यभगवान्मुकुंदोद्वारकौकसः ॥ पावनःसर्वलोकानांविवेशनिजमंदिरम् ५७ श्रीशुकउवाच ॥ सद्भिःसमा
गमोराजन्कदाचिन्नाफलोभवेत् ॥ विमुक्तोनरकाद्राजानृगःसाधुसमागमात् ५८ साधूनांदर्शनंस्पर्शःकीर्तनंस्मरणंतथा ॥ तीर्थानामिवपुण्यानांसर्व
मेवहिपावनम् ५९ एतच्छ्रुत्वात्वयासंतःसदोपास्याःपरंतप ॥ ब्रह्मस्वंनैवहर्तव्यंयदीच्छसिपरांगतिम् ६० इतिश्रीभागवतेमहापुराणेदशमस्कंधे
उत्तरार्द्धेनृगाख्यानेसप्ताशीतितमोऽध्यायः ॥ ८७ ॥ श्रीशुकउवाच ॥ बलभद्रःकुरुश्रेष्ठमगवान्रथमास्थितः ॥ सुहृद्दिदृक्षुरुत्कंठःप्रययौनंदगोकुलम्
१ परिष्वक्तश्चिरोत्कंठैर्गोपैर्गोपीभिरेवच ॥ रामोभिवाद्यापितरावाशीर्भिरभिनंदितः २ चिरंनःपाहिदाशार्हसानुजोजगदीश्वर ॥ इत्यारोप्यांकमालिंग्य
नेत्रैःसिषिचतुर्जलैः ३ गोपवृद्धांश्चविधिवद्यविष्ठैरभिवादितः ॥ यथावयोयथासख्यंयथासंबंधमात्मनः ४ तमुपेत्याथगोपालाहास्यहस्तग्रहादिभिः ॥
विश्रांतंसुखमासीनंपप्रच्छुःपर्युपासिताः ५ पृष्टश्चाकथयत्स्वेषुप्रेमगद्गदयागिरा ॥ कृष्णेकमलपत्राक्षेसंन्यस्ताखिलराधसः ६ कच्चिन्नोबांधवाराम
सर्वेकुशलमासते ॥ कच्चित्स्मरथनोरामयूयंदारसुतान्विताः ७ दिष्ट्याकंसोहतःपापोदिष्ट्यामुक्ताःसुहृज्जनाः ॥ निहत्यनिर्जित्यरिपून्दिष्ट्यादुर्गंसमा
स्थिताः ८ गोप्योहसंत्यःपप्रच्छूरामसंदर्शनादृताः ॥ कच्चिदास्तेसुखंकृष्णःपुरस्त्रीजनवल्लभः ९ कच्चित्स्मरतिवाबंधून्पितॄंमातरंचसः ॥ अपिवास्म
रतेऽस्माकमनुसेवांमहाभुजः १० मातरंपितरंभ्रातॄन्पतीन्पुत्रान्स्वसॄरपि ॥ यदर्थेहिन्मदाशार्हदुस्त्यजान्स्वजनान्प्रभो ११ तानःसद्यःपरित्यज्यगतःसंछि
न्नसौहृदः ॥ कथंनुतादृशंस्त्रीभिर्नश्रद्धीयेतभाषितम् १२

रोप्यनेत्रैश्चक्षुर्नाडीनिर्गतैः नेत्रंनाडयांतरोर्मूलइतियादवः ३ यविष्ठैःकनिष्ठैः ४ हास्येनमंदस्मितेनहस्तग्रहेणआदिशब्देनपरिरंभणादिकंगृह्यते ५ संन्यस्ताखिलराधसः समर्पितसमस्तसंपदः ६ ७
८ रामसंदर्शनेनादृताःजातबहुमानाः ९ अस्माकमनुसेवांस्मरतेनवा १० यस्यकृष्णस्यार्थेदृढस्नेहान्मित्तंमात्रादीन्स्वजनान्हिन्मअत्याक्ष्म छांदसप्रयोगः ११ स्त्रीभिस्तादृशंगुडजिह्विकालक्षणं
भाषितंकथंनुनश्रद्धियेतश्रद्धेयमेवेत्यर्थः १२

अस्मदन्यानैवश्रद्दधतइत्याहुः कथमिति परस्त्रियःअस्मदन्यस्त्रियः अन्यत्रउत्तमस्त्रियः अनवस्थितात्मनःचंचलमनसःअन्यत्रसंगरहितस्य कृतघ्नस्यअनुपकारिणःअन्यत्रकारिणःविनाशिनःकृष्णस्य पुमर्थीनस्यान्यत्रपूर्णानंदस्यमुधावचः कथंनगृह्णंति अन्यत्रवचःमुधाकथंनगृह्णंतिसार्थमेवगृह्णंतीत्यर्थः वैचित्रानानाविधाःकथाःवाक्यप्रबंधायस्यसतथातस्य उभयत्रसमं कीदृश्यःसुंदरास्मिता वलोकेनउच्छ्वसितेनोद्वतेनस्मरेणआतुराःअन्यत्रनिरंतरस्मरणपरवत्यः ११ हरयेप्रेम्णाकंपत्योमिथोजल्पंति किंनइति हेगोप्यःअपराःकथाःकथयतस्तस्यकृष्णस्य कथयानःकिंप्रयोजनं तस्यकृष्ण

कथंनुगृह्णंत्यनवस्थितात्मनोवचःकृतघ्नस्यमुधापरस्त्रियः ॥ कृष्णस्यवैचित्रकथस्यसुंदरस्मितावलोकोच्छ्वसितस्मरातुराः १३ किंनस्तत्कथयागोप्यः कथाःकथयतापराः॥ यात्यस्माभिर्विनाकालोयदितस्यतथैवनः १४ श्रीशुकउवाच ॥ इतिप्रहसितंशौरेर्जल्पितंचानुवीक्षितम् ॥ गतिंप्रेमपरिष्वंगंस्मरंत्यो रुरुदुःस्त्रियः १५ संकर्षणस्ताःकृष्णस्यसंदेशैर्हृदयंगमैः ॥ सांत्वयामासभगवान्नानानुनयकोविदः १६ द्वौमासौतत्रचावात्सीन्मधुंमाधवमेवच॥रामःक्षपासुभ गवान्गोपीनांरतिमावहन् १७ पूर्णचंद्रकरामृष्टकौमुदीगंधवायुना ॥ यमुनोपवनेरेमेसेवितेस्त्रीगणैर्वृतः १८ वरुणप्रेषितादेवीवारुणीवृक्षकोटरात् ॥ पतंती तद्वनंसर्वंसौरभेणाध्यवासयत् १९ तंगंधंमधुधारायावायुनोपहृतंबलः ॥ आघ्रायोपगतस्तत्रललनाभिःपपौसमम् २० नेदुर्दुंदुभयोव्योम्निववृषुःकुसुमैर्मुदा ॥ गंधर्वामुनयोरामंतद्वीर्यैरीडिरेमुदा २१ उपगीयमानचरितोवनिताभिर्हलायुधः ॥ वनेषुव्यचरत्क्षीबोमाहेंद्रइववारणः २२ शुभैकुंडलोमत्तोवैज यंत्याचमालया ॥ बिभ्रत्स्मितमुखांभोजंस्वेदप्रालेयभूषितम् २३ सचाजुहावयमुनांजलक्रीडार्थमीश्वरः ॥ निजवाक्यमनादृत्यमत्तइत्यापगांबलः २४ अनागतांहलाग्रेणकुपितोविचकर्षह ॥ पापेत्वंमामवज्ञायययन्नायासिमयाहुता २५ नेष्येत्वांलांगलाग्रेणशतधाकामचारिणीम् ॥ एवंनिर्भर्त्सिताभी तायमुनायदुनंदनम् २६ उवाचचकितावाचंपतित्वापादयोर्नृप २७ यमुनोवाच ॥ रामराममहाबाहोनजानेतवविक्रमम् ॥ यस्यैकांशेनविधृताजग तीजगतःपते २८ परंभावंभगवतोभगवन्मामजानतीम् ॥ मोक्तुमर्हसिविश्वात्मन्प्रपन्नांभक्तवत्सल २९ ततोव्यमुंचद्भगवान्याचितोयमुनांबलः ॥ विज गाहजलंस्त्रीभिःकरेणुभिरिवेभराट् ३० कामंविहृत्यसलिलादुत्तीर्णायासितांबरे ॥ भूषणानिविचित्राणिददौकांतिमतींस्रजम् ३१ वसित्वावाससीनीले मालामाधायकांचनीम् ॥ रेजेस्वलंकृतस्ताभिर्माहेंद्रइववारणः ३२

स्ययच्चस्माभिर्विनाकालोयाति तथातर्हितेनविना नःकालेपियातीत्यन्वयः १४ शुकःस्त्रीणांधैर्यशिथिलंवचनंवज्रधारोपमामितिलोकसिद्धमित्याशयेनाह इतीति इत्थमुक्ताशौरेःकृष्णस्यप्रहसिता दिचस्मरंत्योरुरुदुरित्यन्वयः १५ १६ मधुमाधवंवसंतर्तुं १७ कौमुदीकुमुद्वतीतस्याःगंधेनसंपृक्तेनवायुनासेविते १८ अध्यवासयत्संस्कारोपेतमकरोत् १९ २० ईडिरेतुष्टुवुः २१ क्षीबःमद्यपानम त्तः २२ स्वेदप्रालेयेनघर्माहिमजलेनभूषितम् २३ २४ हेपापे आहुताआहूता २५ २६ २७ २८ भावमभिप्रायंमाहात्म्यंवा २९ ३० असितांबरेनीलवस्त्रे ददौयमुनेतिशेषः ३१ ३२

अद्यापिदृश्यतेराजन्यमुनाकृष्टवर्त्मना ॥ बलस्यानंतवीर्यस्यवीर्यंसूचयतीवहि ३३ एवंसर्वानिशायाताएकेवरमतोव्रजे ॥रामस्याक्षिप्तचित्तस्यमाधुर्यैर्व्रज
योषिताम् ३४ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेअष्टाशीतितमोऽध्यायः ८८ ॥ राजोवाच ॥ भूयोऽहंश्रोतुमिच्छामिरामस्याद्भुतकर्मणः ॥
अनंतस्याप्रमेयस्ययदन्यत्कृतवान्प्रभुः १॥ श्रीशुकउवाच ॥ नरकस्यसखाकश्चिद्द्विविदोनामवानरः ॥ सुग्रीवसचिवःसोथभ्रातामैंदस्यवीर्यवान् २ स
ख्युःसोपचितिंकुर्वन्वानरोराष्ट्रविप्लवम् ॥ पुरग्रामाकरान्घोषानदहद्वह्निमुत्सृजन् ३ क्वचित्सशैलानुत्पाट्यतैर्देशान्समचूर्णयत् ॥ आनर्तान्सुतरामेत्यय
त्रास्तेशङ्खहाहरिः ४ क्वचित्समुद्रमध्यस्थोदोर्भ्यांसुहृत्यतज्जलम् ॥ देशान्नागायुतप्राणोवेलाकूलानमज्जयत् ५ आश्रमान्ऋषिमुख्यानांकृत्वाभग्नवनस्प
तीन् ॥ अदूषयच्छकृन्मूत्रैरग्नीन्वैतानिकान्खलः ।६ पुरुषान्योषितोद्वीक्ष्याद्रिद्रोणीगुहासुसः ॥ निक्षिप्यचाप्यधाच्छैलैःपेशस्कारीवकीटकम् ७ तंदे
शंविप्रकुर्वन्वैधर्षयंश्चकुलस्त्रियः ॥ श्रुत्वासुललितंगीतंगिरिरैवतकंययौ ८ तत्रापश्यद्यदुपतिंरामंपुष्करमालिनम् ॥ सुदर्शनीयसर्वांगंललनायूथमध्यग
म् ९ गायंतंमदिरांपीत्वामदविह्वललोचनम् ॥ विभ्राजमानंवपुषाप्रभिन्नमिववारणम् १० दुष्टःशाखामृगःशाखामारूढःकंपयन्द्रुमान् ॥ चक्रेकिलकिला
शब्दमात्मानंसंप्रदर्शयन् ११ तस्यधार्ष्ट्यंकपेर्वीक्ष्यतरुण्योजातिचापलम् ॥ हास्यप्रियाविजहसुर्बलदेवपरिग्रहाः १२ ताहेलयामासकपिर्भूक्षेपैःसंमु
खादिभिः ॥ संदर्शयन्गुदंतासांरामस्यचनिरीक्षतः १३ तंग्राव्णाप्राहरत्क्रुद्धोबलःप्रहरतांवरः ॥ सवंचयित्वाग्रावाणंमदिराकलशंकपिः १४ गृहीत्वाहेल
यामासधूर्तस्तंकोपयन्भृशम् ॥ भृशंनिर्भिद्यकलशंवासांस्यास्फालयन्बलात् १५ कदर्थीकृत्यबलवान्विप्रचक्रेमदोद्धतः ॥ तस्याप्यविनयंदृष्ट्वादेशांश्च
तदुपद्रुतान् १६ क्रुद्धोमुसलमादत्तहलंचारिजिघांसया ॥ द्विविदोपिमहावीर्यःशैलमुत्पाट्यपाणिना १७ अभ्येत्यतरसातेनबलंमूर्ध्न्यताडयत् ॥ तंतु
संकर्षणोमूर्ध्निपतंतमचलंरुषा १८ प्रतिजग्राहभगवान्मुसलेनाहनच्चतम् ॥ मुसलाहतमस्तिष्कोविरेजेरक्तधारया १९ गिरिर्यथागैरिकयाप्रहारंनान्वचिं
तयत् ॥ पुनरन्यंसमुत्पाट्यकृत्वानिष्पत्रमोजसा २० तेनाहनत्सुसंक्रुद्धस्तंबलःशतधारुजत् ॥ ततोन्यमुत्पाट्यजघ्नेतंचापिशतधाच्छिनत् २१

यदित्यर्थः ५ वैतानिकान्यज्ञसंबंधिनः ६ क्ष्माभृद्द्रोणीगुहासुपर्वतनिवंबगुहासु ७ ८ ९ प्रभिन्नमदजलस्राविणम् १० ११ कपिजातिवापलंदृष्ट्वा १२ हेलयामासअवज्ञाताश्चक्रे संमुखादिभिःपुरःस्थि
त्यादिभिः १३ १४ १५ १६ १७ १८ गैरिकयागिरिधातुरसधारया १९ २० अरुजत्चूर्णयामास २१

२२ २३ २४ २५ सर्वंटकाश्चवनस्पतयोयस्मिन्सतथा २६ जगतोव्यतिकरंनाशमावहतिकरोतीतिजगद्व्यतिकरावहस्तम् २७ ॥ १८ ॥ इतिश्रीभागवतमहापुराणदशमस्कंधउत्तरार्धावजयध्वकृत टीकायामेकोननवतितमोऽध्यायः ॥ ८९ ॥ ॥ ७ ॥ समितिशब्देनसंगरसभेगृह्येतेउभेअपिशब्देणवाचाजयतीतिसमितिंजयः खशप्रत्ययोमुमागमोनुस्वारः समितिःसंगरसभयोरित्यभिधानम् १ अकामांकुमारकामविधुराम् २ अस्मत्प्रसादोपचिताः संवर्धिताः अतएवनोमहींभुंजते दत्तामस्माभिरितिशेषः ३ निगृहीतंबद्धं शीर्णदंताः भग्नदंताः४ ५ एतेइत्यवलोक्यसांबंबभ्रुमारेभिरे असंगताःवि

एवंयुध्यन्भगवताभग्नेभग्नेपुनःपुनः ॥ आकृष्यसर्वतोवृक्षान्निर्वृक्षमकरोद्वनम् २२ ततोमुंचच्छिलावर्षंबलस्योपर्यमर्षितः ॥ तत्सर्वंचूर्णयामासलीलया मुसलायुधः २३ सबाहूतालसंकाशौमुष्टीकृत्यकपीश्वरः ॥ आसाद्यरोहिणीपुत्रंदोर्भ्यांवक्षस्यरूरुजत् २४ यादवेंद्रोपितंदोर्भ्यांत्यक्त्वामुसललांगलौ ॥ जत्रावताडयत्क्रुद्धःसोपतद्रुधिरंवमन् २५ चकंपेतेनपतताकंटकवनस्पतिः ॥ पर्वतोनृपशार्दूलवायुनानौरिवांभसि २६ जयशब्दोनमःशब्दःसाधुसाध्वितिचांबरे ॥ सुरसिद्धमुनींद्राणामासीत्कुसुमवर्षिणाम् २७ एवंनिहत्यद्विविदंजगद्व्यतिकरावहम् ॥ संस्तूयमानोभगवाञ्जनैःस्वपुरमाविशत् ॥ २८ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेवि०द्विविदवधोनामएकोननवतितमोऽध्यायः ॥ ८९ ॥ श्रीशुकउवाच ॥ दुर्योधनसुतांराज न्लक्ष्मणांसमितिंजयः ॥ स्वयंवरस्थामहरत्सांबोजांबवतीसुतः १ कुरवःकुपिताऊचुर्दुर्विनीतोऽयमर्भकः ॥ कदर्थीकृत्यनःकन्यामकामामहरद्बलात् २ बध्नीतैनंदुर्विनीतंकिंकरिष्यंतिवृष्णयः ॥ येरस्मत्प्रसादोपचितांदत्तांनोभुंजतेमहीम् ३ निगृहीतंसुतंश्रुत्वायद्येष्यंतीहवृष्णयः ॥ भग्नदर्पाःशमंयांतिशीर्ण दंताइवाहयः ४ इतिकर्णसमालोक्यभूरिश्रवःसुयोधनौ ॥ सदुःशासनगांधारौदुर्मंत्रैकांतशीलिनौ ५ एतेऽतिक्रम्यविदुरंगांधारींचयशस्विनीम् ॥ सांबमारेभिरेबद्धुंकुरुवृद्धैरसंगताः ६ दृष्ट्वानुधावतःसांबोधार्तराष्ट्रान्महारथः ॥ प्रगृह्यरुचिरंचापंतस्थौसिंहइवैकलः ७ तेतंजिघृक्षवःक्रुद्धास्तिष्ठतिष्ठेतिवादिनः ॥ आसाद्यधन्विनोबाणैःकर्णमुख्याःसमाकिरन् ८ सोऽतिबद्धःकुरुश्रेष्ठकुरुभिर्यदुनंदनः ॥ नामृष्यत्तत्परिभवंदंडाहतइवोरगः ९ विस्फार्य सुमहच्चापंसर्वान्विव्याधसायकैः ॥ कर्णादीन्सहयाग्रण्यांस्तावद्भिर्युगपत्पृथक् १० चतुर्भिश्चतुरोवाहानेकैकेनचसारथीन् ॥ रथिनश्चमहेष्वासास्तस्यतच्छेऽभ्यपूजयन् ११ तंतुतेविरथंचक्रुश्चत्वारश्चतुरोहयान् ॥ एकस्तुसारथिंजघ्नेचिच्छेदान्यःशरासनम् १२ तेतथाविरथंकृत्वाक्रुच्छ्रेणकुरवोयुधि ॥ कुमारंगृह्यकन्यांचस्वपुरंजयिनोऽविशन् १३ तच्छ्रुत्वानारदोक्तेनराजन्संजातमन्यवः ॥ कुरून्प्रत्युद्यमंचक्रुरुग्रसेनप्रचोदिताः १४

नाभूताः ६ एकलःअपुरुषद्वितीयः ७ जिघृक्षवःग्रहीतुकामाः ८ ९ हयानामग्रण्यंअग्रणीभवंकर्मतेनसहवर्ततइतिसहयाग्रण्यास्तान्यावंतः तावद्भिःशरैः १० एतदेवविवृणोति चतुर्भिरिति सांबस्यतत्कर्मसंदृश्यकुरवःकिमकुर्वन्नत्राह महेष्वासाइति ११ अत्रसांबस्यपराजयोनास्तीतिभावेनाह चत्वारइति १२ गृह्यगृहीत्वाजयिनोजेतुकामाएवनतुलब्धजयाइतितात्पर्यार्थः १३ नारदोक्तेननारदवचनेन १४

कलिविरोधम् १५ १६ १७ १८ १९ २० परस्परंशिवंसुखममामयंआरोग्यमविक्लवंधार्ष्ट्यंयुक्तम २१ २२ अधर्मेणबबंधातबंधनमकाष्ट मृष्यसहयम २३ २४ आरुरुक्षत्युपानद्भि
दुमिच्छति २५ यौनेयेनयोनिनिमित्तेनसंबंधोयेषांतेतथा ततःकिमत्राह सहइति २६ अस्मदत्तेत्युक्तंविवृणोति चामरेति मह्यंमहनीयंआसनंभुंजंति भजंति अन्योपद्रवमंतरेणरक्षंति भु
जोनवनइतिपाणिनिः २७ दातृणामस्माकंप्रतीपैः विरोधिभिः दत्तैरमृतैःक्षीरादिरसैःविषात्मनापरिणतैः दातृणांमरणप्रदत्वेनप्रतीपैः २८ अवरुंधीतमाप्नोति सिंहग्रस्तउरणःअविर्यथाकवलंनग्रहाति

सांत्वयित्वातुतान्रामःसंकुद्धान्वृष्णि पुंगवान् ॥ नैच्छत्कुरूणांवृष्णीनांकलिंकलहशंकितः १५ जगामहास्तिनपुरंरथेनादित्यवर्चसा ॥ ब्राह्मणैःकुलवृ
द्धैश्चवृतश्चंद्रइवग्रहैः १६ गत्वागजाह्वयंरामोबाह्योपवनमाश्रितः ॥ उद्धवंप्रेषयामासधृतराष्ट्रायशांतये १७ सोऽभिवंद्यांबिकापुत्रंभीष्मंद्रोणंचबा
ह्लिकम् ॥ दुर्योधनंचविधिवदब्रवीद्राम मागतम् १८ तेऽपिप्रीताःसमाकर्ण्यप्राप्तंरामंसुहृत्तमम् ॥ तमर्चयित्वाभिययुःसर्वेमंगलपाणयः १९ तंसंगम्ययथा
न्यायंगामर्घ्यंचन्यवेदयन् ॥ तेषांयेतत्प्रभावज्ञाःप्रणेमुःशिरसाबलम् २० बंधून्कुशलिनःश्रुत्वाप्टष्ट्वाशिवमनामयम् ॥ परस्परमथोरामोबभाषेऽविक्लवंव
चः२१उग्रसेनःक्षितीशेशोयद्वआज्ञापयत्प्रभुः ॥तदव्यग्रधियःश्रुत्वाकुरुध्वंमाविलंबितम्२२ यद्यूयंबहवस्त्वेकंजित्वाऽधर्मेणधार्मिकम्॥ अबध्नीताथतन्मृ
ष्येबंधूनामिष्टकाम्यया२३ वीर्यशौर्यबलोन्नद्धमात्मशक्तिसमंवचः ॥ कुरवोबलदेवस्यनिशम्योचुःप्रकोपिताः २४ अहोमहच्चित्रमिदंकालगत्यादुरत्ययम्॥
आरुरुक्षत्युपानद्वैशिरोमुकुटसेवितम् २५ एतेयौनेयसंबंधाःसहशय्यासनाशनाः ॥ वृष्णयस्तुल्यतांनीताअस्मद्दत्तनृपासनाः २६ चामरव्यजनेशंख
मातपत्रंचपांडुरम् ॥ किरीटमासनंमह्यंभुंजंत्यस्मदुपेक्षया २७ अलंयदूनांनरदेवलांछनैर्दातृप्रतीपैःफणिनामिवामृतैः ॥ येऽस्मत्प्रसादोपचिताहिया
दवाज्ञापयंत्यद्यगतत्रपावत २८ कथमिंद्रोपिकुरुभिर्भीष्मद्रोणार्जुनादिभिः ॥ अदत्तमवरुंधीतसिंहग्रस्तइवोरणः २९ ॥ श्रीशुकउवाच ॥ जन्मबंधु
श्रियोन्नद्धमदास्तेभरतर्षभ ॥ आश्राव्यरामंदुर्वाक्यैरटव्यांपुरआविशन् ३० दृष्ट्वाकुरूणांदौःशील्यंश्रुत्वावाच्यातिवाच्यताम् ॥ अवोचत्कोपसंरब्धो
दुष्प्रेक्ष्यःप्रहसन्मुहुः ३१ नूनंनाममदोन्नद्धाःशांतिनेच्छंत्यसाधवः ॥ तेषांहिप्रशमोदंडःपशूनांलकुटोयथा ३२ अहोयदून्सुसंरब्धान्कृष्णंचकुपितंशनैः॥
सांत्वयित्वाहमेतेषांशममिच्छन्निहागतः ३३ तइमेमंदमतयःकलहातिरताःखलाः ॥ तस्मात्तंमामवज्ञायदुर्भाषांमानिनोऽब्रुवन् ३४ नोग्रसेनःकिलविभुर्भोजवृष्ण्यंधकेश्वरः ॥ शक्रादयोलोकपालायस्यादेशानुवर्तिनः ३५ सुधर्माक्रम्यतेयेनपारिजातोऽमरांघ्रिपः ॥ आनीयभुज्यतेसोऽसौनाकिलाध्यास
नार्हकः ३६ यस्यपादयुगंसाक्षाच्छ्रीरुपास्तेऽखिलेश्वरी ॥ सनार्हतिकिलश्रीशोनरदेवपरिच्छदान् ३७

सिंहग्रस्तमितिपाठे कवलमादातुंनशक्तः २९ अट्व्यामुपवनेस्थितंरामम् ३० वाच्यातिवाच्यतांअपवादातिशयितांअपवादताम् ३१ प्रशमःशांतिकरः लकुटःयष्टिः ३२ ३३ ३४ ३५ सो
ऽसौकृष्णः ३६ ३७

श्रद्धामहेआकांक्षामहे सर्वैरुपासितंनिषेवितंतीर्थभागीरथीअस्याअपितीर्थशुद्धिकरं अस्यकृष्णस्य ३८ ३९ अनुशासिताशिक्षाकरः ४० ४१ ४२ ४३ ४४ कुटुंबीनामितिदीर्घश्छांदसः ४५ क्रीडनकान्क्रीडासाधनानि ४६ अंतेजगत्संहारे परिशिष्यमाणोऽद्वितीयः शेषे ४७ जगद्धितेतेकोपोऽखिलशिक्षार्थं सत्वंस्थित्यादितत्परः । सद्विरत्रहलधरेयथोचितंग्राह्यमनुचितमंतर्यामिविषयमितितात्पर्यमवगंतव्यम् ४८ विश्वस्यप्रपंचस्यानुग्रहार्थंकर्मविक्रमलक्षणोव्यापारोयस्यसतथा तस्यसंबुद्धिःहेविश्वकर्मन् ४९ संविग्नैर्भयसंभ्रांतैःवेपमानानांकंपमानानां अंगो

यस्यांघ्रिपंकजरजोऽखिललोकपालमौल्युत्तमैर्धृतमुपासिततीर्थतीर्थम् ॥ ब्रह्माभवोहमपियस्यकलाकलांशाःश्रद्धामहेसुचिरमस्यनृपासनंक्व ३८ भुज्यतेकुरुभिर्दत्तंभूखंडंवृष्णिभिःकिल ॥ उपानहःकिलवयंस्वयंतुकुरवःशिरः ३९ अहोऐश्वर्यमत्तानांमत्तानामिवमानिनाम् ॥ असंबद्धागिरोरुक्षाःकःसहेतानुशासिता ४० अद्यनिष्कौरवींपृथ्वींकरिष्यामीत्यमर्षितः ॥ गृहीत्वाहलमुत्तस्थौदहन्निवजगत्त्रयम् ४१ लांगलाग्रेणनगरमुद्विदार्यगजाह्वयम् ॥ विचकर्षसगंगायांप्रहरिष्यन्नमर्षितः ४२ जलयानमिवाघूर्णंगंगायांनगरंपतत् ॥ आकृष्यमाणमालोक्यकौरवाजातसंभ्रमाः ४३ तमेवशरणंजग्मुःसकुटंबाजिजीषवः ॥ सलक्ष्मणंपुरस्कृत्यसांबंप्रांजलयोऽब्रुवन् ४४ रामरामाखिलाधारप्रभावंनाविदामहे ॥ मूढानांनःकुटुंबीनांक्षंतुमर्हस्यधीश्वर ४५ स्थित्युत्पत्तिलयानांत्वमेकोहेतुर्निराश्रयः ॥ लोकान्क्रीडनकानीशवहतस्तेवदंतिहि ४६ त्वमेवमूर्ध्नीदमनंतलीलयाभूमंडलंबिभर्षिसहस्रमूर्धन् ॥ अंतेचयःस्वात्मनिरुद्धविश्वःशेषेऽद्वितीयःपरिशिष्यमाणः ४७ कोपस्तेऽखिलशिक्षार्थंनद्वेषान्नचमत्सरात् ॥ बिभ्रतोभगवान्सत्वंस्थितिपालनतत्परः ॥ ४८ नमस्तेसर्वभूतात्मन्सर्वशक्तिधराव्यय ॥ विश्वकर्मन्नमस्तेस्तुत्वांवयंशरणंगताः ४९ एवंप्रपन्नैःसंविग्नैर्वेपमानायनैर्बलः ॥ प्रसादितःसंप्रसन्नोमाभैष्टेत्यभयंददौ ५० दुर्योधनःपारिबर्हंकुंजरान्षष्टिहायनान् ॥ ददौद्विदशसाहस्रान्नियुतानितुरंगमान् ५१ रथानांषट्सहस्राणिरौक्माणांसूर्यवर्चसाम् ॥ दासीनांनिष्ककंठीनांसहस्रंदुहितृवत्सलः ५२ प्रतिगृह्यतुतत्सर्वंभगवान्सात्वतर्षभः ॥ ससुतःसस्नुषःप्रायात्सुहृद्भिरभिवंदितः ५३ ततःप्रविष्टःस्वपुरींहलायुधःसमेत्यबंधूननुरक्तचेतसः ॥ शशंससर्वंयदुपुंगवानांमध्येसभायांकुरुषुस्वचेष्टितम् ५४ अद्यापिवःपुरंह्येतत्सूचयद्रामविक्रमम् ॥ समुन्नतंदक्षिणतोगंगायांननुदृश्यते ५५ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेनवतितमोऽध्यायः ॥ ९० ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

पांगानांअयनैराश्रयैः ५० ५१ रौक्माणिहेमचितान्याभरणान्येषांसंतीतिरौक्मिणस्तेषाम् ५२ ५३ ५४ रामविक्रमोजलरेखावत्नश्वरोन किंतुसर्वचक्षुर्विषयइत्याह अद्यापीति रामविक्रमंसूचयत्गंगायांदक्षिणतःसमुन्नतंदृश्यतइत्यन्वयः ५५ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटीकायांनवतितमोऽध्यायः ॥ ९० ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

यमेवैषवृणुतेतेनलभ्यइत्यादिश्रुत्यर्थदृढीकरणायहरेर्भक्तिप्रियत्वमाहात्म्यंवक्ति तत्रश्रुतदेवबहुलाश्वावपयामातहासशुकावदात वृ[illegible]

कृष्णविषयगाथारचनात्कविरलंपटःशब्दादिविषयेच्छारहितः १ मिथिलायांनगर्यांगृहाश्रमेस्थितःसभार्यइत्यर्थः अनीहयाअप्रयत्नेनागताहार्यैः प्राप्तमात्रान्यः प्राप्तभोज्योवा नितरांवर्तितासहस्रनामा दिज्यपक्रियायेनसतथा नित्यंनामनिकामयोरितियादवः २ ननुप्रयत्नाभावेकथंशरीरयात्रास्येत्यत्राह यावदिति । अनुदिनंयावन्मात्रमुपनमतिदैवात्प्राप्नंभवति अयंततोधिकंनाकांक्षते तर्हिकेनालंबु द्धिरत्राह तुषसेति ३ यथाश्रुतदेवः ४ ततःकिमायातमत्राह तयोरिति नियतैरेकांतभक्तैः ५ ६ मुनीनांनामानिनिर्दिशति नारदइत्यादिना ७ तउपतस्थुःनिषेवयांचक्रुः ८ ९ सेवाफलमाह तेभ्य

श्रीशुकउवाच ॥ वृष्णिष्वासीद्यदुश्रेष्ठःश्रुतदेवइतिश्रुतः ॥ कृष्णैकभक्त्यापूर्णार्थःशांतःकविरलंपटः १ सउवासविदेहेषुमिथिलायांगृहाश्रमे ॥ अनीहयागताहार्योनिवर्तितजपक्रियः २ यावन्मात्रंत्वहरहर्दैवादुपनमत्यलम् ॥ नाधिकंतपसातुष्टःक्रियाश्चक्रेयथोचिताः ३ तथातद्राष्ट्रपालोभूद्बहुलाश्वइति श्रुतः ॥ मैथिलोनिरहंमानउभावप्यच्युतप्रियौ ४ तयोःप्रसन्नोभगवान्दारुकेणाहृतंरथम् ॥ आरुह्यसहितोविप्रैर्नियतैर्ब्रह्मवादिभिः ५ सहितःसात्वतश्रे ष्ठोमुनिभिस्तत्त्वदर्शिभिः ॥ कदाचित्कौरवश्रेष्ठविदेहान्प्रययौप्रभुः ६ नारदोवामदेवोऽत्रिःकृष्णोरामोसितोऽरुणिः ॥ अहंबृहस्पतिःकण्वोमैत्रेयश्चपराश रः ॥ वसिष्ठःकश्यपश्चैवभरद्वाजोथगौतमः ७ तत्रतत्रसमायांतंपौराजानपदान्विताः ॥ उपतस्थुःसार्घ्यहस्तालोकाःसूर्यमिवोदितम् ८ आनर्तधन्वकुरु जांगलटंकमत्स्यपांचालकुंतिमधुकैकयकोशलार्णाः ॥ अन्येचतन्मुखसरोजमुदारहासस्निग्धेक्षणंनृपपपुर्दृशिभिर्नृनार्यः ९ तेभ्यःस्ववीक्षणविनष्टतमिस्रद ृग्भ्यःक्षेमंत्रिलोकगुरुरर्थदृशंचयच्छन् ॥ शृण्वन्दिगंतधवलंस्वयशोऽशुभघ्नंगीतंसुरैर्नृभिरयाच्छनकैर्विदेहान् १० तेऽच्युतंप्राप्तमाकर्ण्यपौराजानपदा नृप ॥ अभ्ययुर्मुदितास्तस्मैगृहीतार्हणपाणयः ११ दृष्ट्वातमुत्तमश्लोकंप्रीत्युत्फुल्लामलाशयाः ॥ उद्धृतांजलिभिर्नेमुःश्रुतपूर्वंयथामुनिम् १२ स्वानुग्र हायसंप्राप्तंसत्यभूतंजगद्गुरुम् ॥ मैथिलःश्रुतदेवश्चपादयोःपेततुःप्रभोः १३ निमंत्रयेतांदाशार्हमातिथ्येनसहद्विजैः ॥ मैथिलःश्रुतदेवश्चयुगपत्सन्नतांज ली १४ भगवांस्तदाभिप्रेत्यतयोःप्रियचिकीर्षया ॥ उभयोरविशद्वेहंरूपाभ्यांतदलक्षितः १५ श्रोतुमप्यसतांदूरान्जनकःस्वगृहागतान् ॥ आनीतेष्वा सनार्घ्येषुसुखासीनान्महामनाः १६ प्रवृद्धभक्त्युरुत्कर्षहृदयास्राविलेक्षणः ॥ नत्वातदंघ्रीन्प्रक्षाल्यतदपोलोकपावनीः १७

इति स्ववीक्षणेनदर्शनेनविनष्टंतमिस्रंयस्याःसातथा विनष्टतमिस्रानिरस्ताज्ञानाद्दृक्ज्ञानंयेषांतेतथातेभ्यः तेभ्यःपौरेभ्यःक्षेमंयच्छन्अर्थदृशमपरोक्षज्ञानंचददन् एकस्मिन्दिगंतेप्यनन्यथागीयमान त्वादिगंतधवलम् १० ११ स्वधृतांजलिरितिपाठेकमूर्ध्निधृतांजलिपुटैरित्यर्थः १२ सत्यभूतंनिर्दोषानंदज्ञानघनं १३ निमंत्रयेतांभोजनार्थंक्षणंकृतवंतौ आतिथ्येन अतिथियोग्येनकर्मणा १४ तदलक्षितः ताभ्यांरूपाभ्यामलक्षितः अज्ञातरूपद्वयइत्यर्थः १५ अथबहुलाश्वःईश्वरंपूजयांचक्रइत्यन्वयः । तान्नत्वाकीदृशान्श्रोतुमपिदूरान्कर्णाविषयान् १६ अतिवृद्धभक्त्युत्कर्षहृदयश्चास्राविलेक्षणश्चसतथा अस्रंनेत्रजलम् १७

कैःसाधनैरत्राह गंधेति १८ आमृजन्संवाहनंकुर्वन् १९ सुहृदितियदथतस्मात् २० दर्शनहेतुमाह स्ववचइति । भवान्प्रियोहिज्ञानिनोऽत्यर्थमहंसचमप्रियइति यत्स्ववचस्तद्दतंकर्तुंअस्मद्दृग्गो चरोभूदित्यन्वयः भक्तेनापिकृतज्ञेनभाव्यमितिभावेनाह यदेति आत्मास्वामीअनंतः अंतत्रयहीनः अरजाः सात्विकः त्वमेकांतभक्तानांप्रियइतियदायस्मात्तस्मात् २१ एवंवित्उक्तार्थज्ञःकोनुपुरुषः त्वच्चरणांभोजंविसृजेत् कृतज्ञश्चेन्नमुंचतीत्यर्थः एकांतभक्तप्रियोऽयंकिंददातीतितत्राह निष्किंचनानामिति २२ लोकोपकारायावतारोनतुस्वार्थायेत्याह यइति तच्छांत्यैसंसारोन्मूलनायत्रैलो क्यस्यविकृतान्विरोधिनोपहंतीतित्रैलोक्यविकृतापहः विकृतंदुष्कृतं २३ शांतंसुखपूर्तिस्तपःज्ञानंनिर्दोषपूर्णानंदज्ञानं ईयुषेप्राप्नवते २४ राजास्वगृहानिवासायभगवंतंप्रार्थयते दिनानी त्यादिना २५ मिथिलायांविद्यमानानांनरयोषितां २६ तत्रश्रुतदेवेनकिंनुकृतमत्राह श्रुतदेवइति स्वगृहान्प्राप्तमच्युतंमत्वाज्ञात्वा २७ तृणपीठेकटे अवनिजेप्रक्षालयामास २८ २९ सिद्धार्ह

सकुटुंबोवहन्मूर्ध्निपूजयांचक्रईश्वरम् ॥ गंधमाल्यांबराकल्पधूपदीपार्घ्यगोवृषैः १८ वाचामधुर्यापीणन्निदमाहान्नतर्पितान् ॥ पादावंकगतौविष्णोरा मृजञ्छनकैर्मुदा १९ राजोवाच ॥ भवान्वैसर्वभावानामात्मासाक्षीसुहृद्विभुः ॥ अथनस्त्वत्पदांभोजंस्मरतांदर्शनंगतः२० स्ववचस्तद्दतंकर्तुमस्मद्दृग्गो चरोभवान् । यदाह्येकांतभक्तानामात्माऽनंतोऽरजाःप्रियः २१ कोनुत्वच्चरणांभोजमेवंविद्विसृजेत्प्रभो ॥ निष्किंचनानांशांतानांमुनीनांयस्त्वमात्मदः २२ योऽवतीर्ययदोर्वंशेनृणांसंसरतामिह ॥ यशोवितेनेतच्छांत्यैत्रैलोक्यविकृतापहः २३ नमस्तुभ्यंभगवतेकृष्णायाकुंठमेधसे ॥ नारायणायऋषयेस्व शांततपईयुषे २४ दिनानिकतिचिद्भूमन्गृहेनोनिवसान्विजैः ॥ समेतःपादरजसापुनीहीदंनिमेःकुलम् २५ इत्युपामंत्रितोराज्ञाभगवान्लोकभावनः ॥ उ वासकुर्वन्कल्याणंमिथिलानरयोषिताम् २६ श्रुतदेवोऽच्युतंप्राप्तंस्वगृहान्जनकोयथा ॥ मत्वामुनींश्चसंतुष्टोधुन्वन्वासोननर्तह २७ तृणपीठेसशि ष्यांस्तानास्तृतेषूपवेश्यसः ॥ स्वागतेनाभिवंद्यांघ्रिंसभार्योऽवनिजेमुदा २८ तदंभसामहाभागआत्मानंस्वगृहान्वयम् ॥ स्नापयांचक्रउद्धर्षोलब्धसर्व मनोरथः २९ सिद्धार्हणोशीरशिवामृतांभसामृदासुरभ्यातुलसीकुशांबुजैः ॥ आराधयामासयथोपपन्नयासपर्ययासत्वविवर्धमानया ३० सतर्कया मासकुतोममापतद्गृहांधकूपेपतितस्यसंगमः ॥ यःसर्वतीर्थास्पदपादरेणुभिःकृष्णेनचाध्यात्मनिकेतभूसुरैः ३१ सूपविष्टान्कृतातिथ्यान्श्रुतदेवउपस्थि तः ॥ सभार्यःस्वजनापत्यउवाचांघ्र्यभिमर्शनम् ३२ ॥ श्रुतदेवउवाच ॥ अद्यनोदर्शनंप्राप्तःपरःपरमपूरुषः ॥ यइदंशक्तिभिःसृष्ट्वाविभजत्यात्मसत्तया ३३

णंसर्षपःउशीरंवालव्यजनं जयावा शिवाश्रेयसी अमृताप्रसिद्धा एताभिर्युक्तेन जलेन सुरभ्यासुगंधयामृदा सत्त्वेनात्मशक्त्याविवर्धमानया ३० सर्वतीर्थानामास्पदपादरेणुभिः आश्रयचरणरे णुभिः सहकृष्णेनअध्यात्मापरमात्मानिकेतोनिलयःआश्रयोयेषांतेअध्यात्मनिकेताः तैर्भूसुरैर्ब्राह्मणैश्चयःसंगमःसगृहांधकूपेपतितस्यममकुतोऽपतत् तस्माच्चत्पुण्यादभूदितितर्कयामासअ चिंतयदित्यन्वयः ३१ अंघ्र्यभिमर्शनंपादसंमर्दनंकुर्वन् ३२ किमाहेत्याशंक्यकृष्णनामावेदांतप्रतिपाद्यःसाक्षात्श्रीनारायणएवनदेवदत्तादिष्वेकइतिभावेनाह अद्येति यःसत्त्वादिगुणसृष्टाभिः शक्तिभिर्महदादिभिरिदंजगत्सृष्ट्वात्मसत्तयाब्रह्मव्यातिरिक्तेनविविधाकारेणविभजतितत्सृष्ट्वातदेवानुप्राविशदितिश्रुतेः सएवंपरमपुरुषःश्रीकृष्णःअद्यनोदर्शनंप्राप्तोनान्यइतिशेषः ३३

ननुसनघटःसन्पटइतिसदनुविद्धतयाप्रतीतेःब्रह्मव्यतिरिक्तंजगन्नास्तीत्याशंक्यसदृष्टांतंपरिहरति यथेति यथाशयानःस्वपन्पुरुष आत्मनःपरमात्मनःमायया इच्छयाप्रबोधितेनस्वमनोगतकारितुरगादि संस्कारेणैवपरंस्वव्यतिरिक्तंस्वाग्रेलोकंसृष्ट्वाअवरुध्यस्वविषयीकृत्वाअवभासतेपृथक्प्रकाशते तथा भवान्जगतिस्थितोपि ततोव्यतिरिक्तमात्मानंप्रकाश्यतिष्ठतीत्यर्थः ३४ अलौकिकसिद्धवस्तुसत्तायां किंप्रमाणमितितत्राह शृण्वतामिति यःस्वकथांशृण्वतांगदतांहृदिस्वइत्यनेनश्रवणवचनेप्रमाणत्वेनज्ञातव्यइतिदर्शितं शश्वदर्शिनामभिनंदतांसंवसतामममात्मनांनृणांनित्यंहृदिस्थइत्यनेनप्रत्यक्षप्रमाणंदर्शितमिति ३५ नन्वेवंतर्हिकस्मान्मादृशानांतज्ज्ञानाभावइत्याशंक्योपासनाभावादुपासनंचकर्मप्रतिबद्धमितिभावेनाह हृदिस्थइतिउपासकैरपिनस्वप्रयत्नेनज्ञेयः किंतु स्वप्रसादेनैवेत्याशयेनाह आत्मेति आत्मनांजीवानांशक्तिभिः प्रयत्नादिलक्षणाभिःअग्राह्योनज्ञेयः मुह्यंतियंसूरयइत्यादिस्वोक्तिस्मारयति हिशब्देनदेवदत्तवच्छरीरीचेत्कथमग्राह्यइत्यत्राह अर्थाकारइति अर्थ्यतइत्यर्थ आनंदःऋगताविितिधातुःयद्वाअर्थशब्देनज्ञानंच ज्ञानानंददेहइत्यर्थः अर्थोवस्तुअप्रतिहतंतदाकारइतिवा कुतएवमंगीकारइत्यत्राह अगुणात्मकइति सत्त्वादिगुणनिर्मितदेहवान्नभवतिएवं

यथाशयानःपुरुषोमनसाचात्ममायया ॥ सृष्ट्वालोकंपरंस्वाग्रमवरुध्यावभासते ३४ शृण्वतांगदतांशश्वद्दर्शिनामभिनंदताम् ॥ नृणांसंवसतांनित्यंहृदिस्थोयोऽमलात्मनाम् ३५ हृदिस्थोप्यथदूरस्थःकर्मविक्षिप्तचेतसाम् ॥ आत्मशक्तिभिरग्राह्योह्यर्थाकारोगुणात्मकः ३६ नमोस्तुतेध्यात्मविदांपरात्मने सर्वात्मनेस्वात्मविभक्तमूर्त्तये ॥ सकारणाकारणलिंगमीयुषेस्वमायया संवृतदृष्टयेनमः ३७ सत्त्वंशाधिस्वभृत्यान्नःकिंचेशकरवामते ॥ एतदंतोनृणांक्लेशो यद्भवानक्षगोचरः ३८ श्रीशुकउवाच ॥ तदुक्तमित्युपाकर्ण्यभगवान्प्रणतार्तिहा ॥ गृहीत्वापाणिनापाणिंप्रहसंस्तमुवाचह ३९ श्रीभगवानुवाच ॥ ब्रह्मंस्तेऽनुग्रहार्थायसंप्राप्तान्विद्धयमून्मुनीन् ॥ संचरंतिमयालोकान्पुनंतःपादरेणुभिः ४० देवाःक्षेत्राणितीर्थानिदर्शनस्पर्शनार्चनैः ॥ लोकान्पुनंतिकालेन तदप्यर्हत्तमेक्षया ४१ ब्राह्मणाजन्मतःश्रेष्ठाःसर्वेषांप्राणिनामिह ॥ तपसाविद्ययातुष्ट्याकिमुमत्कथयापुनः ४२ नब्राह्मणान्मेदयितंरूपमेतच्चतुर्भुजम् ॥ सर्ववेदमयोविप्रःसर्वदेवमयोह्यहम् ४३ दुष्प्रज्ञाअविदित्वैनमवजानंत्यसूयवः ॥ गुरुंमांविप्रमात्मानमर्चादाविितिदृष्टयः ४४ चराचरमिदंविश्वंभावये चास्यदैवतम् ॥ मद्रूपाण्येभिरेतस्यांधत्तेविप्रोमदीक्षया ४५

विधस्त्वमस्माकंदर्शनंप्राप्तइतिपूर्वेणान्वयः ३६ एवंविधत्वान्ममनमनमंतरेणत्वदुपासनंदुःसाध्यमितिभावेनाह नमइति अध्यात्मविदांपरमात्मादितत्त्वज्ञानिनां परमात्मनेअशेषपुरुषार्थदात्रे सर्वात्मनेसर्वव्यापिने स्वात्मविभक्तमूर्तयेस्वात्मनैवविभक्तस्वरूपाय सकारणंजगदकारणंलिंगं अकारणंकारणांतरशून्यस्वरूपंप्रधानमेवंद्वैईयुषेव्याप्नवतेस्वमायया स्वसामर्थ्येनअसंवृतदृष्टये अव्यवहितज्ञानाय ३७ यच्चदाभवानक्षगोचरःस्यात्एतदंतोऽयमवधिर्यस्यसतथा नृणांक्लेशःपरिश्रमः ३८ ३९ ब्रह्मन्तपस्विन् ४० देवादिभ्योपच्छुद्धत्वंतदर्हत्तमानांपूज्यानांब्राह्मणादीनामीक्षयादर्शनेन अपिशब्दोऽवधारणार्थः ४१ ४२ ब्राह्मणभक्तिजननार्थंअर्थवादमाह नब्राह्मणादिति ब्राह्मणस्योत्तमत्वेहेतुमाह सर्वेति एवमप्यावयोर्विशेषोस्तीतिहिशब्देनाह ४३ असूयवःगुणेषुदोषाविष्करणशीलाःदुष्प्रज्ञाएवंगुरुंविप्रंमत्सन्निधानपात्रंअविदित्वाअवजानंति आत्मानंमामर्चादौअवजानंतिकथंअर्चैवहरिरितिदृष्टयः ४४ ब्राह्मणपूजयासर्वमपिपूजितंस्यादितिभावेनाह चराचरमिति इदंचराचरंविश्वंभावयेकल्पयेब्रह्मणीतिशेषः अस्यब्राह्मणस्यदैवतमहमितिशेषः विप्रस्यसर्ववेदमयत्वमुक्तंस्पष्टयति मद्रूपाणीति विप्रोमदीक्षयामत्प्र

तिपादकत्वज्ञानेनएतस्यांसर्वेवेदायत्पदमामनंति इत्यादिश्रुत्या वायुनावैगौतमसूत्रेणायंचलोकः परश्चलोकः सर्वाणिचभूतानिसद्दद्धानिभवंतीतिश्रुतिसिद्धैरेभिश्चराचरैःसहमद्रूपाणिधत्ते ४५ प्रतिपादनच्छलेनफलितमाह तस्मादिति ४६ ४७ भक्तेषुप्रसादलक्षणस्नेहवान् ४८ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटीकायांएकनवतितमोऽध्यायः ॥ ९१ ॥ ॥

शिवंभजंस्तामसाद्यन्यतमंविष्णुंनिषेवमाणःसात्विकएवशिवस्याप्यन्यापरिहार्यापत्तिसमुच्छित्तिकरोनारायणः किमुतेतरेषामित्यर्थसारंवृकसुराख्यायिकयाख्यापयति तत्रराजा आख्यायिकामुत्थापयितुंपृच्छति देवासुरेति दिगंबरत्वेनलोकदृष्ट्याशिवमशुद्धवत्प्रतीयमानंनिर्धनंवा शिवोलोकेपद्मरागेहरेकालेशिवेजलइत्यतःपद्मरागराहित्येननिर्धनत्वंलक्ष्यते अशिवमकीलंअनर्गलंसर्ववरप्रदमित्यर्थः लक्ष्मीपतिमित्यनेनधनित्वमुपलक्षयति तथापि तद्वक्ताधनिनोनभवंति १ एतद्धनित्वाधनित्वसंदेहेतन्निरासप्रयत्नोघटतेतदभावेव्यर्थइत्यत्राह संदेहइति नचायमौपचारिकइत्याह महानिति संदेहबीजांतरमाह विरुद्धेति श्मशानेपिशाचगणैःपरिवृतत्वेनाटनशीलंरुद्रस्य इंद्रादिदेवैःपरीतत्वेनावस्थानंहरेः असुरादीनामपिवरदानेच्छवस्त्वेनगतित्वमाश्रयत्वंईशानस्य देवादीनांसमृद्धिचिकीर्षुत्वेनहरेः तथाचात्रप्रभ्वोःसमर्थयोर्विषयेमहानस्माकंसंदेहोस्ति हियस्मात्तन्निरसनप्रयासःसार्थकइत्यर्थः २ जीवानांत्रैविधकेनाप्यनभिभूतंप्रमितंदेवासुरमनुष्येष्वित्यनेनसूचितं तत्रशिवःस्वल्पसंपृ

तस्माद्ब्रह्मऋषीनेतान्ब्रह्मज्ञान्श्रद्धयार्चय ॥ एवंविदार्चितोस्म्यद्धानान्यथासुविभूतिभिः ४६ श्रीशुकउवाच ॥ सइत्थंप्रभुणादिष्टःसहकृष्णान्द्विजोत्तमान् ॥ आराध्यैकांतभावेनमैथिलश्चापतुर्गतिम् ४७ एवंस्वभक्तयोराजन्भगवान्भक्तभक्तिमान् ॥ उषित्वादिश्यसन्मार्गंपुनर्द्वारवतीमगात् ४८ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेएकनवतितमोऽध्यायः ॥९१॥ राजोवाच ॥ देवासुरमनुष्येषुयेभजंत्यशिवंशिवम् ॥ प्रायस्तेधनिनोब्रह्मन्नतुलक्ष्मीपतिंहरिम् १ एतद्वेदितुमिच्छामिसंदेहोत्रमहान्हिनः ॥ विरुद्धशीलयोःप्रभ्वोर्विरुद्धांभजतोर्गतिम् २ श्रीशुकउवाच ॥ शिवःशक्तियुतःशश्वत्त्रिलिंगोगुणसंवृतः ॥ वैकारिकस्तैजसश्चतामसश्चेत्यहंत्रिधा ३ ततोविकाराद्यभवन्षोडशामीषुपंचसु ॥ उपाधावन्विभूतीनांसर्वासामश्नुतेगतिम् ४ हरिस्तुनिर्गुणःसाक्षात्पुरुषःप्रकृतेःपरः ॥ ससर्वदृगुपद्रष्टातंभजन्निर्गुणोभवेत् ५

क्तसत्त्वेनबहुलेनतमसारजसास्पृष्टत्वेनतदनुसृतस्वभावत्वेनहरिर्नियतप्रकृतिबद्धत्वेनतत्तत्प्राणिस्वभावसेवानुगुणफलदानक्षमत्वेनावशइवताहशंफलंवितरति हरिस्तुस्वाधीनसत्त्वादिगुणत्वेनतत्प्रवर्तकत्वेनतच्छक्त्यनुपहतशक्तित्वेनप्रकृतिपरत्वेनतन्निर्मितशरीररहितत्वेनतत्स्व भावेनकूटस्थत्वेननित्यनिर्दोषज्ञानानंदतनुत्वेनस्वसेवकेभ्यःस्वानुगुणंफलंप्रयच्छतीतिभावेनपरिहरति शिवइत्यादिना शक्तियुतःप्रकृतिसंबद्धःअतएवशश्वत् त्रीणिलिंगानिवैकारिकादीनियस्यसतथा ननु प्रकृतेरेकत्वेनतत्संबंधेनैकविध्यमेवोचितं नत्रैविध्यं अन्यथा चातुर्विध्यंकिंनस्यादित्यतउक्तं गुणसंवृतइति गुणानांत्रित्वात्तत्संबंधेनत्रित्वंयुक्तंनचासुर्विध्यादिकंसूचितं त्रैविध्यंस्पष्टयति वैकारिकइति अहंअहंकारात्मकोरुद्रः ३ ततःअहंकारात्षोडशविकाराअभवन्नितिशेषःपंचभूतानिदशेंद्रियाणिएकंमनः ननु किमायातंप्रकृतइतितत्राह अमीष्विति योभूतानांमध्ये अमीषुपंचस्वाकाशादिष्वधिष्ठानप्रकारेषुनिधाय्य शिवमुपाधावत्सेवमानोभवति सपुरुषस्तस्मात्सर्वासांविभूतीनांगतिंसेवानुसारेणफलमश्नुते अत्रग्रंथबाहुल्यभयात् विशेषविशदीकरणादुपरम्यते ४ तुशब्देनसत्त्वादिगुणराहित्यमेवनतुज्ञानादिगुणराहित्यंविवक्ष्यते तथात्वेसर्वदृगित्याद्यनुपपन्नंस्यात् हरिरविनश्वरंअनंतकालीनंफलंददाति रुद्रस्त्वनित्यंदुःखोदर्कंददातीत्यादिविशेषंवा दर्शयति उपद्रष्टा साक्षीसर्वेभ्योद्रष्टृभ्योऽधिकद्रष्टा नान्योवा नान्योऽतोस्तिद्रष्टेतिश्रुतेः ५

नथनित्वंफलंददातीत्यस्यकथंपरिहारआगतःतंवक्तुमुपक्रमते निवृत्तेष्विति ६ भूभारहरणायप्रवृत्तेनधर्मकथनंकापयुज्यतइत्यत्राह नृणांमोत अनन नकवलमवतारप्रयाजनभूभारहरणमापतु नृणांसंसारनिर्मूलनलक्षणानिःश्रेयसंचेत्युक्तंभवति ७ अनुग्रहंकर्तुंशनैःपावत्पावत्प्रेम्णवर्धते तावत्तावद्धरिष्ये धनस्यमदहेतुत्वादेतद्धरणं तत्फलमाह ततइति अस्याधनस्यस्वजनाःदुःखदुःखि तंदुःखातिशयोपेतंएनमधनंत्यजंति ८ ततोधनाभावात्सयदाधनेहया वितथोद्योगोनिर्विण्णःस्यात्तदा मत्परैःकृतमैत्रस्यतस्यानुग्रहंमुक्तिलक्षणंकरिष्यइत्यन्वयः ९ यतोहंभजमानस्यधनंहरिष्या मि अतस्तत्परमंब्रह्मवेदांतवेद्यंसूक्ष्मंनित्याव्यक्तंचिन्मात्रं प्रकृतिप्राकृतवैकृतज्ञानशून्यं सत्प्रशस्तंअनंतकंअंतत्रयवर्जितंसुदुराराध्यंमांहित्वा अन्यान्भजते परंब्रह्मत्वादयः सुदुराराध्यत्वेहेतवः १० अन्योपासकास्तेमद्भ्यानतस्त्वान्देवानपिजहतीतिभावेनाह ततइति यतोमामवज्ञायान्यानुपासतेअतएवदोषात् ११ देवेषु के शापप्रसादसमर्थास्तत्रापि सद्यःशापप्रसादाः कइतितत्राह शापेति

निवृत्तेष्वथमेधेषुराजायुष्मत्पितामहः ॥ शृण्वन्भगवतोधर्मानपृच्छदिदमच्युतम् ६ सञ्जाहभगवांस्तस्मैप्रीतःशुश्रूषवेप्रभुः ॥ नृणांनिश्रेयसार्थाय योऽवतीर्णोयदोःकुले ॥ ७ ॥ श्रीभगवानुवाच ॥ यस्याहमनुगृह्णामिहरिष्येतद्धनंशनैः ॥ ततोऽधनंत्यजंत्यस्यस्वजनादुःखदुःखितम् ८ सयदावित थोद्योगोनिर्विण्णस्याद्धनेहया ॥ मत्परैःकृतमैत्रस्यकरिष्येतदनुग्रहम् ९ तद्ब्रह्मपरमंसूक्ष्मंचिन्मात्रंसदनंतकम् ॥ अतोमांसुदुराराध्यंहित्वाऽन्यान्भजतेपु नः १० ततस्तआशुतोषेभ्योलब्धराज्यश्रियोद्धताः ॥ प्रमत्तावरदान्देवान्विस्मरंत्यवजानते ११ श्रीशुकउवाच ॥ शापप्रसादयोरीशाब्रह्मविष्णुशिवादयः ॥ सद्यःशापप्रसादोऽगशिवोब्रह्माचनाच्युतः १२ अत्रैवोदाहरंतीममितिहासंपुरातनम् ॥ वृकासुरायगिरिशोवरंदत्त्वापसंकटम् १३ वृकोनामासुरःपुत्रः शकुनेःपथिनारदम् ॥ दृष्ट्वाशुतोषंपप्रच्छदेवेषुत्रिपुदुर्मतिः १४ सञ्जादिदेशगिरिशमुपाधावत्स्वसिद्धये ॥ सोऽल्पाभ्यांगुणदोषाभ्यामाशुतुष्यतिकुप्यति १५ दशास्यबाणयोस्तुष्टःस्तुवतोर्बंदिनोरिव ॥ ऐश्वर्यमतुलंदत्त्वाततआपसुसंकटम् १६ इत्यादिष्टस्तमसुरउपाधावत्सुयंत्रितः ॥ केदारआत्मक्रव्येणजुह्वन्न ग्निमुखंहरम् १७ देवोपलब्धिमप्राप्यनिर्वेदात्सप्तमेऽहनि ॥ शिरोजिहीर्षुरसिनासतीर्थक्लिन्नमूर्धजः १८ तदामहाकारुणिकःसधूर्जटिर्यथावयव्यग्निरिवो त्थितोनलात् ॥ निगृह्यदोर्भ्यांभुजयोर्न्यवारयत्तत्स्पर्शनाद्भूयउपाकृताकृतिः १९ तमाहचांगालमलंवृणीष्वमेयथानिकामंवितरामितेवरम् ॥ शिवेन जीवेनृणांप्रपद्यतामहोत्वयात्माभ्रशमर्द्यतेवृथा २० देवात्सवव्रेपापीयान्वरंभूतभयावहम् ॥ यस्यपुंसःकरंशीर्ष्णिधास्येसम्रियतामिति २१ तच्छ्रु त्वाभगवान्रुद्रोदुर्मनाइवभारत ॥ ओमितिप्रहसंस्तस्मैददौवरमृतंयथा २२

१२ शिवःसद्यःशापप्रसादइत्येतत्कथमित्यत्रइतिहासंवक्ति अत्रेति १३ १४ १५ १६ अग्निमुखमुद्दिश्य जुह्वन्निति च्छांदसः जुह्वन् होमंकुर्वन् १७ देवोपलब्धिं देवदर्शनं असिना शिरोहर्तु कामोऽभूत् १८ करचरणाद्यवयवी उपाकृताकृतिःउत्पन्नस्वरूपः १९ यथानिकामंनितरांकाममनतिक्रम्यनृणांयत्रियतमंवस्तुसजीवः जीवनंप्राणधारणंतेनजीवेनप्रपद्यतांप्रपन्नोभवतुभवा नितिशेषः केनेत्यतउक्तंशिवेनमयेति किंचजीवोसुधाहरणतत्परः अनेनपूर्वमायुःपरीक्षेतपश्चाल्लक्षणमादिशेदितिवचनात् जीवनंसर्वस्मादभीष्टमित्युक्तंभवति किंचातइति तत्राह अहोइति आत्माशरीरं अर्च्यतेहिंस्यते अहोयस्मात्तस्मात् २० २१ ओमित्युक्त्वा प्रहसन्नात्मनोदैन्यमप्रकाशयन् २२

अबिभेत्भीतवान् २३ उपसृष्टःउपद्रुतःदिवोंतमवसानं यावदस्तिभूमेःकोष्ठानांविवराणांअवसानंच यावत्भुवोधरमधःस्थलंपातालंचयावत्तावत्पर्यंतंपराधावत् २४ तल्लोकवासिनःशून्यमायाः किमत्राहअजानंतइति प्रतिविधिंप्रतिक्रियां २५ २६ दारकोबालब्रह्मचारी २७ २८ आत्माशरीरं २९ पुंभिरर्थितं ३० ३१ तस्यरुद्रस्यवाक्यं पैशाच्यंकर्मश्मशानाटनलक्षणं ३२ ३३ जगद्वरौजगद्विरणशीले ३४ ३५ ३६ ३७ ३८ ३९ ४० आख्यायिकाकथनादिफलमाह यइति अव्याकृतानित्यशक्तिसमुद्रस्य संसृतिभिःपुत्रमित्रादिबंधलक्षणाभिः ४१

सतद्वरपरीक्षार्थंशंभोःशीर्ष्णिवृकासुरः ॥ स्वहस्तंदातुमारेभेसोबिभेत्स्वकृताच्छिवः २३ तेनोपसृष्टःसंत्रस्तःपराधावत्सवेपथुः ॥ यावदंतंदिवोभूमेः कोष्ठानामधरंभुवः २४ अजानंतःप्रतिविधितूष्णीमासन्सुरेश्वराः ॥ ततोवैकुंठमगमद्ब्रास्वरंतमसःपरम् २५ यत्रनारायणःसाक्षान्न्यासिनांपरमागतिः ॥ शांतानांन्यस्तदंडनांयतोनावर्त्ततेगतः २६ तंतथाव्यसनंदृष्ट्वाभगवान्वृजिनार्दनः ॥ दूरात्प्रत्युदितोभूपदारकोयोगमायया २७ मेखलाजिन दंडाद्यैस्तेजसाग्निरिवज्वलन् ॥ अभिवादयामासचतंकुशपाणिर्विनीतवत् ॥ २८ ॥ श्रीभगवानुवाच ॥ शाकुनेयभवान्व्यक्तंश्रांतःकिंदूरमागतः ॥ क्षणं विश्रम्यतांपुंसआत्मायंसर्वकामधुक् २९ यदिनःश्रवणायालंयुष्मद्व्यवसितंविभो ॥ भण्यतांपुरुषःसाधोपुंभिःस्वार्थंसमीहते ॥ ३० ॥ श्रीशुकउवाच ॥ एवंभगवतापृष्टोवचसामृतवर्षिणा ॥ गतक्लमोऽब्रवीत्तस्मैयथापूर्वमनुष्ठितम् ३१ श्रीभगवानुवाच ॥ एवंचेत्तर्हितद्वाक्यंवयंनश्रद्दधीमहि ॥ योदक्षशापात्पैशाच्यंप्राप्तःप्रेतपिशाचराट् ३२ रुषाक्रांतशरीरोऽसौनसत्यंवदतेहरः ॥ क्रोधयुक्तेकुतःसत्यंमूढोऽसित्वंमहासुर ३३ यदिवस्तत्रविश्रंभोदानवेंद्रजगद्गुरौ ॥ तर्ह्यंगापिस्वशिरसिहस्तन्यासःप्रदीयताम् ३४ यद्यसत्यंवचःशंभोःकथंचिद्दानवर्षभ ॥ तदैनंजह्यसद्वाचंनचवक्ताऽनृतंपुनः ३५ इत्थंभगवतश्चित्रैर्वचोभिश्चसुपेशलैः ॥ भिन्नधीर्विस्मृतःशीर्ष्णिस्वहस्तंकुमतिर्न्यधात् ३६ अथापतद्भिन्नशिरावज्राहतइवक्षणात् ॥ जयशब्दोनमःशब्दःसाधुशब्दोभवद्दिवि ३७ मुमुचुःपुष्पवर्षाणिहतेपापेवृकासुरे ॥ देवर्षिपितृगंधर्वामोचितःसंकटाच्छिवः ३८ मुक्तंगिरिशमप्याहभगवान्पुरुषोत्तमः ॥ अहोदेवमहादेवपापोऽयंस्वेनपाप्मना ३९ हतःकोनुकुतश्चापिजंतुर्वैकृतकिल्बिषः ॥ क्षेमीस्यात्किमुविश्वेशेकृतपापोजगद्गुरौ ४० यएवमव्याकृतशक्त्युद्भवतःपरस्यसाक्षात्परमात्मनोहरेः ॥ गिरीशमोक्षंकथयेच्छृणोतिवाविमुच्यतेसंसृतिभिस्तथारिभिः ४१ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेवृकासुरवधोनामद्विनवतितमोऽध्यायः ॥ ९२ ॥ श्रीशुकउवाच ॥ सरस्वत्यास्तटेराजन्नृषयःसत्रमासत ॥ वितर्कःसमभूत्तेषांत्रिष्वधीशेषुकोमहान् १ तस्यजिज्ञासयातेवैभृगुंब्रह्मसुतंनृप ॥ तज्ज्ञप्त्यैप्रेषयामासुःसोऽभ्यगाद्ब्रह्मणःसभाम् २

॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटीकायांद्विनवतितमोध्यायः ॥ ९२ ॥ ७ ॥ विष्णोःसमोऽधिकोस्तीति संशयनिरासायतस्य भक्तानुकंपित्वप्रकटनायच मुमुक्षुभिः क्षमागुणएवोपास्यस्तत्प्रसादजनकइतिद्योतनायचतस्मिन्नतिशयभक्तिजननायचास्याध्यायस्यप्रारंभः तत्रादौमुनीनांसत्रसमयेजिज्ञासाप्रकारंवक्ति सरस्वत्याइति वितर्कोजिज्ञासा त्रिषुब्रह्मादिषुअधीशेषुअधिकेश्वरेषुच महानुत्तमः १ तस्याधिकस्यवाइत्यनेनलोकसंशयनिरासायमंदाधिकारिणां दृढनिश्चयाय नस्वार्थं परिज्ञातवेदांतार्थत्वात्स्वेषामिति निर्धारयति २

३ आत्मनःस्वस्यात्मनिमनस्यात्मजापभृगवेउत्थितंमन्युमशीशमत्शांतकृतवान् प्रभुःसमर्थःप्रभुःभृगोःपपुत्वनस्वामी ० ५ ६ [illegible]
शब्दप्रयोगाच्च ५ श्मशानवासित्वेनाशुभाचारइतिमत्वा ६ ७ ८ ९ तेतुभ्यं निषीदोपविश आगसमपराधं १० अहमेवगतंगतिः आश्रयोयेषांतेमद्गतास्तान् तीर्थकारिणाशुद्धिकारिणा तीर्थ
शास्त्रेष्वंभसिपावनइतियादवः ११ असुरजनमोहनार्थमाह अथेति अद्याहंलक्ष्म्याःश्रियएकांतनिषेवेनभाजनंपात्रमस्मं भूतिर्लक्ष्मीः भूतिःश्रीजन्मभस्मस्वितिच नित्यकृतवासापिअद्यप्रभृति
वत्स्यतिस्पष्टवार्सकरिष्यति भवतानित्यशक्तेनपादेनज्ञानेनहतंनष्टंअंहोयस्मिंस्तत्तथा नित्यसत्ताज्ञानात्मकत्वेनदोषरहितमिवा तस्मिन्भितितथाबाह्यार्थः कथायादिवाक्यार्थः १२ श्रियासहि

नतस्मैब्रह्मणेस्तोत्रंचक्रेसत्वपरीक्षया ॥ तस्मैचुक्रोधभगवान्प्रज्वलन्स्वेनतेजसा ३ सआत्मन्युत्थितंमन्युमात्मजायात्मनःप्रभुः ॥ अशीशमद्यथावह्निं शमयेद्वारिणाप्रभुः ४ ततःकैलासमगमत्सतंदेवोमहेश्वरः ॥ परिरब्धुंसमारेभेउत्थायभ्रातरंमुदा ५ नेच्छत्तमशुभाचारइतिदेवश्चुकोपह ॥ शूलमु द्यम्यतंहंतुमारेभेतिग्मलोचनः ६ पतित्वापादयोर्देवीसांत्वयामासतांगिरा ॥ इतिकृच्छ्रात्ततोमुक्तःकैलासाद्रजताचलात् ७ मुनिर्जगामवैकुंठंयत्र देवोजनार्दनः ॥ शयानंश्रियउत्संगेपदावक्षस्यताडयत् ८ ततउत्थायभगवान्सहलक्ष्म्यासतांगतिः ॥ स्वतल्पादवरुह्याशुननामशिरसामुनिम् ९ आहतेस्वागतंब्रह्मन्निषीदात्रासनेक्षणम् ॥ अजानतामागसंनःक्षंतुमर्हसिमानद १० पुनीहिसहलोकंमांलोकपालांश्चमद्गतान् ॥ पादोदकेनभवतस्तीर्थानांतीर्थकारिणा ११ अद्याहंभगवन्लक्ष्म्याआसमेकांतभाजनम् ॥ वत्स्यत्युरसिनोभूतिर्भवत्पादहतांहसि १२ श्रीवत्सामिनिनामापिजायतांपादल क्षणः ॥ १३ ॥ श्रीशुकउवाच ॥ एवंब्रुवाणेवैकुंठेभृगुस्तत्सार्द्रयागिरा ॥ निर्वृतस्तर्पितस्तूष्णींभक्तयुत्कंठोऽश्रुलोचनः १४ पुनःस्वसत्रमासाद्यमुनी नांब्रह्मवादिनाम् ॥ स्वानुभूतमशेषेणराजन्भृगुरवर्णयत् १५ तंनिशम्याथमुनयोविस्मितामुक्तसंशयाः ॥ भूयांसंश्रद्दधुर्विष्णुंयतःशांतिर्यतोऽभय म् २६ धर्मःसाक्षाद्यतोज्ञानंवैराग्यंचचतुर्विधम् ॥ ऐश्वर्यंचाष्टधायस्माद्यशश्चात्ममलापहम् १७ मुनीनांन्यस्तदंडानांशांतानांसमचेतसाम् ॥ अकिं चनानांसाधूनांयमाहुःपरमांगतिम् १८ सत्त्वंयस्यप्रियामूर्तिर्ब्राह्मणास्त्विष्टदेवताः ॥ भजंत्यनाशिषःशांतायंवानिपुणबुद्धयः १९ त्रिविधामूर्तयस्तस्य राक्षसाअसुराःसुराः ॥ गुणास्तन्मायायासृष्टास्तत्त्वंतत्रार्यदर्शनम् २० ॥ श्रीशुकउवाच ॥ इत्थंसारस्वताविप्रानृणांसंशयनुत्तये ॥ पुरुषस्यपदांभोज सेवयातद्गतिंगताः २१

तवत्समुरःश्रीवत्सं उरोवत्संचवक्षश्चभुजांतरमुदीर्णतइतिऊत्पलमालाभिधानं पादलक्षणःपादांकःश्रीवत्समिति नामजायतामित्यन्वयः ११ १४ १५ भूयांसमत्युत्तमंयतोयस्माद्धरेःशांतिर्मोक्षोमं गलंवा पुंसइतिशेषः १६ एकांतभक्तानांधर्मादिष्वनपेक्षालक्षणंवैराग्यमात्मनोमनसोमलनाशनं १७ १८ यस्यहरेःसत्वंगुणः प्रियामूर्तिःप्रेष्ठप्रतिमा यस्येष्टदेवताब्राह्मणाः अनाशिषोनिष्कामाः १९ तत्रतेषुगुणेषु सत्वंनामगुणः आर्यंसर्वपूज्यंश्रीहरिंदर्शयतीत्यार्यदर्शनस्तद्विषयज्ञानोत्पादकः २० यत्फलावसायि तदेवप्रमाणपदवीमध्यास्ते इतिभावेनफलमाह इत्थमिति सारस्वताःसरस्वतीतीरवासिनः इत्थंनृणांसंशयनिरासायप्रवृत्ताः पुरुषस्यहरेः मतिंज्ञानंतेनवैकुंठंगताः २१

आख्यानफलमाह इतीति मुनितनयस्यपद्मगर्भपीयूषंमुखकमलोदरनिःसृतंसुधाधारोपचितंपरस्यपुंसःसुश्लोकैराकलितमित्येतदाख्यानंश्रवणपुटैरभीक्ष्णंपिबन्योवर्तते अथसपांथःपथिकः इदंसुखसाधनमदोवेतिपरिभ्रमणेनेतस्ततःपर्यटनेनप्राप्तंपरिश्रमंजहातीत्यन्वयः २२ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटीकायांत्रिनवतितमोऽध्यायः ॥ ९३ ॥ यदनंतनिगमनिकरनिरूपितगुणगणाकरंब्रह्मतदेवकृष्णनाम्नावतीर्णंनान्यदित्यतोमुमुक्षुभिरत्रभक्तिःइतरत्रविरक्तिमूलाकर्तव्येतिविधीयतेऽस्मिन्नध्याये तत्रनारदनारायणसंवादलक्षणमितिहासमुत्थापयितुंशुकंपरीक्षित्पृच्छति ब्रह्मन्नित्यादिना हेब्रह्मन्पूर्णकाम सर्वेवेदायत्पदमामनंतीतिश्रूयते तत्रश्रुतयःसाक्षादामनंत्युतलक्षणयावा तत्रनप्रथमइत्याह कथमितिसाक्षात्चरंतिवर्ततेवाचकत्वेनेतिशेषः तस्यकानुपपत्तिरत्राह अनिर्देश्यइति यत्तदद्दश्यमितिश्रुतेः नाद्वितीयइत्याह निर्गुणइति केवलोनिर्गुणश्चेतिश्रुतेः गुणैः प्रवर्तमानस्यकथंनिर्गुणत्वमुपपद्यतइत्यत्राह सदसतइति निर्गुणेगुणसमर्पकत्वेनश्रुतीनांसंचरणंकथमितिदौर्घट्यमापादयितुंश्लक्ष्यते यादृग्वस्तुतादृशावेदकत्वेनकोपिविरोधइतितत्राह गुणवृत्तयइति गुणार्पकत्वेनगुणवृत्तिर्यासांतास्तथा तुविग्रीवो वपोदरःसुबाहुरंधसोमदे गुणाःश्रुताःसुविरुद्धाश्चदेवेइत्यादिश्रुतेःअतएवनःसंशयंछिंधीतिवाक्यशेषः १ श्रुतयःसत्त्वादिगुणराहित्येननिर्गुणेज्ञानानंदादिगुणगणमणिमालालंकृतविग्रहेब्रह्मणिसाक्षाद्वर्ततइतिपरिहारमभिप्रेत्यपीठिकामारचयति बुद्धीति बुद्ध्यादिसर्जनेनकिंप्रयोजनमत्राह मात्रार्थमिति मात्रापरिच्छेदेदेशप्रवृत्तौकर्णभूषणइत्यतोमात्राप्रवृत्तिःशब्दानामितिशेषः तदर्थं मनसाग्रेसंकल्पयत्यथवाचाव्याहरतीतिश्रुतेः किमतोत्राह

इत्येतन्मुनितनयस्यपद्मगर्भपीयूषंभवभयभित्परस्यपुंसः ॥ सुश्लोकैःश्रवणपुटैःपिबन्नभीक्ष्णंपांथोऽथभ्रमणपरिश्रमंजहाति ॥ २२ ॥ इतिश्रीभागवते महापुराणेदशमस्कंधेउत्तरार्धेत्रिनवतितमोऽध्यायः॥ ९३ ॥ राजोवाच ॥ ब्रह्मन्ब्रह्मण्यनिर्देश्येनिर्गुणेगुणवृत्तयः ॥ कथंचरंतिश्रुतयःसाक्षात्सदसतःपरे १ श्रीशुकउवाच ॥ बुद्धींद्रियमनःप्राणान्जनानामसृजत्प्रभुः ॥ मात्रार्थंचभवार्थंचआत्मनेकल्पनायच २ सैषाह्युपनिषद्ब्राह्मीपूर्वेषांपूर्वजैर्धृता ॥ श्रद्धयाधारयेद्यस्तांक्षेमंगच्छेदकिंचनः ३

भवार्थंचेति भवोभद्रंहरेरप्राप्तावित्यतो भवोभद्रंकल्याणंपुण्यमितियावत् तदर्थं स्वाध्यायप्रवचनेएवेतिनाकोमौद्गल्यः तद्धितपस्तद्धितपइतिश्रुतिः चशब्दोसमुच्चयार्थौ बुद्ध्यादींद्रियपूर्वंकाशाब्दीप्रवृत्तिरपिनस्वर्गादिविषया किंतुररमात्मविषयैव पुण्यसाधनमित्यभिप्रायेणाह आत्मनइति संध्यकरणात्सदसद्विलक्षणएवात्मा तमात्मानमुद्दिश्यशब्दराशेःप्रवृत्तिरितिभावः ततःपरमप्रयोजनमाह कल्पनायेति कल्पनायपरमात्मज्ञानाय स्रत्येनलभ्यस्तपसाह्येषआत्मासम्यग्ज्ञानेनब्रह्मचर्येणनित्यमितिश्रुतेः चशब्देनमोक्षायेतिसूचयति तमेवंविद्वानमृतइहभवतिज्ञानेनामृतीभवतीतिश्रुतेः अनेनवक्तृविवक्षापूर्विकाशब्दप्रवृत्तिरित्यतोबुद्धींद्रियादिमतएवसुप्रयुक्तशब्देनज्ञातपरब्रह्मतत्त्वगुणोपसंहारज्ञानप्रसन्नभगवत्सारूप्यादिमोक्षप्राप्तेःशब्दानांश्रीहरिविषयत्वंसाक्षादंगीकर्तव्यमित्युक्तंभवति २ शब्दमात्रस्यहर्येकविषयत्वमुक्त्वाधुनावेदांतविज्ञानसुनिश्चितार्थाइतिवचनादुपनिषद्भागस्यतद्गुणगणावेदकत्वेनमुख्यवृत्त्याविषयत्वमितिभावेनाह सैषेति हिशब्दोहेतौ ईशबुद्धिस्थिताःसदेतिवचनात् याश्रीमन्नारायणबुद्धिस्थितासैषोपनिषद्वेदांतापरपर्यायापूर्वेषांपूर्वजैःब्रह्मादिभिःधृताअध्ययनरूपेण नतुकृतानित्यवाक्यत्वात् नित्ययानित्ययास्तौमीत्यादेःहियस्माच्चस्मात्यस्तांश्रद्धयाधारयेत्सक्षेममोक्षंगच्छेत् ब्रह्मज्ञानलभ्यस्यमोक्षस्यकथंश्रुतिधारणयामोक्षःस्यादित्यत्राह ब्राह्मीति अथकस्मादुच्यतेब्रह्मेतिबृहंतोह्यस्मिन्गुणाइतिश्रुतेःब्रह्मगुणावेदकत्वेनतज्ज्ञानद्वारमुक्तिहेतुत्वोपपत्तेःज्ञानंचविरक्त्यादिमतएवस्यादितिभावेनाह अकिंचनइति ३

भवच्छिष्यत्वेनममभवदुक्तिःप्रमाणमस्तु इतरेषांकथमिति शंकामाभूदितिभावेनाह अत्रेति अत्रश्रुतयः कथंचरंतीत्यस्मिन्नर्थे गाथां त्रिषट्पादलक्षणप्रबद्धांकथां नारायणोदितांनारायणेनकथिताम् ४ नारायणस्यसंगमःकथमभून्नारदस्येत्यत्राह एकदेति ५ कस्मिन्खंडेनारायणाश्रमः तत्रकिंकुर्वन्किंप्रयोजनआस्तइतितत्राह योसाविति तपसोंगवैकल्यपरिहारायसाकल्यादित्युक्तं धर्मःसुकृतंविहितं चारोवा ज्ञानंस्वपरपदार्थावगाहि शमोनिष्ठा एतैःउपेतःलोकदृष्ट्यैतदुक्तम् तत्राश्रमेउपविष्टंतम् ७ तस्मैनारदायेमांगाथामवोचत् गाथांविशिनष्टि यइति । ब्रह्मवादः ब्रह्मविषयागाथा ८ पुरातत्रत्यानांजनलोकस्थितानांमानसानामूर्ध्वरेतसांमुनीनांस्वायंभुवंस्वयंभूपुत्रैःक्रियमाणं ब्रह्मसत्रंब्रह्मयज्ञंब्रह्मविचारलक्षणोयज्ञोजनलोकेभवादित्यर्थः ९ यत्रश्वेतद्वीपेब्रह्मर्षिश्रुतयःशेरते अन्यबोधकत्वव्यापारमंतरेणतदुपबोधनपराएवसंति तंश्वेतद्वीपंत्वयिगतवतिब्रह्मवादःसंप्रवृत्तइत्यन्वयः १० कथमत्राह तत्रेति मुनयः कीदृशाइत्यत्राह तुल्येति अरिःशत्रुः ११ एकंप्रवचनंप्रकृष्टंवचनंयस्यसतथा प्रवक्ताव्याख्यातेत्यर्थः तंअपरेशुश्रूषवःश्रोतारः योत्रप्रवक्तासश्रेष्ठइत्यत्रतात्पर्यज्ञातव्यं सनकाद्याःसमाःसर्वेतत्रश्रेष्ठःकुमारकइतिवचनात् १२ सएकःकथंमावोचदत्राह स्वसृष्टमिति ब्रह्मरूपेस्वसृष्टमिदंजगदापीयसंहृत्यशक्तिभिः श्रीभूदुर्गाख्याभिर्विभक्तप्रकृतिमूर्तिभिःसहशयानंयोगनिद्रांकुर्वाणंपरंपरमात्मानं तदंतेब्रह्मप्रलयावसाने श्रुतयस्ताश्चिंगैःसंसारनिर्मूलनादिब्रह्मलक्षणैर्बोधयांचक्रुरित्यन्वयः अत्रेदंतात्पर्यं मूलप्रकृतिः

अत्रतेवर्णयिष्यामिगाथांनारायणोदिताम् ॥ नारदस्यचसंवादमृषेर्नारायणस्यच ४ एकदानारदोलोकान्पर्यटन्भगवत्प्रियः ॥ सनातनमृषिंद्रष्टुंययौनारायणाश्रमम् ५ योसौभारतवर्षेस्मिन्क्षेमायस्वस्तयेनृणाम् ॥ धर्मज्ञानशमोपेतःसाकल्यादास्थितस्तपः ६ तत्रोपविष्टमृषिभिःकलापग्रामवासिभिः ॥ परीतंप्रणतोपृच्छदिदमेवकुरूद्वह ७ तस्माअवोचद्भगवान्ऋषीणांशृण्वतामिमाम् ॥ योब्रह्मवादःपूर्वेषांजनलोकनिवासिनाम् ८ ॥ श्रीभगवानुवाच ॥ स्वायंभुवंब्रह्मसत्रंजनलोकेभवत्पुरा ॥ तत्रत्यानांमानसानांमुनीनामूर्ध्वरेतसाम् ९ श्वेतद्वीपंगतवतित्वयिद्रष्टुंतमीश्वरम् ॥ ब्रह्मवादःसुसंवृत्तःश्रुतयो यत्रशेरते १० तत्राप्ययमभूत्प्रश्नस्त्वंमांयमनुपृच्छसि ॥ तुल्यश्रुततपःशीलास्तुल्यस्वीयारिमध्यमाः ११ अपिचक्रुःप्रवचनमेकंशुश्रूषवोपरे १२ सनंदनउवाच ॥ स्वसृष्टमिदमापीयशयानंसहशक्तिभिः ॥ तदंतेबोधयांचक्रुस्तल्लिंगैःश्रुतयःपरम् १३

श्रीभूरूपाभ्यांविष्णुनासहशेते श्रुतिनाम्नादुर्गारूपेणविष्णुंस्तौति जयजयेति पुंशक्तिविषयबोधनवचनं दुर्गाख्यायाअपिताहक्शक्तिमत्त्वात्तदर्थत्वेनभगवदाज्ञयागृहीतविग्रहत्वाच्छ्रुतीनामनंतत्वेनाधिगंतुमशक्यत्वात्दुर्गानाम्नोपितथात्वाच्चकालीभद्रेत्यादिबहुरूपत्वप्रतीतेश्चश्रुतेश्चानंतत्वेनवाक्यभेदाच्छ्रुतयइति बहुवचनंचयुज्यते तदुक्तं श्रीर्भूमिरितिरूपाभ्यांप्रकृतिर्विष्णुनासह । शेतेश्रुतिस्वरूपेणस्तौतिब्रह्मलयेहरिम् एकाप्यनंतरूपासावाक्यभेदात्सरस्वती अनादिनिधनानित्यास्तौतिनारायणंप्रभुमिति अनेनेदंपौरुषेयंवाक्यत्वादितरवाक्यवदितिप्रत्युक्तंयावद्ब्रह्मविष्ठितंतावतीवागितिश्रुतेः त्रिरूपायाःरमायाःशक्तिशब्दाभिधेयत्वंवेदापरपर्यायाः शक्तेश्चेतनाभिधेयत्वंविष्णोःस्वरूपभूतशक्तेःशक्यत्वगुणयोगेनयुज्यते नित्याव्यवधानादितिविशेषशक्तित्वाच्च । विष्णोःस्वरूपशक्तेःसाशक्यत्वाच्छक्तिरेवतुनित्याव्यवहितत्वाच्चविशेषाच्छक्तिनामिकेतिवचनात्सामान्यवाचिनोपिशक्तिशब्दस्यविशेषानिष्ठत्वं पंकजादिशब्दवद्युज्यतेपंकाज्जातंपंकजमितिशैवलादिषुवृत्तिसंभवेपिपद्मेएववर्तते विप्रादावापिब्रह्मशब्दस्यवृत्तियोगेपिचतुर्मुखएव रुद्रशब्दस्यरौद्रगुणयोगेनातपेवृतावपिशंकरएव आदित्यशब्दस्यादितिपुत्रसामान्यवाचित्वसंभवेपिसूर्यएवेत्याद्यूह्यं यथैवपंकजंब्रह्मारुद्रइत्यादिकंपदमितिवचनात् उमादीनामपिप्रकृतिशब्दवाच्यत्वेनप्रसिद्धेःकथं उच्यते अपरप्रकृतित्वंतासां लक्ष्म्याएवपरमप्रकृतित्वं तदुक्तम् श्रीःपराप्रकृतिःप्रोक्ताब्रह्माणीत्वपरातनुः उमाशचीमुख्यास्तस्याअपराःसंप्रकीर्तिताइति १२

नित्यबुद्धस्यहरेः कादाचित्कबोधनंविडंबनमात्रं नतुसत्यमितिहृदिकृत्वा लौकिकमतमनुसरति यथेति अनुजीविनइत्यनेनवेदांतानांतदेकनिष्ठत्वंसूच्यते राजवज्जयशब्दाद्यानित्यबुद्धस्यबोधनं विडंबमात्रंकेवास्यनिद्राविद्यापतेर्हरेरितिच १४ श्रुतयोपिलक्ष्मीविभूतयः पुराणस्यस्त्रीशूद्रादिश्रुतिगोचरत्वेनश्रुत्यर्थएवगृह्यतेनतुशब्दइत्यभिप्रेत्यकथितं श्रुतयऊचुरिति जयजयेति नित्यविजयाधिकरणस्यहरेर्लौटैष्यत्कालविजयोनाशास्यते किंतुविजयप्रकाशनंभक्तानुकंपित्वेनजयंप्रकाशयेत्यर्थः सर्वदाजयतोविष्णोर्जयस्तस्यप्रकाशनामित्यादि । अत्रराजवदिशांजयोनप्रार्थ्यते किंतुदुस्तरंप्रकृत्यादेरित्याशयेनाह जहीति हेअजित दोषैर्जन्मदुःखाज्ञानादिभिरानंदज्ञानादयोजीवगुणागृहीताःसंवृतायायासादोषगृहीतगुणां तामजां अजगतिक्षेपणयोरितिधातोःजीवगुणाक्षेपिकांजहिहन तथा परमाच्छादिकांजहिगमयअपसारयेतियावत् एतेअपिप्रकृतिशब्दवाच्ये अथान्येप्रकृतीदुष्टेनृपुप्रातिस्विकंस्थितेइत्यादेः एतेनजयजयेत्यारभ्यसंवृताधिसंवृतेत्यंताश्रुतिर्गृहीता अरातिंतंद्रीं प्रकृत्याच्छन्नत्वाविशेषाज्जीवात्मनोःकोविशेषइतितत्राह त्वमसीति त्वंयद्यस्मादात्मनास्वतएवअसंभिन्नोतएवावरुद्धः अनपगतःसमस्तःपूर्णोभगऐश्वर्यादिगुणोयस्यसतथा अनपगतपूर्णैश्वर्यादिगुणोसीत्यर्थः । भगोयोन्यांभगोपस्थेयशोवीर्यार्कभूतिषु । कांतीच्छाज्ञानवैराग्यधनैश्वर्यतपःसुचेतियादवः । अतस्त्वत्प्रतिबिंबभूतस्यजीवस्यप्रकृत्याच्छादितत्वात् त्वत्प्रसादमंतरेणैश्वर्याद्यगुणाःनप्रकाशंते अनेनह्येषह्यानंदइत्यारभ्यस्वतोसित्वमित्यंतागृहीता । इतोपिविशेषोस्तीत्याह अजेति अजहेविष्णो जगदोकसांजगदाश्रयभूतानांश्रीब्रह्मादीनांसृष्ट्याद्यखिलशक्त्यवबोधक रमायाइत्यारभ्यअनंतोसीत्यंताऽनेनसूचिता इदानींगुणवृत्तयःश्रुतयःनिर्गुणेब्रह्मणिकथंचरंतीत्यस्यपरिहारमाह क्वचिदजयेति निगमस्तत्त्वनिश्चायकोवेदः क्वचित्सृष्टिकालेआत्मनाजीवेन अजयाप्रकृत्याच अनुच

यथाशयानंसम्राजंबंदिनस्तत्पराक्रमैः ॥ प्रत्यूषेऽभ्येत्यसुश्लोकैर्बोधयंत्यनुजीविनः १४ ॥ श्रुतयऊचुः ॥ जयजयजह्यजामजितदोषगृहीतगुणांत्वमसि यदात्मनासमवरुद्धसमस्तभगः ॥ अजजगदोकसामखिलशक्त्यवबोधकतेक्वचिदजयात्मनानुचरतोनुचरेन्निगमः ॥१॥ १५ बृहदुपलब्धमेतदवशेषतया यतउदगास्तमस्यविकृतेविकृतः ॥ अतऋषयोदधुस्त्वयिमनोवचनाचरितंकथमयथाभवंतिभुविदत्तपदानिनृणाम् २ ॥ १६ ॥

रतः प्रवर्तमानस्यतेतवानुचरेत्चित्तानुवर्तित्वेनविधिनिषेधरूपेणवर्तते हरेस्तदगोचरत्वाल्लयेकेवलंस्तुतिरूपेण जीवानांनिर्देहकत्वेनतत्प्रयोजनकोनेतिशेषः । लयस्यत्वष्टमोभागःसृष्टिकालउदाहृतः । तत्रैववेदसंचारोह्यन्यदास्तुतिमात्रकइतिस्मृतिः । यस्माद्विधिनिषेधविषयोजीवस्तस्मात्सृष्टिंकृत्वावेदैर्जीवान्बोधयित्वातदुक्तमनुष्ठायस्वज्ञानमुत्पाद्यत्वंप्रसन्नःतत्स्थांपिशाचवद्वर्तमानांअजांप्रकृतिं जहीति । अनेनसृष्टिकालएवगुणमयेजगतिवर्तमानःसदानिर्गुणेपरमेश्वरएववर्ततइतिप्रश्नपरिहारोदर्शितः यजेत नंहतव्य इत्यादिविधिनिषेधानांस्तुतिपरत्वंयुक्तं कथं यत्मास्यर्थयान्नियमाद्विधिनिषेधावतेसत्वमजांजहीतियोजनोपपत्तेः विध्यादीनांनियंताय:पूज्यःप्राप्यश्चतद्भवां । इत्यादिस्तुतिरूपेणविध्यादिश्रुतयोपितु । हरिंवदंतिसर्वेषांतन्नामत्वादथापिचेतिस्मृतेः अस्यसृजतोहितइतिप्रभृतिमातेक्षणोत्यगादितिपर्यंतंमूलश्रुतिरियम् । हनहिंसायामितिधातुः । पृथक्श्रुतित्वान्नपूर्वापरसंबंधःउपलक्षणत्वादनंतत्वाच्छ्रुतीनांसर्वश्रुत्यर्थोपबृंहितत्वाच्चतेषांश्लोकानांनसर्वश्रुतीनांपृथगुक्तिः । सर्वश्रुत्यर्थसंपन्नान्श्लोकान्सत्यवतीसुतः । एकैकशाखाश्रुत्यर्थाञ्जगौसर्वोपलक्षणान् । बबंधतान्भागवतेप्रतिश्लोकंपृथक्श्रुतिरित्याचार्यैरेवोक्तत्वान्नास्माभिर्मिथःसंबंधार्थंप्रपंच्यते ॥ १ ॥ १५ बृहद्धि दृष्टमवशेषितंयत्स्वरूपमीशस्यतमोधिकस्य सर्वाधिकत्वेनतमोहिदुर्गाततस्तथैनंविबुधायथाऽगुरित्यौद्दालकायनश्रुत्यर्थनिबद्धोयंश्लोकः बृहदुपलब्धमिति तथाहि अविकृततमसि । तमआसीत्तमसागूढ्मग्रइतिश्रुतेः । नित्यतमोविषयेत्वमुदगाउत्कृष्टत्वंगतःमूलप्रकृतेरपित्वमधिकोसियतःअतोबृहत्त्वेन बृहवृद्धाविति धातोःपूर्णत्वेनएतत्स्वरूपमुपलब्धं । वेदेषुदृष्टंकथमत्राह अवशेषतयेति इतइदमधिकमितोपीदमधिकमितिसर्वाधिकत्वेनततोधिकाभावेनावशेषितत्वेनपरिशेषप्रमाणसिद्धत्वेनेत्यर्थः । सएषरसानांरसतमःपरमपरार्ध्योष्टमोयदुद्गीथइतिश्रुतिः द्वितीयार्थेतृतीयार्थेपंचम्यर्थेचसप्तमी चतुर्थ्यर्थेच

संप्रोक्ताविषयेपिचतांविदुरितिमहान्याकरणवचनात्विषयपंचम्यांपुज्येते कीदृशस्त्वं अविकृतःविकाररहितः अतऋषयोब्रह्मादिज्ञानिनस्त्वंसर्वोत्तमइत्येतदर्थपराणित्वायतानिमनोवचनाचरितामित्य
कवद्भावविवक्षयैकवचनं मनोवचनाचरितानिदधतामितिदधुः शिक्षांधृतवंतः पुंसांत्वयितानिमनआदीनिकथमयथाअतद्विषयाणिभवंतीतिदधुः तत्रदृष्टांतःनृणांपदंभूमौनिक्षिपामीतिप्रवर्तमानानांद
त्तानिनिहितानिपदानियथाभूमेरन्यत्रनभवंतितथेत्यर्थः जलवृक्षादेराधारशक्तिमत्त्वेपिभूम्यंतर्भावान्नपृथगुक्तिः अतस्तथाबृहत्त्वेनदधुरितिवा अतःशब्दश्चहेत्वर्थेतथेत्यर्थेचवर्तते उभयार्थेचभव
तियथाशब्दविदोविदुरितिवचनात् अनिर्देश्यमप्येकदेशेननिर्दिष्टंभवतीत्युक्तं कथमयथाभवंतीत्यनेन यथासर्वाभूमिमसंचरन्नप्येकदेशसंचारेणभूसंचारीभवतितथेति निरपेक्षबृहत्त्वस्यज्ञानाज्ज्ञानं
भवेत्परं । बृहत्त्वमेवतुगुणैःसर्वैरुद्दिश्यतेयतइतिसामान्यसंहितायाम् २ १६ त्यजंतितापंयउतेभवत्कथाइतिस्ममुक्ताःकिमुतेस्वरूपगाः । परावरेशशपदंभजंतःपरंपरानंदमनारतंतइतींद्रद्युम्नश्रुतिग्रथित
भवेत्परं । बृहत्त्वमेवतुगुणैःसर्वैरुद्दिश्यतेयतइतिसामान्यसंहितायाम् २ १६ त्यजंतितापंयउतेभवत्कथाइतिस्ममुक्ताःकिमुतेस्वरूपगाः । परावरेशशपदंभजंतःपरंपरानंदमनारतंतइतींद्रद्युम्नश्रुतिग्रथित
स्यइतिश्लोकस्यायमर्थः इतिशब्दोहेत्वर्थः पुनरवधारणार्थः पुनरप्यथभेप्रश्नेव्यावृत्ताववधारणेइति हेपरमपरावरेशेश तेतवाजस्रसुखानुभवं अनारतमजस्रं सुखंपरानंदःअनुभवःज्ञानंयस्यतत्त
था तत्पदंस्वरूपंभजंति अनन्याश्रयत्वात्स्वधामापरमः तेनविधुताःआशयगुणादुःखाद्याः कालगुणाउत्पत्त्यादयोयैस्तेमुक्ताःतर्पासितापाज्झहुरितिकिमुतपुनःवक्तव्यमेव हेऽन्यधिपतेत्रिलोकीनाथ सू
रयःदर्शनादिभाषाविचक्षणाः अखिललोकस्यमलंक्षपयतीतिअखिललोकमलक्षपणःतंत्वकथामृताब्धिंअवगाह्यापितपांसिजहुरितियस्मादितिशेषः ३ १७ अनिशमनुध्वसंत्यमुखोद्गरितास्तवरिपवो
दृतिवत्तमसिमविष्ठाः । तवगुणप्रथनाःपरिहापतमःपर्यांतितेपदमजस्रमनंतसुखमितिपैंगिश्रुत्यर्थरूपस्यहृतयइत्यस्यश्लोकस्यायंभावः महदहमादयः ब्रह्मरुद्राद्यभिमन्यमानानिमहददहंकारादितत्त्वा

इतिसूरयऋषयोपतेऽखिललोकमलक्षपणंतवकथामृताब्धिमवगाह्यतपांसिजहुः ॥ किमुतपुनःस्वधामविधुताशयकालगुणाःपरमभजंतियेपदमजस्रसुखा
नुभवम् ॥ ३ ॥ १७ हृतयइवोच्छ्वसंत्यसुहृदोयदितेमहदहमादयोंडममृजन्यदनुग्रहतः ॥ पुरुषविधान्वयोत्रचरमोत्तममध्यमादिषुयस्तवसदसतःप
रंप्रथयेदविशेषमृतम् ॥ ४ ॥ १८ उदरमुपासतेयर्हिवर्त्मनिसूक्ष्मदृशःपरिसरपद्धतिंहृदयमारुणयोदहरम् ॥ ततउदगाच्ननंदनपथाथशिरःपरमंपुनरि
हयत्समेत्यनपतंतिकृतांतमुखे ॥ ५ ॥ १९

नि यस्यानुप्रवेशलक्षणानुग्रहतोब्रह्मांडमसृजन् तस्यात्यंतोपकारकस्यतेतवयद्यसुहृदःसर्वमिथ्यात्ववादिनःतर्हितेहृतयःकारुणा
लयामग्निधमनानिर्मितचर्मविशेषाइवोच्छ्वसंतितमसिप्रविष्टाःदुःखभराक्रांतत्वाद्विनष्टप्राणबलादीर्घश्वासंकुर्वंति अत्रचरमोत्तममध्यमादिषु चरमामनुष्योत्तमाः उत्तमाइंद्रादिदेवाःमध्यमाऋषिगंधर्वाः
आदिःमुक्तसमुदायेप्रथमोब्रह्मा एषुपुरुषेषुयस्तवाजस्रंऋतमेकप्रकारंनित्यमितियावत् अनंतसुखंअविशेषंविषयविशेषनिमित्तक्षणभंगुरसुखमंतरेणस्वरूपभूतापरिमितानंदपूर्णं सदसतःपरंप्रथयेत्
जानाति शिष्यादिषूपदिश्यप्रख्यापयतिच सःपुरुषविधस्यजीवदेहगतत्वेनतदाकारस्यतवान्वयः अनुकूलाप्राप्तिर्यस्यतथा असक्तोदेहपुर्यंषजीववद्देहगोपियत् अथवापुंविधातृत्वात्पुंविधःपु
रुषोत्तमइतिवचनात् तादृशंत्वामाप्नोतीत्यर्थः प्रथयतीतिप्रथनः ॥ ४ ॥ १८ तंप्रपद्याभ्यांप्रापद्यतब्रह्मेमंपुरुषंयत्प्रपद्याभ्यांप्रापद्यतब्रह्मेमंपुरुषंतस्मात्प्रपदेतस्मात्प्रपदेइत्याचक्षते शफाःखुराइत्यन्ये
षांपशूनांतदूर्ध्वमुदसर्पत्ताऊरूअभवतामुरुगृणीहीत्यब्रवीत्तदुदरमभवदुर्वैवमेकुर्वित्यब्रवीत्तदुरोभवदुदरंब्रह्मेतिशार्कराक्षाउपासतेहृदयंब्रह्मेत्यारुणयोब्रह्माहैवताईऊर्ध्वत्वेवोदसर्पत्तच्छिरोश्रयतयच्छिरोश्र
तयतच्छिरोभवत्तच्छिरसःशिरस्त्वंताएताःशीर्षंछ्रियःश्रिताश्चक्षुःश्रोत्रंमनोवाकप्राणःश्रयंतेऽस्मिञ्छ्रयोयएवमेतच्छिरसःशिरस्त्वंवेदेत्यादिश्रुतेः कस्मिन्वहमुत्क्रांतेउत्क्रांतोभविष्यामिकस्मिन्वाप्रति
ष्ठितेप्रतिष्ठास्यामीतिसप्राणमसृजतेतिश्रुतेः प्राणएवैनमनुप्रविशतिप्राणप्रविशतिमितरादेवताः नप्राणादपरःपरमनुप्रविशति प्राणएवैनमनुभुंक्ते प्राणमितरादेवताः प्राणादपरःपरमनुभुंक्ते प्राणएवैनम

न्वानंदीभवतिप्राणमितरादेवतानप्राणादपरःपरमन्वानंदीभवातितस्मादाहुःप्राणःपद्धतिरितिहिरण्यनाभश्रुतेश्चार्थप्रतिनिधिरुदरमुपासतइतितस्याभिप्रायः शर्कराक्षुद्रपाषाणेसुसूक्ष्मेखंडितेगुडइति शर्करातुशिलाभेदेऋग्भेदाल्पकपालयोः शर्करंतत्रदेशेषुसितायांशकलेगुडइतिच अतःशर्कराक्षाःसूक्ष्मदृष्टयःतेषुख्याताःशार्कराक्षाःतएववर्त्मनिब्रह्मणिसूक्ष्मदृष्टयःहरेरशेषविशेषान्विजानंतोयहिंयस्मात्प्राणं प्रत्युरुगृणहीत्यब्रवीदितिवचनादुदरनामकंब्रह्मोपासते उदरंपूर्णब्रह्मउद्गतःअरःपरिच्छेदोयस्मात्तदुदरं पूर्णमित्येकार्थत्वात् यस्माच्चारुणयोहृद्ययनात्हृदयनामकंब्रह्मोपासते यस्माच्चेतरमांडूकेयाद योदहरमाकाशादप्यतिसूक्ष्मं परिसरोमुख्यप्राणःपद्धतिर्मार्गोयस्यसतथा परिसरस्यपद्धतिर्वातदुपासतेतद्ब्रह्मतत:हृदःनंदनपथाब्रह्मनाडीद्वाराशिरःप्रत्युदगात् अथयत्परमंब्रह्मपुनरिहहृदयादिषु स्थितंउपास्यतत्समीपमुपेत्यकृतांतमुखेसंसारेनपतंतीत्यन्वयः ५ १९ योजीववद्योनिषुभात्यनंतोमूढैस्तमोगैर्भरताधिगम्यः निचाय्यतंशाश्वतमात्मसंस्थंतदिच्छवोत्मन्यदधुर्महांतइतिकमठश्रुत्यर्थग्रा हिणःस्वकृतविचित्रेतिश्लोकस्यार्थउच्यते स्वकृतविचित्रयोनिषु स्वनिर्मितसुरनरादिनानाविधशरीरेषुविशन्निवविशन्जीवस्तद्वदज्ञानांयस्त्वंचकास्सि कथमिव अनलवत्स्वकृतानुकृतिः यथाऽनलःस्व कृतस्यानुकृतिर्यस्यसतथा स्वकृतदार्वादेरपनयनेगच्छन्तत्स्थापनेतिष्ठन् अनुवर्तते एवंस्वकृतशरीरादिष्वनुवर्तसेतद्वतःसन्नित्यर्थः ज्ञानिमतमाह हेतुत्वयेति सर्वहेतुतयाभरतेन भेज्ञानात्मकेविष्णौ रतेनवायुनामतःज्ञातः रतत्वाद्वात्मकेविष्णावथवापिजगद्भृतेःभरतोवायुरुद्दिष्टोभारतीतत्सरस्वतीतिस्मृतेः वितथासुअन्यथाभवंतीषुअशाश्वतीष्वपिसंभावितास्वसंभावितास्वपिअमूषुयोनिषु अवित थात्वेनअन्यथाभूत्वैवशाश्वतत्वेन उरुविधंबहुविधंतिष्ठंतं निकटधियःत्वत्समीपस्थबुद्धयःमहांतस्ते तवत्वामभिविपत्यमनसाभिगम्यमनसिनयंतिध्यायंतीत्यर्थः योनिवेश्याह्ययोजीवस्त्वज्ञानांतद्वदे

स्वकृतविचित्रयोनिषुविशन्निवहेतुतयाभरतमतश्चकास्स्यनलवत्स्वकृतानुकृतिः ॥ अपिवितथास्वमूष्ववितथोरुविधंमनसिनिकटधियोनयंत्यभिविपत्य तव ॥६॥ २० प्रक्रमवत्स्वसत्कृतंसर्वेषुपुरुषेषुसर्वासुधीषुस्थित्वात्वांतुबहिरंतरसञ्चरणेपि ॥ तवपुरुषवदंत्यखिलशक्तिपुतःस्वकृतम् ७ २१ इतिविमृशंति कवयोनिगमावपनंयजंतउपासतेभवमध्यविनिश्वसिताः ॥ दुरवगमात्मतत्त्वनिगमायतवाङ्मनसश्चरितमहामृताब्धिपरिवर्त्तपरिश्रमणाः ८ २२

वतु प्रकाशतेपरोदेवस्तेनयांत्यधरंतमः सर्वहेतुत्वयैवेशंप्राणोजानातितत्त्वतः तेनचासौपरोदेवस्तत्परंयातिकेशवं इंधनानयनेत्वग्निर्यथैवानीयतेसह एवंदेहगतोविष्णुःसहगच्छेन्निजेच्छया अशाश्वतेषु देहेषुशाश्वतंबहुधास्थितं निचाय्यमनसासंतोजानंतिनिकटेच्छवइत्यादितंत्रभागवतेसिद्धोयमर्थः ॥ ६ ॥ २० निषुसीदगणपतेगणेषुत्वामाहुर्विप्रतमंकवीनां नऋतेत्वत्क्रियतेकिंचनारेमहामर्कं मघवंश्चित्रमर्चेत्यादिश्रुत्यभिप्रायगर्भस्यप्रक्रमवदित्यस्यश्लोकस्यायमर्थः सर्वेषुपुरुषेषुसर्वधीषुसर्वेंद्रियेषुचस्थित्वा श्रीब्रह्मादिषुप्रक्रमवत्प्रकृष्टक्रमयुक्तत्वेन स्वसत्कृतंस्वात्मनैवसत्कृतंत्वांवदंति किंच हेपुरुषबहिरंतःअंडाद्यंतर्बहिश्च असच्चरणे असदमंगलंचरणंकर्मयस्यासावसच्चरणःतस्मिन्पापाचारेस्थित्वापापाचारमपि स्वात्मनःपूजात्वेनैवकारयंतंत्वांवदंति तुशब्देनयथाकरणंतस्याधोगत्यर्थमितिसू चयति किंबहुनातत्सर्वंतवस्वकृतं अनन्यापेक्षयात्वयैवकृतंवदंतिकुतइतितत्राह अखिलेतिसर्वपुरुषेंद्रियशक्तिप्रेरकत्वात् श्रुतिश्लोकयोःसर्वत्रैकार्थत्वाभावोनैकतन्नियतत्वद्योतनायज्ञायते श्रीब्रह्मरुद्र पूर्वेषुक्रमात्स्थित्वाजनार्दनः स्वात्मानमर्चयत्यद्धावहिरंतरसत्सुच असतामधमाचारोहरिदृष्ट्यात्मपूजनं तस्याऽधोगमनायेतिश्रुतिराहाखिलक्रियमित्यादिना त्रिपादोयंश्लोकः ७ २१ विमथ्यवेदाब्धि मतिश्रमेणज्ञात्वापरेशंमुनयोविमुक्ताः मृशंतियज्ञैश्चयजंतिनित्यमुपासतेवेदफलप्रदंतमितिकुशिकश्रुतिप्रतिरूपस्यइतिविमृशंतीतिश्लोकस्यायमर्थः प्राणिनोभवमध्येविनिश्वसिताइतियतोतःकवयो विमृशंतीति सामान्येनोक्तंविशिनष्टि निगमेति हेदुरवगमात्मतत्त्व दुर्ज्ञेयनिजस्वरूपच रितलक्षणमहामृताब्धेःपरिवर्तनेनमथनेनपरिश्रमणाः चरगतिभक्षणयोरित्यतस्त्वत्तत्त्यावगतिहेतुर्वेदश्चरितश ब्देनोच्यते सएवमहासमुद्रःतस्यपरिवर्तनंपरिलोडनंमथनमितियावत् तेनपरिश्रांताइतियतःअतोभवमध्याद्विनिश्वसिताः मुक्ताः निगमानामावपनंस्थानं निगमानांततोभिव्यक्तेस्ततएवफलप्रदत्वाद्विषय

१ प्रक्रमवत्स्वसत्कृतपुरुषेषुधीषुतुबंहिरंतरसच्चरणे तवपुरुष० इतिपाठान्तरं लिखितपुस्तके ।

त्वाच्चनिगमावपनंत्वांविमृश्ययज्ञादिभिर्यजंतेउपासते सजातीयविजातीयप्रत्ययानंतरितत्वेनध्यायंति कीदृशःनिगमोवेषयेपुआयतवाङ्मनसः।वरतृतवाङ्मनोव्यापाराइत्यननवदनयोपशमनम्
त्तत्त्वाइत्युक्तंभवति ॥ ८ ॥ २२ नाकिंचिदभिवांछंतियतयःसुसदाश्रयाः प्रेष्ठस्यरमणस्यान्यैप्रियवद्देहदृष्टयइत्यर्थद्योतकस्यनपरिलषंतीत्यस्यायंभावः ईश्वरेत्यनेनश्रुत्यंतरमत्राप्यनुकूलंलक्षयतिके
चिद्यतयःकिंचिदपवर्गलक्षणमुपासनाफलमपिनपरिलषंतिनवांछंति तत्रनिमित्तमाह चरणेति चरणसरोजसेविनांहंसानांसंन्यासिनांकुलस्यसमूहस्यसंगेनसवालक्षणेनविसृष्टगृहाः गृह्णंतित्यक्तुंन
मुंचंतीतिगृहाःभार्यापुत्रादयोविसृष्टाःसंत्यक्तायैस्ते अनेनसुसदाश्रया इतिविवृतं किंच त्वदनुपथंत्वन्मार्गानुकूलमार्गंत्वत्प्राप्त्यनुसारित्वादिदमात्मनःस्वस्यसुहृदनिमित्तबंधुभूतंकुलायंशरीरं प्रिय
वच्चिच्छरीरंचरंतिपश्यंति प्रियेसर्वतःप्रियतमेआत्मनिसर्वादानकर्तरित्वयि तथाहितेतत्प्राप्तापत्परिहारेणउन्मुखाःअभिमुखाः ॥९॥ २३ असुर्यानामतेलोकाअंधेनतमसावृताः तांस्तेप्रेत्याभिगच्छं
तियेकेचात्महनोजनाइतिश्रुतिसूचिताभिप्रायस्यनचरमंत्यस्यायमर्थः असदुपासनयाऽन्यथोपासनयाब्रह्माहमित्यात्मोपासनया आत्महनःआत्मानंघ्नंतोजनाः असुर्यान्सुदुरमणरूपत्वादसुरप्राप्यत्वा
च्चनित्यानिरतिशयदुःखान्निरस्तसमस्तसुखान् लोकानाप्नुवंतीत्येतन्नचरमंत्यहोइत्यनेनलक्ष्यते सुखलक्षणारतिरेवनास्तीतिन किंतुनित्यदुःखमनुभवंतिच अहोआश्चर्यंअन्यथोपासकानामनर्थपरंपरा किंच
यदनुशयाःयस्मिन्ननुशयोयेषांतेतथा यत्रानुशयानास्तमस्येवभ्रमंतीत्यर्थः कुतोत्राह अभवाइति ततउत्थायपुनर्जन्मवर्जिताः जन्माभावेनदेहाभावेदुःखभोगाभावइतितत्राह कुशरीरभृतइति
नित्यदुःखभोगसाधनंकुत्सितांनिंद्यंशरीरंबिभ्रतीति नकेवलंभगवद्द्वेषिणामेतादृशलोकप्राप्तिःअपितुतद्भक्तद्वेषिणामपितल्लोकावाप्तिरितिभावेनाह निभृतेत्यादिना निभृतंपरिपूर्णंमोक्षार्थंहृदयंज्ञानंयस्य

नपरिलषंतिकेचिदपवर्गमपीश्वरतेचरणसरोजहंसकुलसंगविसृष्टगृहाः ॥ त्वदनुपथंकुलायमिदमात्मसुहृत्प्रियवच्चरंतितथोन्मुखारत्वयिहितेप्रियआत्म
निच ९ २३ नचरमंत्यहोअसदुपासनयात्महनोयदनुशयाभ्रमंत्यभवाःकुशरीरभृतः ॥ निभृतमोक्षहृदययोगयुजोहृदयंमुनयउपासतेतदरयोपियुः
स्मरणात् १० २४ स्वनुरागतद्भवानुरगेंद्रभोगदंडविषक्तधियोवयमर्पितेसमासमदृशोंघ्रिसरोजसुधाम् ॥ कइहवेदनुवक्तुमपेतजन्मलयोयतउदगा
दृषिरनुदेवगणाउभये ११ २५

सनिभृतमोक्षहृदयोवायुःतेनयोगेननियोगेनयुजोयुक्ताःनियमिताःसंतः येमुनयोज्ञानिनःहृद्यनात्हृदयंभगवंतमुपासतेतेषांमुनीनामरयोद्वेषिणोपितदेवश्रीनारायणद्वेषिप्राप्यंतमोययुरित्यन्वयः नित्य
दुःखसुसंपूर्णंनिरस्तानंदमव्ययं तमोयांत्यन्यथाज्ञानाद्वेषाद्वाहरिसंश्रयेइति हरिसंश्रयेहरिभक्तजने निभृतोमोक्षवित्प्राणस्तद्योगात्तत्प्रसादतः जानंतिपरमंदेवंनान्यथातुकथंचनेतिःस्मरणादित्युत्तरश्लोका
न्वयि १० २४ त्वंवेत्थनापरस्तेस्वरूपंनित्यवाङ्नागभोगप्रियस्य कुतोत्रब्रह्माप्राप्तलोकश्चदेवास्तथाप्राप्ताजानिमंतोयतोस्मादितिसांकृतिश्रुत्यर्थभूतस्यायमर्थःहेस्मरणात्स्वनुरागसुष्ठुअनुरागःस्नेहोयस्य
सतथातस्यसंबुद्धिःस्वनुरागेति स्मरणोदवअनुरक्तइत्यर्थः यत्तवसच्चिदानंदलक्षणंतत्तेस्वरूपंभवान्वेदनान्योवेत्ति अनेनत्वंवेत्थनापरस्तेस्वरूपमितिविवृतं भवत्योमत्स्वरूपंविदंतिहीतितत्राहुः उरगेंद्रेति
उरसागच्छंतीत्युरगाःतेषामिंद्रउरगेंद्रस्तस्यभोगएवदंडस्तस्मिन्विषक्ताधीर्यस्यसतथातस्यतेतवअंघ्रिसरोजसुधामुद्दिश्यवयंनित्यवाचोपिसमासमदृशः सर्वमाहात्म्यस्यवेदैरपिवक्तुमशक्यत्वादस
मदृशः माहात्म्योपमितज्ञानाभावाः वेदागम्यमाहात्म्यस्यापिवेदैरेवगम्यत्वात्समदृशः तुल्यज्ञानाः अतइहजगति अन्यःकोनुपुमान्माहात्म्यंवक्तुंवेद अमुनानित्यवाङ्नागभोगप्रियस्यकुतइत्येत
द्विवृतं कोह्यस्मान्वेदान्त्वांचर्ते अपेतजन्मलयःउत्पत्तिनाशरहितःयतस्त्वत्तःऋषिर्ब्रह्माउदगादुत्पन्नः अतोजन्मादिरहितोनभवति देवगणाअपिउक्तगुणानेत्याहु ब्रह्मणोन्वनंतरं उभयेप्राप्तपदाःप्राप्य
पदाश्चदेवगणाः अनेनकुतोब्रह्माप्राप्तलोकाश्चदेवास्तथाप्राप्ताजानिमंतोयतोस्मादितिश्रुतिर्व्याख्याता महिम्नःसर्वशोनुक्तेर्वेदाश्चासमदर्शिनः तस्यापिवेदगम्यत्वात्तथैवसमदर्शिनइतिवाक्यंचानुगृहीतम्

नासदासीन्नोसदासीत्तदानीन्नासीद्रजोनोव्योमापरोयत् किमावरीवःकुहकस्यशर्मन्नंभःकिमासीद्गहनंगभीरमित्यादिश्रुत्यर्थानुरूपस्यतर्हीनसन्नचासादित्यस्यश्लोकस्यभावःकथ्यते यदा भवान्प्रलये शास्त्रंअध्यापकपरंपराप्राप्तंवेदमपकृष्यआत्मनिनिधायशयीत अध्येत्रभावेशास्त्रप्रवृत्त्यभावात् तर्हितदासत्स्थूलमंडादिकंनासीत् असत्सूक्ष्ममहदादिकंचनासीत् उभयंअग्रिरापश्च नचकालजवःज राद्यापादकलक्षणः किंबहुनातत्रकिमपिवस्तुनासीदित्यर्थः हेअजअसतःसूक्ष्मरूपात् त्वत्तःसतःस्थूलरूपस्यजगतः परमेश्वरपर्यंतंयथाक्रमंजानिंमृतिंच सर्वस्मात्परमात्मनि भिदां भेदंच विपणोव्य वहारः त्वत्सेवालक्षणधनेदत्तेसुखपदार्थलक्षणफलंदेयमितिसंकल्पलक्षणइत्यतःफलंलक्ष्यते विशिष्टफलापेक्षामृतेयेस्मरंतितेषांध्वनिंउपाविशवाचिसन्निहितत्वेनतदुक्तविद्ययाज्ञातुंशक्योसीत्यर्थः त त्रेत्थंभावमाहुः आरुवतःवेदादिभिःस्तुवतोवायोःप्रसादात्तथास्मरंतिनान्यथेत्यर्थः सर्ववेदादिरूपेणप्राणस्यारुवतःसदा प्रसादाद्येविजानंतिसूक्ष्मात्स्थूलजानिंक्रमात् मृतिंचसर्वजीवादेरीशस्यव्यातिरि क्तां जानंतियेनिराकांक्षास्तेषांवाचिजनार्दनइति सूक्ष्माणिमहदादीनिस्थूलान्यंडादिकानिच उभयंत्वाग्निरापश्चनाकिंचित्प्रलयेभवदितिवचनादस्यश्लोकस्यायमेवार्थः नसदसद्वैलक्षण्यार्थइति १२ २६ सत्वादिकंदेहमथोमनश्चसत्वादिबद्धंचवदंत्यसंतः परंपुमांसंनसुरास्तुतौर्हिजीवाःसुदृष्टाःपरमार्थरूपाइतिश्रुत्यर्थोपनिबद्धस्यात्रिगुणमयइत्यस्यायमर्थः पुमान्जीवात्त्रिगुणमयःसत्त्वादिगुणबद्धइति जी वस्यापित्रिगुणबद्धताअबोधकृताअज्ञानकृता यतस्तस्मादवबोधरसेत्वयीतिसप्तमीषष्ठ्यर्थे त्रिवृत्त्रिगुणात्मकंमनःत्वयितवापिसदिवविद्यतइत्यर्थः असतांपक्षोभवतिनतुसतां सतांपक्षस्त्वयमित्या हुःमनुजादयइति आत्मविदःसम्यक्परमात्मतत्त्वज्ञानिनः मनुजानामादयोदेवाः भवत्त्रिगुणातीतत्वाद्भवानेवपरमानंदस्त्वदन्यादिदमशेषंजीवजातंआर्ततयास्थितमित्येवविमृशंतिजानंति त्रैगुण्य

तर्हीनसन्नचासदुभयंनचकालजवःकिमपिनतत्रशास्त्रमपकृष्यशयीतयदा ॥ जनिमसतःसतोमृतिमजात्मनियेचभिदांविपणमृतेस्मरंत्युपविशध्वनिमारु वतः १२ २६ त्रिगुणमयःपुमानितियदबोधकृतात्वयिनतुभवेत्तदवबोधरसे ॥ सदिवमनस्त्रिवृत्त्वयिभवत्यसतांमनुजादयोविमृशंत्यशेषमिदमार्त्तत याऽत्मविदः १३ २७ नहिविकृतंत्यजंतिकनकस्यतदात्मतयास्वतमनुप्रविष्टइदमात्मतयारसितम् ॥ तवयेपरिचरंत्यखिलतत्त्वनिकेततयाननुपदा क्रमंत्यविगणय्यशिरोनिर्ऋतेः १४ २८

देहेंद्रियकामासुराजामतेहरिं त्रिगुणातीतमीशेशमतःपूर्णसुखंसुराः जानंतिगुणबद्धत्वाज्जीवानार्तांश्चकृत्स्नशः अनार्तस्यप्रसादेनतेषामार्तिंविनाशनामितिचैतन्यविवेके १३ २७ सर्वगंवेप्रपश्यं तिब्रह्मानंदमजाक्षरं । एकमेवाद्वयंनित्यंनिर्ऋतस्तेशिरोगताइतिश्रुत्यर्थेनग्रथितस्यनहिविकृतमित्यस्यश्लोकस्यायंभावः यथाकनकस्यविकृतंविविधकृतंकुंडलादिरूपंकनकंविनापरित्यक्तुंनशक्यते नेदंक नकंसर्वामिति तत्रहेतुः तदात्मतयेति कनकस्वरूपत्वेनप्रमाणसिद्धत्वात् तथास्वकृतमिदंजगदनुप्रविष्टोभवान्मूलरूपंविनापरित्यक्तुंनशक्यः तत्रहेतुरात्मतयेति एकस्वरूपत्वात् कीदृशंजगत्प्रवि ष्टः रसितंलसितं आत्मनाप्रकाशितंजगत्प्रविष्टस्तस्मात्सर्वगतोविष्णुरितिज्ञातव्यइतितात्पर्यार्थः एवंविधज्ञानेनकिंप्रयोजनंतदाह तवेति येतवअखिलतत्त्वानिसर्वपदार्थाःअधिष्ठानतयानिकेतना नि अधिष्ठानतयाआश्रयोयस्यसतथातस्यभावस्तत्तातया स्वरूपंज्ञात्वापरिचरंतिपूजयंति यद्वा अखिलतत्त्वानांनिकेततयातेज्ञानिनः ऋतात्मकब्रह्मप्राप्तिविरुद्धत्वान्निर्ऋताख्यस्यसंसारस्यशिरः स्फुटंपदाक्रमंति ननुकिंकृत्वा अविगणय्यसंसारमितिशेषः आचार्यैरत्रयायाःश्रुतयोध्येतृपरंपरासिद्धास्तास्ताएवोदाहियंतेनत्वन्याः लोकप्रत्ययार्थंतत्रश्रुत्युक्ताधिकार्थेपुराणानिचोपात्तानि य थैवकुंडलंत्यक्त्वानादातुंकनकांशकं । तस्यैवतदवस्थत्वात्केवलाभेदतःस्फुटं । एवंसुरासुरनरेष्वास्थितोभगवान्हरिः । नैवभेदेनमंतव्योजीवभेदेतुसत्यपि । येतथाभिन्नमीशेशंपश्यंतिपरमर्षयः ऋ तप्राप्तिविरुद्धत्वात्संसारनिर्ऋतेःशिरः अगणय्यपदाक्रम्यवैष्णवंनिलयंययुरितिगारुडे १४ २८

परिवयसइतिश्लोकस्यायंभावः येतेदेवास्त्वत्पादैकाश्रयास्तान्विबुधानपिगिरावैदिकवाचापरिवयसेपरितोवभ्रासि वेदोक्तकर्मानुष्ठानेनप्रवर्त्तयसइत्यर्थः वयवधनइतिधावाः कानव दात्रापशूनव त्व यिदृढसौहृदाः गाढबद्धस्नेहपाशाःपुरुषाःपुनंतिननुजगदितिशेषः ततवविमुखाःद्वेषिणोनपुनंति मत्युनमलीमसंकुर्वतीतिशेषः अनेनवयतिगाइवयःसुरादिकांस्तन्मनसोजगदपुनन्शुचयोनपरेइतिविवृत म् शुद्धिरपित्वन्नियतेत्यत्राहुःत्वमिति अखिलकारकशक्तिधरः परिपूर्णकर्तृकारयितृशक्तिधरस्त्वमेकएवनान्यःकुतःस्वराट्चक्रवर्ती अस्मत्स्वामीकिमस्मानाज्ञापयसीतिप्रतीक्ष्यसर्वदाविवृतनयनत्वात् येअनिमिषाःदेवास्तेतवबलिमुद्वहंतिमनुजैर्दीयमानंसम्यगदंतिच अनेनसएकईशःपरिपूर्णशक्तिर्बलिंहराइतरेस्युःसुराःसुखिनइत्येतत्व्याख्यातम् समभेदेसमीचीनसुद्युपूजासुखेपुचेतियादवःतत्रतत्रपुरा णवाक्योदाहरणेनैतच्छ्रुत्यर्थत्वेनश्लोकोग्रथितइतिनिश्चीयते साश्रुतिरपिप्रमाणीक्रियते १५ २९ वर्षभुजइत्यस्यश्लोकस्यायंभावःयेयत्रयस्मिन्पदेत्वाधिकृताःअधिकारंप्राप्ताः विश्वसृजस्तेभवतश्चकिताः मीताः तत्रस्थित्वाभवतोविदधतिबलिमितिशेषः कस्मैकेइव वर्षभुजःखंडेशाः अखिललक्षितिपतेश्चक्रवर्तिनइव यदिपुरुषोविमुक्ताःसंतोयस्मात्सविमुक्तःसन्तस्यविमुक्तसतः परस्यसकाशात् विरहेमुक्तौउदीक्षयेत् परमात्मनएवमुक्तिरितिपश्येत् तमेवंविद्वानमृतइहभवतिनान्यःपंथाअयनायविद्यतेइतिश्रुतेः हेअज तर्हियेस्थिरचरजातयः स्थिरत्वंचरत्वंचजातिर्येषांतेतथाते अनिमित्त युजःस्युः अःपरमात्मानिमित्तंयुक्योगोसंसारस्ययेषांतेतथा भगवन्नियोगादेवसंसारभाजइत्यर्थः मुक्तेस्तन्नियतत्वाद्बंधोपितुदधीनइतिभावःखंडाधीशाःसार्वभौमस्ययद्वद्ब्रह्मेशाद्याःकुर्वतेतेनुशास्तिं त्वं

पश्विवसेपशूनिवागिराविबुधानपितांस्त्वयिदृढसौहृदाननुपुनंतिनतेविमुखाः ॥ त्वमेकःस्वराडखिलकारकशक्तिधरस्तवबलिमुद्वहंतिसमदंतिचयेऽनि मिषाः१५ २९ वर्षभुजोखिललक्षितिपतेरिवविश्वसृजोविदधतियत्रयेत्वधिकृताभवतश्चकिताः ॥ स्थिरचरजातयःस्युरजयेत्वनिमित्तयुजोविरहउदीक्षयेद्य दिपरस्यविमुक्तसतः १६ ३० नहिपरमस्यकश्चिदपरोनपरस्यभवेद्वचयतइवात्रयस्यचशून्यतुलसंदधतः ॥ अपरिमिताध्रुवास्तनुभृतोयदिसर्वततोनहि नशास्यतेतिनियमोध्रुवतेचतथा १७ ३१

मुक्तिदोबंधदोतोमतोनस्वज्ञानदोऽज्ञानदश्चासिविष्णोइतिशांडिल्यश्रुतेः आत्मानंमुक्तिदंविष्णुंयदिपुंसउदीक्षयेत् सुप्रसन्नस्तथाबंधस्ततएवेतिसेत्स्यतीतिस्मृत्यनुगृहीतश्लोकस्यार्थमनुवदतीति १६ ३० नहिपरमस्येतिश्लोकस्यायंभावः अनात्प्राणात्परस्योत्तमस्य सर्वंसंदधतःयस्यपरमस्यतेतवकश्चिदपरःस्वतंत्रोनभवेत्हेशून्यतुलसमानवर्जित यस्यअत्रजीवसमुदायेव्ययतःसर्वज्ञानतःसर्व ज्ञस्येत्यर्थः अयगताविितिधातोःगत्यर्थानांज्ञानार्थत्वात् इवयथाप्राणस्यनापरःस्वतंत्रःतद्वत्प्राणःश्रीरन्योवात्वांविनास्वतंत्रोनास्ति त्वमेवस्वतंत्रः हेसर्वपूर्ण यदितःतस्मात्प्राणात्तनुभृतो जीवाःध्रुवाःप्राणाधीनाः जीवाःकियंतःसंतीत्यर्थः तर्हिसत्यं तेअपरिमिताः असंख्याताः नन्वेवंचेत् एकमेवाद्वितीयंइत्यादिश्रुतिवाक्यविरोधइतितत्राह नहीति श्रुतेरयंनियमोर्थोजीवानांशास्यतां अधीनतानेत्यत्रार्थेनहि किंतुस्वगतभेदस्यईश्वरांतरस्यास्वतंत्रस्यचनिषेधोनियमः तत्रकिंप्रमाणमत्राह ध्रुवतइति अतोन्यदार्त्तेनेहनानास्तिकिंचन नतत्समश्चाभ्यधिकश्चदृश्यते इत्यादिश्रुतिस्मृत यस्तथाध्रुवतेच तवस्वतंत्रोनापरोयद्वदत्रप्राणान्नान्यस्तुल्यशून्यस्यसंधिन् प्राणाधीनाअमिताजीवसंघाःप्राणोवशेतेप्रकृतिश्चभूमन्इतिश्रुतिरनेनगृहीता स्वतंत्रोनापरःकश्चिद्विष्णोःप्राणपतेःप्रभोरित्या दिस्मृतेः श्रुतिरपिसत्यार्थेत्यर्थः १८ ३१

मुच्यतेतत्त्वसंबुद्धादाचार्यात्पुरुषोभवात् एतावेवस्वतोऽबद्धौपरम:प्रकृतिस्तथेतिकल्पश्रुत्यर्थतया देशत:कालतश्चैवसमव्याप्तावजावुभौ ताभ्यामुभययोगाभ्यांजायंतेपुरुषा:परेइतिकौठरव्यश्रुत्यर्थत याचग्रथितस्याजनपरिमुच्यतेइत्यस्यायंभाव: हेअजनलोकविलक्षण जन्मरहितोतिवा समंएकप्रकारतयाततंव्याप्तं अनंतमदुष्टतयानिर्दोषत्वेनअनुजानतासम्यक्ज्ञानवताचार्येणउपदिष्टमार्गेण अत्रज गतिज्ञानवान्पुरुष: सततात्संततमज्ञानकल्पिताद्भवात्संसारात्परिमुच्यतेसम्यक्मुक्तोभवति कथमनुजानतेतितत्राह नेति अजशब्दस्यानेकवृत्तित्वेनानिश्चयइत्यत:प्रकृतिपूरुषयोरिति तयोरुद्भवउत्पत्ति र्नघटतइतियतस्तत:प्रकृतिपूरुषौविनान्योबंधरहितोनविद्यते मुख्यतोऽजशब्दप्रवृत्तिनिमित्तान्यथानुपपत्त्यानघटतइत्युक्तभवति तदुभययो:प्रकृतिपूरुषयोर्युजोर्योगयोरसुभृतोजीवाभवंतिदेशत:कालत श्चयत्रपरमस्तत्रप्रकृतिर्यत्रप्रकृतिस्तत्रपरमइत्युभययुजो: तत्रदृष्टांत:जलबुद्बुदवत् जलबुद्बुदानियथोत्पद्यंतेतथेति सम्यग्ज्ञानवदाचार्यान्मुच्यतेपुरुषोभवात् द्वावेवनित्यमुक्तौतुपरम:प्रकृतिस्तथेतिस्मृते: १८ ३२ योन:पिताजनितायोविधाताधामानिवेदभुवनानिविश्वा योदेवानांनामधाएकएवतंसंप्रश्नंभुवनायंत्यन्या तआयजंतद्रविणंसमस्माऋषय:पूर्वेजरितारोनभूना असूर्तेसूर्तेरजसिनिषत्तेयेभूतानिस मकृण्वन्त्रिमानिइत्यादिश्रुते: ब्रह्मेशेंद्रादिसंनाम्नांयेर्थभूतागुणामता:पूर्तीशित्वद्रष्टृत्वप्रमुखास्तेहरे:सदेति अतस्तुसर्वनामासौसर्वकर्त्तांचकेशवइत्यादिस्मृतीनांचार्थत्वेनसंदब्धस्यत्वायतइमइतिश्लोकस्या यंभाव: मधुनिनिलिल्युरितिवक्तव्येमधुनिलिल्युरितिपाठोगाथाभंगभयात्समानेलोपइतिन्यायाच्चकृत:ततोइतिपाठोपिवैलक्षण्यज्ञापनायाकारि ततस्तातपितरित्यर्थ: ततेतितातेतिश्रुति: अउ आनंदपूर्ण त्वादनामा सर्वस्मादुत्कृष्टत्वादुनामा आनंदत्वादनामासावुत्कृष्टत्वादुनामक: एतन्नामद्वयंविष्णोर्ज्ञात्वापापै:प्रमुच्यतइतिस्मृते: तयो:संधि: ओइत्यनेननाम्नोर्नाम्निश्चाभेद: उनाम्न:संबुद्धिरसूचियेगुणा:श्रु

अजनपरिमुच्यतेत्रभवात्सततात्सममनुजानततमनंतमदुष्टतया ॥ नघटतउद्भवःप्रकृतिपूरुषयोरजयोरुभययुजोर्भवंत्यसुभृतोजलबुद्बुदवत् १८ ३२
त्वयितइमेततोविबुधनामगुणाःपरमेऽमृतइवार्णवेमधुनिलिल्युरशेषरसाः ॥ नृषुतवमाययास्वगतयाकुशलंत्वयिसुधियोंगभेदमनुधातुमनुप्रभवः ॥
कथमनुवर्तिनांभवभयंतवभ्रुकुटीसृजतिमुहुर्नृणाम् १९ ३३

ता:सुविरुद्धाश्चदेवेसंतीत्यादिश्रुतौप्रतीतास्तइमेविबुधनामगुणा:विबुधानांभद्रादीनांनाम्नार्थभूता:परमैश्वर्यादि गुणा:अमृतेनित्यमुक्तेपरमेत्वयिनिलिल्यु: निलीनतयास्थिता: कस्मिन्केइव मधुन्यर्णवे मकरंदमधुलक्षणसमुद्रेअशेषगुणपुष्परसाइव यतोऽशेषगुणाकरोभवान् अतोनृषुसुधिय:निर्धारणेसप्तमी नृणांमध्येसम्यक्ज्ञानिन:स्वगतयासुष्ठुन्यैरनवगतयामाययास्वेच्छयात्वयिभेदं समस्तादन्योविशि ष्टगुण:परइतिभेददर्शनलक्षणं कुशलमनुविधातुमनुप्रभव: सम्यक्समर्था: अनेनअज्ञानिनांनिलीना: ज्ञानिनामभिव्यक्ता:गुणाइत्यतस्तेषांसद्भावोदर्शितइति तदुक्तं अन्याविज्ञातयाविष्णो:शक्त्यैवकुशलं जना: कुर्वंतिकुशलेषूच्चभेददर्शनमेवतु पूर्णानंदादिसंपत्तिविष्णोर्ज्ञात्वैतरेषुच तदपेक्ष्यविफल्गुमात्रज्ञानंतद्भेददर्शनं अनात्मनंतोभेदोयंस्वभाव:परजीवयो: स्वतोवापरतोवापिनकदाचित्प्रणश्यति एवं ज्ञानवतांविष्णुर्बहुजन्मनदास्यति अनुवृत्तिर्यद्यनल्पासहिसर्वेश्वर:प्रभुरिति अनेनकथमनुवर्तिनांभवभयंतवभ्रुकुटीसृजतिमुहुर्नृणामित्येतदर्थोविवृत: तथाहि यथातवगुणविधानसामर्थ्यंतथाअनुकूल भूतत्वप्रसादानुवर्त्तिनां मुहुर्निरंतरंसेवमानानांतवभ्रुकुटीभवभयंकथंसृजति नकथमपिप्रत्युतनिर्मूलयतीत्यर्थ: य: पाताजनिताचैवकल्पकोनित्यपोषक: प्रापक:सर्वदेवानांपदानांपुरुषात्तेमः स र्वदेवाभिधावाच्योभूतभव्यभवत्प्रभु: विचार्यःसर्वदेवेशैस्तंब्रह्माद्यायजंतिच त्रिगुणात्मकस्रष्टारस्तथापिनयजंतितं यत:पूर्णेशशक्त्यैवतेषांयजनमिष्यते अत:सर्वेश्वरोविष्णुरेकएवमहागुण इत्यनेनब्रह्मादी नामखंडगुणत्वंस्वातंत्र्येणसर्वकर्तृत्वमित्यादिकंदरतोऽपहस्ततमितिज्ञातव्यम १९ ३३

यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनइतिश्रुतेः देवाअपिसुयोगाद्यापतंतेसर्वसाधनैः पुत्रदारादिभिःसाधनोच्छ्वसंतीहसंसृतौ गुरोरनुग्रहमृतसाधननहरःभय पुरु
पदेशात्तुहरिंप्राप्नोत्येवनसंशयइतिस्मृत्यनुग्रहीतायाःश्रुतेः अभिप्रायगर्भस्यइहभवच्चरणेष्वित्यादिश्लोकद्वयस्यअयमभिसंधिः हेऽजितभक्तभक्त्यावशीकृत जयोविष्णोश्चवायोश्चभक्त्यातत्प्रीतिसाध
नं जगदीशयोःकुतोह्येनोःसर्वशक्त्योर्बलाज्जयइतिवचनात् भक्तिलक्षणसाधनसाम्राज्यविष्णोःप्रसादोजयोनाम हेहरेयइहसंसारेव्यसनशताध्वितारंगुरोश्चरणमपहायहृषीकवायुभिरुदात्तमहत्तुर
गैः कर्मणियतंतीत्यन्वयः. व्यसनानांशतमेवाब्धिर्व्यसनशताब्धिःतंतारयतीतियःतं षण्णवत्यंगुलोयस्तित्यादिलक्षणोपेतस्यगुरोश्चरणमितिसेवेहलक्ष्यते तांसेवांत्यक्त्वाउदात्तःसारथिः रथोप
रिस्वीकरणादुदात्तःसारथिर्मतइतिवचनात् वायुरेवोदात्तोयेषांतेतथा पृथरपदत्वंछांदसं हृषीकाण्येव महांतस्तुरगामहत्तुरगाःमहादशाभावश्छांदसः २० ३४ तैस्तेउच्छ्वसंतिनिःश्वसंती
त्यन्वयः अत्रदृष्टांतः जलधावकृतकर्णधराःअकृतकर्णधरःकर्णधारोयैस्तेतथा वणिजःसांयात्रिकाइवेत्यर्थः यतमानाःकीदृशाःस्वजनसुतात्मदारधनधामधराःस्वजनसुतादिभरणोपेताःआत्मादेहः धामग
हं जितहृषीकइत्येकंवापदंउक्तमेवविवरणं येचदेवकल्पाःपुरुषाःभवच्चरणेषुभवद्विषयेषुकर्मसु सुजातभुवःसुष्ठुजातस्थानाः उत्तमयोग्यतायुक्ताःहृषीकलक्षणवायुसारथियुक्ततुरगैरतिलोलंबुद्धि
चांचल्यंविनानिष्कामत्वेनयतंतितेस्वजनादियुक्ताउच्छ्वसंति उत्कृष्टंश्वसंतिप्राणंतिजीवंतीत्यर्थः श्वसप्राणनइतिधातुः किंकृत्वा गुरोश्चरणमपहायहानंत्यागमपाकृत्य गुरुचरणनिषेवणंकृत्वेत्य
र्थः नास्यकृतःकृतेनेतिश्रुतेरकृतोभगवानेवकर्णधारोयेषांतेतथा दैवानुकूलकर्णधाराइत्यर्थः तेउपायविदःसुयोगज्ञाः किंतुनृणांयानिविहितानिसाधनानिसुखशांतिमतित्वयि सुखस्यापिसुखं

इहभवच्चरणेषुसुजातभुवोजितहृषीकवायुभिरुदात्तमहत्तुरगैः ॥ यइहयतंत्यनतिलोलमुपायविदोव्यसनशताब्धितारमपहायगुरोश्चरणम् २० ३४ व
णिजइवोच्छ्वसंत्यकृतकर्णधरगजलधौस्वजनसुतात्मदारधनधामधराः ॥ सुखशांतिमतित्वयिहिसंतिहिनतानिनृणांविभवउद्यतिश्रयतआत्मनिसर्वरसे
२१ ३५ इतिसदजानतांमिथुनतोरतयेचरतांसुखयतिकोन्विहाद्यविजनेस्वनिरस्तभगे ॥ भुविपुण्यतीर्थसदनाद्यृषयोनिविशंत्यतस्त्वानुभवतःपदांबुजं
हृदाघभिदंदधति ॥ सकृन्मनत्स्वयिचिदात्मनिनित्यसुखेनपुनरुपासतेपुरुषसारहरावसथम् २२ ३६ शंदुःखमिश्ररहितसुखमित्यर्थः तस्यांतिमतिपूर्तिमतिपूर्णसु

खेइत्यर्थः यस्मिंस्त्वयिनसंतिहि गुर्वभावात्तस्माद्भिवेविगतसंसारेदेहाभिमानरहितेजीवन्मुक्तेगुरावुद्यति उपदिशतिसाधनजातमुपदिशतिसति सर्वरसेसर्वस्मात्सारभूते आत्मनिपरमात्मनि श्रयतए
व तत्साधनसर्वस्वंतत्प्रीतिजनकत्वेनश्रीहरिंविषयीकरोतीत्यर्थः षण्णवत्यंगुलोयस्तुतालास्योदशतालकः दशप्रादेशकःसप्तपदोहस्तचतुष्टयः कलमत्रयांगुलश्चैववाग्मीसंदेहवर्जितः वासुदेवैकशरणो
गुरुरित्युच्यतेबुधैः गुरुलक्षणसंपूर्णःसाक्षाद्येकश्चतुर्मखः ततःशेषेंद्रवह्न्याद्याःक्रमादेवप्रकीर्तिताः इत्यादिवाक्यमत्रप्रमाणं देवायोग्यतयाजातविष्णुपादांबुजाश्रयाः तथापिसाधनैस्तेषांतत्प्राप्तिर्गुर्वनुग्रहा
दितिच २१ ३५ ब्रह्माज्ञात्वेतिलोकप्रवृत्तिप्रवर्त्ततांकोमुमोक्षंददाति अतोब्रह्मोपासतेसाधुधीरानाहंभावस्तेपुरुद्राधिवासइतिश्रुतेः महाभाग्यंतुकैवल्यमज्ञानांकःप्रदास्यति अतःसंतोविजानांतिहारितेत्वन
हंकृताइतिस्मृत्यर्थसंग्राहिण्याअर्थरूपस्य इतिसदजानतामित्यस्यश्लोकस्यायमर्थः इतिशब्दःप्रकारवचनः इतिलोकेदृश्यमानप्रकारेणसद्ब्रह्मअजानतांब्रह्माज्ञानिनांमिथुनतःस्त्रीपुंसभावेनरतयेग्राम्य
धर्मायचरतांप्रवर्त्तमानानांकोमुपुरुषः अद्यइहविजनेमोक्षविषये सुखयति नकोपिमोक्षंददातीत्यर्थः कीदृशेविजने स्वनिरस्तभगेसुष्ठुअनिरस्तोभगऐश्वर्यादिगुणोयस्मिन्सतथातस्मिन्यतस्त्वदज्ञानिनांप
रमानंदलक्षणमोक्षभावः अतःभुविस्थाने पुण्यंशुद्धिकरंतीर्थंशास्त्रमेवसदनंशरणंयेषांतेतथा तेऋषयोदेवादयः त्वामेवसंतंज्ञात्वाभवतःपदांबुजंहृदानिविशंति कीदृशंअघभिदंपापनाशनं किंचमनो
मननसमर्थमंतःकरणं नित्यसुखेविदात्मनित्वयिदधतिच अत्रप्रधानसाधनमाहुः हेपुरुषसारपुरुषोत्तमपुनश्चपश्चात् हरस्यरुद्रस्यावसथंअहंकारं सकृदपिनोपासतेनकुर्वतीत्यर्थः २२ ३६

यज्जीवमीशंप्रवदंतितर्कैस्तच्चेश्वरोवचनंसंदधाति नासीदादौमरणेनोभविष्यन्मृषाततोहीशितृत्वंस्वपेष्वितिश्रुत्यर्थद्योतकस्यस्मृत्यनुगृहीतस्यइदमप्यथोवदंतिचेदित्यादिश्लोकस्येदंतात्पर्यं इदंजगत् नपातीत्यपः१पापालनेइतिधातुःसोस्यास्तीत्यपिअनीश्वरमित्यर्थः अपिगर्हितमसत्यंअतएवाप्रतिष्ठमितिवा असत्यमप्रतिष्ठंतेजगदाहुरनीश्वरमित्यादेः नमत्तोन्यईश्वरश्चेतनत्वादित्यादितर्कैर्वदंतिचेदथो तस्मात्कुतः सर्वात्मनाएतदपिवचनंभगवत्प्रेरणयेत्यवगंतव्यं तर्हितर्कःप्रामाणिकःस्यादितित्राह नन्विति तर्काव्यभिचरंतिनन्वित्यन्वयःअत्रव्यभिचारित्वंपक्षधर्मत्वादिलक्षणाभावः तथाहि विशि ष्टपक्षीकारस्यसिद्धांतविरुद्धत्वादनुपपत्तिः निर्विशेषेश्वरपक्षीकारेहेतोरसिद्धिरित्यादिदूषणमुपेक्ष्याचार्यैःकालात्ययापदिष्टत्वंप्रदर्शि वेदोक्तोजीवव्यतिरिक्तेश्वरोनतर्कैरपनेतुंशक्यः यतस्तर्काव्यभि चारिणइति अनश्नन्नन्योभिचाकशीतिश्रुतेः जीवेश्वरौविरुद्धधर्माक्रांतत्वेनभिन्नौ छायातपवदित्यादेश्च दूषणांतरमाह क्वचिदिति अभेदस्यासिद्धावसिद्धौचतर्कस्यविशेषानापादकत्वेनाप्रयो जकत्वात् अपिपासोःपयःपानवत् भोजनस्येष्टसाधनत्वतर्कोज्वरितादौव्यभिचार्यत्वेनव्यर्थश्च सर्वशरीरसमवेतसुखदुःखानुसंधातृत्वेनकायपरिमाणोजीवइतिक्षपणकदर्शनपरिकल्पितस्तर्कोपिमृषैव अणुशरीरस्थस्यकर्मादिवशाद्धस्त्यादिशरीरप्राप्तौविकारित्वापत्तेः ननुतर्हितर्कैम्यःकिंप्रयोजनमत्राह ततइति यतोदुष्टास्ततोभयदृग्व्यवहितयेभयबुद्धीनांबुद्धिव्यवधानायतर्काभवंतिनतुधीराणां विदुषां ननुकिमितिप्रवृत्ताइतित्राह विकल्पइति विर्निषेधेपृथग्भावइतिवचनात् विकल्पोवेदविरुद्धकल्पना जगतोमिथ्यात्वं जीवस्यब्रह्मणोऽभेदोजगत् क्षणिकंषड्गुणईश्वरइत्यादिलक्षणांधपरंपर यैवान्वहमुषितः प्रवर्तितः अंधेनैवनीयमानायथांधाइतिश्रुतिः अंधपरंपरायाश्चकोवलंबइतित्राह भ्रमतीति भारतीवेदवाणीचभ्रमतिबहुधावक्ति तात्पर्यार्थावबोधाकुशलानज्ञानुद्दिश्येतिशेषः इ

इदमप्यथोवदंतिचेन्ननुतर्काव्यभिचरंतिक्वचित्क्वचिन्मृषाच ॥ ततोभयदृग्व्यवहितयेविकल्पउषितोन्वहमंधपरंपरयाभ्रमतिभारतीचतवोरुवृत्तिभिरूढज वा२३ ३७ नयदिदमग्रआसनभविष्यदतोनिधनादनिमित्तकमंतरात्वयिविभातिमृषैकरसे ॥ अतउपगीयतेद्रवि णजातिविकल्पपथैर्वितथमनोविलास मिदमित्यवयंतिबुधाः २४ ३८

तियस्मात्तस्मादंधपरंपरा बहूक्तिरन्यथाज्ञप्तिःपरिवृत्तिश्चकथ्यते भ्रामइत्येवविद्वाद्विस्तथाचंक्रमणंक्वचित् इत्यतोभ्रमश्चबहूक्तित्वंसिद्धं वेदस्यबहुधोक्तेःकिंकारणमत्राह त्तवोर्विति उरुशब्देनानंतत्वंवृ त्तिशब्देनगुणकर्माणिविवक्ष्यंते भवतोगुणकर्मणामनंतत्वात्तानिवक्तुमूढजवात्वरावतीवेदवाणी अतोवेदेपिबहुधावचनात्तदर्थनिर्णयशक्त्यभावात्योग्यतावशाद्विपरीतप्रतीतेश्चविरुद्धकल्पनायुक्ताअं धपरयाऽसुराणाम् २३ ३७ जीवस्येश्वरत्वेबाधकमाह नेति इदमीश्वरत्वमग्रेउत्पत्तेःपूर्वजीवेषुगर्भस्थेषुनासनास्ति नभविष्यत् यदिगर्भस्थईशोभवेत्तर्हिउत्तरत्रापिअभविष्यत् नचतथेति यस्मा दतोनिधनान्मरणादनंतरमपिनरकादिगमनात्रविद्यतइत्यर्थः ननुअस्येशोहमितिकिंनिमित्ताप्रतीतिरत्राह अनिमित्तकमिति अःविष्णुर्निमित्तंयस्यतत् अनिमित्तकंभगवन्निमित्तकमेव तस्यज न्ममरणयोरंतरामध्यत्वयिजीवेमृषैवेशितृत्वंभाति नतुवस्तुतः त्वंजविः कुतः एकरसेप्रधानसोरेनचवस्तुतः जीवःसर्वोत्तमसारः मृषैवतथामन्यते अतोभ्रांतिरेवतथाज्ञानेप्रयोजकेत्याह अतइति यतोजीवःसर्वसारोनभूयादतोद्रविणजातिविकल्पपथैर्जीवउपगीयतइत्यन्वयः भ्रांत्याजीवोद्रविणकान् अभिजातिमानित्यादिसाक्षिविरुद्धकल्पनामार्गैःकथ्यतेअज्ञैरितिशेषः विद्वद्भिस्तुभवानेवद्रविण दिमानित्युच्यते कुतः यतस्तपोदमाद्याअभिजन्मकारणभूताःगुणाश्चभवतएव कथमेतदितित्राह वितथेति यतोभिजात्यादिगुणास्तवमुख्याःअतइदंजीवस्येश्वरत्वंबुधास्तत्त्वज्ञानिनोवितथमनोविला संमिथ्यामनोविकारमित्यवयंतिजानंति गुणाएवाभिजात्याख्यास्तद्वानेवाभिजातिमान् अतोभिजात्यवान्विष्णुस्तदन्येतूपचारइतिववनात् येजगत्प्रवदंत्यज्ञाजीवादन्येशवार्जैतम् तेषामपितुतांवाच मीशएवददात्यजः नचतर्कैर्भवेदीशोजीवोवेदविरोधतः इत्यादिस्मृत्यर्थत्वेनश्रुत्यंतरमप्यूह्यम् २४ ३८

१ स्वपंतीतिस्वपाःजीवास्तेष्वित्यर्थइतिदीपिका ।

स्मरन्ब्रह्मगुणान्नित्यमुक्तोब्रह्मस्वरूपताम् दुर्भगाप्रकृतित्यक्त्वाहत्वाचान्यादुरत्ययाम् पातितत्वरशानात्साऽपूज्यापूजकः तस्यकस्यत्वतत्वात्तयागपुणापुरुष पुरुष स्यायमर्थः अनुशब्दोविकल्पार्थः श्रुतिष्वनुगीतगुणान् चशब्दात्तवकर्माणिचजुषन् तदनुगुणस्मरणमनु उदगात्संसारादितिशेषःअस्मात्संसारान्मुक्तोभवतीत्यर्थः तवस्वरूपतांचभज ति कश्चित्सायुज्यंकश्चित्सारूप्यंकश्चित्सालोक्यंच यद्वागुणस्मरणमनुगुणाननुकूलान्पतरादिकालविशेषान्जुषन् यच्चापुमान् परेणत्वयात्तभगाम् अपहतयत्नलक्षणशक्तिंप्रातिस्विकींपूर्वोक्तां द्विविधांनीचांतांप्रकृतिंजहातित्यजति जिहातिहंतिच तदुभयमपित्वमेवजहास्युताजिहासिच उतत्यागवधयोःसमुच्चयोर्थः जिहातिरावणंसख्येराघवःपरमास्त्रविदितिच स्वातंत्र्यात्प्रकृतित्यागकर्ता नारायणःपरः यद्यप्येषाजीवसंस्थाहंताचभगवान्प्रभुरितिच किंच महसिअसुरजनमोहनायशिवादीन्पूजयसि महीयसेचसुरजनेनपूज्यसेच अणिमाद्यष्टगुणःव्याप्तगुणोवा अशून्याप्तावितिधातुः अपरिमेयभगः दुर्ज्ञेयपरमैश्वर्यादिगुणः २५ ३९ यदिनसमुच्चरंतीत्यस्यायमर्थः यदियतयोपिहृदिकामजडात्जडशरीराविष्टकामात् नसमुच्चरंतिसम्यङ्नोद्गच्छंति नोत्थिताभवंतिविष यकामाःस्युरित्यर्थः तर्हिहृदिगतोपितेषामसतामप्रशस्तकर्मणांपुंसांदुरधिगमोदुर्ज्ञेयःअस्मृतकंठमणिरितिलुप्तोपमाविस्मृतकंठमणिःपुरुषोयथाकंठस्थितंमणिंनजानातितथेत्यर्थः अनेनसयथाका मोभवति तत्क्रतुर्भवतितत्कर्मकुरुतेतदाभिसंपद्यतइतितुकामयमानइत्येतद्विवृतंहेभगवन् अनुतृप्तयोगिनांअनुतृप्तानांविषयालंबुद्धिप्राप्तानांनिष्कामानामित्यर्थःनिवृत्तिमार्गस्थानांपुंसांभवतोधीनादन धिरूढपदात्अनारूढवैकुंठादिब्रह्मस्थानादज्ञानामनवगतादज्ञातादंतकात्कालादिलक्षणादभयोऽभयप्रदःपूर्णानंदादिलक्षणांमुक्तिंददातीत्यर्थः इंद्रियाभिमानिदेवानांवियोगाभावलक्षणांच अमुनाच

उदगात्पुमाननुगीतगुणांश्चजुषन्भजतिसरूपतांतदनुत्वमुतजहासिजिहासिताम् ॥ अहिरिवत्वचंपरमात्तभगांमहसिमहीयसेष्टगुणोऽपरिमेयभगः २५ ३९ यदिनसमुच्चरंतियतयोपिहृदिकामजडाद्दुरधिगमोऽसतांहृदिगतोऽस्मृतकंठमणिः ॥ अनुतृप्तयोगिनामभयोभगवन्ननवगतांतकादनधिरूढपदाद्भ वतः २६ ४० तदवगमार्थंसितासितयोर्गुणविगुणयोर्नहिदेहभृतांसगिरः ॥ अनुययुरन्नहंसकुलगीतपरंपरयानतुषावरणाइवरजांसिवांति ॥ वयसास हयच्छ्रुतयस्त्वयिसफलंपतंतिनपतंतिबंधनाः २७ ४१

यथा कामयमानोयोकामोनिष्कामआप्तकामआत्मकामोनतस्यप्राणाउत्क्रामंते ब्रह्मैवसन्ब्रह्माप्येतीतिश्रुतिव्याख्यानम् अस्याःश्रुतेःविशेषार्थः निषिद्धकामयुक्तानामसतांतुविशेषतःदुर्ज्ञेयोभगवान्वि ष्णुर्हृदिस्थोऽस्मृतहारवत्इत्यादिवाक्यादेवअवगंतव्यः देवाश्चऋषयश्चैवसुभक्त्याकामिनोपितु इत्यादिनाकामित्वेयतित्वमप्रयोजकमित्युक्तम् २६ ४० सकलश्रुतिस्मृतिभावसंग्रहात्मनस्तदवग मार्थंसितासितयोरित्यस्यार्थंभावः देहभृतांजीवानांसगिरःगिरावाचासाहिताःश्रोत्रादयः गुणविगुणयोस्तदवगमायासितासितयोर्नानुययुर्ज्ञेत्यन्वयः द्वितीयार्थेषष्ठी गुणरूपाश्रीःविगुणोनिर्गुणोविष्णु स्तौपूर्वंप्रस्तुतोविष्णुस्तच्छब्देनपरामृश्यते तस्यहरेरवगमोयस्याःसातदवगमातयाश्रियार्थ्यतेज्ञायतेसम्यगित्यर्थःपरमस्तेनसिताबद्धासर्वदातदधीनत्वेनवर्ततेइतिश्रीःअसितोऽबद्धोनित्यमुक्तोविष्णु स्तौश्रीश्रीधरौनानुययुःआनुकूल्येनयथास्थितरूपगुणविषयत्वेननप्रापुःतद्विषयीकरणोपायमाह अत्रेति अत्रजीवराशौ हंसकुलगीतपरंपरयेति हंसानांब्राह्मणानांकुलेनगीतस्यउपदिष्टस्यज्ञानस्यप रंपरयाइंद्रियाण्यनुययुश्चश्रुतयश्चानुययुरित्युपसंख्यानंकर्तव्यम् अत्रजांसीति रजःशब्दोपादानाद्रजोगुणप्रधानामनुष्याउपलक्ष्यंते तुषाआवरणंकत्वचंयेषांतेतुषावरणाःतुषावरणास्तंडुलपदार्थाःरजां सीवयथाधूलीर्नवांतिनस्पृशंतीत्यर्थः तथाचश्रुतयः वयसामहताकालेनसहरजोरूपान्मनुष्यान्नवांतिप्राप्तफलान्नकुर्वंतीतियदतोबध्नंतीतिबंधनाःविधिनिषेधरूपेणपुरुषंबध्नंत्यः श्रुतयः सात्विकानामर्थत्व यिसफलंपतंतीति त्वद्गुणगणान्प्रकाश्यत्वदुपासकानाम् पुरुषार्थहेतवोभवंतिराजसानांतुद्विष्यामोहकत्वेनत्वयिनपतंतिपुरुषार्थःहेतवोनस्युरित्यर्थः अनेन जानातिप्रकृतिर्विष्णुंज्ञेयोविष्णुश्चनिर्गुणः

तावुभौनविजानंतिक्रतेब्रह्मपरंपरामितिमहोपनिषद्विवृता अन्येसर्वेश्रियावद्धाःश्रीर्बद्धाविष्णुनैवतु बंधश्चविष्णुतंत्रत्वंमुक्तानांचश्रियस्तथेत्यादिगारुडपुराणार्थोपिसंगृहीतः २७ ४१ इतिशब्दआदिवचनः एवमादिश्रुत्यागीतमात्मानुशासनं ब्रह्मज्ञानमाश्रुत्यश्रुत्वा हृदिकृत्वा आत्मनःपरमात्मनोगतिंस्वरूपस्थितिंज्ञात्वा ४२ व्योमायनमहात्मभिः ब्रह्माश्रयेषूत्तमैः तैःपूर्वजैःसनकादिभिः अशेषाणांसमीचीनानांआम्नायानांपुराणानामुपनिषदांचरसः सारइतिसमुद्धृतः ४३ ब्रह्मदायादब्रह्मपुत्रनारद काम्यानांनिधनंनाशकरं यद्वा कामानामभीष्टानांफलानांनिधनकुलंगृहंवा निधनोस्त्रीकुलेनाशेनि स्त्रिशेकूरखड्योरितियादवः ४४ पूर्णःस्वतस्तृप्तः ४५ सर्वभूतानांधाताधृतिपोषणयोःकर्ता यःसर्वभूतानामितिप्रस्तुतास्तेजीवाः यस्यतवकलाःप्रतिबिंबांशाः ४६ ऋषिरूपत्वाद्दृषिः ४७ अत्रनारदेनव्यासायकथाकथनंस्तुत्यर्थंनतुज्ञापनाय कथाःकथयतीशस्यव्यासस्यांतेसनारदः स्तुत्यर्थंतस्यदेवस्यज्ञापनायनतुक्वचिदित्यादि ४८ त्वयायःप्रश्नःकृतः तत्प्रश्नवचनमुद्दिश्यैतत्परिहारव

श्रीभगवानुवाच ॥ इत्येतद्ब्रह्मणःपुत्राजाश्रुत्यात्मानुशासनम् ॥ सनंदनमथानर्चुःसिद्धाज्ञात्वात्मनोगतिम् ४२ इत्यशेषसमाम्नायपुराणोपनिषद्रसः ॥ समुद्धृतःपूर्वजैस्तैर्व्योमायनमहात्मभिः ४३ त्वंचैतद्ब्रह्मदायादश्रद्धयात्मानुशासनम् ॥ धारयन्भजमेकांमकामानांनिधनंनृणाम् ४४ एवंसगुरुणादिष्टो गृहीत्वाश्रद्धयात्मवान् ॥ पूर्णःसद्यस्ततोराजन्प्राहवीरव्रतोगुरुम् ४५ नारदउवाच ॥ नमस्तस्मैभगवतेकृष्णयामलमूर्तये ॥ योधातासर्वभूतानामभयोयस्यतेकलाः ४६ इत्याद्यमृषिमामंत्र्यतच्छिष्यांश्चामलात्मकान् ॥ ततोऽगादाश्रमंसाक्षात्पितुर्द्वैपायनस्यमे ४७ समाजितोभगवताकृतासनपरिग्रहः ॥ तस्मैतद्वर्णयामासनारायणमुखाच्छ्रुतम् ४८ तदेतद्वर्णितंराजन्यश्चप्रश्नःकृतस्त्वया ॥ येनब्रह्मण्यनिर्देश्येनिर्गुणेपिमनश्चरेत् ४९ योह्यात्माजगदादिमध्यनिधनोयोव्यक्तजीवेश्वरोयःसृष्ट्वेदमनुप्राविष्टऋषिणाचक्रेपुनःसंहिताम् ॥ यंसंपद्यजहात्यजामनुशयीसुप्तःकुलायंतथातंकैवल्यनिरस्तयोनिमभयंध्यायेदजस्रंहरिम् ५० ॥ इतिश्रीभागवतेमहपुराणेदशमस्कंधेउत्तरार्धेश्रुतिगीतेचतुर्नवतितमोऽध्यायः ॥ ९४ ॥ राजोवाच ॥ सभाजयित्वाबहुधाश्रुतदेवंश्रियःपतिः ॥ आगतोद्वारकांभूयःकिंचकारमहामुने १ ॥ श्रीशुकउवाच ॥ उपप्लाव्यंगतान्पार्थान्गोग्रहेजितकौरवान् ॥ शुश्रावतीर्णसमयान्बलेनमहतावृतान् २ संप्रहृष्टमनाःकृष्णोमहत्यासेनयावृतः ॥ सात्यकिंकृतवर्माणमुद्धवंशठसारणौ ३ अभिमन्युंचसौभद्रंपुरस्कृत्यमहामतिः ॥ अक्षौहिण्यापृतनयासहितःसत्यसंगरः ४ शंखदुंदुभिनिर्घोषैर्द्रष्टुंप्रायाद्युधिष्ठिरम् ॥ संधिमिच्छन्कौरवाणांकुर्वाणंदौत्यमच्युतम् ५ मूढोग्रहीतुमारेभे विनाशिष्णुःसुयोधनः ॥ सतत्रानंतरूपत्वंदर्शयित्वामहाभुजः ६

चनंवर्णितं येनवर्णितप्रकारेणानिर्देश्येनिर्गुणेब्रह्मणिमनश्चरेत् तथेति ४९ उपासनार्थंस्वलक्षणंलक्षयति योहीति आत्माजगदादिमध्यनिधनानिउत्पत्तिस्थितिसंहाराःयस्मात्सतथायश्चाव्यक्तजीवयोःप्रकृतिचेतनयोरीश्वरः यश्चेदंसृष्ट्वा ऽनुप्राविष्टःयश्चऋषिणाऋषिरूपेणपुराणंसंहितांचक्रे अनुशयीजीवः यंपुनःसंपद्यप्राप्यअजांबंधकशक्तिंजहाति सुप्तःकुलायंशरीरादावभिमानंचयथात्यजतितंकैवल्यनिरस्तयोनिंसमाधिकाभावेनानिराकृतकारणंतंहरिंअजस्रंनिरंतरंध्यायेदित्यन्वयः ५० ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउ० विजयध्वजकृतपदरत्नावल्यांचतुर्नवतितमोऽध्यायः ९४ पांडवकौरवयुद्धकथनव्याजेनश्रीकृष्णमाहात्म्यंप्रदर्श्ययत्यस्मिन्नध्याये तत्रराजाष्टच्छति सभाजायत्वेति १ गोग्रहेगोग्रहणे तीर्णवत्सवासाज्ञातवासलक्षणसमयान् २ ३ सत्यसंगरःसत्यप्रतिज्ञःसत्यधृतिर्वा ४ ५ ६

कृत्वाबिभीषिकांघोरांपांडवान्पुनराययौ ॥ वित्रद्धमत्सराःसर्वेराजानोजातमन्यवः ७ युद्धायैवानुयुज्यंतेनसंधिमनुकांक्षिणः ॥ युधिष्ठिरस्तुधर्मात्मापुर
स्कृत्यजनार्दनम् ८ कुरुक्षेत्रंययौराजन्युद्धायभ्रातृभिःसह ॥ अक्षौहिण्याविराटोपिमत्स्यराजोमहामनाः ९ युधिष्ठिरमनुप्रायात्सपुत्रःकुरुसत्तमः ॥
द्रुपदश्चशिखंडीचधृष्टद्युम्नश्चदुर्जयः १० अक्षौहिणीभिस्तिसृभिरनुजग्मुर्युधिष्ठिरम् ॥ अक्षौहिण्यापरिवृतःसात्यकिर्युद्धलालसः ११ नियोगाद्वासुदेवस्य
प्रायादनुयुधिष्ठिरम् ॥ अक्षौहिण्यापरिवृताःकैकेयाःपंचभूभृतः १२ अनुजग्मुर्धर्मपुत्रंराजानंमातृसोदराः ॥ धृष्टकेतुस्तदाराजाशैब्यश्चनरपुंगवः १३
अन्वयातांनृपश्रेष्ठावक्षौहिण्यायुधिष्ठिरम् ॥ तेगत्वापांडवाःसर्वेनारायणपुरोगमाः १४ स्वैरमूषुःकुरुक्षेत्रेप्रतीक्षंतःसुयोधनम् ॥ सुयोधनो
षिकैरव्यमानीभ्रातृशतैर्वृतः १५ द्रोणभीष्मकृपद्रौणिकर्णबाह्लीकसौबलैः ॥ हार्दीकसाल्वमद्रेशभगदत्तजयद्रथैः १६ अन्यैश्चराजशार्दूलैर्ना
नादेशसमुद्भवैः ॥ शंखदुंदुभिनिर्घोषैर्भेरीपटहनिःस्वनैः १७ पूरयन्ककुभोवीरःप्रययौकंपयन्महीम् ॥ तेसमेत्यकुरुक्षेत्रेराजानःकुरुपांडवाः १८ स्य
मंतपंचकेचक्रुर्व्यूहमुद्यतिभास्करे ॥ अक्षौहिण्यःकौरवाणामेकादशदुरात्मनाम् १९ सप्तपांडुसुतानांचकर्शितानांवनेभृशम् ॥ तथाव्यूहेष्वनीकेषुता
वकेष्वितरेषुच २९ गांडीवधन्वीकवचीबद्धतूणतलत्रवान् ॥ आरूढस्यंदनःपार्थोददर्शरिपुवाहिनीम् २१ उपाध्यायान्पितॄन्भ्रातॄन्मातुलान्स्वस्रिया
न्सुतान् ॥ शिष्यान्सपौत्रान्दौहित्रान्शालान्संबंधिबांधवान् ॥ दृष्ट्वानिर्वेदमापन्नोहंतुंनैवाकरोन्मनः २२ तंविषण्णमनश्चित्तंकृपालुमविघातिनम् ॥ प्रबो
ध्यप्रेरयामासकेशवोयोगमायया २३ त्यक्तशस्त्रायशांतायबंधून्प्रतिकृपालवे ॥ दर्शयामासपार्थायविश्वरूपंजनार्दनः २४ संबोधितःकंसभिदातथा
वासवनंदनः ॥ भूयोजग्राहकोदंडंयुद्धायाच्युतसारथिः २५ प्रारब्धंभारतंयुद्धंश्रुत्वासंकर्षणोबली ॥ अशक्नुवन्वारयितुंकिकरोमीत्यचिंतयत् २६
प्रवृत्तंभारतंयुद्धमवेक्ष्योद्वेगविह्वलः ॥ तीर्थव्याजेनतत्याजरामःपरिचितांभुवम् २७ सेनापतिःपांडवानांधृष्टद्युम्नोमहारथः ॥ गांगेयोधार्तराष्ट्राणांवृद्धः
कुरुपितामहः ॥ सकुर्वन्नाहवंघोरंनिहतोदशमेहनि २८ भारद्वाजंततोद्रोणंसेनापत्येसुयोधनः ॥ न्ययोजयत्सयुयुधेदिवसान्पंचभूपते २९ तस्मिन्युध्य
तिदुर्धर्षेसैंधवेनदुरात्मना ॥ अभिमन्युस्तवपितानिहतोरणमूर्धनि ३० पुत्रशोकाभिसंतप्तःप्रतिजज्ञेधनंजयः ॥ जयद्रथंहनिष्यामिश्वोभूतइतिभारत
३१ तस्यांनिशायांगोविंदस्त्वारुह्यगरुडंहरिः ॥ सुप्तमर्जुनमादायकैलासमभिजग्मिवान् ३२ तत्रगत्वाविरूपाक्षंदृष्ट्वासंभाष्यवांछितम् ॥ साधयित्वा
र्जुनस्याशुस्वायोधनमुपाययौ ३३ ततोपरदिनेयुद्धमासीद्घोरंजनक्षयः ॥ मम्लुर्महीभुजस्तत्रबहवोबाहुशालिनः ३४

यास्वरूपसामर्थ्येन २३ २४ २५ २६ परिचितांप्रागभ्यस्तां २७ २८ २९ ३० ३१ ३२ विरूपाक्षंरुद्रं ३३ जनक्षयश्चासीत् ३४

३५ ३६ ३७ ३८ ३९ अर्धदिनोनैःअष्टादशादिनैःअर्धदिनसहितैःसप्तदशदिनैः ४० ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटीकायांपंचनवतितमोऽध्यायः ॥ ९५ ॥ स्मितकेशावेशिनोबलभद्रस्यचरितंकृष्णमाहात्म्यानुस्यूतमेवातस्तदपिपुरुषार्थोपयोगिभवतीत्यनेनाध्यायद्वयेननिरूपयति तत्रादौश्रुतकृष्णवैभवोविस्मितमनाः राजाभगवंतंनमति अष्टादशेति मा ययामहिम्नाव्यापादनंनिधनं विश्वात्मनेसर्वांतर्यामिणे १ हरिकथाश्रवणस्यप्रत्यक्षफलमाह शृण्वतइति वैक्लव्यंपारवश्यंकथाश्रवणतात्पर्यं विस्मयःस्मयभावः भीतिःविहिताकरणेप्रत्यवायबुद्धिः २ प्रबुद्धानिप्रफुल्लानि स्वविषयइतिशेषः ३ आत्माभोगायतनं आनंदनिर्भरःपूर्णानंदः ४ कृतार्थश्चेत्तूष्णींभवेतितत्राह अपिचेति किंचिदित्यव्ययं शब्दतोल्पमर्थतोमहांतमित्यतोवाव्ययः ५ ६ भो

हतेषुरुणदक्षेषुराजपुत्रेष्वनेकशः ॥ जयद्रथोपिपार्थेननिहतोदिवसात्यये ३५ दिनानिपंचद्रोणोपिकृत्वायुद्धमतंद्रितः ॥ पंचमेहनिसंध्यायांधृष्टद्युम्नेनपातितः ३६ ततःसेनापतिःकर्णोभूत्वाचक्रेमहारणम् ॥ दिनद्वयांतेपार्थेनसचसंख्येनिपातितः ३७ शल्योऽप्यर्धदिनंकृत्वासेनापत्यमरिंदम ॥ मध्यंदिनगतेसूर्येधर्मराजेनपातितः ३८ युयुधातेततोवीरौगदयादीर्घवैरिणौ ॥ भीमदुर्योधनौकोपात्परस्परवधैषिणौ ३९ अष्टादशाक्षौहिणीनांतत्पतीनांच भूभृताम् ॥ अष्टादशैर्दिनैरासीदधोनैःसंक्षयोमहान् ४० ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्द्धेपंचनवतितमोऽध्यायः ॥ ९५ ॥ राजोवाच ॥ अष्टादशाक्षौहिणीनांतावद्भिर्माययादिनैः ॥ व्यापादनंयेनकृतंतस्मैविश्वात्मनेनमः १ शृण्वतोमेकथास्तस्यचरितानिचसंघशः ॥ वैक्लव्यंविस्मयोभीतिर्वर्धतेमेपुनःपुनः २ मन्येप्रायेणपाप्मानंजीर्णममद्रुत्ययम् ॥ इंद्रियाणिप्रबुद्धानिप्रसन्नंचमनोभृशम् ३ क्षुत्तृष्णेचप्रशांतेमेआत्माचानंदनिर्भरः ॥ प्रसादात्तवधर्मज्ञकृतार्थोऽहमिहाभवम् ४ अपिचश्रोतुमिच्छामिकिंचिदर्थंतपोधन ॥ युध्यतःसुहृदोदृष्ट्वानिवारितुमशक्नुवन् ५ तीर्थंस्नातुंगतोरामःकिंचकारतपोधन ६ ॥ श्रीशुकउवाच ॥ तीर्थाभिषेकव्याजेनमध्यस्थःप्रययौकिल ॥ स्नात्वाप्रभासंसंतर्प्यदेवर्षिपितृमानवान् ७ सरस्वतींप्रतिस्रोतंययौब्राह्मणसंवृतः ॥ पृथूदकंबिंदुसरस्त्रितकूपंसुदर्शनम् ८ विशालंब्रह्मतीर्थंचचक्रंप्राचींसरस्वतीम् ॥ यमुनामनुयात्येषगंगामनुचभारत ९ जगामनैमिषंयत्रऋषयःसत्रमासते ॥ तमागतमभिप्रेत्यमुनयोदीर्घसत्रिणः १० अभिवंद्ययथान्यायंप्रणम्योत्थायचार्चयन् ॥ सोऽर्चितःसपरीवारःकृतासनपरिग्रहः ११ रोमहर्षणमासीनंशिष्यमैक्षन्महामुनेः ॥ प्रत्यवस्थायिनंसूतमकृतप्रह्वणांजलिम् १२ अध्यासीनंचतान्विप्रांश्चुकोपोद्वीक्ष्यमाधवः ॥ कस्मादसाविमान्विप्रानध्यास्तेप्रतिलोमजः १३ धर्मपालांस्तथैवास्मान्वधमर्हतिदुर्मदः ॥ ऋषेर्भगवतोभूत्वाशिष्योऽधीत्यबहूनिच १४ सेतिहासपुराणानिधर्मशास्त्राणिसर्वशः ॥ अदांतस्याविनीतस्यवृथापंडितमानिनः १५

जनादिनामानवसंतर्पणं ७ प्रतिस्रोतंप्रवाहाभिमुखं पृथूदकंनामतीर्थंत्रितस्यमुनेःकूपं ८ विशालमप्येकंतीर्थं ९ आभिप्रेत्याभिगम्य १० ११ प्रत्यवस्थायिनंआभिमुख्येनस्थितं प्रह्वणंनमनं १२ तान्विप्रानध्यासीनतेषांमध्येउच्चासनेस्थितं माधवोमधुकुलोद्भवः प्रतिलोमजःविपरीतजन्मा १३ अस्मानितिद्वितीयार्थेपंचम्यर्थे १४ सेतिहासपुराणान्यधीत्यसुदुष्टस्यप्रतिजन्मनः १५

गुणायपुण्यफलप्रदानलक्षणायनभवंति एतदर्थःदुष्टनिग्रहार्थः १६ असद्धत्रिवृत्तोपि १७ मरणस्यावश्यंभावित्वात् १८ ब्रह्मासनंब्राह्मणमध्येब्राह्मणयोग्यासनम् १९ अस्यान
धनंत्वयाअज्ञानतेव यद्वा जानतावा । ब्राह्मणवधसमानदोषोयमित्याशयेनाह ब्रह्मेति भवतआम्नायोविधिनिषेधशास्त्रनियामकं इदंकुरु नेदमिति नियंतानास्ति कुतइत्यत्राह योगेश्वरस्येति २०
विघ्यगोचरत्वात्ऋषयःस्वहार्दंविज्ञापयंति यदीति , यदिभवान्त्वंब्रह्महत्यापापएतत्पावनंशुद्धिलक्षणंपरिहारंचरिष्यति तर्हिलोकसंग्रहंकरिष्यति कुतोत्राह नेति २१ प्रथमेकल्पेउत्तमकल्पे
यावान्नियमोविधिः सत्वेवविधिर्भवद्विर्विधीयताम् २२ तस्यव्रतंदीर्घमायुःसत्वमिंद्रियंदूरश्रवणदूरदर्शनादिशक्तिमत्साधये किंबहुनायद्यदाशासितंकामितंतत्तत्साधयइत्याह आशासितमिति

नगुणायभवंत्यस्यनटस्येवाजितात्मनः ॥ एतदर्थोहिलोकेस्मिन्नवतारोमयाकृतः १६ वध्यामेधर्मध्वजिनस्तेहिपातकिनोऽधिकाः ॥ एतावदुक्त्वाभगवा
न्निवृत्तोऽसद्धधादपि १७ भावित्वात्तंकुशाग्रेणकरस्थेनाहनत्प्रभुः ॥ हाहेतिवादिनःसर्विऋषयःखिन्नमानसाः १८ ऊचुःसंकर्षणंदेवमधर्मस्तेकृतः
प्रभो ॥ अस्यब्रह्मासनंदत्तमस्माभिर्यदुनंदन १९ आयुश्चास्याक्षयंतावद्यावत्सत्रंसमाप्यते ॥ अजानतेवाचरितंत्वयाब्रह्मवधोयथा ॥ योगेश्वरस्यभव
तोनाम्नायोविनियामकः २० यद्येतद्ब्रह्महत्यायाःपावनंलोकपावन ॥ चरिष्यतिभवान्लोकसंग्रहंनान्यचोदितः ॥ २१ ॥ बलभद्रउवाच ॥ चरिष्येवध
निर्वैशंलोकानुग्रहकाम्यया ॥ नियमःप्रथमेकल्पेयावान्सतुविधीयताम् २२ दीर्घमायुर्व्रतंतस्यसत्वमिंद्रियमेवच ॥ आशासितंयद्यदुतसाधयेयोगमा
यया २३ ऋषयऊचुः ॥ अस्त्रस्यतववीर्यस्यमृत्योरस्माकमेवच ॥ यथाभवेद्वचःसत्यंतथारामविधीयताम् २४ बलभद्रउवाच ॥ आत्मावैपुत्रउत्पन्न
इतिवेदानुशासनम् ॥ तस्मादस्यभवेद्वक्ताआयुरिंद्रियवीर्यवान् २५ किंवःकामोमुनिश्रेष्ठाब्रूताहंकरवाणितत् ॥ अजानतश्चापचितिंयथामेबुध्यतांबुधाः
२६ ऋषयऊचुः ॥ इल्वलस्यसुतोघोरोबल्वलोनामदानवः ॥ सदूषयतिनःसर्वान्सत्रमेत्यचपर्वणि २७ तंपापंजहिदाशार्हतन्नःशुश्रूषणंपरम् ॥ पू
यशोणितविण्मूत्रसुरामांसाभिवर्षिणम् २८ ततश्चमारतंवर्षंपरीत्यसुसमाहितः ॥ चरित्वाद्वादशान्मासांस्तीर्थस्नायीविशुध्यसे ॥ २९ ॥ इतिश्रीभाग
वतेमहापुराणेदशमस्कंधेउत्तरार्धेबलदेवतीर्थयात्रायांषण्णवतितमोऽध्यायः ॥ ९६ ॥ श्रीशुकउवाच ॥ ततःपर्वण्युपावृत्तेप्रचंडःपांसुवर्षणः ॥ भीमो
वायुरभूद्राजन्पूयगंधश्चसर्वशः १ ततोऽमेध्यमयंवर्षंबल्वलेनविनिर्मितम् ॥ अभवद्यज्ञशालायांसोप्यदृश्यतशूलधृक् २ तंविलोक्यबृहत्कायंभिन्नांज
नचयोपमम् ॥ तप्ततास्रशिखाश्मश्रुदंष्ट्रोग्रभ्रुकुटीमुखम् ३ सस्मारमुसलंरामःपरसैन्यविमर्दनम् ॥ हलंचदैत्यदमनंतौतूर्णमुपतस्थतुः ४

२३ अस्त्रवीर्ययोरमोघत्वंमृत्योरनावृत्तित्वमस्मद्वचसश्चासंध्यफलत्वंयथास्यात्तथाविधीयताम् २४ पुराणानांवक्तापुत्रःस्यात् २५ हेबुधाःयुष्माभिर्वरोदत्तइत्यजानतोमेपचितिंऽपरिहारंबुध्य
ताम् २६ प्रायश्चित्तंविधातुमाहुः इल्वलस्येति २७ २८ २९ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांषण्णवतितमोऽध्यायः ॥ ९६ ॥ १ २ तप्ततास्रवत्म
काशमानाभिःशिखाश्मश्रुदंष्ट्रोग्रभ्रुकुटीभिर्युक्तंमुखंयस्यसत्तथातं शिखाचश्मश्रूणिचदंष्ट्रेचउग्रभ्रुकुटीचशिखाश्मश्रुदंष्ट्रोग्रभ्रुकुट्यःउग्राभ्रुकुटीउग्रभ्रुकुटी ३ ४

५ ६ ७ श्रियोधामानिअम्लानानिचपंकजानियस्यांसातथाताम् ८ यतःसरोवरात् आस्रवत् अस्यंदत ९ स्रोतेनप्रवाहेण १० शोणंनदं ११ सप्तशाखाभेदेनसमुद्रंगता सप्तगोदावरीताम् वेणींकृष्णवेणीं १२ १३ १४ १५ १६ १७ १८ अस्पृशत्ददौ स्थानंदूरंअनंतक्षेत्रं १९ धूर्जटेःशिवस्य २० २१ अनुतीर्थंनामतीर्थं २२

तमाकृष्यहलाग्रेणबल्वलंगगनेचरम् ॥ मुसलेनाहनत्कुद्धोमूर्ध्निब्रह्मद्विषंबलः ५ सोपतद्बलनिर्भिन्ननललाटोसृक्समुत्सृजन् ॥ मुंचन्नार्तस्वरंशैलोयथाव ज्रहतोऽसुरः ६ संस्तुत्यमुनयोरामंप्रयुज्यापितथाशिषः ॥ अभ्यषिंचन्महार्हाभिर्द्वित्रघ्नंविबुधायथा ७ वैजयंतींददुर्मालांश्रीधामाम्लानपंक जाम् ॥ रामायवाससीदिव्येदिव्यान्याभरणानिच ८ अथतैरभ्यनुज्ञातःकौशिकीमेत्यब्राह्मणैः ॥ स्नात्वासरोवरमगाद्यतःसरयुरास्रवत् ९ स्रोतेनसरयूं प्रायात्प्रयागमुपगम्यसः ॥ स्नात्वासंतर्प्यदेवादीन्जगामपुलहाश्रमम् १० गोमतींगंडकींस्नात्वाविपाशांशोणमाद्भुतः ॥ गयांगत्वापितॄनिष्ट्वागंगासाग रसंगमम् ११ उपस्पृश्यमहेंद्राद्रौरामंदृष्ट्वाभिवाद्यतम् ॥ सप्तगोदावरींवेणींपंपांभीमरथींतथा १२ स्कंदंदृष्ट्वाययौरामःश्रीशैलंगिरिशालयम् ॥ द्रुमिलेषु महारण्यंदृष्ट्वाद्रिंवेंकटंप्रभुः १३ कामकोष्टींपुरींकांचींकावेरींचसरिद्वराम् ॥ श्रीरंगाख्यंमहापुण्ययत्रसन्निहितोहरिः १४ ऋषभाद्रिंहरेःक्षेत्रंदक्षिणामथुरां तथा ॥ समुद्रसेतुमगमन्महापातकनाशनम् १५ तत्रायुतमदाद्धेनूर्ब्राह्मणेभ्योहालायुधः ॥ कृतमालांताम्रपर्णींमलयंचकुलाचलम् १६ तथागस्त्यंसमा सीनंनमस्कृत्याभिवाद्यच ॥ योजितस्तेनचाशीर्भिरनुज्ञातोगतोर्णवम् १७ दक्षिणंतत्रकन्याख्यांदुर्गांदेवींददर्शसः ॥ ततःफल्गुनमासाद्यपंचाप्सरमनु त्तमम् १८ विष्णुःसन्निहितोयत्रस्नात्वाऽस्पर्शद्रवायुतम् ॥ स्थानंदूरंहरेःस्थानंयत्रसन्निहितोहरिः १९ ततोतिव्रज्यभगवान्केरलार्दीस्त्रिगर्तकान् ॥ गोकर्णाख्यंशिवक्षेत्रंसान्निध्यंयत्रधूर्जटेः २० तत्रद्वैपायनंदृष्ट्वाशूर्पाकारमगाद्बलः ॥ तापींपयोष्णींनिर्विंध्यामुपस्पृश्याथदंडकम् २१ प्रविश्यरेवाम गमद्यत्रमाहिष्मतीपुरी ॥ अनुतीर्थमुपस्पृश्यप्रभासंपुनरागमत् २२ श्रुत्वाद्विजैस्तुकथितंकुरुपांडवसंयुगम् ॥ सर्वराजन्यनिधनंभारमेतद्भुवोहृतम् २३ सभीमदुर्योधनयोर्गदाभ्यांयुध्यतोरणम् ॥ वारयिष्यन्विशसनंजगामयदुनंदनः २४ युधिष्ठिरस्तुतंदृष्ट्वायमौकृष्णार्जुनावपि ॥ अभिवाद्याभवंस्तूष्णीं किंविवक्षुरिहागतः २५ गदापाणीउभौदृष्ट्वासंरब्धौविजयैषिणौ ॥ मंडलानिविचित्राणिचरंताविदमब्रवीत् २६ युवांतुल्यबलौवीरौहेराजन्हेवृकोदर एकंप्राणाधिकंमन्यउतैकंशिक्षयाधिकम् २७ तस्मादेकतरस्येहयुवयोःसमवीर्ययोः ॥ नलक्ष्यतेजयोन्योवाविरमत्वफलोरणः २८ नतद्वाक्यंजगृहतुर्बद्ध वैरौनृपार्थवत् ॥ अनुस्मरंतावन्योन्यंदुरुक्तंदुष्कृतानिच २९ दिष्टंतदनुमन्वानोरामोद्वारवतींययौ ॥ उग्रसेनादिभिःप्रीतैर्ज्ञातिभिःसमुपागतः ३०

भुवएतत्एतंभारंहृतंश्रुत्वाएतत्एतर्हिभुवोभारंहृतंमेनइतिशेषइतिवा २३ विशसनंयुद्धं २४ किंवक्तुकामआगतइतिमत्वा २५ २६ प्राणाधिकंबलाधिकं २७ अन्यःपरा जयोवा विरमतुशांतोभवतु २८ दुष्कृतानि जतुगृहदाहादीनि २९ तद्युद्धंदिष्टंदैवकृतम् ३०

बलभद्रोरामस्यविक्रमश्रवणादिनाकिंफलमवतीतितत्राह ईदृग्विधानांव २२ शंवतानांगपतनहेतुरसत्तरत्वान्तरत्वान्वय
ब्राह्मणकृपातिशयकथनेनहरिभक्तस्यकेवलंनपारत्रिकमेवफलम अपितुऐहिकमप्यतिविस्मयकरंस्यादितीदृशंमाहात्म्यंवक्ति तत्रप्रथमतोभारतयुद्धंसमाप्यकृष्णस्यहास्तिनपुरप्रयाणप्रकारंप्ररूपयति
भगवानपीति १ शून्यंशवादिनापिहितम् प्रयातुंगंतुम् अष्टादशाक्षौहिणीभ्यःशिष्टानाह कृपश्चेति २ ३ ४ ५ भगवत्सेवामंतरेणराज्यानिच्छूनित्यतोपत्नतइतियुक्त्याप्रतिपाद्येत्यर्थः

ईदृग्विधान्यसंख्यानिबलस्यबलशालिनः ॥ अनंतस्याप्रमेयस्यकर्माण्यद्भुतकर्मणः ॥ शृण्वन्गृणंश्चतद्भक्त्याविष्णोःसदयितोभवेत् ॥ ३१ ॥ इतिश्री भागवतेमहापुराणेदशमस्कंधेउत्तरार्धेबलदेवचरितेसप्तनवतितमोऽध्यायः ॥ ९७ ॥ श्रीशुकउवाच ॥ भगवानपिगोविंदःसाधयित्वास्ववांछितम् ॥ सु योधनेमहाबाहौनिहतेगदयारणे १ विसृज्यायोधनंशून्यंप्रयातुमुपचक्रमे ॥ कृपश्चकृतवर्माचद्रौणिश्चरथिनांवरः २ अवशिष्टामहात्मानःसुयोधनबलेत्र यः ॥ पंचपांडुसुतावीराःसात्यकिश्चमहाबलः ३ वैश्यापुत्रोयुयुत्सुश्चशिष्टाःकृष्णपुरोगमाः ॥ तान्पुरस्कृत्यगोविंदोमुनिवृद्धसमन्वितः ४ जगामहास्ति नपुरंधृतराष्ट्रंप्रसादितुम् ॥ गांधारींधृतराष्ट्रंचविदुरंचमहामतिम् ५प्रसाद्यपांडवान्स्वेस्वेराज्येसंस्थाप्ययत्नतः ॥ स्तूयमानोमुनिगणैःसूतमागधबंदिभिः६ अनुयातःपांडुपुत्रैःप्रेमबाष्पाविलेक्षणैः ॥ताननुज्ञाप्यसोत्कंठान्रथेनादित्यवर्चसा ७ शंखदुंदुभिनिर्घोषैर्वेदमंगलनिस्वनैः ॥ पुण्याहमंत्रघोषैश्चद्वारकांप्रययौ हरिः ८ विचित्रतोरणांरम्यांचलत्कदलिकाकुलाम् ॥ अलंकृतांपौरजनैःसिक्तसंमृष्टभूतलाम् ९ उपस्थितःपौरजनैःपालिकांकुरधारिभिः ॥ योषिद्भिर्वार मुख्याभिर्भूषिताभिश्चभूषणैः १० वहद्भिर्दीपमुकुरकलशस्रक्फलाक्षतान् ॥ उपस्थितोब्राह्मणैश्चपुत्रैःपौत्रैःसहानुजैः ११ प्रविवेशपुरींदिव्यांदिवसेपू जितोहरिः ॥ सप्रविश्यसभांदिव्यांसुधर्मांलोकविश्रुताम् १२ आहुकंवसुदेवंचरामंचैवाभ्यवादयत् ॥ प्रणम्यमातरोविश्वाःकांचनेपरमासने १३ उप विश्ययथाजोषंपूजितोयदुपुंगवैः ॥ रराजरजनीनाथोयथाग्रहगणैर्दिवि ॥ १४ हतावशिष्टैर्भूपालैस्तत्पुत्रैश्चमहाबलैः ॥ अभिषिक्तैर्यथास्थानंसेव्यमा नोदिवानिशम् १५ अवतीर्णमहाभारांविश्वांविश्वंभरोहरिः ॥ धर्मराजंपुरस्कृत्यधर्मेणैवान्वशासत १६ राजोवाच ॥ भगवन्यानिचान्यानिमुकुं दस्यमहात्मनः ॥ वीर्याण्यनंतवीर्यस्यश्रोतुमिच्छामहेप्रभो १७ कोनुश्रुत्वासकृद्ब्रह्मन्नुत्तमश्लोकसत्कथाम् ॥ विरमेतविशेषज्ञोविषण्णःकाम मार्गणैः १८ सावागनंतस्यगुणान्गृणीतेकरौचतत्कर्मकरौमनश्च ॥ स्मरेद्वसंतंस्थिरजंगमेषुशृणोतितत्पुण्यकथाःसकर्णः १९

६ ७ वेदेयेमंगलनिःस्वनाः मंगलवचनानितैः ८ ९ उपस्थितोभिगतःअंकुरपूरितपालिकापात्रविशेषः १० ११ १२ मातरोमातृः १३ यथाजोषंयथासुखम् १४ १५ १६ १७ १८ राजाएतदेवइंद्रियकृत्यमितिवक्ति सावागिति याऽनंतस्यगुणान्गृणीतेसैववाक् पौतत्कर्मकरौतावेवकरौ अनेनकरोतीतिकरइतिकर्तर्यच्प्रत्ययःसफलइतिसूचितं यस्स्थिरजंगमेषुवसंतंहरिं स्मरेत्तदेवमनः मनज्ञानइतिधातोः स्मरणलक्षणंज्ञानं यस्तस्यहरेःकथाःशृणोतिसकर्णः कृणआकर्णनइतिधातुः १९

चराचरभेदेनोभयलिंगंउभयप्रतिमामानमेवचदेवशिरः श्रयतइतिशिरःश्रिञूसेवायामितिधातोर्मनलक्षणसेवायांशिरःइतिनिपात्यते यदुभयलिंगंपश्यतितदेवचक्षुः चष्टेपश्यतीतिचक्षुःचक्षुदर्शनइति धातुःतस्यहरेर्जनानांयानिविष्णोःपादोदकंनित्यंभजंति पानस्नानलक्षणांसेवांकुर्वंति अथमंगलानितानिएवांगानिनान्यानि २० २१ २२ तथाविधाभर्तृवन्मलिनवस्त्रा २३ म्लायताम्लानं गच्छता अशनयावेपमानेत्येकंपदम् अशनयाअशनेच्छयाकंपमाना २४ २५ सीदते अवसन्नायदरिद्राय २६ अर्थकामान्यच्छतीतिकिबुवक्तव्यम् किंचजगद्गुरुःअन्यमुक्तेभ्योन्यमिष्टंनय

शिरस्तुतस्योभयलिंगमानमेत्तदेवयत्पश्यतिताद्विचक्षुः ॥ अंगानिविष्णोरथतज्ज्ञानांपादोदकंयानिभजंतिनित्यम् २० सूतउवाच ॥ विष्णुरातेनसंपृष्टोभगवान्बादरायणिः ॥ वासुदेवेभगवतिनिमग्नहृदयोब्रवीत् २१ श्रीशुकउवाच ॥ कृष्णस्यासीत्सखाकश्चिद्ब्राह्मणोब्रह्मवित्तमः ॥ विरक्तइंद्रियार्थेषुप्रशांतात्माजितेंद्रियः २२ यदृच्छयोपपन्नेनवर्तमानोगृहाश्रमी ॥ तस्यभार्याकुचेलस्यक्षुत्क्षामाचतथाविधा २३ पतिव्रतापतिंप्राहम्लायतावदनेनसा ॥ दरिद्रंसाध्यशनयावेपमानाभिगम्यच २४ ननुब्रह्मन्भगवतःसखासाक्षाच्छ्रियःपतिः ॥ ब्रह्मण्यश्चशरण्यश्चभगवान्सात्वतर्षभः २५ तमुपैहिमहाभागसाधूनांचपरायणम् ॥ दास्यतिद्रविणंभूरिसीदतेतेकुटुंबिने २६ आस्तेऽधुनाद्वारवत्यांभोजवृष्ण्यंधकेश्वरः ॥ स्मरतःपादयुगलमात्मानमपियच्छति २७ किंन्वर्थकामान्भजतोनान्यमिष्टंजगद्गुरुः ॥ सएवंभार्ययाविप्रोबहुशःप्रार्थितोविभुः २८ अयंहिपरमोलाभउत्तमश्लोकदर्शनम् ॥ इतिसंचिंत्यमनसागमनायमनोदधे २९ अथास्त्युपायनंकिंचिद्गृहेकल्याणिदयिताम् ॥ याचित्वाचतुरोमुष्टीन्विप्रात्पृथुकतंदुलान् ३० चैलखंडेनतान्बद्धाभर्त्रेप्रादादुपायनम् ॥ सतानादायविप्राग्र्यःप्रययौद्वारकांकिल ३१ कृष्णसंदर्शनंमह्यंकथंस्यादितिचिंतयन् ॥ त्रीणिगुल्मान्यतीयायतिस्रःकक्ष्याश्चसद्विजः ३२ विप्रोगम्यांधवृष्णीनांगेहेष्वच्युतधर्मिणाम् ॥ गृहाणिद्व्यष्टसाहस्रमहिषीणांहरेर्द्विजः ३३ विवेशैकतमंश्रीमद्ब्रह्मानंदंगतोयथा ॥ तंविलोक्याच्युतोदूरात्प्रियापर्यंकआश्रितः ३४ सहसोत्थायचाभ्येत्यदोर्भ्यांपर्यग्रहीन्मुदा ॥ सख्युःप्रियस्यविप्रर्षेरंगसंगातिनिर्वृतः ३५ प्रीतोव्यमुंचदब्बिंदून्नेत्राभ्यांपुष्करेक्षणः ॥ अथोपवेश्यपर्यंकेस्वयंसख्युःसमर्हणम् ३६ उपहृत्यावनिज्यास्यपादौपादावनेजनीः ॥ अग्रहीच्छिरसाराजन्भगवाँल्लोकपावनः ३७ व्यलिंपद्दिव्यगंधेनचंदनागुरुकुंकुमैः ॥ धूपैःसुरभिभिर्मित्रंप्रदीपावलिभिर्मुदा ३८

च्छतिवैतुभजतःपुरुषस्ययच्छत्येवेत्यर्थः यद्वानापरमपुरुषःअन्यमभीष्टंयच्छतीत्यतःतमुपैहीत्यन्वयः २८ २९ ३० चैलखंडेनजीर्णवस्त्रखंडेन ३१ गुल्मानिशिबिराणिकक्ष्याः पुरप्रकोष्ठानि कक्ष्याकक्ष्येवरत्रायांकांच्यांगेहेप्रकोष्ठकइतियादवः ३२ अंधवृष्णीनांगृहेषुमध्येयानिद्व्यष्टसाहस्रमहिषीणांगृहाणि गम्यगत्वा तेष्वेकतमंगृहंविशेत्यन्वयःद्विजत्वंक्षत्रियस्याप्यस्त्रीतिविप्रइति ३३ आनंदंगतोमुक्तोब्रह्मविशतियथातथा ३४ पर्यग्रहीदाश्लिष्टवान् ३५ ३६ पादावनेजनीरपःपादप्रक्षालनजलानि ३७ ३८

धमनिसंततांशिरासहस्राचितगात्रम् ३९ ४० ४१ संभृतःसमाजितःसंगृहीतोवा ४२ गुरुकुलसतास्वपाकालयूवास्मन्भागाथावृत्तास्ता· कथयांचक्रु· ४३ ४४ [illegible]
थाप्राकृतस्यचित्तंगृहेषुकामविहतंभवतितथाप्रायस्तेचित्तंगृहेषुभार्यादिष्वकामविहतंकामनाविषयेच्छयाविहतंनस्यात् ४५ तद्वत्त्ववचित्तंधनेष्वपिनैवातिप्रीयते कथमेतदत्राह विदितामिति ४६ केचिन्निवृ
त्तिमार्गस्थाःप्रकृतिंदेहाभिमानलक्षणांदैवींदेवाधीनां ४७ तात्पर्यात्पुनरुक्तंकरोति कश्चिदिति यतोयस्मिन्गुरुकुलवासेविज्ञेयंविज्ञायतमसः अज्ञानस्यपारंप्रकृतेर्वावैकुंठमश्नुते ४८ इतोपिगुरुकुलवासःक
र्तव्यइत्याह सवाइति यस्माद्द्विजातेःसाक्षात्सत्कर्मणांसंभवोजन्मसगुरुकुलेवासोवाइत्यन्वयः अत्रहेतुमाह आद्यइति ज्ञानदोगुरुःआश्रमिणांआद्यःहियस्मात्तस्मात्पथाहामिति ४९ ज्ञानमपियन्मुक्तिस

अर्चित्वावेद्यतांवूलंगांचस्वागतमब्रवीत् ॥ कुचैलंमलिनंक्षामंद्विजंधमनिसंततम् ३९ देवीपर्यचरच्छ्रैव्याचामरव्यजनेनवै ॥ अंतःपुरजनोदृष्ट्वाकृष्णे
नामलकीर्तिना ४० विस्मितोभूत्सविप्राय्यमवधूतंसभाजितम् ॥ किमनेनकृतंपुण्यमवधूतेनाभिक्षुणा ४१ श्रियाहीनेनलोकोस्मिन्गर्हितेनाधमेनच ॥
योसौत्रिलोकगुरुणाश्रीनिवासेनसंभृतः ४२ पर्यंकस्थांश्रियंहित्वापरिष्वक्तोग्रजोयथा ॥ कथयांचक्रतुर्गाथांपूर्वंगुरुकुलेसताम् ४३ आत्मनोल्लसितौ
राजन्करौगृह्यपरस्परम् ॥ अपिब्रह्मन्गुरुकुलाद्भवतालब्धदक्षिणात् ४४ समावृत्तेनधर्मज्ञाभार्योढासदृशीनवा ॥ प्रायोगृहेषुतेचित्तमकामविहतंतथा
४५ नैवातिप्रीयतेतद्वद्धनेषुविदितंहिमे ॥ केचित्कुर्वंतिकर्माणिकामैरहतचेतसः ४६ त्यजंतःप्रकृतिंदैवींयथाहंलोकसंग्रहः ४७ कश्चिद्गुरुकुलावासंब्रह्म
न्स्मरसिनौयतः ॥ द्विजोविज्ञायविज्ञेयंतमसःपारमश्नुते ४८ सवैसत्कर्मणांसाक्षाद्द्विजातेरिहसंभवः ॥ आद्योगुरुर्ह्याश्रमिणांयथाहंज्ञानदोगुरुः ४९ ते
त्वर्थकोविदाब्रह्मन्वर्णाश्रमवतामिह ॥ येमयागुरुणावाचातरंत्यंजोभवार्णवम् ५०नाहमिज्याप्रजातिभ्यांतपसोपशमेनवा ॥ तुष्येयंसर्वभूतात्मागुरुशुश्रूष
यायथा ५१अपिनःस्मर्यतांब्रह्मन्वृत्तंनिवसतांगुरौ ॥ गुरुदारैश्चोदितानार्मिधनानयनेक्वचित् ५२प्रविष्टानांमहारण्यमपर्तौसुमहद्द्विज ॥ वातवर्षमभूत्तीव्रंनि
ष्टुराःस्तनयित्नवः ५३सूर्यश्चास्तंगतस्तावत्तमसासंवृतादिशः ॥ निम्नंकूलंजलौघेननप्राज्ञायताकिंचन ५४वयंभृशंतत्रमहानिलांबुभिर्निहन्यमानामुहुरंबुसंप्लु
वे ॥ दिशोऽविंदंतोथपरस्परंवनेगृहीतहस्ताःपरिबभ्रमातुराः ५५ एतद्विदित्वाउदितेरवौसांदीपनिर्गुरुः ॥ अन्वेषमाणोनःशिष्यानार्योऽपश्यन्नरुरुदत् ५६

धनंतद्वदेवगुरुरित्याह तेत्विवि गुरुणागुरुस्थेनमयाप्युक्तयावाचाअंजःशिक्षितायेपुरुषाभवार्णवंतरंति तेत्विहवर्णाश्रमवतांमध्येअर्थकोविदाःस्वप्रयोजनसंपादनपटवइत्यन्वयः ५० सर्वेषुसाधनेष्विद
मेवभगवदनुग्रहांतरंगमित्याह नेति इज्यायजनं यजनंप्रजातिः संततिर्जननं नापुत्रस्यलोकोस्तीतिश्रुतिः ५१ अनुग्रहविशेषस्मरणार्थंउभयोरनुभूतविशेषंस्मारयति अपीतिगुरौनिवसतांनोयत्कर्मत
त्स्मर्यतामपिस्मर्यतेकिं ५२ अपर्तौवर्षाकालमंतरेणवातपुतवर्षं ५३ इदंनिम्नमिदंकूलमिति किंचनस्थूलजलप्रवाहेणनप्रज्ञायतनज्ञातमभूत् ५४ अंबुसंप्लुवेजलप्रवाहेदिशोऽविंदंतःअजानंतःपरिबभ्रमप
रितोभ्रांताबभूविम ५५ विदित्वाउदितइत्यनेनदुःखातिशयंदर्शयति कथमेतदत्राह अरुरुददिति ५६

आत्मादेहः ५९ गुरुनिष्कृतंगुरुप्रत्युपकारः सर्वार्थोयस्मात्सतथासर्वार्थिआत्माशरीरंतस्यार्पणंयत्तत् ५८ ५९ उक्तमतिदिशति इत्थमिति इत्थंविधान्यनेकानिव्यसनान्यासन्नितिशेषः तानिव्यसनान्निगुरोरनुग्रहेणानिस्तीर्य पुमान्प्रशांतयेप्रकृष्टसुखवृत्तयेपूर्णःकृतार्थःस्यात् ६० अस्माभिर्गुरुकुलवासेइदंकृतमितिविशेष्यकिंवक्तव्यंसर्वमप्यनुष्ठितमितिब्राह्मणआह किमिति सत्यकामे नभवतासहयेषांनोगुरुकुलवासोऽभूत्तैरस्माभिःगुरुकुलवासेकिमनिर्वृत्तंनकृतंकिं सर्वमयाचीर्णमेव ६१ किंत्विदमस्माकंयुक्तंतवतुअत्यंतविडंबकमित्याह यस्येति । छंदोमयंवेदमुख्यमतिपाद्यं आवपनंजगदुत्पत्तिक्षेत्रंब्रह्मयस्यतवदेहःस्वरूपंतस्यतवयोयंगुरुषुवासः सोयमत्यंताविडंबनंअनुकारइति ६२ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजयध्वजकृतटीकायांअष्टनवतितमोऽध्यायः ॥९८॥

अहोमेपुत्रकायूयमस्मदर्थेतिदुःखिताः ॥ आत्माहिप्राणिनांप्रेष्ठस्तमनादृत्यमत्पराः ५७ इयदेवहिसाच्छिष्यैःकर्तव्यंगुरुनिष्कृतम् ॥ यद्वैविशुद्धभावेनसर्वार्थात्मार्पणंगुरौ ५७ संतुष्टोहंद्विजश्रेष्ठाःसत्याःसंतुमनोरथाः ॥ छंदांस्ययातयामानिभवंत्विहपरत्रच ५९ इत्थंविधान्यनेकानिवसतांगुरुवेश्मसु ॥ गुरोरनुग्रहेणैवपुमान्पूर्णःप्रशांतये ६० ब्राह्मणउवाच ॥ किमस्माभिरनिर्वृत्तंदेवदेवजगद्गुरो ॥ भवतासत्यकामेनयेषांवासोगुरावभूत् ६१ यस्यछंदोमयंब्रह्मदेहआवपनंविभो ॥ योयंसतस्यगुरुषुवासोऽत्यंतविडंबनम् ६२ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेअष्टनवतितमोऽध्यायः ॥ ९८॥ श्रीशुकउवाच ॥ सइत्थंद्विजवर्येणसहसंकथयन्हरिः॥ सर्वभूतमनोभिज्ञःस्मयमानउवाचतम् १ ब्रह्मण्योब्राह्मणंकृष्णोभगवान्प्रहसन्निव ॥ प्रेम्णानिरीक्षणेनैवप्रेक्षन्खलुसतांपतिः २ श्रीभगवानुवाच ॥ किमुपायनमानीतंब्रह्मन्मेभवतागृहात् ॥ अल्पमप्याहृतंभक्तैःप्रेम्णाभूर्येवमेभवेत् ३ भूर्यप्यभक्तोपहृतंनमेतोषायकल्पते॥ पत्रंपुष्पंफलंतोयंयोमेभक्त्याप्रयच्छति ॥ तदहंभक्त्युपहृतमश्नामिप्रयतात्मनः ४ इत्युक्तोपिद्विजस्तस्मैव्रीडितःपतयेश्रियः ॥ पृथुकप्रसृतिंराजन्नप्रायच्छदवाङ्मुखः ५ सर्वभूतात्मदृक्साक्षात्तस्यागमनकारणम् ॥ विज्ञायचिंतयन्नायंश्रीकामोमाऽभजत्पुरा ६ पत्न्याःपातिव्रतायास्तुसखाप्रियचिकीर्षया ॥ प्राप्तोमामस्यदास्यामिसंपदोमर्त्यदुर्लभाः ७ इत्थंविचिंत्यवसनाच्चीरबद्धंद्विजन्मनः ॥ स्वयंजहाराकिमिदमितिपृथुकतंडुलान् ८ एकमुष्टिसकृज्जग्ध्वाद्वितीयांजग्धुमाददे ॥ तावच्छ्रीर्जगृहेहस्तंत्वरापरमेष्ठिनः ९ एतावतालंविश्वात्मन्सर्वसंपत्समृद्धये ॥ अस्मिन्लोकेथवामुष्मिन्पुंसस्त्वत्तोषकारणम् १० ब्राह्मणस्तांतुरजनीमुषित्वाऽच्युतमंदिरे ॥ भुक्त्वापीत्वासुखंसुप्त्वामेनआत्मानमिंद्रवत् ११ श्वोभूतेविश्वभावेनस्वसखेनाभिवंदितः ॥ जगामस्वालयंतातपथ्यनुव्रज्यनंदितः १२ सचालब्ध्वाधनंसख्युर्नचयाचितवान्स्वयम् ॥ स्वगृहंव्रीडितोऽगच्छन्महद्दर्शनानिर्वृतः १३

संकथयन्संलापंकुर्वन १ २ दरिद्रत्वेनभूरिद्रव्याभावात्भवतोमहतोल्पंमनस्तुष्टिकरंनस्यादितिनानीतमितिशंकामाभूदित्याह अल्पमिति आहृतमानीतंद्रव्यभूरित्वाभूरित्वेअप्रयोजकोकिंतुभक्तिरेवेत्यनेनादार्शी ३ ४ ५ सर्वभूतानामात्मदृक्स्वभावज्ञः आत्मादेहेधृतोजीवेस्वभावेपरमात्मनीतियादवः ६ ७ चीरंपटश्चरंजीर्णवस्त्रमित्यर्थः इदंचीरबद्धंकिमित्युक्त्वाद्विजन्मनःपृथुकतंदुलान् स्वयमाजहार ८ ९ १० ११ अनुव्रज्यअनुगम्य नंदितः कृष्णेनेतिशेषः १२ महतःकृष्णस्यदर्शनेननिर्वृतः १३

१४ अहंब्राह्मणोमित्रंप्राणेभ्योपिगरीयसः १५ भ्रातरंपथाभ्रातरमातशयः १६ १७ दिवआकाश १८ माद्यन्मदगच्छन् १९ अतहृदयइतातस्मिन्कृष्णास्थतावत्तगत्यास्वगृहा
तिर्कमाप्तः २० २१ स्वमंदिरंदृष्ट्वाइदंकिंकस्यचेदंस्थानंइदंतदितितद्द्वारकाविधंकथमभूत् २२ एवंमीमांसमानंजिज्ञासमानंतंनरादयःप्रत्यगृह्णन् अभ्यायपुरित्यन्वयः २१ २४ २५ २६
सनिजमंदिरंप्रविष्टोभूत् २७ २८ नुमंतिगुतिमंति २९ ३० निर्व्यग्रःनिःसंभ्रमः ३१ ममैतदेवसमृद्धिहेतुर्महाविभूतेर्यदूत्तमस्यावलोकतोन्यान्नैमित्तंनैवोपपद्येत सएवहेतुरित्यन्वयः ३२ यः

अहोब्रह्मण्यदेवस्यदृष्टाब्रह्मण्यतामया ॥ यद्दरिद्रतमोलक्ष्मीमाश्लिष्टोबिभ्रतोरसि १४ काहंदरिद्रःपापीयान्क्वकृष्णःश्रीनिकेतनः ॥ ब्रह्मबंधुरितिस्मा
हंबाहुभ्यांपरिरंभितः १५ निवासितःप्रियाजुष्टेपर्यंकेभ्रातरोयथा ॥ महिष्यावीजितःश्रांतोवालव्यजनहस्तया १६ शुश्रूषयापरमयापादसंवाहना
दिभिः ॥ पूजितोदेवदेवेनविप्रदेवेनदेववत् १७ स्वर्गापवर्गयोःपुंसांरसायांदिविसंपदाम् ॥ सर्वासामपिसिद्धीनांमूलंतच्चरणार्चनम् १८ अधनोयद्धनं
प्राप्यमाद्यन्नुच्चैर्नमांस्मरेत् ॥ इतिकारुणिकोनूनंधनंमेऽभूरिनाददात् १९ इतिचित्तगत्यांतःप्राप्तोनिजगृहांतिकम् ॥ सूर्यानलेंदुसंकाशैर्विमानैःसर्वतो
वृतम् २० विचित्रोपवनोद्यानैःकूजद्विजकुलाकुलैः ॥ प्रोत्फुल्लकुमुदांभोजकल्हारोत्पलवारिभिः २१ जुष्टंस्वलंकृतैःपुंभिःस्त्रीभिश्चहरिणाक्षिभिः ॥ कि
मिदंकस्यचस्थानंकथंतदिदमित्यभूत् २२ एवंमीमांसमानंतंनरानार्योऽमरप्रभाः ॥ प्रत्यगृह्णन्महाभागंगीतवाद्येनभूयसा २३ पतिमागतमाकर्ण्यप
ल्युद्धर्षाच्चसंभ्रमात् ॥ निश्चक्रामगृहात्तूर्णंरूपिणीश्रीरिवालयात् २४ पतिव्रतापतिंदृष्ट्वाप्रेमोत्कंठाश्रुलोचना ॥ मीलिताक्ष्यनमद्बुद्ध्यामनसापरिष
स्वजे २५ पत्नीवीक्ष्यप्रस्फुरतींदेवींवैमानिकीमिव ॥ दासीनांनिष्ककंठीनांमध्येभांतींसुविस्मितः २६ प्रीतांस्वयंतयायुक्तःप्रविष्टोनिजमंदिरम् ॥
मणिस्तंभशतोपेतंमहेंद्रभवनंयथा २७ पयःफेननिभाःशय्यादांतारुक्मपरिच्छदाः ॥ पर्यंकाहेमदंडानिचामरव्यजनानिच २८ आसनानिचहैमानि
स्रग्वस्त्राभरणानिच ॥ मुक्तादामविलंबीनिवितानानिद्युमंतिच २९ स्वच्छस्फटिककुड्येषुमहामरकतेषुच ॥ रत्नदीपान्भ्राजमानान्ललनारत्नसंयु
तान् ३० विलोक्यब्राह्मणस्तत्रसमृद्धिंसर्वसंपदाम् ॥ तर्कयामासनिर्व्यग्रःस्वसमृद्धिमहैतुकीम् ३१ नूनंबतैतन्ममदुर्भगस्यशश्वद्दरिद्रस्यसमृद्धिहेतुः ॥
महाविभूतेरवलोकतोन्यन्नैवोपपद्येतयदूत्तमस्य ३२ नन्वब्रुवाणोदिशतेसमक्षंयोविष्णवेभूर्यपिभूरितेजाः ॥ पर्जन्यवन्नःस्वयमीक्षमाणोदाशार्हका
णामृषभःसखामे ३३ किंचित्करोत्युर्वपियत्स्वदत्तंसुहृत्कृतंफल्ग्वपिभूरिकारि ॥ मयोपनीतंपृथुकैकमुष्टिंप्रत्यग्रहीत्प्रीतियुतोमहात्मा ३४

स्वयमब्रुवाणस्तूष्णीकःपर्जन्यवन्नः अक्षयंशंदिशतेददातितेनयोयस्मैविष्णवेअभूर्यपिधनंददाति भूरितेजाःअनल्पप्रभावोभवति सएतादृशमहिमादाशार्हकाणामृषभःश्रीकृष्णःमेसखानन्वनुमतं लोकेने
तिशेषः ३३ भक्तदत्तमेवहरेस्तृप्तिजनकत्वेनानंतफलत्वेनपरिणमतिनाभक्तदत्तमित्याह किंचिदिति । यत्सुदुष्टभक्तिपूर्वमदत्तंतदुर्वपिकिंचित्करोतिफलतइतिशेषः त्रैविद्यामांसोमपाःपूतपापायज्ञैरिष्ट्वास्व
र्गतिमित्यादेः सुहृत्कृतंपूजनंफल्गुअपिअल्पमपिभूरिकारि एतत्कुतोदृष्टमत्राह मयेति हेतुगर्भविशेषणमेतत् ३४

यतोत्रभक्तिरेवप्रधानकारणमतःसैवसंपाद्येतिभावेनाह तस्यैवेति योहमनादिकालमारभ्यतच्चरणैकशरणः तस्यैवमेसौहृदादिस्यादित्यन्वयः नकेवलस्यहरेः भक्तिलक्षणसंगेनपूर्यते अपितुतद्भक्तसंगोपि स्यादितिप्रार्थयते महानुभावेनेति भगवतासहविषज्जतः विशेषेणसंगंकुर्वतःमेतत्पुरुषप्रसंगः तस्यहरेः पुरुषेषुब्रह्मादिष्वपिप्रकृष्टसंगश्चस्यादित्यन्वयः ३५ हरिरैहिकमैश्वर्यनददातीतिमंदजनानुमितस्वदोषापमार्जनायेयंसंपादितेतिभावेनाह भक्तायेति ३६ त्यक्त्वाऽहंममतामितिशेषः ३७ देवदेवस्येत्यनेनसर्वप्रभुत्वं यज्ञपतेरित्यनेनसर्वदेवत्वंचहरेरेवमुख्यमितिसूचितं अनेनइतरैर्ब्राह्मणभक्तिरेवावश्यंकर्तव्येतितात्पर्यविधीयतेननुतस्येति ३८ तस्यविप्रस्यकासिद्धिरभूत्तत्राह एवमिति अजितंनामभगवंतंस्वभक्तैःपराजितं दृष्ट्वातस्यहरेर्ध्यानवेगेनउद्धथितमुन्मुक्तंआत्मबंधनंयस्यतथा

तस्यैवमेसौहृदसख्यमैत्रीदास्यंपुनर्जन्मनिजन्मनिस्यात् ॥ महानुभावेनगुणालयेनविषज्जतस्तत्पुरुषप्रसंगः ३५ भक्तायचित्राभगवान्हिसंपदोराज्यंविभूतीर्नसमर्थयत्यजः ॥ अदीर्घबोधायविचक्षणःस्वयंपश्यन्निपातंधनिनांमदोद्भवम् ३६ इत्थंव्यवसितोबुद्ध्याभक्त्यातीवजनार्दने ॥ विषयान्जायायात्यक्त्वाबुभुजेनातिलंपटः ३७ तस्यवैदेवदेवस्यहरेर्यज्ञपतेःप्रभोः ॥ ब्राह्मणाःप्रभवोदैवंनतेभ्योविद्यतेपरम् ३८ एवंसविप्रोभगवत्सुहृत्तदादृष्ट्वास्वभक्तैरजितंपराजितम् ॥ तद्ध्यानवेगोत्थितात्मबंधनस्तद्भामलेमेऽचिरतःसतांगतेः ३९ एवंब्रह्मण्यदेवस्यश्रुत्वाब्रह्मण्यतांनरः ॥ लब्धभावोभगवतिकर्मबंधात्प्रमुच्यते ४० ॥ इतिश्रीभा०म०दशमस्कंधेउत्तरार्धेपृथुकोपाख्यानेएकोनशततमोऽध्यायः ॥९९॥ श्रीशुकउवाच ॥ कदाचिद्राजिमेधेनयष्टुमुद्यम्यकेशवः ॥ महींप्रदक्षिणीकर्तुंप्राहिणोत्प्रोक्षितंहयम् १ हार्दिक्यंकृतवर्माणंयुयुधानंचसात्यकिम् ॥ चारुदेष्णंसुदेष्णंचप्रद्युम्नंसांबमेवच २ अंशुमंतंसुभानुंचबहुसैन्यांश्चयादवान्॥रक्षणार्थंतुरंगस्यप्राहिणोद्यदुनंदनः ३ तेवैप्रदक्षिणंकृत्वावसुधांप्रोक्षितंहयम् ॥ उपानिन्युरदीर्घेणकालेनभरतर्षभ ४ यष्टुकामंहरिंश्रुत्वाहयमेधेनभारत ॥ आजग्मुर्दीर्घतपसोमुनयःशंसितव्रताः ५ होतारंचतथाध्वर्युमुद्गातारंचकेशवः ॥ कल्पयित्वायथान्यायंतथान्यानपिऋत्विजः ६ ऋषिभिर्ब्राह्मणश्रेष्ठैर्यज्ञविद्याविचक्षणैः ॥ दीक्षांप्रपेदेभगवान्कृतपुण्याहमंगलः ७ तमुपास्तुंमहीपालानानाजनपदेश्वराः ॥ आजग्मुर्देवसंकाशाःकिरीटमुकुटोज्ज्वलाः ८ पांडवाश्चमहीपालायज्ञदर्शनमिच्छवः ॥ आहूतावासुदेवेनद्वारकामाययुर्नृप ९ तस्मिंस्तथावर्त्तमानेहयमेधेमहोत्सवे ॥ आसंस्तृप्ताद्विजाभोज्यवस्त्रगोभूमिकांचनैः १० दीक्षांप्रविश्यगोविंदःकामैस्तर्पयतिद्विजान् ॥ भुंजानेषुद्विजाग्र्येषुप्रत्यगृह्णत्सुवांछितम् ११ आसीनेषुयथायोगंभूपालेषुसमंततः ॥ वदत्सुमाशब्दइतिवेत्रझर्झरपाणिषु १२

तद्भक्तैरेवप्राप्यंतद्धामवैकुंठादिलक्षणं ३९ एतच्चरितोपासकस्यफलमाह एवमिति लब्धभावोलब्धभक्तिःअनेनास्यविप्रस्येतरभक्तवैलक्षण्यमुक्तंस्यादिति तात्पर्यमवगंतव्यम् ४० इतिश्रीभागवते महापुराणेउ०दिग्विजयध्वजकृतटीकायांएकोनशततमोऽध्यायः ॥ ९९ ॥ लोकसंग्रहायाश्वमेधयज्ञकरणमन्यासाध्यमृतविप्रपुत्रानयनमाहात्म्यंचनिरूपयत्यस्मिन्नध्याये तत्रादौहयस्यमदक्षिणामकारंवक्तिकदाचिदिति उद्यम्यउद्योगंविधाय १ २ बहवःसैन्याःसेनानायकायेषांतेतथातान् यदून्नंदयतीतियदुनंदनः ३ ४ हयमेधेनाश्वमेधेन दीर्घकालंतपोयेषांतेतथा ५ ६ ७ उपारुह्यनिषेवितुंकिरीटैर्मुकुटैःसुवर्णैश्चोज्ज्वलाः ८ ९ १० ११ वेत्रेणझर्झराःकर्कशाःपाणयोयेषांतेतथातेषु १२

तृणमूलधरःतृणानांमूलंचूडांधारयतीति तृणमूलंयष्टिंचधारयतीतिवा १३ १४ १५ हिंसाविहारादिकमंयुक्तंनृपतेभजंत्यःसादात २६ ।द्वतापाद्वार. तृणपानधरंतुन्धुनी
१७ २८ २२ केनापिपुंसानीयते २० किमाहेत्यत्राह किंब्राह्मणेति इहत्वन्निवासस्थानेधनुर्धरोनास्तिकिमित्यब्रवीत् २१ धनुर्धरेणकिंकार्यमत्राह राजन्यबंधोरिति एते
ब्राह्मणाराजन्यबंधोर्हेतोःसत्रमासतेवै २२ राजापिसएवश्रेयानितरोदुःखहेतुरित्याह धनदारेति यत्रयस्मिन्देशेराजन्यवेषेणासुंभरानराजीवंतितस्मिन्देशेस्थितास्तेभृत्याराज्ञाभरणीयाः
ब्राह्मणाःधनदारात्मजैःसहशोचंतीत्यन्वयः यद्वा यत्रयेपुराजसुसत्सुब्राह्मणाधनादिभिःसहशोचंतितराजन्येवेषेणनटाएवजीवंतिनतुसद्वंश्याः कुतःअसुंभुराःस्वप्राणपोषणपरायणावैयस्मात्तस्मादीनयो

तृणमूलधरःकश्चिद्ब्राह्मणोऽभ्येत्यसत्वरः ॥ चुक्रोशजार्त्तउद्बाहुर्यज्ञवाटमुखेस्थितः १३ क्षुत्क्षामकंठःशुष्कास्योगलद्बाष्पाकुलेक्षणः ॥ इदंचोवाचविल
पन्नातुरोदीनमानसः १४ ब्रह्मद्विषःशठधियोलुब्धस्यविषयात्मनः ॥ क्षत्रबंधोःकर्मदोषात्पंचत्वंमेगताःसुताः १५ हिंसाविहारंनृपतिंदुःशीलमजि
तेंद्रियम् ॥ प्रजाभजंत्यःसीदंतिदरिद्रानित्यदुःखिताः १६ एवंद्वितीयंविप्रर्षिस्तृतीयंत्वेवमेवच ॥ इत्युक्त्वासपुनश्चैवचुक्रोशभृशदुःखितः १७
तदाकर्ण्यार्जुनोमानीसमुत्थायवरासनात् ॥ अपृच्छत्स्वयमासाद्यब्राह्मणंकेशवांतिकात् १८ किमासन्नर्भकाब्रह्मंस्तवकेनासिदुःखितः ॥ ब्रूहितत्त्वम
शेषेणत्वामद्यसुखयाम्यहम् १९ इत्युक्तोब्राह्मणःप्राहजातोजातोऽर्भकोमम ॥ नीयतेतातकेनापितत्क्षणेसूतिकागृहात् २० तदाकर्ण्यार्जुनःप्राहस्मय
मानइवद्विजम् ॥ किंब्राह्मणत्वन्निवासेऽहनास्तिधनुर्धरः २१ राजन्यबंधोरेतैर्वैब्राह्मणाःसत्रमासते २२ धनदारात्मजैर्भृत्यायत्रशोचंतिब्राह्मणाः ॥
तेवैराजन्यवेषेणनटाजीवंत्यसुंभराः २३ अहंप्रजावांरक्षिष्येभगवन्दीनयोरिह ॥ अनिस्तीर्णप्रतिज्ञोग्निंप्रवेक्ष्येऽहतकल्मषः २४ ब्राह्मणउवाच ॥
संकर्षणोवासुदेवःप्रद्युम्नोधन्विनांवरः ॥ अनिरुद्धोऽप्रतिरथोनत्रातुंशक्नुवंतियत् २५ तत्कथंनुभवान्कर्मदुष्करंजगदीश्वरैः ॥ चिकीर्षतीहबालिश्यात्तन्न
श्रद्दध्महेवयम् २६ अर्जुनउवाच ॥ नाहंसंकर्षणोब्रह्मन्नकृष्णःकार्ष्णिरेवच ॥ अहंधनंजयोनामगांडीवंपश्यकार्मुकम् २७ मावमंस्थाममब्रह्मन्वीर्यंत्र्यं
बकतोषणम् ॥ मृत्युंविजित्यप्रधनेप्यानयिष्येतवप्रजाः २८ इतिविस्रंभयित्वातंकृष्णमाहार्जुनोनृप ॥ अनुज्ञांदेहिभगवन्ब्राह्मणार्थेप्रयास्यतः २९ य
जतांवाजिमेधेनभवानेभिर्महात्मभिः ॥ इतिब्रुवंतंबीभत्सुमनुज्ञांप्रेप्सुमच्युतः ३० बद्धतूणंसगांडीवंस्मयमानोब्रवीद्वचः ॥ श्रीभगवानुवाच ॥ अहमे
वागमिष्यामिनत्वयाशक्यतेर्जुन ॥ तमसाधारणंभूतंमन्येयेनहतोर्भकः ३१

र्युवयोःअहतकल्मषःमिथ्याप्रतिज्ञत्वात् २३ २४ तत्रार्जुनस्याहंकाराविष्करणायब्राह्मणोवक्तिसंकर्षणइति संकर्षणादयस्त्रातुंनशक्नुवंतियद्यस्मात्तस्माज्जगदीश्वरैर्दुष्करंकर्मकथंचिकीर्षितिबालिशोबालम्
र्खोयोरितिवचनात् बालिश्यात् आत्मशक्त्यनभिज्ञानात् इहकर्मणितवावाक्पंनश्रद्दध्महे २५ २६ अत्रार्जुनःस्वगर्वमुद्गलयति अर्जुनइति धनंजयोरणेरणइतिश्रुतिप्रसिद्धेःअहंधनंजयोनामप्रख्यातः धनुष्म
त्ताचेदृशीत्याह गांडीवमिति २७ मावमंस्थाअवमानंनकुरु मृत्युंयमं २८ ततःकिंफलितमत्राह इतीति २९ बत्रकृष्णोहंकारिणोदेवप्रसादोनस्यादितिभाववानर्जुनंनिवारयन्निववक्ति इतीति बद्धतूणं
पृष्ठबद्धतूणीरम् ३० अल्पकार्यहेतोस्त्वद्गमनंकिमर्थमित्यत्राह तमसाधारणमिति भूतंदेवयोनिम् ३१

अर्जुनःस्वगर्वमुद्वलयति सलोकपालइति ३२ ३३ भूतंदेवयोनिम् ३४ ३५ अभितउद्दिश्य ३६ ३७ ३८ ३९ ४० युधांवर युध्यंतीतियुधोयोधास्तेषांवर पौरुषाणांपुरुषपराक्रमाणांनिदर्शनंद्दष्टांतः ४१ ४२ ४३ ४४ सूतिकागारंसूतिकागृहं शरैर्न्यरुणत् आवृतवान् ४५ भगवदनुग्रहरहितस्यसाधनबाहुल्येनकिंफलमितिभावेनाह ततइति ४६ तदनंतरंकिमभूदित्यत्राह तदेति अथार्जुनंविनिंदति तवेति ४७ यस्यममार्भकंपरित्रातुंनशेकुःसोहंकृष्णस्यसन्निधौयस्यतवविकत्थनंश्रद्दधेवैतत्त्वांधिक् आत्मश्लाघिनः स्वस्यतवधनुश्चाधिक् तदाधिकेश्वरः तेभ्यःप्रद्युम्नादिभ्योधिकेश्वरश्चकः

अर्जुनउवाच ॥ सलोकपालोदेवेंद्रःखांडवेविजितोमया ॥ किरातरूपीयुद्धेनतोषितश्चत्रियंबकः ३२ निवातकवचाश्चैववासवेनापिदुर्जयाः ॥ मयैवनिहताःसंख्येहिरण्यपुरवासिनः ३३ तेभ्योधिकतरंभूतंकिंनुदानवसूदन ॥ बिभीषयसिमांकस्मादनुज्ञांदेहिसांप्रतम् ३४ श्रीशुकउवाच ॥ इत्युक्तःप्रददौकृष्णस्त्वनुज्ञांसव्यसाचिने ॥ निर्ययौयज्ञशालायाःसगृहीतशरासनः ३५ रथमास्थायाविपुलंसमुच्छ्रितकपिध्वजम् ॥ अग्रेब्राह्मणमारोप्यतद्धाममभितोययौ ३६ तत्रगत्वाप्रविष्टायांतत्पत्न्यांसूतिकागृहम् ॥ ब्राह्मणंप्राहबीभत्सुरवरोप्यरथान्नृप ३७ अर्जुनउवाच ॥ याहिस्वभवनंब्रह्मन्नभयंतवसर्वतः ॥ दत्तंमयाद्यतद्वीतांपत्नीमाश्वासयाशुते ३८ इतिविस्रंभितोविप्रःफाल्गुनेनपरंतप ॥ जगामस्वगृहेप्रीत्यापार्थवीर्यंनिशम्यतत् ३९ प्रसूतिकालआसन्नेभार्यायाद्विजसत्तमः ॥ प्रोवाचद्रुतमभ्येत्यपार्थंशस्त्रभृतांवरम् ४० एहिपार्थमहाबाहोयत्तोभवयुधांवर ॥ अत्रपूर्वकृतानांहिपौरुषाणांनिदर्शनम् ४१ श्रीशुकउवाच ॥ इत्युक्तोरथमारुह्यसज्यंकृत्वातुगांडिवम् ॥ त्वरन्जगामबीभत्सुःसूतिकाभवनांतिकम् ४२ ब्राह्मणोपिप्रविश्याहमुहूर्तेसूतिकागृहे ॥ गतेतुपाहिपाहीतिमृत्योरर्जुनमातुरः ४३ सउपस्पृश्यशुच्यंभोनमस्कृत्यमहेश्वरम् ॥ दिव्यास्त्राणिचसंस्मृत्यसज्यंगांडिवमाददे ४४ न्यरुणत्सूतिकागारंशरैर्नानास्त्रयोजितैः ॥ तिर्यगूर्ध्वमधःपार्थश्चकारशरपंजरम् ४५ ततःकुमारःसंजातोविप्रपत्न्यारुदन्मुहुः ॥ सद्योऽदर्शनमापेदेसशरीरोविहायसा ४६ तदाहविप्रोविजयंविनिंदन्कृष्णसन्निधौ ॥ मौढ्याद्यस्यतवाहंवैश्रद्दधेक्लीबकत्थनम् ४७ नप्रद्युम्नोऽनिरुद्धोवानरामोनचकेशवः ॥ यस्यशेकुःपरित्रातुंकोन्यस्तदधिकेश्वरः ४८ धिगर्जुनंवृथावाचंधिगात्मश्लाघिनोधनुः ॥ दैवोपसृष्टयोर्मौढ्यादानिनीषतिदुर्मतिः ४९ एवंशपतिविप्रर्षौविद्यामास्थायफाल्गुनः ॥ ययौसंयमिनीमाशुयत्रास्तेभगवान्यमः ५० विप्रापत्यमचक्षाणस्ततऐंद्रीमगात्पुरम् ॥ आग्नेयींनैर्ऋतींसौम्यांवायवींवारुणीमथ ५१ रसातलंनामपुरंधिष्ण्यान्यन्यान्युदायुधः ॥ ततोलब्धद्विजसुतोह्यनिस्तीर्णप्रतिश्रुतः ५२ अग्निंविविक्षुःकृष्णेनप्रत्युक्तःप्रतिषेधता ॥ दर्शयेद्विजसूनूंस्तेमावध्यात्मानमात्मना ५३ एतेनकीर्तिंविमलांमानुष्यंस्थापयिष्यसि ॥ इतिसंभाष्यभगवानर्जुनंसमहेश्वरः ५४

४८ किमित्थंवैवंनिंदसीतितत्राह दैवेति दैवेनोपसृष्टयोरुपद्रुतयोरावयोःपुत्रमानिनीषतिआनेतुमिच्छति ४९ विद्यांमनुष्यागम्यगमनसाम्रर्थ्यकरीम् ५० नैर्ऋतींनिर्ऋतेर्विद्यमानांदिशंसौम्यांसोमस्यवायव्यांवायोःवारुणींवरुणस्य ५१ अनिस्तीर्णप्रतिश्रुतः असाधितप्रतिज्ञः ५२ प्रत्युक्तःनेत्युक्तःप्रतिषेधतानिषेधंकुर्वताकथंनेत्युक्तइतित्राह दर्शयइति आत्मनैवस्वयंआत्मानंमावधीर्माहिंसीः संधिरार्षः ५३ एतेनपुत्रादानादिनात्वन्निमित्तेनमानुष्यंमनुष्यलोकस्थांयथास्यात्तथाईश्वरादपिमहानुत्तमः ५४

अवभृथनिमित्तमज्जनम् ७४ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटीकायांशततमोऽध्यायः ॥ १०० ॥ हररक्षाशष्टभूभारदंतवक्त्रादिदूरयवधलक्षणपरिचारततत्कथपरत्पादन ध्याये तत्रतद्घटनप्रकारमाह उद्वापनेति उद्वापनस्नानहेतोः अवभृथस्नानहेतोः १ २ ३ ४ अरुणवरुरोध जंबुकःशृगालः ५ पारोक्ष्यसौहृदंस्मृतिलक्षणात्पक्षत्वेपिबंधुनापरकर्तव्यंसौहृदंप्रेमवत्कु र्वन्कर्तुकामः ताच्छीलिकशतृप्रत्ययः ६ ७ वेलाजलवृद्धिः सिंधुनदीं कालिंगःकालिंगविषयनाथः ८ ९ मातुलोवसुदेवः तत्पुत्रःपारदारिकःपरस्त्रीरतिसमुत्सुकः १० भ्रातरीमातृसो

यमुनायांमहानद्यांकृत्वाऽवभृथमज्जनम् ॥ विजहारयथाकामंमहर्षिभिर्यदूत्तमः ७४ ॥ इतिश्रीभागवतेमहापुराणेदशस्कंधेउ०शततमोऽध्यायः ॥ १००॥ श्रीशुकउवाच ॥ उद्वापनस्नानहेतोर्यमुनातीरमागतम् ॥ श्रुत्वातूर्णंकलिंगेशोदंतवक्त्रःसहानुजः १ महत्यासेनयायुक्तोगजानीकसमन्वितः ॥ गच्छंतं द्वारकांकृष्णंपथिरोद्धुंसमाययौ २ सोभ्येत्यपथिगच्छंतंवृतंयदुकुमारकैः ॥ कांतापोडशसाहस्रशिबिकापरिवारितम् ३ राजसंघानुगच्छंतंमहर्षिगणसेवि तम् ॥ ऋत्विक्पुरोहिताचार्यब्राह्मणैश्चसमन्वितम् ४ दंतवक्त्रोरुणन्मूढोमृगेंद्रंजंबुकोयथा ॥ रुक्मिणःशिशुपालस्यपौंड्रकस्यचदुर्मतेः ५ परलोकगता नांचकुर्वन्पारोक्ष्यसौहृदम् ॥ पदातिःपथिसंरोद्धुंगदापाणिःप्रकंपयन् ६ पद्भ्यांमहींमहाराजमहासत्वोव्यदृश्यत ॥ तंतथायांतमालोक्यगदामादायस त्वरः ७ अवप्लुत्यरथात्कृष्णःसिंधुंवेलेवप्रत्यगात् ॥ गदामुद्यम्यकालिंगोमुकुंदंप्राहदुर्मदः ८ दिष्ट्याकृष्णभवानद्यममदृष्टिपथंगतः ॥ त्वामद्यद्वंद्वयुद्धेनहनिष्याम्यविलंबितम् ९ त्वंमातुलेयोनःकृष्णमित्रध्रुक्पारदारिकः ॥ विश्वासघातीबंधुघ्नःसततंकलहप्रियः १० पौंड्रकंमातुलेयंमेसख्येसूदितवानसि ॥ रु क्मीचशिशुपालश्चभ्रातरौमेत्वयाहतौ ११ अतस्त्वांगदयामंदहनिष्येवज्रकल्पया ॥ तेनानृण्यमुपैम्यज्ञमित्राणांमित्रवत्सलः १२ बंधुरूपमरिंहत्वा व्याधिंदेहचरंयथा ॥ इतिलोकप्रवादोस्तितेनदोषोपिनास्तिमे १३ एवंरुक्षैश्चवचनैःकृष्णंतोत्रैरिवद्विपम् ॥ गदयाऽताडयत्कृष्णंसिंहवद्व्यनदच्चसः १४ ग दयाभिहतोप्याजौनचचालयदूत्तमः ॥ गदयाव्यहनद्रुष्यकौमोदक्यास्तनांतरे १५ गाढनिर्भिन्नहृदयउद्गमन्रुधिरंमुखात् ॥ प्रसार्यकेशबाह्वंघ्रिगतासु र्व्यपतद्भुवि १६ ततःसूक्ष्मतरंज्योतिःकृष्णमाविशदद्भुतम् ॥ पश्यतांसर्वभूतानांयथाचैद्यस्यसंगरे १७ भ्रातरंनिहतंदृष्ट्वादंतवक्त्रंविदूरथः ॥ मूर्च्छितो भ्रातृशोकेनाप्यसिचर्मसमाददे १८ सोवप्लुत्यरथात्तूर्णंविधुन्वन्खड्गमुत्तमम् ॥ अभिदुद्रावगोविंदंपद्भ्यामुर्वींप्रकंपयन् १९ तस्यबाणेनचिच्छेदखड्गंयाद वनंदनः ॥ ततोजग्राहनिशितांशक्तिंघोरांविदूरथः२० तयाप्रहर्तुंगोविंदमभिनिश्चित्यसंगरे ॥ क्षणेनाभिससाराज्ञश्चापमुक्तोयथाशरः २१ तस्यचापततः कृष्णश्चक्रेणक्षुरनेमिना ॥ शिरोजहाररराजेंद्रसकिरीटंसकुंडलम् २२

दरीपुत्रत्वेन ११ आनृण्यंऋणाभावम् १२ देहचरंदेहगतम् १३ रूक्षैर्वचनैर्व्यथयित्वेतिशेषः १४ १५ १६ दंतवक्त्रगतासुरःकृष्णंध्वांतापरपर्यायंतमोविशत् अन्यस्तुद्वारपालः कृष्णं उत्कृष्टानंदरूपश्रीहरिम् १७ असियुक्तंचर्म १८ १९ २० २१ २२

५५ ५६ ५७ गगनंछादयतीतिगगनच्छदं गुणच्युतः मौर्व्यामुक्तः ५८ चक्रानुपथेसुदर्शनगतानुकूलमार्गेकृतद्वारेणसमश्नुवानंगच्छंतंयदूत्तमंप्रसमीक्ष्यअक्षिणीपिदधइत्यन्वयः अनंत पारंअंतपारवर्जितम् ५९ ततःसलिलंप्रविश्यगतोभवनंददर्शेत्यन्वयः बलीयसानभस्वतावायुनाएजद्भिःकंपमानैर्बृहद्भिरूर्मिभिःतरंगैर्भीषणं तत्रसलिले ६० तस्मिन्भवनेअनंतंददर्शसितांबरा भंश्वेताकाशवत्शोभमानं शितिःनीलःकंठोयस्यसःशितिकंठःजिह्मगःनम्रगात्रस्तम् ६१ तस्यानंतस्यभोगेसुखमासनंयस्यसतथातद्भोगसुखासनःतम् ६२ ६३ परमेष्ठिनांब्रह्मणांपतिम् ६४

सहैवरथमास्थायप्राचींदिशमवीविशत् ॥ सप्तद्वीपान्सप्तसिंधून्सप्तसप्तगिरीनथ ॥ लोकालोकंतथातीत्यविवेशसुमहत्तमः ५५ तत्राश्वाःशैब्यसुग्रीवमे घपुष्पबलाहकाः ॥ तमसाभ्रष्टगतयोबभूवुर्भरतर्षभ ५६ तान्दृष्ट्वाभगवान्कृष्णोमहायोगेश्वरेश्वरः ॥ सहस्रादित्यसंकाशंस्वचक्रंप्राहिणोत्पुरः ५७ तमःसुघोरंगगनच्छदंमहद्विदारयद्भूरितरेणरोचिषा ॥ मनोजवंनिर्विविशेसुदर्शनंगुणच्युतोरामशरोयथाचमूः ५८ द्वारेणचक्रानुपथेयदूत्तमंपरा त्परंज्योतिरनंतपारम् ॥ समश्नुवानंप्रसमीक्ष्यफाल्गुनःप्रदीपिताक्षःपिदधेऽक्षिणीउभे ५९ ततःप्रविष्टःसलिलंनभस्वताबलीयसैजद्बृहदूर्मिभीषणम् ॥ तत्राद्भुतंवैभवनंयुमत्तमंभ्राजन्मणिस्तंभसहस्रशोभितम् ६० तस्मिन्महाभीममनंतमद्भुतंसहस्रमूर्द्धन्यफणामणिद्युतिम् ॥ विभ्राजमानंद्विगुणेक्षणोल्ब णंसितांबराभंशितिकंठजिह्मगम् ६१ ददर्शतद्भोगसुखासनंविभुंमहानुभावंपुरुषोत्तमोत्तमम् ॥ सांद्रांबुदाभंसुपिशंगवाससंप्रसन्नवक्त्रंरुचिरस्मितेक्ष णम् ६२ महामणिव्रातकिरीटकुंडलप्रभापरिष्वक्तसहस्रकुंतलम् ॥ प्रलंबचार्वष्टभुजंसकौस्तुभंश्रीवत्सलक्ष्मंवनमालयावृतम् ६३ सुनंदनंदप्रमुखै श्चपार्षदैश्चक्रादिभिर्मूर्तिधरैर्निजायुधैः ॥ पुष्ट्याश्रियाकीर्त्यजयाखिलर्द्धिभिर्निषेव्यमाणंपरमेष्ठिनांपतिम् ६४ ववंदआत्मानमनंतमच्युतोजिष्णुश्च तद्दर्शनजातसाध्वसः ॥ सचाहभूमापरमेष्ठिनांप्रभुर्बद्धांजलिंसस्मितपूर्वयागिरा ६५ द्विजात्मजास्तेयुवयोर्ददक्षयामयोपनीताभुविधर्मगुप्तये ॥ कला वतीर्णोऽस्यवनेर्भरासुरान्हत्वेहभूयस्त्वरयैहिमेंतिकम् ६६ पूर्णकामावपियुवांनरनारायणावृषी ॥ धर्ममाचरतांस्थित्यैवृषभौलोकसंग्रहम् ६७ इत्या दिष्टौभगवतातौकृष्णौपरमेष्ठिना ॥ ओमित्यानंदभूमानमादायद्विजदारकान् ६८ न्यवर्त्ततांस्वकंधामसंप्रहृष्टौयथागतम् ॥ विप्रायददतुःपुत्रान्यथारू पंप्रसूयताम् ६९ निशम्यवैष्णवंधामपार्थःपरमविस्मितः ॥ यत्किंचित्पौरुषंपुसांमेनेकृष्णानुकंपितम् ७० तथाप्रविश्यगोविंदोयज्ञवाटंपुनःस्वयम् ॥ पूर्णंपुरोहितैर्विप्रैर्ऋत्विग्भिःक्षत्रियर्षभैः ७१ प्रायाश्चित्तंतुचलनेदीक्षायांयउदाहृतः ॥ तंचकारयथान्यायंब्राह्मणैरनुमोदितः ७२ समाप्ययज्ञंविधिव त्तर्पयित्वार्थिनोद्विजान् ॥ ऋत्विग्भ्यःपूजयित्वान्यानृषींश्चकुरुसत्तम ७३

अच्युतःकृष्णःजिष्णुरर्जुनः ६५ युवयोःकृष्णार्जुनयोः ६६ जगतःस्थित्यैलोकसंग्रहंधर्मम् ६७ कृष्णौपदूत्तमार्जुनौ आनंदभूमानंपूर्णानंदम् ६८ प्रसूयतांप्रसवंगच्छतां रूपंयथाप्रसूतिकालेयद्रूपंतादृशं रूपंदधानान् ६९ पुंसायत्किंचित्पौरुषंकृष्णानुकंपितंमेने ७० ७१ दीक्षायांमध्येचलनेततउत्थायगमनेप्रायश्चित्तमुद्दिश्यपयःकर्मविशेषउदाहृतःतंचकार ७२ ७३

आनवायइत्यस्यावरणमाचरितैरमीभिर्मिलद्भासान्नयानयुक्तामेवा निजसौख्यसंदुतःस्वरूपानपतनुप्रेमः

स्थितातया अनुरागादियुक्तया १३ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वज कृतटीकायां द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥ धर्मार्थकामानांपदंविषयंसंदर्शयन्त्रिवर्गानामाश्रयो गृहस्थइतिसम्यक्प्रदर्शयन् द्वारकामावसतिश्रीकृष्णइतिशेषः १ ततःपरंकिमत्रेत्याह एवमिति भूचक्रंभूमंडलं द्वारका मुन्यादिभिःपूर्णानिबिडाआसीदित्यन्वयः २ ३ पिंडारकादितीर्थक्षेत्रे भ्योद्वारकोत्तमतीर्थमित्याह पिंडारकादित्यादिना ४ कुमारनिलयात्कुमारपर्वतात् ५ ६ द्वारकामितिशेषः ७ ८ स्तुतिस्तोत्रपरायणाः स्तुतिरप्रबंधरूपा स्तोत्रंप्रबंधरूपं तज्जपैक

गृहेषुतासामनिवार्यईश्वरोनिरस्तसाम्यातिशयोऽप्यवास्थितः ॥ रेमेरमाभिर्निजसौख्यसंप्लुतोयथेतरोगार्हकमेधिकांश्वरन् १२ इत्थंरमापतिमवाप्यप तिंस्त्रियस्ताब्रह्मादयोपिपदवींनविदुर्यदीयाम् ॥ भेजुर्मुदाऽविरतमेधितयानुरागहासावलोकनवसंगमलज्जयैव १३ इतिश्रीभागवतेमहापुराणेदशमस्कं धेउत्त०द्व्यधिकशततमोध्यायः ॥ १०२ ॥ श्रीशुकउवाच ॥ एवंवेदोदितंधर्ममनुतिष्ठन्सतांगतिः ॥ गृहेधर्मार्थकामानांमुहुःसंदर्शयन्पदम् १ एवंशास तिभूचक्रंचक्रपाणौजनार्दने ॥ द्वारकावृष्णिनिलययोजनद्वादशायता २ मुनिभिर्ब्राह्मणैश्चैवक्षत्रियैश्चापिबंदिभिः ॥ आसीत्पूर्णाकुरुश्रेष्ठसततंस मलंकृता ३ पिंडारकात्कुरुक्षेत्राच्छालग्रामाच्चपुष्करात् ॥ वाराणस्याःप्रयागाच्चवेंकटाच्छ्रीगिरेरपि ४ स्थानंदूराच्चगोकर्णाच्चंद्रतीर्थाच्चशोभनात् ॥ सह्याद्रेश्चभृगुक्षेत्रात्कुमारनिलयादपि ५ गोदावरितटात्पुण्यान्नर्मदानिकटादपि ॥ शूर्पाकारात्प्रभासाच्चपुण्याद्बदरिकाश्रमात् ६ पावनाद्वैमि षारण्याद्ब्रह्मदुर्गाच्चदुर्गमात् ॥ आययुर्मुनयःशांतानित्यव्रतपरायणाः ७ अब्भक्षवायुभक्षाश्चनिराहाराद्दृढव्रताः ॥ वल्कलाजिनसंवीताजटिनश्चा पिमुंडिनः ८ त्रिकालस्नायिनश्चैवमौनव्रतपरायणाः ॥ वेदस्वाध्यायनिरताःस्तुतिस्तोत्रपरायणाः ९ ध्यानैकतानमनसःसमाधौकृतनिश्चयाः ॥ त्वगस्थि मात्रावयवाःशिराधमनिसंतताः १० आगत्यमुनयोराजन्सर्वतःशांतचेतसः ॥ उपासतमहाराजनित्यंतत्त्वैकचिंतकाः ११ क्षत्रियैश्चमहावीर्यैर्ब्राह्मणैश्चतपो धनैः ॥ सूतैश्चमागधैश्चैवश्लोकस्तुतिपरायणैः १२ पूर्णमंगलघोषैश्चवादित्राणांचनिःस्वनैः ॥ निर्घुष्टब्रह्मघोषैश्चद्वारकाकुरुनंदन १३ क्षेत्राणामपि सर्वेषांतीर्थानांचाघहारिणाम् ॥ देवदेवस्यसान्निध्यादग्रण्याचबभूवसा १४ आस्थितस्यपरंधर्मंकृष्णस्यगृहमेधिनः ॥ आसन्षोडशसाहस्रमहिष्यस्तु शताधिकाः १५ तासांस्त्रीरत्नभूतानामष्टौयाःप्रागुदाहृताः ॥ रुक्मिणीप्रमुखाराजंस्तत्पुत्राश्चानुपूर्वशः १६ एकैकस्यांदशदशकृष्णोऽजीजनदात्म जान् ॥ यावत्यआत्मनोभार्यास्त्वमोघगतिरीश्वरः १७ तेषामुद्दामवीर्याणामष्टादशमहारथाः ॥ आसन्नुदारयशसस्तेषांनामानिमेशृणु १८

परायणाः ९ ध्यानैकतानमनसःश्रीहरिगुणगणसंचिंतनायामेवविस्तृतमनसः समाधौचित्तनिग्रहेकृतनिश्चयाः समीचीनाधिष्ठानलक्षणमुक्तौवा शिरारेखाः १० सर्वतआगत्य ११ १२ १३ अग्रण्याअग्रण्येतिच्छांदसःउत्तमोत्तमाश्रया १४ कृष्णस्यषोडशसाहस्रमहिष्यः १५ तासांमध्येयारुक्मिणीप्रमुखाअष्टौमहिष्यः प्रागुक्ताः अनुपूर्वशःतत्पुत्राश्चोक्ताः १६ आत्मनोयावत्योभार्याःतास्वेकस्योमकस्यांभार्यायांदशदशात्मजानजीजनत् १७ तेषांपुत्राणांमध्येअष्टादशमहारथाःआसन् १८

कालयामासद्रावयामास वारणादिकमित्यत्रगजाश्वरथादिकंगृह्यते २३ पुष्परथंविवाह्योग्यरथम् २४ २५ २६ पशुदृष्टीनांअज्ञजनबुद्धीनांपक्षेजीयतेजयतीतिईयतेज्ञायते २७ ब्रह्माद्यन्यतमेनापि तत्कर्मसमाप्तिकर्तुनशक्यतेकिंपुनर्मयेतिभावेनाह तस्येति २८ स्कंधमारभ्ययदैत्यहननंतदादितःउपसंहरति एवमिति २९ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेविजयध्वजकृतटीकायांएकाधिकशततमोऽध्यायः ॥ १०१ ॥ अनेनाध्यायद्वयेनगृहस्थधर्मानुकरणलक्षणंहरेःसंनिधानात्सर्वतीर्थोत्तमत्वंद्वारकायाश्चकथ्यते तत्रप्रथमंद्वारकापुरंवर्णयति सुखमिति १ हर्म्येषुधनिनांयोग्येषुसमृतगृहेषुसौधेषुसुधाधवलितेषूत्तमगृहेषु २ ३ निर्विशद्भिःमिथउपभुंजानैःभृंगविहंगैर्नादितायांघोषवत्कृतायाम् ४ ५ वासितामलतोयेषुपरिमलीकृतजलेषु ६ ह्लादिनीषुनदीषु स्वयोषिता

एवंनिहत्यसमरेदंतवक्त्रविदूरथौ ॥ कालयामासतत्सैन्यंजगृहेवारणादिकम् २३ भूयःपुष्परथंदिव्यमारुह्यसमलंकृतम् ॥ सहितःसात्वतगणैरीडितःसुरमानवैः २४ मुनिभिःसिद्धगंधर्वैर्विद्याधरमहोरगैः ॥ अप्सरोभिःपितृगणैर्यथाकिन्नरचारणैः २५ उपगीयमानविजयःकुसुमैरभिवर्षितः ॥ वृतश्चवृष्णिप्रवरैर्विवेशालंकृतंपुरम् २६ एवंयोगेश्वरःकृष्णोभगवान्देवकीसुतः ॥ ईयतेपशुदृष्टीनांजीयतेजयतीतिसः २७ तस्यकर्माण्युदाराणिपुण्यश्लोकस्यभारत ॥ शक्यंतेकथितुंनैववर्षाणामयुतैरपि २८ एवमारभ्यराक्षस्याःपूतनायाःपरंतप ॥ भूभारभूतानसुराञ्जघानमधुसूदनः २९ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेएकाधिकशततमोध्यायः ॥ १०१ ॥ श्रीशुकउवाच ॥ सुखंस्वपुर्यांन्यवसद्द्वारकायांश्रियःपतिः ॥ सर्वसंपत्समृद्धायांजुष्टायांवृष्णिपुंगवैः १ स्त्रीभिश्चोत्तमवेषाभिर्नवयौवनकांतिभिः ॥ कंदुकैर्हर्म्यसौधेषुक्रीडंतीभिस्तडिद्द्युभिः २ नित्यंसंकुलमार्गायांमदच्युद्भिर्मतंगजैः ॥ स्वलंकृतैर्भटैरश्वैरथैश्चकनकोज्ज्वलैः ३ उद्यानोपवनाढ्यायांपुष्पितद्रुमराजिषु ॥ निर्विशद्भृंगविहगैर्नादितायांसमंततः ४ रेमेषोडशसाहस्रपत्नीनामेकवल्लभः ॥ तावंतिबिभ्रद्रूपाणितद्गृहेषुमहर्धिषु ५ प्रोत्फुल्लोत्पलकह्लारकुमुदांभोजरेणुभिः ॥ वासितामलतोयेषुकूजद्विजकुलादिभिः ६ विजहारविगाह्यांभोह्रदिनीषुमहोदयः ॥ कुचकुंकुमलिप्तांगःपरिरब्धःस्वयोषिताम् ७ उपगीयमानोगंधर्वैर्मृदंगपणवानकान् ॥ वादयद्भिर्मुदावीणाःसूतमागधबंदिभिः ८ सेव्यमानोच्युतस्ताभिर्हसंतीभिश्चरचक्रैः ॥ प्रतिषिंचन्विचिक्रीडेमुखरःशक्तिभिःस्वयम् ९ ताःक्लिन्नवस्त्रविवृतोरुकुचप्रदेशाःसिंचंत्यउद्धृतबृहत्कबरप्रसूनाः ॥ कांतस्यचेतनजिहीर्षतयोपगुह्यजातस्मरोत्स्मयलसद्वदनाविरेजुः १० कृष्णस्तुतत्स्तनविषज्जितकुंकुमस्रक्क्रीडाभिसंगतसकुंतलकुंदगंधः ॥ सिंचन्मुहुर्युवतिभिःपरिषिच्यमानोरेमेकरेणुभिरिवेभपतिःपरीतः ११

मितिषष्ठीवृतीयार्थे ७ वीणाइतिद्वितीया८ रेचकैःजलप्रक्षेपणचर्मपात्रैः शक्तिभिर्भार्यादिभिःसह ९ क्लिन्नान्यार्द्राणिवस्त्राणियासांताः विवृताउरुप्रदेशाःकुचप्रदेशाश्चयासांताः बृहंतिकबराणिबृहत्कबराणिउद्धृतानिउन्मुक्तानिबृहत्कबरपूरितानिप्रसूनानियासांताः कांतस्यकमनीयस्यकृष्णस्य चेतनजिहीर्षयाचित्तवशीकरणेच्छया उपगूह्यनउपगूहनक्रिययाजातेनाविर्भूतेनस्मरोत्स्मयेनउत्कृष्टेनमंदस्मितेनलसंतिवदनानियासांताः १० तासांस्तनेभ्यःविषज्जितानिसंक्रांतानिकुंकुमानितत्स्तनविषज्जितकुंकुमानितैर्मिश्रास्रग्यस्यसतथा कुंतलैःसहवर्त्तमानःसकुंतलः क्रीडायामतिसंगतश्चायंसकुंतलश्चकुंदगंधश्चतथाकुंदपुष्पवत्गंधोयस्यसतथासिंचन्जलमितिशेषः ११

१९ २० त्रिवक्रायाःसैरंध्याः सनारदस्तस्मैस्वांशेष्यायअखंडितावत्तपूर्वापरानुभवस्मरणंसमर्थज्ञानंददा २२ यत्रनारदस्तात्पर्यतत्रपरानंदाधिपत्यप्राप्तुं [illegible]
न्भवेत् यत्रयस्मिंस्तंत्रेस्त्रीशूद्रादीनांवैष्णवःसंस्कारःस्मृतःविष्णुविषयानुष्ठानेनशरीरशुद्धिःकथिता २२ तनुजानांपुत्राणां २३ २४ पौत्रीं पुत्रपुत्रीदौहित्रःदुहितुःपुत्रःअनिरुद्धः निहतेरुक्मिण्याश्च
लेनाब्रवीत्साध्वसाधुवा रुक्मिणीबलयोराजन्स्नेहभंगभयाद्धरिरित्यनेनसर्वसमस्यहरेःस्नेहभंगभयमुच्यतेतत्कथंघटतइतीयमाशंका नरेनेहभंगोदव्यारतुनभयेकशवस्यच स्नेहभीतइवाथापिनोचेरु
क्मिवधेहरिरित्यादिनापरिहर्तव्या अत्रश्रीमद्भगवत्पादैःसिंहावलोकनन्यायेनाध्यापेयत्तासूचनापचेदंप्रमाणमुक्तं मौसलान्मुसलयुद्धात् २५ २६ एतस्मिन्कुलअधनादिदोषयुक्तानजज्ञिरइत्यन्वयः
२७ तेषांयदुवंशप्रसूतानां २८ संख्याज्ञानाभावेपितदाचार्याणांसंख्यांकामपिश्रावयामीत्याह तिस्रइति २९ यत्रयेषां ३० देवांशानांयादवानांअवन्यामुत्पत्तुंनिमित्तमाह देवेति ३१ यादवादे

प्रद्युम्नश्चारुदेष्णश्चदीप्तिमान्भानुरेवच ॥ सांबोमित्रोबृहद्भानुर्भानुर्विंदोवृकोरुणः १९ पुष्करोदेववाहुश्चचक्रदेवःसुनंदनः ॥ चित्रभानुर्वरूथश्चकविर्न्य
ग्रोधएवच २० त्रिवक्रायाविशोकश्चपुत्रःकृष्णमनुव्रतः ॥ आसीच्छिष्योनारदस्यददौचित्तमखंडितम् २१ येनोक्तंसात्वतंतंत्रंयज्ज्ञात्वामूर्तिमान्भवे
त् ॥ यत्रस्त्रीशूद्रदाशानांसंस्कारोवैष्णवःस्मृतः २२ एतेषामपिराजेंद्रतनुजानांमधुद्विषः ॥ प्रद्युम्नआसीत्प्रथमःपितृवद्रुक्मिणीसुतः २३ सरुक्मि
णोदुहितरमुपयेमेमहारथः ॥ तस्यांततोऽनिरुद्धोभून्नागायुतबलान्वितः २४ सचापिरुक्मिणःपौत्रींदौहित्रींजगृहेततः ॥ वज्रस्तस्यामभूद्यस्तुमौसलादव
शेषितः २५ प्रतिबाहुरभूत्तस्मात्सुबाहुस्तस्यचात्मजः ॥ सुबाहोरुग्रसेनोभूच्छतसेनस्तुतत्सुतः २६ नह्येतस्मिन्कुलेजाताअधनाअबहुप्रजाः ॥
अल्पायुषोऽल्पवीर्याश्चअब्रह्मण्याश्चजज्ञिरे २७ यदुवंशेप्रसूतानांपुंसांविख्यातकर्मणाम् ॥ संख्यानशक्यतेकर्तुमपिवर्षायुतैर्नृप २८ तिस्रःकोट्यः
सहस्राणामष्टाशीतिशतानिच ॥ आसन्यदुकुमाराणामाचार्याइतिनःश्रुतम् २९ संख्यानंयादवानांकःकरिष्यतिमहात्मनाम् ॥ यत्रायुतानामयुतंरक्ष
न्नास्तेसआहुकः ३० देवासुराहवहतायेदैतेयासुदारुणाः ॥ तेचोत्पन्नामनुष्येषुप्रजादृप्ताबबाधिरे ३१ तन्निग्रहायहरिणाप्रोक्तादेवायदोःकुले ॥ अव
तीर्णाःकुलशतंयेषामेकाधिकंनृप ३२ तेषांप्रमाणंभगवान्प्रभुत्वेचाभवद्धरिः ॥ येचानुवर्तिनस्तस्यववृधुःसर्वयादवाः ३३ शय्यासनाटनालापक्रीडा
स्नानाशनादिषु ॥ नविदुःसंतमात्मानंवृष्णयःकृष्णचेतसः ३४ ईजेक्रतुभिरात्मानंसर्ववेदार्थसंग्रहम् ॥ स्वयोगमायारचितैःकुरुक्षेत्रेद्विषट्समाः ३५
कृष्णगाध्यसितावंतिरामाचार्योद्धवेश्वरः ॥ दीक्षितोग्रण्यपत्नीभिःपुण्यश्लोकसहाग्रणीः ३६

वाइत्यत्रकिंप्रमाणमत्राह कुलशतमिति ३२ श्रीकृष्णोभगवान्तेषांप्रभुत्वेसामर्थ्येदैवेप्रमाणं यतःश्रीकृष्णोनारायणावतारःप्रसिद्धःतेषाममानुषसामर्थ्येहेतुश्च ततोयादवादेवाइतिसिद्धं एतदेवदृढी
करणायपुनर्वक्ति येचेति ३३ स्वामिनंनविदुःशय्यादिषुसंतंसहवर्तमानंआत्मानंस्वरूपभूतंश्रीनारायणं ३४ सर्ववेदार्थत्वेनसर्ववेदविषयत्वेनसम्यग्ग्रहोग्रहणंयस्यसतथातंस्वयोगमायया स्वरूपसामर्थ्ये
नरचितैरुत्पादितैः ३५ कृष्णोवेदव्यासः गार्ग्यिर्विश्वामित्रःअसितःआवंतिःसांदीपनिःरामःपरशुरामःएतेआचार्यायस्यकृष्णस्यसःउद्धवस्यईश्वरःउद्धवेश्वरःकृष्णगाध्यासितावंतिरामाचार्यश्चासौ
उद्धवेश्वरश्चतथा अग्रण्यपत्नीभिःरुक्मिण्यादिश्रेष्ठपत्नीभिःसहसंदीक्षितः अग्रणीःसर्वोत्तमः ३६

श्रीकृष्णस्मरणार्थंसंक्षिप्यतद्गुणान्कथयति तीर्थमिति तीर्थंकीर्तिलक्षणंनृणांचक्रेयत्पः यदुष्वजनिप्रादुर्भूतःयस्यपादशौचंपादप्रक्षालनजलंस्वःसरित्स्वर्गनदीगंगाभूत्यस्यस्वरूपंऐश्वर्यादिषड्गुणैराप्तंपूर्ण यस्यउरसिवक्षसोपरिरमासर्वदास्ते यस्यशास्त्रंशासकंवचनंतत्प्रमाणंलोकस्येतिशेषः यच्छास्त्रंवेदादिशास्त्रंतत्प्रमाणामितिवासदसद्व्यक्तयःकार्यकारणव्यक्तयः यदनुयस्यानंतरंविद्यमानायदनुकूलत्वे नसत्तासंबंधिन्यः धर्मायत्रयद्विषयत्वेनवर्तेतेतस्यकृष्णस्यैतत्क्षितिभारहरणंनचित्रं किंत्वस्माकमेव हेत्वंतरमाह कालेति १७ देवकीजन्मवादःदेवकीपुत्रत्वेनवादःकीर्तिर्यस्यसतथासजननिवासः जगन्निवासोजयति कथमत्राह नियमेति भूभारक्षपणार्थंनियमेनभूमौकृतानिपदाब्जानिपादन्यासपद्मानियानितैः स्वदोर्भिश्चदस्युपीडांकुर्वन्नितिशेषः उभयदृशीनांअंतर्बहिःस्थितरूपस्यदृशिःदर्शनंये षांतेषांमुदंकुर्वन् अबलानांस्त्रीणांश्रीनिकेतात्ममूर्त्यालक्ष्मीमंदिरात्मस्वरूपेण स्निग्धहासेक्षयास्निग्धमंदस्मितशोभितरूपकटाक्षनिरीक्षणेनच स्मरवपुःकाममूर्तिरिवस्थितः १८ जगतआदौम

तीर्थंचक्रेनृणांयोयदजनियदुषुस्वःसरित्पादशौचंषड्भिश्चाप्तंस्वरूपंपरउरसिरमासर्वदायस्यचास्ते ॥ यच्छास्त्रंचप्रमाणंयदनुचसदसद्व्यक्तयोयत्रधर्माःकृष्ण स्यैतन्नचित्रंक्षितिभरहरणंकालचक्रायुधस्य ३७ जयतिजननिवासोदेवकीजन्मवादोनियमकृतपदाब्जैर्दस्युपीडांस्वदोर्भिः ॥ मुदमुभयदृशीनांश्रीनिकेता त्ममूर्त्यास्मरवपुरबलानांस्निग्धहासेक्षयाच ३८ योह्यात्माजगदादिमध्यनिधनोयोऽव्यक्तजीवेश्वरोयःसृष्ट्वेदमनुप्राविष्टऋषिणाचक्रेपुनःसंहिताम् ॥ यं संपद्यजहात्यजामनुशयीसुप्तःकुलायंयथातंकैवल्यनिरस्तयोनिमभयंध्यायेदजस्रंहरिम् ३९ इत्थंपरस्यनिजधर्मरिरक्षयात्तलीलातनोस्तदनुरूपविडंब नानि ॥ कर्माणिकर्मकषणानियदूत्तमस्यगायेदमुष्यपदयोरनुवृत्तिमिच्छन् ४० मर्त्यस्तयानुसवेमधितयानुवृत्त्याश्रीमत्कथाश्रवणकीर्त्तनचिंतयैति ॥ तद्धामदुष्करकृतंजनतापवर्गंग्रामाद्वनंक्षितिभुजोपिययुर्यदर्थे ४१

ध्येनिधनेवर्त्ततइतिजगदादिमध्यनिधनः जगदुत्पत्तिस्थितिसंहारकर्ता अव्यक्तजीवयोरीश्वरः ऋषिणाव्यासात्मनाभागवतींसंहितां अनुशयीजीवःयंसंपद्यप्राप्य अजांबंधकशक्तिंजहाति सतासो म्यतदासंपन्नोभवतीतिश्रुतेः सुप्तःपरमात्मानंप्राज्ञंप्राप्तः यथाकुलायंशरीराभिमानंत्यक्त्वास्ते तथाकैवल्येनसच्चिदानंदस्वरूपस्थित्यानिरस्तयोनिंनित्यनिरस्तप्रकृतिम् ३९ इत्थंएवंविधस्ययदूत्तमस्य कर्माणिविक्रमलक्षणानिगायेदित्यन्वयः निजधर्मरिरक्षयास्वकल्पितधर्मरक्षणेच्छया तस्यानुकूलविडंबनानिकर्मकषणानिदुष्कर्मनिराकरणसमर्थानि अनुवृत्तिंअनुगमनमिच्छन् ४० मर्त्यःतयानु वृत्त्यातस्यहरेर्धामलोकमेति कीदृश्या श्रीमत्याःकथायाःश्रवणकीर्तनचिंतनलक्षणया दुष्करेणतपसाकृतंसाधितं जनतायाःक्रियासाध्यफलरूपंजनतापवर्गं यस्यहरेर्धामार्थेक्षितिभुजोपिग्रामाद्वनं ग्रामंविहायवनंययुःयांति किंपुनरन्यइति ४१

स्कंधार्थमुपसंहरति यइदमिति व्यासपुत्रैःशुकादिभिः जगतोऽघपापभिनत्तीतिजगदघभित्तद्भक्तानांकर्णावर्तसकर्णालंकारायमान अघणादिकुलभाव भगवद्यान सेवनानांकर्णावर्तत्व णादिकुर्वताइत्थंभाव्यमित्यतउक्तं भगवतीति सर्वोत्तमोपिभगवान्गुणभावंजनार्दनः । दर्शयेद्वासुदेवोपिह्यात्मनोजीवितामपि अज्ञाशक्तादिभावरतुकुतस्तस्याखिलेशितुः । कुतश्चजीवितातस्यप्रधानपुरुषेशितुः ॥ कुतोदोषाःसर्वगुणपूर्णस्यानंदवारिधेरित्येतत्प्रमाणंअज्ञननेनकृष्णेक्रियमाणसर्वशंकानिराकरणार्थंभगवत्पादैःस्कंधांतेदर्शितमितिज्ञातव्यमिति ॥ ४२ ॥ योऽयाचित्रिदशैःकुमारहृतयेवाता

सूतउवाच ॥ यइदमनुशृणोतिश्रावयेद्वामुरारेश्चरितममृतकीर्त्तेर्वर्णितंव्यासपुत्रैः ॥ जगदघभिदलंतद्भक्तकर्णावर्तंसंभगवतिकृतचित्तोयातितत्क्षेमधाम ॥ ४२ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेउत्तरार्धेश्रीकृष्णावतारचरित्रेत्र्यधिकशततमोध्यायः ॥ १०३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

रियेनक्षितौजन्मेवेनसुरासुहृत्समुदयोयेनत्रिलोक्यापिसा ॥ येनाधापियुधिष्ठिरोनिजपदेधर्मोपियेनांकुरिश्रीकृष्णंतमकृष्णकृष्णदयितंवंदामहेसंततम् ॥ १ ॥ पदरत्नावलिर्नामदशमस्कंधसंगता ॥ कृष्णप्रीत्यासमाप्तेयंविद्वन्मानसहर्षिणी ॥ २ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेश्रीमन्महेन्द्रतीर्थश्रीपदशिष्यविजयध्वजकृतपदरत्नावल्यांटीकायामुत्तरार्धेत्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

॥ इति श्रीमद्भागवते दशमस्कंधे उत्तरार्धः समाप्तः ॥

॥ अथ श्रीमद्भागवते एकादशः स्कंधः प्रारभ्यते ॥

॥ श्रीवेदव्यासायनमः ॥ जयतिजगतिजन्माद्यस्यविश्वस्ययस्मादमलनिगममुख्यावेद्यमाहात्म्यधाम ॥ द्रुहिणतनयऊचेशौरयेयत्स्वरूपंयदुपतिरपियास्यन्नुद्धवायस्वधाम १ वेदव्यासमहंवंदेवेदव्यासे कवेदिनम् ॥ वेदव्यासजनारातिंवेदव्यासमुनीनपि २ रत्नानामंबुधिःपात्रंतेजसामुष्णदीधितिः ॥ एवमेकादशस्कंधोवेदांतार्थैकसंनिधिः ३ दशमस्कंधरथ्यायागत्वांतंसार्थवित्पुनः॥ गाहएकादशस्कंधतीर्थविष्णुपदीमिव ४ ॥ इहनानाव्यसनराशिभारावभुग्नशिरसांकलिमलावकुंठितमनसांदुःखपरिहारसुखावाप्तीचाकांक्षमाणानांतदुपायमजानतांपुंसामुपकारायकरुणाकरेणबादरायणेनकृतभागवतपुराणकल्पतरोरनेकस्कंधपुष्पराशेर्मकरंदभूतएकादशस्कंधआरभ्यते। तत्रएकादशस्कंधमुत्थापयितुंवृत्तमनुवदति कृत्वेति जविष्ठमितिपाठेबृहत्तममित्यर्थःभारविशेषणम् यविष्ठमितिनीचमित्यर्थःकलिविशेषणम् स्वगोत्रकलहस्यनिंदितत्वात् अवतारयन्अवतारयितुकामः ताच्छीलिकार्थेशतृप्रत्ययःभुवोभारंनिरहरदितिशेषेणान्वयःकथमित्यतउक्तम् दैत्यवधंकृत्वेति अनेननस्वप्रयोजनार्थंकिंतुपरार्थंइति ज्ञातव्यम् १ एतदेवविवृणोति येकोपिताइति ईशःक्षितिभारंनिरहरदित्यन्वयः इदंनिर्हरणमपिस्वैश्वर्यद्योतकामितिज्ञापनायेशेतिपदम् येसपत्नैःकृतैर्दुर्वादादिभिःसुबहुकोपिताःपांडुसुतास्तान्निमित्तं कृत्वाइतरेतरतःसमेतान्परान्शत्रून्हत्वा २ भूभारानिर्हरणप्रकारंवक्ति भूभारेति किमचिंतयदत्राह मन्यइति अवनेर्भारोगतोपिअगतोननुइतिमन्यतेत्रहेतुर्यदिति नन्विदमप्यन्यतःप्रा

श्रीशुकउवाच ॥ कृत्वादैत्यवधंकृष्णःसरामोयदुभिर्वृतः ॥ भुवोवतारयन्भारंयविष्ठंजनयन्कलिम् १ येकोपिताःसुबहुपांडुसुताःसपत्नैर्दुर्यूतहेलनकचग्रहणादिभिस्तान् ॥ कृत्वानिमित्तमितरेतरतःसमेतान्हत्वापरान्निरहरत्क्षितिभारमीशः २ भूभारराजपृतनायदुभिर्निरस्यगुप्तैःस्वबाहुभिरचिंतयदप्रमेयः ॥ मन्येऽवनेर्ननुगतोप्यगतोपिभारोयद्यादवंकुलमहोअविषह्यमास्ते ३ नैवान्यतःपरिभवोस्यभवेत्कथंचिन्मत्संश्रयस्यविभवोन्नहनस्यनित्यम् ॥ अंतःकलिंयदुकुलस्यविधायवेणुसंघर्षजंशमयिष्यतिविभावसुर्यत् ४ एवंव्यवसितोराजन्सत्यसंकल्पईश्वरः ॥ शापव्याजेनविप्राणांसंजह्रेस्वकुलंविभुः ५ स्वमूर्त्यालोकलावण्यनिर्मुक्त्यालोचनंनृणाम् ॥ गीर्भिस्तांस्मरतांचित्तंपदैस्तानीक्षतांक्रियाः ६ आच्छिद्यकीर्तिंसुश्लोकांवितन्वन्नंजसानुकौ ॥ तमोनयातरिष्यंतीत्यगात्स्वंपदमीश्वरः ७ ॥ राजोवाच ॥ ब्रह्मण्यानांवदान्यानांनित्यंवृद्धोपसेविनाम् ॥ विप्रशापःकथमभूद्वृष्णीनांकृष्णचेतसाम् ८ यन्निमित्तोयदोःशापोयादृशोद्विजसत्तम ॥ कथमेकात्मनांभेदएतत्सर्ववदस्वमे ९

प्रपरिभवंकिनस्यादत्राह नैवेति विभवेनोन्नहनंसमृद्धिर्यस्यतत्तथातस्यतस्मादयमुपायइत्याह अंतःकलिमिति वेणुसंघस्यांतःकलिर्मिथःसंघर्षणलक्षणःतस्माज्जातंवह्निं शांतिंमंगलंधाम शांतीप्रशममंगलेइतियादवः यद्वा अंतःकलिंशांतियदुकुलस्यनाशहेतुम् ४ चिंताफलमाह एवमिति ५ पुनर्हरिणाकिमकारीत्यत्राह स्वमूर्त्येति ईश्वरःस्वपदमगादित्यन्वयःकिंकृत्वेति लोकलावण्येषुसमुदितेषुयाबहुमानबुद्धिःतस्यानिर्मुक्तिर्ययासातथातयास्वमूर्त्यानृणांलोचनंआच्छिद्यआकृष्यगीर्भिःसहतांमूर्तिंस्मरतांनृणांचित्तमाच्छिद्य पदैःपादन्यासैःतांपश्यतांजनानांक्रियाःकर्माण्याच्छिद्यद्वापादसौंदर्यादिगुणानिमग्नानांअन्यक्रियासुमनोनचलतीतितामीक्षतांपदैराच्छिद्य ६ कौभूमौसुष्ठुश्लोकःस्तुतिर्यस्याःसासुश्लोकातांकीर्तिमंजसातत्त्वेनावितन्वन् विस्तारयन् किंप्रयोजनमत्राह तमइति अनयाकीर्त्यातमस्तरिष्यंतीतिकृत्वा ७ श्रुतविप्रशापोराजायदुनाअसंभावितोयमितिभावेनपृच्छति ब्रह्मण्यानामित्यादिना शापासंभवेब्रह्मण्यादित्रयोहेतवः ८ यदोःकुलस्ययन्निमित्तःकिंनिमित्तःयादृशःकीदृशःएकात्मनांएकमनस्कानाम् भेदोमिथोवैरलक्षणः ९

शुकःप्रश्नंप्रवदन्पुनरुक्तंकरोति विभ्रदित्यादिना सकलसुंदरगुणानांसान्निवेशानेधानस्थानंधामगृहमास्थापयगृहास्थत्वत्यर्थः १० प्रश्नपारहरात् कमाणात पुण्यानवह॥नपुण्यकारण॥नयदु देवउग्रसेनस्तस्यगेहेउग्रसेनाधिकृतद्वारवत्यांनिवसताकालात्मनाऽऽगेननिसृष्टाःप्रेरिताःपिंडारकंक्षेत्रंप्राप्ताइत्यन्वयः ११ १२ उपसंगृह्यसांवमितिशेषः १३ अंतर्वत्नीगर्भिणी असितेक्षणानीलने त्रा १४ १५ प्रलब्धाःवंचिताः सद्योर्थेसहसाहेतुशून्येयुक्तेपिसांप्रतमितियादवः हेनंदाःनिर्भाग्याः १६ तस्मिन्नुदरे १७ किंदुष्कृतम् १८ १९ २० २१ तरलैस्तरंगैःवेलायांती रे लग्नानिसंसक्तानि एरकादीर्घसूचींमुखतृणविशेषाः २२ शल्येपुंशल्याख्यशरंलुब्धकोव्याधः २३ सर्वेषामर्थःपुरुषार्थोपस्मात्सतथासर्वैरर्थ्यतइतिवा ॥ २४ ॥ इतिश्रीभागव

॥ बादरायणिरुवाच ॥ बिभ्रद्वपुःसकलसुंदरसन्निवेशंकर्माचरन्भुविसुमंगलमाप्तकामः ॥ आस्थायधामरममाणउदारकीर्तिःसंहर्तुमैच्छतकुलंस्थितकृत्यशे षः ॥ कर्माणिपुण्यनिवहानिसुमंगलानिगायञ्जगत्कलिमलापहराणिकृत्वा ॥ कालात्मनानिवसतायदुदेवगेहेपिंडारकंसमगमन्मुनयोनिसृष्टाः ११ विश्वा मित्रोसितःकण्वोदुर्वासाभृगुरंगिराः ॥ कश्यपोवामदेवोत्रिर्वसिष्ठोनारदादयः १२ क्रीडंतस्तानुपव्रज्यकुमारायदुनंदनाः ॥ उपसंगृह्यपप्रच्छुरविनीताविनीतवत् १३ तेवेषयित्वास्त्रीवेषैःसांबंजांबवतीसुतम् ॥ एषापृच्छतिवोविप्राअंतर्वत्न्यसितेक्षणा १४ प्रष्टुंविलज्जतीयुष्मान्प्रब्रूताऽमोघदर्शनाः ॥ प्रसो ष्यंतीसुतकामाकिंस्वित्संजनयिष्यति १५ एवंप्रलब्धामुनयस्तानूचुःसहसानृप ॥ जनयिष्यतिवोमंदामुसलंकुलनाशनम् १६ तच्छ्रुत्वातेति संत्रस्ताविमुच्यसहसोदरम् ॥ सांबस्यदद्दशुस्तस्मिन्मुसलंखल्वयस्मयम् १७ किंकृतंमंदभाग्यैर्नःकिंवदिष्यंतिनोजनाः ॥ इतिविह्वलितागेहाना दायमुसलंययुः १८ तच्चोपनीयसदसिपरिम्लानमुखश्रियः ॥ राज्ञआवेदयांचक्रुःसर्वयादवसन्निधौ १९ श्रुत्वाऽमोघंविप्रशापंदृष्ट्वाचमुसलंनृप ॥ वि स्मिताभयसंत्रस्ताबभूवुर्द्वारकौकसः २० तच्चूर्णयित्वामुसलंयदुराजःसआहुकः ॥ समुद्रसलिलेप्रास्यल्लोहंचास्यावशेषितम् २१ कश्चिन्मत्स्योग्रसील्लोहं चूर्णानितरलैस्ततः ॥ ऊह्यमानानिवेलायांलग्नान्यासन्किलैरकाः २२ मत्स्योगृहीतोमत्स्यघ्नैर्जालेनान्यैःसहार्णवे ॥ तस्योदरगतंलोहंशल्येषुंलुब्ध कोऽकरोत् २३ भगवान्ज्ञातसर्वार्थईश्वरोपितदन्यथा ॥ कर्तुनैच्छद्विप्रशापंकालरूप्यन्वमोदत ॥ २४ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेप्रथमो ध्यायः ॥ १ ॥ ॥ श्रीशुकउवाच ॥ गोविंदभुजगुप्तायांद्वारकायांकुरूद्वह ॥ अवात्सीन्नारदोऽभीक्ष्णंकृष्णोपासनलालसः १ कोनुराजन्निंद्रियवा न्मुकुंदचरणांबुजम् ॥ नभजेत्सर्वतोमृत्युरुपास्यममरोत्तमैः २

तेमहापुराणेएकादशस्कंधेश्रीमद्वेंद्रतीर्थपूज्यपादशिष्यविजयध्वजतीर्थकृतौप्रथमोध्यायः ॥ १ ॥ ॥ अतःकतिपयैरध्यायैर्वसुदेवनारदसंवादच्छलेनहरेस्तत्त्वंतदवाप्तिसाधनंतदधिकारिलक्षणंचेत्यादिनरूपयति तत्रयाद्दच्छिकस्यनारदस्यांतःपुरवासिनावसुदेवेनसहसंगमःकथंसंजाघटीतिशंकांपरिहर्तुमाह गोविंदेति वनवासिनोनारदस्यजनसंकुलपुरनिवासहेतुःकृष्णेति १ श्रोत्रादींद्रियशक्तिमतःपुंसोपिहरिश्रवणादिश्रद्धातिशयोजायते किंपुनःसम्यक्विज्ञाततत्त्वस्य नारदस्येतिभावेनाह कोन्विति सर्वतोमृत्युःमरणंयस्यसतथा २

अस्तूक्तंप्रकृतेकिमत्राह तमेकदेति १ स्तुत्यासतांतोषोद्रेकात्प्रातेत्यार्थकथनबुद्धचुल्लासाभवतरियाशयेननारदंस्तौति भगवन्नित्यादिना स्वस्त्ययेइति धिरायेत्यादिप्रयोगवत् यात्रासंचारणं पित्रोर्यात्राशिशूनां उत्तमश्लोकःहरिःसएववर्त्मयस्यसतथा यद्वा उत्तमोहरिस्तस्यश्लोकइवश्लोकोयेषांतेतथामहांतस्तेषांवर्त्मयस्यसतथामहन्मार्गानुवर्तीत्यर्थःतस्य ४ ननुसर्वभूतसुहृच्चेसात्विक त्वंप्रयोजकंतदेवानामप्यस्त्यतःकिंविशेषतःस्तूयतइतितत्राह भूतानामिति भूतानित्रिविधानिसात्विकराजसतामसामिश्राणीति तत्रदेवानांचरितंसात्विकभूतानांसुखायैवआत्मभजनेबुद्धिमुत्पाच सुखलक्षणफलदानं तामसानांदुःखायतद्विपर्ययबुद्धिमुत्पाचदुःखलक्षणफलदानं राजसानांसुखदुःखलक्षणमिश्रफलायमिश्रकर्मबुद्धिमुत्पाचसुखादिमिश्रफलदानं इदं चशब्दगृहीतं द्वितीयश्चशब्दः समुच्चयार्थः भवादृशानांचरितंनतथेत्याह सुखायेति एवशब्देनदुःखंव्यावर्तयति अच्युतात्मनामित्यनेनव्यापारांतरंनिवारयति हिशब्देनतेषांतदस्तीतिसूचयति देवानामात्मभजनेबुद्धिमु त्पाद्यानुत्पाद्यचसुखादिफलदावृत्वमस्तीत्युक्तंतत्स्पष्टयति भजंतीति येपुरुषाःयथायेनप्रकारेणदेवान्भजंतितेदेवाअपितथाकृतकर्मानुसारेणतान्पुरुषान्भजंतिफलदानेनसश्रद्धाभवंति नचदेवेषुवैषम्या दिकमाशंकनीयमित्येतन्निदर्शनेनदर्शयति छायेति कर्मसचिवाः छायावत्पुरुषकृतकर्माधीनाछायायथापुरुषानुकृतातथेत्यर्थः भवादृशानतथेत्याह साधवइति आत्मनोभजनेबुद्धिमुत्पाद्यफलदाःसुराः।

तमेकदातुदेवर्षिर्वसुदेवोगृहागतम् ॥ अर्चितंसुखमासीनमभिवंद्येदमब्रवीत् ३ वसुदेवउवाच ॥ भगवन्भवतोयात्रास्वस्तयेसर्वदेहिनाम् ॥ कृपणानां यथापित्रोरुत्तमश्लोकवर्त्मनः ४ भूतानांदेवचरितंदुःखायचसुखायच ॥ सुखायैवाहिसाधूनांत्वादृशामच्युतात्मनाम् ५ भजंतियेयथादेवान्देवाअपित थैवतान् ॥ छायेवकर्मसचिवाःसाधवोदीनवत्सलाः ६ ब्रह्मंस्तथापिपृच्छामोधर्मान्भागवतांस्तव ॥ यान्श्रुत्वाश्रद्धयामर्त्योमुच्यतेसर्वतोभयात् ७ अ हंकिलपुरानंतंप्रजार्थेभुविमुक्तिदम् ॥ अपूजयंनमोक्षायमोहितोदेवमायया ८ यथाविचित्रव्यसनाद्भवेस्मिन्विश्वतोभयात् ॥ मुंचेमह्यंजसैवाद्धातथानः शाधिसुव्रत ९ श्रीशुकउवाच ॥ राजन्नेवंकृतप्रश्नोवसुदेवेनधीमता ॥ प्रीतस्तमाहदेवर्षिर्हरेःसंस्मारितोगुणैः १०

उत्तमानांजनानांचनिरुष्टानांविपर्ययः । शुभाशुभफलानांतुकर्मणाविबुधाःसदा । प्रवर्तकायथायोग्यमृषयःकरुणांसदा । सुखमिच्छंतिभूतानांप्रायोदुःखासहानृणां । तथापितेभ्यःप्रवरादेवाएवहरेः प्रियाःइत्येतदस्मिन्नर्थेप्रमाणम् ६ ननुसाधुभ्योदेवानामुत्तमत्वेभीष्टार्थप्रश्नस्तान्प्रतिस्याद्यथावत्प्रश्नपरिहारवक्तृत्वसामर्थ्यादितितत्राह ब्रह्मन्निति यद्यपिदेवाःप्रशस्तानिश्चितार्थास्तथापिमानुषत्वेना स्मदृष्ट्यगोचरत्वाद्युष्माकंतन्निश्चितार्थज्ञानसामर्थ्यात्तत्संनिधानपात्रत्वाच्च वयंतुतवत्वांधर्मान्पृच्छामइत्यन्वयः ननुकिमत्राहिंसालक्षणोधर्मउतन्यायाचाराद्यन्यतमइत्यत्राह भागवतानिति अवश्य वक्तव्यत्वेतल्लक्षणमाह यानिति अनेनयद्धर्मश्रवणमपिसर्वभयमोचकंकिमुततदनुष्ठानमितिदर्शितम् ७ भवताभगवद्विषयधर्माचरणंकृतंकिमधुनातद्विषयप्रश्नइतितत्राह अहमिति ८ नन्वपुत्रस्यजीवत्पुत्र मुखदर्शनाल्लोकावाप्तिःश्रूयतेअतःकथंप्रजार्थइतिनिंदाध्वनिरितितत्राह यथेति अस्मिन्भवेजन्मनिविचित्रव्यसनात्नानाक्लेशात्विश्वतोभयाच्चयथांजसाक्षिप्रंमुंचेमहि तथापुनरद्धाप्रत्यक्षंशाधीत्यन्वयः अद्धाप्रत्यक्षसत्ययोरितियादवः अनेनवसुदेवस्यपुत्रीभूतश्रीकृष्णमुखेंदुदर्शनादशेषव्यसनाकुलसंसारान्मुक्तेर्निश्चितत्वेपिविशेषप्रश्नोलोकहितायेतिज्ञातव्यम् ९ वसुदेवेनपृष्टोनारदःकिंचित्तगुणोभूदि तिराज्ञोहार्दंचोद्यंपरिहरति राजन्निति हरेर्गुणैःसंस्मारितोहरिरितिशेषः १०

१ देवाः शुभाशुभकर्म कारयित्वा सुखदुःखफलं ददति साधवस्तु सुखमेव तथापि साधूनां देवापेक्षयाश्रैष्ठ्यं न इत्यर्थे ।

बुद्धिविकासापप्रष्टारस्तात सम्यागात विश्वस्यामाष्टस्यभावनमुत्पादनयन्परस्तत्तयातान् ११ [illegible]
र्थंकृतं एतदेवापिशब्देनासूचयत् ब्रह्महत्यासहस्रस्यपापंशाम्येत्कथंचन नपुनस्त्वदवज्ञानेकल्पकोटिशतैरपि इममर्थंहिशब्देनसूचयति १२ ममाप्यनेननपुण्यबुद्धिरभूदित्याशयेनाह त्वयेति नित्यं स्मृतोपीदानींविशेषतःस्मारितोगुणकथनप्रश्नेन १३ धीमत्त्वेनवसुदेवस्यनारदोक्तौविस्तंभेपिस्वकपोलकल्पितत्वेननश्रद्धेयामितिमंदाशंकापनोदायतत्प्रश्नपरिहारत्वेनजनकार्षभसंवादमितिहासंवक्ति अत्रेति १४ निश्चयजननायान्वयशुद्धिंकथयति प्रियव्रतइत्यादिना १५ अवतारप्रयोजनमाह मोक्षेति १६ यन्नाम्नाभारतमिति यस्यनाम्नाएतद्वर्षभारतमितिविख्यातंअद्भुतंपुण्यसाधननिमित्तत्वेन १७ तत्पदवींतस्यहरेःपदवीं अयनंलोकमित्यर्थः १८ तेषांमध्येनवास्यभूमंडलस्यनवद्वीपपतयःअभवन्तेषांमध्येएकाशीतिसंख्याताद्विजातयोबभूवुः किकर्माणइत्यत्राह कर्मेति कर्मतंत्रप्रणेतारः कर्मकांडप्रणेतारः १९ तेषांमध्येनवसंख्यातामुनयोभवन्तत्रापिविशेषमाह ऊर्ध्वमंथिनइति ऊर्ध्वमंथारेतएषामस्तीतिऊर्ध्वमंथिनःऊर्ध्वरेतसः संन्यासव्रतधारिणइत्यर्थः स्पष्टमाह श्रमणाइति श्रमणा

नारदउवाच ॥ सम्यगेतद्व्यवसितंभवतासात्वतर्षभ ॥ यत्पृच्छसेभागवतान्धर्मांस्त्वंविश्वभावनान् ११ श्रुतोनुपठितोध्यातआदृतोवानुमोदितः ॥
सद्यःपुनातिसद्धर्मोदेवविश्वद्रुहोपिहि १२ त्वयापरमकल्याणःपुण्यश्रवणकीर्तनः ॥ स्मारितोभगवानद्यदेवोनारायणोमम १३ अत्राप्युदाहरंतीममितिहासंपुरातनम् ॥ आर्षभाणांचसंवादंविदेहस्यमहात्मनः १४ प्रियव्रतोनामसुतोमनोःस्वायंभुवस्ययः ॥ तस्याग्नीध्रस्ततोनाभिर्ऋषभस्तत्सुतःस्मृतः १५ तमाहुर्वासुदेवांशंमोक्षधर्मविवक्षया ॥ अवतीर्णंसुतशतंतस्यासीद्ब्रह्मपारगम् १६ तेषांवैभरतःश्रेष्ठोनारायणपरायणः ॥ विख्यातंवर्षमेतद्य न्नाम्नाभारतमद्भुतम् १७ समुक्तभोगांत्यक्त्वेमांनिर्गतस्तपसाहरिम् ॥ उपासीनस्तत्पदवींलेभेवैजन्मभिस्त्रिभिः १८ तेषांनवनवद्वीपपतयोस्यसमंततः ॥ कर्मतंत्रप्रणेतारएकाशीतिर्द्विजातयः १९ नवाभवन्महाभागामुनयोह्यूर्ध्वमंथिनः ॥ श्रमणावातरशनाआत्मविद्याविशारदाः २० कविर्हरिरंतरिक्षःप्रबुद्धःपिप्पलायनः ॥ आविर्होत्रोथद्रुमिलश्चमसःकरभाजनः २१ तएतेभगवद्रूपंविश्वंसदसदात्मकम् ॥ आत्मनोव्यतिरेकेणपश्यंतोव्यचरन्महीम् २२

भिक्षवः तत्रापिविशेषमाह वातरशनाइतिवातएवरशनाकटिसूत्रंयेषांतेतथादिगंबराःपरमहंसाइत्यर्थः आत्मविद्यायांवेदांतशास्त्रेविशारदाःपटवः २० एतन्नामानिरुक्तिज्ञानादयमर्थःसिद्धइति तन्नामान्याह कविरित्यादिना द्रुतंमिलंमिथोमेलनंवेदार्थानामेकीकरणंयेनसतथा चाम्यांतिवेदतार्थिइतिचमावेदतार्थिपायिन इतेषुसारश्चमसःसृगतावितिधातोःडप्रत्ययः करेभांतंजनयतिप्रकाशयतीतिकरभाजनःहस्ताग्रलकवत्प्रतिभातवेदार्थइत्यर्थः २१ आत्मविद्यावैशारद्यंचात्मभेदज्ञानेनेतिभावेनाह तएतइति येमुनित्वेनोक्तास्तएतेमहीव्यचरन्नित्यन्वयःकिविशिष्टाः विश्वंपूर्णंसदसदात्मकंकार्यकारणव्यापिभगवद्रूपंआत्मनाजीवाद्व्यतिरेकेणवैलक्षण्येनपश्यंतइति यद्वा सदसदात्मकंकार्यकारणात्मकंभगवद्रूपंभगवतोमूर्तिंप्रतिमास्थानीयंविश्वंप्रपंचमात्मनोहरेर्व्यतिरेकेणपश्यंतइति यद्वा विश्वमंतःप्रविश्यवर्तमानंसदसदात्मकंबहिश्चजगत्व्याप्यवर्तमानंभगवद्रूपंब्रह्मसंज्ञमात्मनोंतर्यामिणोहरेरव्यतिरेकेणाभेदेनपश्यंतः अंतर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थतइतिश्रुत्यर्थरसमनुभवंतइत्यर्थः विश्वस्यपरमात्मनोऽभेददर्शनंसदसदात्मकमितिविशेषणेनविरुद्धमनंगीकारात्जहदजहल्लक्षणाप्यप्रामाणिकीत्युपेक्षणीयंतन्मतमिति २२

महीसंचरणंचारकाणामप्यस्तिकिंविशेषमहात्म्यमेषामत्राह अव्याहतेति मुक्ताःजीवन्मुक्ताःमुनिचारणादीनांभुवनानिलोकांश्चेतिसुरसिद्धादीनांलोकांश्चरंतीतिकिंकर्मवशात्रेतिआह कामामिति बलव ताप्रतिषेधेकामलोपिसंचरणंदुःशकंस्यादित्यतउक्तं अव्याहतेति २३ किमनेनप्रकृतइतितत्राह तएकदेति अंजनाभस्यहरेःपुत्राःआंजनाभाः २४ इदमुपगमनंनद्वेषजनकंनिमित्ताभावात् किंतुसंप्री तिजनकंतल्लक्षणदर्शनादित्याह तानिति उपतस्थिरेसांजलिपुटाउत्थायासेवंत २५ तत्रविदेहेनइतरेभ्यःकिंविशेषेणसेवितमत्राह विदेहइति अभिप्रेत्यसम्यग्ज्ञात्वा २६ ब्रह्मपुत्रोपमान्सनकादि तुल्यान्तांस्तुवन्पप्रच्छ अभीष्टमितिशेषः २७ स्तुतिप्रकारःकथ्यतेमन्यइत्यादिना २८ २९ किमभीष्टमप्राक्षीदत्राह अतइति यतोवैकुंठप्रियदर्शनंदुर्लभमतः करतलप्राप्तरत्नत्वात् भवतोयेनानिः श्रेयोनःस्यात्तदात्यंतिकंक्षेमंमंगलसाधनमिति मोक्षसाधनंपृच्छामइत्यर्थः कार्येणकारणमुपलक्ष्यतइतिन्यायोपपत्तेःनकेवलंप्रश्नप्रतिवचनाभ्यांतत्परिहारलक्षणंप्रयोजनंलभ्यते अपितुतयोश्चिरकाला

अव्याहतेष्टगतयःसुरसिद्धसाध्यगंधर्वयक्षनरकिन्नरनागलोकान् ॥ मुक्ताश्चरंतिमुनिचारणभूतनाथविद्याधरद्विजगवांभुवनानिकामम् २३ तएकदानिमेःसत्र मुपजग्मुर्यदृच्छया ॥ वितायमानमृषिभिरांजनाभामहात्मनः २४ तान्दृष्ट्वासूर्यसंकाशान्महाभागवतान्नृप ॥ यजमानोऽग्नयोविप्राःसर्वएवोपतस्थिरे २५ विदेहस्तानभिप्रेत्यनारायणपरायणान् ॥ प्रीतःसंपूजयांचक्रआसनस्थान्यथार्हतः २६ तान्रोचमानान्स्वरुचाब्रह्मपुत्रोपमान्नव ॥ पप्रच्छपरम प्रीतःप्रश्रयावनतोनृपः २७ विदेहउवाच ॥ मन्येभगवतःसाक्षात्पार्षदान्वोमधुद्विषः ॥ विष्णोर्भूतानिलोकानांपावनायचरंतिहि २८ दुर्लभोमानुषो देहोदेहिनांक्षणभंगुरः ॥तत्रापिदुर्लभंमन्येवैकुंठप्रियदर्शनम् २९ अतआत्यंतिकंक्षेमंपृच्छामोभवतोनघाः ॥ संसारेस्मिन्क्षणार्धोपिसत्संगःशेवधिर्नृ णाम् ३० धर्मान्भागवतान्ब्रूतयदिनःश्रुतयेक्षमम् ॥ यैःप्रसन्नःप्रपन्नायदास्यत्यात्मानमप्यजः ३१ ॥ नारदउवाच ॥ एवंतेनिमिनापृष्टावसुदेवमहत माः ॥ प्रतिपूज्याब्रुवन्प्रीत्याससदस्यर्त्विजंनृपम् ३२ कविरुवाच ॥ मन्येकुतश्चिद्भयमच्युतस्यपादांबुजोपासनमत्रनित्यम् ॥ उद्विग्नबुद्धेरसदात्मभा वाद्विश्वात्मनायत्रनिवर्ततेभीः ३३ येवैभगवताप्रोक्ताउपायाह्यात्मलब्धये ॥ अंजःपुंसामविदुषांविद्धिभागवतान्हितान् ३४ यानास्थायनरोराजन् नप्रमाद्येतकर्हिचित् ॥ धावन्निमील्यवानेत्रेनस्खलेन्नपतेदिह ३५

पेक्षितत्वेनप्रष्टृप्रवक्तृपुरुषयोश्चतावत्कालंस्थित्यपेक्षितत्वेनलब्धेनतत्संगेनसुखनिधिलक्षणंप्रयोजनंचेत्यभिप्रेत्यतत्संगंस्तौति संसारइति शेवधिः सुखनिधिः २० प्रधानसाधनेसाधनान्यपिवक्तव्यानीत्या ह धर्मानिति श्रुतयेश्रवणायक्षमंयोग्यं कल्याणीऋक्दक्षसंज्ञायोग्यायुक्ताहिताक्षमाइतियादवः २१ ३२ अब्रुवन्निितिबहुवचनात् यद्भयमुत्पन्नंतदल्पबुद्धेरेकस्यबहुभिर्विचक्षणैर्युगपदुच्यमानवचना र्थावधारणंदुःशकमितिनिवारयति कविरिति अत्रसंसारे असत्यमंगलेदेहादावहमित्याद्यात्मभावादुद्विग्नबुद्धेःपुरुषस्यनित्यमच्युतस्यहेयोपादेयांशरहितस्यहरेः श्रीपादपद्मोपासनमकुताश्चिद्भयं नकुतश्चिद्भयंयस्मात्ततथातदहंमन्यइब्रिममराद्धांतइत्यर्थः विशिनष्टि विश्वात्मनेति यत्रयस्मिन्नुपासनेकृतेविश्वात्मनासर्वात्मनासंसारभीतिर्निवर्तते तदेवानुष्ठेयंपुरुषेणेति ३३ हरेरंघ्रिनिषेवणमेवमुख्यो भागवतोधर्मइतिमनसिनिधायतदंगत्वेनोच्यमानायोगाअपिभागवतधर्माइत्याह येवाइति आत्मलब्धयेपरमात्मज्ञानाय भागवतान्धर्मानितिशेषः ३४ नप्रमाद्येतअनवधानवान्नभवति प्रमादो नवधानतेत्यभिधानात् आत्मानात्मविवेकज्ञानवान्स्यादित्यर्थः कथमिवेत्यस्मिन्नर्थेलुप्तोपमामाह धावन्निति यथानेत्रेउन्मील्यधावन्निहशर्करावतिस्थलेनस्खलेन्नपतेत्तथाभागवतधर्मरथाधिरूढः ३५

भगवत्कथितोपायविधिःकीदृशइतितत्राह कायेनेति । स्वभावंयोग्यतामनुसृतोनुगतःमनसासंकल्पाद्यधिकरणेनबुद्ध्यानिश्चयज्ञानाधिकरणेनआत्मनामत्यामननलक्षणज्ञानाधिकरणेनअहंकारमत्वपा
मीत्यादिलक्षणेनाहंकारेणवा कायादिनापदर्चनादिकंकरोतिसर्वक्रियामुस्वस्यास्वातंत्र्यज्ञानेनतत्सर्वंपरस्मैनारयणायासित्वतिसमर्पयेत् सोपमात्मप्रसादजनकत्वेनतज्ज्ञानोपायइतिभावः ३६ विप
क्षेबाधकतर्कमुद्भाव्यविपर्ययेवसानमाह भयमिति अस्मृतिरज्ञानंविपर्ययोऽन्यथाज्ञानं एतेईशादपेतस्यईशानुग्रहरहितस्यप्रकृतिबद्धस्यपुंसोपस्यहरेर्मायययेच्छयास्तः ताभ्यांअज्ञानान्यथाज्ञानाभ्यांद्वितीं
याभिनिवेशतःद्वितीयेदेहगेहादौअहंममेत्याभिनिवेशनादुरभिमानःस्यात्तस्माद्भयंसंसारलक्षणंस्यादितियस्मात्अतोगुरौपरमात्मदेवतायांचआत्मामनोपस्यसतथातस्मात्तज्ज्ञानवान्यथायोग्यंगुरुपरमपुरुष
योर्भक्तिकुर्वाणोबुधस्तंहरिमाभजेत्सर्वसमर्पणपूर्वकमुरासीतेत्यर्थः ३७ एतदेवसोदाहरणंविवृणोति अविद्यमानइति धियाध्यातुर्विषयानितिशेषःध्यायतोविषयानस्येतिस्मृतेः । पुंसईशाधीनत्वेन
स्वस्याविद्यमानोपिद्वयोदेहगेहादिःस्वकीयत्वेनावभातिहियस्मात् कथमिव यथास्वप्नपुरमनोरथःस्वप्नजाग्रत्त्वेननिधिमुत्खायकोशमापाद्यप्रकृतिवर्गमावश्यराज्यंकरिष्यामीतिमनोरथःसत्त्वेनप्रतीयते
तथादेहादावीशाधीनेस्वाधीनताबुद्धिःसंसारःतस्मात्तादृशसंसारनिवृत्तयेतत्कर्मतद्देहादिकर्मविषयोयस्यतत्तथातत्संकल्पविकल्पवृत्तियुक्तंमनःश्रीनारायणेनिदध्यात् ततोहरिप्रसादादभयंसंसारानिवृत्तिल
क्षणोमोक्षःस्यादित्यन्वयः । सर्वसमर्पणलक्षणोपासनाभावेब्रह्मज्ञानंनस्यात्तदभावेसंसारानिवृत्तिर्नस्यात्अतस्तदर्थंसर्वसमर्पणलक्षणमुपासनंकर्तव्यमितिभावः । आत्मनादेहगेहादिद्वयशब्देनभण्यते ।

**कायेनवाचामनसेंद्रियैर्वाबुद्ध्यात्मनावानुसृतःस्वभावम् ॥ करोतियद्यत्सकलंपरस्मैनारायणायेतिसमर्पयेत्तत् ३६ भयंद्वितीयाभिनिवेशतःस्यादीशाद
पेतस्यविपर्ययोऽस्मृतिः ॥ यन्माययातोबुधआभजेत्तंभक्त्यैकयेशंगुरुदेवतात्मा ३७ अविद्यमानोप्यवभातिहिद्वयोध्यातुर्धियास्वप्नमनोरथोयथा॥तत्कर्म
संकल्पविकल्पकंमनोबुधोनिदध्यादभयंततःस्यात् ३८ शृण्वन्सुभद्राणिरथांगपाणेर्जन्मानिकर्माणिचयानिलोके ॥ गीतानिनामानितदर्थकानिगाय
न्विलज्जोविचरेदसंगः ३९ एवंव्रतश्चप्रियनामकीर्त्याजातानुरागोद्रुतचित्तउच्चैः ॥ हसत्यथोरोदितिरौतिगायत्युन्मादवन्नृत्यतिलोकबाह्यः ४०**

अविद्यमानंजीवस्यप्रतिभातितदीयवत् । जाग्रद्वत्सुपथास्वप्नःप्रतिभातिमनोरथः विद्यमानवदेवैवंदेहादीशवशेस्थितं । विभातिस्ववशत्वेनसैषासंसृतिरुच्यते । तस्मात्तद्विषयंत्यक्त्वामनोविष्णौनिवेशये
दित्येतन्मानसिद्धमेतदर्थजातं नन्वत्रदेहादेरसत्त्वाभिप्रायेणस्वप्नादिदृष्टांतःकिंनस्यादितिचेन्न उदाहृतस्मृतिविरोधात् । तस्मात्स्वातंत्र्यस्यैवानिषेधःक्रियतइति । द्वयशब्देनभेदमनूद्यतन्निषेधःक्रियत
इत्यर्थोप्युक्तप्रमाणविरुद्धइत्युक्तमनाकुलमिति ३८ अथमपिभागवतोधर्मइत्याह शृण्वन्निति एवमात्मज्ञानोत्पादनसमर्थंभगवदुपासनांगभूतसर्वसमर्पणाख्यभागवतधर्ममनुष्ठितोदेहाद्यभिमानविधुरस्य
भगवदेकस्वातंत्र्यज्ञानिनोनिरंतरंहरौमनोनिवुंजमानस्यइयंप्रवृत्तिरित्यतोवाह शृण्वन्निति । तदर्थकानिजन्यकर्मविषयाणि ३९ एवंश्रवणाद्याचरतोपरोक्षज्ञानजननीभक्तिःस्यादित्याह एवंव्रत
इति । प्रियस्यहरेर्नामकीर्त्याजातानुरागःसंवर्धितभक्त्युद्रेकःअनेनभक्त्युद्रेकोनुमंतव्यइतिभावेनाह हसतीति लोकबाह्यइत्येनेनभक्तबाह्यविध्यंदर्शयति कश्चिल्लोकबाह्योलोकविलक्षणः कश्चिल्लोक
वद्बाह्यलिंगप्रदर्शकःकश्चिल्लोकवत्बाह्यवदुभयलक्षणोपेतश्च । तदुक्तं केचिदुन्मादवद्भक्ताबाह्यलिंगप्रदर्शकाः । केचिदांतरभक्ताःस्युःकेचिच्चैवोभयात्मकाः । मुखप्रसादाद्दार्ढ्याच्चभक्तिर्ज्ञेयानचान्यतः । हसना
दिलक्षणमुन्मादादावतिव्याप्तमित्यतउक्तंमुखप्रसादादिति । नन्वयमर्थोमुखेननोक्तइत्यतउक्तमथोइति । अथोशब्दोऽप्यर्थः हसनादेरतिव्याप्तत्वान्मुखप्रसादाद्यपेक्षितमित्यर्थः विकल्पार्थोवासचलो
कबाह्यइत्यनेनस्पष्टीकृतइति ४०

इदानीमेवंविधोपासकस्यहरेरुपासनार्थमधिष्ठानविशेषमाह खंवायुमित्यादिना खादीनांयानियानिशब्दप्रवृत्तिनिमित्तानितानिसर्वाणिहरेररीनत्वेनतदेकनिष्ठगुणावेदकानिउपासकानांचतत्तद्यो ग्यतावशात्तत्तदधिष्ठानबाहुल्यंचोपयुज्यते हरेरावासस्थानत्वाद्येषुतदुपासनाविधानमितिभावेनाह हरेरिति यत्किंचभूतमुत्पन्नंतत्सर्वंहरेःशरीरंविषयभोगायतनत्वादावासस्थानं यःपृथिव्यांति ष्ठन्पृथिव्याइत्यादिश्रुतेः प्रकर्षेणमनस्तन्नतंकुर्यात्तत्किंतदभेदेननेत्याह अनन्यामिति अन्यःस्वामीनाविद्यतेयस्यसोऽनन्यःतंब्रह्मपरिणामत्वेनसर्वस्यतच्छरीरत्वात्तदभेदेनोपासनोच्यतेचेतिचेन्न सर्वंहरेर्वैशत्वेनशरीरंतस्यभण्यतइत्याविरोधात् ४१ एवंखाद्यधिष्ठानेषुसन्निहितस्यहरेस्ततोभिन्नत्वेननतत्स्वामित्वेनचोपासनाभक्त्यादिपुष्टिंकरोतिनान्यथेतिसोदाहरणमाह भक्तिरिति खा दिषुस्थितंहरिंप्रपद्यमानस्योपासी नस्यतथापरेपरमात्मनिभक्तिःस्वेस्वस्मिन्ननुभावोस्वातंत्र्यज्ञानंअन्यत्रसंसारेविरक्तिरित्येषत्रिक.त्रिकत्वसंख्यांप्राप्तएककालःस्यादितिशेषः यथाबुभुक्षोरश्नतःपुंसोनुघा संप्रतिकवलंक्षुदपायःपुष्टिरुदरपूर्तिलक्षणातुष्टिरलंबुद्धिश्चेत्येतत्त्रयंस्यात् ४२ पूर्वोक्तार्थमनूद्यतत्फलमाह इतीति प्रीत्याभजतोन्वनंतरंभगवत्प्रबोधः भगवदपरोक्षज्ञानमनंतरंपूर्वस्मादधिकासंसारवि रक्तिरनंतरंअधिकाभक्तिरित्येतानिसाधनानिभागवतस्यभवंतीतियस्माच्चतोनंतरंसाक्षात्तुर्यावस्थालक्षणांपरामुत्तमांशांतिंस्वयोग्यांमुक्तिमुपैतीत्यन्वयः अत्रपूर्वाधिक्यविवक्षयाप्रबोधादीनांहेतुमद्भावक

खंवायुमग्निंसलिलंमहींचज्योतींषिसत्त्वानिदिशोद्रुमादीन् ॥ सरित्समुद्रांश्चहरेःशरीरंयत्किंचभूतंप्रणमेदनन्यम् ४१ भक्तिःपरेस्वेनुभवोविरक्तिरन्यत्रचैष त्रिकएककालः ॥प्रपद्यमानस्ययथाश्नतःस्युस्तुष्टिःपुष्टिःक्षुदपायोनुघासम् ४२ इत्यच्युतांघ्रिंभजतोनुवृत्त्याभक्तिर्विरक्तिर्भगवत्प्रबोधः॥भवंतिवैभागवतस्य राजन्ततःपरांशांतिमुपैतिसाक्षात् ४३ राजोवाच ॥ अथभागवतंब्रूतयद्धर्मोयादृशोदृणाम् ॥ यथाचरतियद्ब्रूतेयैर्लिंगैर्भगवत्प्रियः ४४ हरिरुवाच ॥ सर्वभूतेषुयःपश्येद्भगवद्भावमात्मनः ॥ भूतानिभगवत्यात्मन्येषभागवतोत्तमः ४५ ईश्वरेतदधीनेषुबालिशेषुद्विषत्सुच ॥ प्रेममैत्रीकृपोपेक्षायःकरोतिं समध्यमः ४६ अर्चायामेवहरयेपूजांयःश्रद्धयेहते ॥ नतद्भक्तेषुचान्येषुसभक्तःप्राकृतःस्मृतः ४७ गृहीत्वापींद्रियैरर्थान्योनद्वेष्टिनहृष्यति ॥ विष्णोर्मायामिमांपश्यन्सवैभागवतोत्तमः ४८

यतनंनाविरुद्धमितिज्ञातव्यम् ४३ भगवत्संबंधीभागवतइतिसामान्यतोज्ञातभागवतोपिविशेषविवक्षयालोकोपकारायपृच्छति अथेति अथप्राप्तावसरःपृच्छामीतिशेषः किंतत्राह भागवतमिति भागवतमुत्तममध्यमाधमसंज्ञं यद्धर्मःकिंधर्मःयादृशःकीदृशःयथाकथं ४४ तत्रप्रथमप्रश्नंपरिहरति सर्वभूतेष्विति सर्वभूतेषुस्थितस्यात्मनःपूर्णस्यहरेःभगवान्सर्वगुणपूर्णःतस्यभावोभगवद्भावः सर्व गुणपूर्णतांआत्मन्नात्मनिभगवतिभूतानिचपश्येत्पश्यति सर्वभूतेष्वात्मनःस्वस्यभगवद्भावंब्रह्मत्वंपश्यन्भागवतोत्तमइत्यर्थस्यपूर्णत्वादात्मशब्दउक्तःकश्चित्सर्वनरोत्तमइतिवाक्यविरुद्धत्वादनादर्त्तव्यम् ४५ मध्यमभागवत्तमाह ईश्वरइति ईश्वरेप्रेमतदधीनेषुसत्सुमैत्रींबालिशेषुअज्ञेषुकृपांद्विषत्सुउपेक्षां चशब्दात्सर्वस्यजगतस्तद्वशत्वंनजानाति ४६ अधमभागवतमाह अर्चायामिति एवशब्दे नार्चायाअन्यत्रस्थितविष्णुज्ञानंतत्पूजांचव्यावर्तयति तद्भक्तेषुनकेवलंपूजांनेहतेअपितुतारम्यंनजानाति अन्येषूपेक्षकेषुशत्रुषुद्वेषप्रकारंनजानाति विष्णुज्ञानंचकिंचिदुच्चत्वेनप्राकृतःप्रकृतिनिर्मितं स्वर्गादिकंप्राप्यततोधोलोकंयाति मध्यमभक्तस्यापिस्वर्गएवनिरयोनैव ४७ यथाचरतीत्येतंप्रश्नंपरिहराति गृहीत्वेति इमांलोकयात्रांविष्णोर्मायांइच्छाधीनांपश्यन्निंद्रियैरर्थांश्छब्दादीन्विषयान्गृहीत्वा पियोग्यतातिरेकेणाधिकंनद्वेष्टिनहृष्यति । अयमेवयद्धर्मइत्यस्यपरिहारःसदसत्सुयथायोग्यंहर्षद्वेषौ सदसतांवृद्धिह्रासकरोधर्मः । सर्वंहरेर्वैशत्वेनशरीरंतस्यभण्यते । अनन्याधिपतित्वाच्चतदनन्यमुदीर्यते

नचाप्यभेदाजगतोविष्णोःपूर्णगुणस्यात्वात्। एतद्धरेःशरीरं यत्किंचभूतप्रणमदनन्यामत्यत्रप्रमाणं। पूर्णत्वादात्मशब्दोक्तःकाश्चत्स्न्यनरात्म्य॰ । तापनारायणाग्नि॰ सर्वमनुस्यूतम्॰ । तस्माद्धरेरेव

श्रीब्रह्मेशपुरःसराः। सएवतुस्वभक्तेषुस्थित्वानुग्रहकारकः। अज्ञेष्वज्ञानयंताचद्विषत्सुद्वेषकारकः। तत्प्रेरितास्तदन्येतुप्रियद्वेषादिकारिणः। अतस्तत्प्रेरणादेवप्रेमाद्यामग्जन्निरे। इतिपश्यतियोबुद्ध्यासतु

भागवतोत्तमः। सर्वाधिकंपृथग्विष्णुंक्षीरसागरवासिनं। ज्ञात्वातत्रप्रेमयुक्तस्तद्भक्तेषुचमैत्रयुक्। कृपावांश्चतदज्ञेषुतद्द्वेषीणामुपेक्षकः। तद्वशत्वंनजानातिसर्वस्यजगतोपितुः तमाहुर्मध्यमंभक्तमर्चापामेवसंस्थि

तं। विष्णुंज्ञात्वातदन्यत्रनैवजानातियःपुमान्। तारतम्यंचतद्भक्तेर्नजानातिकथंचन । अवजानंश्चतद्भक्तानात्मनोभक्तिदर्पतः। उपेक्षकोपिवातेषुनस्मरेदथवापितान्। मानुषेषुयथाकश्चित्काचिदुच्चःप्रदृश्य

ते। एवमेवोच्चतांविष्णोरल्पांपश्यतिचान्यतः। तेतुभक्ताधमाःप्रोक्ताःस्वर्गादिफलभोगिनः। तेविघ्नितास्तथोपांतितद्भक्तानामुपेक्षकाः। कुर्युर्विष्णावपिद्वेषंदेवादेवावमानिनः। पूजितोविष्णुभक्तिंचना

वज्ञेयास्तन्नःसुराः। उपेक्षकेषुदेवानांभक्तिनाशंस्वयंहरिः। करोतितेनविभ्रष्टाःसंसरंतिपुनःपुनः। अधोवायांतिविद्वेषात्पूज्यादेवास्ततःसदा। यस्तान्द्वेष्टिसतंद्वेष्टियस्ताननुसचानुतम्। ऐकात्म्यमागतंवि

द्धिदेवैस्तद्भक्तिपूरितैः। उपेक्षकस्तुदेवानांयदैवनिरयोपगः। तदातुकिमुवक्तव्यमुपेक्षायांजनार्दने। विष्णोरुपेक्षकंसर्वेविद्विषंत्यधिकंसुराः। पतत्यवश्यंतमसिहरिणातिश्चपातितः। भुंक्तेस्वर्गफलंनित्यंनिरयंनै

वगच्छति। विष्णोस्तुमध्यमोभक्तोजायतेमानुषेषुच। अस्मरन्देवतायस्तुभजतेपुरुषोत्तमं। योग्यःसंस्मरतेदेवानयोग्योद्वेष्टिकेशवं। यस्तूत्तमोभागवतःसमुक्तिंपरमांव्रजेत्। विष्णुनासर्वदेवैश्चमोदतेसहिनि

त्यदाइति। समाख्यानबलात्सिद्धोयंसर्वभूतेष्वित्याद्युक्तार्थइति। विष्णुमायांविष्ण्वच्छाधीनां। विष्णोरिच्छानुसार्येतज्ज्ञात्वायोग्यान्नचाधिकंहृष्यातिद्वेष्टिवायस्तुसवैभागवतोत्तमः। इत्येतद्गृहीत्वापींद्रि

यैरर्थानित्यर्थेमानं। सतांवृद्धिकरोधर्मस्त्वसतांन्हासकारणः। अयंतुनिश्चितोधर्मोह्यधर्मोन्योविनिश्चितः। हर्षःसत्सुतथासत्सुधर्मोधर्मविपर्ययः। तेषांवृद्धौतथाहानौसर्वज्ञेयमशेषतः। एतदर्थेचधर्माणांमया

देहेंद्रियप्राणमनोधियांयोजन्माप्ययक्षुद्भयतर्षकृच्छ्रैः ॥ संसारधर्मैरविमुह्यमानःस्मृत्याहरेर्भागवतप्रधानः ४९ यःकामकर्मबीजानिपश्यत्येषांचसंभ

वम् ॥ वासुदेवैकनिलयःसवैभागवतोत्तमः ५०

दावोदिकादिका। मूलधर्मविरुद्धातुसानग्राह्याकथंचनेत्येतदपिगृहीत्वापीत्यत्रमानम् ४८ कैर्लिंगैरित्येतंप्रश्नंपरिहरति देहेंद्रियप्राणधियामिति संसारधर्मैःसंसारस्वभावैःदेहादिनांजन्मादिकृच्छ्रैरविमुह्यमा

नस्तत्तद्वस्तुतत्तत्त्वंयथावज्ज्ञानन्नोवर्ततेसभागवतप्रधानइत्यन्वयःतत्रहेतुमाह स्मृत्येति देहादीनामचेतनत्वेनजन्मादिकृच्छ्रानुभवानुपपन्नइत्यतस्तात्पर्यार्थोन्योयुक्तोवक्तव्यः सकइत्याशंका देहेंद्रियप्रा

णधियांत्रिधैवत्वभिमानिनः। तत्रोत्तमादेवतास्ताःसर्वदोषविवर्जिताः। गुणैःसर्वैःसुसंपन्नाविरिंचादुत्तरोत्तरं। मध्यमागुणदोषैताअधमाअसुरामताः। तेसर्वेदोषसंयुक्ताआचित्ताद्रोत्तरं। तेभ्योन्योमानुषो

जीवस्ताभ्यांदेवासुरावपि। जीवाभिमानिनश्चैवत्रिविधाःसंप्रकीर्तिताः। जीवमान्युत्तमोब्रह्मामध्यमःस्वयमेवतु। अधमःकलिरुद्दिष्टस्तत्रमध्यमनीचयोः। मृतिजन्मक्षुधादुःखप्रभृत्याखिलमेवतु। नोत्तमस्य

तुजीवस्यदेहादेश्चकथंचन। जन्मादिकृतदुःखंतुदेहमान्यसुरस्यह। मृत्याद्यप्ययजंदुःखमसुरेंद्रियमानिनः। क्षुन्निमित्तंतुयद्दुःखंप्राणमान्यसुरस्यतत्। भयतर्षादिजंदुःखंमनोमान्यसुरस्यच। केवलंचांतरंदुःखं

बुद्धिमान्यसुरस्यतत्। नीचोस्मीतितुयद्दुःखमहमान्यसुरस्यतत्। अतीतादेःस्मृतेर्दुःखंचित्तमान्यसुरस्यच। जीवमान्यसुरस्यस्यात्सर्वंतत्समुदायतः। एवमेवसुखंदेवेषूभयमध्यमेषुच। असुराणामधर्मस्यवृ

द्ध्यासुखमपीष्यते। देवानांनैवकेनापिदुःखंप्रीतिस्तुधर्मतः। अधर्मोपिप्रीतयेस्यादसुराणांतमोगतेः। देवानांपुण्यपापाभ्यांसुखमेवोत्तरोत्तरं। तेषांदुःखादिकांकिंचिदसुरावेशवोभवेत्। प्राणस्यनासुरावे

शोहरिणाचसमोहिसः। संपूर्णानुग्रहाद्विष्णोःप्राणःपूर्णगुणोमतः। असुराणांसुखाद्याश्चदेवावेशादुदीरिताः। स्वतस्तुनिर्गुणाःसर्वेसर्वदोषात्मकामताः। विविच्यैवंजगत्सर्वंस्वात्मानंचपृथक्स्थितं। सर्व

तश्चपृथक्संतंविष्णुंसर्वोत्तमोत्तमं। जानंतियेभागवतास्तउक्ताउत्तमोत्तमा इत्यनेनपरिहृतेतिज्ञातव्यम् ४९ कामकर्मबीजान्यविद्याप्रकृत्यादीनि एषांकामादीनाम् ५०

जन्मकर्मभ्यांब्राह्मणादिजन्मनागुरुकुलवासादिकर्मणाब्राह्मणादिवर्णैःब्रह्मचर्यादिचाश्रमैः ब्राह्मणत्वादिजातिभिश्चसंज्ञितेसंकेतितेयः कामकर्मबीजैरुत्पन्नस्तस्मिन्देहेयस्त्वाहंभावोब्राह्मणोहमित्यादिलक्षणो नास्तिसभागवतोत्तमइति ५१ इदमप्येकंलक्षणमित्याह नयस्येति यस्यभागवतस्यचित्तेप्राकृतांतःकरणेविद्यमानेसंसारे स्वात्मनिकेवलात्मभावेस्वरूपावस्थानेमोक्षेवायःस्वोजीवःपरःपरमात्मेतिजीवपर योरभिदाअभेदोनास्तिअभेदज्ञानंनास्तीत्यर्थः यश्चसर्वभूतसमःब्रह्मादिमानुषांतानिभूतानियथावत्तारतम्येनपश्यतिसभागवत्तोत्तमः नक्वापिजीवंविष्णुत्वेसंसृतौमोक्षएववा यःपश्यतिसुरादींश्चयथोत्कर्ष मपश्यति ससर्वभूतसमहरिंविष्णुंसर्वोत्तमंस्मरन् । इत्यतः । नैवंत्वयानुमंतव्यंदृष्टोजीवोमयेतिह । सर्वभूतगुणैर्युक्तंदेवंत्वंज्ञातुमर्हसीत्यतश्च नैवंत्वयानुमंतव्यंजीवात्माहमितिक्वचित् । सर्वै र्गुणैःसुसंपन्नंदेवंमांज्ञातुमर्हसि इत्यतश्च प्रमाणाद्यस्यस्वकीयपरकीयबुद्धिभेदोन स्तीत्यर्थोनोपपन्नःकिंतूक्तइतिशांतोभगवन्निष्ठायुक्तः ५२ विकुंठस्यस्मृतिर्येषांतेतथातैःत्रिभुवनविभवहेतुभिःकारण भूतैरजेशसुरादिभिर्ब्रह्मरुद्रपूर्वदेवादिभिर्मृग्यादन्वेषणीयात् भगवत्पदारविंदात्योलवनिमिषार्धमपिनचलतिसवैष्णवाग्र्यः स्मस्मृतइत्यन्वयः ५३ उरुविक्रमःपदन्यासविशेषःययोस्तौउरुविक्र मौतावंघ्रीतियोःशाखाअंगुल्यस्तासांनखमणयः नखाएवमणयःतेषांचंद्रिकयाज्योत्स्नयानिरस्ततापेउपसीदतांसेवमानानांहृदयेऽनुपसीदतांहृदिप्रभवतिसःतापःकथंपुनःप्रभवतीत्यन्वयः ५४ स्वल

नयस्यजन्मकर्मभ्यांनवर्णाश्रमजातिभिः ॥ संज्ञितेस्मिन्नहंभावोदेहेवैसहरेःप्रियः ५१ नयस्यस्वःपरइतिचित्तेस्वात्मनिवाभिदा ॥ सर्वभूतसमःशांतःसर्व भागवतोत्तमः ५२ त्रिभुवनविभवहेतुभिर्विकुंठस्मृतिभिरजेशसुरादिभिर्विमृग्यात् ॥ नचलतिभगवत्पदारविंदाल्लवनिमिषार्धमपिस्मसवैष्णवाग्र्यः ५३ भगवतउरुविक्रमांघ्रिशाखानखमणिचंद्रिकयानिरस्ततापे॥हृदिकथमुपसीदतांपुनःसप्रभवतिचंद्रइवोदितेऽर्कतापः ५४ विसृजतिहृदयंनयस्यसाक्षाद्धरिरव शाभिहितोप्यघौघनाशः ॥ प्रणयरशनयाधृतांघ्रिपद्मःसभवतिभागवतप्रधानउक्तः ५५ ॥ इतिश्रीभागवतेमहा०एकादशस्कंधेवसुदेवनारदसंवादेजा यंतेयोपाख्यानेविदेहप्रश्नेद्वितीयोध्यायः ॥२॥ राजोवाच ॥ परस्यविष्णोरीशस्यमायिनामपिमोहिनीम् ॥ मायांवेदितुमिच्छामोभगवंतोब्रुवंतुनः १ नानुतृप्येजुषन्युष्मद्वचोहरिकथामृतम् ॥ संसारतापनिष्टप्तोमर्त्यस्तत्तापभेषजम् २ अंतरिक्षउवाच ॥ एभिर्भूतानिभूतात्मामहाभूतैर्महाभुज ॥ सस र्जोच्चावचान्यादौस्वयमात्मप्रसिद्धये ३

नादिना अवशेनाभिहितःकथितः प्रणयरशनयाभक्तिलक्षणपाशेनधृतांघ्रिपद्मःबद्धपादपद्मःयादृशोयच्छ्रुतइत्यनयोःप्रश्नयोःपरिहारौ धृतोर्ध्वपुंड्रत्वादिकंसंततगुणनामसंकीर्तनत्वंचेतियेशंखचक्रांकितबा हुमूलाइत्यादिषुप्रसिद्धत्वादनुक्ताविति ५५ ॥ इतिश्रीभागवतेमहा०विज०टीकायांएकादशस्कंधेद्वितीयोध्यायः॥२॥ परस्यपूर्णस्यमायिनांज्ञानिनांमोहिनींमायांसृष्ट्यादिषुप्रवर्तमानांइच्छाशक्तिंजडप्रकृ तिंवैभवंच १ तत्रतत्रभागवतेमायाविषयप्रश्नपरिहारावनेकशः कृतावित्यत्राश्रद्धेयमिदंनेतिभावेनाह नानुतृप्येइति हरेःकथामृतंयस्मिंस्तत्तथातद्वेषजंसंसारतापशांतिकरंऔषधम् २ परिहार मवेक्ष्यप्रश्नःसंगच्छतइत्यतःपरिहारोपिमायाद्वैविध्यविषयएवेतिभावेनोपोद्घातंरचयति एभिरित्यादिना अत्रायंभावःआदौस्वयंपरमात्मास्वेच्छोद्बोधितयाप्रकृत्यामहदहंकारादिक्रमेणचतुर्विंशतित त्त्वानिसृष्ट्वापुनस्तैरसमेतैःस्तुतःवान्यनुप्रविश्यसंयोज्यतदुपादानत्वेनब्रह्मांडमुत्पाद्यांतस्तैःसहप्रविश्य ब्रह्मादिपृथिव्यंतानांतत्त्वानांरूपांतराणिसृष्ट्वैर्महाभूतैःपंचभिरुच्चावचानिशरीराणिससर्जेत्रि विधान्जीवांस्त्रिविधैःशरीरैःसंयोजयामास किंप्रयोजनमुद्दिश्येत्यतउक्तम् आत्मप्रसिद्धयइति आत्मनोहरेःप्रसिद्धिःख्यातिःप्रतीतिःज्ञानमितियावत्तदर्थंपरमात्मतत्त्वज्ञानायेत्यर्थः ३

---

१ शत्रुषुशत्रुत्वेनमित्रेषुमित्रत्वेनउदासीनेषुउदासीनत्वेनज्ञानंसमत्वं एतद्विपरीतंअसमत्वं । २ अत्रभूतानामित्यध्याहार्यम् भूतानांपरमात्मतावसानार्थीमित्यर्थः ।

जीवकलयाब्रह्मैवभोगायतनेशरीरेस्थित्वाकर्मफलंभुंक्तइत्यद्वैतमतंप्रत्याह एवंसृष्ट्वेति सपरमात्मोक्तविधयास्थितिष्ठैःपुनःसृष्ट्वास्थूलभावंप्राप्तैःपंचधातुभिर्महाभूतैः भूतानिशरीराणिसृष्ट्वा तत्तदहंकारानुसारेणजीवेनसहतान्यनुप्रविश्यात्मानंस्वंएकधामनोनियंतृरूपेणदशधादशेंद्रियनियामकरूपेणविभजन्विभक्तंकुर्वन्गुणान्विषयसारानानंदानेवजुषतइत्यन्वयः । विभजन्नित्यनेनजीवात्मनामल्पशक्तित्वेनस्वात्मनोभिन्नत्वमवशत्वेनकर्मफलभोक्तृत्वंस्वस्यपूर्णशक्तित्वेनस्वातंत्र्यंचध्वनयति ४ नन्विंद्रियाणामशुभेषुविषयेष्वपिप्रवृत्तेःतत्स्थस्याशुभभोगोपिप्रसज्येत अतःकथंगुणानेवजुषतइत्यत्राह गुणैरिति योगुणानेवजुषतइतिप्रस्तुतःसपरमात्मात्मनाप्रद्योतितैर्विषयाभिमुखत्वेनघोरैर्गुणैरिंद्रियैर्गुणान्भुंजानोवर्ततइत्यन्वयः लडर्थवाचिशानचाशुभमेवभुंक्तेकदापिनाशुभमितिध्वनयति नाशुभंसहरिःपिबेदितिस्मृतेः । एकस्मिन्नेवभोगायतनेस्थितयोरनयोरेकस्यहरेर्गुणैकभोक्तृत्वेकोहेतुरित्यत्राह प्रभुरिति समर्थोधिपतौप्रभुरितिवचनात् सामर्थ्यमाधिपत्यंचानिमित्तमित्यर्थः स्वतंत्रास्वतंत्रयोःप्रमितभेदानंगीकारेबाधकमाह मन्यमानइति इदमित्यव्ययं । आत्मावाइदमितिश्रुतेः सर्वाधिकत्वेनवर्तमानंतंपरमात्मानंइदंसृष्टंदेहयोगेनोत्पन्नंइदंजीवाख्यंवस्त्वितिमन्यमानोजीवइहसंसारेसज्जते मृषःपरत्रतमसिसज्जतइत्यन्वयः ५ एतदेवविवृणोति कर्माणीति सनिमित्तानिपूर्वकर्मप्रयत्नसंस्काराख्यबीजसहितानिकर्मभिर्व्यापारैःकर्मेंद्रियैर्वाकुर्वन्सुखेतरंदुःखंप्रतिभ्रमतीत्यन्वयः ।

एवंसृष्ट्वासभूतानिस्थविष्ठैःपंचधातुभिः ॥ एकधादशधात्मानंविभजन्जुषतेगुणान् ४ गुणैर्गुणान्सभुंजानआत्मप्रद्योतितैःप्रभुः ॥ मन्यमानइदंसृष्टमात्मानमिहसज्जते ५ कर्माणिकर्मभिःकुर्वन्सनिमित्तानिदेहभृत् ॥ ततत्कर्मफलंगृह्णन्भ्रमतीहसुखेतरम् ६ इत्थंकर्मगतीर्गच्छन्बह्वभद्रावहःपुमान् ॥ आभूतसंप्लवात्सर्गप्रलयावश्नुतेऽवशः ७ धातूपप्लवआसन्नेव्यक्तंद्रव्यगुणात्मकम् ॥ अनादिनिधनःकालोह्यव्यक्तायविकर्षति ८ शतवर्षमनावृष्टिर्भविष्यत्युल्बणाभुवि ॥ तत्कालोपचितोष्णार्कोलोकांस्त्रीन्प्रतपिष्यति ९ पातालतलमारभ्यसंकर्षणमुखानलः ॥ दहन्नूर्ध्वशिखोविष्वग्वर्धतेवायुनेरितः १० सांवर्तकोमेघगणोवर्षतिस्मशतंसमाः ॥ धाराभिर्हस्तिहस्ताभिर्लीयतेसलिलेविराट् ११

शरीरेदोषहानेनगुणभोक्तारमीश्वरं शरीरस्थतयाजीवंमन्यमानःपतत्यधः तत्सृष्टाहिसदाजीवादेहादेर्जनिमत्त्वतः नित्यानंदैकदेहोसौविष्णुस्तत्त्वैकतानयोरित्यनेनप्रमितोयंमर्थः ६ जीवपरयोरभेददर्शीनःपुंसःकदानुतमःप्रवेशइत्यतःप्रलयपर्यंतमेवदेहयोगवियोगलक्षणौजन्ममृत्यूततःपरंतमःप्रवेशइत्याशयेनाह इत्थमिति कर्मगतीःकर्मनिर्मितयोनिलक्षणफलानि बह्वन्यभद्राणिपापान्यावहत्यात्मन्याधत्तइतिबह्वभद्रावहः । आभूतसंप्लवात्जगत्प्रलयपर्यंतंसर्गप्रलयौजन्ममरणे योगिवत्स्वच्छंदतयास्यातामित्यतउक्तंअवशइति । आभूतसंप्लवाज्जन्ममजीवेशत्वंविजानतः । ततःपतत्यधोयस्मादुत्थानंनैवतुक्वचिदितिवचनात् । अवशःपश्चादंधेतमसिपततीत्यर्थः ७ एवमीश्वरमायानियतादव्यक्तात्सृष्टिंसमासतोभिधायप्रलयंसंक्षिप्याह धातूपप्लवइति । धातूनांपृथिव्यादिपंचभूतानांउपप्लवेप्रलयेद्रव्यगुणात्मकंपंचभूतशब्दादिगुणमयंव्यक्तंब्रह्मांडंअनादिनिधनःकालोविष्णुःअव्यक्तायमूलप्रकृतयेविकर्षतिप्रकृत्यवशेषंकर्तुमिच्छतीत्यर्थः । कालाख्यःकलनाद्विष्णुर्व्यक्तमव्यक्तगंनयन्नितिवचनात् विष्णुरेवकालशब्देनोक्तः विकर्षतीत्यनेनकालशब्दोपिनिरुक्तः ८ संक्षिप्योक्तंप्रलयमादितोवक्ति शतवर्षमिति । तत्कालेनतेनप्रलयकालेनउपचितःसंवर्धितः उष्णोगुणोयस्यसतथासचासावर्कश्चसतत्कालोपचितोष्णार्कः ९ १० विराट्ब्रह्मांडम् ११

---

१ शरीरे दोषहानेनेत्युक्त्या गुणैर्गुणान्सभुञ्जान इत्यत्रगुणपदमेवव्यावर्तकमित्युक्तंभवति । शरीरस्थतयेत्यादिना मन्यमानइदंसृष्टमात्मानमिहमन्यते इतिविवृतम् । तत्सृष्टाहिसदाजीवा इत्यादिना जीवेश्वराभेदस्यबाधितत्वमुपपादितंवेदितव्यम् ! दी० । २ जीवस्येशत्वंविजानतः ।

सलिलेविलीनंब्रह्मांडमुत्सृज्यवैराजोब्रह्मांडांतर्वर्तीपुरुषोब्रह्माअव्यक्तंपरमात्मानंविशते अव्यक्तशब्दार्थस्पष्टीकुर्वन्नंतर्विशिनष्टि सूक्ष्ममिति यद्वा निरिंधनोनलः सूक्ष्मंव्याप्तमग्निमिवेति १२ संक्षेपविस्तराभ्यांतुकथयंतिमनीषिणः बहुवारस्मृतेस्तस्यफलबाहुल्यकारणादितिवाक्यार्थंसफलंकुर्वन्नुक्तार्थंप्रपंचयति वारिणेति तेनज्योतिषाहृतरसंपीतरसंतमसातमोगुणानुस्यूतेनवायुनाअवकाशेन आकाशेन १३ १४ कालात्मनासंहारमूर्तिनाहरिणाहृतशब्दाख्यगुणंआत्मनिपरमात्मनि । पुनरपिविस्तारयति इंद्रियाणीति । अत्रेदंतात्पर्यंनभस्तामसाहंकारमाविशति । तैजसानींद्रियाणि मनोबुद्धिश्चवैकारिकैःइंद्रियाभिमानिभिर्देवैः सहवैकारिकंतैजसात्मकंअहंकारंप्रविशति । एवंत्रिविधोहमहंकारःस्वगुणैःस्वकार्यैःसहात्मनिमहत्तत्त्वेलीयते । तन्महत्तत्त्वमात्मनिव्याप्तेपरमात्मनिप्रविष्टं भवति । वैराजःपुरुषःपृथिव्यादीनिस्वकृतकार्याणिव्युत्क्रमेणस्वस्वकारणेषुखादिषुविलाप्यस्वयंचतत्कारणगतत्वेनतत्तत्कार्यप्रवर्तकः तत्तत्कारणगतरूपेणैकीभूयमूलरूपीसन्नाकाशवदतिसूक्ष्ममव्यक्तंप्रविशतीति १५ १६ उपसंहरति एषेति । भगवतःएषामायाप्रकृष्टेच्छातस्याधीनाप्रकृतिश्चास्माभिर्वर्णिता निमित्तोपादानत्वविवक्षयेतिशेषः कीदृशीत्रिवर्गात्रयाणांगुणानांवर्णोवरणंययाहरेर्म

ततोविराजमुत्सृज्यवैराजःपुरुषोनृप ॥ अव्यक्तंविशतेसूक्ष्मंनिरिंधनइवानलः १२ वारिणाहृतगंधाभूःसलिलत्वायकल्पते ॥ सलिलंतद्धृतरसंज्योतिष्ट्वायोपकल्पते १३ हृतरूपंतुतमसावायौज्योतिःप्रलीयते ॥ हृतस्पर्शोवकाशेनवायुर्नभसिलीयते १४ कालात्मनाहृतगुणंनभआत्मनिलीयते ॥ इंद्रियाणिमनोबुद्धिःसहवैकारिकैर्नृप १५ प्रविशंतिह्यहंकारंस्वगुणैरहमात्मनि १६ एषामायाभगवतःसर्गस्थित्यंतकारिणी ॥ त्रिवर्णावर्णिताऽस्माभिःकिंभूयःश्रोतुमिच्छसि ॥ १७ ॥ राजोवाच ॥ यथैतामैश्वरींमायांदुस्तरामकृतात्मभिः ॥ तरंत्यंजःस्थूलधियोमहर्षइदमुच्यताम् १८ प्रबुद्धउवाच ॥ कर्माण्यारभमाणानांदुःखहत्यैसुखायच ॥ पश्येत्पाकविपर्यासंमिथुनीचारिणांनृणाम् १९ नित्यार्तिदेनवित्तेनदुर्लभेनात्ममृत्युना ॥ गृहापत्याप्तपशुभिःकाप्रीतिःसाधितैश्चलैः २० एवंलोकंपरंविद्यान्नश्वरंकर्मनिर्मितम् ॥ अतुल्यातिशयध्वंसाद्यथामंडलवर्तिनाम् २१ तस्माद्गुरुंप्रपद्येतजिज्ञासुःश्रेयउत्तमम् ॥ शाब्देपरेचनिष्णातंब्रह्मण्युपशमाश्रयम् २२

त्यासृष्ट्यादौसातथासत्त्वादित्रिगुणानांवर्णोलेपः स्वरूपत्वेनसंबंधोयस्याःसातथाप्रकृतिः तदुक्तं त्रिवर्णावरणादुक्तात्रिगुणानांहरेर्मतेःगुणात्मकत्वात्प्रकृतिस्त्रिवर्णेतिप्रकीर्त्यते तत्रतुप्रकृतिस्तार्यतारकातुहरेर्मतेः उभयंविष्णुमायोक्तंज्ञातव्यमुभयंतथेतिबहूनांप्रस्तुतत्वादेषेत्यत्रकिंपरामृश्यतइतिसंदेहपरिहारःकथमितिचेन्न बहूनांसहनिर्देशएकयाभिधयैवतु तथैवाभिधयातेषांपरामृश्यैकमुच्यतेइतितदुपपत्तेः १७ श्रुतमायाविभवोराजामायाशब्दवाच्यबंधकशक्तिजयोपायंपृच्छति यथेति ईश्वरस्येयमैश्वरीतांमायांबंधकशक्तिमंजस्तरसातरंत्येनंजीवंनसंसारयामीत्यनुग्रहोन्मुखंकिंरयंतिअन्यस्यनिस्तरांलंघनमेवकुर्वतीत्यर्थः १८ मायासंतरणेच्छोःप्रथमसाधनंविरक्तिरितिज्ञापयन्प्रबुद्धःप्रश्नंपरिहर्तुमुपक्रमते कर्माणीति पाकविपर्यासोनामकर्मफलवैपरीत्यंदुःखानिवृत्तिसुखानवाप्तिचमिथुनीचारिणांस्त्रीपुंसाम् १९ वित्तादिसमृद्ध्यासुखोन्नतिःस्यादित्यत्राह नित्येति २० अनित्यफलत्वात्स्वर्गादयोहेयाइत्याह एवमिति अतुल्यातिशयैर्देवैर्ध्वंसादधःपातनान्मंडलवर्तिनांयुद्धरंगेवर्तमानानांयथाप्रध्वंसः २१ इहामुत्रविरक्तेनपुरुषेणैकिकार्यमत्राह तस्मादिति २२

१ बहूनामनेकेषांपदार्थानां एकयाऽभिधया एकेनशब्देन सहयुगपत्निर्देशेपि तयैवाभिधया तेषामनेकेषां मध्ये एकं परामृश्य उच्यत इतियोज्यम् ॥

गुरुकुलेकिमनुष्ठेयमत्राह तत्रेति । गुरुश्चआत्माचदैवतंयस्यसतथा आत्माविष्णुः मिथुनीचारिणामित्यनेनामिथुनानामेवश्रेयोमोक्षानामेथुनानामित्यार्षम् । देवाःसजापामुच्यतमानुषाऽमथात्मकाः । १७
जयाएवयोगेशास्त्रेषांयायैवयोग्यता । तथातथैवमुच्यंतेनान्यथातुकथंचनैतिवचनेनपरिहृतइति हरिगुरुप्रसादसाधनमाह अमाययेति २३ भागवतान्धर्मानाह सर्वतइति शिक्षेदित्यनुवर्तते
साधवएकविधाउतबहुविधाःएषुसंगःकर्तव्यःइतिविधीयतइतिअस्यानेकविधाइत्युत्तरं तर्हिकतिविधाइत्यस्यात्रिविधाइति तत्रापिविशेषोबहुलःसएषग्रंथांतरेविस्तृतः । संतस्तुत्रिविधाःप्रोक्ताउत्तमामध्यमा
धमाः । उत्तमादेवतास्तत्रऋष्याद्यामध्यमामताः । अधमामानुषोत्कृष्टास्तेचापित्रिविधामताः । तत्राधमेषुयेषांतुसंगोविघ्नायवैभवेत् । तेषामुत्तमसंगःस्यतेषांसंगंपरित्यजेत् । आदौतुतेषामपिचसं
गउत्तमसंगतेः । साधनत्वान्नतुत्याज्योयदित्यकुंनशक्यते । तदातेपितथानेयायथाविघ्नोनवैभवेत् । तदुत्तसंगतेःकापितदादोषोनजायते । प्रयोजनायतेषांतुसंगःसर्वात्मनेष्यते । सर्वथाचैवदेवेषुसंगोमु
निगणेषुच । भाव्योहितंविनानवपुरुषार्थःकचिद्भवेत् । विशेषतःस्वोत्तमेषुविनासंगंनमुच्यते । स्वनीचेषुतुदेवेषुविनासंगंनपूर्यते । तस्मात्सत्तमेष्वेषुसंगःकार्योविशेषतः । अनाद्यनंतकालेषुनचहाप्यः
कथंचन । सतांतदुत्तमेशेशेकिमुविष्णौपरात्परइति । किंच ज्ञानोत्पत्तावंतरंगसत्सेवैवयामंतरेणविवक्षितार्थज्ञानासिद्धेर्स्यात् अतोदुर्बलेनापिसाकार्या तदुक्तं बह्वपेक्षोहिजिज्ञासुरतोदेहादिवृत्तये । किं
चित्सत्स्वपिसंगीस्यादशक्येसातवर्तते । कृतकृत्यस्त्यजेत्संगंसदागुरुसुरादिषु । संगीस्यान्नहितत्संगंविनातुसुखभाग्भवेत् । तस्मादनाद्यनंतैवभक्तिर्गुरुसुरादिषु । अन्यत्रकृत्यावेक्षास्यादितिसंगवि

तत्रभागवतान्धर्मान्शिक्षेद्गुर्वात्मदैवतः ॥ अमाययानुवृत्त्याचतुष्येदात्मात्मदोहरिः २३ सर्वतोमनसोसंगमादौसंगंचसाधुषु ॥ दयांमैत्रींप्रश्रयंचभूते
ष्वद्धायथोचितम् २४ शौचंतपस्तितिक्षांचमौनंस्वाध्यायमार्जवम् ॥ ब्रह्मचर्यमहिंसांचसमत्वंद्वंद्वसंज्ञयोः २५ सर्वत्रात्मेश्वरान्वीक्षांकैवल्यमनिकेतन
म् ॥ विविक्तचीरवसनंसंतोषंयेनकेनचित् २६ श्रद्धांभागवतेशास्त्रेऽनिंदामन्यत्रचापिहि ॥ मनोवाक्कायदंडंचसत्यंशमदमावपि २७ श्रवणंकीर्तनंध्या
नंहरेरद्भुतकर्मणः ॥ जन्मकर्मगुणानांचतदर्थेऽखिलचेष्टितम् २८ इष्टंदत्तंतपोजप्तंपूर्तंयच्चात्मनःप्रियम् ॥ दारान्सुतान्गृहान्प्राणान्परस्मैसन्निवेदयेत् २९

निर्णयइति २४ २५ सर्वत्रदेशकालादिष्वात्मनःस्वामिनईश्वरस्यान्वीक्षांमाहात्म्यानुकूलनिरीक्षणंकैवल्यमेकांतित्वंप्रकृतिप्राकृतादिमिश्राहित्यंच चीरवसनंवल्कलं संतोषमलंबुद्धिम् २६ भागव
तशास्त्रेवेदादितंत्रे तदुक्तं । श्रद्धाभागवेततंत्रेवेदेभारतपंचमे । विष्णोरव्यवधानेनवक्तृत्वात्सर्वथाभवेदिति । अन्यत्रकलाविद्यासुज्योतिःशास्त्रेषुअनिंदांनिंदाराहित्यंयतीनामितिशेषः । तदुक्तं कलावि
द्यास्वनिंदाचव्यवधानेनकेशवे । प्रवेशाद्यतिभिःकार्याह्यन्यथानिरयंव्रजेत्इत्यादिना । श्रद्दधातीतिश्रद्धासर्वसाधारणचेतनधर्मोगुणःश्रद्धास्तिक्यबुद्धिःसाद्विविधा अत्रोक्तमस्तीत्येकाममात्रप्रयोजनमस्ती
त्यन्या तत्रप्रथमायतेरपिकलासुकार्यानद्वितीयाप्रयोजनाभावात् उभयंचपंचरात्रादिभगवच्छास्त्रेषुकार्यं तद्विरोधिषुशास्त्रेषुसर्वैरविशेषेणसदानिंदाकार्या तदभावेतमएवपरायणंअतःसुराएवतान्नैं
दनंकुर्वंति सदाविज्ञाततात्पर्यार्थत्वात् तदुक्तं श्रद्धात्वास्तिक्यबुद्धिःस्यादित्यादिप्रतिपाद्यंनचापरामित्यंतेन किंच भवच्छास्त्रविरोधिशास्त्राभ्यासेनअंधंतमोपिश्रूयते अंधंतमःप्रविशंतीतिश्रुतौ नकेव
लंयतेःकलाभ्यःप्रयोजनाभावःकिंचाल्पज्ञस्यगृहिणोपीतीममर्थंहिशब्देनध्वनयति गृहिणोप्यल्पबोधस्येतिवावयात् २७ हरेर्जन्मादीनांश्रवणंतदर्थेश्रवणार्थेऽखिलचेष्टितंअखिलव्यापारःतदर्थेभक्तिज
ननार्थेहरेरखिलचेष्टितमितिवा २८ यदात्मनःप्रियंयद्देहादिकंचतत्सर्वंपरस्मैपरमात्मनेनिवेदयेत् २९

---

१ नारदपञ्चरात्रागमे । भारतं पञ्चमं यस्यासौभारतपञ्चमः । अन्यव्यवधानेनमुखतएवविष्णोर्वक्तृत्वात् विष्णुप्रतिपादकत्वादित्यर्थः ।

कृष्णात्मैवनाथोयेषांतेतथा मानुषेषुचापिसौहृदंशिक्षेतकिमुदेवादिषुउभयत्रभगवतिभागवतेषुचमहत्सुब्रह्मादिदेवेषुचपरिचर्या नचैतावतापूर्यते साधुषुनृषुस्वोत्तमोष्विस्यर्थः ३० भगवद्यशउद्दिश्य परस्परानुकथनंरतिःसुखंतदाधिक्यंतुष्टिरन्यत्रनिवृत्तिश्च ३१ रत्यादीनांपरिपाकमाह स्मरंतइति । उत्पुलकामुद्गतपुलकाम् ३२ भागक्तानांप्रवृत्तिप्रकारमाह क्वचिदिति । परंभगवंतंमनसाशरणमेत्यनिर्वृताः ३३ उपसंहरतिइतीति तदुत्थयाभागवतधर्माभ्यासोद्रेकोत्थया ३४ ब्रह्मवित्तमाःहियस्मात्तस्माद्यूयंब्रह्मणोनिष्ठांब्रह्मादिजीवराशेरुत्कर्षवक्तुमर्हथ निष्ठोत्कर्षेव्यवस्थापांनाशेंत्ये व्रतयाच्चयोरितियादवः ३५ तदुत्कर्षोपिजन्मादिकारणत्वेनस्वप्राग्वस्थाप्रवर्त्तकत्वेनतदनभिभूतशक्तित्वेनमनआदींद्रियाभिमानिदेवाज्ञात्वेन हिजननादिराहित्यत्वेनज्ञातुंशक्यतइत्याशयेनप्रश्नं परिहरति स्थितीत्यादिना । योस्यजगतःस्थित्यादिहेतुःस्वस्यहेतुरन्योनास्तीत्यहेतुःस्वप्नादिषुसन्निर्दोषत्वेनस्थितः । यश्चबहिःप्रलयेमुक्तौचवर्त्तमानः येनदेहेंद्रियादीनिचरंतिवर्त्तते हृदयं मनः संजीवितान्यियदधीनानि हेमरेंद्रतत्तत्त्वंपरं सर्वस्मादुत्कृष्टंअवैहीत्यन्वयः ३६ इतोपिहरिःसर्वोत्कृष्टः यतोस्यप्रसादंविनारुद्रादिदेवैर्नज्ञेयइत्याह नैनमिति विंशतिरत्रज्ञानार्थः मनआदिशब्देनतदभिमानीलक्ष्यते अचेतनत्वेनज्ञानक्रियासंभवात् तथाचायमर्थः मनोरुद्रादिःएनंनारायणंनविशतिनजानाति वागुतसरस्वत्यादिकमपिनविशतीत्यनुवर्तते चक्षुःसूर्यः आत्माब्रह्मावायुश्चान्येप्राणाद्यभिमानिनश्चनजानंतीत्यर्थः अपिशब्दात्तत्प्रसादेनैकदेशंजानंतीतियोज्यं तत्रोदाहरणमाह यथेति यथास्वाःअर्चिषः प्रधानाग्नेःपुत्राःअनलंप्रधानाग्निंतदनुग्रहमंतरेणनविशंति ननुनित्याविर्योमित्वेनअनंतवेदाद्यात्मत्वाच्चश्रीर्ज्ञातुमर्हतीतितत्राह शब्दइति निर्दोषःशब्दआगमइतिनिर्दोषशब्दराश्यभिमानिनीलक्ष्मीः बोधकादन्यत् अबोधकंपरमेश्वरादितरल्लौकिकानंदज्ञानादिकं

एवंकृष्णात्मनाथेषुमनुष्येषुचसौहृदम् ॥ परिचर्याचोभयत्रमहत्सुनृषुसाधुषु ३० परस्परानुकथनंपावनंभगवद्यशः ॥ मिथोरतिर्मिथस्तुष्टिर्निवृत्तिर्मिथआत्मनः ३१ स्मरंतःस्मारयंतश्चमिथोघौघहरंहरिम् ॥ भक्ताःसंजातयाभक्त्याबिभ्रत्युत्पुलकांतनुम् ३२ क्वचिद्रुदंत्यच्युतचिंतयाक्वचिद्धसंतिनंदंतिवदंत्यलौकिकाः ॥ नृत्यंतिगायंत्यनुशीलयंत्यजंभवंतितूष्णींपरमेत्यनिर्वृताः ३३ इतिभागवतान्धर्मान्शिक्षन्भक्त्यातदुत्थया ॥ नारायणपरोमायामंजस्तरतिदुस्तराम् ३४ राजोवाच ॥ नारायणाभिधानस्यब्रह्मणःपरमात्मनः ॥ निष्ठामर्हथनोवक्तुंयूयंहिब्रह्मवित्तमाः ३५ पिप्पलायनउवाच ॥ स्थित्युद्भवप्रलयहेतुरहेतुरस्ययःस्वप्नजागरसुषुप्तिषुसन्बहिश्च ॥ देहेंद्रियासुहृदयानिचरंतियेनसंजीवितानितदवैहिपरंनरेंद्र ३६ नैनंमनोविशातिवागुतचक्षुरात्माप्राणेंद्रियाणिचयथानलमर्चिषःस्वाः ॥ शब्दोप्यबोधकनिषेधतयात्ममूलमर्थोक्तमाहयदृतेनानिषेध्यसिद्धिः ३७

यत्तस्यनिषेधतयाआनंदोहरेर्नेदृशानंदोज्ञानरूपःनेदृशज्ञानरूपइत्यादिनिषेधरूपेणआत्ममूलंस्वकारणं अर्थोक्तमर्थतःपरिशेषतःसिद्धत्वेनोक्तमाहअर्थशब्देनात्रपारिशेषप्रमाणमुच्यते नलक्षणावृत्तिः कथमत्राह यदृतइति यत्सर्वविलक्षणानंदादिकंविनानिषेध्यस्यैतन्नभवतीतिनिषेधवचनार्थस्यलौकिकानंदादेःसिद्धिर्नस्यात् प्रत्यक्षादिप्रमाणसिद्धत्वात्सास्तिअतःपरिशेषप्रमाणसिद्ध्याप्रमितमेवेत्यर्थः प्रतीतार्थपरित्यज्याप्रतीतार्थकल्पनायांकिंप्रमाणमितीयंशंका । ब्रह्माद्यायंनजानांतिकरणाद्यभिमानिनः । जानंत्यनुग्रहाच्चास्यप्रधानाग्नेर्यथार्चिषः । अग्निपुत्रानमस्तस्यैयमाहश्रीश्चतत्स्फुटं । वेदरूपापरं देवंवैलक्षण्यात्समस्तशः । आनंदोनेदृशानंदइत्युक्तेर्लोकतःपरम् । प्रतिभातिनचाभातियथावद्दर्शनंविनेत्यनेनपरिहर्तव्योते एतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतीतिव ३७

---

१ मनआदीनांजडत्वेनभगवति प्रवेशाभाव उच्यते नच प्रवेशाभावोक्तेः प्रयोजनमस्ति ततोविंशतिरत्र ज्ञानार्थः । तेन नविशति न जानातीत्युच्यते नचैतद्युक्तम् मनआदीनांजडत्वेनात्रज्ञातृत्वप्रसक्तेरेवाभावात् । अतस्तन्निषेधोनुपपन्न इत्याशंक्यतात्पर्यमनुसृत्याह । मनोरुद्रादिरित्यादि । २ इंद्रियाद्यभिमानिनः

मुमुक्षुणाविद्याविज्ञातव्ये विद्याचाविद्याचयस्त्वेद्वेदोभयंसहअविद्यया मृत्युंतीर्त्वाविद्यया मृतमश्नुतेइतिश्रुतेस्तत्राविद्यांनिरूप्यअविद्यानिरूपणे सत्त्वमिति जीवहररूपामीतप्रवदत्पञ्चाइतिशेषः क
चिदादौस्थितमेकंत्रिवृत्त्रिगुणात्मकंप्रधानमितिसंगिरंति प्रधानादिदमुत्पन्नमितिश्रुतिः सत्त्वंरजस्तमइतिकेचित् सूत्रंवायुर्महान्ब्रह्माअहंरुद्रइत्येकेहरेरूपमितिवदंति किंबहुनाउरुशक्तिब्रह्मैवज्ञान
क्रियार्थफलरूपतयाज्ञानक्रियाशब्देनज्ञानकर्मेंद्रियाण्यर्थशब्देनशब्दादिविषयाःफलशब्देनसुखदुःखेचोच्येते एषांरूपत्वेनभातीत्यपरे सदसत्कार्यकारणरूपत्वेनावभातीति ननुसच्चत्यच्चाभवदितिश्रुतेः
कार्यकारणादिरूपदर्शनस्याविद्यात्वंकथमत्राह तयोरिति तयोःकार्यकारणयोःपरंविलक्षणंभिन्नंब्रह्मेतियद्यस्मात्तस्मात्तदात्मनादर्शनमविद्येत्यर्थः । त्रिगुणात्मकंप्रधानंचरजःसत्त्वंतमस्तथा । प्राणो
महानहंकारोजीवास्तदभिमानिनः । ज्ञानात्मकानींद्रियाणितथाकर्मात्मकानिच । शब्दाद्यर्थाःसुखंदुःखमितिप्रोक्तंद्विधाफलं एतत्सर्वंहरेरूपमित्याहुर्ज्ञानदुर्बलाः । सएवबहुशक्तित्वाद्भातिचैषांतथातथा । ए
वंकारणकार्याख्यंसमस्तंहरिमेवतु । केचित्पश्यंतिचव्यक्तंकेचिदाहुरपंडिताः । एवंकारणकार्येभ्यःपरमानंदरूपिणं । अज्ञानाद्बहुधाप्राहुरेकंसंतंसुदुर्जनाः । रूप्यत्वात्तद्वशत्वाच्चतद्रूपंचैवदर्शितं । नतुतस्यस्व
रूपत्वान्निर्दोषानंदरूपिणः । तथाजडाजडैक्यंस्यात्कुतःपूर्णाल्पभेदयोः । पूर्णाल्पज्ञानयोश्चैवपूर्णशक्त्यल्पशक्तयोः । निर्दुःखदुःखान्वितयोःस्वतंत्रपरतंत्रयोः । अतःसर्वगुणैर्युक्तंसर्वदोषविवर्जितं । अन्याभे
देनविज्ञायतमएवप्रपद्यते । निष्कृष्टसर्वतोविष्णुंसर्वतश्चविलक्षणं । ज्ञात्वापूर्णगुणंयांतिमुक्तिनास्त्यत्रसंशयइति प्रमाणसिद्धत्वादुक्तएवार्थोनतुसदनुविद्धत्वात्सर्वस्यतद्रूपत्वमिति ३८ किंच कार्याद्यभिन्नत्वेत

सत्त्वंरजस्तमइतित्रिदृष्टेकमादौसूत्रंमहानहमितिप्रवदंतिजीवम् ॥ ज्ञानक्रियार्थफलरूपतयोरुशक्तिब्रह्मैवभातिसदसच्चतयोःपरंयत् ३८ नासौजजाननम
रिष्यतिनैधतेसौनक्षीयतेसचनविध्यतिचारिणाहि ॥ सर्वत्रशश्वदनपाय्युपलब्धिमात्रंप्राणोयथेंद्रियबलेनविकल्पितंसत् ३९ अंडेषुपेशिषुतरुष्ववनि
स्थितेषुप्राणेनजीवउपधावतितत्रतत्र ॥ छन्नेमतींद्रियगुणेहृमिवप्रसुप्तेकूटस्थआशयमृतेतदनुस्मृतिर्न ४०

द्वज्जन्मादिमत्त्वंप्रसज्यतेनचतत्तथातस्माद्ब्रह्मैवेतियुक्तिमाह नासाविति कालत्रयसंबंधित्वान्नौपचारिकोयंनिषेधः तथाजन्मादिमत्पदार्थस्थत्वेनतद्धर्मत्वंनौपचारिकंब्रह्मणइत्यत्राह सर्वत्रेतिसर्वेषु
जन्मादिमत्सुपदार्थेषुशश्वदेकविधंनविकारिअतएवानपायिविनाशरहितंतत्रहेतुगर्भविशेषणमुपलब्धिमात्रमिति प्रकृत्यादिमिश्ररहितज्ञानात्मकत्वादित्यर्थः अदृष्टत्वादसत्कल्पमिदमत्राह इंद्रियेति स
ब्रह्मइंद्रियेषुदृश्यमानंदर्शनादिबलेनविकल्पितंविविधंकल्पितंदर्शनशक्तिदंश्रवणशक्तिदंज्ञानशक्तिदमितिकथमिवयथेंद्रियगतःप्राणइंद्रियशक्त्यादर्शनादिशक्तिप्रदत्वेनाविकल्पितइति तदुक्तं यथेंद्रियगतः
प्राणस्तेषांशक्त्याविकल्प्यते दृष्टिदःश्रुतिदश्चेतिमतिदोज्ञानदस्तथा । इत्यादिभेदतोवाच्यएकएवमहाबलः दृष्ट्यादिशक्तिस्तस्यैवयतोनान्यस्यकस्यचित् एवंसद्रूपंकंब्रह्मतत्तच्छक्त्याविकल्प्यते
एकमेवमहाशक्तिप्राणस्यापिबलप्रदमिति । जीवप्राणधारणइतिधातोःहरेःजीवशब्दवाच्यत्वंप्राणस्यापिशक्तिप्रदत्वंचयुज्यते । अहंहिजीवसंज्ञोवैमयिजीवःसनातनः । मैवंत्वयानुमंतव्यंदृष्टोजीवोमयेतिह ।
अहंश्रेयोविधास्यामियथाधिकारमीश्वरइतिप्रमाणादह्यमानगृहांतरस्थितयोर्गिवत् ब्रह्मणोपितत्तत्पदार्थस्थत्वेपितत्तद्दोषलेपसंबंधोनास्तीतियुक्तम् ३९ नानायोनिषुवर्तमानस्यजीवस्यदेहाद्देहांतरप्राप्तौ
सुप्तौवास्वातंत्र्यप्रसक्तेरस्यैकयानुपपत्त्याप्राणस्यक्षीरनीरवत्सहावस्थानेपिपरमात्माधीनत्वाच्चहरेःसर्वोत्कृष्टत्वमप्रतिहतमितिभावेनाह अंडेष्विति जीवस्तत्रतत्रतेषुतेषुअंडेषुपक्ष्यादिकोशेषुतेषुतज्जन्येषुइ
त्युपलक्ष्यते पेशोजरायुस्तद्वत्सुपेशिपुजरायुजेष्वित्यर्थः । पेशोजरायुरुद्दिष्टःसुवर्णपेशउच्यते।मृदुपिंडश्चपेशंस्यात्काचिद्वृद्रमपीष्यते इत्यभिधानं।तरुषुउद्भिजेषुअवनिस्थितेषुस्वेदजेषुभूस्वेदेनजातमत्कुणा

दिशरीरेषुप्रवेक्ष्यन्पूर्वदेहंहित्वाप्राणंप्रविश्यपरमात्मानंप्रविष्टनप्राणेनपरमात्मनासहोपधावतिगच्छतिप्रविशति । देहादेहांतरगतौप्रविशेत्प्राणमेवतु । जीवःप्राणःपरात्मानमेवंसुप्तावपिस्फुटम् । वदन्यादेवताःसर्वाःप्राणस्यैववशेस्थिताः । ईषच्चसुप्तवद्यांतिनैवमानुषजीववत् । स्वर्गस्थानांनतुस्वापःप्रायोदेहेपिनाज्ञता । मृतिसुप्तिप्रबोधादेर्नियंताहरिरेकराट् । तमृतेनैवचावस्थानावस्थावान्यस्मृतिः । ततस्तुदेवदेवेशःप्राणःप्राणेश्वरोहरिः । नहरेरीशितात्वन्यःसहिसर्वाधिकोमतइतिउक्तार्थेमानम् । मर्तांद्रियगुणेबुद्धींद्रियाणांगुणेशब्दादिविषयवृत्तिलक्षणव्यापारेछन्नेसंवृतेप्यहमिवाहंकारचप्रसुप्तेसर्वेंद्रियप्रवृत्त्युपरमेणदेहाभिमानाभावलक्षणायांसुप्तौप्राणंप्रविश्यछन्नः । प्राणेनकूटस्थेनिर्विकारहृदयस्थेपरमात्मन्यास परमात्मानंविशिनष्टि यमृतइति यंपरंमात्मानंऋतेतदनुस्मृतिः तस्यानुस्मृतिरेवनस्यात् । एतावंतंकालंसुखमस्वाप्सामितिसुखपरामर्शोनस्यादित्यर्थः । तदापरमात्माकृष्टशक्तित्वेनाभिमानिदेवानांज्ञानजनकशक्त्यभावोनदोषाय । तदन्यादेवताःसर्वाइत्युक्तत्वात् ४० इदानींसर्वोत्कृष्टत्वेनसर्वस्माद्विन्नस्यसर्वोपकारकत्वेनश्रेष्ठस्यपरमात्मतत्वस्यापरोक्ष्यंकदानुस्यादितिसोदाहरणंतत्साधनमाह यर्हीति यार्हियदाप्रह्मनाभचरणेषणयाअनुदिनंप्रवृद्धयोर्व्याभक्त्याचेतसःसत्वादिगुणकर्मजातानिमलानिविधमेत्परिहरेत्तदातस्मिन्चेतासिशुद्धेआत्मतत्त्वंपरमात्मस्वरूपंसाक्षादुपलक्ष्यतेअपरोक्षीक्रियते कथमिवयथासवितृप्रकाशोमलदृशौनिर्मलेचक्षुषिदृश्यतइति ४१

यर्ह्यब्जनाभचरणेषणयोरुभक्त्याचेतोमलानिविधमेद्गुणकर्मजानि ॥ तस्मिन्विशुद्धउपलभ्यतआत्मतत्वंसाक्षाद्यथामलदृशौसवितृप्रकाशः ४१ राजोवाच ॥ कर्मयोगंवदतनःपुरुषोयेनसंस्कृतः ॥ विधूयेहाशुकर्माणिनैष्कर्म्यांविंदतेपरम् ४२ एवंप्रश्नमृषीन्पूर्वमपृच्छंपितुरंतिके ॥ नाब्रुवन्ब्रह्मणःपुत्रास्तत्रकारणमुच्यताम् ४३ आविर्होत्रउवाच ॥ कर्माकर्मविकर्मेतिवेदवादोनलौकिकः ॥ वेदस्यचेश्वरात्मत्वात्तत्रमुह्यंतिसूरयः ४४ परोक्षवादोवेदोयंबालानामनुशासनम् ॥ कर्ममोक्षायकर्माणिविधत्तेह्यगदंयथा ४५

निमिर्ज्ञानयोगंश्रुत्वाकर्मयोगंपृच्छति कर्मयोगमिति येनकेनप्रकारेणसंस्कृतः शुद्धः ४२ ब्रह्मणःपुत्राःसनकादयःकारणंपरिहारवचनेनिमित्तम् ४३ आविर्होत्रः जानंतोपिहिदुर्ज्ञेयःप्रश्नोयंज्ञानिनामपि । इतिवेदयितुंब्रह्मपुत्रानोचुर्निमेःपुरइतिवाक्यात्ज्ञानिनामपिदुर्ज्ञेयत्वंनिमित्तमित्यभिप्रेत्यतैःप्रश्नपरिहारःआदौनकृतइतिसूचयन्प्रश्नंपरिहरति कर्मेति इदंकर्मप्रशस्तंइदंकर्मकर्तुमयोग्यंइदंविकर्मविरुद्धंकर्मेतिवेदगतोवादोविचारोनलौकिकःलोकविषयोवेदबहिर्मुखजनगोचरोनभवति किंतुवेदविचारकुशलपुरुषविषयएवेत्यर्थःकुतस्तत्राह वेदस्येति चशब्दएवार्थे ईश्वरात्मत्वाच्चेश्वरविषयत्वादेव वैदिकानामपितत्प्रसादंविनासुज्ञेयोनेतिभावेनाह तत्रेति तत्रवेदार्थविचारे ४४ ननुवेदस्येश्वरविषयत्वंकथंयुज्यतेस्वर्गकामोयजेतेत्यादिकर्मविषयत्वप्रतीतेरतआह परोक्षेति परोक्षतोवादोवचनंयस्यसतथा अयंवेदोमुख्ययावृत्त्यासाक्षाद्ब्रह्मवक्तृमुख्ययाकर्मच किमर्थमेवंकल्प्यतेइत्यत्राह बालानामिति अल्पज्ञानिनामनुशासनंकुर्वन्वेदोंतःकरणशुद्धयेदुष्कर्ममोक्षायब्रह्मार्पणबुद्ध्यातदुद्दिश्यकर्माणिविधत्ते । कुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाइत्यादिलक्षणोहियस्मात्तस्मादुभयथापिब्रह्मविषयत्वमविहतंवेदस्य एकस्योभयविषयत्वंकुत्रदृष्टंअत्राह अगदंयथेतियथायदैकमेवद्रव्यमपथ्यजनकंतदेवौषधीकृतमपथ्यंपरिहर्तृभवतितथेत्यर्थः यद्वैकंपर्पटकंचिकित्साभेदाज्ज्वरवातयोःपरिहारायप्रभवति प्रकृतेपितथेति ४५

---

१ जीवस्यापिप्रकृतत्वेपिकूटस्थपदोक्तपरमात्मैवात्रयोग्यतयापरामृश्यतइतिभावः दी० । ईश्वरमतितिप्राप्नोतीति ईश्वरात्मा तस्यभावस्तत्त्वम् । यात्राभिप्रेतत्वादितिहृदयम् ।

वेदस्यापौरुषेयत्वेनविप्रलंभादिदोषाभावादज्ञेनापिवेदोक्तंकृतंसुकर्मेत्याशंक्यभगवदज्ञकृतंविकर्मतत्ज्ञानकृतमेवसुकर्मइतिविवेनक्ति नाचरेदिति स्वयंसर्वपूजितमिदमिष्टप्रदंदेवंनजानातीत्यज्ञः अतएवा जितेंद्रियःविषयलंपटःयोनापुरुषोवेदोक्तंकर्माचरेत्करोति समृत्योर्मृत्युमतीवदुःखमुपैतिकेनकारणेनेत्यतउक्तम् विकर्मणेति वेदोक्तकर्मणोविकर्मत्वंकुतइत्यतउक्तम् अधर्मेणेति एषमेसर्वधर्माणांध र्मोधिकतमोमतः । यद्भक्त्यापुंडरीकाक्षंस्तवैरर्चेन्नरःसदेतिभीष्मोक्तेरनेवंवित्कर्मणोऽधर्मत्वात् । यद्यनेवंवित्महत्पुण्यकर्मकरोतितद्धास्यांतत:क्षीयतएवेतिश्रुतिर्हिशब्दआददाति । अनेनेश्वरार्पणमौ पथमेवकर्मणोनश्वरफलरोगविनाश्यानित्यमुखहेतुरित्युक्तंभवति ४५ तर्हिस्वर्गेलोकेनभयंकिंचनास्तीतिश्रुतिःकथंसंगच्छतइतितत्राह रोचनार्थमिति अल्पबुद्धेर्बहिर्मुखस्ययोग्यस्यउत्पिपादयिषुर्द यालुरिवतस्मिन्बुद्धचवतारार्थंगुडजिह्विकान्यायमनुसंदधानोमधुरंमुक्तिफलंगर्भीकृत्यस्वर्गादिपुष्पंमधुररसमिवप्रकाश्यतदर्थेकर्मविदधान अधीतश्रुतवेदार्थस्यसमुत्पन्नजिज्ञासस्यक्षणभंगुरफलत्वात्स्व र्गादौवैराग्यमुत्पाद्यश्रीनारायणचरणारविंदभक्तिमुत्पाद्यतदुपासनासंभूतसंवित्संजातप्रसादसुलभापवर्गेतात्पर्यपर्यवसायिनीफलश्रुतिःसंगताभवतीति । अज्ञात्वाकुर्वतःकर्मस्खलनात्पापकारणं । बदेवार्प यतोविष्णोर्नैवपापायतद्भवेत् । मनोदोषविहीनस्यनतुदोषवतःक्वचित् । सत्सुकेशवपूर्वेषुक्रमशोभक्तिहीनता । असद्भक्तिस्तथास्नेहोबहुमानमथापिवा । स्वोत्तमानांप्रियत्यागादात्मप्रियकीर्षया । अधिकेष्वे

नाचरेद्यस्तुवेदोक्तंस्वयमज्ञोऽजितेंद्रियः ॥ विकर्मणाह्यधर्मेणमृत्योर्मृत्युमुपैतिसः ४६ वेदोक्तमेवकुर्वाणोनिःसंगोर्पितमीश्वरे ॥ नैष्कर्म्यांलभतेसिद्धिंरो चनार्थफलश्रुतिः ४७ यआशुहृदयग्रंथिंनिर्जिहीर्षुःपरात्मनः ॥ विधिनोपचरेद्देवंतंत्रोक्तेनचकेशवम् ४८ लब्ध्वाचाव्यग्रमाचार्यंतेनसंदर्शितागमः ॥ महापुरुषमभ्यर्चेन्मूर्त्याभिमतयात्मनः ४९ शुचिःसंमुखआसीनःप्राणसंयमनादिभिः ॥ पिंडंसंशोध्यसंन्यासकृतरक्षोऽर्चयेद्धरिम् ५० अर्चादौहृदयेवापि यथालब्धोपचारकैः ॥ द्रव्यक्षित्यात्मलिंगानिनिष्पाद्यप्रोक्ष्यचासनम् ५१ पाद्यादीनुपकल्प्याथसंनिधाप्यसमाहितः ॥ हृदयादिकृतन्यासोमूलमंत्रे णचार्चयेत् ५२ सांगोपांगांसपार्षदांतांतांमूर्तिंस्वमंत्रतः ॥ पाद्यार्घ्याचमनीयाद्यैःस्नानवासोविभूषणैः ५३ गंधमाल्याक्षतस्रग्भिर्धूपदीपोपहारकैः ॥ सांगंसंपूज्यविधिवत्स्तवैःस्तुत्वानमेद्धरिम् ५४

वनीचोच्चभक्तिर्व्यत्यासएववा । स्वोत्तमस्यात्मनश्चैवसमस्नेहोथवाभवेत् कार्येषुबहुमानोवास्वात्मनःसमतापिवा । आधिक्येकिमुवक्तव्यमात्मनःशक्तिहापनम् । शक्तस्याशक्तवत्कर्ममनोदोषाइतीरिता । इत्यनेनोक्ततात्पर्यार्थोबोद्धव्यः ४७ इदानींभगवदर्चनप्रकारंकथयति यआशीति तंत्रोक्तेनपंचरात्रोक्तेन ४८ तंत्रोक्तसंप्रदायमजानतःकथमर्चनाघटतइतितत्राह लब्ध्वेति अव्यग्रमिति क्रियाविशेषणंबहुकालंपरीक्ष्याचार्यंलब्ध्वेत्यस्मिन्नर्थेवर्तते तेनाचार्येणसंदर्शितागमःसम्यक्प्रदर्शितशास्त्रसंप्रदायः ४९ पिंडंशरीरंसम्यक्मंत्राक्षरन्यासेनकृतात्मरक्षः । परीक्ष्यैवगुरुःशिष्यंशिष्योपिगु रुमाव्रजेत् । अन्यथानरकायैवप्रायश्चित्तंगुरोस्तथेत्यनेनाव्यग्रत्वमुभयोरप्यपेक्षितमिति अत्रोक्तक्रियाविशेषणत्वेनप्रयुक्तमिति ५० अर्चाकारिणांबाहुविध्यादधिष्ठानविशेषमाह अर्चादाविति द्र व्यलिंगं शिलाद्यं क्षितिलिंगं स्थंडिलं आत्मलिंगंमनोलक्षणं । द्रव्यलिंगंशिलाद्यंस्यादात्मलिंगंमनोमयम् । अथवास्थंडिलंचैवविष्णोर्लिंगंप्रकीर्तितमिति अस्मादयमेवात्रविवक्षितोर्थः ५१ हृदयादिकृत मंत्रन्यासःसांगोपांगमंगमंत्रवाच्यमूर्तिभिःसहिताम् ५२ ५३ ५४

तन्मयंतत्प्रधानं विष्णोर्भृत्योहमित्येवंसदास्याद्भगवन्मयः नैवाहंविष्णुरस्मीतिविष्णुःसर्वेश्वरोह्यजः । इतिवचनात्स्वामित्वमेवार्थोनतुतत्स्वरूपत्वं स्वमात्मानमित्युत्तरत्रैक्यविधानाद त्रापिसएवार्थःकिं नस्यादितिचेन्न स्वंस्वतंत्रमात्मानंव्याप्तमित्यर्थोपपत्तेः । स्वादानात्स्वात्मनोव्याप्त्याविष्णुःस्वात्मेतिकथ्यते । ननुजीवस्वरूपत्वात्सहिविश्वेश्वरःप्रभुरितिप्रमाणोपेतत्वात्हिशब्देनास्यार्थस्यबहुप्रमाण प्रसिद्धिद्योतयति ५५ ५६ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेविज०टी०तृतीयोध्यायः ॥ ३ ॥ स्वच्छंदजन्मभिःस्वेच्छावतारैः कर्ताकरिष्यति १ द्रुमिलःभगवद्गुणकर्मणामनंतत्वात्प्रश्नोदुष्परि हारइतिभावेनाह योवाइति २ नन्वेवंचेल्लोकेप्रश्नप्रतिवचनेगुरुशिष्यभावौचनस्तइतिदोषपरिहारायययथाशक्तिप्रवक्ष्यामीत्यभिसंधायाह भूतैरिति भूतैरित्युपलक्षणं । महदहंकारौपंचभूतानिचय दासप्तभिर्ततदापुरुषाभिधानमवाप यदाचमहदादिचतुर्विंशतितत्त्वैःविराजंब्रह्मांडाख्यंपुरंविरचय्यस्वांशेनतस्मिन्प्रविष्टःतदापुरुषाभिधानमवाप । यदाचात्मसृष्टैःपृथिव्यादिपंचभूतैर्ब्रह्मांडांतःपुरंजातावे कवचनं पुराणिशरीराणिविरचय्यस्वांशेनपुरुषरूपेणतस्मिन्विष्टःतदापुरुषाभिधानमवाप । विष्णोस्तुपुरुषाख्यानित्रीणिरूपाण्यथोविदुः । प्रथमंमहतःस्रष्टृद्वितीयंत्वंडसंस्थितं । तृतीयंदेहिनांदेहेतानि ज्ञात्वाविमुच्यत इति । पुरुषरूपविष्णुज्ञानस्यमुक्तिहेतुत्वोक्तेःसाक्षात्सच्चिदानंदानिपुरुषरूपाणिविष्णोरभिन्नानीतिज्ञातव्यं । नरःपुरुषःतेनसृष्टंनारंतस्याश्रयोनारायणः नरसृष्टत्वान्नारंब्रह्मांडंतदाश्र

आत्मानंतन्मयंध्यायन्मूर्तिंसंपूजयेद्धरेः ॥ शेषमाधायशिरसिस्वधाम्न्युद्वास्यसत्कृतम् ५५ एवमभ्यर्कतोयादावर्चयेद्धृदयेचयः ॥ यज्ञेश्वरंस्वमात्मानम चिराम्मुच्यतेहिसः ५६ ॥ इतिश्रीभागवतेम०एकादशस्कंधेवसुदेवनारदसंवादेजायंतेयोपाख्यानेविदेहप्रश्नेतृतीयोध्यायः ॥ ३॥ राजोवाच ॥ यानिया नीहकर्माणिर्यैर्यैःस्वच्छंदजन्मभिः ॥ चक्रेकरोतिकर्तावाहरिस्तानिब्रुवंतुनः १ ॥ द्रुमिलउवाच ॥ योवाअनंतस्यगुणाननंतानानुक्रमिष्येत्सतुबालबुद्धिः ॥ रजांसिभूमेर्गणयेत्कथंचित्कालेननैवाखिलशक्तिधाम्नः २ भूतैर्यदापंचभिरात्मसृष्टैःपुरंविराजंविरचय्यतस्मिन् ॥ स्वांशेनविष्टःपुरुषाभिधानमवापनारा यणआदिदेवः ३ यत्कायएषभुवनत्रयसन्निवेशोयस्येंद्रियैस्तनुभृतामुभयेंद्रियाणि ॥ ज्ञानांशकेनविशतोबलमोजईहास्त्वादिभिःस्थितिलयोद्भव आदिकर्ता ४ आदावभूच्छतधृतीरजसास्यसर्गेविष्णुःस्थितौक्रतुपतिर्द्विजधर्मसेतुः ॥ रुद्रोप्ययायतमसापुरुषःसआद्यइत्युद्भवस्थितिलयाःसततंप्रजासु ५

योऽस्तिनरस्यविद्यमानंनारंशरीरंतदाश्रयोपि संसारिव्यावृत्त्यर्थआदिदेवइति ३ एतदेवविशिनष्टि यत्कायइति भुवनत्रयसंन्निवेशोयस्यकायेशरीरेभगवच्छरीराधारत्वेनवर्ततइत्यर्थः । तनुभृतामुभयेंद्रि याणिज्ञानकर्मोत्पादकानींद्रियाणियस्यहरेरींद्रियैःप्रेरितानिप्रवर्तंते अनेनशरीरांतस्थत्वमुक्तं कथंप्रेरकत्वमित्यतउक्तं ज्ञानांशकेनेति ज्ञानस्वरूपेणांतःशरीरंविशतः नकेवलंश्रवणादीनियदींद्रियप्रेरि तानिअपितुबलादीन्यपीत्याह बलमिति सत्त्वादिभिर्गुणैःस्थितिश्चलयश्चउद्भवश्चयस्मात्सतथाअतआदिकर्तेत्युच्यते ४ एतदेवविवृणोति आदाविति अस्यजगतःसर्गेतादर्थ्येसप्तमीसृष्टयर्थंरजसागुणेनतं ब्रह्माणंसृष्ट्वादावग्रेतदंतर्यामित्वेननान्नाशतधृतिःशतानंदोब्रह्मेत्यभूत्अस्यस्थितौनान्नाविष्णुरभूत् स्थित्यैहेतुत्वंवक्ति क्रतुपतिरिति क्रतवोद्विजधर्माश्चनिमित्तान्येतैर्जगत्स्थापयतीत्यर्थः । सत्त्वेनेतिग्रा ह्यंतमसागुणेनास्याप्ययायतंरुद्रंसृष्ट्वातदंतर्यामित्वेननान्नारुद्रोभूदतःसआद्यःपुरुषाकारेणएतत्साधननान्नापुरुषोभूदितिभावः । उपसंहरति इतीति सततमितिवीप्सोपलक्षणं कालंकालंप्रजासुउद्भव स्थितिलयाइति एवंप्रकारेणहरेर्वर्तते नान्यस्मादितिनिश्चितं तदुक्तं ब्रह्मणिस्थोसृजद्विष्णुःस्थित्वारुद्रेत्वभक्षयत् पृथक्स्थित्वाजगत्पातितद्ब्रह्माद्याह्वयोहरिरिति अतइयंकल्पनाक्लिष्टेतिनमंतव्यम् ५

हरीरूपांतरैरपित्रिजगत्स्थितिकरोतीत्याशयेनमाहात्म्यप्रकटनपूर्वकंतान्प्राह ' धर्मस्येत्यादिना । धर्मस्यसकाशात्तपश्चालोचनइतिधातोः आलोचनंनिश्चयज्ञानस्वमात्मानंतपातजानातीतस्वतपाः स्वरूपभूतःप्रभावोयस्यसःस्वप्रभावःस्वविषयज्ञानरूपश्चासौस्वरूपभूतप्रभावरूपश्चेत्यर्थः स्वशब्दःपदद्वयेनसंबध्यते अवतारप्रयोजनमाह नैष्कर्म्येति नैष्कर्म्यलक्षणंयोगंमुक्तिसाधनंज्ञानमवदत्स्वयंच जनशिक्षार्थंयोगमुपासनालक्षणंध्यानंचचारेतावतारप्रयोजनोपिलोकानुग्रहकातरोभगवेकत्रआश्रमेविशेषआस्तेइत्याह अद्यापीति ६ श्रीनारायणंप्राणंचविनान्यान्सुरानपिपरेज्ञानप्रतिबंधिनःका मादयः आविशंतिकिमुतान्यानितिभावेनेंद्रस्याज्ञानंहरेर्महिम्नोऽप्रतिहतत्वंचप्रकटयितुंवक्ति इंद्रोपीति । एषनारायणोनाक्यसुखंनाकेविद्यमानंसुखमैश्वर्यलक्षणंजिघृक्षति ग्रहीतुमिच्छतीतिनिरूप्य ज्ञान रूपानपिसुरान्विनाप्राणंकचित्परे । आविशंतिह्यतस्तेषामज्ञानादिनतुस्वतः । अथैनमेवमाप्रोचोर्यंमध्यमःप्राणःएवमेतादेवताःपाप्मनाविद्धाइत्यादिश्रुतिस्मृतिभ्योयमर्थःसिद्धः । सकामोबदर्युपा ख्यंबदरीत्युपपदाश्रमेत्याख्यायस्यसतथातंबदरिकाश्रमं अप्सरोगणादिभिःसहगत्वास्त्रीणांप्रेक्षणेषुभिर्नयनलक्षणशरैरविध्यत् । अमुंभगवंतमितिशेषः । तस्यहरेर्महिमामाहात्म्यंनजानातीत्यतन्महि ज्ञःउपलक्षणमेतत्इंद्रादिरप्येवंअनेनमुख्यप्राणोपिभगवदनुग्रहादसुरकृतपीडायाअविषयः । किमुतहरिरसुराविष्टकामादिपीडायाइतिन्यायोदर्शितः । तंहासुराऊचुर्विदध्वंसुर्यथाश्मानमाखणमृत्वावि

धर्मस्यदक्षदुहितर्यजनिष्टमूर्त्यांनारायणोनरइतिस्वतपःप्रभावः ॥ नैष्कर्म्यलक्षणमुवाचचचारयोगंयोद्यापिचास्तऋषिवर्यनिषेवितांघ्रिः ६ इंद्रोपि नाकसुखमेषजिघृक्षतीतिकामंन्ययुंक्तसगणंसबदर्युपाख्यम् ॥ गत्वाप्सरोगणवसंतसुमंदवातैःस्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः ७ विज्ञायशक्रकृतमक्रममा दिदेवःप्राहप्रहस्यगतविस्मयएजमानान् ॥ माभैर्विभोमदनमारुतदेववध्वोगृह्णीतनोबलिमशून्यमिमंकुरुध्वम् ८ इत्थंब्रुवत्यभयदेनरदेवदेवेसव्रीडनम्र शिरसःसघृणंतमूचुः ॥ नेयंविभोत्वयिपरेविकृतिर्विचित्रास्वारामधीरनिकरानतपादपद्मे ९ त्वांसुन्वतांसुरकृतावहवोंतरायास्तान्कोविलंघ्यपरमंव्रजता त्पदंते ॥ नान्यस्यबर्हिषिबलिर्ददतःस्वभागंधत्तेपदंत्वमवितायदिविघ्नमूर्ध्नि १० क्षुत्तृट्त्रिकालगुणमारुतजैह्वयशैश्न्यादस्मादपारजलधेरतितीर्यकेचि त् ॥ क्रोधस्ययांतिविफलस्यवशंपदेगोर्मज्जंतिदुश्चरतपश्चवृथोत्सृजंति ११

ध्वंसत्वैवंहैवविध्वंसमानाविघ्वंचोविनेशुरितिश्रुतेः ७ अक्रमंअस्थानेपदन्यासमन्यायलक्षणं इममाश्रमम् ८ अविकृतिः अविकारः स्वारामाश्चधीराश्चस्वारामधीराःतेषांनिकरःसमूहस्तेनानतंपादपद्मंयस्यसत थातस्मिन् ९ भवतामल्पशक्तित्वादविकारःकिंनस्यादित्याशंक्यवयंभवंतंप्रत्यल्पबलाअन्यान्प्रतिबलवंतइतिभावेनाहुः त्वामिति । सुन्वतांभजमानानांयेअंतरायाःकस्तान्विलंघ्य तेपरमंपदंव्रजता त् नकोपि व्रजतिचेत् कोवायुरेव नान्यइत्यर्थः सावाएषादेवतैतासांदेवतानांपाप्मानंमृत्युमपहत्यार्थैनांमृत्युमत्यवहत्सायदामृत्युमत्यमुच्यतसोग्निरभवदितिश्रुतिश्चोक्तार्थेबलवत्प्रमाणं । नन्वेवंतर्हिवायु मंतरेणभजतामितरेषांभगवत्प्राप्तिलक्षणामुक्तिर्नस्यादित्याशंक्य भगवदनुग्रहेसतिकाप्यापदुस्तरानस्यादितिभावेनाहुः नेति त्वमविताबर्हिषिस्वभागंददतःपुंसोयदिविघ्नमूर्ध्निपदंधत्तेतर्हिसबलिरन्यस्यनत वैव यदिविघ्नमूर्ध्निपदंनदध्यात्तर्हिबलिरपित्वत्प्रीतिजनकोनस्यात् नचायंतथा तस्मात्तत्कर्णभक्तेःप्राधान्यंतथैवविघ्ननिवृत्तिरितिदर्शितंभवति १० किंबहुनाकामादिजयादपिक्रोधजयएवदुःसाध्यःतवसोपिगो ष्पदतरणवत्सुशकइतिविज्ञापयंति क्षुत्तृडिति चत्वारोमासाःशीतकराःचत्वारउष्णहेतवःचत्वारोवर्षहेतवइतित्रिकालगुणाः शीतोष्णवर्षसंज्ञाः जैह्व्यंजिह्वाभवंशैश्न्यंशिश्नप्रभवंव्यसनं क्षुदादिव्यसनमया दपारजलधेरतितीर्यउत्तीर्यये केचिदपंडिताःभवदनुग्रहरहिताःविफलस्यप्रतिक्रियाकरणशक्त्यभावेनफलरहितस्यात्मनाशादिविविधफलस्यक्रोधस्यवशंयांतितेगोष्पदेमज्जंति दुश्चरतपश्चवृथोत्सृजंति ११

इतिशब्दःप्रभृतिवचनः १२ रूपिणीःप्रशस्तरूपाः १३ वृङ्ध्वंस्वीकुरुत १४ सुराणांबंदिनःबंदिग्रहणपटवः १५ १६ येयेहरेरवतारास्तेतेसर्वेप्येवंविधमाहात्म्यांबुध्यइतिज्ञाप्यते हंसस्वरूपीति । विष्णुःकलयाहंसरूप्यवतीर्णोजगतांशिवायात्मयोगंपरमात्मज्ञानमवदत् । एवंदत्तादावप्यन्वेतव्यम् । कुमारोनामहरेरूपांतरंसनत्कुमारादियोगीश्वरज्ञानोपदेष्टा । कुमारनामातु हरिर्ब्रह्मचारीवपुःस्वयं । सनत्कुमारायपरंप्रोवाचजगदीश्वरइत्यनयास्मृत्या । विष्णोःसनत्कुमाराख्याच्छ्रुत्वुर्ज्ञानमुत्तमम् । सनत्कुमारप्रमुखायोगेशःपरमेश्वरात् इत्यनयाचोक्तार्थःसिद्धइति हयास्येहय ग्रीवावतारे तेनमधुभिदाश्रुतयआहृताः १७ मात्स्येवतारेइलाभूमिर्गुप्ता अप्ययेप्रलयेसत्यव्रतोनाममनुःसप्तऋषयश्चगुप्ताःअंभसःक्ष्मामुद्धरतोहरेःक्रोडेवराहावतारेदितिजोहिरण्याक्षोहतः । अमृतो त्पत्तयेक्षीरसमुद्रोन्मथनेमंदराद्रिः तापसोनामहरिरिभराजंग्राहादमुंचत् १८ व्यासावतारेसंस्तुन्वतःश्रमणाग्निःसंगानृषींश्चसंसाराब्धिपतितान्संसाराब्धेरमूमुचत् । सुपर्णाऋषयोव्यासंनाथमा

इतिप्रगृणतांतेषांस्त्रियोत्यद्भुतदर्शनाः ॥ दर्शयामासशुश्रूषामर्चनंकुर्वतीर्विभुः १२ तेदेवानुचराद्दृष्ट्वास्त्रियःश्रीरिवरूपिणीः ॥ गंधेनमुमुहुस्तासां रूपौदार्यहृतश्रियः १३ तानाहदेवदेवेशःप्रणतान्प्रहसन्निव ॥ आसामेकतमांवृङ्ध्वंसुवर्णास्वर्गभूषणाम् १४ ओमित्यादेशमादायनत्वातंसुरवंदिनः ॥ उर्वशीमप्सरःश्रेष्ठांपुरस्कृत्यदिवंययुः १५ इंद्रायानम्यसदसिशृण्वतांत्रिदिवौकसाम् ॥ ऊचुर्नारायणबलंशक्रस्तत्रासविस्मितः १६ हंसस्वरू प्यवददच्युतआत्मयोगंदत्तःकुमारऋषभोभगवान्पितानः ॥ विष्णुःशिवायजगतांकलयावतीर्णस्तेनाहृतामधुभिदाश्रुतयोहयास्ये १७ गुप्ताप्ययेम नुरिलाऋषयश्चमात्स्येक्रोडेहतोदितिजउद्धरतोंभसःक्ष्माम् ॥ कौर्मेधृतोद्रिरमृतोन्मथनेस्वपृष्ठेग्राहात्प्रपन्नमिभराजममुंचदार्तम् १८ संस्तुन्वतोब्धिपति ताञ्छ्रमणान्ऋषींश्चशक्रंचवृत्रवधतस्तमसिप्रविष्टम् ॥ देवस्त्रियोसुरगृहेपिहिताअनाथाजघ्नेसुरेंद्रमभयायसतांनृसिंहे १९ दैवासुरेयुधिसदैत्यपतीन्सुरार्थे हत्वांतरेषुभुवनान्यदधात्कलाभिः ॥ भूत्वाथवामनइमामहरद्बलेःक्ष्मांयाच्ञाछलेनसमदाददितेःसुतेभ्यः २० निःक्षत्रियामकृतगांचत्रिःसप्तकृत्वोरामस्तु हैहयकुलाप्ययभार्गवाग्निः ॥ सोब्धिंबबंध दशवक्त्रमहन्सलंकांसीतापतिर्जयतिलोकमलंघ्यकीर्तिः २१ भूमेर्भरावतरणाययदुष्वजन्माजातःकरिष्यति सुरैरपिदुष्कराणि ॥ वादैर्विमोहयतियज्ञकृतोऽतदर्हान्शूद्रान्कलेःक्षितिभुजोन्यहनिष्यदंते २२ एवंविधानिकर्माणिजन्मानिचजगत्पतेः ॥ भूरिणि भूरियशसोवर्णितानिमहाभुज २३ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेवसुदेवनारदसंवादेजायंतेयोपाख्यानेविदेहप्रश्नेचतुर्थोध्यायः ॥ ४ ॥ ७ ॥

नाययुःसदा । ध्वांतंनिवर्तयास्माकंमुमुग्धीबिचवादिनः । इतिवचनात्व्यासावतारेइयंकथेतिज्ञायते नृसिंहेनरसिंहावतारेतमसिप्रविष्टंकर्तव्यमूढमिंद्रंवृत्रवधतोदोषादमूमुचत् । सतामभयायासुरेंद्रंजघ्ने असुरगृहेपिहिताः अनाथाःदेवस्त्रियःअप्सरसश्चव्यमोचयदिति । स्मरणात्तुनृसिंहस्यशक्रोमुक्तोबृहद्बधात् । हिरण्यकहताश्चापितथैवाप्सरसांगणाइतिवचनसिद्धेयंकथा १९ उपेंद्ररूपोहरिःदेवासुरयुद्धे सुरार्थेदैत्यपतीन्हत्वा अंतरेषुमन्वंतरेषुभुवनान्यदधात्वामनोभूत्वायाच्ञाछलेनबलेरिमांक्ष्मांअहरत् हृत्वाचतामदितेःसुतेभ्यःसमदादित्यन्वयःतदुक्तं उपेंद्ररूपीभगवान्प्रतिमन्वंतरंविभुः । असुरान्हंतिनि यतंश्राद्धदेवेचवामनइति २० निःक्षत्रियांक्षत्रियरहितांहैहयकुलाप्यार्थउज्ज्वलितभार्गवाग्निःभृगुकुलोत्थवह्निःलंकामहन्हतवान्दशवक्त्रंचाहन्हतवान्लोकंजयाति २१ बुद्धोयज्ञकृतोवादैर्विमोहयाति कल्कीकलेरंतेशूद्रान्क्षितिभुजोन्यहनिष्यत् २२ निगमयति एवंविधानीति २३ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेविजयध्वजकृतटीकायांचतुर्थोध्यायः ॥ ४ ॥ ७ ॥

श्रुतभगवद्गुणलोकविशेषोराजाभगवद्विमुखानांकास्मिंस्थानेस्थितिरितिपृच्छति भगवंतमिति हेआत्मवित्तमाः १ हरःपतित्वनात्पतापकत्वात्तदभजनाद्द्वेषः पापहृदारात्पपनमाणाम स्येवनिष्ठेतिवक्तुंभगवदवयवेभ्योवर्णाश्रमाणामुत्पत्तिप्रकारमाह मुखेति शमादिगुणैः २ एषामुत्पन्नानांमध्येआत्मप्रभवंस्वोत्पादकंपितरमित्यर्थः पितुर्हरेः स्थानाद्वैकुंठादिलक्षणाद्भ्रष्टाः ३ श्रुत्या र्थांविचारानाधकृतत्वेनदूरीकृतहरिकथाश्रवणकीर्तनादिसाधनानांस्त्रीशूद्रादीनांश्रेयःसाधनमाह दूरेहरिकथाइति भवादृशानामनुकंपाविषयत्वेनहरिकथाश्रवणादधिकारिणःस्युरितिभावः अच्यु तस्यकीर्तनंयेषामस्तितेअच्युतकीर्तनाः तेचदूरे ४ विप्रादीनांहरिभक्त्यभावेश्रुतिविचारोनमोक्षहेतुरित्याह विप्रइति विप्रादयःश्रौतेनश्रुतिविचारयोग्येनजन्मनाहेतुनाहरेःपदांतिकंप्राप्ताहरि पदसमीपप्राप्तियोग्याःयद्यप्यथापिआम्नायेनसहवादःविवादोयेषामस्तीतिआम्नायवादिनःहरिभक्तिलक्षणमुख्यार्थापरिज्ञानात् मुह्यंतितत्त्वंनजानंतीत्यतोजन्मादिकंअप्रयोजकंकिंतुहरिभक्तिरेवेत्यर्थः ५ ननुवेदोक्तकर्मणांतत्त्वज्ञानोत्पत्तेःकथंतेषांमोहःकर्मणाज्ञावमातनोतीतिश्रुतेरित्याशंक्यआम्नायविवादित्वेनसम्यक्कृतदुरितकर्मतत्त्वापरिज्ञानादिदोषग्रहग्रस्तत्वादित्याह कर्मणीति अकोविदत्वेहे तुःस्तब्धाइति वत्रमूर्खाइतिमूढत्वेन अन्यवःश्रोतुंअक्ष्यमित्यतः पंडितमानिनइति अतोमूढाःपयामाध्व्यास्वर्गादिमधुवादिन्यागिरासद्योमधूनिगिरतीवस्थितयावाचाउत्सुकाःजिह्वारंसंवतःतथा

राजोवाच ॥ भगवंतंहरिंप्रायोनभजंत्यात्मवित्तमाः ॥ तेषामशांतकामानांकानिष्ठाविजितात्मनाम् १ चमसउवाच ॥ मुखबाहूरुपादेभ्यःपुरुषस्याश्रमैः सह ॥ चत्वारोजज्ञिरेवर्णागुणैर्विप्रादयःपृथक् २ यएषांपुरुषंसाक्षादात्मप्रभवमीश्वरम् ॥ नभजंत्यवजानंतिस्थानभ्रष्टाःपतंत्यधः ३ दूरेहरिकथाःकेचि दूरेचाच्युतकीर्तनाः ॥ स्त्रियःशूद्रादयश्चैवतेऽनुकंप्याभवादृशाम् ४ विप्रोराजन्यवैश्यौचहरेःप्राप्ताःपदांतिकम् ॥ श्रौतेनजन्मनाथापिमुह्यंत्याम्नायवादि नः ५ कर्मण्यकोविदाःस्तब्धामूर्खाःपंडितमानिनः ॥ वदंतिवादकान्मूढाययामाध्व्यागिरोत्सुकाः ६ रजसाघोरसंकल्पाःकामुकाअभिमन्यवः ॥ दांभिकामानिनःपापाविहसंत्यच्युतप्रियान् ७ वदंतितेन्योन्यमुपासितस्त्रियोगृहेषुमैथुन्यपरेषुचाशिषः ॥ यजंत्यसृष्टान्नविधानदक्षिणाद्रव्यैपरंघ्नंतिपशून तद्विदः ८ श्रियाविभूत्याभिजनेनविद्ययात्यागेनरूपेणबलेनकर्मणा ॥ जातस्मयेनांधधियःसहेराश्वरात्सतोवमन्यंतहरिप्रियान्खलाः ९ सर्वेषुशश्वत्तनु भृत्स्ववस्थितंयथाखमात्मानमभीष्टमीश्वरम् ॥ वेदोपगीतंचनशृण्वतेबुधामनोरथानांप्रवदंतिवार्तया १०

वादकान्स्वर्गादिविषयवचनविशेषान्वदंति ६ किंचातइति अतआह रजसेति तत्रजनितेनरजसारागेणघोरोनिष्ठुरःपश्वालंभनादिलक्षणःसंकल्पोयेषांतेतथाकामुकाःविषयलोलुपाःतद्विघ्नकर्तॄन्अ भिमन्यवःअभितःमन्युरेवप्रधानोयेषांतेतथाएवंविधाःपापाःअच्युतप्रियान्विहसंतिपृथक्पृथक्दोषानुक्त्वाविहसंतीत्यन्वयः ७ एतदेवविवृणोति वदंतीति गृहेषुस्थित्वान्योन्यमाशिषोवाक्यप्रबंधा न् निजगुणोत्कर्षलक्षणान्वदंति तत्रहेतुरुपासितश्रियइति किंचासृष्टान्नविधानदक्षिणाअदत्तान्नविध्युक्तगुरुदक्षिणाः परंकेवलंवृत्त्यैजीवनोपायार्थंपशूनजादीन्घ्नंति नत्वालभंतेकुतोऽतद्विदस्तत्त्वाज्ञाः ८ श्रियाशरीरकांत्याविभूत्याअणिमाद्यैश्वर्येणश्रीविभूत्यादिनाजातस्मयेनसमृद्धमदेन अवमन्यंतेअवजानंति ९ हरिप्रियावज्ञानमेवहर्यवज्ञानंतथापीदमधिकमितिभावेनाह सर्वेष्विति ह रेःशशविषाणवदसिद्धस्यावज्ञाकथंकारंसंगच्छतइत्यतोवातदवज्ञानप्रकारमाह सर्वेष्विति तत्रहेतुमाह अबुधाइति हर्यवज्ञानेपिश्रीसेवायाविष्णुसेवात्वात्तद्वतांकथमधःपातःस्यादितीयमाशंका येतुविष्णुमवज्ञायश्रियमेवह्युपासते उपेक्ष्यवाहरितेतुभूत्वायाज्याःपतंत्यधः इत्यनेनपरिहर्तव्या राजश्रीत्यभावेप्रकृतिवर्गप्रीत्याकिंप्रयोजनमभीष्टफलानुदयात् हृदयंगमजनप्रीत्यभावेपरिवृढदृढप्रीति

रपिनोदेतितत्साधकाभावादेवंप्रकृतेपिविष्णुप्रीत्यभावेलक्ष्म्यादिप्रीतिरापिअभीष्टफलदा नस्याल्लक्ष्म्यादिप्रीत्यभावेपरविष्णुप्रीतिरपिअभीष्टवर्षिणीनस्यात् अतोयथायोग्यंविष्णुप्रतिरनुकूलान्यप्रीतिरितिशास्त्रगुरूपदेशेनतत्तद्विष्णुजनभक्तिःकर्तव्येत्यतइयमेवविधेयानान्या तस्याश्चोदनाभावेपिनिम्नजलस्यंदनवत्स्वतःप्रवृत्तेः १० एवंकुर्वाणाअसुरप्रकृतयोनदेवप्रकृतयःतेषांवर्षायुतायुतकालेनापिमवृत्त्यदर्शनादुक्तनिदर्शनसाम्याच्चेत्याह लोकइति लोकेजंतोर्जन्ममृतिमतःप्राणिनोव्यवायादिसेवाःनित्याःसदातनाःसंति तुशब्दोद्व्यव्ययसद्भावसूचकःतत्र मद्यादिसेवायावामदेव्यादियज्ञान्विहायचोदना विधिर्नहितेषामस्तितदुक्तं व्यवायामिषमद्यानिहरेःपूजार्थमेवतु। वामदेव्योनामयज्ञोव्यवायोहरिपूजनम्। पितृयाज्ञोदेवयज्ञोमांसेनहरिपूजनं। व्यवाययज्ञेमद्यंतुसोमात्मकतयेष्यते। क्षत्रियादेर्नविप्राणांविप्रोदोषेणालिप्यते। अरागतःप्रवृत्तिःस्याद्रागोदोषस्यकारणम्। घ्राणभक्षोथवायज्ञेदेवैःसर्वस्यचेष्यते। पैष्टमद्यस्यमाध्व्यादिक्षात्रियस्यनदुष्यति। दैवैरत्यैवचप्रीतिर्विष्णोःपुत्रात्तुमानुषे। तस्माद्विहितमात्रेषुरागंमुक्त्वायथाविधि समाहितोहरिंस्मृत्वावर्तन्याजहिरभवोदिति। विधिर्नास्तिचेत्कामिति तत्रास्थीयतइतितत्राह व्यवस्थातिरिति। यज्ञान्विहायतेषुव्यवाया।दिषुस्थितिःसुरैवगृहंशरणंएषांतेतथाहरिविमुखाःवैरिष्टा। ततःकिंतत्राह आसुरेति। निषिद्धक्रियात्वात् असुरजनस्यवृत्तिर्जीविका नसुरांपिबेदितिश्रुतेः ११ एतदेवविवृणोति धनमिति यतोयस्माद्धर्मादस्यसविज्ञानंज्ञानमुत्पद्यते अनुज्ञानोत्पत्तेरनंतरंशांतिःप्रकृष्टामुक्तिर्भवति योधर्मश्चधनाद्भवतिताहक्धर्मैकफलंधनंयेकलेवरस्यार्थं गृहेषुकलत्रादिषुयुंजंतिप्रयुंजते कामस्यापिपुरुषार्थत्वात्तदर्थमर्थप्रयोगोयुक्तइतितत्राह मृत्युमिति। अनेनकामलक्षणपुरुषार्थस्यक्षणभंगुरत्वमुक्तं अतईदृशीप्रवृत्तिरासुरीत्यर्थः धनंपुष्टिलक्षणमोक्षहेतुरित्येवंविधधनस्यान्यविषयत्वंकुर्वतांआसुरीप्रवृत्तिरितिकिमुवक्तव्यमितीममर्थंहिशब्देनसूचयति १२ व्य

लोकेव्यवायामिषमद्यसेवानित्यास्तुजंतोर्नहितत्रचोदना ॥ व्यवस्थितिस्तेषुविहाययज्ञान्सुराग्रहैरासुरवृत्तिरिष्टा ११ धनंहिधर्मैकफलंयतोस्य ज्ञानंसविज्ञानमनुप्रशांतिः ॥ गृहेषुयुंजंतिकलेवरस्यमृत्युंनपश्यंतिदुरंतवीर्यम् १२ यद्घ्राणभक्षोविहितःसुरायास्तथापशोरालभनंनहिंसा ॥ एवंव्यवायःप्रजयानरत्यैइमंविशुद्धंनविदुःस्वधर्मम् १३ येत्वनेवंविदोसंतस्तथासदाभिमानिनः ॥ पशून्द्रुह्यंतिविस्रब्धान्प्रेत्यखादंतितेचतान् १४ द्विषंतःपरकायेषुस्वात्मानंहरिमीश्वरम् ॥ मृतकेसानुबंधेस्मिन्बद्धस्नेहाःपतंत्यधः १५

वायादीनांयज्ञेषुविहितत्वमर्थादुक्तं तद्विधानप्रकारमाह यद्घ्राणेति। अयमर्थः सुरायाघ्राणभक्षइतियत्सविप्रादीनांदैवयज्ञविशेषेविवक्षितः तथायत्पशोरालभनंतत्देवयज्ञेविहितंपशुमालभेतेतिहिंसानाविहिता। नहिंस्यात्सर्वभूतानिइतिच। यथाघ्राणभक्षादिकंविहितमेवंव्यवायः . पितृयज्ञेप्रजयासंतत्यर्थंविहितो रत्यैइंद्रियभोगार्थन अत्रापिव्यवायारूयपितृयज्ञेक्षत्रियस्यघ्राणभक्षमंतरेणसुराविहिता। व्यवाययज्ञेमद्यंतुसोमात्मकतयेष्यते। क्षत्रियादेर्नविप्राणांविप्रोदोषेणलिप्यते। अरागतःप्रवृत्तिःस्याद्रागोदोषस्यकारणं। घ्राणभक्षोथवायज्ञेदेवैःसर्वस्यचेष्यते इतिचोक्तं किमत्रमथितमत्राह इममिति धर्मस्वरूपाज्ञानमेवभ्रांतिकारणमित्यर्थः। यज्ञेष्वालंभनंप्रोक्तंदेवतोद्देशतःपशोः। हिंसानामतदन्यत्रततस्मात्तांनाचरेद्बुधः। यतोयज्ञेमृताऊर्ध्वयांतिदैवेचपैतृके। अतोलाभादालभनंस्वर्गस्यतुनमारणमितिवचनाद्यज्ञेपशोरालंभनंनमारणमित्युक्तम् १३ तत्रकेमारकामारकानांपशूनांकिंतत्फलमित्यत्राह येत्विति असंतोऽप्रशस्तकर्माणःत्रैवर्गिकाणांस्वहतपशुभिःस्वादनमेवप्रेत्ययजनफलं १४ किंचाभेदज्ञानात्ततोप्यधिकदुःखकरोलोकःस्यादित्याह द्विषंतइत्यादिना। स्वात्मानंस्वाधारंस्वस्मिन्नात्मनि च। स्वेमहिम्नीतिश्रुतेःपरकायेषुस्वकायेषुचसंतंकायिनोजीवादन्यंद्विषंतोऽसहमानाः। आत्मत्वादात्मशब्दोक्तंस्वस्मिन्नपिपरेषुच। जीवादन्यनपश्यंतिश्रुत्वैवंविद्विषंतिच। एतांस्त्वमासुरान्बुद्धिलक्षणैःपुरुषाधमानितिस्मृतिः प्रतीतार्थबाधिका १५

१ उपरिष्टादशेश्लोकेएव।

एतदेवविशदयति येकैवल्यमिति येकैवल्यंयथार्थज्ञानंअसंप्राप्ताःयेचमूढतांचातीताःपंडितंमन्यास्तेत्रिवर्गसाधनयोग्यमभिजन्मयस्यसतथाताटशमात्मानंपातयंति तमसीतिशेषः यद्वा अभेदज्ञानिनांगति मुक्तेदार्ढ्यमिश्रज्ञानिनांस्थितिमाह यइति केवलोहरिरिविज्ञानरहिताःअस्मादृशोनभवतिभगवान्किंतुग्रामणीवत्प्रयोजकइतिज्ञानवंतोयेतेभुक्तपुण्यफलाःआत्मानंस्वर्गान्मनुष्यलोकंप्रतिपातयंति तेतंमु क्तास्वर्गलोकंविशालक्षीणेपुण्येमर्त्यलोकंविशंतीतिच १६ उभयेपित्रैवर्गिकाःअधःपतंतीत्युक्तंतत्रकेषांकुत्रनिपातइत्यतोअधोनिपातंविविनक्ति येतत्रेति तत्रोभयेषुत्रैवर्गिकेषुयेआत्महनःपरमात्मानं द्विषंतःतेतमोविशंतीत्यन्वयःसीदंत्यवसीदंतिदुःखैकभाजोभवंति अशांताइत्यस्यविवरणंवासुदेवपराङ्मुखाइति अत्यायासरचितगृहादीन्हित्वाकालात्मनाभगवताध्वस्तःब्रह्मत्वंगमिष्यामइत्यादिमनो

येकैवल्यमसंप्राप्तायेचातीताश्चमूढताम् ॥ त्रैवर्गिकाभिजन्मानमात्मानंपातयंतिते १६ येतत्रात्महनोशांताअज्ञानेज्ञानमानिनः ॥ सीदंत्यकृतकृत्या वैकालध्वस्तमनोरथाः १७ हित्वात्यायासरचितगृहापत्यसुहृच्छ्रियः ॥ तमोविशंत्यनुच्छ्वासंवासुदेवपराङ्मुखाः १८ ॥ राजोवाच ॥ कस्मिन्कालेस भगवान्किंवर्णःकीदृशोनृभिः ॥ नाम्नावाकेनविधिनापूज्यतेतदिहोच्यताम् १९ करभाजनउवाच ॥ कृतंत्रेताद्वापरंचकलिरित्येषुकेशवः ॥ नानावर्णा भिधाकारोनानैवविधिनेज्यते २० कृतेशुक्लश्चतुर्बाहुर्जटिलोवल्कलांबरः ॥ कृष्णाजिनोपवीताक्षान्बिभ्रद्दंडकमंडलू २१ मनुष्यास्तुतदाशांतानिर्वैराः सुहृदःसमाः ॥ यजंतितपसादेवंशमेनचदमेनच २२ हंसःसुपर्णोवैकुंठोधर्मोयोगेश्वरोमलः ॥ ईश्वरःपुरुषोव्यक्तःपरमात्मेतिगीयते २३ त्रेतायांरक्त वर्णोसौचतुर्बाहुस्त्रिमेखलः ॥ हिरण्यकेशस्त्रय्यात्मास्रुक्स्रुवाद्युपलक्षणः २४ तंतदामनुजादेवंसर्वदेवमयंहरिम् ॥ यजंतिविद्ययात्रय्याधर्मिष्ठाब्रह्मवा दिनः २५ विष्णुर्यज्ञःपृश्निगर्भःसर्वदेवउरुक्रमः ॥ वृषाकपिर्जयंतश्चउरुगायइतीर्यते २६ द्वापरेभगवान्श्यामःपीतवासानिजायुधः ॥ श्रीवत्सादि भिरंकैश्चलक्षणैरुपलक्षितः २७ तंतथापुरुषंमर्त्यामहाराजोपलक्षणम् ॥ यजंतिवेदतंत्राभ्यांपरंजिज्ञासवोनृप २८ नमस्तेवासुदेवायनमःसंकर्षणाय च ॥ प्रद्युम्नायानिरुद्धायतुभ्यंभगवतेनमः २९ नारायणायऋषयेपुरुषायमहात्मने ॥ विश्वेश्वरायरामायसर्वभूतात्मनेनमः ३० इतिद्वापरउर्वीशस्तुवंतिजगदीश्वरम् ॥ नानातंत्रविधानेनकलावपियथाशृणु ३१ कृष्णवर्णंकलौकृष्णंसांगोपांगंसपार्षदम् ॥ यज्ञैःसंकीर्तनप्रायैर्यजंतिहिसुमेधसः ३२ ध्ये यंसदापरिभवघ्नमभीष्टदोहंतीर्थास्पदंशिवविरिंचिनुतंशरण्यम् ॥ भृत्यार्तिहंप्रणतपालभवाब्धिपोतंवंदामहेपुरुषतेचरणारविंदम् ३३

रथोयेषांतेतथा अनुच्छ्वासंश्वासमोक्षलक्षणसुस्मरहितंतमःविशंति १७ १८ मुमुक्षुभिःअधोक्षजईक्षणीयइतिनिरणायितत्रराजापृच्छति कस्मिन्निति तत्सर्वम् १९ २० सामान्यतउक्तं विशेषतष्टि कृतइति कस्मिन्कालइत्यस्योत्तरंकृतइति किंवर्णइत्यस्योत्तरंशुक्लइति कीदृशइत्यस्योत्तरंचतुर्बाहुरित्यादि नाम्नेत्यस्योत्तरंहंसइत्यादि केनविधिनेत्यस्योत्तरंतपसेत्यादि शांतइ त्याद्यधिकारिलक्षणं एवमुत्तरत्रापि २१ २२ २३ त्रिमेखलःत्रिगुणितमेखलः २४ सर्वदेवमयंसर्वदेवप्रधानम् २५ २६ २७ २८ २९ ३० कलावपि यथेज्यते तथाशृणु ३१ ३२ ३३

यच्चरणारविंदमार्यैर्वचसापितृवचनेनअरण्यमगात् यच्चदयितेप्सितंमायामृगंअन्वधावत्तच्चरणारविंदंवंदामहेइत्यन्वयः ३४ उपसंहरावे एवमिति सामान्यविधानमिदं विशेषविधिस्तुस्वगुरूपदे
शगम्यइतिशास्त्रहृदयंरहस्यत्वान्नोक्तंशास्त्रांतरासिद्धत्वाच्चेत्यदोषः तदुक्तं ध्रुवंतयैवमुच्येतयांमूर्तिंप्रदिशेद्गुरुः । शिष्याणांयोग्यताभिज्ञोविघ्नहानिस्तुतद्युगइति यस्मिन्युगेस्वयमुत्पन्नःतत्पूर्वयुगावर्तीर्णहरि
णागुरूपदिष्टेनअभीष्टसिद्धिर्भवति अवतीर्णहरेर्मूर्त्यातत्पूर्वयुगजेनच । नृसिंहमूर्त्याचतथायांचान्यांप्रादिशेद्गुरुरिति ३५ कृतादेःकलेःपुण्यहेतुत्वात्तंस्तौति कलिमित्यादिना सारभागिनःसारग्राहिणः
३६ ३७ ३८ तथाकलौभविष्यंतिजायंतेकचित्कचिद्देशेतथासंभूताःनारायणपरायणाःस्युः यत्रद्रुमिलेषुताम्रपर्ण्यादिनद्यःसंति प्रतीचींमहानदीनाम्नावेत्रवतीवराहक्षेत्रात्सह्यागिरिंभित्त्वापश्चिमसमु
द्रंस्यंदमाना ३९ ४० देवर्षिपितृभूताप्तनृणांपूजकाश्चस्युः ४१ सामान्यमुक्ताविशेषमाह देवर्षीति योसाधारणयापरिचर्ययासर्वात्मनाशरण्यंमुकुंदंशरणंगतोभवातिसोयंदेवादीनांकिंकरोऋणी
चनभवति स्वोत्तमान्विनेतिशेषःतेषांकिंकरःऋणीचअत्रेदंतात्पर्यं सर्वात्मनाहरिभक्ताः सर्वथाहरिभक्ताः भक्ताइतित्रिविधाः तत्रदेवेशाःसर्वात्मनाभक्ताःदेवाःसर्वथाभक्ताःतदितरेभक्ताइति अत्रापियेयेभ

त्यक्त्वासुदुस्त्यजसुरेप्सितराज्यलक्ष्मींधर्मिष्ठआर्यवचसायदगादरण्यम् ॥ मायामृगंचदयितेप्सितमन्वधावद्वंदामहेपुरुषतेचरणारविंदम् ३४ एवंयुगा
नुरूपोसौभगवान्युगवर्तिभिः ॥ मनुजैरिज्यतेराजन्श्रेयसामीश्वरोहरिः ३५ कलिंसभाजयंत्यार्यागुणज्ञाःसारभागिनः ॥ यत्रसंकीर्तनेनैवसर्वःस्वार्थोभि
लभ्यते ३६ नह्यतःपरमोलाभोदेहिनांभ्राम्यतामिह ॥ यतोविंदेतपरमांशांतिंनश्यतिसंसृतिः ३७ कृतादिषुप्रजाराजन्कलाविच्छंतिसंभवम् ॥ यत्र
संकीर्तनाद्भूणांहरिर्दास्यत्यसंभवम् ३८ कलौतथाभविष्यंतिनारायणपरायणाः ॥ क्वचित्क्वचिन्महाराजद्रुमिलेषुचभूयशः ३९ ताम्रपर्णीनदीयत्रकृत
मालापयस्विनी ॥ कावेरीचमहापुण्याप्रतीचीचमहानदी ४० येपिबंतिजलंतासांमनुजामनुजेश्वर ॥ प्रायोभक्ताभगवतिवासुदेवेमलाशयाः ४१ देव
र्षिभूताप्तनृणांपितृणांनकिंकरोनायमृणीचराजन् ॥ सर्वात्मनायःशरणंशरण्यंगतोमुकुंदंपरिचर्ययाच ४२ स्वपादमूलंभजतःप्रियस्यत्यक्तान्यभावस्यह
रिःपरेशः ॥ विकर्मयच्चोत्पतितंकथंचिद्धुनोतिसर्वंहृदिसन्निविष्टः ४३ ॥ नारदउवाच ॥ धर्मान्भागवतानित्थंश्रुत्वासमिथिलेश्वरः ॥ जायंतेयान्मुनिन्प्री
तःसोपाध्यायोह्यपूजयत् ४४

त्तयधिकास्त्वेतेअपरेषांस्वामिनउत्तमर्णाश्च स्वावरेषांकिंकरऋणीचनस्यात् । सर्वात्मनाहरेर्भक्तोदेवेशाएवकेवलम् । देवास्तुसर्वथाभक्ताभक्ताएवेतरेस्मृताः । हरिभक्त्यधिकेष्वेवकिंकरश्चाप्यृणीतथा । ह
रिभक्तोनेतरेषांवासुदेवव्यपाश्रयात् । द्विधैवस्वोत्तमर्णानिदासव्यानीतराणिच । दातव्येभ्योविमुच्येतनेतरेभ्यःकथंचन । कथंदेवाद्यनुपकृतोमनोमोक्षेपिवर्तयेत् । बिंबत्वाच्चदधीनंहिस्वरूपंसर्वशोयतइ
तिस्मृतिश्चशब्दगृहीता एवंविधस्यापिहरिभक्तस्यपूर्वादृष्टोपनतविकर्मणाधःपातःस्यादितितत्राह स्वपादमूलमिति । त्यक्तोन्यःस्वतंत्रोहमितिभावोयेनसतथातस्य सर्वदाभगवदधीनोस्मीतिभावयुक्तस्ये
त्यर्थः कथंचिद्भलवदनुष्ठत्वात्यदुत्पतितंविकर्मतद्धुनोति । इतरभक्तैर्देवाउदकादिभिरपिश्रीहरिस्मरणपूर्वकंपूज्याअन्यथामोक्षोनस्यात् । तदुक्तं उदकैश्चनमस्कारैःस्मृतिभिर्मनसातथा । यतिभिश्चापि
संपूज्यादेवामोक्षमियासुभिः । मध्येविष्णुमनुस्मृत्यनान्यथातुकथंचनेति तत्रापिप्राधान्येनश्रीहरिर्ध्यानंकर्तव्यंतत्सन्निधानसंबंधविशेषाद्देवतास्मरणं प्राधान्येनहरिर्ध्येयस्तत्संबंधात्सुरादयः । ध्येयाना
न्यत्कचिद्धयायेद्वरावनुपयोगिवादितिविशेषवचनात् ४३ नारदःसिद्धेभ्योभगवत्तत्त्वंविज्ञायततःराजाकिमकरोदितिवसुदेवस्यहार्दंप्रश्नंगारहराति धर्मानिति ४४

४५ ४६ ४७ आत्मादेहः ४८ मुक्तेरंतरंगसाधनंभक्तिरेवेतिदर्शयितुंवैरप्रधानासुरावेशाद्वैरमिश्रभक्तानामपिभक्त्यास्वस्वयोग्यंफलंभवतिकिमुतनित्यानुरक्तबुद्धीनामितिकेमुख्यन्यायमाह वैरेणेति । शिशुपालादिपुरस्थिताअसंतस्तन्नामानस्तत्साम्यद्वेषयोग्यफलंनरकादिलक्षणमापुः तत्स्थाःसंतस्तस्यहरेःसाम्यंनिर्दोषत्वादिलक्षणंफलमापुः । अनुरुधियःकेवलभक्ताः किंपुनःभक्तियोग्यफलमापुरितिकिंवक्तव्यं अतोभक्तिरेवमुख्यत्यर्थः । पौंड्रकादिपुदैत्येषुसुरांशाःसंतिसर्वशः । बहुमानफलंविष्णोस्तेयांत्यादापसद्गति । विद्वेषस्यफलंयच्चुतदादापासुरास्तमः । यांत्यतोनैवविद्वेषोविष्णौकार्यःकथंचनेतिवचनात्प्रामाणिकोयमर्थः आकृताधियः स्वबुद्धौतदाकारवंतः ४९ उक्तार्थमुपसंहरन्कृष्णेपत्यबुद्धिंविहायसर्वेश्वरबुद्धिरेवकर्तव्येत्याह मापत्यबुद्धिमिति ५० हंतवेहंतुं हंतवाउइतिश्रुतिः अस्यावि श्वस्य ५१ ५२ ब्रह्मभूयायस्वस्वयोग्यपूर्णानंदत्वाय ५३ ॥ इतिश्रीभागवतेमहा०एकादशस्कंधेविजयध्वजकृतटीकायांपंचमोध्यायः ॥ ५ ॥ स्वाभीष्टस्वलोकप्राप्तयेभक्तमुख्यब्रह्मादिप्रार्थनामुखार्द्धी

तेचांतर्दधिरेसिद्धाःसर्वलोकस्यपश्यतः ॥ राजाधर्मानुपातिष्ठन्नवापपरमांगतिम् ४५ त्वमप्येतान्महाभागधर्मान्भागवतान्श्रुतान् ॥ आस्थितःश्रद्धया युक्तोनिःसंगोयास्यसेपरम् ४६ युवयोःखलुदंपत्योर्यशसापूरितंजगत् ॥ पुत्रतामगमद्यद्वांभगवानीश्वरोहरिः ४७ दर्शनालिंगनालापैःसशय्यासनभोजनैः ॥ आत्मावांपावितःकृष्णेपुत्रस्नेहंप्रकुर्वतोः ४८ वैरेणयंनृपतयःशिशुपालपौंड्रशाल्वादयोगतिविलासविलोकनाद्यैः ॥ ध्यायंतआकृतधियःशयनासनादौतत्साम्यमापुरनुरक्तधियःपुनःकिम् ४९ मापत्यबुद्धिमकृथाःकृष्णेसर्वात्मनीश्वरे ॥ मायामनुष्यभावेनगूढैश्वर्यपरेव्यये ५० भूभारासुरराजन्यहंतवेगुप्तयेसताम् ॥ अवतीर्णोस्यनिर्वृत्यैयशोलोकेवितन्वति ५१ ॥ श्रीशुकउवाच ॥ एतच्छ्रुत्वामहाभागोवसुदेवोतिविस्मितः ॥ देवकीचमहाभागा जहतुर्मोहमात्मनः ५२ इतिहासमिमंपुण्यंधारयेद्यःसमाहितः ॥ सविधूयेहशमलंब्रह्मभूयायकल्पते ५३ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधे वसुदेवनारदसंवादेपंचमोऽध्यायः ॥ ५ ॥ बादरायणिरुवाच ॥ अथब्रह्मात्मजैर्देवैःप्रजेशैरावृतोभ्यगात् ॥ भवश्चभूतभव्येशोययौभूतगणैर्वृतः १ इंद्रोमरुद्भिर्भगवानादित्याबसवोश्विनौ ॥ ऋभवोंगिरसोरुद्राविश्वेसाध्याश्चदेवताः २ गंधर्वाप्सरसोनागाःसिद्धचारणगुह्यकाः ॥ ऋषयःपितरश्चैवसविद्याधरकिन्नराः ३ द्वारकामुपसंजग्मुःसर्वेकृष्णदिदृक्षवः ॥ वपुषायेनभगवान्नरलोकमनोरमः ॥ यशोवितन्वन्लोकेषुसर्वलोकमलापहम् ४ तस्यां विभ्राजमानायांसमृद्धायांमहर्षिभिः ॥ व्यचक्षतावितृप्ताक्षाःकृष्णमद्भुतदर्शनम् ५ स्वर्गोद्यानोद्भवैर्माल्यैश्छादयंतोयदूत्तमम् ॥ गीर्भिश्चित्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरम् ६ ॥ देवाऊचुः ॥ नताःस्मतेनाथपदारविंदंबुद्धींद्रियप्राणमनोवचोभिः ॥ यच्चित्यतेंतर्हृदिभावयुक्तैर्मुमुक्षुभिःकर्ममयोरुपाशात् ७ त्वं मायययात्रिगुणयात्मनिदुर्विभाव्यंव्यक्तंसृजस्यवसिलुंपासितद्गुणस्थः ॥ नैतैर्भवानजितकर्मभिरज्यतेवैयःस्वेसुखेव्यवहितेभिरतोनवद्यः ८

कृतचित्तस्यहरेस्तदभ्यनुज्ञानंस्वकुलसंहरणोपक्रमश्च समृद्धभक्तिसमुद्रमग्नोद्धवोपसत्तिप्रकारश्चास्मिन्नध्यायेकथ्यते तत्रप्रथमंब्रह्मादिप्रार्थनाप्रकारःप्रारभ्यते अथेत्यादिना आत्मजैरात्मनोमनसो जातैःसनकादिभिः संक्षिप्योक्तंविवृणोतिभवश्चेत्यादिना १ २ ३ दिदृक्षुत्वेहेतुमाह वपुषेति सर्वलोकमलापहंयशोलोकेषुवितन्वन्भगवान्नरलोकमनोरमइतियेनतस्मादितिशेषः या स्वयंकारितातस्यामासीनम् ४ ५ माल्यैःपुष्पैः ६ यत्पदारविंदमंतर्हृदिबुद्धींद्रियप्राणमनोवचोभिमानिभिर्देवैश्चित्यते ७ ब्रह्मादिदेवैश्चित्यत्वेततोप्युत्कृष्टत्वगुणेनभाव्यम् तत्किमस्यनिर्गुणस्यास्तीत्यत्राह त्वमित्यादिना मायययात्वदिच्छयादियतयात्रिगुणयाप्रकृत्याआत्मनिआत्माधारत्वेनव्यक्तंब्रह्मांडम् । अचेतनस्यपुरुषसंबंधित्वेनप्रवृत्तिदर्शनादिच्छामात्रेणप्रकृत्यास्त

ष्ट्यादिकंकथमुपपद्यतइत्यतउक्तं तद्गुणस्थइति । प्रकृतिगुणेषुस्थित्वानियतैर्गुणैः ननुगुणसंबंधाज्जीववत्पुण्यपापलक्षणकर्मबद्धतास्यादेवेतितत्राह नैतैरिति एतैर्गुणनिमित्तैःअनेनदुःखानुभवोपिनास्तीत्युक्तंभवति अत्रहेतुगर्भविशेषणमाह यइतियःप्रकाशरूपःयाप्रापणइतिधातोः यात्यवगच्छतिसर्वमिति सर्वज्ञइत्यर्थः । अतएवाव्यवहितेस्वरूपसुखेभिरतः अतएवानवद्यःदुखादिनिमित्तदोषाभावात् ८ तवकीर्तिश्रवणपूर्णसच्छ्रद्धयासंसारिणामपिसात्विकानांगुणनिमित्तपापादिलेपाभावेनात्यंतिकीशुद्धिर्भवतिकिमुतनवेतिभावेनाह शुद्धीरिति हेईड्यदुराशयानांनृणांतथाविद्यादिभिःशुद्धिर्नस्यात् यथासत्वात्मनांपुंसांतेतवयशसिप्रवृद्धसच्छ्रद्धयाशुद्धिःस्यादित्यन्वयः अनेनत्रयोपिगुणाअशुद्धिहेतवउतनेतिशंकापहस्तिता सत्वगुणस्यभगवत्कथारतिहेतुत्वाच्छुद्धिकरत्वेनज्ञानजनकत्वेनमुक्तिहेतुत्वात् ९ अस्तुनित्यानिर्दुःखानंदःसृष्ट्यादिकर्तावततःकिंयुष्माकमितितत्राहुः स्यान्नइति । योमुनिभिःक्षेमायआर्द्रहृदोह्यमानःयश्चसवनशःत्रिकालेआत्मविद्भिःस्वरूपविज्ञानाविद्भिःसात्विकैःपुरुषैःसमविभूतिभिःसमविक्रमैर्वासुदेवादिभिर्व्यूह्यार्चितः तवसोंघ्रिरशुभाशयधूमकेतुःस्यादित्यन्वयः १० पुनरप्यंघ्रिंविशेषयंति यश्चित्यतइति त्रय्याविद्यत्रयेणनिरुक्तविधिनास्वहविर्गृहीत्वाप्रयतपाणिभिर्याजकैःअध्वराग्नौ विचित्यते उताप्यर्थविकल्पयोरित्यभिधानंयश्चाध्यात्मयोगेउतपरमात्मध्यानेपिआत्ममायाजिज्ञासुभिःयोगिभिःपरमभागवतैःपरीष्टैःसम्यक्पूजितः ११ किंचयेयंश्रीर्भगवतीपर्युष्टयावर्जितम्लानभावयानित्योत्फुल्लयासद्वर्यैपतितयावनमालयासहप्रतिपक्षवत्संस्पर्द्धिनी अस्पर्धिनी स्पर्धावतीवतिष्ठतीत्यर्थः । अस्पर्द्धिनीस्पर्द्धिनीवश्रीरास्तेवनमालया । नहिस्पर्द्धादयोदोषाःसंविद्रूपांस्पृशंतितां इतिवच

शुद्धिर्नृणांनतुतथेड्यदुराशयानांविद्याश्रुताध्ययनदानतपःक्रियाभिः ॥ सत्वात्मनामृषभतेयशसिप्रवृद्धसच्छ्रद्धयाश्रवणसंभृतयायथास्यात् ९ स्यान्नस्तवाघ्रिरशुभाशयधूमकेतुःक्षेमाययोमुनिभिरार्द्रहृदोह्यमानः ॥ यःसात्विकैःसमविभूतिभिरात्मविद्भिर्व्यूह्यार्चितःसवनशःसमविक्रमैश्च १० यश्चित्यतेप्रयतपाणिभिरध्वराग्नौत्रय्यानिरुक्तविधिनास्वहविर्गृहीत्वा ॥ अध्यात्मयोगउतयोगिभिरात्ममायाजिज्ञासुभिःपरमभागवतैःपरीष्टः ११ पर्युष्टयापतितयावनमालयेयंसंस्पर्धिनीभगवतीप्रतिपक्षवच्छ्रीः ॥ यःसुप्रणीतममुयार्हणमाददानोभूयात्सदांघ्रिरशुभाशयधूमकेतुः १२ केतुस्त्रिविक्रमसतास्त्रिपतत्पताकोयस्तेभयाभयकरोसुरदेवचम्वोः ॥ स्वर्गायसाधुषुखलेष्वितरायभूम्नःपादःपुनातुभगवन्जगतामघंनः १३ नस्योतगावइवयस्यवशेभवंतिदेवाश्चयस्तनुभृदायुषिरज्यमानाः ॥ कालस्यतेप्रकृतिपूरुषयोःपरस्यशंनस्तनोतुचरणःपुरुषोत्तमस्य १४

नात् यश्चामुयाश्रियासुप्रणीतमर्हणमर्चनमाददानआस्ते यद्वा अवयविनोधर्मआदानादिरवयवस्यकर्थंयुज्यतइत्यत्राह यइति । यःप्रकाशरूपःपूर्वत्रयच्छब्दरूपःअत्रतुअकारांतइति अनेनश्लोकविलक्षणत्वेनहरेरवयवस्यपादस्यावयविवत् स्वातंत्र्येणादानादिधर्मोयुक्तइतिज्ञातव्यम् १२ हेभगवन्भूम्नःतेपादोनोस्माकंजगतांचाघंपुनातु यत्त्रिविक्रमसतःत्रयोविक्रमाएवप्रशस्तकर्माणियस्यसतथातस्यप्रशस्तेकर्मणितथेत्यादि तेतवकेतुर्ध्वजस्त्रयोवेदाएवपतंत्यश्चलंत्यःपताकायस्यसतथा । यश्चासुरदेवचम्वोःभयाभयकरः किंच यः साधुषुस्वर्गायसुखायखलेष्वितरायदुःखाय भवतीति १३ सुखदुःखयोःकारणत्वेनहरेःपादस्यस्वातंत्र्यंप्रत्यक्षमितिभावेनाह नस्योतगावइति सुखदुःखयोर्नियंतारइंद्रियाभिमानिनोदेवाश्चयस्यपादस्यवशेवर्ततेतेनसिनासिकायांओतगावःस्वामिनइव यश्चतनुभृतांशरीरिणांआयुषिशतवर्षलक्षणेरज्यमानःसंबद्ध्यमानःतावत्कालंस्थित्वांतेयश्चदुःखहमितिअभिमानशून्यश्चेतितनुभृदायुषिरज्यमानाः पुरुषोत्तमस्यतेचरणोनःशंतनोत्वित्यन्वयः । ब्रह्मणासंपरित्यक्तोमृतइत्युच्येनरइत्यनेनश्रीहरिसंबंधोदेहिनांविज्ञायते । तदभिमानशून्यत्वेहेतुमाह प्रकृतीति अत्रापिहेतुमाह कालस्येति कालप्रेरकस्यतस्यसकाशात्परस्यवा १४

---

१ यजदेवपूजेतिधातोःकर्मणिक्तप्रत्ययेयकारस्येइकाररूपेसंप्रसारणेजातेइट्टामितिरूपम् ॥

स्रष्टृत्वादिगुणपूर्णत्वाच्चकालइत्याशयेनाह अस्यति अस्यजगतउदयादानहेतुरात । मधानाप्रपुरुषानामापुरुषः
अतःकालःकालनिर्मातृत्वाच्चकालइत्याह कालमात्रइति सर्वेनिमेषाजज्ञिरेविद्युतःपुरुषादधीतिश्रुतेः हरेर्विधातरेणकालशब्दवाच्यत्वमाह त्रिणाभिरिति तिस्रश्चातुर्मास्यलक्षणानाभयोयस्यसतथा
गभीररयःअतर्किनापारवेगःसोयंकालस्तस्त्वंत्वमितिकइतितत्राह उत्तमेति पुरुषोत्तमशब्दवाच्यः । संहारकर्तृत्वंविशिनष्टिअखिलेति अधुनायादवाद्यखिलजगन्निरासेप्रवृत्तः यद्वापुरुषोत्तमत्वंविवृणोति
अस्येति अनेनकथंतद्विवृतमभूदित्यतउक्तंअव्यक्तेति कालस्वरूपाज्ञानेअस्यापमृत्युत्पत्तिसमयःइतिनिश्चयोनस्यादत्रोक्तंकालेति कालस्वरूपज्ञातातंनिर्मातावा कीदृशःकालःयेनताद्विशेषज्ञानीस्याद
त्राह सोयमिति । हरिःयंकालंविशेषतोजानातिसोयंकालएवंविशिष्टइत्यन्वयःकथमत्राह त्रिणाभिरिति अखिलस्यसमस्तप्रपंचस्यापचयेसंहारेचप्रवृत्तःअनेनसृष्ट्यादिविशेषविशिष्टंकालंजानातीत्युक्तंभ
वति अतश्चकिमवासितमत्राह उत्तमेति । एवंविधात्कालादप्युत्तमस्त्वमित्यर्थः अनेनप्रकृतिपुरुषकालमहत्तत्वेभ्यउत्तमत्वात्पुरुषोत्तमइत्युक्तंभवति तदुक्तम् कालाज्जीवात्तथाव्यक्तान्महतश्चोत्तमो
यतः । उत्तमःपुरुषस्तस्माद्भगवान्विष्णुरुच्यतइति १५ व्यक्तंसृजस्यसिहेतुरितिश्लोकद्वयेनकथितंसर्जनंविवृणोति त्वत्तइति त्वत्तोब्रह्मांडंजगदुत्पद्यतइतियदुक्तंतत्प्रधानमधिकृत्यप्रधाना
देशब्दवाच्यान्रमादीनधिकरणंकृत्यावर्तते तथाहिमहाप्रलयेलक्ष्म्यासहरममाणान्नारायणाख्यात्त्वत्तोवतीर्णःपुमान्पुरुषनामामोघवीर्योभवान्प्रधानाभिमानित्वात्तन्नाम्न्यांरमायांमहांतमिवस्थि
तंस्ववीर्यंगर्भधत्से । पुरुषनामानंचतुर्मुखंप्रधानाख्यांगायत्रींचसृष्टवानित्येकोर्थःसपुमांश्चतुर्मुखोमहांतमिवगर्भंमहत्तत्वाभिधंआत्मानंश्रद्धाभिधांगांयत्रींचप्रधाननाम्न्यांगायत्र्यांधत्तेसृष्टवानित्यपरः ता

अस्यासिहेतुरुदयस्थितिसंयमानामव्यक्तजीवमहतामपिकालमात्रः ॥ सोयंत्रिणाभिरखिलापचयेप्रवृत्तःकालोगभीररयउत्तमपूरुषस्त्वम् १५ त्वत्तःप्रधा
नमधिकृत्यपुमान्स्ववीर्यंधत्तेमहांतमिवगर्भममोघवीर्यः ॥ सोयंत्वयानुगतआत्मनआंडकोशंहेमंससर्जबहिरावरणैरुपेतम् १६ तत्तस्थुषश्चजगतश्चभ
वानधीशोयन्मायययोत्थगुणविक्रिययोपनीतान् ॥ अर्थान्जुषन्नपिहृषीकपतेनालिप्तोयेन्येस्वतःपरिहृतानपिबिभ्यतिस्म १७

भ्यांमहतत्त्वाख्यश्रद्धाख्याभ्यांशेषोहंकारापरनामाजातःइत्यन्योर्थः नारायणाख्यःपरमःशेतेलक्ष्म्यान्वितोलये । सएवपुरुषाख्यंतुद्वितीयंरूपमात्मनः । कृत्वारमायांपुरुषनामानंतुचतुर्मुखम् । प्रधाना
ख्यांचगायत्रींससर्जपुरुषात्मकः । चतुर्मुखःसपुरुषोमहत्तत्त्वाभिधंपुनः । प्रधाननाम्न्यांगायत्र्यांससर्जात्मानमेवतु । श्रद्धाभिधांचगायत्रींताभ्यांशेषोन्वजायत इत्यादिवाक्यात्सकृदुक्तवाक्यस्यान्वयभे
दोयुज्यते सोयंमहत्तत्त्वाख्योब्रह्मायोनारायणादभिव्यक्तःपुरुषनामातेनत्वयानुगतःप्रविष्टः श्रद्धाख्यगायत्रींसृष्ट्वाहंकारादितत्त्वैःसहात्मनःपरमात्मनःप्रवेशादुत्पादनसमर्थैर्बहिर्नवभिरावरणैरुपेतंहैमम्मां
डकोशंससर्जेत्यन्वयः । ब्रह्मणःआंडकोशसृष्टचंगीकारेव्यक्तंसृजसीत्यस्यविरोधनिरासार्थत्वयानुगतइत्युक्तम् १६ ननुतवसहकारिकारणत्वंमुख्यकारणत्वंचतुर्मुखस्यातःस्वामित्वंचतस्येतितत्राह तत्त
स्थुषइति । यतोयदनुप्रवेशमंतरेणएषांतत्त्वानांसर्जनशक्तिर्नास्तितदनुप्रवेशेसास्तिचतत्तस्माद्भवांस्तस्थुषोजगतश्चाधिकईशः । नन्वेतदधीशत्वंकथंज्ञायतइतितत्राह यदिति । मायया इच्छयाउत्थगुणावि
क्रियायासंबंधप्रकृतिगुणविकारेणोपनीतान्प्राप्तानर्थान्विषयांस्तर्दिंद्रियेषुस्थित्वाजुषन्नपिनलिप्तइतियत्तेनाधीशइतिज्ञायते । हृषीकपतयइतिसंबुध्येंद्रियस्वामित्वस्यजीवस्यसत्त्वेपितदानियतत्त्वदर्शना
दीशनियतत्वदर्शनाच्चहरेरिंद्रियेशत्वंमुख्यमितिज्ञायते । ननुयोगिष्वनेकांतोर्थालेपहेतुरत्राह येन्यइतियेन्येयोगिनःसनकादयःपरिहृतानितिद्वितीयापंचम्यर्थे । स्वतःभवतःप्रसादात्परिहृतेभ्योवि
षयेभ्योबिभ्यतिस्म । अनर्थस्मृत्वेतिशेषः । भीत्रार्थानांभयहेतुरित्यतः पंचमी । अनेनविषयालेपनंयोगिनांयत्तद्भगवतःप्रसादात् । सादिच । भगवत्स्तुस्वतोनअन्यनियतंनित्यंचेत्युक्तंभवति १७

विषयालेपोनामतदजितत्वंइत्याह स्मायेति । स्मायोमंदहासस्तेनसहितोवलोकःतस्यलवेनसहदर्शितोभावःशृंगारचेष्टा तया हारिमनोहरंभ्रूमंडलंतेनसहप्रहितःप्रयुक्तःसौरतः सुरतेविद्यमानोमंत्रःते नशौंडैर्निशितैरनंगस्यबाणायमानैःकरणैः आलिंगनादिलक्षणैःसाधनैर्विमथितुंविलोडयितुंजेतुमित्यर्थः १८ यद्यपंभगवान्देवदत्तवद्विषयलंपटत्वेनस्त्रीजितस्तर्हितत्कथानदीस्नानंपापनाशनंनस्या न्नचतथानिःसंगत्वेनस्त्रीजितोनैवेतितर्कंगर्भीकृत्यस्तुवंति विभ्रदिति । सप्तसुप्रथमेतिसूत्राद्विभ्रदितिप्रथमाषष्ठ्यर्थे । त्रिलोक्याःयदनन्यसाध्यंतत्सर्वंबिभ्रतस्तवअमृतकथोदवहाः अमृतकथालक्षणानद्यः पादावनेजसरितश्चेतियत्तीर्थद्वयंतदुपस्पृशंतिस्नानादियोग्यंकुर्वंति अत्रकिंप्रमाणमत्राह आनुश्रवमिति । श्रुतिप्रसिद्धं सम्यक्स्रवंतिसरितोनधेनाअंतर्हृदामनसापूयमानाइत्यादेः । कुतोभूदित्यतउक्तंअं घ्रिजमिति । अंघ्रिलंघनमतिक्रमणंशत्रूणांपराक्रमलक्षणकथेत्यर्थः । अन्यत्तुप्रसिद्धम् । अघिलघिगत्यर्थावितिधातुः । कैःकरणैःश्रुतिभिःश्रवणैरंगसंगैश्चकिंफलमुद्दिश्यशमलानिमलानिहंतुम् । मलविष्ठा

स्मायावलोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः ॥ पत्न्यस्तुषोडशसहस्रमनंगबाणैर्यस्येंद्रियंविमथितुंकरणैर्नशेकुः १८ बिभ्रत्तवामृत कथोदवहास्त्रिलोक्याःपादावनेजसरितःशमलानिहंतुम् ॥ आनुश्रवंश्रुतिभिरंघ्रिजमंगसंगैस्तीर्थद्वयंशुचिषदस्तदुपस्पृशंति १९ बादरायणिरुवाच ॥ इ त्यभिष्टूयविबुधैःसेशःशतधृतिर्हरिम् ॥ अभ्यभाषतगोविंदंप्रणम्यांबरमाश्रितः २० ब्रह्मोवाच ॥ भूमेर्भारावतारायपुराविज्ञापितःप्रभो ॥ त्वमस्मा भिरशेषात्मंस्तत्तथैवोपपादितम् २१ धर्मश्चस्थापितःसत्सुसत्यसंधेषुवैत्वया ॥ कीर्तिश्चदिक्षुविक्षिप्तासर्वलोकमलापहा २२ अवतीर्ययदोर्वंशेबिभ्रद्रूप मनुत्तमम् ॥ कर्माण्युदारवृत्तानिहितानिजगतोऽकृथाः २३ यानितेचरितानीशमनुष्याःसाधवःकलौ ॥ शृण्वंतःकीर्तयंतश्चतरिष्यंत्यंजसातमः २४ यदुवंशेऽवतीर्णस्यभवतःपुरुषोत्तम ॥ शरच्छतंव्यतीयायपंचविंशाधिकंप्रभो २५ नाधुनातेखिलाधारदेवकार्येऽवशेषितम् ॥ कुलंचविप्रशापेननष्टप्रा यमभूदिदम् २६ ततःस्वधामपरमंविशस्वयदिमन्यसे ॥ सलोकंलोकपालान्नःपाहिवैकुंठकिंकरान् २७ श्रीशुकउवाच ॥ संस्तुतोभगवानित्थंविबु धैःपद्मजादिभिः ॥ प्रतिनंद्याहतान्राजन्मायामनुजईश्वरः २८ श्रीभगवानुवाच ॥ अवधारितमेतन्मेयदात्थविबुधेश्वराः ॥ कृतंवःकार्यमखिलंभूमेर्भारो वतारितः २९ तदिदंयादवकुलंवीर्यशौर्यश्रियोद्धतम् ॥ लोकंजिघृक्षत्यौर्ध्वमेवेलामिवमहार्णवः ३०

sघयोर्नस्त्रीतियादवः शुचावग्नौसीदतिनिषीदतितिष्ठतीतिशुचिषत्तस्यचंद्रार्कमंडलस्थस्यवा १९ २० २१ २२ २३ २४ पंचविंशाधिकंपंचविंशत्यधिकं तदुक्तं वत्सराणांशतंचैवऋतूनांपंचविंशकं अव तीर्णस्यकृष्णस्ययदाप्रागात्तदाहरिम् । स्वस्थानगमनापेक्षीब्रह्मातुष्टावसामरइति २५ अवशिष्टदेवकार्यापेक्षयापिनस्थेयंइत्याह नाधुनेति यदुकुलमवशिष्टमपेक्ष्यापिनस्थेयमित्याह कुलंचेति २६ याद वानांदेवत्वात्तत्स्थितौकलेरप्रवेशात्तस्यचापेक्षितत्वात्तत्कुलसंहारार्थंकिंचित्कालस्थित्यपेक्षायांतत्कृत्वाझटितिस्वधामप्रवेष्टव्यमित्याशयेनाह ततःस्वधामेति तदुक्तंच संवत्सरद्वयंचैवपश्चात्स्थित्वाजना र्दनः अभिषेदेपरंस्थानंचतुर्मासाधिकंपुनरिति २७ २८ अवधारितंनिश्चितम् २९ तर्हिकालक्षेपेकिंकारणंतत्राह तदिदमिति मेऔर्ध्वलोकंजिघृक्षतिप्राप्तुमिच्छति ३०

१ पंचविंशाधिकं शरच्छतमित्यनेन पंचविंशतिवत्सराधिकशतमित्यर्थे प्रमाणमाह वत्सराणामिति । अग्रेच संवत्सरद्वयंचैवपश्चात्स्थित्वाजनार्दनः । अभिषेदेपरंस्थानंचातुर्मास्याधिकंपुनः ॥

अनुपसंहारकोदोषइतितत्राह अनेनेति । उल्बणेनवीर्यशौर्यादिगुणैस्तीक्ष्णेनाननादवकुलनसतायदुकुलस्यालवणत्वयुगधर्माद्रावण्यतात्पर्याभप्रायेणाकर्माचार्यः । सतामापकलाप्राप्तावकारामनसामवत् तस्माद्यदूंश्यसंजन्हेनैतेस्युःपापिनोस्त्वति । पुनर्लोकविवृद्ध्यर्थमौत्तरेयादिकान्हरिः । आविश्यरक्षामकरोज्जगतःपुरुषोत्तमः । स्वात्मनःसहयानेनपुरुषार्थोविकोभवेत् । इत्यनुग्रहबुद्ध्याचसंजन्हेस्वकुलं विभुरिति ३१ एतदंतेएतस्ययदुकुलसंहारस्यांते तवप्रीत्यैभवनंयास्यामि ३२ ३३ ३४ ३५ ३६ यत्रप्रभासेदक्षशापादुत्पन्नाद्यक्ष्मणःकिल्बिषात्प्रमुक्तोभूत् ३७ उशिजोऽग्नीन् ३८ ३९ ४० अरिष्टा

यद्यसंहृत्यदृप्तानांयदूनांविपुलंकुलम् ॥ गंतास्म्यनेनलोकोयमुल्बणेनविनंक्ष्यति ३१ इदानींनाशमारब्धःकुलस्यद्विजशापतः ॥ यास्यामिभवनंब्रह्म न्नेतदंतेतवानघ ३२ श्रीशुकउवाच ॥ इत्युक्तोलोकनाथेनस्वयंभूःप्रणिपत्यतम् ॥ सहदेवगणैर्देवःस्वंधाममसमपद्यत ३३ अथतस्यांमहोत्पातान्द्वा रवत्यांसमुत्थितान् ॥ विलोक्यभगवानाहयदुवृद्धान्समागतान् ३४ श्रीभगवानुवाच ॥ एतेवैसुमहोत्पाताव्युत्तिष्ठंतीहसर्वतः ॥ शापश्चनःकुलस्या सीद्ब्राह्मणेभ्योदुरत्ययः ३५ नवस्तव्यमिहास्माभिर्जिजीविषुभिरार्यकाः ॥ प्रभासंसुमहापुण्यंयास्यामोद्यैवमाचिरम् ३६ यत्रस्नात्वादक्षशापाद्गृहीतो यक्ष्मणोदुराद् ॥ विमुक्तःकिल्बिषात्सद्योभेजेभूयःकलोदयम् ३७ वयंचतस्मिन्नाप्लुत्यतर्पयित्वापितॄन्सुरान् ॥ भोजयित्वोशिजोविप्रान्नानागुणवतांधसा ३८ तेषुदानानिपात्रेषुश्रद्धयार्प्यमहांतिवै ॥ वृजिनानितरिष्यामोदानैर्नौभिरिवार्णवम् ३९ श्रीशुकउवाच ॥ एवंभगवतादिष्टायादवाःकुरुनंदन ॥ गंतुं कृताधियस्तीर्थस्यंदनान्समयूयुजन् ४० तन्निरीक्ष्योद्धवोराजन्श्रुत्वाभगवतोदितम् ॥ दृष्ट्वारिष्टानिघोराणिनित्यंकृष्णमनुव्रतः ४१ विविक्तउपसंगम्य जगतामीश्वरेश्वरम् ॥ प्रणम्यशिरसापादौप्रांजलिस्तमभाषत ४२ उद्धवउवाच ॥ देवदेवेशयोगेशपुण्यश्रवणकीर्तन ॥ संहृत्यैतत्कुलंनूनंलोकंसंत्यक्ष्य तेभवान् ॥ विप्रशापंसमर्थोपिप्रत्यहन्नयदीश्वरः ४३ नाहंतवांघ्रियुगलंक्षणार्धमपिकेशव ॥ त्यक्तुंसमुत्सहेनाथस्वधामनयमामपि ४४ तवविक्रीडितंकृ ष्णनृणांपरमभंगलम् ॥ कर्णपीयूषमासाद्यत्यजत्यन्यस्पृहांजनः ४५ शय्यासनाटनस्थानस्नानक्रीडाशनादिषु ॥ कथंत्वांप्रियमात्मानंवयंभक्तास्त्यजेम हि ४६ त्वयोपभुक्तस्रग्गंधवासोलंकारचर्चिताः ॥ उच्छिष्टभोजिनोदासास्तवमायांजयेमहि ४७ वाताशनामहर्षयः श्रमणाऊर्ध्वमंथिनः ॥ ब्रह्माख्यं धामतेयांतिशांताःसंन्यासिनोमलाः ४८ वयंत्विहमहायोगिन्भ्रमंतःकर्मवर्त्मसु ॥ त्वद्वार्तयातरिष्यामस्तावकैर्दुस्तरंतमः ४९ स्मरंतःकीर्तयंतस्तेकृ तानिगदितानिच ॥ गत्युत्स्मितेक्षणोत्केलियन्नृलोकविडंबनम् ५०

नि अशुभानि ४१ ४२ भवान्समर्थोपिविप्रशापंनप्रत्यहन्यत्तस्माद्यूनमिदानीं लोकंसंत्यक्ष्यते ४३ ४४ ४५ शय्यासनादिषुप्रियम् ४६ तवाधीनांमायांप्रकृतिम् ४७ श्रमणाभिक्षावृत्तयः ४८ तावकैःतवभक्तैःसहत्वद्वार्तया ४९ गत्युत्स्मितेक्षणोत्केलियन्नृलोकविडंबनं तानिचतच्चस्मरंतःउत्पन्नतत्त्वज्ञानोप्युद्धवोभ्रमंतइत्यात्मनोवमतांवक्तीति । यत्साधूनांस्वभावइतिप्रदर्शनाय । आत्म नोवमतांब्रूयुरुत्तमाअपिसर्वशः । कदाचिदेवस्वगुणान्स्निग्धेष्वेवाहिसाधवइतिवचनादुक्तंयुक्तमिति ५०

एकःश्रीहारिरेवसर्वोत्तमइतिभावोयस्यसएकांतिनंमुख्यंप्रियमितिवा एकेमुख्यान्यकेवलाइत्यभिधानम् २१ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेविजयध्वजकृतटीकायांषष्ठोध्यायः ॥६॥भगवान्यदवधूतसंवादव्याजेनस्वतत्त्वमुद्धवायोपदिशत्यध्यायत्रयेणतत्रादावुद्धवोक्तंस्वाभिष्टमितिवदन् ब्रह्मादीनांस्वलोकगमनाभिलाषंदेवकार्यकरणेनावतारप्रयोजनंस्वयात्रानंतरंद्वारवत्याःसमुद्रेमज्जनंलोकस्यपापबुद्धित्वेनामंगलत्वंकलिग्रस्तलोकादुद्धवस्यनिर्याणप्रेरणंस्वास्मिन्मनःप्रविश्यमहीपर्यटननियोगमित्यादिवाक्ति यदात्थमामित्यादिना । मांस्वर्लोकगतंकर्तुमभिकांक्षिणः १ २ स्वर्गारोहणानंतरंसप्तमेदिवसे ३ यर्हियदा ४ अधर्मरुचिरितिपदच्छेदः ५ ६ क्षितिसंचरणेइत्थंभावाविशेषमुपादिशति यदिदमिति । मनआदिसर्वोद्रियैर्गृह्यमाणंयदिदंविश्वंतदिदंनश्वरंक्षणभंगुरंविद्धि । नन्विदमनिर्वाच्यंतर्हीतितत्राहविद्धीति । विद्धीत्युभयत्रसंबध्यते । मनोमयीमायांचमन्मनःप्रधानप्रकृतिनिर्मितांविद्धिमेबुद्धिंप्रधानीकृत्यप्रकृत्यारचितत्वात् नानिर्वाच्यंविद्धिमृद्घटइतिवन्मायामयामितिप्रयोगोयुज्यते । अचेतनप्रकृतेःकार्यात्मकत्वंअस्तुचेतनायाःकथमितिइयमाशंका प्रकृतिःसापरामङ्गरोदसीलोकधारिणी । ऋतासत्यामराजय्यालोकानामात्मसांज्ञितेत्यनेनपरिहर्तव्या प्राधान्यापेक्षयोपपद्यतइत्यर्थः ७

॥ श्रीशुकउवाच ॥ एवंविज्ञापितोराजन्भगवान्देवकीसुतः॥एकांतिनंप्रियंभृत्यमुद्धवंसमभाषत५१॥ इतिश्रीभागवतेमहा०एकादशस्कंधेषष्ठोध्यायः॥६॥
श्रीभगवानुवाच ॥ यदात्थमांमहाभागतच्चिकीर्षितमेवमे ॥ ब्रह्मभवोलोकपालाःसर्वेमामभिकांक्षिणः १ मयानिष्पादितंह्यत्रदेवकार्यमशेषतः ॥ यदर्थमवतीर्णोहमंशेनब्रह्मणार्थितः २ कुलंवैशापनिर्दग्धंनंक्ष्यत्यन्योन्यविग्रहात् ॥ समुद्रःसप्तमेह्येनांपुरींचप्लावयिष्यति ३ यर्ह्येवायंमयात्यक्तोलोकोयंनष्टमंगलः ॥ अविष्यत्यचिरात्साधोकलिनापिनिराकृतः ४ नवस्तव्यंत्वयैवेहमयात्यक्तेमहीतले ॥ जनोऽधर्मरुचिर्भद्रभविष्यतिकलौयुगे ५ त्वंतुसर्वंपरित्यज्यस्नेहंस्वजनबंधनम् ॥ मय्यावेश्यमनःसम्यक्समदृग्विचरस्वगाम् ६ यदिदंमनसावाचाचक्षुर्भ्यांश्रवणादिभिः ॥ नश्वरंगृह्यमाणंचविद्धिमायांमनोमयीम् ७ पुंसोयुक्तस्यनानार्थेभ्रमःसगुणदोषकृत् ॥ कर्माकर्मविकर्मेतिगुणदोषधियोभिदा ॥ ८ तस्माद्युक्तेंद्रियजयोयुक्तचित्तइदंजगत् ॥ आत्मनीक्षस्वविततमात्मानंमय्यधीश्वरे ९

एवंप्राधान्यज्ञानपूर्वकंभक्त्यामयिमनोयुंजानस्ययोगिनोनर्थोपशमोनान्यस्येत्याह पुंसइति।अयुक्तस्यमयिमनोयोगरहितस्यपुंसोमत्प्रेरितप्रकृतिरचितेनानाविधेर्थेयोभ्रमोमामंतरेणस्वकर्तृत्वज्ञानंसगुणदोषकृत्स्वर्गनरककृत्अनेनतद्भोज्यसुखदुःखात्मकःअपारःसंसारोलक्ष्यतइतिज्ञातव्यंतदुक्तं । स्वर्गाद्याश्चगुणाःसर्वेदोषाःसर्वेतथैवच।आत्मनःकर्तृताभ्रांत्याजायंतेनात्रसंशयः। परमात्मानमेवैकंकर्तारंवेत्तियःपुमान् । समुच्यतेसमात्संसारात्परमात्मानमेतिचेति । भ्रमस्यानिमित्तमाह कर्मेति । सर्वंहिपरमेश्वरःकरोतीतिईश्वराधीनक्रियायांइदंमयाक्रियते इदंमयानाक्रियते इदंविपरीतंक्रियतइति कर्माकर्मविकर्मेतिभिदाबुद्धिभ्रमोगुणाभ्यांरजस्तमोभ्यांदोषधियोदोषबुद्धेःपुरुषस्यभवतीतियत्तस्माद्भ्रमस्यमूलकारणंरजस्तमसोःशक्तिंविज्ञायतौपरिहृत्यविषयादाहृत्यमय्येवस्थापनेनयुक्तेंद्रियजयोयुक्तचित्तस्त्वम्। इदंजगदात्मनिविरिंचेईक्षस्वकार्यकारणात्मकेजगतिवितर्तांविस्तृतशक्तिमात्मानंविरिंचिंअधीश्वरेमयिईक्षस्वमदाधारंपश्येत्यन्वयः । तदुक्तं आत्मशब्दोदितोब्रह्मापरमात्माभिधोह्यहम् । सर्वब्रह्मणिवीक्षेतमयिब्रह्माणमेवचेति ८ ९

वत्मतिबंधकेसत्यंतरायैरुक्तवीक्षणप्रकारोविहतःस्यादित्यत्राह ज्ञानेति शरीरिणामात्मवद्भूतः । आत्मौपम्येनसर्वत्रसमंपश्यतियोर्जुनेतिवचनात् । आत्मोपम्येन सर्वाणिभूतानि पश्यानित्यर्थः आत्मनःपरमात्मनोनुभवेनैवतुष्टः । आत्मायमोपस्यसतथा अनेनतदधिगमउत्तरपूर्वार्घयोरश्लेषविनाशौतद्व्यपदेशादितिसूत्रार्थोदर्शितइति १० एवंविधज्ञानिनःकर्मकरणप्रकारंश्लोकद्वयेनाह दोषबुद्ध्येति । यःशांतःक्रोधरहितज्ञानविज्ञानाभ्यांवैष्णवसिद्धांतेनिश्चलः पर्वतवत्स्थिरोविश्वंमदात्मकंममसर्वस्वातंत्र्यान्मदधीनंपश्यन्नतएवममाधिष्ठानत्वेनसर्वभूतसुहृत् विश्वेषांभूतानां निरुपाधिकप्रीतिकृदतएवोभयातीतः ऐहिकामुष्मिकविषयविरक्तोनिषिद्धाचरणाद्दोषःस्यादितिदोषबुद्ध्यातद्दोषानुत्पत्तयेनिषेधाश्रिश्रेयवचनान्ननिवर्ततेविहितकरणात्सुखादिगुणोभवतीतिगुणबुद्ध्याविहितंनकरोतिकिंत्वहियथार्थकःफलानुसंधानरहितः । क्रीडालक्षणंकार्यकरोतितथा । किंतुस्वतंत्रकर्तानारायणएवममेश्वरत्वाविहितकरणेप्रेरयतीतिनिषिद्धान्निवर्तयतितद्भक्तिरेवममतत्फलमितिनिरूप्यकर्मकरोति । सपुनर्नविपद्येतसंसारलक्षणांविपदंनप्राप्नोतीत्यन्वयः ॥ कर्तृत्वमात्मनोयस्माज्ज्ञाननिष्ठेनमन्यते ॥ अतोकुर्वन्नसिदादोषबुद्ध्यानवंदति ॥ गुणबुद्ध्यानविहितंकिंत्वीशप्रेरितोस्म्यहम् ॥ सएवचममेश्वरत्वानिंद्यानिंद्यकरोत्यजः ॥ नमेदोषोनचगुणःकर्तृत्वाभावतःस्फुटम् । स्वतंत्रत्वान्नवेशस्यप्रेक्षास्तेषुभवेदपि । इतिमत्वानिवर्तेतनिंद्यात्कुर्याद्गुणानितिवाक्यसिद्धोयमर्थः ॥ येअज्ञास्तेष्वज्ञेषुदोषोगुणश्च

ज्ञानविज्ञानसंयुक्तआत्मभूतःशरीरिणाम् ॥ आत्मानुभवतुष्टात्मानांतरायैर्विहन्यसे १० दोषबुद्ध्योभयातीतोनिषेधान्ननिवर्तते ॥ गुणबुद्ध्याचविहितंनकरोतियथार्भकः ११ सर्वभूतसुहृच्छांतोज्ञानविज्ञाननिश्चलः ॥ पश्यन्मदात्मकंविश्वंनविपद्येतवैपुनः १२ श्रीशुकउवाच ॥ इत्यादिष्टोभगवतामहाभागवतोनृप ॥ उद्धवःप्रणिपत्याहतत्त्वजिज्ञासुरच्युतम् १३ उद्धवउवाच ॥ योगेशयोगविन्यासयोगात्मन्योगसंभव ॥ निःश्रेयसायमेप्रोक्तस्त्यागःसंन्यासलक्षणः १४ त्यागोयंदुष्करोभूमन्कामानांविषयात्मभिः ॥ सुतरांत्वयिसर्वात्मन्नभक्तैरितिमेमतिः १५ सोयंममाहमितिमूढमतिर्विगाढस्त्वन्मायया विरचितात्मनिसानुबंधे ॥ तत्त्वंजसानिगदितंभवतायथाहंसंसाधयामिभगवन्ननुशाधिभृत्यम् १६ सत्यस्यतेस्वदृशआत्मनआत्मनोन्यंवक्तारमीशविबुधेष्वपिनानुचक्षे ॥ सर्वेविमोहितधियस्तवमायया मेब्रह्मादयस्तनुभृतोबहिरर्थभावाः १७

भवेदित्यर्थः अनित्यामेगुणानस्युर्दोषानैवकथंचन । इतिमत्वाशुभंकुर्यान्निवर्तेदशुभादपि।ज्ञानीत्वकर्तृतामानादीशकर्तृत्वनिश्चयात् । किंतुपूर्णगुणायैवनतुदोषापनुतये ।नचाल्पगुणसिद्ध्यर्थंबालवत्कृतनिश्चयइत्येतदप्युक्तार्थेमानम् । वैलक्षण्याद्धरेर्नित्यंतत्तत्त्वात्तदात्मकम् । इतिविश्वंमपश्यंतिज्ञाननिष्ठाहरेःप्रिया इत्येतज्ज्ञानार्थिनाविश्वमेवद्रष्टव्यमित्यस्मिन्नर्थेमानम् ११ १२ १३ योगस्ययममनियमादेरीशयोगस्यज्ञानस्यविशेषेणन्यासोदेवादिषुयेनसतथातस्यसंबोधनं योगविन्यासेति । योगात्मन्ज्ञानस्वरूप योगसंभवउपायजनक । ज्ञानंतुयोगशब्दोक्तंयुज्यतेनेनयत्सुखं । क्वचिद्योगउपायःस्यात्क्वचिच्चित्तनिरोधनमिति । त्यागंदानाद्व्यावर्तयतिसंन्यासलक्षणइति । सर्वदुष्टसंगपरित्यागलक्षणइत्यर्थः १४ ततःकिमत्राह त्यागइति कामानामयंत्यागःसुतरांत्वय्यभक्तैर्दुष्करः १५ त्वन्मायायासोहमुद्धवनामासानुबंधेविरचितात्मनिनिर्मितदेहेममाहमितिमूढमतिरतएवविगाढइतिचत्तस्माद्भवतानिगदितंयथ साधयामितथाभृत्यंमांशाधीत्यन्वयः १६ तत्रमत्स्वरूपोपदेष्टामत्तोन्यःकिंनस्यादत्राह सत्यस्येति तेतवस्वरूपस्यवक्तारमात्मनस्त्वत्तोन्यंपुरुषंनानुचक्षेनपश्यामि । कीदृशस्यसत्यस्यसाधुज्ञानादिगुणस्य स्वदृशःस्वयंप्रकाशमानस्य आत्मनःसर्वव्यापिनः । मनुष्येष्वभावेविदेवेषुस्यादतउक्तं विबुधेष्विति उक्तंविशिनष्टि सर्वेइति । ब्रह्माआदिःकारणंयेषांरुद्रादीनांतेतथोक्ताः । तेविमोहितधियःपरोक्षज्ञानवंतः । कुतस्तत्राह तनुभृतइति । शरीराभिमानित्वादतएवबहिरर्थभावाःमोक्षतदु

पयोगिभ्योन्यत्रापिकामयुक्ताः । अस्यश्लोकस्यार्थः अशरीरःसदाविष्णुःपूर्णानंदत्वतःसदा । इच्छाचक्रीडयैवास्यनफलायततोविभोः । अतोबाह्यार्थकामोपिनिष्कामइतिकथ्यते । ब्रह्मानिरभिमानित्वाच्छरीर्यप्यशरीरवान् नित्यानंदोपयोग्यन्यकामस्योज्झितितःसदा । बहिरर्थविनिर्मुक्तस्तथापितनुधारणात् । अभूढोमूढइतिवदुच्यतेचसरस्वती । रुद्राद्यास्तन्वभीमानाद्बहिरर्थयुजस्तथा । सर्वेषांब्रह्मपदवीयोग्यानांपूर्वमेवतु । अभावस्त्वपरोक्षस्यमोहोज्ञानस्यभण्यते । ब्रह्मणस्त्वंशरूपेषुभारत्याज्ञानवर्जनं । ब्रह्मगायत्रिभावेतुनांशावतरणंक्वचित् । शतजन्मसुपूर्वंतुज्ञानोदयउदीर्यते । अपरोक्षेणपारोक्ष्यात्पूर्णज्ञानंसदैवतु । शतजन्मगतायाश्चआपरोक्ष्योज्झितिर्भवेत् । क्वचित्क्वचित्सरस्वत्याअंशावतरणेष्विति शक्तिविवेकग्रंथादवगतइति । अशरीरोवायुरभ्रंविद्युत्स्तनयित्नुरशरीराणिवाएतानीतिचश्रुतिरत्रमानं । श्रुतिभिस्तानितत्वात्तुस्तनयित्नुर्हरिःस्मृतः । अभ्रंभूताभिभरणाच्छ्रीर्वायुर्भरतःस्मृतः । विद्युत्तुभारतीप्रोक्ताएतएवाशरीरिणः । व्यत्यासेनापिनामस्यादेतेषांमहतांसदा । इत्यनेनश्रुत्युक्ताएतएवेतिज्ञायते १७ यस्माद्भगवतोन्योवक्तानास्तितस्मादहंनारायणंशरणंप्रपद्ये ममज्ञानोपदेशायेति शेषः भवंतंपूज्यंअनवद्यत्वंपूज्यत्वेहेतुःअनवद्यत्वेहेतुःयद्यनंतपारत्वंतर्हिस्वस्याज्ञानंप्राप्तंअतस्तंसर्वज्ञमितिबलवत्प्रतिबंधकेनज्ञानंक्वचिदलब्धंस्यादतउक्तंईश्वरमिति । देशप्रभुवदीश्वरस्यापिस्थानच्युतिःस्यादत्राह अखंडेति अखंडमपरिच्छिन्नंअविकुंठंअविनाशिचविष्ण्यंस्थानंयस्यसतथा । नन्उभयत्रसंबध्यतेशरणप्राप्तौहेतुमाह निर्वेदेति । कुतोनिर्वेदइत्यत्राह वृजिनेति एवंविशिष्टेपिनारायणेन्यःकिंनस्यादत्राह नरसखमिति । एतद्विशेषणंहरेरितिकुतइतीयमाशंका । विष्णोर्वायोरनंतस्यात्रिभिरंशैर्नरःस्मृतः । सैंद्रैश्चतुर्भिःपार्थस्तुद्वाभ्यांतुबललक्ष्मणावित्यनेनपरिहर्तव्या १८ लोकतत्त्वविचक्षणस्योद्धवस्यपुनस्तत्त्वज्ञानप्रश्नःकिमर्थइत्याशंक्यपरोक्षलोकतत्त्वज्ञानस्यसत्स्नेहमंतरेणोत्पन्नस्यपुरुषार्थ

तस्माद्भवंतमनवद्यमनंतपारंसर्वज्ञमीश्वरमखंडविकुंठविष्ण्यम् ॥ निर्वेदधीरहरहर्वृजिनाभितप्तोनारायणंनरसखंशरणंप्रपद्ये १८ श्रीभगवानुवाच ॥ प्रायेणमनुजालोकेलोकतत्त्वविचक्षणाः ॥ समुद्धरंतिह्यात्मानमात्मनैवाशुभाशयात् १९ आत्मनोगुरुरात्मैवपुरुषस्यविशेषतः ॥ यत्प्रत्यक्षानुमाना भ्यांश्रेयोसावनुविंदते २०

साधनत्वंनस्यात् प्रत्युतानर्थहेतुत्वंचअपरोक्षज्ञानानुत्पादादित्याशेयनाह प्रायेणेति । अस्येयमक्षरयोजना प्रायेणबहुलम् लोकेयेमनुजाःलोकेतत्त्वेचविचक्षणाःसत्स्नेहनिर्मुक्तपरोक्षज्ञाननिपुणास्तेआत्मनैवप्रयत्नेनैवाशुभाशयात् ल्यब्लोपेपंचमी पापफलदुःखबहुलंतमःप्राप्यात्मानंसमुद्धरंतिनिर्मूलयंतिहियस्मात्तस्मात्सत्स्नेहयुक्तालोकतत्वपरोक्षज्ञानविद्याविशारदाःआत्मनैवसात्विकमनसैवाविर्भूतापरोक्षज्ञानेनैवाशुभाशयात्पापकारणात्संसारादात्मानंसमुद्धरंत्युन्नयंति पन्नगंकूपादिवेति अनेनभगवद्भक्तयुत्पन्नंज्ञानंपुरुषार्थोपयोगीतिज्ञानसमुद्रमग्नस्यापिममश्रेयसेभगवदपरोक्षज्ञानोत्पत्तिप्रकारोवक्तव्यइतितत्प्रश्नःसार्थकइति यत्नेकौमनस्यात्माइत्यभिधानादात्मशब्दोयत्नादौवर्ततेइतिसिद्धम् । पारोक्ष्येणैवतत्त्वंतुलोकंचापिवदंतिये । तेपिसत्स्नेहनिर्मुक्तास्तमोयांतिविनिश्चयात् । आपरोक्षंनचज्ञानंतेषामुत्पद्यतेक्वचित् । इतिवचनादुक्तोर्थभेदसिद्धइतिसंतोष्टव्यम् १९ आत्मनैवेत्येवकारेणश्रेयःसंपत्तौसात्विकमनसःप्राधान्यमुक्तंतदेवप्रतिपादयति आत्मनइति आत्मनोजीवराशेःश्रेयःसंपादनेगुरुरुपदेष्टात्मैवमनएव मनसावाअग्रेसंकल्पयत्यथवाचाव्याहरतीतिश्रुतेः अतसातत्यगमनइतिधातोःनिष्पन्नेनात्मशब्देनशरीर्यैवलक्ष्यते तस्यैवगमनसंभवात्तत्रापिविशेषतःपुरुषार्थलक्षणश्रेयःसंपत्तौपुरुषस्यमनुष्यशरीरंप्राप्तस्यआत्मनःआत्मैवगुरुरितिसंबध्यते कुतएतदत्राह यदिति असौपुरुषःमानुषशरीरंप्राप्राप्तोजीवः प्रत्यक्षानुमानाभ्यां श्रेयःपुरुषार्थीवेदतइतियदतइतिमनःपूर्वकंचक्षुषाकण्यादिनाग्रीह्यादिसंपल्लक्षणश्रेयःप्राप्तिदर्शनेनयागादिसाधनसामग्र्यास्वर्गादिश्रेयःप्राप्यत इत्यनुमीयतइति २०

एतदेवविशदयति पुरुषत्वमनुष्यशरीरमात्मतत्त्वविचारसाधनं तत्सत्यांचेत्याह पुरुषत्वमिति । तत्र मानुषशरीरस्यात्मतत्त्वविचारसाधनत्वं
धंतारयतीत्याविस्तारस्तम् । आस्तुतंतापकोपयोरितियादवः । नित्याविभूतंनैर्मल्यंवा २१ बह्वीष्वासुपूर्वुकापूस्तवप्रेष्वेतितत्राह तासामिति २२ तत्रकारणमाह अत्रमामिति । अत्रपुरुषशरीरेमनो
योगयुक्तायोगिनः स्वतोबाह्यमीश्वरंमामद्धाप्रत्यक्षीकर्तुमार्गयंतिविचार्यज्ञातुंयतंतेकैर्हेतुभिःसयुक्तिभिः अनुमानतःविनिर्दोषपंचावयवलक्षणवाक्यात्मकैः किंप्रमाणकैश्चक्षुरादिनागृह्यमाणैरूपादिभि
रात्मनःपरमात्मनोलिंगैर्गमकैर्ज्ञापकैर्जीवस्यदर्शनादिस्वातंत्र्यभावेनतत्कर्तान्यईश्वरोप्यस्तीत्यनुमीयतइति २३ यथाहंसंसाधयामितथामांशाधीत्युद्धववाक्यमवधारयन्नुक्तमर्थमितिहासेनसंवेदयति
अत्रेति अत्रपुरुषशरीरेअहंनिर्मार्गणेनसुलभइत्येतस्मिन्नर्थेअवधूतयदुसंवादरूपमितिहासंपुरावृत्तमुदाहरति अस्यैवविवरणंपुरातनमिति अमिततेजसःअनल्पबलस्य तेजोबलेप्रभावेज्येज्योतिष्यर्चि

पुरुषत्वेचमांधीराःसांख्ययोगविशारदाः ॥ आविस्तारंप्रपश्यंतिसर्वशक्त्युपबृंहितम् २१ एकद्वित्रिचतुष्पादोबहुपादस्तथापदः ॥ बह्व्यःसंतिपुरः
सृष्टास्तासांमेपौरुषीप्रिया २२ अत्रमांमार्गयंत्यद्धायुक्ताहेतुभिरीश्वरम् ॥ गृह्यमाणैरात्मलिंगैःस्वबाह्यमनुमानतः २३ अत्राप्युदाहरंतीममितिहासंपुरा
तनम् ॥ अवधूतस्यसंवादंयदोरमिततेजसः २४ अवधूतंद्विजंकंचिच्चरंतमकुतोभयम् ॥ कविंनिरीक्ष्यनिपुणंयदुःपप्रच्छधर्मवित् २५ कुतोबुद्धिरि
यंब्रह्मन्नकर्तुस्तेविशारदा ॥ यामासाद्यभवाल्लोकंविद्वांश्चरतिबालवत् २६ प्रायोधर्मार्थकामेषुविवित्सायांचमानवाः ॥ हेतुनैवसमीहंतेआयुषोय
शसःश्रियः २७ त्वंतुकल्पःकविर्दक्षःसुभगोमृतभाषणः ॥ नकर्तुमीहसेकिंचिज्जडोन्मत्तापिशाचवत् २८ जनेषुदह्यमानेषुकामलोभदवाग्निना ॥ नतप्य
सेग्निनामुक्तोगंगांभस्थइवद्विपः२९त्वंहिनःपृच्छतांब्रह्मन्नात्मन्यानंदकारणम् ॥ ब्रूहिस्पर्शविहीनस्यमवतःकेवलात्मनः ३० श्रीभगवानुवाच ॥ यदुनैवं
महाभागोब्रह्मण्येनसुमेधसा ॥ पृष्टःसभाजितःप्राहप्रश्रयावनतंद्विजः ३१ ब्राह्मणउवाच ॥ संतिमेगुरवोराजन्बहवोबुद्ध्युपाश्रिताः ॥ यतोबुद्धिमुपादाय
मुक्तोटामीहतान्शृणु ३२ पृथिवीवायुराकशआपोग्निश्चंद्रमारविः ॥ कपोतोऽजगरःसिंधुःपतंगोमधुकृद्गजः ३३ मधुहाहरिणोमीनःपिंगलाकुररोर्भकः॥
कुमारीशरकृत्सर्पऊर्णनाभिःसुपेशकृत् ३४ एतेमेगुरवोराजन्चतुर्विंशतिराश्रिताः ॥ शिक्षावृत्तिभिरेतेषामन्वशिक्षमहंततः ३५ यतोयदनुशिक्षामि
यथावानाद्दुषात्मज ॥ तत्तथापुरुषव्याघ्रनिबोधकथयामिते ३६

षिरेतसीतिच २४ २५ अकर्तुर्निषिद्धाचरणरहितस्यअशनादिप्रवृत्तिशून्यस्यच २६ बालवत्संचरणंज्ञानसंपादनायकिंनस्यादित्याशंक्य सत्यंनायंमनुष्यधर्मः किंतु तेषांधर्मादिष्वेवप्रवर्तनंआत्मत
त्त्वविविसायांसत्यांचेत्याह प्रायइति । प्रायोमानवाःपरमात्मतत्त्वविविसायांसत्यांचेहधर्मादिष्वेवसमीहंतेप्रवर्तते आयुरादिप्राप्तयेचहेतुना तत्प्राप्तिसाधनसामग्र्येण २७ शक्त्यादिसाधनसामग्र्य
भावादेवमवस्थानमितितत्राह त्वंत्विति २८ २९ स्पर्शविहीनस्यविषयभोगविहीनस्यकेवलात्मनःशरीरमात्रपरिग्रहस्य ३० ३२ बुद्ध्युपाश्रिताः बुद्ध्यासंगृहीताःयतोयेभ्यःशिक्षावृत्तिमुपादाय
शरीराभिमानमुक्तःतान्गुरून् ३२ ३३ ३४ एतेषांपृथिव्यादीनांशिक्षाकरणवृत्तिभिः ३५ यतोयस्मात्पृथिव्यादेर्यद्वर्तनं शिक्षामि शिक्षेत्तत्तथानिबोधबोधतिःपरस्मैपदी ३६

क्षितेःशिक्षितांबुद्धिमाह भूतैरिति तद्दैवंविदंतीतांद्विदःतेषांदैवज्ञानांमार्गात् तद्विद्वानितिपाठे तस्यदैवस्यवशानुगत्वंजानन्मार्गात् सत्तामितिशेषः क्षितेर्व्रतमचलत्वंअतएवाचलेतिपृथिव्यानामांतरम् ३७ भूमेःशिक्षितंव्रतांतरबुद्धिंचाह शश्वदिति सर्वदापरेषांगुरुदेवादिसज्जनानांअर्थेआत्मनःसर्वेहांसकलचेष्टांसंभवंवृद्धिंच । सज्जनार्थेनुमन्येतऐहिकींवृद्धिमात्मनः इत्यादेरयमेवार्थइतिशिक्षेत नियमेनेतिशेषः ३८ एवंविधज्ञानानिशिक्षमाणस्यमुनेर्वृत्तिप्रकारमाह प्राणवृत्त्येति । मुनिर्यावत्प्राणवृत्त्याशरीरयात्रयासंतुष्येत् तावत्यैवनिर्वहेत् एवकारव्यावर्त्यमाह नैवेति तत्रापिज्ञाननाशकारणानिमनोविक्षेपनिमित्तानिचद्रव्याणिनसेवेतेत्याशयेनाह ज्ञानमिति ३९ वायोःशिक्षिताकाबुद्धिरितितत्राह विषयेष्विति विषयेष्वाविशन् विषयाननुभवन्योग्यात्मायोगीजीवः गुणदोषसंबंधेननविषज्जेत संसक्तो नभवेत् गानादिनानाधर्मेषु ४० पार्थिवेषुपृथिवीकार्येषुप्रविष्टःतद्गुणाश्रयःजन्मदुःखादिदेहधर्माश्रयः गुणैर्दुःखादिभिः ४१ नभसःशिक्षितमाह अंतरिति मुनिर्विततस्यव्याप्तस्याकृतितः आत्मनः परमात्मनः । नभोवदव्यवच्छेदमखंडत्वंदेहेषुअसंगत्वंभावयेच्चितयेत् कुत्र कथमतउक्तं स्थिरजंगमेषुचराचरात्मकेषुवस्तुषुअंतरात्मभावेनअंतर्यामित्वेनअणुत्वव्याप्त्याबहिर्ब्रह्मभावेनबृहत्वेनमहत्त्वव्याप्त्याइदंकेनासिद्धमत्राह समन्वयेनेति । उपक्रमादितात्पर्ययुक्तप्रमाणेनब्रह्मणःआत्मभावेनस्वैक्येनेत्यन्यथाव्याख्यानम् । जीवांतर्यामिकोविष्णुरात्मनामासमीरितः । तस्यतुब्रह्म

भूतैराक्रम्यमाणोपिधीरोदैववशानुगैः ॥ तद्विदांनचलेन्मार्गादनुशिक्षन्नक्षितेर्व्रतम् ३७ शश्वत्परार्थसर्वेहांपरार्थैकांतसंभवम् ॥ साधुःशिक्षेतभूमेश्चअनुशिक्षंव्रतांतरम् ३८ प्राणवृत्त्यैवसंतुष्यन्मुनिर्नैवेंद्रियप्रियैः ॥ ज्ञानंयथाननश्येतनावकीर्येतवाङ्मनः ३९ विषयेष्वाविशन्योगीनानाधर्मेषुसर्वतः ॥ गुणदोषान्वयेनात्मानविषज्जेतवायुवत् ४० पार्थिवेष्विहदेहेषुप्रविष्टस्तद्गुणाश्रयः ॥ गुणैर्नयुज्यतेयोगीगंधैर्वायुरिवात्मदृक् ४१ अंतर्बहिश्चस्थिरजंगमेषुब्रह्मात्मभावेनसमन्वयेन ॥ व्याप्त्याव्यवच्छेदमसंगमात्मनोमुनिर्नभोवद्विततस्यभावयेत् ४२ तेजोंबन्नमयैर्भावैर्मेघौघैर्वायुनेरितैः ॥ नस्पृश्यतेनभस्तद्वत्कालसृष्टैर्गुणैःपुमान् ४३ स्वच्छःप्रकृतितःस्निग्धोमाधुर्यस्तीर्थवन्नृणाम् ॥ मुनिःपुनात्यपांमित्रमीक्षणस्पर्शकीर्तनैः ४४ तेजस्वीतपसादीप्तोदुर्धर्षोदूरभाजनः ॥ सर्वभक्षोपियुक्तात्मानादत्तेपापमग्निवत् ४५

रूपत्वाद्बहिरंतस्तथैवच । पश्येदाकाशवद्व्याप्तिमसंगत्वंचानित्यशः । इतिप्रमाणविरुद्धं तस्मान्नांगीकर्तव्यःसार्थइति ४२ असंगप्रकारमाह तेजइति यथानभोवायुनेरितैर्मेघौघैर्नस्पृश्यते तद्वत्तथापुमान्परःपुरुषःकालसृष्टैःतेजोंबन्नमयैर्गुणैर्विषयैर्नस्पृश्यतेइत्यन्वयः ४३ अद्भ्यःशिक्षितांबुद्धिमाह स्वच्छइति तीर्थवद्गंगादिशुद्धजलवत् । प्रकृतितः स्वभावतःस्वच्छः । प्रकृतिःपंचभूतेषुस्वभावेमूलकारणइत्यभिधानम् ।ननुजीवस्यस्वच्छगुणत्वेजीवपरयोःकोविशेषइतीयमाशंका । स्वच्छत्वादयोगुणाहरेःस्वतःसिद्धाजीवस्येष्टव्यास्वीकर्तव्याइतिपरिहर्तव्या तदुक्तं । गुणान्जीवस्यचेष्टव्यान्सिद्धान्विष्णोर्गुणांस्तथा । तत्तद्दृष्ट्वाविचिन्वीतपृथगेवसुधीःसदेति । माधुर्यःसुखहेतुः ! मधुनामसुखंविद्यान्माधुर्यंसुखहेतुता सुखेरतिर्वासंप्रोक्ताशब्दतत्त्वविचक्षणैरितिवचनात् । मुनिर्मित्रंस्वाश्रितंपुनाति ईक्षणमीक्षा ४४ अग्नेःशिक्षितांबुद्धिमाह तेजस्वीति तेजस्वीप्रभाववान् अन्यत्रार्चिष्मान् तपसाउपवासादिना अन्यत्रसंतापहेतुज्वालयादीप्तःप्रकाशनशक्तिमान्दुर्धर्षःपराभवयितुमशक्यः । पराभवोधर्षणंस्यादवज्ञानमथापिवा । ततत्सत्सुसदाकुर्यात्सहसाशयनंनचेतिवचनात् दूरभाजनोदूरान्निषेव्यःयुक्तात्मापरमात्मनिपुक्तमनाः । एवंविधोज्ञानी सर्वभक्षोपि पापंनादत्ते अपरोक्षज्ञानिनोपि सर्वभक्षणं सर्वत्रानुमतिःप्राणात्ययेतद्दर्शनादित्यापद्विषये कथं अग्निवत ४५

क्वचिच्छन्नः दुर्जनसन्निधौ क्वचित्स्पष्टःस्वजनसमीपे आत्मज्ञानादिलक्षणश्रेयःइच्छतांपुंसामुपास्यः दातॄणांप्रागुत्तरांशुभदहन् सर्वत्रसर्वमुक्त मुन्यभ्यांःसमांमदम् ४६ अग्रःशाश्वतपरमात्मज्ञानमाह स्वमाययेति । स्वमायया स्वेच्छाधीनप्रकृत्यासृष्टंसदसल्लक्षणंस्थूलसूक्ष्मरूपंजगत्प्रविष्टः तत्तत्सरूपः तत्तत्पदार्थानुगुणरूपईयते । कथंएधसिप्रविष्टःएधोरूपोग्निरिव । अत्रजीवस्यछन्नत्वंपरमात्मनःप्रविष्टत्वंचेतिविशेषणंज्ञातव्यम् । जीवस्यछन्नतांशिक्षेत्प्रविष्टत्वंपरात्मनः । तत्तद्गुणविडंबंचब्रह्मेःसर्वथापिवेतेवचनात् । अल्पदारौयथाल्पोग्निरेवमल्पशरीरगः । दृश्यतेपरमात्मापिस्थूल :स्थूलशरीरग इति ४७ चंद्रमसःशिक्षितांबुद्धिमाह विसर्गाद्याइति विविधाःसर्गाद्याःजननाद्याःश्मशानांताःमरणांतादेहस्यैव नात्मनोजीवस्य चंद्रस्यकलानांक्षयादिकंयथा नचंद्रस्वरूपस्य ४८ कालवेगेनप्रतिक्षणमपिदेहादीनांसूक्ष्मावुत्पत्तिनाशौस्तइतिसोदाहरणमाह कालेति कालाख्यनद्योघवेगेनभूतानांप्राणिनांआत्मनोदेहस्यनित्यावपिसदातनावपिभवाप्ययौउत्पत्तिनाशौनदृश्येतेसूक्ष्मत्वादितिशेषः । यथाग्नेरर्चिषांज्वालानांप्रवाहविशेषः यथापुरुरवसोजराअश्विभ्यामेवदृष्टेतिगीतातात्पर्यवचनंसद्भावप्रमाणं भूतानांचेतनानामात्मनःपरमात्मनःप्रभवाप्ययावित्यन्यथाव्याख्यानं । अवयव्यवयवानांचगुणानांगुणिनस्तथा । शक्तिशक्तिमतोश्चैवक्रियायास्तद्वतस्तथा । स्वरूपांशांशिनोश्चैवनित्याभेदोजनार्दने । जीवस्वरूपेषुतथातथैवप्रकृतावपि । चिद्रूपायामतोनांशाअगुणाअक्रियाअपि । हीना अवयवैश्चेतिकथ्यंतेतत्वभेदतः । पृथग्गुणाद्यभावाच्चनित्यत्वादुभयोरपि । विष्णोरचिंत्यशक्तेश्चसर्वसंभवतिध्रुवं । क्रियादेरपिनित्यत्वंव्यक्त्यव्यक्तिविशेषणंभावाभावविशेषेणव्यवहारश्चतादृशः।विशेषस्यवि

क्वचिच्छन्नःक्वचित्स्पष्टउपास्यःश्रेयइच्छताम् ॥ भुंक्तेसर्वत्रदातॄणांदहन्प्रागुत्तराशुभम् ४६ स्वमायया सृष्टमिदंसदसल्लक्षणंविभुः ॥ प्रविष्टईयतेतत्तत्सरूपोग्निरिवैधसि ४७ विसर्गाद्याःश्मशानांताभावादेहस्यनात्मनः ॥ कलानामिवचंद्रस्यकालेनालक्ष्यवर्त्मना ४८ कालनद्योघवेगेनभूतानांप्रभवाप्ययौ ॥ नित्यावपिनदृश्येतेआत्मनोग्नेर्यथार्चिषाम् ४९ गुणैर्गुणानुपादत्तेयथाकालंविमुंचति ॥ नतेषुसज्जतेयोगीगोभिर्गाइवगोपतिः ५० बुद्धिसंस्थेन भेदेनव्यक्तस्थइवतद्व्रतः ॥ लक्ष्यतेस्थूलमतिभिरात्माचांबुस्थितार्कवत् ५१

शिष्टस्याप्यभेदस्तद्वदेवतु । सर्ववाचिंत्यशक्तित्वाद्युज्यतेपरमेश्वरे । तच्छक्त्यैवचजीवेषुविद्रूपप्रकृतावपि । भेदाभेदौतदन्यत्रह्युभयोरपिदर्शनात् ।.कार्यकारणयोश्चापिनिमित्तंकारणंविनेति । प्रमाणविरुद्धत्वाज्जडस्येत्यंगीकर्तव्यं । अनंगानांचेतनानांक्रियावत्त्वंचाचिंत्येशशक्तिनियतत्वाद्युज्यतत्यास्मिन्नर्थे । आत्मनिचैवंविचित्राश्चहि । सर्वोपेताचतद्दर्शनात् । सर्वधर्मोपपत्तेश्च । स्वाभाविकीज्ञानबलक्रियाच । यत्रासन्नऋषीन्परएकमाहुरित्यादिप्रमाणांतरंच । नचेशशक्तिर्मायामयी । विनादोषान्श्रुतमप्यावगम्यंतथास्मृतंपरमेसत्यरूपं । नैवासत्यंक्वचिदस्मिन्परेशेसर्वयुक्तंपूर्णशक्तेःसदैवेतिश्रुतिविरोधात् ४९ सूर्यादनुशिक्षितांबुद्धिमाह गुणैरिति योगीयथाकालंविहितकालेगुणैरिंद्रियैःगुणान्शब्दादिविषयान्उपादत्तेविमुंचतिच तेषुविषयेषुनसज्जतेनातिसक्तोभवति । कथमिव गोपतिःसूर्यःगोभिः रश्मिभिःगाइवजलानीव ५० नकेवलंअसंगत्वमेवसूर्यात्शिक्षितमपितुजीवपरमात्मवैलक्षण्यंचेतिभावेनाह बुद्धिसंस्थेनेति तस्यजीवस्यशरीरगतःआत्मापरमात्मास्थूलमतिभिःप्रमाणज्ञानरहितैःबुद्धिसंस्थेनभेदेनबाह्यांतःकरणविषयमिथ्याज्ञानेनव्यक्तंशरीरं तत्स्थोजीवइवसादृश्येनमुखीदुःखीतिलक्ष्यतेदुःखाद्यधिकरणदेहगतत्वात्कथं अंबुस्थितार्कवत् यथापरमार्कस्वरूपानभिज्ञैर्बिंबभूतोजलेप्रतिबिंबितार्कवत् अचेतनःशिरःपादादिरहितोवर्तुलश्चेतिकल्प्यतेतथंति । तस्मात्तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्योअभिचाकशीतिइत्यादिश्रुतितात्पर्यवेदिभिर्निर्मलचित्तैःसूक्ष्मेक्षणैःजीवपरयोर्वैलक्षण्यंजानद्भिर्योगिभिर्भाव्यमन्यथाऽसुरमतप्रवेशइति दृष्टांतेप्येवमेवज्ञातव्यं बिंबप्रतिबिंबयोरिव जीवपरयोर्भेदोव्यावहारिको नतुपरमार्थइतिमतं ।बुद्धिसंस्थस्त्वात्मभेदोव्यक्तस्थोजीवउच्यते। तेनैवसहसंस्था

नात्परात्मास्थूलबुद्धिभिः । जीववल्लक्ष्यतेविष्णुर्यथैवांबुस्थितार्कवत् । परमार्कःपारिमाण्याद्वर्तुलत्वादिनातथा । अर्कस्वरूपानाभिज्ञैःशिरःपादादिवर्जितः अचेतनश्चकल्प्येततत्तेजोमात्रदार्शीभिः । सूर्य देहादिभिर्नहितेजोमंडलमेवतु । दृश्यतेस्थूलमतिभिरेवमेवजानार्दनइतिप्रमाणविरुद्धत्वादुपेक्षणीयम् ५१ मुक्तिसाधनेषुप्रथमतःआपाद्यंविरक्तिलक्षणंसाधनामितिकपोताशिक्षितांविरक्तिमाह नातिस्नेहइति

नातिस्नेहःप्रसंगोवाकर्त्तव्यःक्वापिकेनचित् ॥ कुर्वन्विंदेतसंतापंकपोतइवदीनधीः ५२ कपोतःकश्चनारण्येकृतनीडोवनस्पतौ ॥ कपोत्याभार्ययासार्धं सुवासकतिचित्समाः ५३ कपोतौस्नेहगुणितहृदयौगृहधर्मिणौ ॥ दृष्टिंदृष्ट्वांगमंगेनबुद्धिंबुद्ध्याबबंधतुः ५४ शय्यासनाटनस्थानवार्त्ताक्रीडाशनादिषु ॥ मिथुनीभूयविस्रब्धौचेरतुर्वनराजिषु ५५ यद्यद्वांछतिसाराजन्तदर्थमनुकंपितः ॥ तंतंसमानयत्कामंकृच्छ्रेणाप्यजितेंद्रियः ५६ कपोतीप्रथमंगर्भंगृह्णतीकालआगते ॥ अंडानिसुषुवेनीडेस्वपत्युःसन्निधौसती ५७ तेषुकालेव्यजायंतरचितावयवाहरेः ॥ शक्तिभिर्दुर्विभाव्याभिःकोमलांगतनूरुहाः ५८ प्रजाःपुपुषतुःप्रीतौदंपतीपुत्रवत्सलौ ॥ शृण्वंतौकूजितंतासांरुवंतौकलभाषितैः ५९ तासांपतत्रैःसुस्पर्शैःकूजितैर्मुखचेष्टितैः ॥ प्रत्युद्गमैरदीनानांपितरौमुदमापतुः ६० स्नेहानुबद्धहृदयावन्योन्यंविष्णुमायया ॥ विमोहितौदीनधियौशिशून्पुपुषतुःप्रजाः ६१ एकदाजग्मतुस्तासामशनार्थंकुटुंबिनौ ॥ परितःकाननेतस्मिन्नर्थिनौचेरतुश्चिरम् ६२ दृष्ट्वाताँल्लुब्धकःकश्चिद्यदृच्छातोवनेचरः ॥ जगृहेजालमातत्यचरतःस्वालयांतिके ६३ कपोतश्चकपोतीचप्रजापोषेसदोत्सुकौ ॥ गतौपोषणमादायस्वनीडमुपजग्मतुः ६४ कपोतीस्वात्मजान्वीक्ष्यबालकाञ्जालसंवृतान् ॥ तान्भ्यधावत्क्रोशंतीक्रोशतोभृशदुःखिता ६५ सासकृत्स्नेहगुणितादीनचित्ताजमायया ॥ स्वयंचाबध्यताशिचाबद्धान्पश्यंत्यपस्मृतिः ६६ कपोतश्चात्मजान्बद्धानात्मनोप्यधिकप्रियान् ॥ भार्यांचात्मसमांदीनांविललापातिदुःखितः ६७ अहोमेपश्यतापायमल्पपुण्यस्यदुर्मतेः ॥ अतृप्तस्याकृतार्थस्यगृहाश्चैवर्गिकाहताः ६८ अनुरूपानुकूलाचयस्यमेपतिदेवता ॥ शून्येगृहेमांसंत्यज्यपुत्रैःस्वर्यातिसाधुभिः ६९ सोहंशून्यगृहेदीनोमृतदारोमृतप्रजः ॥ जिजीविषेकिमर्थंवाविधुरोदुःखजीवितः ७० तांस्तथैवावृतांश्छिन्नैर्मृत्युग्रस्तान्विचेष्टतः ॥ स्वयंचकृपणःशिक्षुपश्यन्नप्यबुधोपतत् ७१ तंलब्ध्वालुब्धकःक्रूरःकपोतंगृहमेधिनम् ॥ कपोतकान्कपोतींचसिद्धार्थःप्रययौगृहम् ७२ एवंकुटुंब्यशांतात्माद्वंद्वारामःपतत्रिवत् ॥ पुष्णन्कुटुंबंकृपणःसानुबंधोवसीदति ७३ यःप्राप्यमानुषंलोकंमुक्तिद्वारमपावृतम् ॥ गृहेषुखगवत्सक्तस्तमारूढच्युतंविदुः ७४ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेअवधूतगीतेसप्तमोध्यायः ॥ ७ ॥

५२ ५३ स्नेहगुणितहृदयावित्येतदर्शयति दृष्टिमित्यादिना ५४ शय्यासनादिषुमिथुनीभूयवर्तमानाम् ५५ ५६. ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५ शिचापक्षिग्राहिजालेन ६६ ६७ ६८ ६९ ७० ७१ ७२ ७३ आरूढादृक्षात्च्युतंपतितम् ७४ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेविजयध्वजकृतटीकायांसप्तमोध्यायः ॥ ७ ॥ ॥ ७ ॥

नकतुमोहसाकांक्षादितियदुराजप्रश्नपरिहरन्नतत्ससारसुखपर्यादुःखाशिरस्कत्वननाकांक्षनसाध्यत्वतथास्वर्गसुखामत्याह सुखामात यथाद्रपकसुखपतनानश्यात्स्वर्गनरकचास्ततथाश्रान्नादाद्र
यविषयशब्दादिसुखंअस्त्येवेति यत्तत्स्याद्दुःखोदुःखाशिरस्कंसुखंनेच्छतकुतएवतत्साधनेप्रवर्ततइत्यन्वयः अनेनैहिकसुखापनप्रवर्तनीयमितिकिंवक्तव्यमित्युक्तंभवति १ तर्हिदेहयात्राकथंकारंवर्त्तेतइ
त्यतोऽजगरादुपात्तबुद्धिमाह ग्रासमिति दिष्टेन दैवेनदैवंदिष्टंभागधेयमित्यभिधानं ग्रासस्तुकवलार्धकइतिच विसृष्टंदत्तंयदृच्छयैवापतितंअतार्कितत्वेनोपपन्नं अक्रियःयत्नरहितः अजगरोयथाअ
क्तथामुनिरितिशेषः २ ननुयदृच्छयापिग्रासालाभेकिंकुर्यात्तत्राह । शयीतेवि अनुपक्रमःक्रियारंभरहितः यदि यदृच्छयापिग्रासोनोपनयेत् तर्हिमहाहिरिव बहून्यहानिशयीत तत्रनिमित्तं दिष्टभुगि
ति यदृच्छाप्राप्तभोगत्वादित्यर्थः ३ ननुतद्भक्षबलस्यदेहस्यान्नाभावेपतनंस्यादित्याशंक्य सत्यंबहिर्मुखस्यैतन्नयोगारूढस्यत स्वभगवद्गुणगणामृतध्यानलक्षणपानपूर्णबलवद्देहत्वादितिभावेनाह ओजइ
ति करचरणादींद्रियशक्तिमानपियोगारूढः शरीरयात्रार्थंनेहेतनचेष्टेत कीदृशःशयानः सर्वप्रवृत्तिशून्यः तर्हिनिद्रालुःस्यादत्राह वीतनिद्रइति निद्रानिरासव्यापारसद्भवादित्याह बिभ्रदिति
अत्रभरणेनध्यानंलक्षयति ओजः सहोबलात्मनाब्रह्मणायुक्तंदेहंबिभ्रत्ध्यायन्अन्यत्रतादृशादृष्टानिर्मितं ईशशक्तेरचिंत्यत्वादित्यर्थः अतएवाकर्मकंनिश्चेष्टंउद्देश्यरहितंवा ४ समुद्राच्छिक्षितांमतिमा
ह मुनिरिति अनंतपारः अंतपाररहितबुद्धिःअनंतेनपारःपूर्तिस्तृप्तिलक्षणायस्यसतथेतिवा पारंतीरांतरंमोक्तंपारःपूर्तिस्तथापुमानित्यभिधानं अन्यत्रानिश्चिततीरांतरः स्तिमितोदोनिश्चलजलः

ब्राह्मणउवाच ॥ सुखमैंद्रियकंराजन्स्वर्गेनरकएवच ॥ देहिनांयद्यथादुःखंतस्मान्नेच्छेततद्बुधः १ ग्रासंविसृष्टंदिष्टेनमहांतंस्तोकमेवच ॥ यदृच्छयैवापतितं
ग्रसेदजगरोऽक्रियः २ शयीताहानिभूरीणिनिराहारोनुपक्रमः ॥ यदिनोपनमेद्ग्रासोमहाहिरिवदिष्टभुक् ३ ओजःसहोबलयुतंबिभ्रद्देहमकर्मकम् ॥
शयानोवीतनिद्रश्चनेहेतेंद्रियवानपि ४ मुनिःप्रसन्नगंभीरोदुर्विगाह्योदुरत्ययः ॥ अनंतपारोह्यक्षोभ्यस्तिमितोदइवार्णवः ५ समृद्धकामोहीनो
वानारायणपरोमुनिः ॥ नोत्सर्पेतनशुष्येतसरिद्भिरिवसागरः ६ दृष्ट्वास्त्रियंदेवमायांतद्भावैरजितेंद्रियः ॥ प्रलोभितःपतत्यंधेतमस्यग्नौपतंगवत् ७

निर्विकल्पकर्मावा ५ समृद्धकामःसमृद्धाभीष्टार्थःनोत्सर्पेतउत्सिक्तोनभवेतहीनोवाद्रव्यैरितिशेषः नशुष्येतयथाग्रावृषिसमुद्रः समृद्धजलाभिःग्रीष्मेशुष्कजलाभिःसरिद्भिः ६ शलभाच्छिक्षितांबुद्धि
माह दृष्ट्वेति । देवस्यमायांमोहकशक्तिं भावैःशृंगारचेष्टाभिः अत्र । महतांवनितानामःपतत्यंधेतमस्यलं । अन्यत्रानिरयंयातिदुःखवान्स्याद्विपर्ययइतिवचनात् । अधःपातेविशेषोस्तीतिज्ञातव्यंमा
यांशब्दस्यैंद्रजालार्थमंतरेणमोहकारणत्वार्थःकथमित्येतच्चोद्यं मोहकारणभूतांमायेत्याहुर्मनीषिणः । अविद्यमानंमेत्युक्तंतज्ज्ञापयतियत्स्वयं । कुत्रचिज्ज्ञानरूपंसल्लाभरूपंचभण्यते । मयंप्राचुर्यमुद्दिष्टंमाया
स्यात्मचुरेत्यपीत्यनेनपरिहर्तव्यं । तस्माद्याविवक्षितातामनुसृत्यार्थोवक्तव्यइतिज्ञायते ननुतर्हिमायाशब्दस्यानेकार्थवृत्तित्वात्कुत्रमुख्यार्थइतीयंशंका स्वतंत्रंपरमार्थाख्यंस्वतंत्रैकाहरेर्मतिः सैवमाया
समुद्दिष्टामुख्यतस्तत्स्वरूपिका । इत्यनेनपरिहर्तव्या परमार्थनिष्ठस्यस्वतंत्रशब्दस्यगुणनिष्ठत्वंकथमित्येतत् । मतिमन्मतिभेदोपिनाविष्णोःक्वचिद्दिष्यतेइत्यनेनपरिहृतं मायायाःईशेच्छावाचित्वेजगत
ष्तन्मयत्वंकथमिति इदमपि पारमार्थ्येननास्त्येवतदन्यत्तद्वशंयतः । अनाद्यनंतकालेपिविद्यमानमपिध्रुवं । अतोमायामयंप्राहुःसर्वतद्वशगंयतः । इतिअमुनापरिहृतं किंच विश्वस्यपराधीनत्वादसदादिश
शब्दवाच्यत्वं नत्वविद्यमानत्वात्तर्हिजमत्रास्त्येवेतिकथं अस्वतंत्रत्वादित्युत्तरं प्रवाहरूपेणानित्यत्वात्सदातनत्वंयुक्तं श्रौतत्वाद्विश्वस्यमिथ्यात्वंकिंनस्यादितिचेन्न हरेरिच्छाधीनत्वान्मायामात्रत्वात्त

१ माङ् माने इति धातोर्माशब्दस्य ज्ञानरूपत्वमुच्यते । यात्रापणे इति धातोर्यांशब्दस्यप्राप्यमित्यर्थः माया चासौयाचेतिसमासउक्तार्थः

र्हिश्रुतेःकागतिरितिचेन्नएकस्यैवपरमार्थत्वादितिसर्वप्रमाणसिद्धं स्वाधीनंसदितिप्रोक्तंपराधीनमसत्स्मृतं। अविद्यमानमेतस्माज्जगदाहुर्विपश्चितः। अनाद्यनंतकालेषुविद्यमानमपिध्रुवं। अस्वातंत्र्यात्तुना स्त्येवेत्येवंवाच्यंजगत्सदा सदावृत्तेर्विद्यमानमितिब्रूयाद्यदिक्वचित्। तथापिनाशवद्धीदंप्रवाहाद्धचस्यनित्यता अतोनिवर्त्यमित्याहुःप्रपंचोह्यस्तियद्यपि विष्णोरिच्छवशत्वाच्चमायामात्रमितिस्फुटं परमार्थचै कमेवस्वातंत्र्याद्विष्णुमव्ययं यदिकल्पयतीदंयःसएवविनिवर्तयेत् विष्णुस्तस्मात्तद्वशत्वान्नास्तीतिद्वैतमुच्यते स्वातंत्र्येणहरौज्ञातेपराधीनत्वनिश्चयात् इत्याहुरुपदेष्टारआचार्यास्तत्त्ववेदिनः यथैवराज निज्ञातेनान्योस्तीतिस्फुटंवचः स्वातंत्र्यात्पारतंत्र्याच्चतद्वृत्यादिषुसत्स्वपि यथैकच्छत्रवांश्चैवएकवीरइतीववा तथैवसर्वप्राधान्यादद्वितीयोहरिःस्मृतः एवंमुक्ताविजानंतिसायुज्येप्रापितविभोः अनंतकालंव श्यंतोजगदेतच्चराचरं तस्यैकस्यह्यविज्ञानात्केवलंभ्रांतिरूपकं जगदुक्त्वातमोयांतित्वीशितव्येशशापतः इति अनेनप्रपंचोयादिविद्येतेत्यादिश्रुतिरपिविवृतासत्यत्वार्थे पुत्रामेयदिविद्येतेमरिष्यंत्येवतेध्रुवं य दिराज्यंकरोत्येषनश्यत्येतदसंशयमितिधृतराष्ट्रस्यवचनाद्यदिशब्दस्यविपर्ययपर्यवसानेवस्तुत्वार्थःप्रतीयते तथात्रापि यदिशब्दस्त्ववस्तुत्वेअस्वातंत्र्येचसंशये अवस्तुशब्दश्चाशक्तेह्यल्पशक्तौचकीर्त्यतइ

योषित्सुतल्पाभरणांबरादिद्रव्येषुमायारचितेषुमूढः ॥ प्रलोभितात्माह्युपभोगबुद्ध्यापतंगवन्नश्यतिनष्टदृष्टिः ८ स्तोकंस्तोकंग्रसेद्ग्रासंदेहोवर्तेतयावता ॥
गृहाद्व्रजेत्समातिष्ठन्वृत्तिंमाधुकरींमुनिः ९ अणुभ्यश्चमहद्भ्यश्चशास्त्रेभ्यःकुशलोनरः ॥ सर्वतःसारमादद्यात्पुष्पेभ्यइवषट्पदः १० सायंतनं
श्वस्तनंवानसंगृह्णीताभिक्षितम् ॥ पाणिपात्रोदरामत्रोमक्षिकेवनसंग्रही ॥ मक्षिकाइवसंगृह्णन्सहतेनविनश्यति ११ पदापियुवतींभिक्षुर्नस्पृशेद्दारवीम
पि ॥ स्पृशन्करीवबध्येतकरिण्याअंगसंगतः १२ नाधिगच्छेत्स्त्रियंप्राज्ञःकर्हिचिन्मृत्युमात्मनः ॥ बलाधिकैःसहन्येतगजैरन्यैर्गजोयथा १३ नदेयंनो
पभोग्यंचलुब्धैर्यद्दुःखसंचितम् ॥ भुंक्तेस्वमपितच्चान्योमधुहेवार्थविन्मधु १४ सुदुःखोपार्जितैर्वित्तैराशासानांगृहाशिषः ॥ मधुहेवाग्रतोभुंक्तेयतिर्वैगृह
मेधिनाम् १५ ग्राम्यगीतंनशृणुयाद्यतिर्वनचरःक्वचित् ॥ शिक्षेद्धरिणाद्बद्धान्मृगयोर्गीतमोहितात् १६

त्यनेनयदिशब्दस्यावस्तुत्वार्थोपिज्ञायते ७ प्रागुक्तश्लोकार्थमेवविवृणोति योषित्स्विति मायारचितेषुभगवदिच्छारचितेषुभोगसाधनेषुतल्पादिषुयोषिज्जनेषूपभोगबुद्ध्याविषयभोगसाधनबुद्ध्यामलोभि तात्माविवशमनाःशलभवन्नश्यतीत्यन्वयः ८ मधुकरशिक्षितमतिमुपदिशति स्तोकमिति मधुकरस्यविद्यमानांवृत्तिंसमातिष्ठन्मुनिर्गृहान्व्रजेदित्यन्वयः ९ अत्राणुत्वमहत्त्वेसंख्ययोच्यतेनत्वर्थतःसारंभ गवज्ज्ञानजननींभक्तिम् १० भिक्षितंभिक्षयालब्धमन्नंसायंतनंसायंतनार्थंश्वस्तनंश्वस्तनार्थंचनसंगृह्णीत कथंतर्हिभोजनमत्राह पाणीति पाणिपात्रत्वेनोदरमात्रत्वेनवाभुंजानइतिशेषः संग्रहेकोदोषइत्यत्राह मक्षिकाइति तेनधनेनसहविनश्यतिचोरादिनेतिशेषः ११ गजादिकमुपात्तमत्राह पदोति करिण्याअंगसंगतःस्पृशन्करीवबध्यते १२ एतदेवाविवृणोति नाधिगच्छेदिति १३ मधुहनोपिकाबुद्धिरार्जितेति तत्राहनदेयमिति लुब्धैर्यद्दुःखेनसंचितंनदेयं दानयोग्यंन नोपभोग्यंस्वस्योपयोग्यंचन तत् स्वंवित्तमर्थविदन्योभुंक्ते कथमिव मधुहामकरंदसंग्रहीमधुवत् १४ किमनेनात्मनोलब्धमत्राह सुखदुःखेति य तिर्जितेंद्रियग्रामः १५ हरिणाच्छ्रोत्रेंद्रियजयोलब्धइत्याह ग्राम्येति अहंवनचरोयतिर्ग्राम्याणांगीतंवचनंनशृणुयादितीममर्थंहरिणात्शिक्षे कीदृशात् मृगयोगीतमोहितत्वेनबद्धात् १६

ग्राम्यगीतश्रवणेकाहानिरिति तत्राह नृत्येति क्रीडनकांधःक्रीडासाधनवदंधः १७ मत्स्याञ्जिह्वाद्रयजयमकारकथयात जिह्वयात अतद्बुद्धरतत्त्वज्ञः १८ रुजयादुष्पारहारइत्युपपादयातइद्र
याणीति रसनंरसनेंद्रियंअसौरसनारस्येस्वविषयेवर्धते १९ जिह्वेंद्रियजयएवेंद्रियजयो नान्यइत्याह तावदितिरसोरागः रसोरागेविषेवर्यैइतियादवः २० पिंगलायावैराग्यमुपशिक्षितमितिवक्तुमुपक्रम
ते पिंगलेति २१ सैकदासंकेतेवित्तसमयेकांतमुपनेष्यतीआत्मसमीपंप्रापयंतीगृहद्वारंभूदित्यन्वयः २२ मार्गआगच्छतःपुरुषान्वीक्ष्य तान्पुरुषान्वित्तवतःशुल्कदान्कांतान्मने २३ अस्मादन्योभूरि
दोबहुद्रव्यप्रदःस्यादितिमत्वा २४ २५ वित्ताशयावित्तातितृष्णयाचिंतायाश्छेदनहेतोःशस्त्रम् २६ यथागीतंतथाममसकाशाच्छृणु २७ श्रोतव्यत्वेहेतुमाह निर्वेदइति यथानशितोसिःपाशानांछेदनहे
तुर्विहितःतथानिर्वेदस्तृष्णालक्षणपाशानांहियस्मात्तस्मात् अत्रापिहेत्वंतरमाह नहीति २८ वितंतिर्विस्तारःबालिशायेनतस्मात् २९ कथंबालिशेत्यत्राह संतमिति नित्यमविनाशिनम् ३० आत्मामनः

नृत्यवादित्रगीतानिजुषन्ग्राम्याणियोषिताम् ॥ आसांक्रीडनकांधःस्याद्दष्यशृंगोमुनिर्यथा १७ जिह्वयाथप्रमाथिन्याजनोरसविमोहितः ॥ मृत्युमृ
च्छत्यतद्बुद्धिर्मीनस्तुबडिशैर्यथा १८ इंद्रियाणिजयंत्याशुनिराहारामनीषिणः ॥ वर्जयित्वातुरसनमसौरस्येहिवर्धते १९ तावज्जितेंद्रियोनस्या
द्विजितान्येंद्रियःपुमान् ॥ नजयेद्रसनंयावज्जितंसर्वंजितेरसे २० पिंगलानामवेश्यासीद्विदेहनगरेपुरा ॥ तस्यामेशिक्षितंकिंचिन्निबोधनृपसत्तम २१
सास्वैरिण्येकदाकांतंसंकेतउपनेष्यती ॥ अभूत्कालेगृहद्वारिबिभ्रतीरूपमुत्तमम् २२ मार्गआगच्छतोवीक्ष्यपुरुषान्पुरुषर्षभ ॥ ताञ्छुल्कदा
न्वित्तवतःकांतान्मेनेर्थकामुका २३ आगतेष्वपयातेषुसासंकेतोपजीविनी ॥ अथान्योवित्तवान्कोपिमामुपेष्यतिभूरिदः २४ एवंदुराशयाध्वस्तनिद्राद्वा
र्यवलंबिनी ॥ निर्गच्छंतीप्रविशतीनिशीथंसमपद्यत २५ तस्यावित्ताशयाशुष्यद्वक्त्रायादीनचेतसः ॥ निर्वेदःपरमोजज्ञेचिंताहेतिःसुखावहः २६ तथा
निर्विण्णचित्तायार्गीतंशृणुयथाममं २७ निर्वेदआशापाशानांपुरुषस्ययथाह्यसिः ॥ नह्यंगाजातनिर्वेदोदेहबंधंजिहासति २८ ॥ पिंगलोवाच ॥ अहो
मेमोहवितंतिंपश्यताविजितात्मनः ॥ याकांतादसतःकामंकामयेयेनबालिशा २९ संतंसमीपेरमणंरतिप्रदंवित्तप्रदंनित्यमिमंविहाय ॥ अकामदंदुःख
भयादिशोकमोहप्रदंतुच्छमहंभजेऽज्ञा ३० अहोमयात्मापरितापितोद्यथासांकेत्यवृत्त्यातिविगर्ह्यवार्तया ॥ स्त्रैणान्नरांश्चार्थदृषाऽनुशोच्यान्क्रीत्वाहि
वित्तंरतिमात्मनेच्छती ३१ यदस्थिभिर्निर्मितवंशवंश्यस्थूणंत्वचारोमनखैःपिनद्धम् ॥ क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णंमदुपैतिकाऽन्या ३२ विदेहानां
पुरेह्यस्मिन्नहमेकैवमूढधीः ॥ यान्यमिच्छंत्यतःस्वस्मादात्मदात्कांतमच्युतात् ३३

अतिगर्ह्यावार्तांकिवदंतीयस्याःसातथातयासंकेतस्यभावःसांकेत्यं द्रव्यंतेनवृत्तिराजीविकातयायथाहंवित्तमुद्दिश्यआत्मनादेहेनअर्थदृषाविषयतृष्णयाअनुशोच्यान्स्त्रैणान्नरान्क्रीत्वा रतिमिच्छंत्यासं त
थेतिशेषः ३१ यदर्थंग्राम्यमाकांक्षंतेतदीदृशंहीत्याह यदिति त्वचारोमनखैरित्येकंपदंस्थूणाःस्तंभाःमदन्याकीदृशीएतद्देहाख्यमगारंगृहमुपैतीन्यन्वयः वंशाःदीर्घदारुविशेषाःवंश्यावंशप्रोतास्तिरश्चीनवे
णवःक्षरंतिस्रवंतिनवद्वाराणियस्यतत्तथाअनेनान्यकांतानांहियत्वमुक्तंभवति ३२ इतोपिहेयाइतिभावेनाह विदेहानामिति स्वस्मात्स्वकीयात्स्वस्वामिनइत्यर्थः अतोजगतःअतोन्यस्माद्भिन्नादित्यर्थः
अनिषेधेपुमान्विष्णाविति यादवः यद्वाऽतोस्मात्सर्वमनोवृत्तिप्रेरकत्वेनप्रसिद्धात् ३३

योयंसुहृत्प्रेष्ठतमोनाथतेऽयैश्वर्येणवर्ततइतिनाथःशरीरिणामात्मानियंताचतमात्मनामनसैवविक्रीयानेनाच्युतेनसह इयंपिंगलासामान्यावेश्यानभवति किंतुविशिष्टाप्सरःस्वेका अन्यथा अस्या नैतादृशीबुद्धिरुत्पद्यते तदुक्तं भगवद्भार्यतायोग्याःकाश्चिदप्सरसःस्त्रियः । रमावेशात्कदाचित्स्युस्तास्वेकापिंगलाभवेत् । तदन्यासांमहादोषोभगवद्भर्तृतास्मृतावितिं ३४ लोकसिद्धकांतत्यागे लोकविलक्षणकांतस्वीकारेअलंबुद्धिगोचरकामादानृत्वमाद्यंतवत्त्वंचानिमित्तमित्याह कियदिति तेनराभार्यायामेकियत्प्रियंव्यभजन्विभजेयुरित्यन्वयः तर्हिदेवाःकांताःसंतीत्यत्राह देवाइति ३५ विश्वबंधविध्वंसिनिभगवतिप्रसन्नेकिमसुलभमितिभावेनाह नूनमिति नूनमिदानीम् ३६ समुद्भूतप्रभूतभगवद्भक्तिसुधापिंगलापुनःशब्दादिविषयनिमित्तक्लेशामाभूवन्निति प्रार्थयते मैवमिति येननिर्वेदेनसंसारबंधंनिर्हृत्यपरिहृत्यशमंभगवन्निष्ठालभ्यंसच्चिदानंदलक्षणंसर्वविलक्षणंब्रह्मप्राप्नोतीत्यन्वयः कुतोमाभूवन्निति अतोवाह येनेति पुरुषोनुबंधंभगवद्भक्तीनिर्हृत्यभस्मकृत्वाशमंशमलंसुखो

सुहृत्प्रेष्ठतमोनाथआत्माचायंशरीरिणाम् ॥ तंविक्रीयात्मनैवाहंरेमेऽनेनयथारमा ३४ कियत्प्रियंतेव्यभजन्कांतामेकामदानराः ॥ आद्यंतवंतोभार्याया देवावाकालविद्रुताः ३५ नूनंमेभगवान्प्रीतोविष्णुःकेनापिकर्मणा ॥ निर्वेदोयंदुराशायायन्मेजातःसुखावहः ३६ मैवंस्युर्मंदभाग्यायाःक्लेशानिर्वेदहेतवः ॥ येमानुबंधंनिर्हृत्यपुरुषःशममृच्छति ३७ तेनोपकृतमादायशिरसाग्राम्यसंगताः ॥ त्यक्त्वादुराशाःशरणंव्रजामितमधीश्वरम् ३८ संतुष्टश्रद्दधत्येतद्यथालाभेनजीवती ॥ विहराम्यमुनैवाहमात्मनारमणेनवै ३९ संसारकूपेपतितंविषयैर्मुषितेक्षणम् ॥ ग्रस्तंकालाहिनात्मानंकोन्योस्माद्रातुमीश्वरः ४० आत्मैवह्यात्मनोगोप्तानिर्विद्येतयदाखिलात् ॥ अप्रमत्तइदंपश्येद्ग्रस्तंकालाहिनाजगत् ॥ ४१ ॥ ब्राह्मणउवाच ॥ एवंव्यवसितमतिर्दुराशाःकांततर्षजाः ॥ छित्त्वोपशममास्थायशय्यामुपविवेशसा ४२ आशाहिपरमंदुःखंनैराश्यंपरमंसुखम् ॥ यथासंछिद्यकांताशांसुखंसुष्वापपिंगला ॥ ४३ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेपिंगलागीतेऽष्टमोध्यायः ॥ ८ ॥ ब्राह्मणउवाच ॥ परिग्रहोयंदुःखायद्यत्प्रियतमंनृणाम् ॥ अनंतसुखमाप्नोतितद्विद्वान्यस्त्वकिंचनः १ सामिषंकुररंजघ्नुर्बलिनोयेनिरामिषाः ॥ तदामिषंपरित्यज्यससुखंसमविंदत २ नमेमानावमानौस्तोनचिंतागेहपुत्रिणाम् ॥ आत्मक्रीडआत्मरतोविचरामीहबालवत् ३ द्वावेवचिंतयामुक्तौपरमानंदआप्लुतौ ॥ योविमुग्धोजडोबालोयोगुणेभ्यःपरंगतः ४

परमंनरकमृच्छतीतिएतस्मादितिशेषः ३७ तन्निष्ठामाह तेनेति तेनहरिणाउपकृतमनुगृहीतंनिर्वेदंशिरसादायग्राम्यसंगतादुराशाःत्यक्त्वा ३८ एतदत्यंतंश्रद्दधतीश्रद्दधाना ३९ अस्मादन्यःकःआत्मानंत्रातुं मुषितेक्षणंनष्टज्ञानम् ४० आत्मनःस्वस्यगोप्तात्मापरमात्मैव यदाखिलान्निर्विद्येततदेतज्जगत्कालाहिनाग्रस्तंपश्येत् ४१ कांततर्षजाःकांततृष्णाजाताः ४२ इममितिहासंश्रद्धापयति आशेति ॥ ४३ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेविजयध्वजकृतटीकायांअष्टमोध्यायः ॥ ८ ॥ तिरश्चीनात्कुरराख्यखगात्किंविशिष्टंज्ञानंशिक्षितमत्राह परिग्रहइति नृणांप्रियतमंयद्यद्वित्तंतस्य परिग्रहःतस्यवित्तस्यांततोनाशादुःखायभवति १ ततःकिंफलितमत्राह तदिति तत्तस्मात्योविद्वान्सोकिंचनोभवेदिममर्थंचित्तीकरोतीति सामिषमिति २ तज्ज्ञानफलमाह नमइति इहपुत्रवतांयावित्तैषणादिचिंतासापिनास्ति ३ ननुतर्हिकीदृशस्यचिंतानास्तीत्यत्राह द्वाविति गुणेभ्यःसत्वादिभ्यःपरंविलक्षणंईश्वरंगतोज्ञातःपरमात्मगुणामृतमनुभवन्नित्यर्थः ४

कुमार्यास्तिशिक्षितज्ञानमाह क्वचिदिति वृण्वानान्वरणेच्छून्अर्हणमभ्यागतपूजनम् ५ शालीन्कलमान्दृषदं व्रीहकुट्टपाषाण शालयःकलमाद्याश्चषष्टिकाद्याश्चपुंस्यमात्यमरः यथामहत्परिमाणं भवतितथास्वनंचक्रुरितिक्रियाविशेषणम् ६ महतीविवाहोत्सवेवर्तमानात्तद्योग्येत्यर्थःअभ्यागतसमयेव्रीहिताडनंदारिद्र्यसूचकमिति व्रीडितालज्जिता ७ घोषोऽवघ्नंत्याइत्यस्यांधिकार्येणा भ्यागतैःशंखस्वनोनश्रुतइतिसूच्यते संधिश्चविवक्षावशात्क्रियतइतिवैयाकरणैरुक्तत्वाच्च निरभिनत्निरभिदत् ८ इदंकथंसंभाव्यतइत्यत्राह लोकानिति ९ एकाकित्वस्यविपक्षेबाधक माह वासइति अत्रदुर्जनैःसहवासोनिषिध्यतेनतुसाद्धिःतस्यविहितत्वात् असज्जनैःस्तुसंवासोनकर्तव्यःकथंचन । यावद्यावच्चबहुभिःसज्जनैःसतुमुक्तइ इतिवचनात् १० इषुकाराच्छिक्षितबुद्धि प्रकारमाह मनइत्यादिना एकत्रपरमात्मनिब्रह्मणि ११ मनोयोजनेनकिंफलंयेनावश्यकर्तव्यंस्यादत्राह यस्मिन्निति यन्मनोदुष्कर्मरेणून्मुंचति तद्ब्राह्ममचिन्मनोनिर्वाणंनाशमुपैति कथमिव अनिंधनंज्योतिरिवेतिलुप्तोपमं । बाह्यमनोविलीनंस्यान्मुक्तौचिन्मात्रकंमनः । तेनैवानुभवेत्सर्वंस्वात्माभिन्नेनमुक्तिगमितिवचनात् बाह्यमेवनश्यतिनचिन्मात्रंतन्नाशेविषयानुभावोक्तिर्विरुध्येतेति

क्वचित्कुमारीत्वात्मानंवृण्वानान्गृहमागतान् ॥ स्वयंतानर्हयामासक्वापियातेषुबंधुषु ५ तेषामभ्यवहारार्थंशालीन्दृषदिपार्थिव ॥ अवघ्नंत्याःप्रकोष्ठस्था श्चक्रुःशंखाःस्वनंमहत् ६ सातंजुगुप्सितंमत्वामहतीव्रीडितातताः ॥ बभंजैकैकशःशंखान्द्वौद्वौपाण्योरशेषयत् ७ उभयोरप्यभूद्घोषोऽवघ्नंत्याःस्मशंखयोः ॥ तत्राप्येकंनिरभिनदेकस्मान्नभवेद्ध्वनिः ८ अन्वशिक्षमिमंतस्याउपदेशमरिंदम ॥ लोकाननुचरन्नेताँल्लोकतत्त्वविवित्सया ९ वासोबहुनांकलहोभवेद्वार्ताद्वयो रपि ॥ एकएवचरेत्तस्मात्कुमार्याइवकंकणः १० मनएकत्रसंयुञ्ज्याज्जितश्वासोजितासनः ॥ वैराग्याभ्यासयोगेनध्रियमाणमतंद्रितः ११ यस्मिन्मनो लब्धपदंयदेतच्छनैःशनैर्मुंचतिकर्मरेणून् ॥ सत्वेनवृद्धेनरजस्तमश्चविधूयनिर्वाणमुपैत्यनिंधनम् १२ तदेवमात्मन्यवरुद्धचित्तोनवेदकिंचिद्बहिरंतरंवा ॥ यथेषुकारोनृपतिंव्रजंतमिषौगतात्मानददर्शपार्श्वे १३ एकचार्यनिकेतःस्यादप्रमत्तोगुहाशयः ॥ अलक्षमाणआचारैर्मुनिरेकोल्पतोषणः १४ गृहारं भोहिदुःखायविफलश्चाध्रुवात्मनः ॥ सर्पःपरकृतंवेश्मप्रविश्यसुखमेधते १५ एकोनारायणोदेवःपूर्वसृष्टंस्वमायया ॥ संहृत्यकालकलयाकल्पांतइदमी श्वरः १६ एकएवाद्वितीयोभूदात्माधारोऽखिलाश्रयः ॥ कालेनात्मानुभावेनसाम्यंनीतासुशक्तिषु १७

१२ अचिन्मनोनाशानंतरं चिन्मनसाध्यानप्रकारमाह तदेवमिति अनिकेतनत्वेनएकत्वेनचसंचरणंदुःखहेतुकर्मानारंभश्चसर्पाच्छिक्षितमित्याह एकचारीति अत्रएकचारित्वादिकंविधेयंनतु विशेषणं गुहायांहृत्कमलमध्येगूढायांपरदेवतायां आशयोंतःकरणंयस्यसतथा निरंतरंभगवदुपासनापरइत्यर्थः अल्पेनाशनादिनातोषणंतृप्तिर्यस्यसतथा १४ अध्रुवात्मनःअनित्यदेहस्यजी वस्य अत्रलुप्तोपमामाह सर्पइति । अनेननिवासोपायोऽपिदर्शितइति १५ उर्णनाभेरुपशिक्षितमाह एकइति । एकःकेवलःनिरपेक्षःनारायणोदेवःस्वमायायास्वेच्छयाकल्पांतेकालकलयासं हारकांशेनपूर्वसृष्टमिदंजगत्संहृत्यएकत्वसंख्याविशिष्टोभूत् १६ कालादीनांतदासत्त्वात् कथमिदमुपपद्यतेइतितत्राह अद्वितीयइति । एतादृशोन्योनास्तीत्येवोच्यतेनतुसर्वात्मनासर्वनिषेधेनतथा सतिसर्वस्यतेनैक्यंउपपन्नंस्यान्नचतद्युक्तम् कुतोत्राह अखिलाश्रयइति नह्याधाराधेययोरेकत्वंक्वापिदृष्टचरम् नन्वेतदृष्टांतेनतस्याधारांतरकल्पनंस्यादत्राह आत्माधारइति नन्वेतद्युक्तिविरुद्धमत्राहई श्वरइति । एतदेवविवृणोति कालेनेति । आत्मनःस्वस्यानुभवेनतत्तत्कालोचितसृष्ट्यादिभावसूचकेनकालेनतदंतर्यामिणासत्त्वादिगुणवाच्यासुशक्तिषुसाम्यंसाम्यावस्थांनीतासुसतीषुप्रधानपु

रुषयोर्ब्रह्मसरस्वत्योरीश्वरः आदिपुरुषः परावराणांकार्यकारणानांपरमोव्यापारमंतरेणास्ते तद्गतिंकिंनामेत्यत्राहकैवल्येति । समाधिकरहितइति सत्वादिगुणानांशक्तिशब्दवाच्यत्वेकिंप्रमाणमित्येनच्चोच्यम् प्रकृतिश्चगुणाश्चैवशक्त्यत्वाच्छक्तयः स्मृताः । विष्णोःस्वरूपभूतातुशक्तनाच्छक्तिरुच्यते इत्यनेनपरिहृतमितिज्ञातव्यम् । कालप्रकृत्यादिप्रवर्तनोदासीनत्वाभिप्रायेणैकइतिवापुनरुक्तम् । कालप्रकृतिजीवादौलयेसत्यप्रवर्तनात् । तन्निमित्तस्यकार्यस्यविष्णुरेकइतीर्यते सहिकालादिकंसर्ववर्तयत्यमितद्युतिरितिवचनात् १७ १८ संहारप्रकारमुक्त्वातस्मात्सृष्टिप्रकारमाह केवलेति । निरुपाधिकोजडदेहरहितः कालेनकालांतर्यामिणाआत्मनःस्वस्मात्अनुभावोजन्मव्यक्तिर्यस्यसतथा तेनस्वमायांस्वाधीनप्रकृतिंसंक्षोभयन्सृष्ट्यभिमुखींकुर्वन्तयाप्रकृत्यासूत्रप्राणंब्रह्माणंचसृजतिमायायाःस्वरूपमाहतामिति । विश्वतोमुखंसर्वदिक्षुयथामुखंभवतितथासृजतीं यस्मिन्प्रकृतिस्वरूपेयेनप्रधानेन प्रकृतौविलीनःसंसारमेतीतिश्रुतेः । कालेनसृष्ट्युपाहितेननैतावतासापेक्षत्वम् । आत्मानुभावेनस्वसामर्थ्येनेतिवा १९ २० अत्रोदाहरति । यथेतिउर्णालालांवक्त्रतोमुखेनसंतत्यविस्तृत्ययथायथेच्छम् २१ पेशस्कृतःशिक्षितांबुद्धिमाह यत्रेति । देहीयत्रयत्रस्नेहसंक्लिन्नधियामनोधारयेत्तत्तत्सरूपतांतस्यतस्यसदृशरूपतांयाति अत्रेदंतात्पर्यस्निग्धयाधियाध्यायतिचेत्स्निग्धरूपंसुखरूपंयाति द्वेषधियाचिंतयतिचोद्विष्टरूपंदुःखरूपंयातीत्यादियोज्यम् । तदुक्तं भयादपिहरिंभक्त्याचिंतयंस्तत्सरूपताम् । पेशस्कारिवदायातिद्विषन्द्वेषस्वरूपतामिति । द्विषन्प्रीताविधातोःसुखरूपस्यापिहरेर्द्वेषस्यदुःखरूपत्वात्तत्स्वरूपतांयातीतियुक्तम् । सुखरूपस्यविद्वेषोदुःखरूपइतीर्यते । तस्माद्दुःसंसदायातिद्वेषवान्पुरुषोत्तमइतिच । रावणा

सत्त्वादिष्वादिपुरुषःप्रधानपुरुषेश्वरः ॥ परावराणांपरमआस्तेकैवल्यसंज्ञितः १८ केवलानुभवानंदसंदोहोनिरुपाधिकः ॥ कालेनात्मानुभावेनस्वमायां त्रिगुणात्मिकाम् १९ संक्षोभयन्सृजत्यादौतयासूत्रमरिंदम ॥ तामाहुस्त्रिगुणांव्यक्तिंसृजतींविश्वतोमुखम् ॥ यस्मिन्प्रोतमिदंविश्वंयेनसंसरतेपुमान् २० यथोर्णनाभिर्हृदयादूर्णांसंतत्यवक्त्रतः ॥ तथाविहृत्यभूयस्तांग्रसत्येवंमहेश्वरः २१ यत्रयत्रमनोदेहीधारयेत्सकलंधिया ॥ स्नेहाद्द्वेषाद्भयाद्वापियातितत्तत्सरूपताम् २२ कीटःपेशस्करंध्यायन्कुड्यांतेनप्रवेशितः ॥ यातितत्साम्यतांराजन्पूर्वरूपमसंत्यजन् २३ एवंगुरुभ्यएतेभ्यएषामेशिक्षितामतिः ॥ स्वात्मोपशिक्षितांबुद्धिंशृणुमेवदतःप्रभो २४

दीनांरामादिद्वेषान्निर्दुःखानंदभगवत्स्वरूपप्राप्त्युक्त्यासुखावाप्तिरितिश्रुतेःकागतिरितिचेदुच्यते तत्ररक्षोरूपादीनांद्वेषाद्दुःखावाप्तिर्जयादीनामेवतत्स्वरूपप्रवेशेनसुखावगतिः । नृसिंहद्वेषतोदुःखंरक्षोरूपेणरावणः । अगाच्चरामविद्वेषाच्छिशुपालस्तथैवच । ततोभक्त्यापरंयातोद्वेषरूपात्तमोगतिरिति । तस्मात्सर्वगुणोद्रेकिविद्वेषासर्वदोषवान् भवेदितिसरूपत्वंद्वेषादेःपुरुषस्यहीतिमानात् । यथोपासनंफलानवाप्तौश्रुतिव्याकोपश्चस्यात् । तंयथायथोपासतेतदेवभवतीतितंभूरितिदेवाउपासांचक्रिरेतेबभूवुस्तस्माद्वाप्येतर्हिसुप्तोभूर्भूरित्येवप्रश्वसित्यभूतिरित्यसुरास्तेहपराबभूवुरित्यादिश्रुतेः२२ अत्रोदाहरति कीटइतिननुभवदिष्टार्थेविषममुदाहरणंद्वेषात्तत्समताप्राप्त्यवगमादुच्यतेमहंभोजनंदास्यतीतिस्नेहस्यबाहुल्येनक्रमेणाल्पस्यद्वेषस्यसर्वात्मनानिवर्तनेनस्नेहस्यप्रवर्धनेनचतत्समतावाप्तिरिति सत्यप्यल्पविद्वेषेभोजनंदास्यतीतितु । स्नेहबाहुल्यतःकीटःपेशस्कारिसमोभवेत् । द्वेषसर्वात्मनानष्टेस्नेहेचैवविवर्धति । सरूपतातदैवस्यात्कीटस्यैवंहरेरपीति किंच हरेःफलदातृत्वविशेषात्पेशस्कृतस्तदभावादल्पद्वेषोपिहरेःप्रसादाजनकइत्यनयोर्नसर्वसाम्यंलोकेचतथादर्शनात् अत्यल्पोपिहरेर्द्वेषःस्नेहस्यानुदयंकरः । सोयंविशेषोनान्यस्यफलदाताचकेशवः । नहिपेशस्कृतःकिंचित्फलदातृत्वमिष्यते स्वातंत्र्याद्विद्विषांचैवकेशवोनसुखप्रदइतिवचनात् २३ उपसंहरति एवमिति स्वदेहाच्छिक्षितमतिमाह स्वात्मेति २४

देहोममगुरुरित्यवेहीत्यन्वयः कुतोत्राह विरक्तीति सत्वंबन्धज्ञानसमाहारोनिधीयतेस्मिन्परमेश्वरेइतिसत्वनिधनः तं सततमतिशयेनाविरुद्धकंरूपःज्ञानमुखरूपः इतिसततात्युदकोभगवास्तावभ्रत्दहःवराक्त विवेकहेतुत्वात्सत्वनिधनस्यसततात्युदर्कस्यहेररधिष्ठानत्वाच्चयथावत्तत्त्वविचारसाधनत्वाच्च गुरुत्वमित्यर्थः। तर्हिहेयत्वंकुतइतितत्राह तथापीति पारक्यंपरकीयंमायावृपित्रादेरधीनमित्यवसितोनिश्चितः २५ योहरिणाकरुणयामनुष्यजन्मप्राप्तेतेनानेनदेहेनसर्वस्मात्श्रेष्ठंविनासेवते तस्यायंवृक्षबीजमिवसंसारपरंपरारंभकबीजमित्यनर्थहेतुरित्याह जायेत्यादिना जायादीनांप्रियचिकीर्षयाकर्माणिवितन्वन्योजा यादीन्पुष्णातिसवृक्षधर्मावृक्षसमानोतेसुकृच्छ्राज्जायादिपोषणएवावरुद्धमनाःस्वस्यबीजमिवस्थितंस्वदेहंसृष्ट्वावसीदाति नित्यक्लेशवान्भवतीत्यन्वयःयथैकोवृक्षोबीजेनबीजांतरपरंपरारंभणहेतुस्तथायंदे होपिअसज्जायादिपोषणलक्षणबीजैर्देहांतरपरंपरारंभकारणमित्यर्थः २६ अवसीदतीत्युक्तंविवृणोति जिह्वेति अमुंसंसारिणंकर्मशक्तिःपाण्यादिलक्षणापूर्वादृष्टशक्तिर्वा २७ अनेनसर्वभोगायतनेभ्योविशि ष्टज्ञानेंद्रियादिमत्तयापुरुषार्थोपयोगित्वेनास्यश्रैष्ठ्यादनेनरसादिविषयान्विजित्य पुरुषार्थायसाधनानुष्ठानंविधेयमन्यथानर्थपरंपरातदवस्थैवेत्युक्तं तत्रसर्वस्मादस्यशरीरस्यश्रैष्ठ्यंकथंअवसीयतइतितत्रा

देहोगुरुर्ममविरक्तिविवेकहेतुर्बिभर्त्यस्मसत्त्वनिधनंसततात्युदर्कम् ॥ तत्त्वान्यनेनविमृशामियथातथापिपारक्यमित्यवसितोविचराम्यसंगः २५ जा यात्मजार्थपशुभृत्यगृहाप्तवर्गान्पुष्णातियःप्रियचिकीर्षितयावितन्वन् ॥ सोंतेसुकृच्छ्रमवरुद्धमनाःस्वदेहंसृष्ट्वास्वबीजमवसीदतिवृक्षधर्मा २६ जिह्वैक तोमुमपकर्षतिकर्हितर्षाशिश्नोन्यतस्त्वगुदरंश्रवणंकुतश्चित् ॥ घ्राणोन्यतश्चपलदृक्क्वचकर्मशक्तिर्बह्वयःसपत्न्यइवगेहपतिंलुनंति २७ सृष्ट्वापुराणिविवि धान्यजयात्मशक्त्यावृक्षान्सरीसृपपशून्खगदंशमत्स्यान् ॥ तैस्तैरतुष्टहृदयःपुरुषंविधायब्रह्मावबोधमिषणंमुदमापदेवः २८ लब्ध्वासुदुर्लभमिदंबहुसं भवांतेमानुष्यमर्थदमनित्यमपीहधीरः ॥ तूर्णंयतेतनपतेदनुमृत्युयावन्निःश्रेयसायविषयःखलुसर्वतःस्यात् २९ एवंसंजातवैराग्योविज्ञानालोकआ त्मनि ॥ विचरामिमहीमेतांमुक्तसंगोऽनहंकृतिः ३० नह्येकस्माद्गुरोर्ज्ञानंसुस्थिरंस्यात्सुपुष्कलम् ॥ ब्रह्मैतदद्वितीयंवैगीयतेबहुधर्षिभिः ३१ श्रभिग वानुवाच ॥ इत्युक्त्वासयदुंविप्रस्तमामंत्र्यांगधीरधीः ॥ वंदितोभ्यर्चितोराज्ञाययौप्रीतोयथागतम् ३२

ह सृष्ट्वेति अजयाप्रकृत्याआत्मशक्त्यास्वाधीनसामर्थ्योपेतयापुराणिशरीराणिपुरुषंपुरुषशरीरंअवबोधमिषणंज्ञानाश्रयम् २८ इदानींपरमपुरुषार्थायप्रयतनीयामित्यर्थतःसूचितंस्पष्टमाह लब्ध्वेति बहु संभवांतेबहुजन्मावसानेअनुमृत्युपृष्ठतोनुगतांतकं शरीरयात्रामप्रयत्नोपिनानुष्ठेयइत्याह विषयइति धीरःअनित्यमर्थदामिदंशरीरंयावन्नपतेत्ततःपूर्वमेवानिःश्रेयसाययतेतेत्यन्वयः २९ निश्चितार्थमाह एवमि तिआत्मनिविज्ञानालोकःपरमात्मविषयविज्ञानलक्षणप्रदीपःप्रकाशः ३० एकस्माद्गुरोःस्वार्थेसिद्धेबाहुल्यार्तिकप्रयोजनंसर्वस्मादसंगत्वादिकएवतात्पर्यार्थइत्यत्राह नहीति सुष्ठुपुष्कलंपूर्णं तत्रहेतुमाह ब्रह्मे तिबहुधागीयमानत्वादल्पबुद्धेर्निश्चयोनस्यादित्यर्थः हीत्यनेन एकस्माच्चगुरोर्ज्ञानंजायतेनैवकस्यचित्। एकस्मादेवजायेतयोग्योब्रह्मपदस्पतु । स्वयंतूपदिशेज्ज्ञानंवैरिंचिपदयोगिनः । अनुग्रहात्ते नचापिज्ञानंदत्त्वाविमुक्तिदः । ज्ञानंप्राप्यबहुभ्योपिनतेमुक्तिश्चतुर्मुखात् । ज्ञानमप्राप्यतेषांतुज्ञानदोविष्णुरेवहीतिवाक्योक्तविशेषंसिंहावलोकनन्यायेनसूचयति ३१ ३२

समेब्रह्मणिचित्तंयस्यसतथा ३३ इतिश्रीभागवतेम०एकादशस्कंधेविज०टीकायांनवमोध्यायः ॥ ९ ॥ मुमुक्षुणाहेररपरोक्षज्ञानमापाद्यमितिइतिहासमुखेनोक्तंतत्साधनानिनिरूपयत्यस्मिन्नध्याये । तत्रा दौवर्णाश्रमाचाराचरणप्रकारमाह मयोदितेष्विति अकामात्माफलाभिसंधिरहितमनाःभूत्वा १ सर्वसाधनेषुवैराग्यंप्रथममापाद्यमित्याह अन्वीक्षेतेति अंतःकरणशुद्धिहेतुनावर्णाश्रमादिविहिताचा रेणविशुद्धात्मापुमान्गुणेषुशब्दादिषुतत्त्वज्ञानेनपुरुषार्थसाधनतानिश्चयज्ञानेनाविषयात्मनाविषयेष्वासक्तचित्तानांदेहिनां सर्वेषां कर्मारंभाणांविपर्ययंफलवैपरीत्यंअन्वीक्षेतेत्यन्वयः अन्वीक्षणंनाम यथावस्तुदर्शनं तदेवपुरुषार्थसाधनंनान्यत् २ शुक्तिरजतादिज्ञानवन्मुमुक्षुणाहेयमिदंज्ञानमितिभावेनैतदुपपादयति सुप्तस्येति यथासुप्तस्यजाग्रत्वेनविषयाणामालोकोयथावाध्यायतोमनोरथांश्चनानात्म कत्वाद्वस्तुस्थितेरन्यथात्वाद्विफलःअतएवाविद्यमानःतथान्यधीगुणैःस्वबाह्यबुद्धिस्थगुणैः अस्वरूपैःकामक्रोधादिभिरभेदोहंक्रोध्यहंकामयितेत्यादिलक्षणोयोसौहेयइतिअर्थः । वस्तुस्थितेरन्यथात्वंनाना त्वामितिकीर्तितं । ज्ञानस्यैवतुनानात्वान्नस्यात्कामाद्यहंमतिः । कामादिषुत्वधीस्थेषुकेवलंजीवसंस्थितिः । इतिबुद्धिरभेदःस्यात्सनकार्यःकथंचन । अदुष्टकामश्चिद्रूपोजीवाभिन्नस्वरूपतः । दुष्टका मोमनोधर्मस्तस्माद्धेयःसदैवस इतिप्रमाणेनहेयत्वंज्ञायतेइत्यर्थः २ अकामात्मेत्युक्तंविवृणोति निवृत्तमिति फलानपेक्षणंयथावस्तुज्ञानपूर्वंयत्कर्मतन्निवृत्तंतदेवसेवेतकुर्यात्अनीदृशंयत्कर्मतत्प्रवृ

अवधूतवचःश्रुत्वापूर्वेषांनःसपूर्वजः॥सर्वसंगविनिर्मुक्तःसमचित्तोबभूवह ३३ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेभगवदुद्धवसंवादेअवधूतगीतंनामन वमोध्यायः ९ ॥ श्रीभगवानुवाच ॥ मयोदितेष्ववहितःस्वधर्मेषुमदाश्रयः ॥ वर्णाश्रमकुलाचारमकामात्मासमाचरेत् १ अन्वीक्षेताविशुद्धात्मादेहिनां विषयात्मनाम् ॥ गुणेषुतत्त्वज्ञानेनसर्वारंभविपर्ययम् २ सुप्तस्यविषयालोकोध्यायतोवामनोरथः ॥ नानात्मकत्वाद्विफलस्तथाभेदोन्यधीगुणैः ३ निवृत्तंकर्मसेवेतप्रवृत्तंमत्परस्त्यजेत् ॥ जिज्ञासायांसंप्रवृत्तोनाद्रियेत्कर्मचोदनाम् ४ यमानभीक्ष्णंसेवेतनियमान्मत्परःक्वचित् ॥ मदभिज्ञंगुरुंशांत मुपासीतमदात्मकम् ५ अमान्यमत्सरोदक्षोनिगमेदृढसौहृदः ॥ असत्वरोर्थाजिज्ञासुरनसूयुरमोघवाक् ६ जायापत्यगृहक्षेत्रस्वजनद्रविणादिषु ॥ उदासीनःसमंपश्येत्सर्वेष्वर्थमिवात्मनः ७

त्तंत्यजेन्नकुर्यात् अहमेवपरोयस्यसमत्परःअनेनाकामात्मनोबुधस्यकर्मविधानंप्रतीतिविरुद्धमितिपरास्तं निष्कामंज्ञानपूर्वंचनिवृत्तिमितिचोच्यते । निवृत्तंसेवमानस्तुब्रह्माभ्येतिसनातनमिवि एतदत्रमानं ननुसकामस्यकर्मविधानात्तत्त्यागःकथमत्राह जिज्ञासायामिति जिज्ञासायांब्रह्मविचारेकर्मचोदनांकर्मविधिंब्रह्मज्ञानोत्पत्तौप्रवृत्तानांसर्वशब्दानांकर्मादिविषयत्वांगीकारेविरोधाप त्त्यातत्रानादरलक्षणत्यागोविधीयते ननुसर्वात्मनाअंतःकरणशुद्धिद्वाराज्ञानांगत्वेनांगीकारार्हत्वादित्यतोनाद्रियेदित्युक्तम् ४ ननु यमादचोदनापिनादरणीयाकिं नेत्याह यमानिति यमानियमाः अहिं सासत्यमस्तेयमसंगोह्रीरसंचयः । आस्तिक्यंब्रह्मचर्यंचमौनंस्थैर्यंक्षमाभयं । शौचंजपस्तपोहोमःश्रद्धातिथ्यंमदर्चनं । तीर्थाटनंपरार्थेहातुष्टिराचार्यसेवनमितिवक्ष्यति क्वचिद्विहितकालेनिवृत्तादिवत्ज्ञानो त्पत्तौगुरूपासनमप्यंतरंगमित्याह मदभिज्ञमिति मय्येवआत्माध्यानसमर्थाबुद्धिर्यस्यसतथातं मामेवनित्यंध्यायेद्योमदात्मासंप्रकीर्तितइतिवचनात् ५ तस्यगुरुप्रसादजनकगुणानाह अमानीत्यादिना नितरांगमयतीतिनिगमोनिर्णायकंवैष्णवशास्त्रंतस्मिन् ६ सर्वेषुजायापत्यादिष्वात्मनःस्वस्यार्थमिवप्रयोजनंउभयोःसमंनतुविशेषंपश्येत् इवोभयेचसादृश्येइतिचयावत्प्रयोजनंपश्येदितिवा ७

किंच जीवपरमात्मानावापपरस्परदेहादश्चाभिन्नत्वेनज्ञातव्यावितसदृष्टांतमाह विलक्षणइति स्वदृक्स्वयमकाशः ज्ञानात्मस्वरूपद्रष्टा आत्मापरमात्मानस्थूलसूक्ष्मदेहाद्विलक्षणोज्ञानमयआत्माजा
वश्चहरेर्देहादेश्चभिन्नइतिज्ञातव्याविति शेषः दाह्याद्दारुणोन्यःपावकः ८ प्राप्तस्यहिप्रतिषेधइतिन्यायादनयोरभेदशंकायाःकिंबीजमत्राह निरोधइति यथाजीवोनिरोधादींस्तत्कृतान्देहकृतान् गुणानाध
त्ते एवंपरोपिदेहमनुप्रविष्टोदेहगुणानाधत्तइत्यन्वयः निरोधोमरणं अणुत्वंबृहत्त्वंनानात्वंसुरनरादिनानाजातिविशिष्टत्वमनयोर्वैलक्षण्याज्ञानंबीजमित्यर्थः ९ इदमेवाज्ञानंसंसारकारणमित्याह यइति
योसौसत्त्वादिगुणैर्विरचितोदेहःअयंपुरुषस्यजीवस्यार्थोहियस्मादविद्यास्थितात्मनःअविद्यायांअज्ञानेस्थितमनसःपुंसोयंसंसारस्तन्निबंधः देहाभिमाननिमित्तकः १० अदेहधर्मवान्विष्णुर्देहधर्मवदीर्य
ते जीवस्त्वदेहधर्मापिपरतोदेहधर्मवान् । स्वयंत्वनभिमानःसन्नज्ञानामेवदर्शयेत् । विष्णुर्जीवस्वाभिमानीयावन्मुक्तिपदंव्रजेदितिवचनाद्विष्णोर्देहधर्मवदाभानमज्ञानंनतुज्ञानिनांजीवस्यस्वतोदेहधर्मरहि
तस्यापिदेहाभिमानादितिविवेकलक्षणोविचारःकर्तव्यइत्युपसंहराति तस्मादिति उक्तप्रकारेणाजिज्ञासयाआत्मस्थंदेहांतस्थितंकेवलंदुर्भगंदेहिभोग्यदुःखरहितमात्मानंश्रीनारायणंपरंविलक्षणंसंगम्य
ज्ञात्वास्यजीवस्यवस्तुबुद्धिंशक्तबुद्धिनिरसेत्त्यजेत् कथंयथाक्रमंजिज्ञासयाब्रह्मादिजीवराशेःयथास्वरूपतारतम्यंविचार्यज्ञात्वापरब्रह्मभावबुद्धिंस्यजेदित्यर्थः । अवस्त्वशक्तमुद्दिष्टंशक्तंवस्त्वहमण्यते । त
स्मादेकंपरंब्रह्मवस्तुशब्दोदितंसदेतिलक्षणवचनात् २१ ननुज्ञानोत्पत्त्यर्थंगुरूपास्तिःकर्तव्येत्युक्तं तत्रकथंकारंज्ञानमुत्पद्यतेयेनजीवस्यब्रह्मभावबुद्धितृणदहनंस्यादित्यतस्तत्प्रकारमाह आचा

विलक्षणःस्थूलसूक्ष्मादेहादात्मेक्षितास्वदृक् ॥ यथाग्निर्दारुणोदाह्याद्दाहकोन्यःप्रकाशकः ८ निरोधोत्पत्त्यणुबृहन्नानात्वंतत्कृतान्गुणान् ॥ अनुप्र
विष्टआधत्तेएवंदेहगुणान्परः ९ योसौगुणैर्विरचितोदेहोयंपुरुषस्यहि ॥ संसारस्तन्निबंधोयंपुंसोविद्यास्थितात्मनः १० तस्माज्जिज्ञासयात्मानमात्म
स्थंकेवलंपरम् ॥ संगम्यनिरसेदस्यवस्तुबुद्धियथाक्रमम् ११ आचार्योरणिराद्यास्यादंतेवास्युत्तरारणिः ॥ तत्संधानंप्रवचनंविद्यावह्निःसुखावहः १२
वैशारदीसातिविशुद्धबुद्धिर्धुनोतिमायांगुणसंप्रसूतिम् ॥ गुणांश्चसंदह्ययदात्म्यमेतत्स्वयंचशाम्यत्यसमिद्यथाग्निः १३ अथैषांकर्मकर्तृणांभोक्तृ
णांसुखदुःखयोः ॥ नानात्वमथनित्यत्वंलोककालागमात्मनाम् १४

र्यइति १२ विद्यावह्नेःसुखावहत्वंनित्यदुःखहेतुजीवब्रह्मैक्यबुद्धिशुष्कतरुदाहेननित्यानंदनिदानत्वादितिभावेनाह वैशारदीति विविधंशारंसुखदुःखलक्षणंसंसारंद्यतीतिविशारदोविष्णुस्तस्यावि
द्यमानावैशारदीसाअतिविशुद्धाबुद्धिःअपरोक्षबुद्धिःगुणसंप्रसूतिंअयोग्यकामादिजननींमायापिशाचवत्स्थितांजीवस्वरूपाच्छादिकांनिरस्यपरमाच्छादिकांविधुनोतिउद्घाटयति अयोग्यकामादिगुणां
श्चसंदह्यएतदुःखादिकंयदात्म्यंयस्यामायायाःस्वरूपाधीनंतादृशीं स्वयंसाबाह्यांतःकरणजाबुद्धिश्चतदंतःकरणंचदग्ध्वाअसमिन्निरिंधनोग्निरिवशाम्यति स्वरूपज्ञानेनैवस्वरूपमीश्वरादिकंचानुभवतिमुक्ता
वितिशेषः । पिशाचवत्स्थितामायातूच्यतेजीवगासदा । दह्यतेतद्गुणाःसर्वेसाचप्रातिस्विकीनरइतिप्रमाणवचनादुक्तंयुक्तं अनेनबाह्यांतःकरणंनश्यतिस्वरूपांतःकरणजन्यज्ञानेनस्वस्वरूपेश्वरादिकंअनुभव
तीत्येतत्सम्यङ्नावगतमतोन्यत्प्रमाणंवक्तव्यमितीयंशंका । बाह्यांतःकरणाज्जन्यंज्ञानंनश्यतिमुक्तिगे स्वरूपज्ञानतोभोगान्मुक्तौभुंक्तेयथेष्टइत्यनेनपरिहर्तव्येतिज्ञातव्यं । एतच्छब्देनदुःखादिरपरोक्ष
तयोच्यते क्वचिद्विश्वंक्वचिद्ब्रह्मक्वचिन्नित्यमितीर्यतेइतिवचनात् । एतच्छब्देनदुःखादिकमत्रोच्यतइतियुक्तं । तप्तलोहांबुनाशवत्भेदज्ञानविनाशादात्मैकत्वमेव ननानात्वमतएवतेषां नित्यत्वंचव्यावहारि
कमेवेतिपद्यव्याख्यानंतदुत्तरग्रंथविरुद्धत्वान्नविदुषांपरिषदिसामंजस्यंधत्ते १३ तत्कथमत्राह अथेति । एषामितिप्रत्यक्षं लोककालागमात्मनामित्यनेनभेदेप्रत्यक्षमनुमानमागमंचप्रमाणयति। लोकेकाले

आगमेवेदेचात्मामतिर्येषांतेतथातेषांलोककालवेदज्ञानामित्यर्थः अनेनज्ञानतारतम्यंचसूचितं तस्मात्पुण्यकर्मकर्तृणांपापकर्मकर्तृणांमिश्रकर्मकर्तृणांअतएवसुखदुःखमिश्रभोक्तृणांएषांनानात्वमथैषां नित्यत्वंचमन्यसेजानासि यदित्वं तस्मान्नमयाभेदसाधनेप्रयतनीयमित्यतःअस्माभेदोनुपपन्नइति । देहापेक्षमनित्यत्वंजीवानांजननंतथा । स्वतस्त्वजाश्चनित्याश्चबहवःसुखरूपिणः । उक्तप्राजीवसंघास्तुनी चावैनित्यदुःखिनइत्यतअनित्यत्वंजननंसुखैकभोक्तृत्वंचयुज्यते इयंव्यवस्थाकस्मादितितत्राह सर्वभावानामिति यथासर्वेषांदेवासुरमनुष्यादिजातिभिन्नानांभावानांजीवानांसंस्थाव्यवस्थायोग्यताओ त्पत्तिकीस्वाभाविकीहियस्मात्तस्मात्तत्तदाकृतिभेदेनदेवासुरादिशरीरभेदेनतथाजायतेजीवसंगस्तस्यबीजांनंचयोग्यतानुसोरणभिद्यतेअनेनोत्तमयोग्यतावतांभेदज्ञानेधिकारइतरेषामुभयेषांयथासंभवम न्यत्रेत्युक्तंभवति १४ १५ ननुदृश्यमानत्वान्नित्यानामपिजन्मादिकर्मास्तुतन्मायामयमितिमाशंकीत्याह एवमपीति एवमपिनित्यत्वेपिअत्रजननादिलक्षणसंसारेसर्वेषांदेहिनांकालावयवतःरात्रिदि नाद्यवच्छिन्नेषुकालावयवेषुदेहयोगतःदेहसंबंधेनजन्मादयोभावाःअसकृत्संति प्रवाहतःसत्याइत्यर्थः देहापेक्षमनित्यत्वंजीवानामित्येतदत्राप्यनुसंधेयम् १६ ननुसदनुविद्धत्वात्सत्यत्वंनस्वतइ त्याशंक्यार्थक्रियायोग्यत्वात्स्वाभाविकमेवेतिभावेनाह तत्रापिति । तत्रापिजन्मादिमतिजगत्यपिकर्मणांकर्तुःजातावेकवचनंअस्वातंत्र्यंकर्मफलसुखदुःखानांभोक्तुरस्वातंत्र्यंचउत्तमानामवरनियतत्व मवरजनस्योत्तमत्वंलक्ष्यतेदृश्यते । भवतेतिशेषःततःकिमत्राह कोन्विति । कोन्वर्थःपुरुषार्थःसुखलक्षणःविवशंनीचवशंपुरुषंभजेत्नकोपिपुरुषार्थः । कंपुरुषंपुरुषार्थःप्राप्नोतीत्यस्यापिइदमेवंव्याख्येयं

मन्यसेसर्वभावानांसंस्थाह्युत्पत्तिकीतथा ॥ तत्तदाकृतिभेदेनजायतेभिद्यतेचधीः १५ एवमप्यत्रसर्वेषांदेहिनांदेहयोगतः ॥ कालावयवतःसंतिभावाजन्मा दयोसकृत् १६ तत्रापिकर्मणांकर्तुरस्वातंत्र्यंचलक्ष्यते ॥ भोक्तुश्चसुखदुःखानांकोन्वर्थोविवशंभजेत् १७ नदेहिनांसुखंकिंचिद्विद्यतेविदुषामपि ॥ तथाच दुःखंमूढानांवृथाहंकारिणांपरम् १८ यदिप्राप्तिंविघातंचजानंतिसुखदुःखयोः ॥ तेप्यद्धानविदुर्योगंमृत्युर्नप्रभवेद्यथा १९ कोन्वर्थःसुखयत्येनंकामोवा मृत्युमंतिके ॥ आघातंनीयमानस्यवध्यस्येवपदेपदे २०श्रुतंचदृष्टवन्नेक्ष्येत्स्पर्धासूयात्ययाप्ययैः ॥ बह्वंतरायैर्विहतंक्षणिवच्चार्पिनिष्फलम् २१

विशिष्टपुरुषवशंपुरुषंभजेदिति । अत्रविशेषस्तु स्वाधिकानांवशत्वात्तुपरमंसुखमेवतु । तदन्येषांवशेयस्तुकिंसुखंतस्यभण्यतां स्वाधिकानांवशत्वंचतेषांभक्तिमतःसुखम् तदन्येषांतुदुःखायतस्माद्भक्तय धिकोभवेदित्यनेनावगंतव्यः । अनेनमुक्तावन्यानियतत्वेसंसारधर्मत्वात्तदर्थेनप्रयतनीयमितिशंकानिरस्ता १७ अत्रकैमुत्यमाह नेति विदुषामपिदेहिनांदेहाभिमानिनांपदासुखंनविद्यते तथातदादुःखमू ढानांअहंकारिणांचसुखंनास्तिइतिकिंपुनःपुनःशब्दः प्रस्तुतार्थंतथाशब्दउदीर्यतइतिवचनात् पुनःशब्दःतथाशब्दार्थेवर्तते दुःखमूढेभ्योप्यहंकारिणामात्मन्यविद्यमानगुणारोपवतांसुखंनास्तीतिकिं पुनस्तरामितिचयोज्यम् । यावद्देहाभिमानित्वंअधिकंतावद्दुःखित्वंचज्ञातव्यमित्यतोदेहाभिमानिनश्चदुःखमूढाइत्युक्तम् परमित्यनेनाभिमानित्वमेवप्रयोजनमिति १८ नन्वस्त्वज्ञानांदुःखादिकंतत्परिहार प्राप्त्युपायानभिज्ञानादग्निष्टोमादिनातदभिज्ञानांतौसुखप्राप्तिदुःखपरिहारौस्याताम्इत्येतदनूद्यपरिहरति यदीति येतुलोकेविद्वत्त्वेनप्रसिद्धाःपुरुषाःयदिसुखस्यप्राप्तिंदुःखस्यविघातंपरिहारंजानंतीतिमतंते प्यद्धासत्पंथयथार्थयोगमुपायंनविदुः कुतोनविदुरत्राह मृत्युरिति यथायेनोपायेनमृत्युःसंसारोनप्रभवेन्नांगीकुर्यात्तंदेह मानित्वेबहुतरंदुःखग्रस्तत्वादित्यर्थः १९ नन्वर्थकामौतयोरुपायःस्यातामत्राह कोन्वितिअंतिकेस्थितमृत्युमेनंपुरुषम् अत्रदृष्टांतमाह आघातमिति आघातंमरणस्थानंप्रतिनीयमानस्यवध्यस्यपुंसोयथासुखंनास्तितथेति २० ननुस्वर्गकामस्यसुखहेतुत्वादन्यथातत्कर्मानुष्ठा नंव्यर्थंस्यादतःकथंकामोवानसुखयतीतित्राह श्रुतंचेति कामस्यकर्मद्वारासुखहेतुत्वेपितत्रित्यंनक्षणिकत्वात् दृष्टवत्कर्मनिर्मितमंदिरादिवद्विश्वकर्मीयशास्त्रसिद्धत्वंत्वप्रयोजकम् नचप्रक्षिप्तवात्रित्यत्व

मितिवाच्यम् ज्ञानसाध्यत्वविशेषात् स्वर्गकामेनानुष्ठीयमानमग्निष्टोमादिकंनिश्चितफलंनस्यात्बहुंतरायविहतकृष्यादिकामवदित्याह स्पर्धेत्यादिना यथाकृषिवाणिज्यादिकंमिथःस्पर्द्धासूयादिबहुंतरायैर्विहतंभवति स्पर्धादिप्रयुक्ताभिचारिकर्मणाउन्मादादिनाप्यग्निष्टोमाद्यनुष्ठानमपिकुंठितम् अन्ययोर्विध्यतिक्रमणं अप्ययोंतरालेमरणम् २१ ननुसत्कृष्यादिरिवस्वनुष्ठितोग्निष्टोमादिधर्मःकर्मफलजनकःकिंनस्यादत्राह अंतरायैरिति तेनधर्मेणअर्थकामयोःसुखहेतुत्वाभावेपिस्वनुष्ठितस्यधर्मस्यतद्धेतुत्वंस्यादित्यतोवाह अंतरायैरिति २२ निजधर्मार्जितान् २३ देवीनामप्सरसाम् २४ सुराक्रीडेषुदेवक्रीडास्थानवनेषु २५ समाप्यतेक्षीयते २६ स्वतोसुराणांवैष्णवाचार्यैर्यज्ञंकृत्वास्वर्गंगत्वाकर्मफलंभुक्त्वामर्त्यलोकमागतानांगतिमाह यादिति २७ आलम्प्यहिंसित्वा २८ मनुष्ययाज्ञिकस्यस्थितिमाह कर्माणीति मर्त्यधर्मेणोमरणधर्मिणःपुरुषस्यतत्रदेहेकिंसुखंलभ्यतेनकिमपीत्यर्थः २९ नकेवलंलोकत्रयस्यानित्यफलत्वंततउपरितनानांसत्यलोकपर्य

अंतरायैरविहतोयदिधर्मःस्वनुष्ठितः ॥ तेनापिनिर्जितंस्थानंयथागच्छतितच्छृणु २२ इष्ट्वैवदेवतायज्ञैःस्वर्लोकंयातियाज्ञिकः ॥ भुंजीतदेववत्तत्रभोगान्दिव्यान्निजार्जितान् २३ स्वपुण्योपचितेशुभ्रेविमानऊपगीयते ॥ गंधर्वैर्विहरन्मध्येदेवीनांह्यवेषधृक् २४ स्त्रीभिःकामगयानेनकिंकिणीजालमालिना ॥ क्रीडन्नवेदात्मपातंसुराक्रीडेषुनिर्वृतः २५ तावत्प्रमोदतेस्वर्गेयावत्पुण्यंसमाप्यते ॥ क्षीणपुण्यःपतत्यर्वागनिच्छन्कालचालितः २६ यद्यधर्मरतःसंगादसतामजितेंद्रियः ॥ कामात्माकृपणोलुब्धःस्त्रैणोभूतविहिंसकः २७ पशूनविधिनालभ्यप्रेतभूतगणान्यजन् ॥ नरकानवशोजंतुर्गत्वायात्युल्बणंतमः २८ कर्माणिदुःखोदर्काणिकुर्वन्देहेनतैःपुमान् ॥ देहमाभजतेतत्रकिंसुखंमर्त्यधर्मिणः २९ लोकानांलोकपालानांमद्भयंकल्पजीविनाम् ॥ ब्रह्मणोपिभयंमत्तोद्विपरार्धपरायुषः ३० गुणाःसृजंतिकर्माणिकालोनुमृजतेगुणान् ॥ जीवस्तुगुणसंयुक्तोभुंक्तेकर्मफलान्यसौ ३१ यावत्स्याद्गुणवैषम्यंतावन्नानात्वमात्मनः ॥ नानात्वमात्मनोयावत्पारतंत्र्यंतदैवहि ३२ यावदस्यास्वतंत्रत्वंतावदीश्वरतोभयम् ॥ यएतत्समुपासीरंस्तेमुह्यंतिशुचार्पिताः ३३ कालआत्मागमोलोकःस्वभावोधर्मएवच ॥ इतिमांबहुधाप्राहुर्गुणव्यतिकरेऽसति ३४

तानाप्येवमेवेत्याह लोकानामिति ३० एवंमनुष्यादिब्रह्मपर्यंतंलोकानांलोकपालानांचसृष्ट्यादिकर्त्राकालाख्येनभगवतामायागुणोपादानत्वेनतत्कर्मानुगुणंप्रवर्त्यते तस्मादस्यज्ञानमेवात्यंतदुखनिवर्तकत्वेननित्यंसुखदायीतिभावेनोपसंहरति गुणाइति गुणाःसत्वादयःप्रकृतेःकर्मफलभोक्तृत्वामितिमतमित्याह जीवस्त्विति । तुशब्देनाचेतनस्यभोक्तृत्वानुपपत्तिंदर्शयति सत्वादिगुणयुक्तः ३१ एवंजीवपरभेदंप्रतिपाद्यतदभेदमतमनूद्यदूषयति यावदित्यारभ्ययावदीश्वरतोभयमित्यंतोग्रंथःपूर्वपक्षीयःयएतन्मतंउपासीरन्सेवंतेतेंधेतमसिमुह्यंतिदुःखोद्रेकात् ३२ ३३ तर्हिस्वासिद्धांतःकइतितत्राह कालइति गुणव्यतिकरेअसतिमुक्तिदशायांबहुधाकालादिभिर्नामभिर्मामुपासतेइतिप्राहुर्वेदादयइतिशेषः कालःसर्वगुणोद्रेकादाप्तत्वादात्मनामकः । आगमोवगतेरस्यलोकोज्ञानस्वरूपतः । स्ववशत्वात्स्वभावोयंधारणाद्धर्मइत्यपि । उपासतेसदामुक्ताःपरानंदैकभागिनः । तदेतत्तत्त्वमज्ञात्वाप्राहुर्दुर्मतयःपरे । यावत्स्याद्गुणवैषम्यंतावन्नानात्वमात्मनः । भेदबुद्धिस्तुयावत्स्यात्तावदीश्वरतंत्रता यावदीश्वरतंत्रत्वंतावत्तस्माद्भयंभवेत् । उपासतेयएवंतुनित्यंशोकेपतंतिते । महातमस्यनानंदेतस्मान्नैवंविचिंतयेत् । तस्मान्नित्यंतुनानात्वंजीवानामीशतंत्रता । स्वाधिकानांवशत्वंचमुक्तावपिसदेष्यते

एवंज्ञात्वाविमुच्यतेपरानंदंव्रजंतिचेतिप्रमाणात्कालादिनामानिहरेरेवमुख्यार्थानीत्यतोगुणपूर्णस्यहरेःदुःखसमुद्रमग्नेनजीवेनैक्यंदूरतोपाकृतमितिभावः । कलकामधेनाविति धातोः कमनीयानांगुणानां धेनुराधारइतिकालः । सर्वेषांसर्वस्मादाप्तत्वात्श्रेष्ठत्वादात्माआगच्छतिअवगच्छति जानाति सर्वमित्यागमः । लुक्प्रकाशइतिधातोःप्रकाशापरपर्यायज्ञानस्वरूपत्वात्लोकः स्वाधीनोभावः सत्तालक्षणोयस्यसःस्वभाव स्वतंत्रइत्यर्थः धारयातिसर्वमितिधर्मः ३४ भगवदुक्त्यासम्यक्ज्ञातजीवपरभेदोप्युद्धवःस्थूलमतीनामपिनिस्तुषंविविच्यभेदंज्ञापयितुंपृच्छति गुणेष्विति स्वतोऽनपावृतः । अदेहीपरमात्मादेहजेषुगुणेषुस्पर्शादिविषयेषुवर्तमानोपिगुणैर्विषयैर्नबध्यतेऽतबध्यते द्वितीयेकथंबध्यतेइति २९ कोर्थइतितत्राह कथमिति । यदिबद्धस्तर्हिकेनप्रकारेणवर्त्तेत लोके बद्धस्यप्रवृत्त्यदर्शनात् चेष्टादिर्लिंगाभावेनतज्ज्ञानंचदुरापादमितिभावेनाह कैरिति । बद्धस्यापिभोगाभावेमरणंस्यादतः किंभुंजीतेति । भुंजानस्यहानोपादानेदृष्टे तत्रार्यंकिंजहाति बद्धःशयनाद्यन्यतमंकरोतित त्रार्यंकिंकरोति ३६ ब्रूहिपरिहारेणस्पष्टीकुरु एवंपृच्छतस्तवकोभिप्रायःइत्यतएकजीववादिमतमवलंब्यप्रश्नबीजमाह नित्येति कुतएतदितिचेन्नमेमोक्षोनबंधनमित्यादिपरिहारात् शिष्योपिपूर्वपक्षस्थस्तदेवात्ममतंब्रुवन् नैवदूष्यत्यसत्येनास्थिरत्वार्थंहितद्वचइतिवचनादुद्धवस्यनासत्यतादोषोपि ॥ ३७ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेविजयध्वजकृतटीयांदशमोध्यायः ॥ १० ॥ ॥ भेदज्ञानमेवमुक्तिसाधनंतत्साधनंभक्तिस्तस्यावैराग्यंइत्येतत्सर्वमेतस्मिन्नध्यायेकथयति तत्रादौगुणेष्वित्यादिनायदुद्धवस्यचोद्यंतत्परिहरति बद्धइत्यादिना बद्धोमुक्तइतिह्याख्या जीवस्येतिशेषः

उद्धवउवाच ॥ गुणेषुवर्त्तमानोपिदेहजेष्वनपावृतः ॥ गुणैर्नबध्यतेऽदेहीबध्यतेवाकथंविभो ३५ कथंवर्त्ततविहरेत्कैर्वाज्ञायेतलक्षणैः ॥ किंभुंजीतोत विसृजेच्छयीतासीतयातिवा ३६ एतदच्युतमेब्रूहिप्रश्नंप्रश्नविदांवर ॥ नित्यमुक्तोनित्यबद्धएकएवेतिमेमतिः ॥ ३७ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेभगवदुद्धवसंवादेदशमोध्यायः ॥ १० ॥ श्रीभगवानुवाच ॥ बद्धोमुक्तइतिह्याख्यागुणतोमेनवस्तुतः ॥ गुणस्यमायामूलत्वान्नमेमोक्षोनबंधनम् १ शोकमोहौसुखंदुःखंदेहापत्तिश्चमायया ॥ स्वप्नेयथात्मनःख्यातिःसंसृतिर्नतुवास्तवी २

हिशब्दएवार्थेजीवस्यैवेत्यर्थः स्वतःचिद्रूपस्यकथंघटतइत्यत्राह गुणतइति सत्वादिगुणसंबंधान्निरवयवस्यएतत्संबंधःकथमत्राह मइति गुणानांजीवस्यचममवशत्वान्मदधीनप्रवृत्तित्वाच्चदुर्घटघटकशक्तिमत्वान्ममेत्यर्थः तर्हिशैवलावृतशरीरवन्नकदाप्यस्यसुखमत्राह नवस्तुतइति वस्तुवृत्त्यानास्तितन्निवर्तकेश्वरेच्छाधीनत्वान्नमिथ्येत्यर्थः गुणसंबंधत्वाद्बद्धएवतौकिंनस्यातामत्राह गुणस्येति जातिविवक्षयाएकवचनं गुणानांमायामूलत्वात्तत्प्रवर्तकत्वेनसंबंधः स्वतोहंनिर्गुणइत्यतोबंधमोक्षौनस्तइतिभावः । ब्रह्मणएवमायामयौबंधमोक्षौनाविद्ययानजीवस्येत्यंगीकर्तुमुचितंप्रतीतत्वान्नाप्रमाणकोध्याहारोयुक्तइतीदंश्चोद्यं अमायत्वान्निर्गुणोहंबंधमोक्षौनचापिमे मदधीनस्यजीवस्यबंधमोक्षौसदैवित्वीतिस्पष्टप्रमाणवचनेनपीरहृतीमीतत्वन्मनोरथकल्पनामत्रनप्रकाशयेति १ जीवस्यसंसारोवास्तवोनचेत्तर्हिकस्मादयमस्येत्याशंक्याज्ञानादितिसोदाहरणमाह शोकमोहाविति । मायायाअज्ञानेनयथास्वप्नेस्वप्नोयामित्यज्ञानेनात्मनःशोकमोहादिख्यातिस्तथास्वरूपाज्ञानेनशोकादिनतु स्वरूपस्यतस्यसुखात्मकत्वात्तस्मादर्थक्रियाकारित्वेनसंसृतिःसत्यपिनवास्तवीप्रतिहंतुमशक्याभवतीत्यर्थः । स्वप्नोयमित्यविज्ञानात्स्वप्नेदुःखमुपाश्नुते । निजस्वरूपानुभवराहित्यात्तद्वदेवतु । जाग्रद्दुःखमपिप्रोक्तंविष्णुतत्त्वंनपश्यतः । तस्मात्तदस्वभावत्वात्सदप्येतदवास्तवीमितिवचनात् । स्वप्नदृष्टांतेनसंसारस्यनमिथ्यात्वमुच्यतइति २

अत्रमायानिष्कृतिःकिंनस्यात्तथाप्रसिद्धेरित्यतस्तन्निराकरणमाह विद्याविद्येइति । ममतनूप्रतिमावत्स्थितांकंकायइत्यत्राह शरीरणादाहनावधमोक्षकराद्यजनादतावद्यमानममायामकल्पा
निर्मितेममेच्छावशंगतेच साक्षात्स्वरूपत्वे विद्याविद्येममतनूप्रतिमावत्सदोदिते । सदातद्व्यतिरिक्तस्यनित्यज्ञानसुखात्मनः । मदिच्छावशगेनित्यमविद्यानिर्मितागुणाः । सत्वाद्यामदधीनत्वादविद्यापान
मेगुणाः । अविद्याचैवविद्याचगुणाःसत्वादिकाअपि । देहोत्पत्तिःसुखंदुःखंसर्वमेतन्ममेच्छया । अतोहंबंधमोक्षाभ्यांरहितोनित्यमेवतु । मुक्तशब्दोदितोबंधराहित्यान्नविमोक्षत इतिप्रमाणविरोधआपद्यते । मो
क्षबंधकत्वंचाभिमानिदेवतासामर्थ्यात्तत्रश्रियाभिमतप्राकृतसत्त्वगुणजाताविद्या । दुर्गादिकृततमोगुणजातास्वविद्या । तदुक्तं श्रीस्तुविद्यासमुद्दिष्टादुर्गाविद्याप्रकीर्तिता । तेत्वनादीहरेरिच्छानिपतेसर्वदै
वत्विति ३ अदेहीबध्यतेचेत्कथंबध्यतइतिपरमात्मविषयप्रश्नःमेगुणतोबंधमोक्षावितिपरिहारोपि तत्रजीवस्यैवतावितिभवद्भिरुच्यते अतइदंकथंसंगच्छतइतितटस्थशंकांपरिहरन्नुपसंहरति एकस्य
वि जीवपरमात्मेतिद्विविधंतत्त्वंतयोरेकस्यैवजीवस्यबंधमोक्षौसकइत्यतोयमांशस्येति सर्किस्वरूपांशइत्यतोजीवस्येति जीवोभिन्नांशइति भिन्नांशस्यैवजीवस्यबंधमोक्षौनमेकचित् । अभिन्नांशास्तु
मत्स्याद्यातेजसःकालवह्निवत् । जीवाभिन्नांशकास्तत्रतेजसःप्रतिबिंबवदितिअनेनसिद्धंकिमुक्तंस्यादत्राह एवमिति एवमुक्तविधस्यजीवस्याविद्ययानादिबंधस्तयाविद्ययेतरत्मोक्षलक्षणंश्रेयःस्तइत्यर्थः
अतःपरमात्माकथंबध्यतइतिप्रश्नोनोपपन्नइतिभावः ४ एकस्मिन्भोगायतनेस्थितयोर्जीवपरयोरेकस्यजीवस्यैवतौस्तइतियदुच्यतेतत्रविवेकज्ञानंकथंस्यादत्राह अथेति यतोजीवस्येवबंधमो

विद्याविद्येममतनूविद्धशुद्धवशरीरिणाम् ॥ मोक्षबंधकरीआद्येमायया मेविनिर्मिते ३ एकस्यैवममांशस्यजीवस्यैवंमहामते ॥ बंधोस्याविद्ययानादिर्विद्ययाचतथेतरत् ४ अथबद्धस्यमुक्तस्यवैलक्षण्यंवदामिते ॥ विरुद्धधर्मिणोस्तातस्थितयोरेकधर्मिणि ५ सुपर्णावेतौसदृशौसखायौयदृच्छयैतौकृतनीडौ चवृक्षे ॥ एकस्तयोःखादतिपिप्पलान्नमन्योनिरपन्नोपिबलेनभूयान् ६

क्षौअथतस्माद्बद्धस्यजीवस्यमुक्तस्यविष्णोर्वैलक्षण्यंअस्वातंत्र्यादिस्वातंत्र्यादिलक्षणंतेतुभ्यंवदामीत्यन्वयः मुक्तनामत्वंचहरेरेवमुख्यं नित्यशुद्धमुक्तेत्यादिपदानांहरावेवेत्यन्वयादित्यादिपुरुषोत्तम
ध्यानवचनात्सिद्धं मुक्तस्यतुनमेमोक्षोबंधाभावात्कथंचन । मुक्तइत्यपिनामैतद्दीप्यतेसौदिवाकरः । इतिवद्बंधराहित्यान्नतुवृक्षादिदीप्तिवत् । कादाचित्कतयावाच्यंबंधाभावादमोक्षतः । जीवस्य
बंधमोक्षस्तुमत्प्रसादात्कदाचनेतितत्वोदयवचनाच्चोक्तार्थसिद्धिः बद्धस्यजीवस्य बद्धजीवाइमेसर्वेपूर्वबंधसमन्वयात् । नित्यमुक्तस्ततोविष्णुर्मुक्तनामासदोदितः । अबद्धत्वादमोक्षोपिदीप्यतेसौ
रविर्यथेतिस्वदृष्टप्रमाणात्सतिवैलक्षण्येबद्धावद्धव्यवस्थावक्तुंशक्यातदेवकथमित्यतउक्तं विरुद्धधर्मिणोरिति ५ तत्रप्रथममेकधर्मिणीत्युक्तंविवृणोति सुपर्णाविति पॄपालनपूरण
योरितिधातोःसुष्ठुपालकत्वात्पूर्णत्वाद्धरिःपाल्यत्वादपूर्णत्वाच्चजीवोपि सुपर्णइत्युच्यते अयंचविरुद्धधर्मैष्वंतर्भूयतेचिदानंदत्वेनसदृशौवृक्षसमानधर्मेदेहेस्थितत्वात्सखायौयदृच्छयाप्यदृष्टप्रेरकेच्छ
या अथविरुद्धधर्मानाह एकइति पिप्पलंकर्मफलंजीवादन्योहरिर्निरन्नोभोगरहितोपिबलेनभूयान्पुष्टः । अदननिमित्तंबलंनास्तीत्यर्थः आत्मानंस्वंअन्यंजीवंचअंधोभगवद्विषयज्ञानविधुरःबद्धोभगवदधी
नः । अनेनश्लोकद्वयेनद्वासुपर्णासयुजासखायेत्यातिश्रुतिर्विवृता । अत्रानश्नन्नन्योअभिचाकशीतीत्यादौयदशनाद्यभावेनहरेरवस्थानमुच्यते । तद्दुःखाद्यनशनमेवनतुसुखानदनमित्यादिसर्व अनन्तृत्वंह

---

१ विष्णोर्मुक्तशब्दवाच्यत्वेदैवीमीमांसासूत्रंप्रमाणत्वेनोदाहरति ॥ नित्यशुद्धेति । अन्वयादित्यस्यशक्तितात्पर्यलक्षणसंबंधादित्यर्थः

रेदुःखानत्तृत्वादुच्यतेसदा । विषयान्विनापिपूर्णत्वात्स्वरूपानंदभोगिनः । सुखमत्त्येवहिसदासर्वत्रापिस्थितंविभुः । स्वादोरदनवद्योक्तिर्जीवोऽस्वाद्यपियत्सदा । अनारतंपारवश्यात्स्वाद्वत्तीतितदः श्रुतिरिति । अस्वादुस्वादुवद्योक्तिर्जीवोनैवंजनार्दनः । अतोनात्तीतिवचनमश्नतोपिशुभंसदेति । साशनानशनत्वेननरदेवौयथोदितौ । अत्तिविनाप्यदौर्बल्यात्तथानात्तिहरेर्भुजइति । बहुप्रमाणसिद्धोयमर्थः तदेवात्रोक्तम् । निरन्नोपिबलेनभूयानितीति । स्वयंत्वत्त्येवतथापिनादननिबंधनंतस्यबलम् कुतः यत्रासुपर्णाअमृतस्यभागमनिमेषंविदथाभिस्वरंति । इनोविश्वस्यभुवनस्यगोपाःसमाधीरःपाकमत्रा विवेश । यस्मिन्वृक्षेमध्वदःसुपर्णानिविशंतेसुवतेचाधिविश्वे । तस्येदाहुःपिप्पलंस्वाद्वग्रेतन्नोन्नशद्यःपितरंनवेदेत्यादिवाक्यशेषात् । वृक्षेस्थित्वामध्वदःसुपर्णायस्मिन्ननश्नंति सुपर्णेअधिविश्वेसुपर्णाःनिविशंतेतदाधारत्वेनसुवतेचतस्यैवसुपर्णस्य स्वादुपिप्पलंअन्यस्तुस्वादुवदश्नातिनस्वादुयावत्पितरंपरमात्मानंनवेदेति । सुपर्णौद्वौशरीरस्थौजीवश्चपरमस्तथा । पारवश्यादनाज्जीवस्तत्रात्तीतिश्रुतौश्रुतः । स्ववंशेनादनाद्विष्णुर्नात्तीत्यत्रापिसंश्रुतः । सएवहिशुभस्यात्ताजीवोत्तास्येववेदनादितिवचनादत्रजीवपरमात्मानावेवोच्येते नसामान्यपक्षिणाविति ज्ञायते सर्ववाअत्तीतितददितेरदितित्वंस्यत्रब्रह्मचक्षत्रंचोभे भवतओदनः अत्ताचराचरग्रहणात् । अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवचेतीत्यादेश्चअत्तृत्वस्यलिंगत्वेनोक्तत्वाल्लिंगस्योभयसंप्रतिपन्नत्वेननिर्णयहेतुत्वाद्धरेर्नसर्वात्मनानत्तृत्वमत्रोच्यते । किंतुअशुभानत्तृत्वेनानत्तृत्वश्रुतेःकृतार्थत्वेनप्रामाण्यसंभवाच्छ्रुतिशरणानामस्माकंनकाप्यपेक्षतिरिति । जीवोमुक्तोपिनोजीवान्परमात्मानमेवच । वेत्तिसर्वात्मनाविष्णुर्वेत्त्येकःपुरुषोत्तमः । तस्यप्रसादवःकिंचिद्ब्रह्माद्याअपिजानते । अन्यजीवोनपेक्ष्यैकोजानातितुचतुर्मुखः । समास्तेनतदन्येतुलेशज्ञानाःक्रमात्स्मृताइत्यनेनआत्मानमन्यंचसवेदेत्येतद्विवृतं सर्वज्ञत्वंलिंगैर्यैकनिष्ठंतदुक्तं तान्यहंवेदसर्वाणिनत्वंवेत्थपरंतपेत्यादि मुक्तेष्वतिव्याप्तमिदंलिंगमितिचेन्न । अज्ञाजीवास्तुकथ्यंतेमुक्ताअप्यल्पवेदनात् । ज्ञइत्येवोच्यतेनित्यंसर्ववेत्तृत्वतोहरिरितिवचनात् । अनाद्यविद्ययांधत्वंजीवस्ययदियोग्यता । प्रयत्नश्चानुकूलः

आत्मानमन्यंचसवेदविद्वानपिप्पलादोनतुपिप्पलादः ॥ योविद्ययांधःसतुनित्यबद्धोविद्यामयोयःसतुनित्यमुक्तः ७ देहस्थोपिनदेहस्थोविद्वान्स्वप्राद्यथोत्थितः ॥ अदेहस्थोपिदेहस्थःकुमतिःस्वप्नदृग्यथा ८

स्यादंतवद्भवतिश्रुतम् । नित्यमेवान्यथांधत्वमयोग्यामानुषादयः । बद्धत्वंसर्वजीवानांनियमान्नित्यमेवतु । बद्धत्वंविष्ण्वधीनत्वमंधत्वंतददर्शनम् । अतःक्वचिदनित्यत्वमंधतायाभविष्यति । मुक्तस्यापितुबद्धत्वमस्तियत्सहरेर्वशः । मुक्ताख्यादुःखमोक्षात्स्याद्बद्धाख्याहर्यधीनतः । नित्यबद्धाअपितेमुक्तादुःखविमोक्षतः । नित्यमुक्तस्त्वेकएवहरिर्नारायणःप्रभुः । तत्तंत्रत्वात्स्वतंत्रत्वंतस्यैकस्यनचापरइत्यनेनसोपपत्तिकेन योविद्ययांधःसतुनित्यबद्धोविद्यामयोयःसतुनित्यमुक्तइत्येतद्विवृतं शतंसहस्राणिचतुर्दशेहपरागतिर्जीवगणस्यदैत्य । आरोहणंतत्कृतमेवविद्धिस्थानंतथानिःशरणंचतेषामितिजीवगणस्यगतिबाहुल्यप्रवेशनिर्गमनप्रतीतेर्नित्यमुक्तत्वंहरेर्लिंगंनहरेरन्यत्रगतमतःसएवनित्यमुक्तः ननुमुक्तैःसेव्यत्वेयुक्तमुक्तंतत्कथमितिचेन्न । कृष्णोमुक्तैरिज्यतेवीतमोहैःमुक्तानांपरमागतिरितिवचनात् तर्ह्येषांकदानुमुक्ताख्येतिचेन्न सर्वात्मनापंचदशकलानांत्यागानंतरंतदाख्या तदुक्तं कलाःपंचदशत्यक्त्वाश्वेतद्वीपनिवासिनां । मुक्ताख्येतिपश्चादपिस्वतंत्राइत्यतोविष्ण्वधीनास्तइति । यत्प्रसादात्कलामोक्षःतदधीनत्वमस्तुनान्याधीनतास्त्यतःस्वाधिकानांवशेस्थिताइति अन्याधीनत्वादधिकंदुःखंनास्तीत्यतउक्तम् नचास्मादधिकंकिंचित्सुखमस्तिहरेर्विनेति अतोनित्यमुक्तत्वंचस्वतंत्रत्वंनान्यनिष्ठमित्युपसंहरति नित्यमुक्तःसएवैकःस्वतंत्रःसंयतःसदेति ६ ७ ननुउभयोर्देहस्थत्वाविशेषादेकस्यमुक्तत्वेनदुःखानदनंइतरस्यबद्धत्वेनदुखादनंकथमित्याशंक्याविद्वत्वाविद्वत्त्वेकारणमितिभावेनाह देहस्थोपीति विद्वान्नित्यनिर्दुःखानंदानुभवःसर्वज्ञःश्रीहरिर्देहस्थोपिदेहाभिमानाभावान्नदेहस्थोपिततएवदुःखंनात्तीति कथंस्वप्नादुत्थितःपुरुषस्तद्वतदुःखादिकंनात्तितथेति कुमतिरविद्वान्जीवोदेहाभिमानित्वादेहादन्योपिदेहस्थोयथास्वप्नदृक्तद्वदुःखादिकंभुंक्तेतथेति ॥ ८ ॥

एतदेवविवृणोति इंद्रियैरिति गुणैरेरप्रधानंजीवः अत्रादाद्रियः गुणेष्वप्रधानेष्वथपुनर्विषयपुरुष्यमाणेषुसत्सुपरस्त्वावाक्रयः करोतिअहंकारोनरोपाधिरस्यतिरस्कारस्तस्मिन् [illegible]
शरीरस्थोपिविद्वस्त्वात्नविष्णुर्बद्धयतेकचित् । अविद्वत्त्वात्तुतत्रैवदेहेजीवस्तुबद्धयते । स्वप्नदृग्वदिमेजीवाहरिःस्वप्नोत्थितोयथा । सदातमोविहीनोपिज्ञापनार्थमुदीर्यतेइत्यनेन आत्मनोवशगैर्जीवैरात्मनो
वशगेषुच। दुःखेषुगृह्यमाणेषुमनआदिभिरिंद्रियैः । अहंदुःखीतिनैवेशोह्यहंकुर्यात्परःपुमान् । जीवगःवेनतद्दुःखंविष्णुःपश्यतिसर्वदा। अतोनदुःखभाग्विष्णुःस्वातंत्र्यात्पुरुषोत्तमः । पारतंत्र्यादहंदुःखीत्ये
वंजीवःप्रपश्यति । तस्मात्सदुःखभागुक्तोयावदीशःप्रसीदतीति अनेनचानयोःश्लोकयोरर्थोविवृतइति जीवगंचेतितदुःखंविष्णुःपश्यतिसर्वदेत्यनेनअभिचाकशीतीत्यस्यार्थःसूचितइति ९ जीवस्याह
स्ममित्यभिमानएवानर्थप्रवाहहेतुरित्याह दैवेति दैवाधीनेस्मिन्शरीरेवर्तमानोऽबुधोऽज्ञोजीवःअस्मिन्कर्मण्यहंगुणभूतोऽस्वतंत्रईशाधीनः इतिभाव्येनभावनीयेनकर्मणाअहमेवकर्तास्मीतिमन्यमानस्त
न्नशरीरेनितरांबध्यतेइति अस्वतंत्रःस्वतंत्रोस्मीत्येवंजीवःप्रभावयन् बध्यतेहीशकोपेनराजभावेनभृत्यवदितिवचनात्स्वातंत्र्यकर्तृत्वाभिमानोत्रविवक्षितइति अत्राप्यस्वातंत्र्यंदैवाधीनइत्यनेनसूचि
तम् १० कालोपिशरीरशीर्णतामीरयतीतिशरीरस्यकालाधीनत्वंचतर्हिकथंकारंनबध्यतइतितत्राह एवमिति एवंशयनादिषुस्वस्यस्वातंत्र्याभिमानेनबध्यमानस्ततएवापारदुःखमनुभुंजन्विद्वा
नेषुविरक्तःतत्रतत्रहरिःस्वातंत्र्यंविद्वांस्तत्रतत्रशरीरयात्रार्थगुणान्विषयानाददन्स्वीकुर्वस्तथाकर्तृत्वाभिमानिवन्नबध्यतइत्यन्वयः गुणान्पुण्यलक्षणानाददन्उपार्जयन्निति वा भेदज्ञानिनएवबद्धत्वंनाभे

इंद्रियैरिंद्रियार्थेषुगुणैरपिगुणेषुच ॥ गृह्यमाणेष्वहंकुर्यान्नविद्वान्यस्त्वविक्रियः ९ दैवाधीनेशरीरेऽस्मिन्गुणभाव्येनकर्मणा ॥ वर्त्तमानोऽबुधस्तत्रकर्त्ता
स्मीतिनिबद्धयते १० एवंविरक्तःशयनआसनाटनमज्जने ॥ दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु ११ नतथाबद्धयतेविद्वांस्तत्रतत्राददन्गुणान् ॥ प्रकृति
स्थोप्यसंक्तोयथाखंसवितानिलः १२ वैशारद्येक्षयासंगशितयाच्छिन्नसंशयः ॥ प्रतिबुद्धइवस्वप्नान्नानात्वाद्विनिवर्तते १३ यस्यस्युर्वीतसंकल्पाःप्राणें
द्रियमनोधियाम् ॥ वृत्तयःसविनिर्मुक्तोदेहस्थोपिहितद्गुणैः १४ यस्यात्माहिंस्यतेहिंस्रैर्येनकिंचिद्यदृच्छया ॥ अर्चतेवाकचित्तत्रनतुविक्रियतेबुधः १५
नस्तुवीतनिंदेतकुर्वतःसाध्वसाधुवा ॥ वदतोगुणदोषाभ्यांवर्जितःसमदृङ्मुनिः १६

दज्ञानिनइत्यनेनोच्यतेइतिकिंनस्यादितिचेन्न नित्यबद्धोपिजीवोयआत्मनोनित्यबद्धताम् । मिष्णुनानित्यमुक्तत्वंतस्यवेत्तासमुच्यते । तदधीनत्वबंधेतुविद्यमानेप्यदुःखभाक् । देहस्थोपिनदुःखीस्याद
न्यवत्किमुमुक्तिगइतिवचनात्जीवभिन्नविष्णुज्ञानाद्बंधमोक्षइत्यस्योपपत्तेः । एतद्व्याचष्टेप्रकृतिस्थोपीति असंगेनवैराग्येणशितयातेजितयावैशारद्यावि शारदमूलयाविष्णोरनुग्रहादु
त्पन्नयाईक्षयाअपरोक्षज्ञानेनछिन्नसंशयोतएवासंसक्तः प्रकृतिस्थःशरीरस्थोपिज्ञानीस्वप्नात्प्रतिबुद्धइवनानात्वान्मिथ्याज्ञानान्निवर्ततइत्यन्वयः । नानात्वमितिवैमि थ्याज्ञानंकुत्रचिदुच्यते । वस्तुयाथा
त्म्यतोन्यत्वाज्ज्ञानस्योज्झोविवक्षितइतिवचनात् नानात्वशब्दस्यामिथ्याज्ञानवाचित्वस्यप्रसिद्धेःउक्तंयुक्तम् ११ १२ १३ वाय्वाकाशयोःसर्वत्रसत्वे पितान्नमित्तलेपान्वयोयथानास्तितथेतिपूर्वोक्त
जीवन्मुक्तयवस्थामेवविशदयति यस्येति यस्यप्राणेंद्रियमनोधियांचेष्टादिलक्षणावृत्तयःवीतसंकल्पाःफलानुसंधानरहिताःस्युःसदेहस्थोपितद्गुणैर्देहधर्मैर्निर्मुक्तोनारिकेलकपालमुक्तांतस्थनारिकेलवदित्य
न्वयः १४ यावच्छरीरपातंजीवन्मुक्तःकथंकारंतिष्ठतीत्यत्राह यस्येति आत्मादेहःमनोवाहिंस्रैर्हिंसाशीलैःप्राणाभिःयेनकिंचित्केनचिद्यदृच्छयाप्राप्तेनचंदनादिनातत्रतस्यामवस्थायांसबुधःनविक्रिय
तेइति १५ एतद्विशदयति नस्तुवीतेति कुर्वतःपुरुषान्साध्वादिगदतोवागुणदोषाभ्यांअल्पेनतुच्छेनगुणेनदोषमात्रेणचवर्जितोनतुगुणमात्रेणवर्जितइत्यर्थः दोषश्चैवगुणश्चोभावीशतंत्रौनमेवशावित्यादिवा
क्यविरोधःसर्वगुणवर्जितइतिअंगीकारइतिभावः १६

तन्मतंकथमत्राह नकुर्यादिति आत्मारामोमुनिःसाधुकुर्याद्वदेद्वध्यायेच्चअसाधुनकुर्यान्नवदेन्नध्यायेच्चशुभजीवानुद्दिश्येतिशेषः अतीतानागतज्ञानीत्रैलोक्योद्धरणक्षमइत्यादेः साधुनकुर्यादित्यर्थोनोपपद्यतेइति आत्मारामइत्यत्रऽऽत्मशब्देनपरमात्माएवोच्यतेनचीत्राद्यन्यतमः १७ तदेकनिष्ठेनभक्त्याधीतवेदादिशब्दराशिःफलवान्स्यादन्यथानिष्फलएवेत्याह शब्देति परेब्रह्मणिनानिष्णीयान्निष्ठितोनियतोनस्याद्यदितर्हितस्यपुंसःश्रमःवेदाध्ययनायासोभ्रममज्ञानंतमसिपरिभ्रमणंवाफलमस्येतिभ्रमफलःस्यात् अधेनुमदोग्धींगांरक्षतइवयथातथास्यतदाज्ञानपरिभ्रमएवावशिष्यते नतुजीवनफलमितिभावः यद्वाभ्रमफलःप्रयत्नफलःश्रमःकायक्लेशः ।स्थितिशब्देननियमःक्वचिज्जीवनमुच्यते । उत्थितत्वंक्वचिच्चैवक्वचिद्गतिविरोधितेति अत्रनिष्णातःनिष्णीयादितिशब्देननियमउच्यतइतिभावः अधेन्वाचरन्निमायथैषवाचंशुश्रुवाँअफलामुष्पामितिश्रुतेः १८ एतमेवार्थदृष्टांतबाहुल्येनद्रढयति गांदुग्धेति पराधीनंपरप्रेष्यंकुर्वतंदेहंअतीर्थीकृतंविषयोपरक्तंकृष्णगोषुसंपन्नक्षीरतमा सतीसासर्ता साध्वीपतिव्रता परान्नःपरपिंडादःपरजातःपरोधितः सोयंमनुष्यलोकःपुत्रेणजय्यः अनपत्यंपरंमन्येकदपत्याच्छुचांपदात् । नार्थस्यधर्मैकांतस्यकामोलाभायहिस्मृतः । वाचस्तुगोविंदगुणस्तवेफलमित्यादेः यस्त्वेवंविधंगवादिकंरक्षतिसदुःखदुःखी दुःखेधतमसिनित्यदुःखानुभवोवर्ततइत्यर्थः १९ अन्यदेवताप्रसंगपरदाचोरक्षणेफलंकिंनस्यादत्राह यस्यामिति यस्यजगतःस्थित्युद्भवप्राणनिरोधलक्षणंकर्म दुग्धदोहांतुगांरक्षेत्क्षीरमात्रप्रयोजनः । यथातद्वद्धरेरन्यवाचोधारणमिष्यतेइतिवचनादन्यविषयवाचानित्यानंदलक्षणमोक्षफलंनस्यादतोमुमुक्षुःतन्नकुर्यादतोतत्त्वजिज्ञासाऽनर्थकरीतिमज्जिज्ञा

नकुर्यान्नवदेत्किंचिन्नध्यायेत्साध्वसाधुवा ॥ आत्मारामोनयावृत्त्याविचरेज्जडवन्मुनिः १७ शब्दब्रह्मणिनिष्णातोननिष्णीयात्परेयदि ॥ श्रमस्तस्यभ्रमफलोह्यधेनुमिवरक्षतः १८ गांदुग्धदोहामसतींचभार्यांदेहंपराधीनमसत्प्रजांच ॥ वित्तंत्वतीर्थीकृतमंगवाचंहीनांचयोरक्षतिदुःखदुःखी १९ यस्यांनमेपावनमंगकर्मस्थित्युद्भवत्राणनिरोधमस्य ॥ लीलावतारेहितकर्मवास्याद्ध्यांगिरंतांबिभृयान्नधीरः २० एवंजिज्ञासयापोह्यनानात्वभ्रममात्मनि ॥ उपारमेतविरजंमनोमय्यर्प्यसर्वगे २१ यद्यनीशोधारयितुंमनोब्रह्मणिनिश्चलम् ॥ मयिसर्वाणिकर्माणिनिरपेक्षःसमाचर २२ श्रद्धालुर्मेकथाःशृण्वन्सुभद्रालोकपावनीः ॥ गायन्ननुस्मरन्कर्मजन्मवाभिनयन्मुहुः २३ मदर्थेधर्मकामार्थानाचरन्मदुपाश्रयः ॥ लभतेनिश्चलांभक्तिंमय्युद्धवसनातने २४ सत्संगलब्धयाभक्त्यामयिमांयउपासते ॥ सवैमेदर्शितंसद्भिरंजसाविंदतेपदम् २५ उद्धवउवाच ॥ साधुत्वउत्तमश्लोकमनःकीदृग्विधंप्रभो ॥ भक्तिस्त्वय्युपयुंजीतकीदृशीसद्भिरादृता २६

सैवपुरुषार्थसाधनं तद्भंतमुद्दिश्यनकुर्यान्नवदेदितिविधीयतेतत्त्वजिज्ञासुरिति २० उपसंहरति एवमिति वस्त्वयथार्थज्ञानंनानात्वभ्रमंमेवतत्त्वजिज्ञासयापोह्यनिरस्यउपारमेतप्रवृत्तिमार्गादितिशेषः नानात्वभ्रमोभेदभ्रमइतिमतं जीवस्येशत्वाविज्ञानंजीवानामेकतातथा । ईशस्यबहुताज्ञानमीशस्यानीशतातथा ॥ जगतोऽसत्यताज्ञानंनानात्वभ्रमउच्यते ॥ इत्यनेनविरुद्धत्वा न्नग्राह्यंचबुभूषुभिरिति २१ नन्वस्तुजीवन्मुक्तस्यसमर्थस्यहरौनिरंतरंमनोनिधायोपास्तिस्तदितरस्यमुमुक्षोरुपासनोपायःकथमितितत्राह यदिति कृतानिमयिसमर्प्यकुर्वाणानिमाद्वेषयत्वेनसमाचर २२ निष्कामत्वेनमामुद्दिश्यकर्मकुर्वाणस्येत्थंभावमाह श्रद्धालुरिति २३ मत्कथाश्रवणादिनाकिंफलंस्यादित्यतउक्तं लभतइति निरंतरस्मृतिफलांभक्तिंलभते २४ सापिसत्संगलब्धयाचेत्भगवत्पदपरोक्षज्ञानमुत्पद्यतेनस्वयोग्यमुक्तिंपिजनयतीत्याह सत्संगेति पदंवैकुंठादिस्थानम् २५ सद्भिरितिप्रस्तुतसल्लक्षणज्ञोप्युद्धवोलोकोपकारायतल्लक्षणंपृच्छति साधुत्वइति साधुत्वासाधुत्वयोर्मनःशुद्ध्यशुद्धिनिमित्तत्वात्साधुत्वेनवर्तमानानांपुंसांमनःकीदृग्विधंभवतिसाधवःकिंलक्षणाइत्यर्थः कीदृशींकिंलक्षणाभक्तिस्त्वय्युपयुंज्येतत्वद्दत्तमप्रसादयोगजननीसद्भिरादृतासंभाविता आदृतौसादरार्चितावित्यमरः २६

एतत्सद्भक्त्यालक्षणम् २७ स्पष्टार्थस्यदुरवबोधत्वादुष्परिहरइतिनेत्याह त्वंब्रह्मेति स्वेच्छयोपात्तंस्वीकृतंपृथग्वपुःशोभनाकारंवसुदेवादिशरीरंयेनसःस्वेच्छोपात्तपृथग्वपुः शुभाकारतनावपुरातियादवः
नित्यानंदशरीरोपिवसुदेवादिदेहगः ॥ प्रदर्शयेज्जनेस्वस्यानित्यंदेहादिवर्जितः ॥ वसुदेवादिदेहेषुप्रवेशस्तस्यभण्यते ॥ देहोपादानमितितुनह्यन्योदेहइष्यते ॥ अन्याभिमन्यदेहेषुप्रविष्टःसर्वदाहरिः ॥
नान्यानभिमतोदेहोविष्णोरस्तिकदाचन ॥ अतोऽशरीरोभगवान्पुत्रताभिमातिस्तुषा ॥ वसुदेवादिकानांतुसेवामिथ्यामतिर्भवेत् ॥ अन्याहंभावयुग्देहएवासौहरिरास्थितः ॥ नतदन्येषुदेहेषुक्वचित्तस्यप्रवे
शनम् ॥ ममपुत्रस्त्वयमितिभ्रामणायथदाहरेः ॥ वसुदेवादिदेहेषुतनूपात्तिस्तुसागतिः ॥ अनुपात्तशरीरस्यतनूपात्तिरितीष्यते ॥ तद्देहंपितृदेहत्वेऽपावृत्तेयतोहरिरितिएतदस्मिन्नर्थेमानम् २८ भगवा
न्सल्लक्षणंवक्तीत्याह भगवानिति सर्वदेहिनामकृतद्रोहःअनवद्यआत्मामनोयस्यसतथा २९संक्षिप्तंकिंचनप्रश्नयोग्यंधनंनविद्यतेइत्यकिंचनः संकोचेकिंचनव्यर्थेमुधेतियादवःअनीहोनिषिद्धाचरणवर्जितः
वैष्णवधर्मेस्थिरःनिश्चलःअहमेवशरणंयस्यसमच्छरणःमुनिःमद्गुणमननशीलः ३० अप्रमत्तोविहिताचारेप्रमादरहितः गभीरात्माअनवगाह्यमनोगतिः आपदिधृतिमान् जिताःषट्कामादिगुणाः षड्वि
द्रियविषयावायेनसतथा अमानीआत्मन्यविद्यमानगुणाभिमानरहितःमानदःज्ञानोपदेष्टा कल्पःविहितक्रियाकरणनिपुणःकृपालुत्वंमनोधर्मः कारुणिकत्वंकायिकधर्मइतिएथगुक्तं कविःसर्वज्ञः

एतन्मेपुरुषाध्यक्षप्रपन्नायचकथ्यताम् २७ त्वंब्रह्मपरमंव्योमपुरुषःप्रकृतेःपरः ॥ अवतीर्णोसिभगवन्स्वेच्छोपात्तपृथग्वपुः २८ श्रीभगवानुवाच ॥
कृपालुरकृतद्रोहस्तितिक्षुःसर्वदेहिनाम् ॥ सत्यसारोनवद्यात्मासमःसर्वोपकारकः २९ कामैरहतधीर्दांतोमृदुःशुचिरकिंचनः ॥ अनीहोमितभुक्शांतः
स्थिरोमच्छरणोमुनिः ३० अप्रमत्तोगभीरात्माधृतिमान्जितषड्गुणः ॥ अमानीमानदःकल्पोमैत्रःकारुणिकःकविः ३१ आज्ञायैवगुणान्दोषान्मयादिष्टा
नपिस्वकान् ॥ धर्मान्संत्यज्ययःसर्वान्मांभजेत्सचसत्तमः ३२ ज्ञात्वाज्ञात्वाथयेवैमांयावान्यश्चास्मियादृशः ॥ भजंत्यनन्यभावेनतेमेभक्ततमामताः ३३
मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनम् ॥ परिचर्यास्तुतिप्रह्वगुणकर्मानुकीर्त्तनम् ३४ मत्कथाश्रवणेश्रद्धामदनुध्यानमुद्धव ॥ सर्वलाभोपहरणंदास्य
नात्मनिवेदनम् ३५ मज्जन्मकर्मकथनंममपर्वानुमोदनम् ॥ गीततांडववादित्रगोष्ठीभिर्मद्गृहोत्सवः ३६

३१ सामान्यलक्षणमुक्त्वाविशेषलक्षणमाह आज्ञायेति चशब्दएवार्थे योमयामदीयैरप्यादिष्टान्गुणान्दोषान्अपिआज्ञायसम्यग्ज्ञात्वैवस्वकान्स्वविहितान्धर्मान्भागवतसंज्ञान्मायिसंत्यज्यसमर्प्य
मांभजेत्सएवसत्तमइत्यन्वयः ३२ भक्तेरनेकविधत्वेपिउत्तमोत्तमायाःशुश्रूषितत्वेनपृष्टत्वात्तंप्रश्नंपरिहरति ज्ञात्वेति अथसतांलक्षणकथनानंतरमात्यंतिकभक्तलक्षणमुच्यते यद्वा शास्त्रगुरूपदेशतोभ
गवन्माहात्म्यंज्ञात्वाथचाविशेषेताज्ञात्वेतिवाप्सियामाहात्म्यज्ञानेनपुनःपुनर्विशेषद्योतयति तदुक्तं ज्ञात्वादिममहात्म्यंतत्रोत्सुकतयापुनः । विशेषाच्चविशेषेणज्ञात्वामामश्नुतेधिकमितिपरिमाणतो
यावानस्मिस्वरूपतोयोस्मिलक्षणतोयादृशोस्मीतितत्त्वेनयेऽनन्यभावेनात्युत्तमभक्त्यामांचैवंभजंतितेभक्ततमाःनिरतिशयभक्तामतानानात्वेनज्ञाताइत्यन्वयः अत्रतमप्रत्ययेनभक्तानांबाहुविध्यप्रकाशने
नभक्तेरपितथात्वंसूचयतीति ३३ इदानींसर्वसाधारणंभक्तिलक्षणमाह मल्लिंगेति अत्रकर्तव्यपदमध्याहृत्यान्वेतव्यंविधिप्रकारत्वात् सर्वलाभोपहरणंसर्वलाभस्यद्रव्यस्योपहरणं द्रावर्पणंदास्येन
सहात्मनिवेदनमात्मसमर्पणं यद्वा दास्येनसहात्मनिमनासिनिवेदनं १४ ३५ पर्वानुमोदनंउत्सवानुज्ञानंउत्सवंदृष्ट्वाहर्षोवा १६

३७ अर्चाप्रतिमा उद्यमःकरणादौप्रयत्नःउद्यानोपवनादिकर्मण्युद्यमोवा सद्मनिसंमार्जनोपलेपाभ्यांउद्यमोवा ३८ मह्यंममयत्गृहशुश्रूषणंतदमायया सैकमंडलवर्तनैःएकेनमुख्येनमंडलेनसहितैःअवांतरमंडलकरणैःकर्तव्यमितिशेषः सेकमंडलवर्तनैरितिकेचित्पठंति चंदनादिजलप्रोक्षणंसेकःमंडनमलंकारः वर्तनंप्रदक्षिणवर्तनं विशेषजीवनंप्रोक्तंवर्तनंगमनंतथेतिच ३९ मेनिवेदितंदीपावलोकंनोपयुंज्यात्स्वप्रयोजनायनस्वीकुर्यात् ४० हविराद्यर्पणेसुष्ठूपायमाह यद्यदिति आनंत्यायअनश्वरफलायमोक्षायेत्यर्थः अनंतंवैष्णवंकृतमितिस्मृतेः ४१ अधिकारिणांयोग्यतायाअनेकविधत्वेनफलविशेषायमदर्चनाधिष्ठानंचोपदिशामीत्याह सूर्यइति हेभद्र ४२ - तत्तत्साधनंचार्चनार्थमाह सूर्येत्विति गोष्ठेस्थितागा यवसादिनापूजयेदितिशेषः ४३ बंधुर्जामाताऽयमिति सत्कृत्यासत्कारेण हृदिस्वेहृदयाकाशेध्याननिष्ठयाउत्कृष्टध्यानेन वायौमुख्यप्राणेमुख्यधियासर्वदेवोत्तमोवायुरितिज्ञानेन तदुक्तं सर्वदेवोत्तमोवायुरितिज्ञानान्नचापरं । प्रियमस्तिहरेःकिंचित्तथावायोर्हरेर्विदइति हेररुत्तमत्वविदःवायोरपीत्यर्थः । कुतः भारतीवायुलक्ष्मीनामात्मनश्चयथाक्रमं आधिक्यज्ञानतोविष्णुःसर्वतःसंप्रसीदतीतिवचनात् वायुर्भीमोभीमनादोमहौजाः इत्यनेनापिहेतुपू

यात्राबलिविधानंचसर्ववार्षिकापर्वसु ॥ वैदिकीतांत्रिकीदीक्षामदीयव्रतधारणम् ३७ ममार्चास्थापनेश्रद्धाममसद्मनिचोद्यमः ॥ उद्यानोपवनाक्रीडपुरमंदिरकर्मणि ३८ संमार्जनोपलेपाभ्यांसेकमंडलवर्तनैः ॥ गृहेशुश्रूषणंमह्यंदासवद्यदमायया ३९ अमानित्वमदंभित्वंकृतस्यापरिकीर्तनम् ॥ अपिदीपावलोकंमेनोपयुंज्यान्निवेदितम् ४० यद्यदिष्टतमंलोकेयच्चातिप्रियमात्मनः ॥ तत्तन्निवेदयेन्मह्यंतदानंत्यायकल्पते ४१ सूर्योग्निर्ब्राह्मणोगावोवैष्णवःखंमरुज्जलम् ॥ भूरात्मासर्वभूतानिभद्रपूजापदानिमे ४२ सूर्येतुविद्ययात्रय्याहविषाग्नौयजेतमाम् ॥ आतिथ्येनतुविप्राग्र्येगोष्ठेगायवसादिना ४३ वैष्णवेबंधुसत्कृत्याहृदिस्वेध्याननिष्ठया ॥ वायौमुख्यधियातोयैद्रव्यैस्तोयपुरस्कृतैः ४४ स्थंडिलेमंत्रहृदयैर्भोगैरात्मानमात्मनि ॥ क्षेत्रज्ञंसर्वभूतेषुसमत्वेनयजेतमाम् ४५ धिष्ण्येष्वेतेषुमद्रूपंशंखचक्रगदांबुजैः ॥ युक्तंचतुर्भुजंशांतंध्यायन्नर्चेत्समाहितः ४६ इष्टापूर्तेनमामेवंयोयजेतसमाहितः ॥ लभतेमयिसद्भक्तिंमत्स्मृतिंसाधुसेवया ४७ प्रायेणभक्तियोगेनसांख्येनचविनोद्धव ॥ नोपायोविद्यतेसम्यक्प्रायणंहिसतामहम् ४८ अथैतत्परमंगुह्यंशृण्वतेयदुनंदन ॥ सुगोप्यमपिवक्ष्यामित्वंमेभृत्यःसुहृत्सखा ४९ इतिश्रीभा०महापुराणेएकादशस्कंधेभगवदुद्धवसंवादेएकादशोऽध्यायः११

र्वकत्वेनवायोःसर्वदेवोत्तमत्वादुक्तएवार्थः । तस्माद्वायुरेवव्यष्टिर्वायुःसमष्टिरयंपुनःमृत्युंजयतियएववेदेत्यनेनचवायुज्ञानस्यापमृत्युंजयत्वोक्तेश्च । पंचभूतमनोबुद्धिरुद्राणांप्रतिदेहकं । बाह्यतश्चापिनेतृत्वाद्वायुर्व्यष्टिःसमष्टिकइतिवचनेनवायोर्व्यष्टिसमष्टिचसम्यक्ज्ञात्वामनोयुंज्यात् द्रव्यैःपुष्पैः ४४ मंत्रहृदयैर्नमोंतैर्मंत्रैः आत्मनिस्वशरीरेमनासिवाआत्मानमंतर्यामिणं क्षेत्रज्ञंजीवांतर्यामिणंसर्वभूतेषुसमत्वेनएकप्रकारेणविकारभेदरहितेनस्थितंभोगैःस्रग्गंधादिधनैः भोगोराज्येधनेसौख्येइति । आत्मशब्देनात्रजीवःकिंनस्यात्तस्यपूजनस्यतंत्रेषुविहितत्वात् । क्षेत्रज्ञःपुरुषोह्यात्मासंसारीचेतनोमतइत्यभिधानाच्चेतिचेन्न आत्मनिस्थोहरिःपूज्यआत्मनामाशनादिकैः । तत्संबंधादात्मशब्दोजीवस्याप्युपचारतइतिवचनादात्मामुख्योहरिरेवेतिज्ञायते । तत्रविधानस्यहरेरधिष्ठानत्वेनपीठार्चनवत्तदर्चनोपपत्त्यासार्थकत्वात् ४५ एतेष्वधिष्ठानेषुध्यानप्रकारमाह धिष्ण्येष्विति धिष्ण्येषुस्थानेषु ४६ पूजाफलमाह इष्टेति ४७ प्रायेणेत्यवधारणंसांख्येनयथार्थज्ञानेन सतांप्रकर्षेणायनमाश्रयः ४८ उत्तरध्यायेवक्ष्यमाणार्थंप्राशस्त्यंकथयति अथेति वक्तव्येहेतुमाह भृत्यइति। ज्ञानेनभर्तुंयोग्यःसुपूजितंहृन्मनोयस्यसुहृत् आपादिहितकर्तृत्वात्सखा ४९ इतिश्रीभा०म०एकादश०वि०टी०एकादशोध्यायः११

भगवद्गुणोत्कर्षज्ञानपूर्विकाभक्तिरेवपरमपुरुषार्थातरंगमितांममथैसमर्थयते तत्रादागुणात्कर्षज्ञानानानुरक्तपागादानाववाप्तपुरुषार्थपलावनत्वनपवादात्याह [illegible]
करोति त्यागोदानं यथामयिसंगःगुणसंप्रीतिर्भक्तिपूर्विकासर्वपूर्णगुणत्वमतिर्यथामामवरुंधेद्वशीकरोतितथायोगादयोनरोधयंति संगस्तुगुणसंप्रीतिर्गुणवत्त्वेतिनिश्चयात् । सचेद्धरौमवेत्तेनमुच्य
तेनात्रसंशयः । अपरोक्षदृशेर्हेतुर्भवेत्सस्याद्यदिक्षमः । अन्यथासुखभागेवमदृशिर्मोक्षकारिणमितिवचनादुक्तएवार्थःनतुसंबंधमात्रम् १ २ भगवान्उक्तमर्थंप्रख्यापयति मत्संगेनेति दैतेयाःप्रह्ला
दादयः बहवोमत्संगेनमत्पदंप्राप्ताःत्वाष्ट्रकोवृत्रःअवंतिकोऽवधूतोभिक्षुः यातुधानाःइत्याद्युक्तंगृंगग्राहिकतयादर्शयितुंबिभीषणइत्यादिपुनर्वचनं वणिक्तुलाधारःमयोनामाशूद्रःतेगोप्यादयोमामुपाग
ताइत्यन्वयः ३ ४ ५ ६ साधनंविनात्वामुपागताश्चेत्सर्वेकिंनामुवंतीति तत्राह मत्संगादिति गुणसंप्रीतिरपिनवेदादिभ्यउत्पन्नेत्याह नाधीतेति ७ तर्हिकेनेत्यत्राह केवलेनेति ।
केवलेननिर्दोषेणभावेनभक्तियोगेनकेवलेनेतिविशेषणान्नद्वेषयुक्ताभक्तिर्मुक्तिसाधनम् । ज्ञात्वापिहरिविद्वेषीतमोयातिनसंशयइतिवचनात् । भावेनापरोक्षज्ञानोत्पादकस्वभावेनेतिविशेषणाद्विशेषरू
पाज्ञानेपिमोक्षोनियतः विशेषरूपस्याज्ञोपिगुणवत्त्वेतिनिश्चयः । गुणसंप्रीतिमात्रित्यंतंदृष्ट्वामुक्तिमेष्यतीत्युक्तेः । ज्ञानोत्पत्तेःपूर्वमपिभगवल्लीलाद्यनुकारेणपरमानंदःस्यादित्यतोभावेनेति । अथवासुखभा

श्रीभगवानुवाच ॥ नरोधयतिमांयोगोनसांख्यंधर्मएवच ॥ नस्वाध्यायस्तपस्त्यागोनेष्टापूर्तंचदक्षिणाः १ व्रतानियज्ञाश्छंदांसितीर्थानियमायमाः
यथाऽवरुंधेन्मत्संगःसर्वदुःखापहोहिमाम् २ मत्संगेनहिदैतेयायातुधानामृगाःखगाः ॥ गंधर्वाप्सरसोनागाःसिद्धाश्चारणगुह्यकाः ३ विद्याधरामनुष्ये
षुवैश्याःशूद्राःस्त्रियोंत्यजाः ॥ रजस्तमःप्रकृतयस्तस्मिंस्तस्मिन्युगेनघ ४ बहवोमत्पदंप्राप्तास्त्वाष्ट्रकावंतिकादयः ॥ वृषपर्वाबलिर्बाणोमयश्चाथविभी
षणः ५ सुग्रीवोहनुमान्ऋक्षोगजोगृध्रोवणिक्पथः ॥ व्याधःकुब्जाव्रजेगोप्योयज्ञपत्न्यस्तथापरे ६ तेनाधीतश्रुतिगणानोपासितमहत्तमाः ॥ अव्रतातप्त
तपसोमत्संगान्मामुपागताः ७ केवलेनहिभावेनगोप्योगावःखगामृगाः ॥ येन्येमूढधियोनागाःसिद्धामामीयुरंजसा ८ यंनयोगेनसांख्येनदानव्रततपो
ध्वरैः ॥ व्याख्यास्वाध्यायसंन्यासैःप्राप्नुयाद्यत्नवानपि ९ रामेणसार्धंमथुरांप्रणीतेश्वाफल्किनामय्यनुरक्तचित्ताः ॥ विगाढभावेननमेवियोगतीव्राधयो
न्यदृदृशुःसुखायताः १०

गेवस्याद्यावदर्शनोपगमइति स्मृतेः ८ भक्तिर्रहितंज्ञानमपिनमत्प्रापकंकिमुतान्यत्साधनजालमितिभावेनाह यमिति। यंमांराहुवद्यत्नवानापि । हरिसंगविहीनस्तुहरेर्दर्शनवानपि । नमुच्यतेखिलज्ञोपितमो
यातिविनिश्चयात् । गुणैरन्यैर्विहीनस्तुतद्भक्तेष्वापिचक्रमात् । संगवान्सुखभागेवस्याद्गुणैर्मुक्तिमेतिवा । स्वभक्तसंगहीनस्यव्युत्क्रमात्संगिनोपिवा । स्वसंगविघ्नकृद्विष्णुस्तत्सज्जेत्तेषुतत्रचेति । अनेनभगव
द्भक्तेस्तद्भक्तभक्तेरन्वयव्यतिरेकौदर्शितावितिध्वनितमित्यनेनश्लोकेनज्ञायते । गोपिकाद्यादिवंगत्वाहरिंज्ञात्वापथातथं । परंपदंययुःपूर्वसंगादेवसुमोचिताइतिवचनाद्भक्तिजानितज्ञानेनमुक्तिमाप्नोतिनकेव
लज्ञानेनेत्यभिप्रायेणनसांख्येनेत्युक्तम् । उपलक्षणमेतत् दानादिष्वप्यनुसंधेयमेतत् । श्रोतव्यंचश्रुतंचैववक्तव्यंकार्यमेवच । निवर्त्यचहरेःपूजेत्येवंकुर्यान्नचाक्रमात् । एवंकर्तातुसंन्यासीसर्वोत्सर्गाद्धरौस्मृ
तः । अन्यथानैवसंन्यासीनिष्क्रियोपिशिलायथेत्येवंलक्षणवान्संन्यासीनतुशिलावन्निष्क्रियइत्यभिप्रेत्यवेणुमात्रभृत्संन्यासीनमामाप्नोतीति । किंच नाहंकर्तातुसर्वस्यकर्तैकोविष्णुरव्ययः । इतिविज्ञातुस
न्यासीनान्यथातुकथंचन । मयिसर्वाणिकर्माणिसंन्यस्याध्यात्मचेतसा । निराशीर्निर्ममोभूत्वायुद्ध्यस्वविगतज्वरइतिलक्षणांतरवानेवसंन्यासीनरक्तपटधारीत्यर्थः ९ गोपीनांमयिभक्तिरपरोक्षज्ञानांतरं
गानतुरतिनिमित्तेतिप्रकटयितुंवक्ति रामेणेति तागोप्योमत्तोन्यद्वस्तु सुखायनदृदृशुरित्यन्वयः १०

यासांक्षपाःप्रेष्ठतमेननीतामयैववृंदावनगोचरेण ॥ क्षणार्धवत्ताःपुनरंगतासांहीनामयाकल्पसमाबभूवुः ११ तानाविदन्मय्यनुसंगबद्धधियःस्वमात्मा
नमदस्तथेदम् ॥ यथासमाधौमुनयोब्धितोयेनद्यःप्रविष्टाइवनामरूपे १२ मत्कामारमणंजारमस्वरूपविदोबलाः ॥ ब्रह्ममांपरमंप्रापुःसंगाच्छतसहस्र
शः १३ तस्मात्त्वमुद्धवोत्सृज्यचोदितांप्रतिचोदनाम् ॥ प्रवृत्तंचनिवृत्तंचश्रोतव्यंश्रुतमेवच १४ मामेकमेवशरणमात्मानंसर्वदेहिनाम् ॥ याहिसर्वात्म
भावेनयास्मिन्नस्त्यकुतोभयम् ॥ १५ ॥ उद्धवउवाच ॥ संशयःशृण्वतोवाचंतवयोगेश्वरेश्वर ॥ ननिवर्ततआत्मस्थोयेनभ्राम्यतिमेमनः ॥ १६ ॥ श्री
भगवानुवाच ॥ यएषजीवोविवरप्रसूतिःप्राणेनघोषेणगुहांप्रविष्टः ॥ मनोमयंसूक्ष्ममुपैतिरूपंमात्रास्वरोवर्णइतिस्थविष्ठम् १७ यथानलःखेऽनिलबंधुरु
ष्माबलेनदारुण्यधिमथ्यमानः ॥ अणुःप्रजातोहविषासमिध्यतेतथैवमेव्यक्तिरियंहिवाणी १८ एवंगतिःकर्मरतिर्विसर्गोघ्राणोरसोदृक्स्पर्शःश्रुतिश्च ॥
संकल्पविज्ञानमथाभिमानःसूत्रंरजःसत्त्वतमोविकारः ॥ १९ ॥ ॥ ॥

यासामिति । ताःक्षपाः ११ आत्मानं । स्वस्वपरूपम् । अदःस्वर्गमिदंजगत् तत्रदृष्टांतमाह यथेति । समाधौमुनयोनामरूपेयथानाविदंति अब्धितोयेप्रविष्टानद्यश्च अनेनभक्त्यतिशयो दर्शितइति १२ तत्फलमाह मत्कामाइति मामेवकामयंतइतिमत्कामाःअस्वरूपविदोऽबलाःजारंमांरमणंमत्वासंगान्मांपरमंज्ञात्वामामापुरित्यन्वयः आसांब्रह्मज्ञानंकथंउदभूत् उच्यते संसारंज रयतीतिजारःतंनित्यानंदप्रदत्वेनरमयतीतिरमणःतंसर्वतोविलक्षणस्वभावस्यास्यविष्णोःस्वरूपंविदंतीत्यस्वरूपविदःइत्येवंगुणसंप्रीतितोमांब्रह्मज्ञात्वेति गोपिकाद्यादिवंगत्वाहरिंज्ञात्वायथातथमित्येत दत्रापिप्रमाणत्वेनोदाहर्तव्यमितिज्ञातव्यम् १३ यतोमुमुक्षूणामहमेवशरणमतस्त्वमपिमांशरणंव्रजेत्युपसंहरति । तस्मादिति । प्रतिकर्मचोदितांचोदनांनानाकर्मविधिमुत्सृज्यप्रवृत्त्यादिकंचमयिसमर्प्य सर्वदेहिनामात्मानंस्वामिनंयस्मिन्नकुतोभयमस्तितमेकंमां सर्वात्मभावेनसर्वस्वामिबुद्धिक्रियायाशरणंयाहीत्यन्वयः १४ १५ प्रथमतोवायौमुख्यधियेत्युक्ताविशेषतोगोपिकाप्रशंसनंकृतमितिसंशयबी जंहृदिकृत्वोद्धवश्चोदयति संशयइति भक्तेषुवायोःसर्वोत्तमत्वमुक्ताविशेषतोगोपीस्तुवतस्तववाचंशृण्वतोममात्मस्थोमनोगतःसंशयोवायुरुत्तमोगोप्योवेत्येवमाकारोननिवर्तते प्रत्युतयेनवचनेनमेम नोभ्राम्यति निर्धारितैककोटिस्थितंनेत्यन्वयः १६ गोपिकाअपिमामापुःकिमुवाय्वाद्याइतिगोपिकाप्रशंसनंकृतमितिपरिहारंहृदिकृत्वावायुरेवसर्वैर्गुणैःसर्वोत्तमःसएवहिरण्यगर्भश्चेतिदर्शयितुंभ

गवान्हिरण्यगर्भस्यसर्वोत्तमत्वंवक्ति यएषइति योविवरप्रसूतिः विशेषेणवराणामहंकाराद्यभिमानिनांप्रसूतिरुत्पत्तिः यस्मात्सतथा उत्पादकइत्यर्थः । एषजीवःजीवप्राणधारणइतिधातोःप्रकृष्टानंदलक्षणस्यहरेर्विशेषाधिष्ठानत्वात्तन्नामाब्रह्मा । प्राणेन विष्णुनाघोषेणवेदात्मिकयाप्रकृत्यालक्ष्म्याचसहगुहांरुद्रादीनांहृदयगुहांप्रविष्टःसन्मनोमयंरुद्रादीनांमनसिनियंतृत्वेनस्थितमतएवसूक्ष्मंपरमाणुकल्पंरूपमुपैति । किंच मात्रास्वरोवर्णइतिमात्रास्वरवर्ण त्रयात्मकंवेदाख्यंस्थविष्ठंरूपमुपैति १७ अनेनवेदादीनिविष्णुप्रकृतिब्रह्मणामभिव्यक्तिस्थानानीत्युक्तं तत्रप्रकृतिब्रह्मणोर्विशेषेणवेदादिकंममव्यक्तिस्थानमित्याह यथेति । अनिलोबंधुर्यस्य सतथाउष्मोष्णः अनलोदारुणिखेबलेनमथ्यमानोअणुत्वेनप्रजातोहविषाघृतेनयथासमिध्यतेतथैयंवेदवाणीमेव्यक्तिःव्यक्तिस्थानंवेदवाण्येवविशेषतोमत्तत्त्वव्यंजिकेत्यर्थः १८ प्रकृत्यादीनांव्य क्तिस्थानत्वेपिब्रह्मश्रोत्रादीन्यपिवेदादिवद्विशेषतोव्यक्तस्थानानीत्याह एवंमिति । पदादीनिगत्यादिशब्दवाच्यानिइंद्रियेंद्रियविषययोरुभयोर्ग्रहणायैवमुक्तं संकल्पोमनः । विज्ञानंबुद्धिःअभिमानोंत्रः करवृत्तिविशेषव्यंजकंतस्यरूपांतरम् । सूत्रंवायुः । सत्वसहितंतमःविकारोब्रह्मांडःएतानिहेरेरधिष्ठानरूपाणिभवंतीतिज्ञातव्यानि ॥ तदभिमानिन्योदेवताश्च यस्तमसितिष्ठन्श्रोत्रेतिष्ठन्नित्यादेः १९

१ मयिकाभोयाषांताइ०ता० । २ अतिप्रियतमेन मया ।

विवरप्रसूतिरित्युक्तंकारणत्वंगुहांप्रविष्टइत्युक्तव्याप्तिंचविविच्यसोदाहरणमाह अथहांते । प्रारभ्याचातरणवणाद्यात्मकवदादसवशब्दवाच्यापञ्जयानब्रह्मानयामकत्वनसवात्तमत्वाज्जावात्त्रवृ
ज्ज्ञानानंदबलात्मकोव्यक्तःसूक्ष्मःजगतामाद्यएकएवाहंकारादिपृथिव्यंतानिस्वसृष्टानिकार्याण्यनुप्रविश्य विशेषेण श्लिष्टशक्तिरनपगतसामर्थ्यएवतत्तन्नियामकरूपैर्बहुधैवभाति तत्त्ववादिनामितिशेषः
कथमिवयद्वद्यथाकलमादिदीजानियानिभूमिलक्षणांप्रतिपद्यबह्वंकुरागिभवंतीति एवंपरमात्मानुगृहीतोब्रह्माहंकारादिपुबहुधाव्यक्तीभवतीति । योविवरप्रसूतिर्योनिद्वाराप्रसूयतेएषजीवइतिसंज्ञांलभत
इत्यन्यथाव्याकुर्वतेतन्मतं सुपर्णशेषरुद्रादिप्रसूतिस्तुचतुर्मुखः । सर्वजीवोत्तमोजीवोगुणैर्ज्ञानसुखादिभिः । विष्णुभक्त्यादिभिःसर्वैर्नियमात्सार्वकालिकं । मुक्तावपिनसंदेहःसहिदेवेनविष्णुना । प्राणः
प्राणेनजगतामीशेनरमयातथा । वेदात्मिकयावाचसहितःसूक्ष्मःसन्मनासिस्थितः । वीद्रादीनांतुसर्वेषांमात्रावर्णस्वरेषुच । स्थूलरूपीसदातिष्ठन्नेवंश्रोत्रादिकेषुच । सर्वेषांप्रेरकोह्येकोज्ञानानंदबलैस्त्रिवृत् ।
नित्यशक्तिःसर्वगःसन्बहुधैवप्रतीयते । तस्मिन्नोतमिदंसर्वपटेलक्षणतंतुवत् । सएववायुरुदिष्टोवायुर्हिब्रह्मतामगात् । विशेषेणहरेर्व्यक्तिस्थानान्येतानिसर्वशः । मनआदीन्यहंकारोब्रह्मावेदात्मिकार
मा । त्रिगुणात्मिकाचसैवश्रीःसैवोक्तासंविदात्मिका । तस्याअपिनियंतेकोविष्णुःसर्वेश्वरेश्वरः । यथादारुषुसूक्ष्मःसन्मथितोग्निःसमिध्यते । तथावेदादिपुहरिर्मथितःसंप्रदृश्यते । व्यक्तिस्थानान्यथैता
निवेदादीनिहरेर्विदुरित्यनेनप्रमाणवाक्येननिरस्तमितिनास्माभिस्तद्दूषणायप्रयत्यते । मनसिव्यक्तितांयामितस्माद्व्यक्तिर्हिमेमनइत्येतत्स्पष्टंच २० नन्वेवंतर्हिचतुर्मुखएवजगदाकारेणविवर्ततइतिकिं
नस्यादत्राह यस्मिन्निति । यस्मिन्विरिंचेतंतूनांवितानस्यपद्माद्याकारस्यसंस्थावास्थितिःपटाधारवयातंतुविरचितपद्माद्याकारस्यपटाद्यथाभेदःप्रत्यक्षसिद्धस्तथाविरिंचाधारंजगत्विरिंचाद्भिन्नंउपल

अयंहिजीवस्त्रिवृदब्जयोनिरव्यक्तएकोजगतांयथाद्यः ॥ विश्लिष्टशक्तिर्बहुधैवभातिबीजानियोनिंप्रतिपद्ययद्वत् २० यस्मिन्निदंप्रोतमशेषमोतंपटेयथा तंतुवितानसंस्था ॥ यएषसंसारतरुःपुराणःकर्मात्मकःपुष्पफलेप्रसूते २१ द्वेअस्यबीजेशतमूलस्त्रिनालःपंचस्कंधःपंचरसप्रसूतिः ॥ दशैकशाखोद्विसुप र्णनीडस्त्रिवल्कलोद्विफलःखंप्रविष्टः २२

क्षणमेतत् । विरिंचश्चश्रीश्चैवमदाधारोमाद्भिन्नाविति तदुक्तं यथैववस्त्रेदीर्घेचतिर्यग्वापिसुसंस्थिता । तंतुभिःक्रियमाणैवपद्माद्याकारसंस्थितिः । यथाजीर्णानिवस्त्राणितंत्वाधाराणिवापुनः । कंथावयव
भूतानितद्वदेतच्चतुर्मुखे । सोपितद्धरौनित्यंसंश्रिताश्रीरपिस्फुटमिति ॥ उक्तंविशिनष्टि यएषइति । यएषसंसारतरुर्जगद्वृक्षःपुष्पफलेस्वर्गमोक्षौप्रसूते सविरिंचेओतप्रोतश्चइतिशेषः २१ जगद्वृक्ष
स्यब्रह्मबीजमित्युक्तंतद्विवृणोति द्वेअस्येति । जगद्वृक्षस्यबीजेद्वेब्रह्माचैवसरस्वती । मूलभूतानिकर्माणिमनोबुद्धिरहंकृतिः । नालत्वेनसमुद्दिष्टाःखमाद्याःस्कंधसंज्ञिताः । एकादशेंद्रियाण्येवशाखास्तुत्रि
गुणास्त्वचः । प्रवृत्तंचनिवृत्तंचफलेअस्यप्रकीर्तिते। पुष्पमैहिकमुद्दिष्टंरसाःशब्दादयस्तयोः । प्रवृत्ताश्चनिवृत्ताश्चपक्षिणस्तत्रसंस्थिताः । वृक्षस्यपृथिवीवच्छ्रीर्विष्णुराकाशवायुवत् । तस्याअपिसदाधारएवं
ज्ञात्वाविमुच्यते इत्यनेनव्याख्यातोयंश्लोकः । तथापिस्पष्टत्वायकिंचिदुच्यते अस्यजगद्वृक्षस्यजलवच्चभूमिवच्चब्रह्मासरस्वत्यौद्वेबीजेव्यंजकेनतुवटबीजादिवदंकुरोत्पत्त्यनंतरंनाशाशिरस्के अतएवस्वका
र्यतोगुणतोरूपतश्चमहत्यौ शतमित्युपलक्षणंअनेकविधान्यसंख्यातानिकर्माणिमूलानियस्यशतमूलोजगत्तरुःत्रयोनालाअहंकारबुद्धिमनोभिमानिनोरुद्रेंद्रचंद्रायस्यसत्रिनालः । पंचाकाशादिभूतानिस्कं
धायस्यसपंचस्कंधः । पंचानांरसानांशब्दादीनांप्रसूतिर्यस्मात्सपंचरसप्रसूतिः । दशएकंचेंद्रियाणिशाखायस्यसएकादशेंद्रियशाखः । द्विविधाःसुपर्णाःप्रवृत्तिमार्गस्थानिवृत्तिमार्गस्थाश्चपक्षिणः । पुण्य
पापलक्षणपक्षवंतस्तेषांनीडंयस्मिन्सद्विसुपर्णनीडः त्रीणिसत्वरजस्तमोलक्षणानित्रिवल्कलानित्वचोयस्यसत्रिवल्कलः द्वेप्रवृत्तिनिवृत्तिलक्षणेफलेयस्यसद्विफलःखंविष्ण्वाख्यमाकाशंप्रविष्टःअत्रेदंतात्प
र्यं लक्ष्म्यादेरप्यायनात्बाह्योदवद्ब्रह्मादेरपिलयकर्तृत्वादग्निवदाधारत्वात्सुखदत्वाच्चवायुवदवकाशदत्वाच्चव्योमवद्विष्णुः बीजभूतावपिह्यस्यब्रह्माचैवसरस्वती । नरिष्येतेजगत्सृष्टौवटवृक्षादिबीजवत् । स्व

कार्यतेमहांतौचगुणतोरूपतस्तथा । पृथिव्युदकवत्तस्माद्बीजत्वंनतुबीजवत् । व्यंजकत्वान्नचाल्पत्वान्महाक्ष्मावद्रमास्मृता । अंडोमहाक्ष्मासंप्रोक्तस्ततःपृथ्व्युदकंतथा । जायतेनित्यशस्तस्माद्भुक्तंभुक्तं न हीयते । तत्राप्युदकवद्ब्रह्ममृद्वच्चापिसरस्वती । जलाधारायतोमृच्चसर्वाधाराव्यवस्थिता । अन्यथातुरजोभूतानीयतेवायुनाखिला । अथवासर्वनाशःस्याज्जलाधारातताःस्मृता । वटादिबीजवत्तस्यपुण्या पुण्यमुदीरितं । बाह्योदवच्चाग्निवच्चविष्णुरेवंप्रकीर्तितः इत्येतत् । व्रीह्यादिवत्तुमूलत्वंकर्मणांजगतःस्मृतं । उदवत्पृथिवीवच्चब्रह्मणोवाचएवच । मूलभूवाच्छ्रुयश्चैवमूलभूरंडमुच्यते । बाह्योदाग्नीरखंवत्तुविष्णो बींजत्वमुच्यते । इत्येतच्चप्रोक्तार्थंप्रमाणं । तत्तज्जीवदेहादिषुस्थित्वातत्तन्मनआदींद्रियगणंतत्तद्योग्यतानुसारेणश्रीहरिगुणोपसंहारेप्रेरयित्वाहरिभक्त्यादिसाधनसामग्रीसंपादनेनहरेःप्रीतिसमुद्रेम ग्नोब्रह्मासर्वाधिकारिभ्यउत्तमोत्तमइतिज्ञायते तदुक्तं देहेंद्रियमनश्चक्षुस्थितोभक्त्यादिसाधकः सुपर्णशेषरुद्रादेरापिब्रह्माचतुर्मुखः अतोभक्त्यादिकाःसर्वेगुणास्तस्यैवसर्वगाः । अतिरक्ताश्चसंपूर्णाःसु पर्णादेःशताधिकाः । सुपर्णादिभिरज्ञातास्तदभीमानवर्जिताः । ब्रह्मणस्तुपुनःसंतितेषांकर्ताजनार्दनः । तस्मात्सर्वाधिकोब्रह्मागुणैःसर्वैर्नसंशयः । वर्णस्थोवर्णनामासौस्वरस्थःस्वरनामकः । मनस्थश्चमनो नामातन्नामाचक्षुरादिगः । तस्यसर्वाणिनामानिमुख्यतःकवयोविदुः । तत्स्थानत्वादींद्रियादेर्वर्णाद्यैश्चोपचारतः । एवमस्योपचारेणविष्णोःसाक्षात्तुमुख्यतइति । अनेनमात्रास्वरोवर्णइतिक्रमेणेत्यादि नावर्णस्वरादीनांविष्णोरनंतरंचतुर्मुखेमुरुयत्वमुक्तमितिज्ञातव्यं किंच कृष्णप्रियाभ्योगोपीभ्योभक्तितोद्विगुणाधिकाः । महिष्योष्टौविनायास्ताःकथिताःकृष्णवल्लभाः । ताभ्यःसहस्रसमितायशोदानं दगेहिनी । ततोप्यभ्यधिकादेवीदेवकीभक्तितस्ततः । वसुदेवस्ततोजिष्णुस्ततोरामोमहाबलः । नततोभ्याधिकःकश्चिद्भक्त्यादौपुरुषोत्तमे । विनाब्रह्माणमीशंसहिसर्वाधिकःस्मृतः । इत्यनेनसर्वाधिकारि

अदंतिचैकंफलमस्यगृध्राग्रामेचराएकमरण्यवासाः ॥ हंसायएवंबहुरूपमिष्टंमायामयंवेदसवेदवेदम् २३ एवंगुरूपासनयैकभक्त्याविद्याकुठारेणशि तेनधीरः ॥ विवृश्च्यजीवाशयमप्रमत्तःसंपद्यचात्मानमथत्यजास्त्रम् २४ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेद्वादशोऽध्यायः ॥ १२ ॥

भ्योब्रह्मणोधिकभक्तिमत्त्वंगोपिकादिष्वपिभक्तितारतम्यमस्तीत्युक्तं अतोरामेणसार्धंमथुरांप्रणीतेश्वाफल्किनेत्यादौप्रतीयमानभक्तितारतम्याभावशंकानिरस्ता पापद्वेषादिकादोषाअवराणांनसंशयः । भक्त्यादिगुणपूगस्तुपराणामाविरिंचतः । स्वातंत्र्यात्सर्वदेहेषुस्थितानामपिसर्वशः । स्पृशंतेनैवदोषैस्तेगुणदानैकमत्पराः यदुकिंचेमाःप्रजाःशोचंत्यमेवासांतद्भवतिपुण्यमैवामुंगच्छति नहवैदेवान्पापंगच्छ तीति श्रुतिस्मृतिभ्यांप्रजार्जितभक्त्यादिगुणपूगस्पर्शएवमनआदींद्रियाणांअभिमानिदेवानांनतुतदर्जितपापादिस्पर्शइतिनिर्णीतत्वान्नात्रशंकाकार्येति २२ अस्यजगद्वृक्षस्यैकंफलंप्रवृत्तकर्मफलंस्वर्गा दिलक्षणंग्रामेचरागृध्राःविषयलोलुपाःकर्मिणोऽदंति एकंनिवृत्तिलक्षणंकर्मफलंमोक्षंअरण्यवासाहंसाःश्रीनारायणाख्यक्षीरपायिनोज्ञानिनोभुंजतइति एतद्वृक्षवर्णनफलमाह यइति यःपुरुषः एवंबहुरूपंबहुविधमिष्टंभोगायतनत्वेनाभीष्टंमायामयंभगवदिच्छानिमित्तमूलप्रकृत्युपादानकर्तृकंजगद्वृक्षंवेदसपुरुषोवेदंवेद यतःप्रसूताजगतःप्रसूतिरित्यादिवेदार्थंवेदेति २३ एतद्विद्याफलमाह ए वमिति एवमुक्तप्रकारेणसद्गुरूपासनयाप्रधानभक्त्यानिशितेनविद्याकुठारेणप्राकृतांतःकरणजन्यज्ञानपरशुनाजीवाशयंबाह्यांतःकरणंविवृश्च्याच्छित्वानिर्मलीकृत्यप्राकृतांतःकरणजन्यज्ञानमस्त्रंसंसारनि रासकरंत्यज अथतज्ज्ञानत्यागानंतरंनिजज्ञानेनात्मानंपरमात्मानंसंपद्यमुक्तौयथायोग्यसुखमनुभवसिचेतिभावः । प्राकृतांतःकरणजंज्ञानमस्त्रंसतिच्छिदं । तदेवतेनसंछेद्यंचित्तंप्रकृतिसंभवं । तेनैवसहसंत्य ज्यनैवपूर्वंकदाचन । ज्ञानंप्रकृतिजंवापिमूलनाशेविनश्यति । ततःपरंस्वरूपेणज्ञानेनैवजनार्दनं । वेत्तिमुक्तस्तथात्मानंजीवानन्यांश्चसर्वशः । इतिवाक्यान्नज्ञानमात्रोच्छेदोविवक्षितः । किंतुप्राकृतस्येति २४ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेविजयध्वजकृतटीकायांद्वादशोध्यायः ॥ १२ ॥

संसारच्छेदकरंबाह्यांतःकरणजंज्ञानंस्वधर्मिणमपिविनाशयत्स्वयंचनश्यतीत्युक्तंतत्प्रपंचयन्भक्तेरुत्पत्तिप्रकारादिककथयत्यास्मन्नध्याय तत्रसत्त्वादिगुणाआत्मनाशुद्धःकथंतत्संशयभगवान्त्वयारभा त्वमिति बुद्धेरंतःकरणस्यविद्यमानाइतिशेषः नात्मनोजीवस्यतत्रसात्त्विकादिभेदेनांतःकरणंत्रिविधं ततःकिंतत्राह सत्त्वेनेति सत्त्वेनसत्त्वगुणविशिष्टेनांतःकरणेनान्यतमौराजसतामसौभावौहन्यात् सत्त्वंसात्त्विकमंतःकरणंसत्त्वेनतज्जनितज्ञानेनहन्यात् १ सत्त्वेनान्यतमोहन्यादित्येतद्विवृणोति सत्त्वादिति शुद्धात्सत्त्वात्पुंसोमद्भक्तिलक्षणोधर्मोभवेत् धर्मःकिमुद्रेचयतीतित्राह सात्त्विकेतितो धर्मात्पुनःसत्त्वोद्रेकःतस्मादुद्रिक्तसात्त्विकोपात्तयाबुद्ध्याभक्त्याज्ञानंततःपुनः सत्त्वोद्रेकःतस्मात्पुनःधर्मोद्रेकःप्रवर्तते उद्रिक्तभक्तिधर्मपूरितांतःकरणोब्रह्मार्पणबुद्ध्याधर्ममेवकरोतीत्यर्थः २ धर्मफल माह धर्मइति सधर्मोरजस्तमश्चहन्यात् पुनःकथमस्यवृत्तिरितित्राह सत्त्ववृत्तिरिति सत्त्वेनभक्तिस्वभावेनवृत्तिर्वर्तनंभवतिभक्तिमयोवर्ततइत्यर्थः भक्तिप्रतिबंधकेऽधर्मेसतिकथंतद्वृत्तिरितित्राह आश्विति उभयेरजसितमसिचहतेतन्मूलस्त्वधर्मआशुनश्यतीतिअतोयुक्तमुक्तमिति ३ भक्तिज्ञानसाधनान्यागमादयोत्रसत्त्वादिगुणकृताइत्याह आगमइति सत्त्वादयोगुणाएवहेतवोयेषांतेतथा अ नेनैवचसात्त्विकादिभेदेनत्रिविधाइत्युक्तंभवति ४ तत्तद्भेदज्ञानंकथमत्राह तत्तादिति ज्ञानवृद्धाएषामागमादीनांमध्येयद्यत्साध्वितिप्रचक्षतेतत्तत्सात्त्विकं यच्चैनंदंतितत्तामसं यदुपेक्षितंप्रचक्षतेतद्राजसमि तिजानीहीतिशेषः ५ किमर्थमेवंविभागवचनंयेनोपयोग्यंस्यादत्राह सात्त्विकानीति सत्त्वंसत्त्वस्वभावस्तद्विवृद्धयेकिंततइतित्राह ततइति ततः सत्त्वाद्भक्तिसाधनंधर्मःततोधर्मात्ज्ञानंस्यात्किंचह

श्रीभगवानुवाच ॥ सत्त्वंरजस्तमइतिगुणाबुद्धेर्नचात्मनः ॥ सत्त्वेनान्यतमौहन्यात्सत्त्वंसत्त्वेनचैवहि १ सत्त्वाद्धर्मोभवेच्छुद्धात्पुंसोमद्भक्तिलक्षणः ॥ सा त्विकोपात्तयाज्ञानंततोधर्मःप्रवर्तते २ धर्मोरजस्तमोहन्यात्सत्त्ववृत्तिरनुत्तमा ॥ आशुनश्यतितन्मूलोह्यधर्मउभयेहते ३ आगमोयजनंदेशःकालःकर्मच जन्मच ॥ ध्यानंमंत्रोथसंस्कारोनवैतेगुणहेतवः ४ तत्तत्सात्त्विकमेवैषांयद्यद्वृद्धाःप्रचक्षते ॥ निंदंतितामसंतत्तद्राजसंतदुपेक्षितम् ५ सात्त्विकान्येवसेवे तपुमान्सत्त्वविवृद्धये ॥ ततोधर्मस्ततोज्ञानंवाचःस्मृतिरपोहनम् ६ वेणुसंघर्षजोवह्निर्दग्ध्वाशाम्यतितद्वनम् ॥ एवंगुणव्यत्ययजोवेदःशाम्यतितद्यथा ७ ॥ उद्धवउवाच ॥ विंदंतिमर्त्याःप्रायेणविषयान्पदमापदाम् ॥ अथापिभुंजतेकृष्णतत्कथंश्वखराजवत् ८ ॥ श्रीभगवानुवाच ॥ अहमित्यन्यथाबु द्धिःप्रमत्तस्ययदाहृदि ॥ उत्सर्पतिरजोघोरंततोवैकारिकंमनः ९

रिविषयावाचोहरिविषयास्मृतिरपोहनंभगवद्विरुद्धत्यागःइत्येतेभवंति ६ एवमुत्पन्नवृत्तिज्ञानस्यनाशंसदृष्टांतमाह वेण्विति तन्मूलनिर्वाणंयथातथाकथयामःतथाहि यस्मिन्वनेवेणवःसंतितेषांवेणू नांसंघर्षाज्जातोवह्निस्तद्वनंदग्ध्वास्वयमपिशाम्यत्येवंगुणव्यत्ययजःसत्त्वादिगुणानांव्यत्ययादन्योन्यनाशात्पृथक्स्थितादुद्रिक्तात्सत्त्वाज्जातोवेदोवृत्तिज्ञानंस्वकारणमंतःकरणंविनाश्यनिर्मूलंस्वयंचवि नश्यतीत्यन्वयः विनिषेधेपृथग्भावइति। अतिस्यादधिकार्थोक्तौप्रशंसायामतिक्रमेइतियादवः। वेदशब्दस्यप्रसिद्धार्थंपरित्यज्याप्रसिद्धकल्पनेकिंनियामकंउच्यते उपक्रमंब्रूमः मुक्ताश्चाधीयतेवेदान्जड ज्ञानविवर्जिताः। स्वरूपभूतज्ञानेनपश्यंतःसर्वमंजसेतिवाक्यंच विदज्ञानइतिधातोश्च अविनाशीवाअरेयमात्मानुच्छित्तिधर्मेतिश्रुतेः नस्वरूपज्ञाननाशउपपन्नः स्वरूपहानिप्रसंगात् एतत्सामगायन्ना स्तेइत्यादिश्रुतिविरोधाच्चवेदोपशमोनोपपन्नइति ७ विषयाणामापदांपदत्वंजानंतोपितानेवसेवंतेतत्रकिंकारणमितिभावेनपृच्छति विंदंतीति श्वाचखरश्चअजश्चश्वखराजाःतद्वत् ८ अकर्तर्यात्मनिअ हंकर्तेतिकर्तृत्वाभिमानश्चेतितन्मूलरागोत्सिक्तमनःकारकःकामःकारणमित्युत्तरमाह अहमितीति अयमक्षरार्थः यदाप्रमत्तस्यहृद्यहंकर्तेत्यन्यथाबुद्धिरुत्सर्पति उत्कथति तथाघोरंरजउत्सर्पतिउद्भवति ततोरागोदयादुच्छ्वासितंमनोवैकारिकंविविधविकाराकरोभवति ९

रजसाविकारस्यमनसोविविधकल्पनयायुतः संकल्पइदमित्थंकरिष्यामिइदमेकंकरिष्येइत्यादिलक्षणउदेति एवंविविधसंकल्पेनदुर्मतेरशोभनबुद्धेःगुणानांशब्दादीनांध्यानादुःसहःकामःस्यादित्यन्वयः १० कामस्यदुःसहत्वमुपपादयति करोतीति रजोवेगविमोहितत्वेनकामवशंगतःतस्मादविजितेंद्रियस्तस्मात्कर्माणिदुःखोदर्काणिसंपश्यन्नपिपुनःकर्माणिकरोतीत्यन्वयः यद्वा काममयत्वेनअविजितेंद्रियोभवतितेनैवचक्षुरादींद्रियजयाभावेनवनितादिरूपंपश्यन्रजोवेगेनवीर्यार्द्रेकेणविमोहितः विवेकज्ञानशून्यत्वेनविह्वलितांगोदुःखफलानिकर्माणिकरोति कामसौख्यायविषयान् भुंक्तेइति ११ ननुविषयाणांसमुद्रतरंगवदावर्तमानत्वान्नसंसारादस्योत्थानंस्यात्पुरुषायुषसहस्रेणापितस्मान्मोक्षशास्त्रविधानंव्यर्थमित्याशंक्य अज्ञस्यैवं नतत्त्वज्ञस्येत्याह रजस्तमोभ्यामिति विद्वच्छब्दविवरणंदोषदृष्टिरिति पुनःशब्दोवीप्सार्थोदोषदृष्टिरित्यनेनसंबध्यते विद्वान्यदपियद्यपिरजस्तमोभ्यांविक्षिप्तधीःतथाप्यतंद्रितोभूत्वाहरौमनोयुंजन्पुनर्दोषदृष्ट्वाद्विषयेषुनसज्जतेशरीरयात्रार्थंविषयान्सेवमानोपितैःप्रतिबद्धोनभवतीति १२ एतदेवविवृणोति अप्रमत्तइति हिशब्दःसर्वशास्त्रप्रसिद्धत्वद्योतकःमनोविषयेभ्यआकृष्यशनैःशनैर्मय्यर्पयन्स्थापयन्युंजतिध्यायेत् योगःसंहननोपायध्यानसंगतिमुक्तिष्विति यादवः मामितिशेषःअनिर्विण्णःअनालस्यःअलमितिबुद्धिवैराग्यशून्योवा १३ सनकादियोगींद्रयोगसंपत्त्यभावान्नायंयोगःसाधीयानत्राह एतावानिति यथामनोमय्येवचावेश्यतेतादृशोयोगःएतावान्नान्यइति सनकादिभिरादिष्टइत्यद्धासत्यं अद्धाप्रत्यक्षसत्ययोरितिच १४ लोकोपकारायमेरुशृंगोपरिस्थितौषधोपदेशवत्सनकाद्यादिष्टयोगोपदेशनमित्यश्रद्धेय

रजोयुक्तस्यमनसःसंकल्पःसविकल्पकः ॥ ततःकामोगुणध्यानादुःसहःस्याद्विदुर्मतेः १० करोतिकामवशगःकर्माण्यविजितेंद्रियः ॥ दुःखोदर्काणिसंपश्यन्रजोवेगविमोहितः ११ रजस्तमोभ्यांयदपिविद्वान्विक्षिप्तधीःपुनः ॥ अतंद्रितोमनोयुंजन्दोषदृष्टिर्नसज्जते १२ अप्रमत्तोहियुंजीतमनोमय्यर्पयन्शनैः ॥ अनिर्विण्णोयथाकालंजितश्वासोजितासनः १३ एतावान्योगआदिष्टोमच्छिष्यैःसनकादिभिः ॥ सर्वतोमनआकृष्यमय्यद्धावेश्यतेयथा १४ उद्धवउवाच ॥ यदात्वंसनकादिभ्योयेनरूपेणकेशव ॥ योगमादिष्टवानेतद्रूपमिच्छामिवेदितुम् १५ श्रीभगवानुवाच ॥ पुत्राहिरण्यगर्भस्यमानसाःसनकादयः ॥ पप्रच्छुःपितरंसूक्ष्मांयोगस्यैकांतिकींगतिम् १६ सनकादयऊचुः ॥ गुणेष्वाविशतेचेतोगुणाश्चेतसिचप्रभो ॥ कथमन्योन्यसंत्यागोमुमुक्षोः संतितीर्षतः १७ श्रीभगवानुवाच ॥ एवंपृष्टोमहान्देवःस्वयंभूर्भूतभावनः ॥ ध्यायमानःप्रश्नबीजंनाभ्यपद्यतकर्मधीः १८

मितिभावेनपृच्छति यदेति १५ दृष्टसाधनावबोधकत्वेनाप्रमूलकत्वेनवेदएवप्रमाणंइतिश्रद्धेयमित्याशयेनपरिहर्तुमितिहासमाह पुत्राइति योगस्यज्ञानस्यगतिं १६ किंज्ञानविषयोयंप्रश्नइतितत्राह गुणेष्विति पुंसांचेतोगुणेषुशब्दादिष्वाविशते; गुणाःशब्दादिविषयाश्चेतसिसंस्काररूपेणवर्ततेतत्रसंतितीर्षोःसंसारनदींतर्तुकामस्यमुमुक्षोर्मुक्तियोग्यस्याधिकारिणःकथमन्योन्यसंत्यागःविषयेभ्यश्चेतसःआकर्षणंचेतसःविषयाणामाकर्षणंपृथक्करणमित्यर्थःतदुच्यतामितिशेषः १७ तत्रब्रह्मणाकिमुक्तमितितत्राह एवमिति प्रश्नोबीजंयस्यसःप्रश्नबीजःतंपरिहारम् अन्यमनस्कइवस्थितत्वादित्याह कर्मधीरिति अस्यार्थःगुणानांचेतसश्चकर्मकारणमितिमन्वानःअन्यमनस्कत्वेकिंकारणमित्यस्येदमेवोत्तरम् कर्मणिसर्वकर्तरिहरौधीर्यस्यकर्मणाहरिणैवपरिहारोवक्तव्यइतिधीर्यस्यसतथाकर्मभगवंतमेवध्यायतीतिवा तदेवदुक्तं ब्रह्मापृष्टस्तुयोगींद्रैःसनकाद्यैर्मनोगतैः कारणंविषयेष्वद्धाकर्मेतिप्रत्यपद्यत हेतुरन्योपितत्रास्तीत्येवंजानन्नपिप्रभुः विशेषतोमनस्तत्रनाधाज्ज्ञाननूहरेःप्रियं स्वात्मन्यपरिहारोक्तिस्तदाह्यासीद्धरेःप्रिया अतःसतत्प्रियंजानन्नाकरोत्तद्विचारणम् तमेवार्चितयद्देवःप्रश्ननिर्णयकारणात् भ्रमतीवमनःक्वापिब्रह्मणोविष्णुमायया सर्वज्ञस्यापियत्रात्मावक्तुमिच्छेज्जनार्दनः तज्ज्ञात्वार्चितंतस्यचिंतयत्यमुमेवतु नस्वयंचिंतत्यर्थसहितद्भावविंत्सदा अन्येत्वज्ञानसंयुक्तामोहमीयुर्यथाक्रमं तस्यमध्यंदिनेसूर्येक्षोभवत्क्षोभमात्रकं नैवाज्ञानंयथासूर्येतमोनास्तिकदाचनेतिएतस्मिन्वाक्ये १८

नन्वेवंतर्हिसनकादीनांप्रश्नोनिरर्थोबालप्रश्नवदितिशंकामाभूदितिभावेनाह समामिति प्रश्नस्यपारःपूरणंपरिहारइतियावत्तांस्मान्नश्चयावस्यसतथातम् १५ २० २१ [illegible]
स्वेनोक्तार्थेप्रामाण्यजननायकोभवानितितत्प्रश्नंविवटयति वस्तुनइति आत्मनोवस्तुनःपरमात्मवस्तुनोभवत्पक्षेयद्यनानात्वमेकत्वंविवक्षितंतर्हि अनानात्वेएकत्वपक्षेकोभवानितिदृशःप्रश्नःकथंघटेत सिद्धविषयत्वादितिशेषः हेविप्राःवःप्रश्नोयद्यनेकाश्रयःनानात्वाश्रयः तर्ह्यपिकोभवानितिवक्तुंकथंघटेत अनेकस्मिन्बहुत्वसंख्याविशिष्टेवस्तुनिएकत्वसंख्याविशिष्टत्वेनवक्तुमनुपपन्नत्वात् १९ सिद्धविषयत्वंकथमत्राह पंचात्मकेष्विति देवमनुष्यपितृगंधर्वासुरभेदेनपंचविधेषुभूतेषुजीवेषुहिरण्यगर्भावरत्वात्तद्वंचत्वाभावापेक्षयावस्तुतोवस्तुवृत्त्यासमानेषुसत्सुब्रह्माभिवंदितचरणारविंदमाशुदिश्यकोभवानितिवाचारंभोयस्यसतथावाचारंभइत्यर्थः वःप्रश्नोनिरर्थकःनिर्विषयइति २३ कुतोनिरर्थकइतितत्राह मनसेति मनआदींद्रियैर्यदृच्छयातदहंनभवाम्येवेतियस्मात्तस्मान्नैर्विषयइत्यन्वयः त्वमपित्वत्प्रसादाद्दृश्यसेननुतस्मात्प्रश्नःकृतइतितत्राह मत्तोन्यदिति नेत्यनुषज्यतेअन्यदितिभावनिर्देशःयन्मनआदिभिर्विचार्यमत्तोन्यत्तेनैवज्ञायतेततदहंनभवाम्येवेतिबुध्यध्वमितीदंअंजसातत्त्वम् अंजसात्वारितेत त्त्वमित्यभिधानम् विचार्यनिर्णीतस्यापिपुनःसंशयकारणंपरिकल्प्यसंशयोनकर्तव्यःअतःकोभवानितिप्रश्नोनारब्धव्यःकिंतुगुणेष्वाविशतेचेतइत्येवप्रश्नआरब्धव्यइतिभावः । नयुष्मार्कमयिप्रश्नोघटते यंकथंचन । मामृतेनाहिवंद्योस्तिविरिंचेःकापिकश्चन । अभिवंदितपादंमांविरिंचेनकथंपुनः । पृच्छथान्येसमायस्मादवरत्वेचतुर्मुखात् । देवामनुष्याःपितरोगंधर्वाअसुरास्तथा । इतिपंचात्मकंसर्वं ब्रह्मणस्त्ववरंयतः । यन्मदन्यद्विचारेणगृह्यतेतन्नचास्म्यहम् । इतिजानीध्वमद्वैवमत्प्रसादाद्विमृशिः । अन्यत्स्वभावतोदृश्यंममप्रेरणयैवतु । तस्माद्विवक्षितार्थेतुप्रश्नारंभोनमद्गतइतिसमाख्यानबलादु

समामचिंतयद्देवःप्रश्नपारविनिश्चयम् ॥ तस्याहंहंसरूपेणसकाशमगमंतदा १९ दृष्ट्वामांतउपाव्रज्यकृत्वापादाभिवंदनम् ॥ ब्रह्माणमग्रतःकृत्वापप्रच्छुः कोभवानिति २० इत्यहंमुनिभिःपृष्टस्तत्त्वजिज्ञासुभिस्तदा ॥ यदवोचमहंतेभ्यस्तदुद्धवनिबोधमे २१ वस्तुनोयद्यनानात्वमात्मनःप्रश्नईदृशः ॥ कथंघटेतवोविप्रावक्तुंवानेकआश्रयः २२ पंचात्मकेषुभूतेषुसमानेषुचवस्तुतः ॥ कोभवानितिवःप्रश्नोवाचारंभोनिरर्थकः २३ मनसावचसादृष्ट्यागृह्यतेन्यैरपींद्रियैः ॥ अहमेवनमत्तोन्यदितिबुध्यध्वमंजसा २४ गुणेष्वाविशतेचेतोगुणाश्चेतसिचप्रजाः ॥ जीवस्यदेहउभयंगुणाश्चेतोमदात्मनः २५ गुणेषुवाविशेच्चित्तमभीक्ष्णंगुणसेवया ॥ गुणाश्चचित्तप्रभवामद्रूपउभयंत्यजेत् २६

क्तएवार्थोनान्यःस्वकपोलकल्पितइति किंच इदंहिविश्वंभगवानिवेतरइत्यतश्चहरेर्जगतोभेदःसिद्धइतिसकलशास्त्राणांमोक्षेहितात्पर्यमाक्षेश्चप्रकृतिमाकृतविवेकज्ञानाद्विष्णोः तदुक्तं प्रकृतेर्व्यतिरिक्तोयः पुरुषश्चेतिकथ्यते तंविद्धान्परमात्मानंवासुदेवेतियंविदुः प्रकृतेःप्राकृताचैवव्यतिरिक्तंगुणादिकं येविदुःपरमात्मानंतेषांतिरमंयदं नैतदिच्छंतिपुरुषमेकंकुरुकुलोद्वह । बहूनांपुरुषाणांहियथैकायोनिरुच्यते । तथातंपुरुषंविश्वमाख्यास्यामिगुणाधिकमिति बहुप्रमाणेषु २४ इदानींसनकादीनांप्रश्नंपरिहरति गुणेष्वित्यादिना हेप्रजाःब्रह्मजत्वेनप्रकृष्टजन्मत्वात्तथासंबोधनं वःचेतोगुणेष्वाविशतेगुणाश्चेतसीति प्रश्नस्यायंपरिहारः मय्येवआत्मामनःयस्यसमदात्मातस्यजीवस्यगुणाश्चेतश्चेत्युभयंदेहेदग्धमभवत् दहभस्मीभावइत्यस्योभयपदित्वेएतदूपंसिद्धयति २५ पंचधातुवद्गुणचित्तभस्मीभावोज्ञानाग्निनेत्युक्तं तत्रसकेनप्रकारेणोदेतीत्यत्राह गुणेष्विति अभीक्ष्णंनिरंतरंगुणानांविषयाणांसेवयाचित्तंचेतोगुणेषुविषयेष्वाविशेत्तदेकनिष्ठंवर्तते गुणाश्चचित्तप्रभवाः चित्तेप्रभवोयेषांतेतथा चितेसंस्काररूपेणवर्ततेहरिस्मरणमतिक्रम्यप्रवीयंतइत्यर्थः ततःकिमत्राह मद्रूपइति तत्रविद्वान्मद्रूपेममस्वरूपेचेतोगुणाश्चेत्युभयंत्यजेत्इदमुक्तंभवति मनआदींद्रियाणिमदंतर्यामिणिहरौस्थितानितदाधाराणितत्प्रेरितानिविषयेषुवर्ततेविषयाश्चविष्णुस्थाविष्ण्वाधारावि[illegible]ष्णुप्रेरितामममभोगसाधनानीत्ययंविष्णौगुणादित्यागइति । विष्णुस्थाविषयाःसर्वेविष्णावेवमनोमम । इतिमय्यर्पयतत्सर्वंत्यजेत्तत्रबाधतइतिवचनात् मुमुक्षुभिरेवमेवनित्यमनुसंधेयम् २६

नन्वस्यगुणसंगस्यस्वाभाविकत्वेपुरुषायुषानंत्येनापित्यागोनसुलभइतितत्राह जाग्रदिति जाग्रदाद्यवस्थागुणतोगुणद्वारेणबुद्धिवृत्तयः । बुद्ध्याप्रकृत्यावृत्तिर्वर्तनंयासांतास्तथाप्रकृतिगुणसंबंधाज्जीवस्य जाग्रदाद्यवस्थावर्तित्वंनस्वाभाविकोगुणसंगइत्यर्थः । तात्पर्यमाह तासामिति । तासांजाग्रदाद्यवस्थानांसाक्षित्वेनवर्तमानोजीवः स्वतस्ताभ्योविलक्षणोविनिश्चितइत्यन्वयः २७ नन्वयमस्वाभाविकःस्वतएवनिवर्तनेनतत्साधनप्रयत्नापेक्षेत्याशंकांपरिहर्तुमुक्तानुवादपूर्वकंतत्साधनंकथयति यर्हीति आत्मनोजीवस्यायंसंसृतिबंधःसत्वादिगुणप्रवृत्तितः । इतियर्हियस्मात्तस्मात्तुर्येगुणत्रयातीतेमयि स्थितस्तंबंधंजह्यात्मदुपासनासमुद्रेकसमुद्भूतंज्ञानाविर्भूतमत्प्रसादेनबंधंत्यजतीत्यर्थः । कोयंबंधत्यागोनामयेनहेयत्वेनवर्ण्यतेइतितत्राह त्यागइति । विषयारूढबाह्यांतःकरणत्यागएवबंधत्यागो नामनान्यदिति २८ नन्वनेनोपायेनगुणनिमित्तबंधत्यागोस्तुअहंकारनिमित्तबंधत्यागस्यकउपायइतिमंदाशंकामहंकारकृतबंधोपिगुणहेतुकएवेत्येकएवनामांतरेणोच्यतेउपायोप्ययमेवेत्याशयेनप रिहरति अहंकारकृतमिति । अस्वरूपेप्यहंकारममकाराभ्यांरजोगुणोत्कथिताभ्यांकृतमिमंबंधमात्मनोजविस्यार्थविपर्ययंदुःखलक्षणमर्थंविद्वान्निर्विद्यानित्यासारतांबुद्धिंकृत्वातुर्येभगवतिस्थितःसंसार चिंतांत्यजेदित्यन्वयः २९ ननुकियंतंकालंसंसारानुवृत्तिरत्राह यावदिति हरेःस्वातंत्र्यादियुक्तिभिर्जीवस्यास्वातंत्र्यादियुक्तिभिरनयोर्जीवपरयोरेकत्वबुद्धिःएकस्यहरेर्भिन्नत्वबुद्धिरितिनानार्थ धीर्मिथ्याज्ञानंयावन्ननिवर्ततेतावदसौजाग्रत्यपिस्वपन्निद्रालुरज्ञःसंसार्येव स्वप्नेजागरणंयथाजाग्रत्त्वबुद्धिः । भिन्नस्यत्वेकभावेनतथैकस्यचभेदतः । ज्ञानंनानार्थधीःप्रोक्तानानात्वादर्थतद्धियोरितिव चनात् । उक्तएवार्थोनान्यइति ३० अभेदज्ञानस्यश्रुतियुक्तिसिद्धत्वात्तस्यैवमुक्तिहेतुत्वात्तस्यचग्राह्यत्वाच्चेतनाद्भिन्नस्यजडस्यतदेकत्वकल्पनमद्वितीयस्यात्मनोभेदकल्पनम् नानार्थधीरित्यर्थकल्पनेाप

जाग्रत्स्वप्नसुषुप्तिश्चगुणतोबुद्धिवृत्तयः ॥ तासांविलक्षणोजीवःसाक्षित्वेनाविनिश्चितः २७ यर्हिसंसृतिबंधोयमात्मनोगुणवृत्तितः ॥ मयितुर्येस्थितोजह्या त्त्यागस्तुगुणचेतसाम् २८ अहंकारकृतंबंधमात्मनोर्थविपर्ययम् ॥ विद्वान्निर्विद्यसंसारचिंतांतुर्येस्थितस्त्यजेत् २९ यावन्नानार्थधीःपुंसोननिवर्ततयु क्तिभिः ॥ जाग्रत्यपिस्वपन्नज्ञःस्वप्नेजागरणंयथा ३० असत्त्वादात्मनोन्येषांभावानांकिंकृताभिदा ॥ गतयोहेतवश्चास्यमृषास्वप्नदृशोयथा ३१ योजाग रेबहुविधानक्षणधर्मिणोर्थान्भुंक्तेसमस्तकरणोहृदितत्सदृक्षान् ॥ स्वप्नेथसुप्तउपसंहरतेसएकःस्मृत्यन्वयात्त्रिगुणवृत्तिदृग्गिंद्रियेशः ३२

पत्तेरुक्तमानस्यात्मेतरस्यमिथ्यात्वेनसर्वस्योपपत्तिरितित्राह असत्त्वादिति । आत्मनोज्ञानादिगुणपूर्णस्यहरेरन्येषांभावानांब्रह्मादिसर्वपदार्थानामसत्त्वादशक्त्यात्तेषांसर्वशक्तिमताहीरणाभिदाकि कृताकयायुक्त्याकेनमानेनवाकृतासिद्धा केनापिनसिद्धेत्यर्थः । तत्त्वमस्यात्माद्वितीयःबोधत्वादित्यादिमानसद्भावादत्राह गतयइति । गमयंत्यवगमयंत्यभीष्टमर्थमितिगतयोवचनानि हेतवोलिंगज्ञा नानिचास्याभिमतानिमृषानसाधकानिस्वप्नदृशोयथास्वप्नेस्थजाग्रत्त्वज्ञानानियथाअविद्यमानानिनस्वाभीष्टसाधकानिस्वमतरीत्याचैवमित्यभिप्रायः । अभिदाकिंकृतैतेषांभावानांपरमेश्वरे । यतोसत्त्व मशक्तत्वाद्भावानांतस्यशक्तता । ततःसत्वेसाधुभावःसत्वामित्युच्यतेबुधैः । साधुभावश्चशक्तस्यततोन्यासाधुताकृतः । अभेदेजगतोविष्णोर्यावाचोयेचहेतवः । स्वप्नजाग्रत्कल्पनवत्सर्वेतेभ्रमदर्शिनइति वचनात् ३१ ननुपरमात्मभेदस्यात्राप्राप्तत्वेनतद्भेदस्यभ्रमत्वंकथमापाद्यतइत्याशंक्यप्राप्तिमापाद्यप्रतिषेधति योजागरइति । योजीवस्यदक्षिणाक्षिस्थितोविश्वाख्योहरिर्जागरेजाग्रदवस्था यांक्षणधर्मिणः क्षणकालवर्तित्वलक्षणधर्मवतोबहुविधानर्थान्भुंक्ते अस्वतंत्रजीवस्यदर्शयति स्वप्नेचकंठस्थःसमस्तकरणःसम्यग्वशीकृतेंद्रियः तैजसाख्योविष्णुःहृदिमनसिसंस्काररूपेणस्थितांस्त त्सदृक्षान्जाग्रदर्थसदृशान्पदार्थान्जीवस्यदर्शयति यश्चसुप्तेसुप्तव्यवस्थायांहृदिस्थितःप्राज्ञाख्यःपरःउपसंहरतेइंद्रियाणीतिशेषः । विषयेभ्यइंद्रियाण्याहृत्यजीवानंदंपश्यतितंचस्वरूपानंदंभोजयति स्वयंचविहितानंदंभुंक्तेसाक्षीत्यादित्रिरूपः एकःभेदरहितः कुतइतितत्राह स्मृत्यन्वयादिति स्मृतीत्युपलक्षणम् श्रुतिस्मृतिमानेभ्यइत्यर्थः भुंक्तइत्यस्यानुभवतीत्यर्थपरित्यज्यदर्शयतिइत्यर्थकथनेकिनिया

मकमत्राह त्रिगुणेति त्रिगुणवृत्तीःजाग्रत्स्वप्नसुषुप्तीःपश्यतीतित्रिगुणवृत्तिदृक् । दक्षिणाक्षिस्थितोविष्णुर्भुक्तेर्थान्जाग्रतिस्थितान् । कंठसंस्थस्तथास्वप्नान्जीवानदचसुप्तगः । श्रुत्यन्वयात्स्मृतश्च
श्रसएकःपरमेश्वरः । अस्वतंत्रस्यजीवस्यस्वतंत्रोजाग्रदादिदः । स्वयंस्वप्नादिहीनःसन्क्रीडतेपुरुषोत्तमइति । स्वप्नेशारीरमभिप्रहत्यामुप्रःसुप्तानभिचाकशीतीत्यादिश्रुतिस्मृतिभ्यउक्तएवार्थःअत्रहरेःसा
क्षित्वंसुखैकभोक्तृत्वंचतात्पर्यार्थिः । नन्वनानंदानुभवस्तदतीतत्वात् कुतइतितत्राह इंद्रियेशइति इंद्रियप्रवृत्तिसमर्थस्यतद्गोग्यदुःखानुभवस्यानुचितत्वात् अनेननुर्यस्यविश्वाद्येकत्वमुक्तंभवति ३२
उक्तार्थानुवादपूर्वकमुक्तज्ञानफलंविधत्ते एवमिति एवमुक्तविधंविमृश्यालोच्य कथमित्युक्तंस्मारयति गुणतइति सत्त्वादिगुणतउद्भूतान्मननान्मनउदिष्टइतिमनसोजीवस्यजाग्रदाद्यवस्थामन्मा
यथामदिच्छयामयिमदाधारत्वेनकृताविहिताःपर्याप्ताइतिनिश्चितार्थाः यूयमनुकूलश्रुत्यादिमानेनसतांमहतांउक्त्यावचनेनतीक्ष्णेननिशितधारेणज्ञानाख्यासिनाहार्दं हृदिरूढमखिलसंशयार्थिसंछि
द्यमामांभजतेत्यन्वयः । अनेनमुक्तिरप्युक्ताभवतीतिज्ञातव्यम् ३३ ननुजाग्रदादिषुप्रवर्तकत्वेनवर्तमानस्यहरेःविश्वादिरूपाणांभेदोनास्तीत्युक्तंतत्रवृत्तिभेदेनप्रतीयमानोभेदःकथंप्रत्येतव्यइत्यत्रा
ह ईक्षेतेति । जाग्रदादिषुप्रतीयमानमिमंपरमात्मभेदंविभ्रमज्ञानमूलंवीक्षेत । जाग्रदादिकरोदेवःपरमात्मैकएवतु । इतिवीक्षेतसततंमुच्यतेसंसृतेरतइतिवचनात् । अज्ञाननिमित्तहेतुमाह मनस
इति । मनसोविलासंमनोविकाररूपत्वात् एतत्कुतोत्राह दृष्टमिति । गुरूपदिष्टशास्त्रदृष्ट्यायदाविभ्रमोयमितिदृष्टस्तदैवनष्टोभवतियत्तस्मात् इतोपिमनोविलासइत्याह अतिलोलमिति श्रुत्यादिवि
चारेक्षिप्रविनाशित्वात्अत्रलुप्तोपमामाहअलातचक्रमिति अलातचक्राकारभ्रमवत्परमात्मभेदभ्रमंविद्यादित्यर्थः एवंसुरनराद्याहितत्तत्रिपंतृभेदोपिभ्रांतइत्याशयेनाह विज्ञानमिति विज्ञानमज्ञानं

**एवंविमृश्यगुणतोमनसह्यवस्थामन्माययामयिकृताइतिनिश्चितार्थाः ॥ संछिद्यहार्दमनुमानसदुक्तितीक्ष्णज्ञानासिनाभजतमाखिलसंशयार्थिम् ३३ ई
क्षेतविभ्रममिमंमनसोविलासंदृष्टंविनष्टमतिलोलमलातचक्रम् ॥ विज्ञानमेकमुरुधेवविभातिमायास्वप्नेयथात्रिगुणसर्गकृतोविकल्पः ३४ दृष्टिंततःप्रति
निवर्त्यनिवृत्ततर्षस्तूष्णींभवेन्निजसुखानुभवोनिरीहः ॥ संदृश्यतेक्वचयदीदमवस्तुबुद्ध्यात्यक्तंभ्रमायनभवेत्स्मृतिरानिपातात् ३५**

दंब्रह्मेतिश्रुतेः । एकंस्वगतभेदशून्यंब्रह्मनानारूपमिवभाति अज्ञानामितिशेषः । यथास्वप्नएकैवगजादिमायाबहुधाप्रतीयतेतथेति मिथ्याज्ञानकारणमाह त्रिगुणेति सत्त्वादिभिस्त्रिभिर्गुणैस्तत्सर्गैस्त
त्कार्यैःपापादिभिश्चकृतःपर्याप्तोविकल्पोमिथ्याज्ञानंकारणमितिशेषः । तमआदिगुणनिमित्तपापादिदुष्कर्मरूपितांतःकरणानामज्ञानामासुरप्रकृतीनांसच्चिदानंदरूपमेकंबह्विवप्रतीयतइतिभावःदेह
भेदेष्ववस्थासुप्रादुर्भावेषुकेवलम् । ज्ञानानंदैकसद्रूपंभ्रांत्यामिश्रंप्रपश्यति । साचभ्रांतिर्विनश्येतयदाभ्रांतित्ववेदनम् । अतिक्षिप्रंविनश्येच्चनस्थिरंदिगुभ्रमादिवत् । त्रिगुणैर्बाधिताजीवाज्ञप्तिमात्रंजानर्द
नम् । पश्यंतिबहुधास्वप्नेयथैकंबहुधाक्वचित् । अभिन्नोपिविभिन्नेषुव्यवहारोयथाभवेत् । तथैवव्यवहारायशक्तत्वान्नैवदूषणं । ईशस्यतुतदन्येषामपियच्छक्तिदायकः । इत्यनेनमानेन । अशक्योप्यतिश
क्योयंविनिवर्तयितुंभ्रमः ईशस्थोगुरुसंपत्त्यायादिशुद्धमनाःपुमान् इत्यनेनमानेननिर्णीतत्वादिदमेवतात्पर्येणज्ञातव्यम् । अन्यद्दुःशास्त्रमितिसिद्धम् ३४ एवंविधंमिथ्याज्ञानंमोक्षार्थिनाहेयमितिभावेनाह
दृष्टिमिति । यतोपापफलंमिथ्याज्ञानंततोनिवृत्ततर्षःविषयाभिलाषरहितःदृष्टिंमिथ्याज्ञानंप्रतिनिवर्त्यपरमात्मभेदादिदर्शनरहितोभूत्वातूष्णींभवेत्तन्निरंतरध्यानमंतरेणप्रवृत्त्यंतरविधुरःस्यात् । किमनेन
पाषाणवदवस्थानेनेतितत्राह निजेतिअनेनस्वरूपसुखस्यानुभवोयस्यसतथा ननुनित्यनैमित्तिकादिक्रियादर्शनात् प्रवृत्त्यंतरशून्यःकथमत्राह निरीहइति ।निषिद्धचेष्टाविधुरोभवति नतुक्रियामात्रशून्यः
ननुसंसारवशात्वर्तन्मूढजनस्थितंभ्रमंदृष्ट्वास्वयंमुह्यतीतिकिंनस्यादित्यत्राह संदृश्यतइति । यदिकश्चिन्मूढजनेस्थितमिदंपरमात्मभेदज्ञानंज्ञानिनांसंदृश्यतेतथाप्यवस्तुबुद्ध्याअविद्यमानोयंभेदभ्रमइ
तिज्ञानेनत्यक्तंमिथ्याज्ञानंपुनर्भ्रमाय भ्रमजननायनभवेत् तत्रनिमित्तमाह स्मृतिरानिपातादिति । न्यकभावेनपातोयस्मिन्तन्निपातंघंतमःमोक्षमारभ्यतावत्पर्यंतंस्मृतिर्यस्मात्ज्ञानिनोनिपातपर्यं

तंस्मृतिर्ज्ञानमस्तीतियत्तस्मादित्यर्थः । ज्ञानफलंमोक्षःकर्मफलंस्वर्गएवंमिथ्यानफलमंधंतमइतिस्मरतिज्ञानीति । निर्न्यकभावानिकामयोरितियादवः ३५ ननुत्रिगुणसर्गकृतोविकल्पइत्यत्रात्रिगुणबद्धानां विकल्पइत्युक्तंतत्रज्ञानिनोपिदेहवत्त्वेनत्रिगुणत्वाद्विकल्पःसंभाव्यतइत्यत्राह देहंचेति । निरंतरंभगवंतंध्यायन्जीवस्वरूपमारभ्यपरमात्मपर्यंतानितत्वानितत्तत्स्वरूपंयथावदध्यगमदेहादिविलक्षण तयातारतम्येनापरोक्षीचकारेतियत्तस्मादेहाभिमानरहितोध्यानरूढोवावास्थितमुत्थितंवादेहंनानुपश्यतिकीदृशंदेहं दैवादुपेतंप्राप्तंदैववशाद्भगवत्प्रेरितकर्मवशात्वियुक्तंचमदिरामदांधःमद्यपानजात्तम दविस्मृतात्मज्ञानःपुरुषःपरिवृतंआच्छादितंवासोयथादृढीकरणादियत्नंनकरोतीत्यतःत्रिगुणकृतदेहाभिमानाभावात्तत्कृतविकल्पोनास्तीतिभावः ३६ दैवादुपेतामित्येतत्स्पष्टयति देहोपीति । ननुस्वयंदेहपोषणादिप्रयत्नोदासीनश्चेत्कथंतिष्ठतइत्यतोवाह देहइति । दैववशगःस्वादृष्टप्रेकरश्रीहर्यधीनोदेहोपितावत्प्रतिसमीक्षतेप्रतीक्ष्यावतिष्ठते । कार्यस्यजडस्यकारणावस्थानमंतरेणावस्थानं कथमत्राह सासुरिति प्राणवृत्तिसहितत्वात् । कियंतंकालमत्राह कर्मेति । यावत्स्वारंभकंस्वोत्पादकादृष्टलक्षणं कर्मास्तिततत्समाप्तौपततीत्येवार्थेखलुशब्दःतथाप्यभिमानोभवत्येवेत्यत्राह तमिति । अधिरूढसमाधियोगअसंप्रज्ञातसमाधिस्थः । सप्रपंचंतंदेहंपुनर्नभजेत् पूर्वंयथातथादृतनंकरोतीत्यन्वयः । आदरोभजनंभक्तिर्बहुमानंचसेवनं । पर्यायवाचकाःसर्वेस्मृतिस्तज्जन्यकर्मचेतिवचनात् ।

देहंचनश्वरमवस्थितमुत्थितंचासिद्धोनपश्यतियतोध्यगमत्स्वरूपम् ॥ दैवादुपेतमुतदैववशादपेतंवासोयथापरिवृतंमदिरामदांधः ३६ देहोपिदैववशगः खलुकर्मयावत्स्वारंभकंप्रतिसमीक्षतएवसासुः ॥ तंसप्रपंचमधिरूढसमाधियोगःस्वाप्नंपुनर्नभजतेप्रतिबुद्धवत्सः ३७ मयैतदुक्तंवोविप्रागुह्यंयत्सांख्ययोगयोः ॥ जानीतमागतंयज्ञंयुष्मद्धर्मविवक्षया ३८ अहंयोगस्यसांख्यस्यसत्यस्यर्तस्यतेजसः ॥ परायणंद्विजश्रेष्ठाःश्रियःकीर्तेर्दमस्यच ३९ मांभजंति गुणाःसर्वेनिर्गुणंनिरपेक्षकम् ॥ सुहृदंपरमात्मानंसाम्यासंगादयोगुणाः ४० इतितेछिन्नसंदेहामुनयःसनकादयः ॥ सभाजयित्वापरयाभक्त्यागृणतसंस्तवैः ४१ तैरहंपूजितःसम्यक्संस्तुतःपरमर्षिभिः ॥ प्रतीयायस्वकंधामपश्यतःपरमेष्ठिनः॥ ४२ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेत्रयोदशोध्यायः ॥ १३ ॥ उद्धवउवाच ॥ वदंतिकृष्णश्रेयांसिबहूनिब्रह्मवादिनः ॥ तेषांविकल्पःप्राधान्यमुताहोएकमुख्यता १

कथमिवप्रबिबुद्धवत् यथास्वप्नादुत्थितःस्वाप्नंस्वप्नदृष्टंदेहंनभजेत्तथेति ३७ इतिहासंगमयति मयैतदिति ३८ कर्मयोगस्यसांख्यस्ययथार्थज्ञानस्यसत्यस्ययथार्थभाषणस्यऋतस्यभूतहितोपदे शिवेदस्यतेजसोबलस्यब्रह्मवर्चसस्यवाश्रियःसंपदः ३९ सर्वेगुणाअसंपूर्णगुणरूपाअप्रधानाः ब्रह्मादिदेवाएवंविधंमांभजंति किंगुणाश्चमांभजंति कीदृशं निर्गुणंप्रकृतिगुणवर्जितंआत्मानंसंपूर्णगुण रूपकंअतएवनिरपेक्षकं अपूर्णगुणस्यहिगुणापेक्षानचसास्वास्तीतिअतएवसुहृदंअनिमित्तबंधुंअतएवाहमेवसेव्यइत्युक्तं मियंतदेतत्प्रेयतइतिश्रुतेः । अपूर्णगुणरूपास्तुसंपूर्णगुणरूपकं । भजंतिप रमंब्रह्मदेवास्त्रिगुणवर्जितमितिवचनात् । केअगुणाइतितत्राह साम्यासंगादयइति ज्ञानादिगुणानांतारतम्येपिसर्वसामान्यादनभिधानं साम्यादीनांमदभावाद्विशेषोक्तिरितिज्ञाप्यम् ४० सन कादीनांभगवदुक्त्यछिन्नसंदेहत्वस्यकिंलक्षणमित्यत्राह इतीति । इतीत्यनेनसमाप्तिः ४१ पूजितःसम्यक्संस्तुतः इत्येताभ्यांचछिन्नसंशयत्वंलक्षयति ४२ ॥ इतिश्रीमहाभाग०वि०कृतटीकायां एकादशस्कंधेत्रयोदशोऽध्यायः ॥ १३ ॥भगवत्साक्षात्कारायसर्वस्मादुत्तमसाधनंभक्तिरेवतद्वताचेत्यंध्येयोहरिरितिद्वयमस्मिन्नध्यायेविधत्ते । तत्रोद्धवप्रश्नपूर्वकंविद्याम्नायंकथयति वदंतीति । श्रेयांसिप्रशस्तानिसाधनानितेषांसाधनानांयवाग्वापवसावेतिवदिदंभवतीदंवेतिविकल्पोवासंभूयसर्वेषांमाधान्यमुतैकस्यमुख्यता अन्येषांचतदुपसर्जनत्वंचेति १

भवतानपेक्षितःअन्यापेक्षारहितोखिलसाधनोत्तमोभक्तियोगउदाहृतःतथापिब्रह्मवादिमतानांकागतिरितिशेषः । येनभक्तियोगेन २ वेदमूलान्यवश्यांसतत्रमत्प्राप्तिसाधनभक्तिलक्षणार्थमःश्रपसा
मुत्तमइतिदर्शयितुंश्रद्धाजननायवेदोक्तपरंपरामाह कालेनेत्यादिना । कालेनकालशक्त्या मदात्मकोमद्विषयः ३ मनवेस्वायंभुवायकीदृशोयंतद्धितप्रत्ययःइत्येतत्स्पष्टयति पुत्रायेति । स्वयंभुवः
पुत्रत्वात्स्वायंभुवइत्यर्थः । अत्रमनोःपूर्वजत्वंरुद्रेंद्रकुमारान्विनेतिग्राह्यं । रुद्रमिंद्रंकुमारंचविनैवान्याग्रजोमनुः ब्रह्मपुत्रेष्वादिसृष्टावन्यथात्वंपुनर्जनेरितिवचनात् । आदिसृष्टौपूर्वजायेतेधिकाःसर्वतो
गुणैः । अनाद्यनंतकालेषुमुक्तावपियथाक्रममितिच ४ ५ रजःसत्वतमोभुवइतिपाठः ६ याभिःप्रकृतिभिःभूतानांअतिभेदेपिवेदस्यैकत्वेनतदर्थोप्येकविषयएवेतितत्राह यथाप्रकृतीति । वेदवाचः
त्रित्राःस्रवंतिधर्माद्यशेषार्थप्रतिपादकावाचः स्वमनीषार्थेप्रमाणवत्प्रतिभांतीत्यर्थः ७ ततःकिंतत्राह एवमिति । यथाप्रकृतिवैचित्र्याद्भेदरागार्थप्रतीतिवैचित्र्यमेवंमतयोपिविचित्राः । ननुश्रु
तिमूलत्वेनगुरुपरंपरागतत्वेनसर्वेषामपिमतानांप्रामाण्यमवगतंस्यादत्राह पारंपर्येणेति । अनेनमदुक्तपारंपर्येणागतानिकेषांविद्वादीनामेवतानिप्रमाणान्यन्यानिराजग्रादीनीत्यर्थः । विरलत्वापेक्षया

भवतोदाहृतःस्वाभिन्भाक्तियोगोनपेक्षितः ॥ निरस्यसर्वतःसंगंयेनत्वय्याविशेन्मनः २ ॥ श्रीभगवानुवाच ॥ कालेननष्टाप्रलयेवाणीयंवेदसंज्ञिता ॥
मयादौब्रह्मणेप्रोक्ताधर्मोयस्यांमदात्मकः ३ तेनप्रोक्ताचपुत्रायमनवेपूर्वजायसा ॥ ततोभृग्वादयोगृह्णञ्छब्दब्रह्ममहर्षयः ४ तेभ्यःपितृभ्यस्तत्पुत्रादे
वदानवगुह्यकाः ॥ मनुष्याःसिद्धगंधर्वाःसविद्याधरचारणाः ५ किंदेवाःकिन्नरानागारक्षःकिंपुरुषादयः ॥ बह्व्यस्तेषांप्रकृतयोरजःसत्वतमोभुवः ६ या
भिर्भूतानिभिद्यंतेभूतानांमतयस्तथा ॥ यथाप्रकृतिसर्वेषांचित्रावाचःस्रवंतिहि ७ एवंप्रकृतिवैचित्र्याद्भिद्यंतेमतयोनृणाम् ॥ पारंपर्येणकेषांचित्पाख
डमतयोऽपरे ८ मन्मायामोहितधियःपुरुषाःपुरुषर्षभ ॥ श्रेयोवदंत्यनेकांतंयथाकर्मयथारुचि ९ धर्ममेकेयशश्चान्येकामंसत्यंदमंशमम् ॥ अन्येवदंति
चार्थंवैऐश्वर्यंत्यागभोजने ॥ केचिद्यज्ञंतपोदानंव्रतानिनियमान्यमान् १० आद्यंतवंतएवैषांलोकाःकर्मविनिर्मिताः ॥ दुःखोदर्कास्तमोनिष्टाःक्षुद्रानंदाः
शुचार्पिताः ११ मय्यर्पितात्मनःसभ्यनिरपेक्षस्यसर्वतः ॥ मदात्मकंसुखंयत्तत्कुतःस्याद्विषयात्मनाम् १२ अकिंचनस्यदांतस्यशांतस्यसमचे
तसः ॥ मयासंतुष्टमनसःसर्वाःसुखमयादिशः १३

केषांचिदित्युक्तंवामशैवादीनितामसत्वेनपाखंडानीत्याह । पाखंडेति ८ अत्रनानामतत्वेशुरुयकारणंकीमिति तत्राह । मन्मायेति । अनेकांतंनानाविधं यथारुचियथेच्छम् ९ एतदेवविशदयति
धर्ममेकइति त्यागोभिमानत्यागः । भोजनंवाग्वादेः १० एतत्साधनसाध्यान्लोकानाह आद्यंतवंतइति । एषांकर्मनिर्मितालोकास्तेषामाद्यंतवत्त्वेपियावल्लोकंसुखमस्तिकिंनेत्याह दुःखोदर्का
इति । तमोनिष्टाः अंधकारप्रचुराः । मद्भक्तिवर्जितंश्रेयोयेमन्यंतेदुराशयाः । तेषांमंतेतमोघोरमनंतंप्राप्यतेध्रुवमितिवचनात् असन्मतानिष्टानांतमएव । बृहस्पत्युक्तत्वेपिहरिभक्तिरहित्यात् । अल्पा
नंदत्वेशुचार्पितत्वेहेतुः ११ भगवद्धर्मसाध्यलोकसुखवत्तल्लोकसुखमपिनिर्दुष्टंकिंनस्यादवेशेषादत्राह मयीति । अहमात्माप्रापकोयस्यतन्मदात्मकंमय्यर्पितआत्मामनोयस्यसत्येसाधुगुणपूर्णेममात्मा
स्वभावोयस्यतथेतिवा यथाहंनिर्दोषस्वभावः तथेदमपीत्यनयोक्त्याविशेषोदर्शितः इतीतरानुमानस्यतर्काभावेनदौर्बल्यान्नोत्थातुमलमित्यर्थः १२ एवंविधस्यमदर्पितात्मनोनिकेवलममुत्रसुखि
त्वं इहापिसुखित्वंस्यादित्याह अकिंचनस्येति अकिंचनस्येत्यत्रएकैकोपिसुखित्वहेतुःकिमुतसमुदिताइतिभावेनोक्तं सर्वाःसुखमयाइति १३

त्स्व्यर्पितात्मनोपिपारमेष्ठ्याद्याकांक्षायांतत्पदानांदुःखमिश्रसुखरूपत्वात्सर्वत्रसुखित्वंकथमित्याशंक्याह नपारमेष्ठ्यमिति । मय्यर्पितात्मामामेवसुखमिच्छति मदन्यत्किंयपिनेच्छतीतियतस्तस्मात्तस्यनिराकांक्षत्वेनसर्वत्रसुखमेवेतिभावः १४ अत्रभक्तेषुप्रीतिविशेषोस्तीतिदर्शयितुंभक्तेःकर्तव्यत्वंचनिदर्शयन्निवउद्धवंअतिस्तौति नतथेति अनेनमनुष्यादिभक्तेषुभिक्षान्नप्रदानवत्कृपानिमित्तप्रीतिर्लक्ष्म्यादिषुश्रियापुत्रादिप्रीतिवत्सार्वकालिक्यांतरामप्रीतिरस्तीतिसूचितम् । कृपानिमित्तायाप्रीतिर्नीचभक्तेषुसाधिका । आंतरैवतुयाप्रीतिःसातूच्चेषुथाक्रमं यथाकश्चित्स्वमात्मानंप्रियांपुत्रमथापि वा । अतिहायरूपायुक्तोभिक्षवेन्नददात्यपि । कदाचिदेवनपुनःस्वात्मादेःसार्वकालिकं । योगक्षेमवहत्वंचनित्यंस्वात्मादिषुस्फुटं । एवमेवपरेशस्यभक्तेषुश्रियंजादिषुइतिवचनात् । यादवेभ्यस्तुसर्वेभ्य उद्धवोभगवत्प्रियः । उद्धवाच्चप्रियतमःप्रद्युम्नस्तुमहारथः । तस्मादपिप्रियतमोरामःकृष्णस्यसर्वदा । नैवतस्मात्प्रियतमोविनैवैकंचतुर्मुखं । सर्वेभ्योपिप्रियतमाहरेःश्रीरेववल्लभा । नैवतस्याप्रियतमोविना स्वात्मानमेवत्वित्यतोपिसर्वयादवेभ्योविशिष्टभक्तउद्धवइतिप्रकटनायविशिष्यस्तुतउद्धवइतिभावः १५ ननुप्रतीतार्थपरित्यज्यान्यार्थविशेषकल्पनेकोहेतुरित्याशंक्यातिदेशोहेतुरितिभावेनाह निरपेक्षमिति स्वांघ्रिरेणुभिस्तंपूबेयशोधयामित्यनुव्रजामि । अनुगच्छतोममपादधूलयोवायुनापुरतोगच्छंतिभक्तेनिपतंत्योतितरांशोधयंतीदंसनलभूमिपादविक्रमेसिद्धंभवतीतितःपूयेय शुद्धोभवानीत्यमर्थोनयुक्तः । यत्सेवयामाहात्म्यमाप्तः । सहरिस्तदनुगमनेनतत्पादरेणुसंपर्केणशुद्धोभवतीतिनयुज्यतेसदोषस्यशुद्धिप्रार्थनंदृष्टंनिर्दोषस्यनघटतइत्युक्तएवार्थः । अनुगच्छतिविष्णुस्तुस्वभक्तंत

नपारमेष्ठ्यंनमहेंद्रधिष्ण्यंनसार्वभौमंनरसाधिपत्यम् ॥ नयोगसिद्धीरपुनर्भवंवामय्यर्पितात्मेच्छतिमद्विनान्यत् १४ नतथामेप्रियतमआत्मयोनिर्न शंकरः ॥ नचसंकर्षणोनश्रीर्नवात्माचयथाभवान् १५ निरपेक्षंमुनिंशांतंनिर्वैरंसमदर्शनम् ॥ अनुव्रजाम्यहंनित्यंपूयेयस्वांघ्रिरेणुभिः १६ निष्किंचनामय्यनुरक्तचेतसःशांतामहांतोखिलजीववत्सलाः ॥ कामैरनालब्धधियोजुषोयेतेनैरपेक्ष्यंहिविदुःसुखंमम १७ बाध्यमानोपिमद्भक्तोविषयैरजितेंद्रियः ॥ प्रशस्तयापिमद्भक्त्याविषयैर्नाभिभूयते १८ यथाग्निःसुसमिद्धार्चिःकरोत्येधांसिभस्मसात् ॥ तथामद्विषयाभक्तिरुद्धवैनांसिकृत्स्नशः १९ नसाधयतिमांयोगोनसांख्यंधर्मउद्धव ॥ नस्वाध्यायस्तपस्त्यागोयथाभक्तिर्ममोर्जिता २०

स्यशुद्धये । तस्यांघ्रिरेणुभिर्वातनीतैरग्रेसरःशुचिः । अग्रतोगमनेविष्णोःपादस्पृष्टरजोभवेत् । अतःस्वभक्तंपूयेयेत्यनुव्रजातिकेशव इतिवचनात् । अनेननिष्कामत्वादिगुणसंपन्नत्वेनसेवमानेषुभक्तेषुत्वय्यतिशयितप्रीतिरस्तीत्युक्तंभवति १६ एवंभजतांनिर्दुःखानंदानुभवोभविष्यतीत्यत्रकिंमानमित्याशंक्यब्रह्मादिज्ञानिप्रत्यक्षं प्रमाणमितिनिदर्शयति निष्किंचनाइति । येनिष्किंचनाःनिष्किंचनत्वादिगुणपूर्णाःकामैर्विषयैरनालब्धधियोप्रतिहतबुद्धयःअजुषश्चविषयानसेवमानाश्चतेममसकाशात्सैरपेक्ष्यंविषयानपेक्षंस्वरूपसुखंस्यादितिविदुर्हीत्यन्वयः । ननुबिंबभूतस्यविष्णोःस्वरूपसुखसद्भावेमानमस्त्विचेत्प्रतिबिंबजीवस्वरूपसुखाविर्भावेभक्त्यादिसाधनसामग्रीसंपादनयत्नेनेतरांशफलःस्यात्तत्रकिंमानमित्यत्रापींदमुत्तरंभवतीत्याह निष्किंचनाइतिममनैरपेक्ष्यंसुखमस्तीतिविदुरित्यन्वयः । हिशब्दश्चभयत्रापिप्रमाणमस्तीतिसूचयतिज्ञानिप्रत्यक्षलक्षणप्रमाणसद्भावाद्भक्त्यादिसाधनमवश्यमापादनीयमितिभावः १७ ननुत्वद्भक्तस्यापिविषयग्राहग्रस्ततयाभक्तिलोपेनाधःपातःसंभाव्यतइतिभक्तिविधानंव्यर्थमितितत्राह बाध्यमानइति विषयैर्बाध्यमानत्वेनाजितेंद्रियोपिप्रशस्तयामद्भक्त्याविषयैर्नाभिभूयते । विषयानिषेवयामाप्तदोषेणाधोनपततीत्यन्वयः १८ कथमिवेतितत्राह यथेति एनांसि पापानि १९ भक्त्यानुपहितबुद्धिनानुष्ठितधर्मादयोमदपरोक्षंनजनयंतीत्याह नेति २०

---

१ श्रीश्राजश्रश्रियजौतावादिर्येषांतेश्रियजादयःतेषुअत्रेड्यइच्छंदसः ।

भक्तिप्रधानधर्मादीनांतत्साधनवद्भक्तिरूपतत्साहित्यापेक्षतत्साधनत्वमत्राह भक्त्येति । भक्तेःप्राधान्यगुणादर्शनात्कथंतदुभावरुच्यतइतत्राह भक्तिरिति । सनकादीनांनिरपेक्षतारूपं भक्तेः
सोत्पत्त्यनंतरमेवपुनातिनतुकालक्षेपेण २१ भक्तिनापेक्षीनानांधर्मादीनामप्रयोजकत्वमर्थादुक्तं अधुनातत्प्रकाशयति धर्मइति । हिशब्दोनायमात्माप्रवचनेनलभ्यइतिश्रुतिंसूचयति
२२ यद्यपिमहांतोवैष्णवसिद्धांताचलनत्वादिव्रतेनास्यभक्तिरस्तीतिजानतेतथापिबाह्यानांसुबोधायभक्तेःप्रत्यक्षलक्षणान्याह कथमिति २३ समीचीनभक्तियुक्तःपुरुषोपिसर्वपुनातिकिंपुनर्भक्ति
रित्याशयेनाह वाग्गद्गदेति । अत्र चित्तद्रवस्तथाधैर्यप्रसादोभक्तिलक्षणः आधिक्येनतुतत्रापिस्थैर्यमेवाविशेषतः । दंभस्यचलभक्तेश्चयस्माद्भयादिकंभवेत् । दंभादिपरिहारार्थंनिर्गुणाच्चधीरधीः ।
अतआध्यात्मिकैःक्लेशैराधिभूताधिदैवतैः । वाक्यैश्चवेदतंत्रादिरुपदेशैश्चतादृशैः । बलवच्छासनैर्वापियस्यभक्तिर्नचाल्यते । सएवपरमोभक्तोविष्णोर्हृदयवल्लभइतिविशेषाश्चग्राह्याः २४ भक्तिःपुनातीत्युक्तंतत्रशुद्धिप्रकारंसदृष्टांतमाह यथेति । अग्निनामुखवायुसंयोगेनोज्ज्वलितेनयथातंदाहविशेषंप्राप्तंहेममलंभ्रष्टादशदोषलक्षणंस्वरूपंनिर्दोषभास्वरलक्षणं आत्मासत्स्वभावोजीवोनाद्यविद्याकामक
र्मकलिलंकर्मानुशयमंतःकरणंभक्तियोगेनविधूयनिर्मलीकृत्यअथोमंगलमूर्तिमांभजतइत्यन्वयः २५ द्वित्रादिगुणाधिकं यथातहेमवत्भक्तियोगोद्रेकक्रमेणशुद्धमात्मानमनःभगवत्सूक्ष्मत

भक्त्याहमेकयाग्राह्यःश्रद्धयात्माप्रियःसताम् ॥ भक्तिःपुनातिमन्निष्ठासकाममपिसंभवात् २१ धर्मःसत्यदयोपेतोविद्यावातपसान्विता ॥ मद्भक्त्यपेत
मात्मानंनसम्यक्प्रपुनातिहि २२ कथंविनारोमहर्षंद्रवताचेतसाविना ॥ विनानंदाश्रुकलयाशुध्येद्भक्त्याविनाशयः २३ वाग्गद्गदाद्रवतेयस्यचित्तंरुद
त्यभीक्ष्णंहसतिक्वचिच्च ॥ विलज्जउद्गायतिनृत्यतेचमद्भक्तियुक्तोभुवनंपुनाति २४ यथाग्निनाहेममलंजहातिध्मातंपुनःस्वंभजतेचरूपम् ॥ आत्माचक
र्मानुशयंविधूयमद्भक्तियोगेनभजत्यथोमाम् २५ यथायथात्मापरिमृज्यतेसौमत्पुण्यगाथाश्रवणाभिधानैः ॥ तथातथापश्यतिसूक्ष्मतत्त्वंचक्षुर्यथैवांजनसं
प्रयुक्तम् २६ विषयान्ध्यायतश्चित्तंविषयेषुविषज्जते ॥ मामनुस्मरतश्चित्तंमय्येवप्रविलीयते २७ तस्मादसदभिध्यानंयथास्वप्नमनोरथम् ॥ हित्वामयि
समाधत्स्वमनोमद्भावभावितम् २८ स्त्रीसंगसंगिनासंगंत्यक्त्वादूरतआत्मवान् ॥ क्षेमेविविक्तआसीनश्चिंतयेन्मामतंद्रितः २९

त्त्वंपश्यतीत्याह यथेति । परिमृज्यतेशोध्यतेतत्त्वंसूक्ष्मंसूक्ष्मतत्त्वं अत्रदृष्टांतांतरंचाह चक्षुरिति २६ कर्मसचिवरहित्येनभक्तिपूर्वकध्यानमात्रेणचित्तंकथंत्वयिनिरंतरंविलग्नंभवतीत्यत्राह विष
यानिति आत्मानुभवएवात्रमानंनमानांतरमन्वीक्षणीयमितिभावेनविषयनिदर्शनमुक्तम् । चित्तंस्वरूपचैतन्यमित्यर्थः २७ मथितमाह तस्मादिति यथास्वप्नमनोरथंस्वप्नवन्मनोरथवच्चासदभिध्या
नंअशुभंविषयध्यानंहित्वा । नन्वेवंतर्हित्वदासक्तिरचित्तस्यविषयासक्तिरपिग्राह्याकिमित्यतोवामंदाशंकांपरिहरन्नुपसंहरति तस्मादिति । अज्ञानामपिबुद्ध्यवतारार्थंविषयसक्तिनिदर्शनमुक्तं नतुग्राह्यार्थ
त्वेनेतियत्तस्माद्भावोभक्तिःमयिभक्त्याभावितंतन्मयीकृतं २८ स्वरूपबाह्यांतःकरणभोग्यत्वभेदेनद्विविधाविषयाःतत्रपूर्वेमुक्तावपेक्षणीयाद्वितीयाःसांसारिकाःअनर्थजनकत्वान्मुमुक्षुणाअव
श्येहेयाःतथाहितत्सेवातिरेकेणेश्वरोहमित्यादिलक्षणाकेशवेन्यथाबुद्धिर्जायते । जन्मप्रभृतिपुरुषेणसहवर्तमानत्वात् । सुखक्षयहेतुत्वेनरूपादिशब्दवाच्याः रीक्ष्यइतिधातोः तस्याःसंगोयेषांते
स्त्रीसंगाःतत्संगानांसंगोयेषामितिस्त्रीसंगसंगिनःतेषांसंगंदूरतःपरिहृत्यमत्सेवैवकर्तव्येश्वरोममस्वामीतत्किंकरोहमित्यादिलक्षणेतिभावेनविषयास्त्यक्तव्याइत्याशयेनाह स्त्रीसंगेति अनेनस्त्रीरागिणां
संगोपिपरिहर्तव्यइत्युक्तंभवति । केशवेत्वन्यथाबुद्धिःसैवस्त्रीसंप्रकीर्तितेत्यादिवाक्यमत्रप्रमाणं क्षेमेमंगलस्थले २९

नन्वन्येषुहत्यादिषुअधःपातहेतुषुहेयेषुसत्सुकिंविशेष्यस्त्रीसंगसंगिसंयोदूरतस्त्याज्यइत्युच्यतइत्यतआह नतथेति । यथास्यपुंसःयोषित्संगाद्विषयिभिर्जुष्टत्वाद्योषिच्छब्दवाच्यायाईश्वरोहमित्याद्यनेक विधान्यथाबुद्धेरधिकरणलक्षणसंगाद्यथातत्संगिसंगतःमिथ्याज्ञानिसेवालक्षणसंगात्क्लेशोबंधश्चांधंतमोलक्षणश्चभवेत् । तथान्यप्रसंगतःपिपीलिकादिवधलक्षणान्नभवेदित्यन्वयः अत्रपातकविशेषशास्तत्फ. लानिच । परदारदृशिप्रोक्ताक्षुद्रपातकसंज्ञिताः । उपपातकंतद्वृत्तिश्चवर्णबाह्येषुपातकम् । महापातकसंज्ञंतुपित्रादेर्दारधर्षणम् । दारदृष्टिःस्वोत्तमानांमानुषाणांस्वभावतः । सुमहापातकंप्रोक्तंतद्वृत्तिस्तुमह त्तमः । ऋषिदारेषुमनसोगतिरेवततोधिकम् । देवदाराभिकामानांसंगिसंगस्ततोधिकः । किमुविष्णोस्ततोयोषित्संगस्यव्यत्ययास्थितेः । नसमंपातकंकापिनाहिस्वरुयाभिकामिनः । अवज्ञातामाधवादेस्तस्मात्तंदूरतस्त्यजेत् । मानुषेषुतुदुःखित्वंक्षुद्रपापफलंस्मृतं । पापंतुवर्णबाह्यत्वंतिर्यग्योनिगतिस्तथा । सहस्रवर्षैनरकंक्षुद्रपातकजंफलम् । तथोपपातकाच्चापिनरकंयुगमात्रकं । चतुर्युगावसानंतुपातकस्यफलंस्मृतं । महापातकजन्यंचकल्पावधिसमीरितं । सुमहापातकाच्चापियावद्ब्रह्मलयोभवेत् । तत्परांपातकानांफलमंधंतमःस्मृतं । अधोधोदुःखमतुलंविष्णुदाराभिमर्शनात् । वधादपिहिदाराणांधर्षणंकोपकारणं । तस्माद्देव्यःसदावंद्याअग्रिवत्राभिकामतइति । धर्ममतत्त्ववचनाद्विशेषःपातकानांफलानांचद्रष्टव्यः ३० ध्यायेन्मामतंद्रितइत्यत्रोक्तंध्यानप्रकारंपृच्छ

नतथास्यभवेत्क्लेशोबंधश्चान्यप्रसंगतः ॥ योषित्संगाद्यथापुंसोयथातत्संगिसंगतः ३० ॥ उद्धवउवाच ॥ यथात्वामरविंदाक्षयादृशंवायदात्मकम् ॥ ध्यायेन्मुमुक्षुरेतन्मेध्यानंत्वंवक्तुमर्हसि ३१ श्रीभगवानुवाच ॥ समआसनआसीनःसमकायोयथासुखम् ॥ हस्तावुत्संगआधायस्वनासाग्रकृतेक्षणः ३२ प्राणस्यशोधयेन्मार्गंपूरकुंभकरेचकैः ॥ विपर्ययेणापिशनैरभ्यसेन्निर्जितेंद्रियः ३३ हृद्यविच्छिन्नमोंकारंघंटानादंबिसोर्णवत् ॥ प्राणेनोदीर्यतत्राथपुनःसंवेशयेत्स्वरम् ३४ एवंप्रणवसंयुक्तंप्राणसंयममभ्यसेत् ॥ दशकृत्वस्त्रिषवणंमासादर्वाग्जितानिलः ३५ हृत्पुंडरीकमंतस्थमूर्ध्वनालमधोमुखम् ॥ ध्यात्वोर्ध्वमुखमुन्निद्रमष्टपत्रंसकर्णिकम् ३६ कर्णिकायांन्यसेत्सूर्यसोमाग्नीमुत्तरोत्तरम् ॥ वह्निमध्येस्मरेद्रूपंममैतद्ध्यानमंगलम् ३७ समप्रशांतंसुमुखंदीर्घचारुचतुर्भुजम् ॥ सुचारुसुंदरग्रीवंसुकपोलंशुचिस्मितम् ३८ समानकर्णविन्यस्तस्फुरन्मकरकुंडलम् ॥ हेमांबरंघनश्यामंश्रीवत्संश्रीनिकेतनम् ३९ शंखचक्रगदापद्मवनमालाविभूषितम् ॥ नूपुरैर्विलसत्पादंकौस्तुभप्रभयायुतम् ४०

ति यथेति । यादृशंकीदृशंयदात्मकंकिमात्मकम् ३१ समाहितेनमनसाध्यानंकर्तव्यं एतदुपायंप्रथमतोवक्ति समआसनइत्यादिना ३२ विपर्ययेणरेचकादिक्रमेण ३३ अत्रप्राणशब्दोद्विरावर्त्तनीयः हृदिनिरंतरंप्राणेनोच्चार्यमाणंओंकारंघंटानादवत्कर्णरमणीयंबिसोर्णवत्पद्मनालतंतुवदविच्छिन्नंवायुद्वारापेर्यमाणंप्राणशक्त्योदीर्यउच्चार्यमाणंतत्रस्वहृदि स्थितेप्राणेस्वरमुदात्तलक्षणंपुनर्व्यावृत्तंयथातथा संवेशयेत्समीचीनंकुर्यादित्यन्वयः । ऊर्णाभ्रूमध्यमावर्तेतंतौमेषादिलोमास्थितियादवः । पुनरप्रथमेप्रश्नव्यावृत्तावधारणइति ३४ प्रणवेनसंयुक्तंप्राणसंयमंप्राणायामं मासादर्वाक्मासात्पूर्वमेवानि लोजितःप्राणप्रसादंप्राप्नइत्यर्थः उपास्यप्राणतोनुज्ञांहृदिस्थात्प्राप्यसेवकः । अनुज्ञानंतरंमासाद्वशेप्राणोभविष्यति । प्रसादभाक्त्वंसंप्रोक्तंप्राणविष्णवोर्जयास्त्विति । नहिसर्वविजेतारौविजेयौकेनचित्कावित् अपेक्षितंफलंतेनदीयतेतज्जितंत्विति । यथाजितावसुमतीयथामोक्षपदांजितामितिप्रभंजनप्रमाणवचनादुक्तम् ३५ कथंस्थितंत्वामितिप्रश्नंपरिहरति । हृत्पुंडरीकेति ३६ यादृशमितिप्रश्नंपरिहरति वह्निमध्यइति ३७ यदात्मकमित्यस्यपरिहारःप्रशांतमित्यनेनसूचितः । निर्दोषप्रकृष्टानंदस्वभावमित्यर्थः ३८ ३९ ४०

४१विषयपाशाकृष्टत्वेनविक्षेद्रिद्धैर्ध्यानंकथमुपपद्यतइत्यतस्तदुपायमाह इंद्रियाणामिति तस्मिन्ध्ययएवास्थतमनाः ४२ सर्वव्यापकसर्वागावयवाचित्तमाकृष्यैकत्रएकस्मिन्मुखावयवसर्वावयवस्मरणाश
क्तावेकस्मिन्नवयवेधारयेदित्यर्थः ४३ तत्रमुखादौलब्धपदमाकृष्यव्योम्निसर्वांगेपुधारयेदित्यर्थः । व्योमेतिव्याप्तशब्दःस्याद्विशेषादोततांयतइतिवचनात् विशेषादोतत्त्वमवयवानामित्यर्थः । मय्येवम
नसआरोहोयस्यसमदारोहःपुरुषः । तच्चधारणलक्षणंध्यानंत्यक्त्वास्वतएवमनसस्तत्रैवसमाहितत्वादयत्नेनजलधौगंगाप्रवाहगमनवच्चिंतयेत् । तदुक्तं यावत्समग्रस्मरणमचलंकेशवेभवेत् । समग्रंचित
येत्तावद्यदातुविचलेत्ततः । प्रत्यंगधारणंकुर्यान्मनोयावत्समग्रगं । प्रत्यंगाभ्यासतोयावत्समग्रेप्युस्थिरंमनः । तदापुनःसमग्रंतुधारयेन्नतोबुधः । यथातुधारणोत्साहंविनातत्राचलंमनः । तिष्ठेत्त्यक्त्वा
तमुद्योगंशंखचक्रांबुजांकिते । आरूढचेताःपरमेशृंगाराद्येकधामनि । नैवान्यच्चिंतयेत्तस्मात्पूर्णानंदाच्चतुर्भुजात् ततोन्यस्मरणेतस्मान्मनश्चलतिसुस्थिरम् । धारणार्थंप्रयत्नेनतस्मात्तद्भयंत्यजेत् ।
यावत्स्वारूढचेताःस्याद्विष्णोरूपेचतुर्भुजइति ४४ उपासनाफलमाह एवमिति एवंनिरंतराभ्यासरतंमतिदिनंप्रवृद्धप्रेम्णामय्येवसमाहितमतिस्तत्परिपाकेसत्यात्मनिदेहेआत्मानंज्ञानाद्यभीष्टदातृत्वेनस्वा
मिनंमामेवधिचष्टेजीवात्पृथक्स्थितंपश्यति विनिषेधेपृथक्भावइतिपादवः सर्वात्मन्सर्वस्वामिनिज्योतिषिज्योतिर्मयेमयिसंयुतंमदाधारतयास्थितं तस्माज्ज्ञातंतस्मिन्नेवैतामितिज्योतिर्जीवंचपश्य

द्युमत्किरीटकटककटिसूत्रांगदैर्युतम् ॥ सर्वांगसुंदरंहृद्यंप्रसादसुमुखेक्षणम् ॥ सुकुमारमभिध्यायेत्सर्वांगेषुमनोदधत् ४१ इंद्रियाणींद्रियार्थेभ्योमनसा
कृष्यतन्मनाः ॥ बुद्ध्यासारथिनाधीरःप्रणमेन्मयिसर्वतः ४२ तत्सर्वव्यापकंचित्तमाकृष्यैकत्रधारयेत् ॥ नान्यानिचिंतयेद्भूयःसुस्मितंभावयेन्मुखम् ४३
तत्रलब्धपदंचित्तमाकृष्यव्योम्निधारयेत् ॥ तच्चत्यक्त्वामदारोहोनकिंचिदपिचिंतयेत् ४४ एवंसमाहितमतिर्मामेवात्मानमात्मनि ॥ विचष्टेमयिस
र्वात्मन्ज्योतिर्ज्योतिषिसंयुतम् ४५ ध्यानेनेत्थंसुतीव्रेणयुंजतोयोगिनोमनः ॥ संयास्यत्याशुनिर्वाणंद्रव्यज्ञानक्रियाभ्रमः ४६ ॥ इतिश्रीभागवतेमहापुरा
णेएकादशस्कंधेचतुर्दशोध्यायः ॥ १४ ॥ ७ ॥ श्रीभगवानुवाच ॥ जितेंद्रियस्ययुक्तस्यजितश्वासस्ययोगिनः ॥ मयिधारयतश्चेतउपतिष्ठंतिसिद्धयः १
॥ उद्धवउवाच ॥ कयाधारणयाकास्वित्कथंवासिद्धिरच्युत ॥ कतिवासिद्धयोब्रूहियोगिनांसिद्धिदोभवान् २

ति । तारतम्येनबिंबभावेनस्थितास्तत्त्वाभिमानिनोदेवतादृष्ट्वासर्वाधारंमामंतेपश्यतीतिभावः । समाधियोगेसंपूर्णेहृदिपश्यतिकेशवम् । जीवंतत्प्रतिबिंबंचतेनैवसहसंस्थितं । तदाधारंतदंतःस्थंतेनैवस
दृशंसदा । आनंदज्ञानशक्त्याद्यैःसदातदवरंगुणैः । जीवन्मुक्तौचमुक्तौवासततंतद्वशेस्थितमित्येतदत्रमानम् । स्वयंप्रकाशरूपत्वाज्जीवोपिज्योतिरुच्यतइतिच ४५ दर्शनफलमाह ध्यानेनेति सुती
व्रेणनिशितेनइत्थमुत्पन्नध्यानेननिदिध्यासेनदर्शनेनयुंजतः सर्वस्मात्प्रेष्ठोयमितिध्यायतोयोगिनोज्ञानिनोद्रव्यज्ञानक्रियाभ्रमः मदीयोयमितिदेहविषयेज्ञानेंद्रियकर्मेंद्रियविषयेचभ्रमतीतिभ्रमरूपंप्राक्
तमनोनिर्वाणंनाशंआशुसंयास्यतियातीत्यन्वयः ४६ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेविजयध्वजकृतटीकायांचतुर्दशोध्यायः ॥ १४ ॥ ७ ॥ परंज्ञानफलममृतमेवनकिंत्वणिमादिसि
द्धिरप्यैहिकीत्येतदस्मिन्नध्यायेनिरूपयति. तत्रादौ नापृष्टःकस्यचिद्ब्रूयादित्यतः प्रश्नबीजमुत्थापयति जितेंद्रियस्येति १ सिद्धयइतिशुश्रुवानुद्धवःकींदृश्याधारणयाकाकासिद्धिः ताश्चकतिसं
ख्याताःसंतीतिपृच्छति कयेति २

२ वेञ्तंतुसंतानेदिवादिः ऊयते व्याप्नोति इति ओतस्तस्यभावः ओतता

कतिवेतिप्रश्नंपरिहरति सिद्धयइति । धारणायोगपारगैःधारणाख्ययोगपारंगतैरत्रोत्पन्नज्ञानस्यापितत्तद्योगीसिद्धयेतत्तदधिष्ठानगततत्तद्भगवद्रूपविशेषानुस्मरणंधारणेत्युच्यते । तस्मात्सिद्धीनांमुख्यतो ज्ञानफलत्वेपिधारणाफलत्वमुपचारोन्यथानुत्पन्नज्ञानस्यापिधारणमात्रेणतत्सिद्धिप्रसंगइति । असुराणांतुभगवत्कृपमायाहेतवइतिचतासामष्टादशसिद्धीनांमूलभूताअष्टौसिद्धयोमय्येवप्रधानामुख्याअन्येषुदेवेषूपचरिताइतिमत्प्रधानाः । सर्वाधिकाअणिमाद्याविष्णोर्नान्यस्यकस्यचित् । स्वाभाविकाविरिंचस्यमत्प्रसादात्पराधिकाइति । स्वाभाव्येष्वितिवचनात् ताएवअष्टैवगुणभूतानामनूर्मिमत्त्वाद्यानामपिहेतवः । निःसीमाष्टगुणाभावात्सिद्धयोष्टादशस्मृताः । देवेभ्योन्यत्रदेवानांसिद्धयोष्टैवसंमताइति ३ कास्ताअष्टेतितत्राह । अणिमेत्यादिना । मूर्तेःस्वरूपस्याणिमादिसिद्धिःइंद्रियैरन्येंद्रियैर्विषयप्राप्तिःश्रुतेपुदृष्टेषुवस्तुषुप्राकाश्यशक्तिप्रेरणमेवेशितृत्वम् गुणेष्वसंगएववशित्वम् । यस्मिन्कामोयस्यसपत्कामस्तत्काममवाप्स्यतिइतियत्प्राकाम्यम् । यादृशानंदकामःस्यात्तादृशानंदसंभवःभोगान्विनैव प्राकाम्यमणिमादेःपृथग्यतइतिवचनात् ४ ५ इदानीमष्टादशासिद्धीरुद्दिशति अनूर्मिमत्त्वमित्यादिना । अणिमामहिमालघिमाप्राप्तिःप्राकाश्येशितावशितापा काम्यीमित्यष्टमहासिद्धयः अनूर्मिमत्त्वम् दूरश्रवणम् दूरदर्शनम् । मनोजवःकामरूपंपरकायप्रवेशनं स्वच्छंदमृत्युर्देवानांसहक्रीडानुदर्शनम् । यथासंकल्पसंसिद्धिराज्ञाप्रतिहतागतिः । अद्वंद्वं त्रिकालज्ञत्वम् परचित्ताद्यभिज्ञता अग्निस्तंभः अर्कस्तंभः । जलस्तंभोविषादिस्तंभः । अत्रादिशब्देनशस्त्रास्त्रनखदंततादनशापादिभिरप्रतिहतिर्गृहीता इयंसंभूयसप्तदशीसिद्धिः अपराजयइत्यष्टादशासिद्धयःअणिमाद्यष्टसिद्धिभ्योजाताः एवमुभयेसंभूयषड्विंशाःगरिम्णासहसप्तविंशाःअथांतर्भावभेदेनाष्टासिद्धीनामष्टादशसिद्धयइतिकेषांचित्पक्षः । तथाहि अनूर्मिमत्त्वस्यप्राकाम्यांतर्गतत्वेनतेउभेएका दूरश्रवणदूरदर्शनत्रिकालज्ञत्वपरचित्ताद्यभिज्ञता

श्रीभगवानुवाच ॥ सिद्धयोष्टादशप्रोक्ताधारणायोगपारगैः ॥ तासामष्टौमत्प्रधानाताएवगुणहेतवः ३ अणिमामहिमामूर्तेर्लघिमाप्राप्तिरिंद्रियैः ॥ प्राकाश्यंश्रुतदृष्टेषुशक्तेःप्रेरणमीशिता ४ गुणेष्वसंगोवशितायत्कामस्तदवाप्स्यति ॥ एतामेसिद्धयःसौम्यअष्टावौत्पत्तिकामताः ५ अनूर्मिमत्त्वंदेहेस्मिन्दूरश्रवणदर्शनम् ॥ मनोजवःकामरूपंपरकायप्रवेशनम् ६

नांप्राकाश्यांतर्भावेनचतस्रएकाकामरूपत्वस्याणिमामहिमालघिमांतर्भावेनैका । अग्निस्तंभार्कस्तंभजलस्तंभाविषस्तंभशस्त्रास्त्रशापादिस्तंभानांईशित्ववशित्वांतर्भावेपंच अपराजयोपिईशित्वांगंतइति षट् मनोजवकामरूपपरकायप्रवेशस्वच्छंदमृत्युतादेवैःसहिततत्क्रीडानुदर्शनाज्ञाप्रतिहतानांप्राप्त्यंतर्भावेनषट् अत्रकामरूपत्वस्याद्विवारोक्तिः रूपभेदेननविरुध्यते । गरिम्णःसैवहेतुःस्यान्महिमाहेतुधारणात् । प्रायोष्टसिद्धिकथनेष्वतोनपृथगुच्यतइति । प्राप्तिःप्रकाश्ययोश्चापिधारणेकापिसंभवेत् । अतऐक्येनतावुक्तागरिमाणंपृथक्कृचित्इति । मूलभूतास्तुसिद्धीनांदेवानामष्टासिद्धयः । सर्वसिद्धिप्रधानास्तास्तज्ज्ञाअष्टादशस्मृताः । अष्टस्वंतर्गतास्तास्तुतदपेक्षतयाल्पकाइति । अनूर्मिमत्त्वासिद्धिस्तुप्राकाम्यांतर्गतास्मृता । दूरश्रुतिर्दूरदृष्टिस्त्रिकालज्ञत्वमेवच । परचित्ताद्यभिज्ञानंप्राकाश्यांतर्गतानिच अणिमादित्रयांतश्चकामरूपत्वमिष्यते । अग्न्यर्कांबुविषादीनांप्रतिष्टंभोवशित्वगः । मनोजवःकामरूपंपरकायप्रवेशनम् । स्वच्छंदमृत्युतादेवैःसहक्रीडेष्टसाधनम् । प्राप्तावंतर्गतान्याहुराज्ञाप्रतिहतिस्तथा । अग्निस्तंभोरविस्तंभउदकस्तंभएवच । विषस्तंभस्तथाशस्त्रशापादिस्तंभएवच । ईशित्वांतर्गतान्याहुरपराजयमेवच । एवमष्टादशाष्टभ्योजायंतेसिद्धयःक्रमात् । अष्टादशाभ्यश्चान्यास्तुजायंतेसिद्धयोमिताः । अनूर्मिमत्त्वंदुःखस्याभावमात्रमुदाहृतम् । यथेष्टानंदसंप्राप्तिःप्राकाम्यमितिकीर्त्यते । दुःखाभावोपिप्राकाम्येनेतरसुखितेष्यते । प्राकाश्यंसर्ववेदादिज्ञानमेवविदोविदुः । सहस्रयोजनांतंतुदूरदर्शनमिष्यते । दूरश्रवणमप्येवंतस्मिन्नेवयुगेस्थिते । वेदादिकंविनाप्रोक्तात्रिकालज्ञातितावुधैः । शरीरस्थंविनादेहेपरचित्ताद्यभिज्ञता । अन्येंद्रियैर्दर्शनादियथासंकल्पवेगिता । प्राप्तिरित्युच्यतेसद्भिःस्वमनःसमवेगिता । मनोजवइतिप्रोक्तःपश्चाद्याकारतातथा । कामरूपत्वमुद्दिष्टंस्वदेहत्यागतःपरे । परकायप्रवेशःस्याद्यागादर्वाक्तनःस्मृतः । स्वच्छंदमृत्युतादेवैःक्रीडाचेंद्रादिभिर्विना । यथासंकल्पसिद्धिश्च

ध्यन्नपानसुखादिषु । चक्षुर्दृश्येष्वणुत्वंतुअणिमासंप्रकीर्तिता । महिमाचापिसंप्रोक्तात्रिलोकांतरपूरणात् । चक्षुर्दृश्येपिवाह्यत्वंलघिमासंप्रकीर्तिता । त्रिलोकसमभारस्तुगरिमाचापिकीर्तिता । पूर्वशक्तेः कोटिगुणशक्तयुद्रेकस्तथेशिता । भुविस्थैःप्राणिभिःप्रोक्तकरणंचापिकीर्त्यते । आज्ञाप्रतिहतिर्ब्राह्मादर्वागस्त्रनिपातनम् । विनामहातपस्वींश्चशापाप्रतिहतिःस्मृता । अपराजयोमनुष्येभ्योवशित्वंचाप्यलोभता । दाहादिसहनंचापिप्रतिष्टंभइतीर्यते । इतिषड्विंशतिप्रोक्तागरिम्णासहसप्तवा । विंशतिस्तुसुरेभ्योन्यदेवेष्वष्टैवासिद्धयः । यतोनिःसीमकास्तेषांदेवानामष्टसिद्धयः अतोष्टादशसिद्धीनांतदंतर्भाविष्यते । देवोप्येद्रेशवायुश्रीविष्णूनामुत्तरोत्तरम् । सिद्धयःपरिपूर्णास्तुविष्णोरेकस्यनान्यगाइति । श्रुतेपुतुयथायोगंक्षिप्रग्रहणमेवतु । उक्तंप्राकाश्यमन्येषांदेवानामश्रुतेष्वपि । ऋषीणांमिश्रभावेनभासतेकिंचिदश्रुतम् । विषयेभ्योधिकसुखव्यक्तिःप्राकाम्यमेवतु । इतरेषांसुराणांतुनिःसीमानंदभोजनम् । एवमेवतुनिःसीमादेवानामष्टसिद्धयः । उत्तरोत्तरमत्रापियावद्विष्णुःसुपूर्णभुगिति । अस्याादेशशक्तिसंस्तंभश्चाग्निसंस्तंभइष्यतेइति । एकस्मात्सिद्धयोविष्णोःस्थानभेदात्पृथग्विधाः । एकस्थानगतायाःस्युःसुस्थिरोपासनायदीति । नानाकोशगतवाक्यबलादुक्ताएवांतर्भावाःसंख्याश्चनान्याःशुकतीर्थादुक्तविधाइति अप्रतिहताआसमंताद्गतिर्यस्याआज्ञायाःसातथाआज्ञाअप्रतिहतागतिः ६ ७ ८ मनोयोगेनयद्धारणंध्यानंतेनजायमानाःसिद्धयोयोगधारणासिद्धयः संख्याविषयंप्रश्नंपरिहृत्यइदानींक्रियाधारणयाइत्यादिप्रश्नंपरिहति यथेति ९ तत्रतावत्प्रथमोद्दिष्टाणिमासिद्धिप्रापकंध्यानप्रकारमाह भूतसूक्ष्मेति । भूतसूक्ष्माणांपार्थिवादिपरमाणूनामात्मनिनियामकेपरमाणुस्थितेमयितन्मात्रापरिमितत्वेनमनोधारयन्ध्यायन्नणिमानमेवाप्नोति अनेनयद्यद्भूतूपमितंरूपंस्वयमपितत्परिमितोभवतीत्युक्तंभवति तन्मात्रावयवेसूक्ष्मेपरमाण्वभिधानके । प्रत्येकमणुरूपंतुविष्णुंध्यापन्नणुर्भवेदितिवचनात् प्रकारां

स्वच्छंदमृत्युर्देवानांसहक्रीडानुदर्शनम् ॥ यथासंकल्पसंसिद्धिराज्ञाप्रतिहतागतिः ७ त्रिकालज्ञत्वमद्वंद्वंपरचित्ताद्यभिज्ञता ॥ अग्न्यर्कांबुविषादीनांप्रतिस्तंभोपराजयः ८ एताश्चोद्देशतःप्रोक्तायोगधारणसिद्धयः ॥ यथाधारणयायास्याद्यथावास्यान्निबोधमे ९ भूतसूक्ष्मात्मनिमयितन्मात्रंधारयन्मनः ॥ अणिमानमवाप्नोतितन्मात्रोपासकोमम १० महत्यात्मन्मयिपरेयथासंस्थंमनोदधत् ॥ महिमानमवाप्नोतिभूतानांचपृथक्पृथक् ११ परमाणुमयेचित्तंभूतानामपिरंजयन् ॥ कालसूक्ष्मात्मकेयोगीलघिमानमवाप्नुयात् १२ धारयन्मय्यहंतत्त्वेमनोवैकारिकेऽखिलम् ॥ सर्वेंद्रियाणामात्मत्वंप्राप्तिंप्राप्नोतिमन्मनाः १३

तरेणाणुत्वप्राप्तिप्रतिपत्तिमाह तन्मात्रेति । ममतन्मात्रोपासकःतस्याकाशादिगुणस्यशब्दादेर्यत्सूक्ष्ममात्रंपरिमाणंतत्परिमाणस्यममस्वरूपस्योपासकोपितत्परिमितरूपोभवतीत्यर्थः । आकाशवत्सूक्ष्मतांयोव्यापित्वेनैवमन्यते । तन्मात्रव्यापिनंविष्णुंचैतयन्सतथाभवेदितिवचनात् । अणुत्वंच । चक्षुर्दृश्येष्वणुत्वंतुअणिमासंप्रकीर्तिताइत्युक्तविधंच १० व्याप्तस्यहरेरेकैकावयवध्यानंपरिच्छिन्नवस्तुमहत्त्वकारणमाह महतीति । महतिव्याप्तेआत्मन्आत्मनिस्वामिनिमयियथासंस्थंयथावस्तुपरिमाणं तथास्थितेमनोदधत्पुरुषोमहिमानंमहत्त्वमवाप्नोतितदेवविशिनष्टि भूतानामिति । अस्मात् स्थूलतांप्राप्नुवानीत्यपेक्षायांतस्मात्स्थूलतांप्राप्नोति । ततोन्यस्मान्महत्त्वमाप्नुवानीत्यपेक्षायांतस्मादितिपृथक्पृथक्भूतानांसकाशान्महत्त्वमाप्नोतीत्यर्थःपरेपरमात्मनि । सर्वनामसंज्ञाविकल्पात् नास्त्यस्य ११ लघिमासिद्धिप्रापिणींप्रतिपत्तिमाह परमाणुमयइति । कालसूक्ष्माणां कालपरमाणूनांआत्मकेआत्मनिव्यापके तत्स्वरूपंविशिनष्टि परमाणुमयेभूतानांसकाशादतिशयेनाणुस्वरूपेमयिचित्तंरंजयन्अनुरक्तंकुर्वन्ततदेकनिष्ठत्वेनकुर्वन्लघिमानमाप्नोति १२ प्राप्तिसिद्ध्यापादकधारणामाह धारयन्निति । वैकारिकेअहंतत्त्वेव्याप्तेमयिमनोधारयन्नखिलंनिवृत्तबहिर्वृत्तियथातथाधारयन्सर्वेंद्रियाणांआत्मत्वंस्वामित्वेनस्वेच्छानियतत्वमाप्नोति ततःकिमत्राह प्राप्तिमिति । अन्यैंद्रियैर्विषयदर्शनादिलक्षणमाप्तिमाप्नोति । अन्यैंद्रियैर्दर्शनादियथासंकल्पवेगिता । प्राप्तिरित्युच्यतेसाद्भिरिति च । मन्मनाइत्यनेनांतरालेअन्यमनस्कत्वंनिवारयति १३

प्राकाश्यप्राप्तिप्रकारंकथयति महतीति महतिमहत्तत्त्वेसूत्रेमुख्यप्राणेवात्मनिव्याप्तेमयिमानसंधारयन्नव्यक्तजन्मनःअव्यक्तस्यापिविकरलक्षणस्थूलत्वापादनकर्तुर्मेप्रसादात्पारमेष्ठ्यंपरमेष्ठिनोब्रह्मणःप्रसादलभ्यंप्राणभारत्योःप्रसादाच्चसर्ववेदादिज्ञानश्रैष्ठ्यापादकंप्राकाश्यंविंदतइत्यन्वयः । प्राकाश्यंसर्ववेदादिज्ञानमेवविदोविदुः । सर्वेगुणास्तुप्राणस्यपरमात्मप्रसादतः । प्राणविष्णोःप्रसादेनभारत्याःसंप्रकीर्त्तिताः । प्रसादात्तुत्रयाणांचाप्यानंदादिःसदागुणइति १४ ईशित्वप्राप्तिप्रकारमाह विष्णाविति । परमाण्वादिरूपःकालोविग्रहःप्रतिमायस्यसकालविग्रहःतस्मिन्नधीश्वरेअधीश्वरस्वगुणविशिष्टे । अनेनयोयोगुणउपासकस्याभिलषितःतंतंगुणंबस्मिन्नुपसंहृत्योपासनंकर्तव्यमित्युक्तंभवति । सर्वत्राधीश्वरत्वादौविद्यमानेपीत्यादिविष्णौव्याप्तेमयिचित्तंधारयन्नीशित्वमवाप्नोति । कीदृशंक्षेत्रंशरीरंस्थावरादिपदार्थसमूहोवा क्षेत्रज्ञाजीवाएषांचोदनंनियमनंयस्मात्तत्क्षेत्रज्ञचोदनं भुविस्थितैःप्राणिभिरुक्तकारकत्वंपूर्वशक्तेः कोटिगुणशक्त्युद्रेकश्चेत्युक्तमनेन १५ वशितावाप्त्युपायमाह नारायणइति । नारायणेतुर्यारव्येभगवच्छब्दशब्दितऐश्वर्यादिषड्गुणानुपसंहृत्यमयिमनआदधद्योगीवशितामियादवाप्नोति असंगत्वादिलक्षणोममधर्मोयस्यसमद्धर्मः १६ प्राकाम्यसिद्धिकारणमाह निर्गुणइति । यत्रयस्मिन्नानंदेप्राप्तकामोन्येच्छावसीयतेसमाप्तोभवति । कामःकाम्यःकमनीयोविषयोनास्तीतिवा । यथेष्टानंदसंप्राप्तिःप्राकाम्यमितिकीर्त्यतेइतिच । प्रगतमासंमतात्काम्यंयस्मात्तत्तथा । अत्रनिर्गुणत्वब्रह्मत्वगुणावुपसंहार्यौ १७ अनूर्मिमत्त्वसमाधिमाह श्वेतद्वीपपतावितिं । शुद्धोनिर्दुःखेधर्ममयेधर्मफलदातरिश्वेतद्वीपपतौमयिमनोधारयन्श्वेततांयातिनिर्दुःखत्वमाप्नोति । शुद्धःश्वेतःसुखीश्वेतःश्वेतवर्णःक्वचिद्भवेदितिं ॥

महत्यात्मनियःसूत्रेधारयन्मयिमानसम् ॥ प्राकाश्यंपारमेष्ठ्यंमेर्विंदतेव्यक्तजन्मनः १४ विष्णौचाधीश्वरेचित्तंधारयन्कालविग्रहे ॥ सईशित्वमवाप्नोति क्षेत्रक्षेत्रज्ञचोदनम् १५ नारायणेतुरीयाख्येभगवच्छब्दशब्दिते ॥ मनोमय्यादधद्योगीमद्धर्मोवाशितामियात् १६ निर्गुणेब्रह्मणिमयिधारयन्विशदंमनः ॥ परमानंदमाप्नोतियत्रकामोवसीयते १७ श्वेतद्वीपपतौचित्तंशुद्धेधर्ममयेमयि ॥ धारयन्श्वेततांयातिषड्ऊर्मिरहितोमरः १८ मय्याकाशात्मनिप्राणेमनसाघोषमुद्वहन् ॥ तत्रोपलब्धाभूतानांहंसोवाचःशृणोत्यसौ १९ चक्षुस्त्वष्टरिसंयोज्यत्वष्टारमपिचक्षुषि ॥ मांतत्रमनसाध्यायन्विश्वंपश्यतिसूक्ष्मदृक् २० मनोमनसिसंयोज्यदेहंतदनुवायुना ॥ मद्धारणानुभावेनतत्रात्मायत्रवैमनः २१ यदामनउपादायययद्यद्रूपंबुभूषति ॥ तत्तद्भवेन्मनोरूपंमद्योगबलमाश्रितः २२

कथंनिर्दुःखत्वमाप्तस्यादत्राह षडूर्मिरहित्यंविवृतममरइत्यनेनअनूर्मिमत्त्वंदुःखस्याभावमात्रमुदाहृतमिति १८ दूरश्रवणसिद्धबुपायमाह मयीति । आकाशात्मनिआकाशव्यापिनिप्राणेस्थितेमयिमनसाघोषंशब्दमुद्वहन्नाकाशस्थप्राणस्थोहरिःशब्दप्रवर्तकस्तस्याधारश्चेतिध्यायन् हंसःशरीराभिमानविधुरोजीवोसौ तत्राकाशेउपलब्धानामासमंतात्स्थितानांभूतानांवाचःशृणोतीत्यन्वयः । त्यागात्पूर्वशरीराणांनवानांसंचयेनच । जीवंहंसइतिप्राहुस्तद्धेतुत्वाद्धरिंपरमित्यतोवाहंसोजीवः १९ दूरदर्शनोपायमाह चक्षुरिति । त्वष्टासूर्यश्चक्षुर्नियामकःआश्रयश्च तत्रचक्षुषिसूर्येचस्थितंमां । सहस्रयोजनांतंतुदूरदर्शनमिष्यते । दूरश्रवणमप्येवंतस्मिन्नेवयुगेस्थितेइतिविशेषः २० मनोजवप्रापकधारणप्रकारमाह मनइति । यदायोगिनोमनोवेगेनगंतुमिच्छातदामनोमनसिमनस्तत्त्वेवायुनासंयोज्यतदनुमनोनुदेहमपिवायुनासंयोज्यमद्धारणानुभावेनमनस्तत्त्वांतर्यामिणोममध्यानसामर्थ्येनयत्रमनस्तत्रात्माशरीरमनुगच्छतीत्यन्वयः । स्वमनःसमवेगितामनोजवइतिप्रोक्तइतिच २१ कामरूपावाप्त्युपायमाह यदेति । यदामनउपादायास्थिरीकृत्ययद्यद्रूपंगजादिरूपंबुभूषतिभवितुमिच्छतिगजादिरूपःस्यामितितदागजाद्याकारस्यगजाद्यंतर्यामिणोममयोगबलंध्यानबलंआश्रितोयोगीतत्तन्मनोगतगजादिरूपंभजेदित्यन्वयः । गजादिरूपमाकांक्षन्गजादिस्थितमीश्वरं । ध्यायन्गजादिरूपःस्यात्पश्चाद्याकारतातथा । कामरूपत्वमुद्दिष्टंइतिच २२

परकायप्रवेशोपायमाह परकायमित्यस्यायमर्थः परकायंविशन्सिद्धआत्मानंस्वांतस्थंहरितत्रपरकायभावयदवभावतःप्रकृष्टानदरूपत्वात्प्रणयनकतूत्वाच्च प्राणः। परमात्मापुरुषोवायुभूतोवायव्यरूपः पिंडंहित्वाइतरदृष्टचा स्वदृष्टचानत्यक्तायोगिनंसमादायपरकायेप्रविशेदित्यन्वयः। स्वदेहात्यागतःपरेपरकायप्रवेशःस्यादिति परकायस्थितंहरिं ध्यायन्विशेत्परेकायेवाय्वंतरगतःपुमान्। प्राणनामा हरिःप्रोक्तस्तस्मिन्व युसमाश्रितः ॥ वायावंतर्गतोजीवोदेहादेहंप्रयास्यतीतिच २३ स्वच्छंदमृत्युताप्रकारमाह पाष्ण्यैति प्राणंहृदुरःकंठमूर्द्धस्वारोप्यषडाधारस्थितंविष्णुंध्यायन्ब्रह्मरंध्रेणतनुमुत्सृजेत् प्राणंब्रह्मणिनीत्वाप्राणनामानंबहिस्थेब्रह्मनाम्निसमृत्वेत्यर्थः। युगादर्वाक्तनास्मृतास्वच्छंदमृत्युतेति षडाधारास्थितंविष्णुंध्यायन्नायुःक्षयंविना। यदिमृत्युमभीप्सीतत थाप्राप्नोत्यसंशयम्। प्राणस्थंप्राणना मानंबहिस्थेब्रह्मनामके। विष्णुंविष्णावनुस्मृत्यविसृजेदेहमंजसेति। अनेकस्यहरेर्नीतिस्तद्वतस्यहरेःस्मृतिः। नहिनेयःक्वचित्कापिकेनचित्स्ववशत्वतःइतिच २४ देवसहितक्रीडानुदर्शनसिद्धिधारणामाह विहरिष्यन्निति सुराणामाक्रीडेविहरिष्यन्नीविहर्तुकामोयोगीसत्वगुणंमत्स्थंविभावयेत् सुरास्त्रियोविमानेनसत्ववृत्तिमुपतिष्ठंतिसमीपमागुवंतीत्यन्वयः देवैःक्रीडार्चेंद्रादिभिर्विनेति २५ यथासंकल्पसिद्धि ध्यानमाह यथेति। सत्येसंकल्पेमयिमनोयुंजानोयथायथामत्परःपुमान्बुद्धयासंकल्पयेत्। यंयंगुणमुपसंहृत्यमामुपास्तेतथातथातत्काम्यमाप्नोतीत्यन्वयः। यथासंकल्पसिद्धिश्चाप्यन्नपानसुतादिषुइति

परकायंविशन्सिद्धआत्मानंतत्रभावयेत् ॥ पिंडंहित्वाविशेत्प्राणोवायुभूतःषडंघ्रिवत् २३ पाष्ण्यार्पाष्ण्यगुदंप्राणंहृदुरःकंठमूर्द्धसु ॥ आरोप्यब्रह्मरंध्रेण ब्रह्मनीत्वोत्सृजेत्तनुम् २४ विहरिष्यन्सुराक्रीडेमत्स्थंसत्वंविभावयेत् ॥ विमानेनोपतिष्ठंतिसत्ववृत्तिंसुरस्त्रियः २५ यथासंकल्पयेद्बुद्धयायथावामत्परःपु मान् ॥ मयिसत्येमनोयुंजंस्तथातत्समुपाश्नुते २६ योवैमद्भावमापन्नईशितुर्वशितुःपुमान् ॥ कुतश्चिन्नविहन्येततस्यचाज्ञायथामम २७ मद्भक्त्याशु द्धसत्वस्ययोगिनोधारणाविदः ॥ तस्यत्रैकालिकीबुद्धिर्जन्ममृत्यूपबृंहिता २८ अग्न्यादिभिर्नहन्येतमुनेर्योगमयंवपुः ॥ मद्योगश्रांतचित्तस्ययाद सामुदकैर्यथा २९ मद्विभूतीरभिध्यायन्श्रीवत्साम्रविभूषिताः ॥ ध्वजातपत्रव्यजनैःसभवेदपराजितः ३० उपासकस्यमामेवंयोगधारणयापुनः ॥ सिद्धयःपूर्वकथिताउपतिष्ठंत्यशेषतः ३१

२६ आज्ञाप्रतिहतिसिद्धिधारणाप्रकारंदर्शयति यइति । यःपुमानीशितुःवशितुःमदितिपंचमीषष्ठचर्थे ममभावंभावनामीशित्वत्ववशित्वत्वादिगुणोपसंहारलक्षणांभक्तिसेवामापन्नःतस्यपुंसः आज्ञाकुत श्चनहेतोर्नविहन्येत चशब्दएवार्थेयथाममाज्ञा वैप्रसिद्धं। आज्ञाप्रतिहतिर्ब्रह्मादर्वागस्त्रविघातनम्। विनामहातपस्वींश्चशापप्रतिहतिःस्मृतेत्येतच्चशब्दतोवागृहीतं भावोमनश्चभक्तिश्चकाचिदभ्यासइष्य तइतिच २७ त्रिकालज्ञत्वसिद्धिसाधनमाह मद्भक्त्येति धारणाविदः त्रिकालांतर्यामिहरिस्मरणप्रकारज्ञस्यजन्ममृत्यूपबृंहितासृष्टिसंहारविषयिणीबुद्धिर्ज्ञानंस्यादितिशेषः वेदादिकंविनाप्रोक्तात्रिकालज्ञा नितावुधैरिति त्रिकालप्रेरकंविष्णुंध्यातुःकालत्रयज्ञतोतिच २८ अग्न्यादिस्तंभोपास्तिप्रकारमाह अग्न्यादिभिरिति योगमयंध्यानमयं एतदेवावीशिनाष्टि मद्योगश्रांताचित्तस्येति अग्न्यादीनांऔष्ण्यादि शक्तिस्तंभकाह्लादकत्वादिगुणार्णवस्यममध्यानंमद्योगः। तेनश्रांतंतदेकनिष्ठंचित्तंयस्यसतथातस्य। अग्न्यादिशक्तिसंस्तंभअग्निसंस्तंभइष्यतइति। यादसांवपुः। अग्न्यादिषुहरिंध्यायंस्तत्प्रतिस्तंभको भवेदितिच२९अपराजितसिद्धयुपायमाह मद्विभूतीरिति मद्विभूतीःममविविधभूतीःअपराजितःमनुष्यैरितिशेषः ३० उक्तानामनुक्तानांचसिद्धीनामवरोधोऽपरोक्षीकृततत्त्वस्यतत्सिद्धीराकांक्षमाण स्यममोपासकस्योक्तविधयातत्तत्सिद्धिप्राप्तियोग्यगुणोपार्स्तिकुर्वतएवेत्याह उपासकस्येति उपासनयापरोक्षीकृततत्त्वस्यपुनरुपासनंकार्यकालेकुर्वतःकार्यसिद्धिःस्यादित्यतोयोगधारणयापुनरित्युक्तं। योगधारणयासिद्धयुपायध्यानेन ३१

निरंतरध्यानरतस्यपुंसःसिद्धिर्निरूपणमात्रेणभवतिनाचिरध्यानापेक्षास्तीत्याशयेनाह जितेंद्रियस्येति । दांतस्योपरतस्यजितश्वासस्यप्राप्तवायुप्रसादस्यजितात्मनः प्राप्तमनोजयस्य । उपास्यवायुंप्रथमंवायौसुष्ठुपरीक्षिते। अनुज्ञातस्ततस्तद्वंतत्रतत्रहरिंस्मरेत् । कृत्वाऽपरोक्षंतंचापिकालेकालेस्मरेत्पुनः।अभीष्टकार्यासिद्धिःस्यात्तस्यनास्त्यत्रसंशयः । अकामोयदिवायुंचध्यात्वादृष्ट्वाहरिंतथा । नकिंचित्कामयेत्पश्चात्साक्षिप्रंमुक्तिमेष्यतीति ३२ भगवद्धचानेनाणिमादिसिद्धीनांसौलभ्येपितदर्थोपास्तिर्नप्रशस्तेत्याह अंतरायानिति । एतान्सिद्धिविशेषान्उत्तमंयोगंमुक्तियोग्यंध्यानंयुंजतःकुर्वतःसंपद्यमानस्य मत्प्रसादमाप्तुकामस्यकुतोंतरायाइतितत्राह कालेति । यदियोगफलंभुंक्तेपुनःकाममपास्यतु । तेनैवक्रमयोगेनवायुंदृष्ट्वाहरिंतथा । एष्टव्यामुक्तिपदवीनान्यथातुकथंचन । पूर्वदृष्टिर्हिकामार्थेपश्चान्मोक्षार्थमिष्यते । येषांतुजन्मतःसिद्धिस्तेषांदोषोनतुक्वचिदिति ३३ जन्मादिभ्योयोगएवसाधनोत्तमइत्याह जन्मौषधीति । यावतीर्यावत्यःयोगेनध्यानेन एतादृशोयोगोविशिष्टदेवताभिरेवसुलभ्योनसर्वैरित्याह यैर्यैरिति । यैर्यैःकैश्चित्कैश्चिद्देवजन्मादिभिर्योगगतिंव्रजेत् । कुतइतितत्राह सर्वासामिति मृदोघटकारणत्वेपिनतत्स्वामित्वंकिंतुकुलालस्यैवेत्यतउक्तं पतिरिति । कुलालस्वामित्वंयावद्द्रव्यगतीत्यतःप्रभुरिति समर्थेनमयाविशिष्टाएवास्मिन्योगेधिकृताःस्युरितिसंकल्पितत्वाच्चोक्तमित्यर्थः।जन्मादिभिःकैश्चिद्देवप्राप्यतेयोगजंफलम्।योगेनसर्वैःप्राप्येत योगेयत्नंततःकुरु।कश्चिदर्थेपियच्छब्दःप्रश्नार्थेविकल्पेवर्तते।क्वचित्परामर्शवाचीक्वचिदापेक्षवाचकः।इतिवचनाद्यैरितियच्छब्देनकाश्चिदर्थउच्यते ३४ नकेवलंसिद्धीनामेवहेतुःकिंतुयोगादीनामपीतिभावेनाह अहमिति ब्रह्मवादिनांवेदांतानामित्यर्थः ३५

जितेंद्रियस्यदांतस्यजितश्वासात्मनोमुनेः ॥ मद्धारणांधारयतःकानुसिद्धिःसुदुर्लभा ३२ अंतरायान्वदंत्येतान्युंजतोयोगमुत्तमम् ॥ मयासंपद्यमानस्य कालक्षपणहेतवः ३३ जन्मौषधितपोमंत्रैर्यावतीरिहसिद्धयः ॥ योगेनाप्नोतिताःसर्वायैर्यैर्योगगतिंव्रजेत् ॥ सर्वासामपिसिद्धीनांहेतुःपतिरहंप्रभुः ३४ अहंयोगस्यसांख्यस्यधर्मस्यब्रह्मवादिनाम् ३५ अहमात्मांतरोबाह्योनावृतःसर्वदेहिनाम् ॥ यथाभूतानिभूतेषुबहिरंतरस्त्वहंतथा ॥ ३६ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेपंचदशोध्यायः ॥ १५ ॥ उद्धवउवाच ॥ त्वंब्रह्मपरमंसाक्षादनाद्यंतमपावृतम् ॥ सर्वेषामपिभावानांप्राणःस्थित्युद्भवाप्ययः १ उच्चावचेषुभूतेषुदुर्ज्ञेयमकृतात्मभिः ॥ उपासतेत्वांभगवन्याथातथ्येनब्राह्मणाः २ येष्वेषुचभावेषुयथात्वांपरमर्षयः ॥ उपासीनाःप्रपद्यंतेसंसिद्धिंतद्वदस्वमे ३ गूढश्चरसिभूतेषुभूतात्माभूतभावनः ॥ नत्वांपश्यंतिभूतानिपश्यंतंमोहितानिते ४

कीदृशस्त्वमितितत्राह अहमितिअहंसर्वदेहिनामात्माप्रेष्ठःस्वामीअंतर्यामिरूपेणांतरः । अंतःस्थित्वारतिकृत् अनेनप्रेष्ठत्वंविवृतं ब्रह्मरूपेणबाह्योबहिष्ठःबहिष्ठस्यापि ब्रह्मांडस्येवान्येनावृतोस्तीत्यतोनावृतइति अज्ञजनंविश्रंभयितुंदृष्टांतयति यथेति पंचमहाभूतानिभूतेषुजीवादिवस्तुषुअंतर्बहिश्चव्याप्नोतीति ॥ ३६ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेवि०टीकायांपंचदशोध्यायः ॥ १५ ॥ अधिकारिणामनेकविधत्वेनयोग्यतायाउपास्तेःफलस्यतथाविधत्वात्तदानुकूल्येनतत्तद्गुणोपसंहारायस्वभूतीरुपदिशत्यास्मिन्नध्याये । तत्रोद्धवःस्वप्रश्नप्रवचनेतात्पर्यजननायप्रवक्तारंकृष्णं वेदांतवेद्यंब्रह्मत्वदनुग्रहेणमयाज्ञातमितिभावेनवक्ति । त्वंब्रह्मेत्यादिना । साक्षात्परमंब्रह्मत्वंतवैवअन्येषाममुख्यमितिभावेनोक्तंअनाद्यंतमिति । प्रकृतेःकथंचिदुक्तविशेषणसंभवेपिविकारित्वादमुख्यमितिभावेनोक्तमपावृतमिति एवंविधस्यव्यावर्तकलक्षणमाह सर्वेषामिति । अपिरेवार्थेत्वमेवसर्वेषांभावानांप्राणश्चेष्टकःस्थित्युद्भवश्चसृष्टिस्थितिसंहारकर्ता । सत्तायाअपित्वदेकाधीनत्वात्तत्त्वोक्तिः १ जन्मादिकर्तृत्वविशिष्टत्वेनोपास्योपित्वमेवेत्याह उच्चावचेष्विति । ब्राह्मणामुनयोयाथातथ्येननिर्दुःखानंदानुभवरूपत्वेनस्थितत्वात् २ नन्वेवमुक्तानुवादोस्तुतवापेक्षितांशःकइतितत्राह येष्विति येषुयेषुकेषुकेषु यथाकथंतदुपासनं भासनोपसंभाषज्ञानयत्नविमत्युपमंत्रणेषुवदइत्यतोवदस्वेत्यात्मनेपदम् ३ बहुशृण्वतोपिममत्वत्स्वरूपज्ञानंदुःसाधनमितिभावेनाह गूढइति । तेत्वया ४

स्वप्रश्नंविशिनष्टि याःकाश्चेति । महाविभूतेःब्रह्मादिदेवाद्यधित्यश्चयस्यत्वत्तोन्यधानावशेषात्स्वजात्युत्तमाःपास्ता॥विभूतारूप्याहात्मत्वम् । तत्वयानुनापणानाम्बधः । ब्रह्मा
ताःउपासिताःमहाद्विरितिशेषः हेतीर्थपद ९ परिहरति एवमिति युयुत्सुनायोद्युकामेन विशसनेयुद्धे ६ किमभिप्रायेणपृच्छतीतितत्राह ज्ञात्वेति । ततोयुद्धात्कीदृशःअहंहंताअयंहतइतिनिरूप्यलौ
किकोबहिर्जनस्वभावोऽज्ञइत्यर्थः ७ ८ आत्मासर्वगुणईश्वरोहममीषाम् भूतानांसुहृत् अनुपकृतबंधुःकृतइतितत्राह अहमिति । ननुइयमुक्तिरैक्यात्किंकृतत्राह तेषामिति । सृष्टिस्थित्यादिहे
तुत्वाद्भूतानिहरिरुच्यते । ननुभूतस्वरूपत्वात्साहिसर्वेश्वरेश्वर इतिवस्तुतत्वेएतस्मात्प्रमाणात्सृष्ट्यादिहेतुत्वात्तदधीनत्वादैक्योक्तिर्नस्वरूपैक्यादितिभावः ९ विभूतीराह अहंगतिरिति । गतिमतांज्ञानव
तांगतिर्ज्ञानमहंज्ञानंज्ञानवतामहमिति तद्वत्सुनित्यसन्निहितमित्यर्थः कलयतांसंहरतांकालःकालाभिमानी । स्वस्वजात्युत्तमत्वंतुभवेच्चद्रूपसन्निधेः । विभूतिरूपंतत्प्रोक्तमिंदिरादिषुसंस्थितम् । त
थाबहिःस्थितंरूपंविभूतीत्येवशब्दितम् । सर्वसाधारणंरूपमंतर्यामीतिचोच्यते । यथाकृष्णात्मनादृष्टहंताव्यासात्मनासमः । असमोप्येकरूपोपिसामर्थ्यात्पुरुषोत्तमः । इत्यनेनविभूतीनांभगवद्रूपसन्नि
धानात्स्वजात्युत्तमत्वादिकंनिर्णीतं । ब्रह्मरुद्रेंद्रजीवेभ्यःपृथगेवव्यवस्थितम् । विभूतिरूपंविष्णोस्तुतद्वश्रेष्ठैककारणम् । तदेवब्रह्मरुद्रादिनामभिर्वाच्यमंजसा । तदेवदवेष्विंद्रोस्मितयारुद्रेषुशंकरः । इत्या
दिनोक्तंकृष्णेननेंद्राद्याजीवसंचयाः । इत्यनेनब्रह्मादिभ्योभिन्नंतन्नामकत्वेनोच्यतइतिविभूतिरितिज्ञातव्यम् । प्रधानोज्ञानिनांब्रह्माज्ञानमानीहृदिस्थितः । सएवकालमानीतुसंहर्तृणांप्रभुःस्मृत इतिवचना

याःकाश्चभूमौदिविवैरसायांविभूतयोदिक्षुमहाविभूतेः ॥ तामद्यमाख्याह्यनुभावितास्तेनमामितेतीर्थपदांघ्रिपद्मम् ५ श्रीभगवानुवाच ॥ एवमेतदहंपृ
ष्टःप्रश्नंप्रश्नविदांवर ॥ युयुत्सुनाविशसनेसपत्नैरर्जुनेनवै ६ ज्ञात्वाज्ञातिवधंगर्ह्यमधर्मंराज्यहेतुकम् ॥ ततोनिवृत्तोहंताहंहतोयमितिलौकिकः ७ सतदा
पुरुषव्याघ्रोयुक्तयामेप्रतिबोधितः ॥ अभ्यभाषतमामेवंयथात्वंरणमूर्धनि ८ अहमात्मोद्धवामीषांभूतानांसुहृदीश्वरः ॥ अहंसर्वाणिभूतानितेषांस्थित्युद्भ
वाप्ययः ९ अहंगतिर्गतिमतांकालःकलयतामहम् ॥ गुणानांचाप्यहंसौम्यंगुणिन्यौत्पत्तिकोगुणः १० गुणिनामप्यहंसूत्रंमहतांचमहानहम् ॥ सूक्ष्मा
णामप्यहंजीवोदुर्जयानामहंमनः ११ हिरण्यगर्भोदेवानांमंत्राणांप्रणवस्त्रिवृत् ॥ अक्षराणामकारोस्मिपदानिच्छंदसामहम् १२

त्युक्तं गुणानांमध्येसौम्यमहम्।उमेनानं

दानुभवेनसहितःसोमस्तस्यभावःसौम्यं सर्वगुणाधिकोयं । आनंदानुभवस्तूमउत्कृष्टानुभवात्स्मृतः। तद्युक्तत्वंतथासौम्यंगुणनामधिकंहितत् । भक्त्यादिगुणपूगोपिदुःखहेतुत्वभावनात् । निष्फलोभवतिह्यद्धा
प्रीतस्यसफलोभवेत् । तस्मादानंदमानंतुगुणेषूत्कृष्टमुच्यते । यस्याभिमानीब्रह्मैकोभक्तिज्ञानादिकस्यच । श्रद्धाभिमानिनीदेवीतथैवतुसरस्वती । तदन्येषांगुणानांतुतदन्येविबुधाःस्मृताःगुणानांतुप्रभुर्ब्रह्मा
तस्मादेकश्चतुर्मुखइत्युक्तेः । आनंदमानंहरिरानंदइतिज्ञानमित्यर्थः । गुणिनांमध्येगुणिनिस्थितोयऔत्पत्तिकोगुणः। सूत्रंवायुःसोहमित्यर्थः अपिशब्दःसूत्रस्यौत्पत्तिकगुणाभिमानित्वंसमुच्चिनोति । तदुक्तं
औत्पत्तिकगुणोनामशुभप्राप्त्यैकयोग्यता॥तस्याभिमानीप्राणस्तुसाहिसर्वगुणाधिकइति । गुणानांगुणयोग्यत्वंपत्सर्वगुणिषुस्थितं । वायुस्तदभिमान्येकःसर्वगुण्यधिकस्ततइतिचमहतांस्थूलानांमहान्महत्त
स्वम् १० ११त्रिवृत्अकारउकारमकारात्मकःछंदसांवेदानांपदानिपद्यंतइतिवाच्यानिवेदानांमुख्यार्थः। उक्तंच स्वयूथानामथाधिक्येस्वजातीनामथापिवा । यत्कारणविभूत्याख्यंविष्णोस्तद्रूपमुच्यतेइति
वर्णेशानिपदान्याहुःपादाश्चापितदीश्वराः। पादानामीश्वरार्थत्वात्तदीशाऋचएवतु। ऋचामधीशावर्गाश्चतेषांसूक्तमधीश्वरं।सूक्ताधीशास्तथाध्यायास्तेषामीशास्तथाष्टकाः। तदधीशास्तथाशाखावेदाश्चापित
दीश्वराः। वेदानामीश्वरावाच्यावाच्यानामीश्वरोहरिः । नहरेरीश्वरःकश्चित्कदाचित्कापिविद्यतइति । पदंपदसहस्रेणयश्चरत्नापराध्यतइतिवत् । पदंतुवाचकंप्रोक्तंकाचिद्वाच्यमपीष्यतइतिअत्रेदंतात्पर्यमव
गंतव्यं । सर्ववेदाभिमानिभ्योदेव्योलक्ष्मीस्ततोधिका ।वेदाभिमानिनीसाक्षात्सविष्णोर्दूरवर्तिस्थिता । यज्ञाख्या सैवविष्णोस्तुयातूरस्थलमाश्रिता । हरिणारतियोगस्थादक्षिणाख्यापिसैवतु । उत्तरोत्तरतः

सापिविशिष्टादक्षिणामुखे । एवंवेदाभिमानिभ्योदेवेभ्यःसर्वएवतु । तदर्थरूपाःपतयस्तस्यास्तस्यास्तथोत्तमाः। शच्याइंद्रस्ततश्चोमातस्यारुद्रस्ततोवरः । भारतीप्राणएवास्यास्ततःश्रीस्तद्वरोहरिरिति १२इंद्रोरुद्रादीन्विनासर्वदेवानामुत्तमः। ऋतेरुद्रादिकान्निंद्रःसर्वदेवाधिकस्ततः। ऋतेभीमंफाल्गुनश्चपांडवेभ्योधिकस्ततः।तथाशुक्रःकवीशस्तुबृहस्पत्यादिकानृते। यमःसंयमतामीशः शंकरादीन्विनैवतुइति १३ १४ १५ १६ द्युमतांप्रकाशवताम् १७ धातूनांगैरिकाणाम् १८ गार्हस्थ्यंचयतित्वंचदेवेष्वेकत्वमागतम् । प्राधान्योक्तिर्यतित्वस्यगार्हस्थ्यस्यकाचित्कचदितिच तुर्यश्चतुर्थोयत्याश्रमः १९ स्रो तसांनदीनांतीर्थानांशुद्धजलानाम् रूपांतरविवक्षयात्रिपुरघ्नइत्यादि २० गहनानांगभीराणाम् २१ वसिष्ठेभ्यधिकस्तेषांमनुष्याणांपुरोधसांइत्युक्तेः मनुष्याणांपुरोधसांअधिकोवसिष्ठःब्रह्मिष्ठानांवैदिका नांसेनान्यांसेनापतीनांअग्रण्यांश्रेष्ठानांअजःब्रह्मा २२ ब्रह्मयज्ञःस्वाध्याययज्ञःवाग्यज्ञोग्न्यर्कांबुवाचामात्मानियामकःशुचीनांशुद्धिकराणांशुचिःशुचिकरः२३ योगानामात्मसंरोधःमनोरोधःमंत्रोगुह्योक्तिः मंत्रर्गादिषुगुह्योक्तिरितियादवःकौशलानांशुभहेतूनांआन्वीक्षिकीतत्त्वविद्या । ख्यातिवादिनांज्ञानवादिनांमध्येविकल्पोविशिष्टकल्पोजीवेशादिभेदवादी जीवेशादिविशेषंयोयथार्थेनप्रकल्येत् । कलिमार

इंद्रोहंसर्वदेवानांवसूनामस्मिहव्यवाट् ॥ आदित्यानामहंविष्णूरुद्राणांनीललोहितः १३ ब्रह्मर्षीणांभृगुरहंराजर्षीणामहंमनुः ॥ देवर्षीणांनारदोहंहावि र्धान्यस्मिधेनुषु १४ सिद्धेश्वराणांकपिलःसुपर्णोहंपतत्रिणाम् ॥ प्रजापतीनांदक्षोहंपितॄणामहमर्यमा १५ मांविद्धयुद्धवदैत्यानांप्रह्लादमसुरेश्वरम् ॥ सोमंनक्षत्रौषधीनांधनेशंयक्षरक्षसाम् १६ ऐरावतंगजेंद्राणांयादसांवरुणंप्रभुम् ॥ तपतांद्युमतांसूर्यंमनुष्याणांचभूपतिम् १७ उच्चैःश्रवास्तुरंगाणांधातू नामस्मिकांचनम् ॥ यमःसंयमतांचाहंसर्पाणामस्मिवासुकिः १८ नागेंद्राणामनंतोहंमृगेंद्रःशृंगिदंष्ट्रिणाम् ॥ आश्रमाणामहंतुर्योवर्णानांप्रथमोनघ १९ तीर्थानांस्रोतसांगंगासमुद्रःसरसामहम् ॥ आयुधानांधनुरहंत्रिपुरघ्नोधनुष्मताम् २० गिरीणामस्म्यहंमेरुर्गहननांहिमालयः ॥ वनस्पतीनामश्व त्थओषधीनामहंयवः २१ पुरोधसांवसिष्ठोहंब्रह्मिष्ठानांबृहस्पतिः ॥ स्कंदोहंसर्वसेनान्यामग्रण्यांभगवानजः २२ यज्ञानांब्रह्मयज्ञोहंव्रतानामविहिंस नम् ॥ वाग्व्यृक्बुवागात्माशुचीनामप्यहंशुचिः २३ योगानामात्मसंरोधोमंत्रोस्मिविजिगीषताम् ॥ आन्वीक्षिकीकौशलानांविकल्पःख्यातिवादि नाम् २४ स्त्रीणांतुशतरूपाहंपुंसांस्वायंभुवोमनुः ॥ नारायणोमुनीनांचकुमारोब्रह्मचारिणाम् २५ धर्माणामस्मिसंन्यासःक्षेमाणामबहिर्मतिः ॥ गुह्या नांसततंमौनंमिथुनानांपुमानहम् २६ संवत्सरोस्म्यनिमिषामृतूनांमधुमाधवौ ॥ मासानांमार्गशीर्षोहंनक्षत्राणांतथाभिजित् २७अहंयुगानांचकृतंधीराणां देवलोसितः ॥ द्वैपायनोस्मिव्यासानांकवीनांकाव्यआत्मवान् २८ वासुदेवोभगवतांत्वंतुभागवतेष्वहम् ॥ किंपुरुषाणांचहनूमान्विद्याध्राणांसुदर्शनः२९

भ्यवाविष्णोराधिक्यादुत्तरोत्तरं । नियमेनैवकेनापिनहेयःसर्वकल्पकः। सर्वज्ञानिविशेषेभ्यःसज्ञानीसर्वथाधिकः।इतिवचनात् उक्तएवार्थः अत्रापिभेददृष्ट्याभिमानेनचेत्युक्तंविद्यात्मानिभेदाबोधइतिचवक्ष्य ति २४ शतरूपावरास्त्रीणांपुंसामभ्यधिकोमनुः । तयोरभ्यधिकौनित्यमिंद्राणींद्रौशुभैर्गुणैरिति ॥ नारायणऋष्यवतारः २५ धर्माणांसुकृतानांक्षेमाणांप्राप्तरक्षाणां अबहिर्मतिःप्रत्यगात्मज्ञानंगुह्या नांगोप्यानांमौनंवाचंयमत्वं असंप्रज्ञातसमाधिस्थत्वंवा २६ अनिमिषांकालावयवानाम् २७ धीराणांगंभीराणां व्यासानांवेदविभागंकुर्वाणानां कवीनांवाग्मिनाम् २८ भगवतामैश्वर्यादिषड्गुणवतां देवानां ऐश्वर्यादिगुणैःषड्भिःसामग्र्यात्सर्वदेवताः । भगवच्छब्दवाच्याश्चसाक्षात्तुभगवान्हरिः। निरपेक्षंतुसामग्र्यंतस्यसर्वाधिकंयतइतिवचनात् । त्वंतुभागवतेष्वहमित्यत्रतात्पर्यार्थोयं सर्वभागवताधी शउद्धवोभगवत्प्रियः। तस्मादभ्यधिकोजिष्णुःप्रियत्वेभक्तितोहरेः। तस्मादभ्यधिकोरामःकृष्णात्वभ्यधिकाततः। तस्याअभ्यधिकोभीमोनतुतत्सदृशःक्वचिदितिस्मृतिप्रामाणिकः तुस्याद्देवधारणेइतिच २९

पेशसांमुकुलानांमध्ये ३० कितवानांदीव्यताम् । छलग्रहोद्यूतम् ३१ सहोबलवतामोजःओजोस्मि ओजोवष्टंभबलपरांतप्रमाण सात्वतांभागवतानांकमाहामातावाद्ध सात्वतांपांचरा त्रिकाणांश्रियादिनवमूर्तीनांआदि स्वकीयमूर्तिरहं कीदृश्यस्ताः पुरापूर्वकालेप्रथमतःपूज्याइत्यर्थः । विष्णोःश्रियोब्रह्मणश्चवायोःसंकर्षणस्यच । सुपर्णस्यचसंप्रोक्ताःप्रत्येकंनवमूर्तयः । पूज्याःसात्वततं त्रेषुतत्राद्यामूर्तयोहरेः । प्रधानास्ताहिसर्वासांमूर्तीनांहरिमूर्तयः । अभेदादेवमूर्तीनामेकमूर्तिश्चमास्मृतेतिमानम् । किंच स्वरूपतश्चगुणतोनविशेषःकथंचन ।विष्णोस्तुनवमूर्तीनांपूजाचनवधेष्पतइतिवच नादासांस्वरूपत्वंसिद्धम् । नारायणःपरंब्रह्मवासुदेवादिकास्तथा । नरसिंहवराहौचपरंज्योतिर्हरेर्नव इंदिराचरमालक्ष्मीर्हिरण्यागगनातथा रक्तारक्ततरामूर्तिर्विभूतिश्चश्रियोनव ब्रह्माचतुर्मुखोधाताविधा ताविधिरेवच । कर्तावरिंचोभूतेशःशतानंदश्चतानव । धनंजयमृतेचैववायोश्चनवमूर्तयः । शेषोनंतोनरश्चैवलक्ष्मणोबलएवच । संकर्षणोनीलवासाजगद्रक्षोजलेशयः । सुपर्णोगरुडश्चैवतेनतेयोमहाशनः । नववर्णःपंचवर्णःपन्नगाशोमृताकरः ।तथैवसर्ववेदात्मासुपर्णोनवधास्मृतइतिवचनान्मूर्तिभेदोज्ञातव्यः ३२ गंधर्वाणांविश्वावसुःअप्सरसांपूर्वचित्तिः अहमस्मि गंधमात्रंगंधाख्यविषयः ३३ तेजिष्ठानांआ र्चिष्मताम् ३४ प्रतिसंक्रमःसंहारः ३५ गतिःपादविषयः उक्तिर्वागिंद्रियविषयः उत्सर्गोपानस्य उपादानंहस्तयोः आनंदउपस्थस्य स्पर्शस्त्वगिंद्रियस्याहमितिशेषः आस्वादोजिह्वाकर्म श्रु तिःकर्णयोःअवघ्राणंघ्राणेंद्रियस्यसर्वेंद्रियाणामिंद्रियंइंद्रियशक्तिप्रदः ३६ विकरोब्रह्मांडं पुरुषोब्रह्मांडांतःस्थितः अव्यक्तंअचेतनप्रकृतिःरजआदिकमप्यहंरजआदिस्थत्वात् रजआदिनामा सत्त्व

रत्नानांपद्मरागोस्मिपद्मकोशस्तुपेशसाम् ॥ कुशोस्मिदर्भजातीनांगव्यमाज्यंहविःष्वहम् ३० व्यवसायिनामहंलक्ष्मीःकितवानांछलग्रहः ॥ तितिक्षा स्मितितिक्षूणांसत्वंसत्ववतामहम् ३१ ओजःसहोबलवतांकर्माहंविद्धिसात्वताम् ॥ सात्वतांनवमूर्तीनामादिमूर्तिरहंपुरा ३२ विश्वावसुःपूर्वचित्तिर्गंध र्वाप्सरसामहम् ॥ भूधराणामहंस्थैर्यंगंधमात्रमहंभुवः ३३ अपांरसश्चपरमस्तेजिष्ठानांविभावसुः ॥ प्रभासूर्येंदुताराणांशब्दोहंनभसःपरः ३४ ब्रह्म ण्यानांबलिरहंवीराणामहमर्जुनः ॥ भूतानांस्थितिरुत्पत्तिरहंवैप्रतिसंक्रमः ३५ गत्युक्तयुत्सर्गोपादानमानंदस्पर्शलक्षणम् ॥ आस्वादश्रुत्यवघ्राणम हंसर्वेंद्रियेंद्रियम् ३६ पृथिवीवायुराकाशआपोज्योतिरहंमहान् ॥ विकारःपुरुषोव्यक्तंरजःसत्वंतमःपरः ॥ अहमेतत्प्रसंख्यानंज्ञानंतत्त्वविनिश्चयम्३७ मयेश्वरेणजीवेनगुणेनगुणिनाविना ॥ सर्वात्मनापिसर्वेणनभावोविद्यतेक्वचित् ३८

दिनामविष्णोस्तुसत्वादिस्थस्यकेवलं। जीवस्थस्यचतन्नामजीवादेरुपचारतइत्यादिवचनात् गत्यादितमःपर्यंताःपदार्थाःतत्स्वरूपंकिंनेत्याह परइति । परोविलक्षणोभिन्नः तन्नियंतृत्वात्तत्त्वोपदेशः य स्ययस्यस्वभावोयस्तत्तन्नामाहरिःपरः। नियामकःस्वभावस्यतत्तच्छब्दादिनामवान् । वैशेषाख्याविभूतिश्चविभूतिश्चस्वभावजा।द्विधाविभूतिर्विज्ञेयाविष्णोस्तुपरमात्मनइतिवचनात्एतत्प्रसंख्यानंएतेषाम व्यक्तादीनांतत्त्वानांप्रकृष्टसंख्यानंगणनंयस्मात्तत्तथाज्ञानंवाहं भगवदविषयत्वादिदमश्रद्धेयमितिनेत्याह तत्त्वेति हरेरनारोपितंस्वरूपंयिश्चयतीतितत्त्वनिश्चयम् ३७ ननुगतिर्गतिमतामित्याद्युक्तषष्ठ्यर्थेन पृथक्कृताःपदार्थास्तेषुतवव्याप्तिर्नास्तीत्यायातं । तथाच पुरुषेणेदंव्याप्तमित्यादिश्रुतिविरोधःप्राप्तइतित्राह मयेति। मयाविनाक्वचिदपिभावःपदार्थोनविद्यतइत्यन्वयःषण्णवत्वंगुलादिलक्षणपरिच्छि न्नपुरुषाकारेणत्वयाविनाकथंनास्तीत्युच्यतइतित्राह सर्वेणेति सर्वसमाप्तोपिततोसिसर्वइतिस्मृतेःसर्वव्याप्यतिष्ठता । ननुबहिरेवव्याप्तोनत्वंतरितिमंदाशंकांपरिहरति सर्वात्मनेति । सर्वेषामंतश्चव्या प्तेननुसर्वव्याप्तस्यापिव्योम्नःकोविशेषइत्यतोवाह सर्वात्मनेति सर्वनियामकेन ननुज्ञानादिगुणरहितस्यनियंतृत्वंकथंयुज्यतोनिर्गुणश्चेतिश्रुतेरत्राह गुणिनेति यःसर्वज्ञइतिश्रुतिः ननुकदाचिद्दंडिनोयथादं डाभावेनादंडित्वंतथास्यापिसंभाव्यतेत्यत्राह गुणेनेति विज्ञानमानंदंब्रह्मेतिश्रुतेःनकेवलंगुणानामेवतदभिन्नत्वं प्राणधारकत्वादिक्रियाणामपीतिभावेनाह जीवेनेतिननुगुणीचेन्नगुणःसचेन्नगुणीतियुक्ति

विरोधइतितत्राहईश्वरेणेति अघटितघटकेन अनेनवैशेष्याख्यास्वभावजेतिद्विधाविभूतिरुक्तेतिज्ञातव्यं। वैशेषाख्याविभूतिस्तुविभूतिश्चस्वभावजा। द्विधाविभूतिर्विज्ञेयाविष्णोस्तुपरमात्मनइतिवचनात् ३८ एवंविभूतीनांअनंतत्वमुक्तंस्पष्टयति संख्यानामिति कालेनसर्वगुणात्मकेनमयाअसंख्यत्वात्तथानाक्रियतेनाविज्ञानात् अनंतमितिवेत्तीशस्त्वनंतत्वंतवत्तथा। अनंतस्याहिसंख्यानेननुसर्वज्ञताभवेत्। अनंतमपिवेत्तीशःप्रत्येकंचविशेषतः । सर्वज्ञत्वान्नसंख्यानमनंतस्यकुतोहिसेतिवचनात् ३९ स्वभावजविभूतेर्वैशेषाख्याकीदृशीत्यत्राह तेजइति । यत्रयत्रयस्मिन्यस्मिन्पुरुषेतेजआदयोगुणाविशिष्टाः संतिसमैशकः वैशिष्ट्यापादकमदंशयोगी । सौभगंशुभैकभागित्वं । भगऐश्वर्यादिकःत्यागोनिषिद्धत्यागः ४० उपसंहरति एताइति यथान्यैर्वाचाजीवादीनांनामादिकमाग्निमित्रइत्यस्यनामदेवदत्तस्याभिधानंइत्यादिप्रकारेणसंकेतितत्वेनक्रियते तथान्यपदार्थेष्वेतेसर्वेशब्दामनोविकाराःमनसावाअग्रेसंकल्पयत्यथवाचाव्याहरतीतिश्रुतेः मनःसंकल्पविषयानतुमुख्यवाचकाइत्यर्थः ४१ विभूतिज्ञानस्यफलितार्थमाह वाचमिति । यतःसर्वशब्दोमय्येवस्वतोमुख्यस्तस्मादितरविषयत्वंविहायवागादिकंमय्येवकुर्वित्यर्थः । प्राणंसर्वचेष्टांमद्विषयांतद्वारेणेंद्रियाणिमद्विषयाणिकृत्वाआत्मनाप्रयत्नेनात्मानंपरमात्मानंलक्ष्यत्वेनात्मानंजीवमपिसर्वात्मनायच्छ नियम्यनियामकलक्षणसंबंधचरस्त्वंपुनःसंसाराध्वनेनकल्पसइत्यन्वयः ४२ वागादीनांस्वविषयाकरणेबाधकमाह योवाइति यतिःप्र

संख्यानंपरमाणूनांकालेनक्रियतेमया ॥ नतथामेविभूतीनांसृजतोंडानिकोटिशः ३९ तेजःश्रीःकीर्तिरैश्वर्यंह्रीस्त्यागःसौभगंभगः ॥ वीर्यंतितिक्षाविज्ञानंयत्रयत्रसमैशकः ४० एतास्तेकीर्तिताःसर्वाःसंक्षेपेणविभूतयः ॥ मनोविकाराएवैतेयथावाचाभिधीयते ४१ वाचंयच्छमनोयच्छप्राणंयच्छेंद्रियाणिच ॥ आत्मानमात्मनायच्छनमूयःकल्पसेध्वने ४२ योवैवाङ्मनसीसम्यक्नसंयच्छेद्वियायतिः ॥ तस्यव्रतंतपोज्ञानंस्रवत्यामघटांबुवत् ४३ तस्माद्वचोमनःप्राणान्नियच्छेन्मत्परायणः ॥ मद्भक्तियुक्तयाबुद्ध्यातःपरिसमाप्यते ४४ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेषोडशोऽध्यायः ॥१६॥ उद्धवउवाच ॥ यस्त्वयाभिहितःपूर्वंधर्मस्त्वद्भक्तिलक्षणः ॥ वर्णाश्रमाचारवतांसर्वेषांद्विपदामपि १ यथानुष्ठीयमानेनत्वयिभक्तिर्नृणांभवेत् ॥ स्वधर्मेणारविंदाक्षतन्ममाख्यातुमर्हसि २ पुराकिलमहाबाहोधर्मंपरमकंभवान् ॥ यमाहत्वयिभक्तेभ्योब्राह्मणेभ्यश्चमाधव ३ सइदानींसुमहताकालेनामित्रकर्शन ॥ प्रायोंतर्भवितामर्त्यलोकेप्रागनुशासितः ४

यत्नवान् स्रवतिनिष्फलंभवति ४३ मत्सर्वोत्तमज्ञानमेवमुक्तिसाधनमित्युपसंहरति तस्मादिति ततःज्ञानसामग्र्यनंतरंसमाप्यतेसंसारइतिशेषः वाङ्मनःप्राणबुद्ध्यादिनियच्छेत्केशवेपरे । सर्वशब्दाभिधेयत्वंतस्यज्ञात्वाविशेषतः। मुख्यवृत्त्याभिधेयत्वमन्येषांमनसोभ्रमात्। तस्मात्तथाचिंतयतःस्रवेज्ज्ञानंयथातथा। तस्मान्मनोवचःप्राणान्माधवैकपरायणान्। कुर्याद्धितत्तपोह्यग्र्यंमहाधर्मोत्तमश्चसइतियच्छेद्वाङ्मनसीप्राज्ञस्तद्यच्छेज्ज्ञानआत्मनि। ज्ञानमात्मनिमहतिनियच्छेच्छांतआत्मनीतिवाक्यद्वयंतूक्तार्थप्रमाणम् ४४ ॥ इतिश्रीभाग०महा०विज०टी०एकदशस्कंधेषोडशोऽध्यायः ॥ १६ ॥ तत्तद्वर्णादिभिरनुष्ठीयमानेनस्वधर्मेणभगवद्भक्तिर्भवतीत्यतस्तद्वर्णविभागंतत्तत्स्वधर्मनिरूपयत्यस्मिन्नध्यायद्वये तत्रोद्धवउक्तार्थमनूद्यज्ञातव्यांशंपृच्छति यस्त्वयेति पूर्वंत्वयायस्त्वद्भक्तिलक्षणःत्वद्भक्तिरेवलक्षणंसंपद्यस्यसतथाभिहितः १ तेनस्वधर्मेणानुष्ठीयमानेनवर्णाश्रमाचारवतांतृणांयथात्वयिभक्तिर्भवेत्तत्तथाख्यातुमर्हसीत्यन्वयः द्विपदामपिवर्णादिहीनानामपियोधमस्तेनापीतियोज्यम् २ ननुमयोक्तोधर्मस्त्वयाज्ञातश्चेत्पुनःकिमितिवक्तव्यइतितत्राह पुरेति ३ सधर्मइदानींप्रायोंतर्भवितातिरोभूतः ४

अस्यधर्मस्यवक्तात्वदन्योनास्तीत्याह वक्तेति तेतवधर्मस्याविरिंचोस्तिइत्यत्राह सभायामिति त्वत्प्रसादंविनाविरिंचोपिनवक्ष्यतीत्यपिपदार्थः विनाप्रसादंविष्णानधर्मंब्रह्माभिवक्ष्यति । तत्प्रसादेनव क्तुंब्रह्माशक्ष्यतिनापरइतिवचनात् यत्रसभायांकलाः प्राणाद्यामूर्तिधराःअंगोपांगाद्यवयववंत्यः सप्राणमहजतप्राणाच्छ्रद्धांखंवायुज्योतिरापः । पृथिवींद्रियंमनोन्नमन्नाद्वीर्यंतपोमंत्रःकर्मलोकेषुनाम चताइमाःषोडशकलाःपुरुषायणाइत्यादिश्रुतेः ५ यदाब्रह्मसभायामपित्वदृतेन्योनास्तिकिमुतभूतलइतिभावेनाह कर्त्रेति भवतात्यक्तंमहीतलेविनष्टंधर्मकःपुरुषःप्रवक्ष्यतीत्यन्वयः कर्तेतिपाठेभवा नधर्मस्यकर्तातेनभवता ६ ततःकिमत्राह त्वमिति यतोन्योनास्ति अतस्त्वद्भक्तिलक्षणोधर्मोयस्ययथाविधीयेततथामेवर्णयेत्यन्वयः ७ ८ धर्मःधर्मविषयः ९ नृणांवर्णोहंसइति हं साभिधानः कृतयुगम् पर्याप्तयुगम् १० अग्रेकृतेप्रकृष्टोनवोभगवद्गुणा नांपेनसप्रणवओंकारस्तद्रूपस्तद्व्याख्यानरूपोवेदएकएवनऋगादिभेदेनाविभक्तः ओमित्येतदक्षरमिदंसर्वतस्योपव्याख्यानभूतंभवद्व विष्यदितिसर्वमोंकारएवेतिश्रुतिः तस्यविषयःकइत्यतउक्तं धर्मइति सकइत्यतोहमिति किंविशिष्टःवृषरूपधृक् चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्येत्यादिश्रुतिः एवंविधेत्वयिकिं प्रमाणमत्राह उपासतइति हंसाइत्यस्यविवरणंमुक्तकिल्बिषाइति ११ अधुनात्रेतायुगेवेदादिप्रवर्तनप्रकारमाह त्रेतामुखइति त्रेतामुखेत्रेतारंभेमेममहृदयात् प्रेष्ठादनासरस्वतीत्यस्याःप्रकृष्टो

वक्ताकर्तावितानान्योधर्मस्याच्युततेभुवि ॥ सभायामपिवैरिंच्यांयत्रमूर्तिधराःकलाः ५ कर्त्राविनाप्रवक्ताचभवतामधुसूदन ॥ त्यक्तमहीतलेदेवविनष्टं कःप्रवक्ष्यति ६ त्वमतःसर्वधर्मज्ञधर्मस्त्वद्भक्तिलक्षणः ॥ यथायस्यविधीयेततथावर्णयमेच्युत ७॥ बादरायणिरुवाच ॥ इत्थंतुभृत्यमुख्येनपृष्टःसभग वान्हरिः ॥ प्रीतःक्षेमायमर्त्यानांधर्मानाहसनातनान् ८॥ श्रीभगवानुवाच ॥ धर्मएषतवप्रश्नोनैश्रेयसकरोनृणाम् ॥ वर्णाश्रमाचारवतांतमुद्धवनिबोध मे ९ आदौकृतयुगेवर्णोनृणांहंसइतिस्मृतः ॥ कृतकृत्याःप्रजाजात्यातस्मात्कृतयुगंविदुः १० वेदःप्रणवएवाग्रेधर्मोहंसरूपधृक् ॥ उपासतेतपोनिष्ठाहंसा मांमुक्तकिल्बिषाः ११ त्रेतामुखेमहाभागप्राणान्मेहृदयात्त्रयी ॥ विद्याप्रादुरभूत्तस्याअहमासंत्रिवृन्मुखः १२ विप्रक्षत्रियविट्शूद्रामुखबाहूरुपादजाः ॥ वैराजात्पुरुषाज्जातायआत्माचारलक्षणाः १३ गृहाश्रमोजघनतोब्रह्मचर्यंहृदोमम ॥ वक्षस्थलाद्वनेवासोन्यासःशीर्षण्यवस्थितः १४ वर्णानामाश्रमा णांचजन्मभूम्यनुसारतः ॥ आसन्प्रकृतयोनृणांनीचैर्नीचोत्तमोत्तमाः १५ शमोदमस्तपःशौचंसंतोषःक्षांतिरार्जवम् ॥ मद्भक्तिश्चदयासत्यंब्रह्मप्रकृतय स्त्विमाः १६ तेजोबलंधृतिःशौर्यंतितिक्षौदार्यमुद्यमः ॥ स्थैर्यंब्रह्मण्यमैश्वर्यंक्षत्रप्रकृतयस्त्विमाः १७

विरिंचःतस्मात्प्राणात्त्रयीविद्यात्रित्वसंख्याविशिष्टत्वेनवेदविद्याप्रादुरभूत् त्रीन्वेदान्वृणतइतित्रिवृतोब्राह्मणास्तएवमुखंद्वारंयस्यसतथा अहंतस्याविद्यायाआसंविप्रद्वारात्रय्याअभिव्यक्तोहमित्यर्थः विप्राणांतस्योपदेष्टृत्वात् १२ तत्रविप्रमुखत्वंकिंविशेष्योच्यतेक्षत्रादिमुखत्वंकिंनस्यादित्याशंक्यममसर्वावयवेभ्योमुखस्यमुख्यत्वाद्वागाधिकरणत्वात्तत्त्वज्ञापनस्यवागधिकारत्वाच्चेतिभावेनाह वि प्रेति तवकस्माद्रूपविशेषाद्विप्राद्युत्पत्तिरत्राह वैराजादिति वैराजात्ब्रह्मांतर्यामिणःयेआत्माचारलक्षणाःस्वस्वविहिताचारएवलक्षणंयेषांतेतथा १३ इदानीमाश्रमोत्पत्तिस्थानमाह गृहाश्रमइति व नेवासःवानप्रस्थः १४ ममावयवानांविशेषाभावेपिमंदमतिमपेक्ष्यजन्मस्थानमनुसृत्यवर्णादीनांस्वभावविशेषोस्तीत्याह वर्णानामिति प्रकृतयःस्वभावाःस्वभावभेदानीचादिशब्दवाच्याश्चेत्याह नीचैरि ति नीचप्रकृतिःशूद्रःनीचोत्तमोवैश्यःउत्तमःक्षत्रियःउत्तमोत्तमःविप्रःनीचनीचोतेवसायी १५ नीचैरित्यादिविप्रादिक्रमविपर्ययंनिवारयितुंविप्रादिस्वभावलक्षणमाह शमइत्यादिना १६ तेजःप्रभावःबलं शक्तिः । अर्थहानौचबंधूनांवियोगेष्वपिसंपदि तयोःप्राप्तौचसर्वस्यचित्तस्यस्थापनंधृतिः १७

धर्माधर्मेषुविश्वासोयस्तदास्तिक्यमुच्यते । न्यायार्जितंधनंधान्यमन्यद्वायत्प्रदीयते । अर्थिभ्यःश्रद्धयायुक्तंदानमेतदुदाहृतं । अर्थोपचये अर्थार्जने अतुष्टिरलंबुद्धचभावः १८ १९ शौचंतुद्विविधंप्रोक्तंबाह्यमाभ्यंतरंतथा मृज्जलाभ्यांतथाबाह्यंमनःशुद्धिरथापरं इत्येतद्विपरीतमशौचं अनृतंअयथार्थभाषणं जीवब्रह्मैक्यभाषणमित्यर्थः कर्मणामनसावाचापरद्रव्येषुनिःस्पृहः । अस्तेयमितिसंप्रोक्तमृषिभिस्तत्त्वदर्शिभिः इत्येतदन्यत्स्तेयंपरकीयब्रह्मत्वमात्मीयत्वेनवचनमित्यर्थः शुष्कविग्रहःनिष्फलकलहःशुक्तिरजतांनिदर्शनीकृत्यजगन्मिथ्येतिकथालक्षणःकामोनिषिद्धविषयाभिलाषः लक्ष्मीपतिरहमित्याद्यभिलाषलक्षणइत्यर्थःक्रोधस्तत्त्वोक्तावसहिष्णुता तर्षोऽनलंबुद्धिःब्रह्मगणदूषणोक्तावित्यर्थः २० साधारणधर्ममाह अहिंसेति कर्मणामनसावाचासर्वभूतेषुसर्वदा । अक्लेशजननंप्रोक्तमहिंसात्विहयोगिभिः । सत्यभूतंहितंप्रोक्तंनयथार्थाभिभाषणं । असत्यमपितत्सत्यमुत्तमानांहियद्वचः । विष्णुवैष्णवविषयेद्रव्यत्यागे लोभाभावःअन्यत्रगुणः २१ आनुपूर्व्यात् अष्टवर्षब्राह्मणमुपनयीतेत्यादिश्रुत्याविहितप्रकारेणेत्यर्थः उपनयनलक्षणंद्वितीयंजन्मप्राप्यब्रह्मत्रयीसंज्ञंदांतउपरतोविष्णुभक्तइत्यर्थः वाग्यतोमितभाषणः २२ मेखलादीन्वासआदींश्चदधत् २३ स्नानादिषुवाग्यतःकाष्ठमौनवान्जपेउच्चारेमूत्रो

आस्तिक्यंदाननिष्ठाचअदंभोविप्रसेवनम् ॥ अतुष्टिरर्थोपचयेवैश्यप्रकृतयस्त्विमाः १८ शुश्रूषणंद्विजगवांदेवानांचाप्यमायया ॥ तत्रलब्धेनसंतोषःशूद्रप्रकृतयस्त्विमाः १९ अशौचमनृतंस्तेयंनास्तिक्यंशुष्कविग्रहः ॥ कामःक्रोधश्चतर्षश्चस्वभावोऽतेवसायिनाम् २० अहिंसासत्यमस्तेयमकामक्रोधलोभता ॥ भूतप्रियहितेहाचधर्मोयंसार्ववर्णिकः २१ द्वितीयंप्राप्यानुपूर्व्याज्जन्मोपनयनंद्विजः ॥ वसन्गुरुकुलेदांतोब्रह्माधीयीतवाग्यतः २२ मेखलाजिनदंडाक्षब्रह्मसूत्रकमंडलून् ॥ जटिलोधौतदंतश्चवासःपीठकुशान्दधत् २३ स्नानभोजनहोमेषुजपोच्चारेचवाग्यतः ॥ नच्छिंद्यान्नखरोमाणिकक्षोपस्थगतान्यपि २४ रेतोनावकिरेज्जातुब्रह्मव्रतधरःस्वयम् ॥ अवकीर्णेवगाह्याप्सुयतासुस्त्रिपदींजपेत् २५ अग्न्यर्काचार्यगोविप्रगुरुवृद्धसुरान्नमेत् ॥ समाहितउपासीतसंध्येचयतवाग्जपेत् २६ आचार्यंमांविजानीयान्नावमन्येतकर्हिचित् ॥ नमर्त्यबुद्ध्यासूयेतसर्वदेवमयोगुरुः २७ सायंप्रातरुपानीयभैक्षंतस्मैनिवेदयेत् ॥ यच्चान्यदप्यनुज्ञातउपभुंजीतसंयतः २८ शुश्रूषमाणआचार्यंसदोपासीतनीचवत् ॥ यानशय्यासनस्थानेनातिदूरेकृतांजलिः २९ एवंवृत्तोगुरुकुलेवसेद्भोगविवर्जितः ॥ विद्यासमाप्यतेयावद्विभ्रद्व्रतमखंडितम् ३० यद्यसौछंदसांलोकमारोक्ष्यन्ब्रह्मविष्टपम् ॥ गुरवेविन्यसेद्देहंस्वाध्यायार्थंबृहद्व्रतः ३१

त्सर्गेपुरीषोत्सर्जनेच गुरुणाचोपदिष्टोपिवेदबाह्यविवर्जितः । विधिनोक्तेनमार्गेणमंत्राभ्यांसोजपःस्मृतः । अधीत्यवेदसूत्रेवापुराणेसेतिहासके । यदेष्वध्ययनंतच्चतदभ्यासोजपःस्मृतः २४ नावकिरेन्नउत्सृजेत् प्रसन्नगुरुणापूर्वमुपदिष्टोभ्यनुज्ञया । धर्मार्थमात्मसिद्ध्यर्थमुपायग्रहणंव्रतं । प्राणापानसमायोगःप्राणायामउदीरितः । ब्रह्मव्रतधरःब्रह्मचर्यव्रतधरः । कर्मणामनसावाचासर्वावस्थासुसर्वदा । सर्वत्रमैथुनत्यागंब्रह्मचर्यप्रचक्षते । स्वप्नेसुंदर्यादिदर्शनेयदृच्छयारेतोवकीर्याप्स्ववगाह्यनिमज्ययतासुःप्राणायामोपेतस्त्रिपदींगायत्रींजपेदित्यन्वयः स्वप्नेपिरेतस्स्खलनेप्रायश्चित्तंविधीयतइतिस्मृतेः २५ अतोदेवाअवंतुनःइत्यादेरपिअग्न्यर्कव्यतिरिक्तसुराअपिमंतव्याइत्यर्थः २६ २७ २८ २९ स्वकृचंदनादिभोगवर्जितःएवंवृत्तइत्येकंपदं उक्तसदाचारानिरतइत्यर्थःकियंतंकालमेवंवासइतितत्राह विद्येति ३० असौबृहद्व्रतःब्रह्मचारीयदिछंदसांवेदानांलोकमारोक्ष्यन्आरोढुकामोभवतिस्वाध्यायार्थंस्वाध्यायैकप्रयोजनंदेहंगुरवेविन्यसेत्गुरुशुश्रूषांकुर्यादित्यर्थः कीदृशंब्रह्मणाधिकृतंविष्टंप्रवेष्टंपातिरक्षतीतिब्रह्मविष्टपंसत्यलोकमित्यर्थः ३१

कस्मिन्नधिष्ठानविशेषत्वदुपासनमत्राह अग्नावात्मानमूयहृदयवा अग्नावित्यादिसप्तम्यामदानयारत्याप [illegible] ग्धीःयस्यनास्तिसोऽपृथग्धीःअन्याचैक्याविषयमिथ्याज्ञानरहितइत्यर्थःदृष्टफलमाह ब्रह्मवर्चस्वीति ३२ अप्रतिपक्षस्यानुमानस्येवाविहितोपासनस्याभीष्टसाध्यासिद्धौसामर्थ्यस्यादित्यतःप्रतिपक्षंप्रति क्षिपति स्त्रीणामिति क्ष्वेलनंजिह्वास्फोटःनर्मवचनंवास्मरणादिकमादिशब्दगृहीतं अगृहस्थःब्रह्मचारी अग्रतःप्रथमतः ३३ सर्वाश्रमसाधारणधर्ममाह शौचमित्यादिना ३४ सर्वभूतेषुमद्भावःममव्याप्तिलक्ष णमुक्त्वा ३५ ब्रह्मचर्यानुष्ठानफलमाह एवमिति तीव्रतपसादग्धःकर्माशयःबाह्यांतःकरणंयस्यसतथा अतएवामलःसंसारमलमुक्तोभवति ३६ अथेति प्रमेयांतरारंभविषयःब्रह्मचर्याश्रमानंतरंअवेक्ष्यन् गृहस्थाश्रमंप्रवेष्टुकामःस्नायात्स्नातकोभवेत् ३७ द्विजोत्तमेनानाश्रमतयानस्थेयमित्याह गृहमिति ३८ गृहार्थीचेत्कीदृशीमुद्वहेदत्राह गृहार्थीति यांसवर्णामनुक्रमादितिपाठः ३९ द्विजन्मनांब्राह्म

अग्नौगुरावात्मनिचसर्वभूतेषुमांपरम् ॥ अपृथक्धीरुपासीतब्रह्मवर्चस्व्यकल्मषः ३२ स्त्रीणांनिरीक्षणस्पर्शसंलापक्ष्वेलनादिकम् ॥ प्राणिनोमिथुनीभू तानगृहस्थोग्रतस्त्यजेत् ३३ शौचमाचमनंस्नानंसंध्योपासनमार्जवम् ॥ तीर्थसेवाजपोस्पृश्याभक्ष्यासंभाष्यवर्जनम् ३४ सर्वाश्रमप्रयुक्तोयंनियमः कुलनंदन ॥ मद्भावःसर्वभूतेषुमनोवाक्कायसंयमः ३५ एवंब्रह्मव्रतधरोब्राह्मणोग्निरिवज्वलन् ॥ मद्भक्तस्तीव्रतपसादग्धकर्माशयोमलः ३६ अथानंत रमावेक्ष्यान्यथाजिज्ञासितागमः ॥ गुरवेदक्षिणांदत्वास्नायाद्गुर्वनुमोदितः ३७ गृहंवनंचोपविशेत्प्रव्रजेद्वाद्विजोत्तमः ॥ आश्रमादाश्रमंगच्छेन्नान्यथा मत्परश्चरेत् ३८ गृहार्थीसदृशींभार्यामुद्वहेदजुगुप्सिताम् ॥ यवीयसींतुवयसायासवर्ण्यानुक्रमात् ३९ इज्याध्ययनदानानिसर्वेषांचद्विजन्मनाम् ॥ प्रतिग्रहोध्यापनंचब्राह्मणस्यैवयाजनम् ४० प्रतिग्रहंमन्यमानस्तपस्तेजोयशोनुदम् ॥ अन्याभ्यांचैवजीवेतशिलैर्वादोषदृक्तयोः ४१ ब्राह्मणस्यहिदे होयंक्षुद्रकामार्यनेष्यते ॥ कृच्छ्रायतपसेचेहप्रेत्यानंतसुखायच ४२ शिलोंछवृत्त्यापरितुष्टचित्तोधर्ममहांतंविरजंजुषाणः ॥ मय्यर्पितात्मागृहएवतिष्ठ न्नातिप्रसक्तःसमुपैतिशांतिम् ४३ समुद्धरंतियेविप्रंसीदंतंमत्परायणम् ॥ तानुद्धरिष्येनचिरादापदोनौरिवार्णवात् ४४ सर्वाःसमुद्धरेद्राजापितेवव्यस नात्प्रजाः ॥ आत्मानमात्मनाधीरोयथागजपतिर्गजान् ४५ एवंविधोनरपतिर्विमानेनार्कवर्चसा ॥ विधूयेहाशुभंकृत्स्नमिंद्रेणसहमोदते ४६ सीदन्वि प्रोवणिग्वृत्त्यापण्यैरेवापदंतरेत् ॥ खड्गेनवापदाक्रांतोनश्ववृत्त्याकथंचन ४७ वैश्यवृत्त्यातुराजन्योजीवेन्मृगययापदि ॥ चरेद्वाविप्ररूपेणनश्ववृत्त्या कथंचन ४८

णक्षत्रियवैश्यानां इज्यायजनम् ४० प्रतिग्रहंतपस्तेजोयशोनुदंमन्यमानःपुरुषःअन्याभ्यांयाजनाध्यापनाभ्यांजीवेतेत्यन्वयः तयोर्याजनाध्यापनयोर्दोषदृक्शीलैःशिलोंछवृत्त्यावाजीवेत् ४१ शिलों छवृत्तेःक्लेशरूपत्वात्किंमितिसाप्रशस्तेतिविधीयतेइत्यत्राह ब्राह्मणस्येति क्षुद्रकामायाल्पभोगाय ४२ शिलोंछवृत्तेःसुखसाधनत्वात्सैवनिषेध्येतिभावेनाह शिलोंछेति शांतिंमोक्षं ४३ अपदःपदहीनात् आपदइतिवा ४४ ४५ ४६ आपद्धर्ममाह सीदन्निति दारिद्र्येणसीदन्नशक्नुवन् वणिजांवृत्त्याकथमापत्तरणमत्राह पण्यैरिति आपदाक्रांतः खड्गेनवाक्षत्रधर्मेणेत्यर्थः श्ववृत्त्यानीचसेव या ४७ वैश्यवृत्त्यागोरक्षणादिलक्षणया ४८

कारुककियांकटादिक्रियांसंपादनेवेत्याह कृच्छ्रादिति ४९ गृहस्थधर्ममाह वेदेत्यादिनायथोदयंसंपदामितिशेषः । मद्रूपाणिमत्प्रतिमास्थानीयानि । प्रतिमावद्धेररूपंतिर्यङ्नरसुरादयः । साक्षाद्रूपाणिमत्स्यादीन्यभिन्नान्येवसर्वदेतिवचनात् ५० शुक्लेनशुद्धेन ५१ मद्यजनतात्पर्येइदमेवप्रथमसाधनमित्याह कुटुंबेष्विति । अदृष्टंस्वर्गादिकंदृष्टवद्दृढादिकवन्नश्वरंपश्येत् ५२ कुटुंबेष्वसंगतयाप्रवर्तनोपायमाह पुत्रेत्यादिना । पांथसंगमइतिलुप्तोपमा । पांथानांसंगमइवपुत्रादीनांसंगमइति । एतेपुत्रादयोदेहमनुभवंत्येवअरुच्यादृष्टांतांतरमाह स्वप्नइति । पांथसंगमःक्वचिद्भवतिक्वचिन्न तथास्वप्नःअपितुनिद्रामनुगतएव ५३ मयिमनसायुक्तः ५४ आश्रमादाश्रमंगच्छेदित्यंविधिःकाल्पनिकइत्याह कर्मभिरिति ५५ एवंमुक्तिसाधनमुक्त्वेदानींसंसारप्राप्तितदनर्थंचवक्ति यस्त्विति । ममाहमित्यन्य

शूद्रवृत्तिंभजेद्वैश्यःशूद्रोवैकारुकक्रियाम् ॥ कृच्छ्रान्मुक्तोनगर्ह्येणवृत्तिंलिप्सेतकर्मणा ४९ वेदाध्यायीस्वधास्वाहाबल्यन्नाद्यैर्यथोदयम् ॥ देवर्षिपितृभूतानिमद्रूपाण्यन्वहंयजेत् ५० यदृच्छयोपपन्नेनशुक्लेनोपार्जितेनवा ॥ धनेनापीडयन्भृत्यान्मांयजेतान्वहंविभुम् ५१ कुटुंबेषुनसज्जेतनप्रमाद्येत्कुटुंब्यपि ॥ विपश्चिन्नश्वरंपश्येददृष्टमपिदृष्टवत् ५२ पुत्रदाराप्तबंधूनांसंगमःपांथसंगमः ॥ अनुदेहंभवंत्येतेस्वप्नोनिद्रानुगोयथा ५३ इत्थंपरिमृशन्युक्तोगृहेष्वतिथिवद्वसेत् ॥ नगृहैरनुबध्येतनिर्ममोनिरहंकृतिः ५४ कर्मभिर्गृहमेधीयैरिष्ट्वामामेवभक्तिमान् ॥ तिष्ठेद्वनंचोपविशेत्प्रज्ञावान्वापरिव्रजेत् ५५ यस्त्वासक्तमतिर्गेहेपुत्रवित्तैषणातुरः ॥ स्त्रैणःकृपणधीर्मूढोममाहमितिबद्ध्यते ५६ अहोमेपितरौवृद्धौभार्याबालात्मजासती ॥ अनाथामामृतेदीनाःकथंजीवंतिदुःखिताः ५७ एवंगृहाशयाक्षिप्तहृदयोमूढधीरयम् ॥ अतृप्तताननुध्यायन्मृतोंधंविशतेतमः ५८ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेवर्णाश्रमविभागयोगोनामसप्तदशोध्यायः ॥ १७ ॥ श्रीभगवानुवाच ॥ वनंविविक्षुःपुत्रेषुभार्यांन्यस्यसहैववा ॥ वनमेववसेच्छांतस्तृतीयंभागमायुषः १ कंदमूलफलैर्वन्यैर्मेध्यैर्वृत्तिंप्रकल्पयेत् ॥ वसीतवल्कलंवासस्तृणपर्णाजिनानिच २ केशलोमनखश्मश्रुमलानिबिभृयाद्रती ॥ नधावेदप्सुमज्जेत्त्रिकालंस्थंडिलेशयः ३ ग्रीष्मेतप्येतपंचाग्निर्वर्षास्वासारषाट्जले ॥ आकंठमग्नःशिशिरएवंवृत्तस्तपश्चरेत् ४ अग्निपक्वंसमश्नीयात्कालपक्वमथापिवा ॥ उलूखल्यश्मकुट्टोवादंतोलूखलएवच ५ स्वयंसंचिनुयात्सर्वमात्मनोवृत्तिकारणम् ॥ देशकालबलाभिज्ञोनाददीतान्यदाहृतम् ६ वन्यैश्चरुपुरोडाशान्निर्वपेत्कालचोदितान् ॥ नतुश्रौतेनपशुनामांयजेतवनाश्रमी ७ अग्निहोत्रंचदर्शेचपूर्णमासंचपूर्ववत् ॥ चातुर्मास्यानिचमुनेराख्यातानिचनैगमैः ८

थाज्ञानेन ५६ ५७ गृहाशयागृहेष्वतितृष्णया आशादिगतितृष्णयेतिरीति ५८ इतिश्री०एकादशस्कंधेवि०टीकायांसप्तदशोध्यायः॥१७॥वनेचोपविशेदित्युक्त्वानप्रस्थस्यप्रवृत्तिप्रकारमाह वनमित्यादिना । तृतीयभागमायुषःचतुर्मासाधिकंत्रयस्त्रिंशद्वर्षपरिमितम् १ वन्यैर्वनभवैः २ व्रतीवानप्रस्थव्रतवान् धावनंपलायनम् तेजनंवा ३ वर्षासुवर्षर्तौआसारषाट्वेगवर्षमपिसहतइति ४ कालपक्वंकदलीफलादिउलूखलीउलूखलावहतनीवारादिनावर्तमानःअश्मकुट्टःअश्मनाचूर्णितपिष्टादिवृत्तिः । दंताएवोलूखलोयस्यसतथादंतचूर्णितभोज्यइत्यर्थः । गजदंतनिर्मितोलूखलोवा ५ संचिनुयात्संग्रहं कुर्यात् अन्यदाहृतमन्येनानीतम् ६ कालचोदितान्अस्मिन्कालइदमितिविहितान् ७ पूर्ववत्गृहस्थाश्रमेयथा तथावनेअग्निहोत्रादिकंकुर्यादितिशेषः । नैगमैःकल्पशास्त्रज्ञैः ८

तपोमयंज्ञानरूपंऋषीणांलोकान्मामुपैति ९ एवंकृच्छ्रतश्चीर्णतपोमदपरोक्षायनियोक्तव्यंअन्यथायुंजानःसर्वहास्यइत्याह यस्त्विति । निःश्रेयसंमदपरोक्षलक्षणंपुरुषार्थसाधनं १० स्वाश्रमविहितकर्मकरणासमर्थश्चेत्किंकुर्यादत्राह यदेति ११ क्रमप्राप्तंप्रव्रजनपूर्वकंपतियमंमाह यदाबै । धर्मविपाकेषुधर्मफलेषुदुःखत्वाभिरयात्ममुमरकसमानरूपेषु १२ प्रव्रजनेइत्थंभावमाह इष्ट्वेति प्राणेअंतर्यामिणि १३ देवान्सम्यक्संपूज्यतेभ्योनुज्ञामादायैवंसंन्यासःकार्योन्यथातेदारादिपुसन्निधायविघ्नंविधायाधःपातयंतीत्याशयेनाह विघ्नस्येति । वैइत्यनेन असंपूज्यन्यसिष्णुंतंदेवावैपातयंत्यधः । सुसंपूज्यन्यसिष्णुंतंदेवाएवानुजानंतेइतिवाक्यंसूचयति हिशब्देन अथगतश्रीवृद्धवैविघ्नंतीवपुनःपुनः । तात्पर्याद्विघ्नितोदेवैर्नोत्थातुंशक्नुयात्काचिदिति । मानंसूचयति १४ मौनेनवाग्दंडः अनीहयानिषिद्धाचरणत्यागेनदेहदंडः अनिलायामेनचेतोदंडः १५ १६ १७ १८ १९ आत्मनापरमात्मानाक्रीडायस्यसतथा आत्मनोरतंसुखंयस्यसतथा आत्मवान्वशीकृतमनाः विविक्तंक्षेमंक्षत्रंशरणंयस्यसतथा यद्वा पुरुषार्थोत्तममोक्षशरणः मद्भावेनमद्भक्त्याविमलाशयःविशुद्धबुद्धिः २० तस्योपायस्तिप्रकारमाह आत्मानमिति मुनिर्यतिरात्मानंपरमात्मानमेकंप्रधानं

एवंचीर्णेनतपसामुनिर्धमनिसंततः ॥ मांतपोमयमाराध्यऋषिलोकादुपैतिमाम् ९ यस्त्वेवंकृच्छ्रतश्चीर्णंतपोनिःश्रेयसंमहत् ॥ कामायाल्पीयसेयुंज्याद्बालिशःकोपरस्ततः १० यदासौनियमेऽकल्पोजरयाजातवेपथुः ॥ आत्मन्यग्निंसमारोप्यमच्चित्तोग्निंसमाविशेत् ११ यदाधर्मविपाकेषुलोकेषुनिरयात्मसु ॥ विरागोजायतेसम्यक्न्यस्ताग्निःप्रव्रजेत्ततः १२ इष्ट्वायथोपदेशंमांदत्त्वासर्वस्वमृत्विजे ॥ अग्नीन्स्वप्राणआवेश्यनिरपेक्षःपरिव्रजेत् १३ विप्रस्यवैसंन्यसतोदेवादारादिरूपिणः ॥ विघ्नंकुर्वंत्ययंह्यस्मानाक्रम्यसमियात्परम् १४ बिभृयाच्चेन्मुनिर्वासःकौपीनाच्छादनंपरम् ॥ त्यक्तंदंडपात्राभ्यामन्यत्किंचिदनापदि १५ दृष्टिपूतंन्यसेत्पादंवस्त्रपूतंपिबेज्जलम् ॥ सत्यपूतंवदेद्वाक्यंमनःपूतंसमाचरेत् १६ मौनानीहानिलायामदंडोवाद्रेहचेतसाम् ॥ नह्येतेयस्यसंत्यंगवेणुभिर्नभवेद्यतिः १७ भिक्षांचतुर्षुवर्णेषुविगर्ह्यान्वर्जयंश्चरेत् ॥ सप्तागारानसंक्लृप्तांस्तुष्येल्लब्धेनतावता १८ बहिर्जलाशयंगत्वातत्रोपस्पृश्यवाग्यतः ॥विभज्ययाचितंशेषंभुंजीताशेषमाहृतम् १९एकश्चरेन्महीमेतांनिःसंगःसंयतेंद्रियः ॥ आत्मक्रीडआत्मरतआत्मवान्समदर्शनः ॥ विविक्तक्षेमशरणोमद्भावविमलाशयः २० आत्मानंचिंतयेदेकमभेदेनमयामुनिः २१ अन्वीक्षेतात्मनोबंधंमोक्षंचज्ञाननिष्ठया ॥ बंधइंद्रियविक्षेपोमोक्षएषांचसंयमः २२

सर्वोत्तमंचिंतयेत् किंच मयाअभेदेन उपलक्षणमेतत् मत्स्याद्यवतारामिन्नत्वेनस्वगतभेदराहित्येनमयालक्ष्म्यासहेतिवाअत्रार्कमानमत्राप्युत्तरंमयेति पूर्णमदःपूर्णमिदंपूर्णात्पूर्णमदुच्यतेइतिश्रुतिप्रमाणेनक्षेत्रज्ञःपुरुषोह्यात्मेतिमयासिद्धमात्मानंस्वंअभेदेनचिंतयेत् किंतुएकमन्यंचिंतयेत् एकेमुख्यान्यकेवलाइति अन्यमीशमस्यमहिमानमितिवीतशोकइतिमयाहेतुना यद्वाआत्मावाइदमेकएवाग्रआसीदितिश्रुत्यामयासिद्धमात्मानंएकंमुख्यंचिंतयेत् अभेदेनजीवनैक्यंनचिंतयेदित्यर्थः सत्यंभिदासत्यंभिदेतिश्रुत्याख्यमयासिद्धत्वात् लक्ष्मीप्रमाणयोर्मास्यान्निषेधेचापिकीर्त्यतेइत्यभिधानम् २१ भगवदुपास्ताविदमंतरंगमित्याह अन्वीक्षेतेति ज्ञाननिष्ठयात्मनःस्वस्यबंधमोक्षंचात्मनोहरेःसकाशादन्वीक्षेत नन्वयंहरिरस्यबंधमोक्षौकथमापादयतीतित्राह बंधइति इंद्रियाणांविषयेषुविक्षेपःप्रसारणंचबंधःस्यादेषामिंद्रियाणांसंयमोनिग्रहोविषयेभ्यःआहृत्यमयिस्थापनलक्षणोमोक्षइति २२

यतएवंतस्मादित्थंविधेयामित्याह तस्मादिति कर्मेंद्रियाणामैक्येनमनसासहषट्ज्ञानेंद्रियाणिआत्मनिभाविमहत्सुखंलब्ध्वातुच्छकामेभ्योविरक्तोभूत्वाविषयेनिरपेक्षत्वेनात्मनिसुखंलब्ध्वेतिवा २३ पुण्यशब्दःदेशादिभिःप्रत्येकंसंबध्यते २४ पदंस्थानं अभीक्ष्णमित्यनेनपुरादिषुविकल्पइतिज्ञायते वानप्रस्थाश्रमस्थेषुनित्यंभैक्षाचरणस्यकिंक्षिप्रफलमित्यतआह संसिध्यतीति शिलांधसा शिलाविहितान्नेनशुद्धंसत्वंअंतःकरणंयस्यसतथा असंमोहोमिथ्याज्ञानरहितःआशुसंसिध्यतिअपरोक्षज्ञानमाप्नोति २५ संसिद्धस्यदर्शनप्रकारंविधत्ते नेति एतज्जगद्वस्तुतयापरब्रह्मत्वेन अत्र हेतुः विनश्वरंदृश्यमानमिति एवंपश्यतावैराग्यानुसंधानंकर्तव्यमित्याह असक्तेति इहामुत्रासक्तचित्तःस्यात् ततःकिमत्राह विरमेदिति चिकीर्षितात्कर्तुमिष्टात्कर्मादेर्विरमेत्कृतकृत्योभवेदित्यन्वयः २६ एतदेवस्पष्टयति यदेतदिति मनोवाक्प्राणैःसंभृतंसंपन्नंआत्मनिहरौस्थितं ऋचोअक्षरेपरमव्योमन्नित्यादिश्रुतेः यदेतत्प्रत्यक्षंजगत्सर्वंमायेतितर्केणाचेतनप्रकृतिकृतत्वेन अनुष्ठितानुगुणमायातीत्यायःफलं । तन्मानेतिमाशब्दोनिषेधार्थः । तथाचमायेतिनिष्फलमुच्यते । मायमितिवक्तव्येमायेतिस्त्रीलिंगत्वेनवचनमत्यंतास्वातंत्र्यप्रकटनायेत्यतोस्यज्ञानेन प्रयोजनाभावान्नैतत्सुखायस्यादितित्यक्तास्वतंत्रत्वात्स्वोविष्णुरन्यसंवादराहित्येनमुक्तिफलप्रदत्वात् तत्स्थःतदेकशरणोभूत्वातज्जगन्नस्मरेद्विष्णुमेवप्रयोजकंस्मरेदित्यन्वयः यदिविष्णुःस्वतंत्रोनस्यात्तर्हीतज्जगत्तान्नियतंनस्यात्तच्चेन्नित्यसुखंस्यान्नचैवंतस्मात्सएवतथैवेत्यादितर्केण विश्वंमिथ्यादृश्यत्वादित्यादितर्केणमायामयत्वंप्रपंचस्योच्यतइत्येतत्पूर्वोत्तरग्रंथविरोधात् विश्वंसत्यमित्यादिश्रुतिप्रामाण्याद

तस्मान्नियम्यषड्वर्गंमद्भावेनचरेन्मुनिः ॥ विरक्तःक्षुल्लकामेभ्योलब्ध्वात्मनिसुखंमहत् २३ पुरग्रामव्रजान्सार्थान्भिक्षार्थंप्रविशंश्चरेत् ॥ पुण्यदेशसरिच्छैलवनाश्रमवतींमहीम् २४ वानप्रस्थाश्रमपदेष्वभीक्ष्णंभैक्ष्यमाचरेत् ॥ संसिध्यत्याशुसंमोहःशुद्धसत्वःशिलांधसा २५ नैतद्वस्तुतयापश्येद्दृश्यमानंविनश्वरम् ॥ असक्तचित्तोविरमेदिहामुत्रचिकीर्षितात् २६ यदेतदात्मनिजगन्मनोवाक्प्राणसंभृतम् ॥ सर्वंमायेतितर्केणस्वस्थस्त्यक्त्वानतत्स्मरेत्२७ ज्ञाननिष्ठोविरक्तोवामद्भक्तोवानपेक्षकः ॥ सलिंगानाश्रमान्मुक्त्वाचरेदविधिगोचरः २८ बुधोबालकवत्क्रीडेत्कुशलोजडवच्चरेत् ॥ वदेदुन्मत्तवद्विद्वान्गोचर्यांनैगमश्चरेत् २९ वेदवादरतोनस्यान्नपाखंडीनहैतुकी ॥ शुष्कवादविवादेनकंचित्पक्षंनसंश्रयेत् ३०

स्मदुक्तार्थे त्रिगुणाप्रकृतिर्मायातज्जत्वाद्विश्वमदृशं । अनाद्यनंतकालेषुमायेत्याहुर्विपश्चितः । अचेतनत्वान्नैवैतत्प्रयोजकतयास्मरेत् । चेतनत्वंस्वतंत्रत्वंसचैकोविष्णुरेवतु । आयस्तुफलमादिष्टंप्रोक्तंमायेतिनिष्फलं । फलाल्पत्वात्तुमायैषासंप्रोक्तात्रिगुणात्मिका । महाफलप्रदत्वात्तुविष्णुरायइतीरितइतिप्रमाणसद्भावाच्चेत्युपेक्षणीयम् २७ ज्ञानपरिपाकंप्राप्तस्ययतेर्वृत्तिप्रकारंविधत्ते ज्ञाननिष्ठइतिज्ञानस्यनिष्ठोत्कर्षोयस्यसतथा वाशब्दौसमुच्चयार्थौनविकल्पार्थौअन्योन्यनियमार्थौवाअनपेक्षकःशिष्यसंग्रहाद्यनिच्छुःसलिंगान्दंडादिलक्षणसहितान्मुक्त्वाविधेरगोचरः अयंयतिरयंव्रतीत्यादिरूपव्यवहारागोचरश्चरेद्विविक्तेअरण्येवर्तेतएवइत्यर्थः यद्वा वेदोक्तविधिचकितत्वेनसंध्योपासनादिनकरोतिकिंतुजलस्रोतोवत्स्वतएवकरोति २८ तंप्रकारंवक्ति बुधइति गोचर्यांगोवच्चर्यांअज्ञवच्चरणमित्यर्थः नैगमःवेदोक्तविधिनावर्तमानःइत्यनेनाविधिगोचरइत्यत्रविध्यतिक्रमोनार्थइतिनिरणायि २९ नैगमइत्युक्तंविशदयति वेदेति वेदेनसहवादोविवादः विप्रतिपत्तिस्तत्ररतोनस्यात् कुतर्केणवेदस्यजीवब्रह्मणोरेकत्वार्थकथनपरोनस्यादियर्थः वेदेनसहवादोयोवेदवादइतीरितः । तर्केणवेदस्यान्यार्थकल्पनंतद्विदोविदुः । तन्नकुर्यात्कदाचिच्चतत्कुर्वन्वेदहाभवेदितिवचनादुक्तएवार्थः वेदविचारविधुरइत्यर्थोनैव किंच पाखंडीपाशुपतादिदर्शनाभिमानीचनस्यात् हैतुकी अक्षपादादिदर्शनाभिमानीचनस्यात् शुष्कवादविवादेनप्रसंगतःप्राप्तनिरर्थवादकलहेन योगसांख्यकणादाक्षपादावैहेतुवादिनः । पश्चीशशाक्तबुद्धाद्याःपाखंडाइतिकीर्तिताः इतिवचनाच्च ३०

नोद्विजेतदुर्जनान्नोद्विग्रःस्यात् ३१ ३२ वैराकरणेकिंनिमित्तमत्राह एकइति परःसर्वोत्तमः आत्मापरमात्माएकएवभूतेषुचराचरसंज्ञेषुआत्मानस्वास्मिंश्चावास्थताहयस्मात्तस्मादाधश्चानत्वाद्धरणशु
र्यात्तदप्रियत्वादित्यर्थः एकोदेवःसर्वभूतेषुगूढइतिश्रुतेः अत्रदृष्टांतमाह खंयद्वदिति यद्वद्यथाआकाशउदपात्रेषुघटादिषुएकएवस्थितस्तथेत्यत्र विशेषस्तु घटादिषुमहाकाशोनिर्विशेषश्चसंततः।
घटावयवरूपस्तुतथैवान्योघटानुगः। घटनाशेथनाशःसन्मध्यमाकाशइष्यते। एकदशाभिमानित्वादिन्याकाशास्त्रयःस्मृताः। महाकाशोविप्रराजोविप्रास्तत्रतुमध्यमाः। क्षुद्रविप्रास्तदितरएवमात्मात्रि
धास्मृतः। महाखवत्परस्तत्रात्माजीवामध्यखवत्स्मृताः। घटानुगखवत्प्रोक्ता असुरानित्यदुःखिनः। महाकाशवशाःसर्वेआकाशाइतरेस्मृताः। परमात्मवशेतद्वज्जीवाःसर्वेपिसंस्थिताः। एवंविष्ण्वात्मक
मिदंजगत्पश्येद्यतिःसदेत्यस्मान्मानादवगंतव्यः केवलंनाकाशवत्भूतानांपरमात्मनश्चव्याप्यव्यापकसंबंधोपितुतस्माद्विशेषोप्यस्तीत्याह भूतानीति। एकःपरमात्माएवात्माव्यापकश्चादातायेषांतानी
मान्येकात्मकानि कप्रत्ययः स्वार्थेविशिनष्टि भूतानामेकएवात्माथैकोभूतेषुसंततः। एकोभूतानिचादत्तेतस्मादेकात्मकानित्वितिवचनात् ३३ अशनसिद्ध यसिद्धयोरपिमद्भक्तिन्हासोनकर्तव्यइतिभावेना
ह अलब्ध्वेति देवस्यममतंत्रितंअधीनम् ३४ ननुतर्हिप्रयत्नोपितदर्थनकर्तव्यइतितत्राह आहारार्थमिति ननु नाहारंचिंतयेत्प्राज्ञइतिनिषेधःकथमत्राह युक्तमिति यावत्प्राणधारणार्थमपिचिंतनं
विहितत्वाद्युक्तम् नवाआजीविष्यामिमानखादन्निति श्रुतेः अशनालाभेदेहस्यप्राणवियोगस्तेनदेहस्यपंचत्वंरागादीनांस्वस्वकारणसंपत्तिस्तत्रपुरुषार्थोपयोपयोगितत्त्वविमर्शोनसंभाव्यतेऽतःपुरुषा

नोद्विजेतजनाद्धीरोजनंचोद्वेजयेन्नतु ॥ अतिवादांस्तितिक्षेतनावमन्येतकंचन ३१ देहमुद्दिश्यपशुवद्वैरंकुर्यान्नकेनचित् ३२ एकएवपरोह्यात्माभूतेष्वा
त्मन्यवस्थितः ॥ खंयद्वदुदपात्रेषुभूतान्येकात्मकानिच ३३ अलब्ध्वानविषीदेतकालेकालेऽशनंक्वचित् ॥ लब्ध्वानहृष्येद्धृतिमानुभयंदेवतंत्रितम्
३४ आहारार्थंसमीहेतयुक्तंतत्प्राणधारणम् ॥ तत्त्वंविमृश्यतेतेनतद्विज्ञायविमुच्यते ३५ यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठमुतापरम् ॥ तथावासस्तथाश
य्यांप्राप्तंप्राप्तंभजेन्मुनिः ३६ शौचमाचमनंस्नानंनतुचोदनयाचरेत् ॥ अन्यांश्चनियमान्ज्ञानीयथाहंलीलयेश्वरः ३७ नहितस्यविकल्पाख्यांक्रियामद्वीक्ष
याहता ॥ आदेहांतंक्वचित्ख्यातिस्ततःसंपद्यतेमया ३८ दुःखोदर्केषुकामेषुजातनिर्वेदआत्मवान् ॥ अजिज्ञासितमद्धर्मोगुरुंमुनिमुपाव्रजेत् ३९ तावत्प
रिचरेद्भक्तःश्रद्धावाननसूयकः ॥ यावद्ब्रह्मविजानीयान्मामेवगुरुमादृतः ४०

र्थानुदयोतोदेहयात्रार्थमशनचिंतनमावश्यकमित्याशयेनाह तत्त्वमिति तेनदेहेनतत्त्वंविमृश्यते तत्तत्त्वं ३५ फलितमाह यदृच्छयेति ३६ शौचादिकर्माणिस्वभावतएवकुर्यान्नतुविधिचकित
त्वेनेत्याशयेनाह शौचमिति ज्ञानीयतिः स्वभावतोधर्मपरोनविधेश्चकितश्चरेत्। अल्पंफलंहिचाकितेस्वभावेफलमुत्तममितिवचनात् ३७ अत्रहेतुमाह नहीति तस्यज्ञानिनोविकल्पाख्याश्रौतस्मार्तविरु
द्धकल्पनाख्याक्रियान हियस्मादतोज्ञानीविधिंविहायस्वतएवश्रौतादिक्रियांकुर्यादित्यन्वयः ज्ञानिनोपियावद्देहंनिषिद्धेपिमनोगमनात्कथंनास्तीत्यत्राह मद्वीक्षयेतिआदेहांतंप्रारब्धकर्मनिबद्धदेहपातप
र्यंतं ज्ञानिनोपिक्वचिन्निषिद्धविषयेख्यातिर्मनोगतिलक्षणप्रतीतिःस्यात्सापिमद्वीक्षयाज्ञानप्रपन्नमत्कटाक्षनिरीक्षणेनहतास्वभक्तिमुद्बोधयितुमसमर्थःस्यादितिशेषः ततःप्रारब्धकर्ममूलदेहपातादनंतरं
ममासंपद्यतेमत्प्रसादेनाविर्भूतस्वरूपानंदोभवतीत्यर्थः निषिद्धंमनसाकल्प्यमितीविहितमाचरेत्। अज्ञोज्ञस्यतुसंकल्पःस्वभावाद्विहितानुगः। शरीरधर्मिणःक्वापिनिषिद्धेपिमनोव्रजेत्। तथापितस्यनानर्थो
मोक्षनैवान्यथाव्रजेदितिस्मृतेः ३८ एवंविधज्ञानप्राप्तावुपायमाह दुःखोदर्केष्विति उपाव्रजेदित्युपसर्गेणमुक्तिपर्यंतंगुरुनिकटेनिवासःकर्तव्यइतिज्ञायते ३९ शुश्रूषेत्सहितस्तावच्चावज्ज्ञानोदयो
गुरुं। ततःपरंचशूश्रेष्वथातस्यप्रियंभवेदितिस्मृत्यर्थंस्पष्टमाह तावदिति यावद्ब्रह्ममांविजानीयात्तावद्गुरुमेवपरिचरेदित्यन्वयः आदृतइत्यनेनज्ञानोदयानंतरमपिगुरुशुश्रूषाकर्तव्येतिज्ञायते ४०

वेषमात्रधारिणोयतयःपूज्याइत्यस्मिन्पक्षेबाधकमित्याह यास्त्वाति प्रचंडेंद्रियाणांसारथिर्मनोयस्यसतथा त्रिदंडंत्रिवेणुलक्षणम् ४१ सुरानात्मस्थंस्वांतर्यामिणमात्मानंप्रेष्टंमांचनिह्नुतेनिराकरोति सोस्माल्लोकादमुष्मात्स्वर्गादेश्चविहीयतेअधःपततीत्यर्थः ४२ यत्यादीनांविशेषतःकर्तव्यधर्ममाह भिक्षोरिति यतेःशमार्हिंसेधर्मौ वानप्रस्थानांतपईक्षाआलोचनंचधर्मः गृहस्थानामन्नादिनाप्राणिरक्षेज्यायागश्च द्विजस्यब्रह्मचारिणः आचार्यसेवनंगुरुकुलवासः ४३ गृहस्थस्याग्रतःआदौगंतुरवगंतुस्तत्त्वादेरितिशेषः ४४ एतैर्धर्मैःसाध्यमाह इतीति ४५ मत्प्राप्तौभक्तिरेवप्रयोजिकेत्याह भक्त्येति ४६ स्वविहितधर्मेणनिर्णिक्तंधौतंसत्वमंतःकरणंयस्यसतथानिर्णीतत्वेनज्ञातमद्गतिः ४७ भक्तिरेवममपरमप्रीतिसाधनं वर्णादिविहितधर्मोपिभक्तिसंवलितएवेतिभावेनाह वर्णेति ४८ उपसंहरति एतादृशेति चशब्दएवार्थेयथामांसमियात्तथैवाभिहितम् ४९ ॥ इतिश्रीभा० म० एकादश० वि० टीकायामष्टादशोध्यायः ॥ १८ ॥ हरेःप्रसादजनकंज्ञानमेवतस्यभक्तिस्तस्याःयमादयःकृष्णोब्रह्मेतियच्चज्ञानंतत्सर्वमस्मिन्नध्यायेनिरूप्यते तत्रप्रथमतःउत्पद्यमानंतदेवंविधंप्रसादसंपादकमितिभावेनवक्ति योविद्योति योविद्यायाः वेदांतादिलक्षणायाःश्रुतेनश्रवणेनसंपन्नउत्पन्नज्ञानआनुमानि

यस्त्वसंयतषड्वर्गःप्रचंडेंद्रियसारथिः ॥ ज्ञानवैराग्यरहितस्त्रिदंडमुपजीवति ४१ सुरानात्मानमात्मस्थंनिह्नुतेमांचधर्महा ॥ अविपक्वकषायोस्माद
मुष्माच्चविहीयते ४२ भिक्षोर्धर्मःशमोहिंसातपईक्षावनौकसः ॥ गृहिणोभूतरक्षेज्याद्विजस्याचार्यसेवनम् ४३ ब्रह्मचर्यतपःशौचंसंतोषोभूतसौहृदम् ॥
गृहस्थस्याग्रतोगंतुःसर्वेषांमदुपासनम् ४४ इतिमांयःस्वधर्मेणभजेन्नित्यमनन्यभाक् ॥ सर्वभूतेषुमद्भावोमद्वींक्तिंविंदतेचिरात् ४५ भक्त्योद्धवानपा
यिन्यासर्वलोकमहेश्वरम् ॥ सर्वोत्पत्त्यप्ययंब्रह्मकारणंमोषयातिसः ४६ इतिस्वधर्मनिर्णिक्तसत्वोनिर्ज्ञातमद्गतिः ॥ ज्ञानविज्ञानसंपन्नोविरक्तःसमुपैति
माम् ४७ वर्णाश्रमवतांधर्मएषआचारलक्षणः ॥ सएवमद्भक्तियुतोनिःश्रेयसकरःपरः ४८ एतत्तेभिहितंसाधोभवान् पृच्छतियच्चमाम् ॥ यथास्वधर्म
संयुक्तोभक्तोमांसमियात्परम् ४९ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेवर्णाश्रमविभागयोगोनामअष्टादशोध्यायः ॥ १८ ॥ श्रीभगवानुवाच ॥
योविद्याश्रुतसंपन्नआत्मवानानुमानिकः ॥ मायामात्रमिदंज्ञात्वाज्ञानंचमयिसंन्यसेत् १ ज्ञानिनस्त्वहमेवेष्टःस्वार्थोहेतुश्चसंमतः ॥ स्वर्गश्चैवापवर्गश्चना
न्योर्थोमद्गतेप्रियः २ ज्ञानविज्ञानसंबद्धाःपदंश्रेष्ठंविदुर्मम ॥ ज्ञानीप्रियतमोतोमेज्ञानेनासौबिभर्तिमाम् ३ तपस्तीर्थंजपोदानंपवित्राणीतराणिच ॥
नालंकुर्वंतितांशुद्धिंयाज्ञानकलयाकृता ४

कडपक्रमादियुक्त्यानिर्धूतसंशयविपर्ययश्चआत्मवान्ममात्मास्वामीहरीरितिनिश्चितहरितत्त्वोमामपरोक्षीकृत्यमद्भिन्नमिदंजगत्मायामात्रंमदिच्छोद्भोधितोपादानप्रकृतिनिर्मितत्वात्तन्मात्रंज्ञात्वातज्ज्ञानंचममेदंज्ञानंहरिपूजालक्षणंतत्प्रसादेनोत्पन्नंतदधीनंचेति मयिसंन्यसेत्सम्यगर्पयेदित्यन्वयः त्रिगुणाप्रकृतिर्मायापश्येत्तन्मात्रकंजगत् निर्मिमीतेजगत्सर्वमतोमायेतिसास्मृता इतिवचनात् इदंज्ञानंहरेःपूजाहरेरेवोदितंसदा । हर्यधीनंचसर्वंत्रेत्येवंन्यासोहरौस्मृतइतिवचनात् उक्तप्रकारएवहरौज्ञानन्यासोनप्रकारांतरः १ कस्मात्त्वयिज्ञानसंन्यासइत्यतस्तन्निमित्तमाह ज्ञानिनइति तुशब्दस्तारतम्यद्योतकःस्वस्यार्थआनंदलक्षणोयस्मात्सतथाहेतुर्ज्ञानोत्पादकःसंमतोज्ञातःइतोपीत्याहस्वर्गश्चेति २ स्वार्थप्राप्तिप्रकारमाह ज्ञानेति विदुर्लभंते निगमयति ज्ञानीति प्रियतमत्वेनिमित्तमाह ज्ञानेनेति ३ तपआदिनोभयशुद्धिमतस्तवप्रियत्वेनज्ञानंविशेष्यकिंस्तौषीतितत्राह तपइति याशुद्धिर्ज्ञानलेशेनकृतातांशुद्धिंतपआदीनिअलंसम्यकनकुर्वंतीत्यन्वयः ४

यतःसर्वश्रेयःप्राप्तौज्ञानस्योत्तमसाधनत्वमतःत्वयापीदमेवसंपादनीयमित्याह ज्ञानेति स्वात्मानंपरमात्मानं तंवाएतमात्मानंवेदयतिस्वात्मातश्रुतः ५ कस्यदहष्टफलयत्नावश्रम्यभजनायस्यादत्राह ज्ञानाते आत्मनिहृदये समीचीनासिद्धिर्मुक्तिर्यस्मात्सतथातं ६ ननुतवापिदेहित्वेनजन्मादिनादुःखादिसंभवात्कथंत्वत्प्राप्तिर्मुक्तिःस्यादित्याशंक्यस्वतश्चिदानंदरूपस्यतवजन्मादिर्नास्ति सदेहस्यैव ममतु साद्यश्चवेहएवनास्तिनिर्गुणत्वात्कुतोजन्मादिःअतोनित्यनिर्दुःखानंदानुभवस्यममप्राप्तिरेवमुक्तिरितिभावेनाह त्वयीति हेउद्धवयस्त्रिविधोजन्मस्थितिसंहारलक्षणोविकारस्त्वय्याश्रयतिसंप्रतिवर्ततेस मायानिर्मितोनतुस्वाभाविकः अन्यस्थंनिर्मितंजीवेजन्मादिहरिणापतः । तस्मान्मायेतितत्प्राहुमायानिर्माणमुच्यते । नहिजीवस्यजन्मादिःस्वतोनित्यस्यसंभवेत् । सृष्टेःप्राक्प्रलयेचैवयतोजन्मादि नास्यहि । तस्मान्मध्येपिनास्यास्तिदेहादिस्थंतुविष्णुना। कर्मभिर्निर्मितंजीवेप्रलयेयन्नजीवगं । यन्नविद्येतहिलयेयन्नविद्येतमुक्तिगे । जीवस्यनस्वभावोसौप्रायेणोर्तिविनाश्रितमितिप्रकाशिकायां किंच मा येत्युक्तंनिर्मितंतुपद्मोजन्मादिनिर्मितं । देहादिकंपरेशेनमायाजन्मादितेनात्वित्यस्माच्च अतर्कितोपपन्नवदागतत्वान्नस्वाभाविकइत्याह अंतरेति योजन्मादिरंतरासृष्टिकालेआपतातिकर्मवशादागच्छति आद्यपवर्गयोर्नप्रलयमुक्त्योर्नविद्यते । यन्नविद्येतविलयेयन्नविद्येतमुक्तिगे । जीवस्यनस्वभावोसावित्युक्तत्वाच्च उक्तोर्थोयंतवाप्यनुभवसिद्धइत्याशयेनाह जन्मादयइति तस्यपरिणामरूपस्यदेहस्यदृश्यम।

ज्ञानविज्ञानसहितंज्ञात्वास्वात्मानमुद्धव ॥ ज्ञानविज्ञानसंपन्नोभजमांभक्तिभावितः ५ ज्ञानविज्ञानयज्ञेनमामिष्ट्वात्मानमात्मनि ॥ सर्वयज्ञपतिंमांवैसं सिद्धिंमुनयोन्वगुः ६ त्वय्युद्धवाश्रयतियस्त्रिविधोविकारोमायांतरापततिनाद्यपवर्गयोर्यः ॥ जन्मादयोस्यवदमांतवतस्यकिंस्युराद्यंतयोर्यदसतोस्तित देवमध्ये ७॥ उद्धवउवाच॥ ज्ञानंविशुद्धंविपुलंयतैद्वैराग्यविज्ञानयुतंपुराणम् ॥ आख्याहिविश्वेश्वरविश्वमूर्तेत्वद्भक्तियोगंचमहद्विमृग्यम् ८ तापत्र येणाभिहतस्यघोरेसंतप्यमानस्यभवाध्वनीश ॥ पश्यामिनान्यच्छरणंतवांघ्रिद्वंद्वातपत्रादमृताभिवर्षात् ९ दष्टंजनंसंपतितंबिलेस्मिन्कालाहिनाक्षुद्रसु खोरुतर्षम् ॥ समुद्धरैनंकृपयापवर्ग्यैर्वचोभिरासिंचमहानुभाव १० श्रीभगवानुवाच ॥ इत्थमेतत्पुराराजाभीष्मंधर्मभृतांवरम् ॥ अजातशत्रुःपप्रच्छस र्वेषामनुशृण्वताम् ११ निवृत्तेभारतेयुद्धेसुहृन्निधनविह्वलः ॥ श्रुत्वाधर्मान्बहून्भीष्मंमोक्षधर्मानपृच्छत १२ तानहंतेभिधास्यामिदेवव्रतमुखाच्छ्रुतान् ॥ ज्ञानविज्ञानवैराग्यश्रद्धाभक्त्युपबृंहितान् १३ नवैकादशपंचत्रीन्भावान्भूतेषुयेनवै ॥ ईक्षेताथैकमप्येषुतज्ज्ञानंममनिश्चितम् १४

नजन्मोदयोस्यचिदानंदस्वरूपस्यतवस्युः किंमांप्रतिवद बलमानंदओजश्चसहोज्ञानमनाकुलइत्यादेः उपसंहरति आद्यंतयोरिति । असतइतिहेतुगर्भविशेषणं अस्वतंत्रत्वादवस्तुनोजगतःआद्यंतयोः प्रलयेमुक्तौचयज्जीवस्यास्तिचिदानंदस्वरूपंतदेवमध्येसृष्टिकालेपिस्वरूपंतस्मादाभिमानिकःसंसारोमदपरोक्षज्ञानेननिवर्ततइतिभावः । ज्ञानिनोमनुष्योहंइत्यनुभवतःसुखैकरूपामुक्तिःकथंसेत्स्यति अन्यस्यअन्यादृशत्वानुपपत्तेरित्याशंक्यकालत्रयेपिजीवस्यैकरूपत्वेनाभिमानिकआगंतुकःसंसारोमत्प्रसादेननिवर्ततेइत्यतोवाह त्वयीति । आद्यंतयोरनुगमादाद्यंतरचितस्यतु । आद्यंतेभाविनोम ध्येकथमन्यादृशंवपुरित्यतःसिद्धं किंच अनित्यत्वात्तुदेहस्यतस्यजन्मादिकंभवेत् । मुक्तिप्रलयसंबंधेकथंजीवेतादिष्यतेइति अनित्यस्यगुणामध्येभवेयुःस्वतएवतु । नतुस्वतस्तुनित्यस्यकादाचित्कगुणैर्यु तमिति ७ एतत्ज्ञानं यथास्थितंतथाख्याहि ८ ९ १० ११ १२ ज्ञानंदृष्टंतस्यउत्तरत्वेनधर्माणांकथनंकथंसंगच्छतइत्यतउक्तं ज्ञानेति १३ येनज्ञानेनभूतेषुजीवेषुस्थितान्नवैकादशपंचत्रीन्भावान् अष्टाविंशत्तत्त्वान्यन्वीक्षिततल्लक्षणंतत्तच्छक्तिस्वरूपपूर्वकंपश्यतिएषुतत्त्वेषुतन्नियामकतयास्थितमेकंतत्त्वेभ्यःप्रधानंतत्रतत्त्वपतिंहरिमपिपश्यति । तन्ममनिश्चितंज्ञानमपिपृथिव्यादिपंचभूतबुद्ध्यहंका रचित्तमूलप्रकृतयोनव मनसासहश्रोत्रादीद्रियाण्येकादश त्रयःसत्त्वादयोगुणाःशब्दादयःपंच ज्ञात्वातत्त्वानितेष्वीशंसर्वतत्त्वेश्वरंप्रभुं जाननूज्ञानीभवेत्–इति ॥१४॥

नन्विदंज्ञानंचेद्विज्ञानंतर्हिकिंतत्राह एतदेवेति हिशब्दोविशेषद्योतकः स्वस्ययद्विश्रेषतोयोग्यंज्ञानंतद्विषयस्यबिंबस्यज्ञानेनसहितमेतदेवज्ञानंविज्ञानंविद्धीतिशेषः स्वस्ययोग्यंज्ञानंविशेषतः पूर्वोक्तमेवयोजानन्सविज्ञानीभवत्युतेतिवचनमत्रमानं तस्यापितत्वेशविषयत्वात्कथंविज्ञानंनेतितत्राह नतथेति यद्यपितत्तत्वंतदीश्वरविषयंतथापितथैवपूर्वोक्तप्रकारेणतत्वान्निज्ञात्वासर्वतत्वेश्वरंविषयीकुर्वन्ज्ञानंविज्ञानंनभवति स्वयोग्यपुरुषार्थासाधनत्वात्तस्मात्स्वबिंबज्ञानविशिष्टमेवविज्ञानमित्यर्थः हरेस्तत्वेष्वेकत्वात्प्राधान्यंकुतइत्यतआह एकेनेति नोस्माकंतत्वानांमध्येएकेनान्यनिरपेक्षेणतत्वेनयद्यत्रास्थित्वा यदाधारत्वेनात्रिगुणात्मनांसत्वादिगुणनिर्मितदेहानांभावानांस्थित्युत्पत्त्यप्ययाःस्युः १५ यच्चतत्वमादावंतेसृष्टेःप्राक्प्रलयादूर्ध्वमध्येस्थितिकालेचसर्वज्ञं पुनस्तत्प्रतिसंक्रामतेस्यसृष्टस्यसहारचेसृज्यजंगदन्वयात्प्रविशति यच्चशिष्यतेअवशिष्टमविनाशितदेवसत्स्वतंत्रं सत्वंस्वातंत्र्यमुद्दिष्टंतच्चकृष्णेनचापरे । अस्वातंत्र्यात्तदन्येषामसत्त्वंविद्धिभारतेतिवचनाद्धिरिरेवतत्वेषुप्रधानंतत्वमितिभावः १६ अत्रकिं प्रमाणमितितत्राह श्रुतिरिति नैकमेवोक्तार्थेसर्वोत्तमत्वेहरेःप्रमाणमपितुश्रुत्यादिचतुष्टयमपि ऐतिह्यमागमभेदः प्रयोजनमाह प्रमाणेष्विति एवंवेदादिप्रमाणैर्विदिताशेषतत्वतदीशविशेषतयाज्ञानविज्ञानसंपन्नःपुरुषोविकल्पाद्धिरुद्धकल्पनाज्जीवस्वातंत्र्यज्ञानादिलक्षणाद्विरज्यतेविरक्तोभवति मिथ्याज्ञानरहितोभवतीत्यर्थःसोपिप्रामाणिकश्चेत्कथामीसतउक्तं प्रमाणेष्विति श्रुत्यादिप्रमाणेषुअन्यप्राधान्यस्या

एतदेवहिविज्ञानंनतथैकेनयेनयत् ॥ स्थित्युत्पत्त्यप्ययानस्युर्भावानांत्रिगुणात्मनाम् १५ आदावंतेचमध्येचयच्चसृज्यंयदन्वयात् ॥ पुनस्तत्प्रतिसंक्रामेयच्छिष्येततदेवसत् १६ श्रुतिःप्रत्यक्षमैतिह्यमनुमानंचतुष्टयम् ॥ प्रमाणेष्वनवस्थानाद्विकल्पात्सविरज्यते १७ कर्मणांफलरूपत्वादाविरिंचादमंगलम् ॥ विपश्चिन्नश्वरंपश्येददृष्टमपिदृष्टवत् १८ भक्तियोगःपुरैवोक्तःप्रीयमाणायतेऽनघ ॥ पुनश्चकथयिष्यामिमद्भक्तेःकारणंपरम् १९ श्रद्धामृतकथायांमेशश्वन्मदनुकीर्तनम् ॥ परिनिष्ठाचपूजायांस्तुतिभिःस्तवनंमम २० आदरःपरिचर्यायांसर्वांगैरभिवंदनम् ॥ मद्भक्तपूजाभ्यधिकासर्वभूतेषुमन्मतिः २१ मदर्थेष्वंगचेष्टाचवचसामद्गुणेरणम् ॥ मय्यर्पणंचमनसःसर्वकामविवर्जनम् २२ मदर्थेचपरित्यागोभोगस्यचसुखस्यच ॥ इष्टंदत्तंहुतंभुक्तंमदर्थंयद्व्रतंतपः २३ एवंधर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम् ॥ मयिसंजायतेभक्तिःकोन्योर्थोस्यावशिष्यते २४ यदामय्यर्पितंचित्तंशांतंसत्वोपबृंहितम् ॥ धर्मंज्ञानंसवैराग्यमैश्वर्यंचाभिपद्यते २५ यद्यर्पितंतद्विकल्पइंद्रियैःपरिधावति ॥ रजस्वलमसन्निष्ठंचित्तंविद्धिविपर्ययम् २६

नवस्थानात्तात्पर्यार्थज्ञानेस्थित्यभावात्चोरवत्पलायमानत्वादित्यर्थः प्रमाणानांनानैवप्रतीयमानानांतात्पर्यार्थापरिज्ञानतःउत्पन्नाद्वा १७ वैराग्यंविशिनष्टि कर्मणामिति आविरिंचान्मनुष्यमारभ्याविरिंचपर्यंतंजगत्अमंगलंअसारंअतएवनश्वरंपश्येत् अदृष्टंस्वर्गादिकमपिदृष्टवत्गृहादिवत्पश्येत् कर्मणांफलरूपत्वात्१८विरक्तोमयिभक्तिंकुर्यादितिभावेनाह भक्तियोगइति १९ निरतिशयभक्त्युत्पत्तौकारणं वक्तिश्रद्धेति अमृतवज्जरामरणहारिण्यांहरिकथायांपरिनिष्ठाआस्थाअत्यापद्यपिनेमंनियमंमुंचामीतिनिश्चयः २० अभिवंदनंप्रणामः मन्मतिःसन्निहितइतिमत्स्मरणं २१ मदर्थेषुअहमेवार्थोयेषांतेतथातेषुपरमभागवतेषुअंगचेष्टाशरीरावयवैःनृत्यलक्षणचेष्टा २२ मदर्थेमत्प्रीत्यर्थं २३ निधौस्वहस्तप्राप्तेकारणंवराटकेनकिमित्याह कोन्यइति अस्यपुरुषस्य २४ यदासत्वगुणेनोपबृंहितंसंबंधितंअतएवशांतंचित्तंमय्यर्पितंभवतितदाधर्मादिकमाप्नोतीत्यनेनधर्माद्यर्थोविशिष्टोस्तीत्येतत्परिहृतम् २५ विपक्षेबाधकमाह यदीति यदिताचित्तंविकल्पोर्पितमिंद्रियैरापिनिंदितेषुविषयेषुधावति तर्हितच्चित्तंरजस्वलंरजोदूषितंराजसमसन्निष्ठंतामसंचविपर्ययंदुःखकारणंचविद्धि २६

धर्मादिकमभिपद्यतइत्युक्तंतद्विशिनष्टि धर्मइति ऐकात्म्यदर्शनमित्येतत् एकःप्रधानउद्दिष्टोविष्णोःप्राधान्यदर्शनं । ऐकात्म्यदर्शनंप्रोक्तंसर्वज्ञानोत्तमंचतदित्यननव्याख्यातम् २७ तत्रतत्रभक्तिसाधनानि यमादयःकथ्यंते तत्स्वरूपविवित्सयातत्रोद्धवःपृच्छति यमइत्यादिना २८ २९ श्रीमत्त्वर्कंकिंस्वित् ३० ३१ ३२ विपरीतमुक्तेभ्योन्यदोषः ३३ ३४ ३५ दुहंतिफलानीतिशेषः ३६ ३७ दंड न्यासःअशास्त्रविहितदंडत्यागः दंडत्यागइतिवापाठः स्वभावविजयःस्वमनोजयः समदर्शनंयथावस्तुदर्शनम् ३८ कर्मस्वसंगःनाहंकर्तेति ३९ इष्टंधनंधर्मःभगवत्तमोहं यज्ञःयज्ञेनइज्यइत्यर्थः ज्ञानसंदेशःज्ञानोपदेशःदक्षिणा ४० ऐश्वरोभावोममेश्वरत्वभावनंभगः आत्मनिभिदाबोधःसर्वतःविलक्षणोहरिरितिज्ञानंविद्या ४१ दुःखात्ययात्सुखंमोक्षलक्षणंसुखं कामानांविषयाणांसुखापेक्षादुःखं ४२ दे

धर्मोमद्भक्तिकृत्प्रोक्तोज्ञानंचैकात्म्यदर्शनम् ॥ गुणेष्वसंगोवैराग्यमैश्वर्यंचाणिमादयः २७ ॥ उद्धवउवाच ॥ यमःकतिविधःप्रोक्तोनियमोवारिकर्शन ॥ कः शमःकोदमःकृष्णकातितिक्षाधृतिःप्रभो २८ किंदानंकिंतपःशौर्यंकिंसत्यंकमलेक्षण ॥ किमन्नंवृष्निजननंकिंचशौचंजनार्दन २९ कस्त्यागःकिंधनंश्रेष्ठं कोयज्ञःकाचदक्षिणा ॥ पुंसःकिंस्विद्बलंश्रीमद्गोलाभश्चकेशव ३० काविद्याह्रीःपराकाश्रीःकिंसुखंदुःखमेवच ॥ कःपंडितःकश्चमूर्खःकःपंथाउत्पथश्चकः ३१ कःस्वर्गोनरकःकस्त्विकोबंधुरुतकिंगृहम् ॥ कआढ्यःकोदरिद्रोवाकृपणःकःकईश्वरः ३२ एतान्प्रश्नान्ममब्रूहिविपरीतंचसत्पते ॥ ३३ ॥ श्रीभगवानुवाच ॥ अहिंसासत्यमस्तेयमसंगोह्रीरसंचयः ॥ आस्तिक्यंब्रह्मचर्यंचमौनंस्थैर्यंक्षमाभयम् ३४ शौचंजपस्तपोहोमःश्रद्धातिथ्यंमदर्चनम् तीर्थाटनंपरार्थेहातुष्टिराचार्यसेवनम् ३५ एतेयमाःसनियमाउभयोर्द्वादशस्मृताः ॥ पुंसामुपासितास्तातयथाकामंदुहंतिहि ३६ शमोमन्निष्ठताबुद्धेर्दमइंद्रियसंयमः ॥ तितिक्षादुःखसंमर्दोजिह्वोपस्थजयोधृतिः ३७ दंडन्यासःपरंदानंकामत्यागस्तपःस्मृतम् ॥ स्वभावविजयःशौर्यंसत्त्वंचसमदर्शनम् ३८ ऋतंचसूनृतावाणीकविभिःपरिकीर्तिता ॥ कर्मस्वसंगमःशौचंत्यागःसंन्यासउच्यते ३९ धर्मइष्टंधनंनृणांयज्ञोहंभगवत्तमः ॥ दक्षिणाज्ञानसंदेशः प्राणायामःपरंबलम् ४० भगोमऐश्वरोभावोलाभोमद्भक्तिरुत्तमः ॥ विद्यात्मनिभिदाबोधोजुगुप्साह्रीर्विकर्मसु ४१ श्रीर्गुणानैरपेक्षाद्याःसुखंदुःखात्ययात्सुखम् ॥ दुःखंकामसुखापेक्षापंडितोबंधमोक्षवित् ४२ मूर्खोदेहाद्यहंबुद्धिःपंथामन्निगमःस्मृतः ॥ उत्पथश्चित्तविक्षेपःस्वर्गःसत्वगुणोदयः ४३ नरकस्तमउन्नाहोबंधुर्गुरुरहंसखे ॥ गृहंशरीरंमानुष्यंगुणाढ्योह्याढ्यउच्यते ४४ दरिद्रोयस्त्वसंतुष्टःकृपणोयोजितेंद्रियः ॥ गुणेष्वसक्तधीरीशोगुणसंगी विपर्ययः ४५

हादावहंबुद्धिर्यस्यसतथा मन्निगमःमद्विषयोवेदः । सत्वगुणोदयःसत्वगुणाभिवृद्धिःस्वर्गः ४३ तमउन्नाहःअज्ञानोन्नतिःनरकः । भक्त्यादिगुणाढ्यः ४४ असंतुष्टोविषयासंतोषवान्दरिद्रः । विषये दोषबुद्धिःसन्निंद्रियाणांवशेस्थितः । कृपणःसतुसंप्रोक्तोगुणबुद्धिविपर्ययइति । गुणेषुविषयेषुअसक्तधीःस्ववशःईश्वरःगुणसंगी सर्वविषयसंगी विपर्ययोविपरीतःज्ञेयः । पुरुषार्थमतिर्यस्यविषयेष्व पिदेहिनः । विपरीतःसतुज्ञेयःस्वात्मनोविपरीतगइतिवचनात् वित्तासंतोषमात्राद्दरिद्रः सर्वविषयसंगीविपरीतः ४५

निरूपिताःपरिहृताःशास्त्रतात्पर्यार्थैकथयति किंवर्णितेनेति गुणदोषयोर्लक्षणमुद्दिश्यबहुनावर्णितेनकिं विहितकरणाद्गुणःनिषिद्धकरणाद्दोषःइतिगुणदोषदृष्टिर्दोषःभगवत्प्रियत्वाप्रियत्वमंतरेणेतिशेषःउभयवर्जनंगुणःउभयोर्गुणदोषयोर्भेददर्शनस्यागोगुणइत्यर्थः अत्रहरेर्यत्प्रियंसगुणः यदप्रियंसदोषः इतिसतांमतमितितात्पर्यं यद्वा बहुनावर्णितेनकिंगुणदोषयोर्लक्षणंस्वरूपंदुर्ज्ञानमितिशेषः कथमत्राह गुणेति गुणदोषयोरन्योन्यदृष्टिर्दोषःउभयवर्जनंगुणःअत्रापिहरिप्रियत्वादिप्रयोजनमिति ४६ ४७ इतिश्रीभा०म०एकादशस्कंधे०वि०टी०एकोनविंशोध्यायः ॥१९॥ अधिकारिणामनेकविधत्वेनसाधनानामपितथात्वात्केषांचिदंतर्भावविवक्षयाकर्मयोगादिभेदेनत्रिधाविभज्यतत्स्वरूपंकथयत्यस्मिन्नध्याये । तत्रभगवत्प्रियएवगुणस्तदप्रियोदोषइतिभगवदभिप्रायज्ञोप्युद्धवोविविच्यज्ञापनायपृच्छति विधिश्चेत्यादिना । हेअरविंदाक्ष ईश्वरस्यतेतवविधिश्चप्रतिषेधश्चविधिनिषेधलक्षणोनिगमोवेदः कर्मणांगुणंदोषंवापेक्षते विहितकरणाद्गुणोनिषिद्धकरणाद्दोषइतिवक्तीत्यर्थः १ तदधिकारापादकवर्णाश्रमाणांविकल्पंभेदंचप्रतिलोमजोनधिकार्यनुलोमजोधिकारीतिप्रतिलोमानुलोमजंच अत्रापिविशिष्टमातापितृजातोविशिष्टाधिकारीतिच धर्मार्जितंद्रव्यं कुरुक्षेत्रादिदेशं जातःपुत्रःकृष्णकेशइत्यादिलक्षणंवयश्चवसंतादिकालंचोतिद्रव्यदेशवयःकालाःतथापुण्यफलंस्वर्गंपापफलंनरकंचापेक्षतइतिसर्वत्रयोज्यम् २ संशयबीजमुत्थापयति गुणेति । तववचस्तुगुणदोषभिदादृष्टिमंतरेणवर्तते विहितप्रतिषिद्धकर्मणांगुणदोषभेददर्शनंविहायगुणदोषयोर्भेदोनास्तीत्येवंविधं तत्रनिषेधविधिलक्षणंविहितनिषिद्धकरणहेतुगुणदोषभेददार्शिवेदवचनंकथंतुनिःश्रेयसंपुरुषार्थपर्यवसायिस्या

एतेऽद्धवतेप्रश्नाःसर्वेसाधुनिरूपिताः ॥ किंवर्णितेनबहुनालक्षणंगुणदोषयोः ४६ गुणदोषदृशिर्दोषोगुणस्तूभयवर्जनम् ॥ ४७ ॥ इतिश्रीभागवतेएकादशस्कंधेएकोनविंशोध्यायः ॥ १९ ॥ उद्धवउवाच ॥ विधिश्चप्रतिषेधश्चनिगमोहीश्वरस्यते ॥ अपेक्षतेऽरविंदाक्षगुणदोषंचकर्मणाम् १ वर्णाश्रमविकल्पंचप्रतिलोमानुलोमजम् ॥ द्रव्यदेशवयःकालान्स्वर्गंनरकमेवच २ गुणदोषभिदादृष्टिर्निमंतरेणवचस्तव ॥ निःश्रेयसंकथंनुस्यान्निषेधविधिलक्षणम् ३ पितृदेवमनुष्याणांवेदश्चक्षुस्तवेश्वर ॥ श्रेयस्त्वनुपलब्धेर्थेसाध्यसाधनयोरपि ४ गुणदोषभिदादृष्टिर्नियमात्तेनहिस्वतः ॥ नियमेनापवादश्चभिदायाइतिहिभ्रमः ५ श्रीभगवानुवाच ॥ योगास्त्रयोमयाप्रोक्तानृणांश्रेयोविधित्सया ॥ ज्ञानंकर्मचभक्तिश्चनोपायोन्योस्तिकुत्रचित् ६

स् तदर्थमेवप्रवृत्तस्यतदनुचितम् २ कुतोत्राह पितृदेवेति । हेईश्वरतववेदोनुपलब्धेर्थेअप्रत्यक्षेश्वरधर्मादिविषये साध्येसुखादौसाधनेकर्मादावपिपित्रादीनांश्रेयश्चक्षुर्दिव्यमेवचक्षुरित्यन्वयः ४ लौकिकंपूर्वपक्षमुपसंहरति गुणेति । यतोवेदउत्तमंचक्षुस्तेनकारणेननियमाद्गुणदोषभेददृष्टिःस्वतोहिस्वाभाविक्येव ननुतर्हीत्थंनिश्चितवतस्तवकिमितिभ्रमइतितत्राह नियमेनेति । चशब्दएवार्थे भवताभिदायाःगुणदोषयोर्भेदस्यनियमेनैवापवादउच्यतेइतियस्मात्तस्मात्भ्रमःसंजातइत्यतोनिश्चयंभवंतंपृच्छामीतिभावः ५ स्वतःसर्वगुणात्मातुविष्णुरेकःसनातनः । अन्यत्सर्वंतत्प्रियत्वाद्गुणोदोषस्तथाप्रियम् एवंज्ञानवतांदृष्टिरज्ञस्तन्नावगच्छति । कालदेशविशेषेतुप्रीतिभेदमपेक्ष्यतु । अविज्ञातवतस्तस्यमर्यादावेदतःकृता । गुणदोषभिदानास्तिभगवत्प्रियमंतरा । गुणदोषदृशेर्दोषोह्यन्यत्रभगवत्प्रियात् । गुणायेदोषतामीयुर्दोषाश्चगुणतांक्वचित् । अतोदोषोनदोषःस्यान्नगुणोपिगुणोभवेत् । भगवत्प्रीतिविज्ञानाद्गुणदोषभिदांयदि । पश्येत्तत्तद्गुणायैवविपर्यासंनकारयेत् । गुणदोषाभिदाक्वापिस्वातंत्र्येणनहिक्वचित् । इत्यनेनास्यतात्पर्यार्थोविज्ञायते । यद्वा गुणदोषभिदादृष्टिर्नियमात्तेतवमतेस्वतोनहिप्रत्युतगुणदोषभिदायाःअपवादोपि अतोभ्रमइतिगुणदोषयोर्विहिताविहितकर्मानुष्ठानपरिनिष्ठितत्ववेदोवक्तीतियदवादित्तत्तात्पर्यार्थोनकिंतुमत्प्रियाप्रियविवेकाज्ञानपरिनिष्ठाविषयःस्वतस्तुगुणदोषत्वदृशेर्भेदेनवस्तुना । दोषोपिगुणएवस्याद्भगवत्प्रीतिनोगुणः । दोषस्तुतद्वैपरीत्यादितिदृष्ट्याभवेद्गुणः । कालदेशविशेषेणप्रीत्यज्ञानाज्जगत्स्थितेः । मर्यादागुणदोषाणांकृतावेदेषुसर्वशइत्येतदेव । स्वेस्वेधिकारेयानिष्ठासगुणःपरिकीर्तितः । विपर्ययस्तुदोषःस्यादुभयोरेषनिर्णयइत्यादिनावक्ष्यते । अतःविहि

ताद्यनुष्ठानपरिनिष्ठितत्वेनगुणदोषभेदनियमोक्तिर्मात्प्रयादिविवेकाज्ञानविषयेतिभावेनभगवानुद्धवप्रश्नंपरिहरन्योग्यत्वनक्रमेणकर्मयुक्तयुपायानाह यागाश्रयइति । यागाउपयोगिनोमथःसमयाश्रद्धा
तिगुणविशिष्टानां नृनयइतिधातोः तान्निर्दिशति ज्ञानमिति अन्ययोगव्यवच्छेदनेति नेति ६ तत्रज्ञानयोगाधिकारिणआह निर्विण्णानामिति इहकर्मसुनिर्विण्णानांन्यासिनांसनकादीनांइतिशेषः सन
काद्याज्ञानयोगाभक्तियोगाश्चदेवताः । मानुषाःकर्मयोगाश्चत्रिधैतेयोगिनःस्मृताः । सर्वेषांसर्वयोगैश्चप्राप्यामुक्तिर्नसंशयः । तथापितुविशेषेणसतेषामभिधीयतेइतिवचनमत्रमानं ज्ञानादिगुणानांत्रिषुसत्वे
पिसामान्यविशेषविवक्षयाविभागोयुज्यतेप्रमाणानांसत्त्वात् कर्मयोगाधिकारिणआह तेष्विति ज्ञानभक्तियोगिनोपेक्ष्यज्ञानभक्त्योरल्पत्वात्कर्मयोगिनइति ७ भक्तियोगाधिकारिणआह यदृच्छयेति
तुशब्दोविशेषंसूचयति यःपुमानिति जातावेकवचनं यदृच्छयास्वाद्दृष्टोद्बोधितभगवदिच्छयाजातश्रद्धामत्कथादौविशिष्टश्रद्धावंतःनिर्विण्णाःनित्योत्पन्नसंसारासारज्ञानत्वान्नकदाचित्कनिर्वेदाः नाति
सक्ताःनित्यसंपूर्णभोगत्वान्नकदाचित्कविषयाःनातिसक्तायेपुरुषाः अस्येत्येषांभक्तियोगोमुख्यभक्तित्वान्मुख्यासिद्धिरित्यन्वयः उक्तमेतल्लक्षणंदेवानामेवेतिदेवाएवभक्तियोगिनइत्यर्थः भगवद्गुणानुस्मर
णवेदार्थोनीयतेहियैः । भक्तियोगास्तुतेप्रोक्तास्तादशाहिसुराःसदा । अंगानुसारिवेदार्थज्ञात्वातदनुसारतः । भगवद्गुणायैर्नीयंतेतेप्रोक्ताज्ञानयोगिनः । कर्माणिशास्त्रतोज्ञात्वातत्प्राधान्यानुसारतः । विज्ञाता
यैर्गुणाविष्णोर्ज्ञेयास्तेकर्मयोगिनः । भक्तिर्ज्ञानंचकिंचित्तुपश्चात्तेष्वपिजायते । तथापिकर्मयोगास्तेकर्मपूर्वत्वकारणात् । भगवद्गुणानुरागित्वमधिकंभक्तियोगिनां । तस्मात्तेभ्यधिकाह्येतुदेवाएवविशेषतः।

**निर्विण्णानांज्ञानयोगोन्यासिनामिहकर्मसु ॥ तेष्वनिर्विण्णचित्तानांकर्मयोगस्तुकर्मिणाम् ७ यदृच्छयामत्कथादौजातश्रद्धस्तुयःपुमान् ॥ नानिर्वि
ण्णोनातिसक्तोभक्तियोगोस्यसिद्धिदः ८ तावत्कर्माणिकुर्वीतननिर्विद्येतयावता ॥ मत्कथाश्रवणादौवाश्रद्धायावन्नजायते ९ स्वधर्मस्थोयजन्यज्ञैरनाशीः
कामउद्धव ॥ नयातिस्वर्गनरकौयद्यन्यन्नसमाचरेत् १० अस्मिँल्लोकेवर्तमानःस्वधर्मस्थोनवःशुचिः ॥ ज्ञानंविशुद्धमाप्नोतिमद्भक्तिंवायदृच्छया ११ स्व
र्गिणोप्येतमिच्छंतिलोकंनिरयिणस्तथा ॥ साधकंज्ञानभक्तिभ्यामुभयंतदसाधकम् १२ ननरःस्वर्गतिंकांक्षेन्नारकींचविचक्षणः ॥ नेमंलोकंचकांक्षेतदेहा
वेशात्प्रमाद्यति १३**

ईषद्वैराग्यमल्पंतुपूर्वदेवेषुजायते । पश्चाद्विरागोप्यधिकोदेवानांनात्रसंशयः । ज्ञानाधिक्यंतुदेवानांभक्त्याधिक्यंतथैवच । विरागोभ्यधिकस्तेषांसदैवसनकादिनां। ज्ञानाधिक्यान्मनुष्येभ्योमण्यंतेज्ञानयो
गिनः।नतुज्ञानादिकास्तेवैदेवेभ्यस्तुकथंचन। देवानामधिकर्मित्वंविद्यतेयद्यपिस्फुटं। तथापिप्रत्यवायित्वान्मनुष्याःकर्मयोगिनः । त्रियोगाभ्यधिकोब्रह्मासर्वेभ्यःपरमोविभुः । महायोगेश्वरेशेशस्तस्माद्ब्रह्मा
चतुर्मुखइतिवचनात्समस्तंयुक्तम् ८ ज्ञानभक्तियोगिनामपिज्ञानभक्त्युदयात्पूर्वंज्ञानभक्तिसाधनत्वादंतःकरणशुद्धिद्वाराकर्मयोगःकर्तव्यतामर्हतीत्याह तावदिति देवादित्वयोग्यानांमनुष्याणांइदंज्ञातव्यं
यद्वा कर्मयोगिनमेवविशिनष्टि तावदिति ९ कर्मणांबंधकत्वेनज्ञानभक्तिद्वाराश्रेयःकारणत्वंकथमित्याशंकांपरिहरन्तत्करणप्रकारमाह स्वधर्मस्थइति ज्ञानयोगीनिराशीर्निष्कामःअन्यान्निषिद्धंनकरोति
चेत् १० विहितकर्मणास्वर्गादिकमप्राप्यंचेत्किंतर्हिलभ्यमत्राह अस्मिन्निति वाशब्दउपमानेसमुच्चयेवा यथाज्ञानमाप्नोतितथाभक्तियोगंमद्भक्तिंच कर्मयोगीचशुद्धज्ञानभक्ती ११ ज्ञानभक्तिसाधनत्वा
न्मनुष्यशरीरमुत्तममित्याह स्वर्गिणइति । लोकंदेहंनिरयिणःनारकाःज्ञानभक्तिभ्यांपुरुषार्थसाधकंतदुभयंस्वर्गनरकस्थशरीरंज्ञानभक्त्योरसाधकंफलरूपत्वात्तस्मान्मानुषमुत्तममित्यर्थः १२ बुभूषु
णानरकस्वर्गमनुष्यगतयःसदुःखत्वात्प्रमादहेतुत्वाच्चनाकांक्ष्याइत्याह ननरइति इमंमनुष्यलोकंदेहप्रवेशात्प्रमाद्यतिप्रमादवान्भवति १३

---

१ तथाचस्वसमानाधिकरणगुणानांमध्येज्ञानादीनामाधिक्यविवक्षयाज्ञानयोगित्वाद्युक्तिः ।

नन्वस्तुनिराकांक्षस्तदुत्तरंकार्यंकिमत्राह एवमिति । पुरोक्तप्रकारेणस्वर्गादीनांदुःखादिमत्त्वाद्विद्वानिदंमनुष्यशरीरंमर्त्यमप्यर्थसिद्धिदंज्ञात्वामृत्योरभावायसंसारस्योन्मूलनायघटेतेत्यन्वयः १४ किं चातइत्यत्राह छिद्यमानमिति । खैरिंद्रियैर्गच्छतिजानातिविषयानितिखगोजीवः कालावयवैस्त्रुटिलवादिलक्षणैश्छिद्यमानंस्वदेहंउत्सृज्यक्षेमंमोक्षंयाति अलंपटोविरक्तोज्ञानसामग्रीमान् कथमिव खे गच्छतीतिखगःपक्षीकलच्छेदनइतिधातोः कालावयवैःपरश्वधादिनिशितैश्छिद्यमानमात्मनाकृतनीडंवनस्पतिंविहायक्षेमंप्राप्तरक्षामिव अलंपटउत्पतनसमर्थःपटगताविति धातुः १५ उ क्तमेवविशदयति अहोरात्रैरिति परंपरमात्मानंसंसारादुपशाम्यति परंवृक्षांतरंउपगम्यशाम्यतिशांतदुःखोभवति निरीहःनिर्गतेहश्चेष्टः १६ मानुषत्वमवाप्यसंसारसमुद्रतरींस्वभक्तिमकु र्वतःपुंसोधःपातएवेत्याह नृदेहमिति । सुष्ठुकल्पंवृक्षवदभीष्टसाधनंध्रुवंसंसारनदीतरणतरीं गुरुरेवकर्णधारोयस्यसतथातं मयानुकूलेननभस्वतावायुनेरितंनृदेहंप्राप्यपुमान्भवाब्धेर्मध्यंनतरेत् समार्गणइतिलुप्तोपमा वेगाख्यसंस्कारनाशेशरवत्शरीरनाशेअधःपततीत्यन्वयः । मद्भक्तिगुणत्वाभावान्नरकभूमिंप्राप्नोतीत्यर्थः १७ उपास्तिप्रकारमाह यदेति वौपरमात्मनिरक्तोनुरक्तोतिस्नि ग्धोतएवसंयतेंद्रियोयोगीयदारंभेषुकर्मोपक्रमेषुनिर्विण्णोआत्मनोभ्यासेनपुनःपुनःप्रयत्नेनमनोचलंधारयेत् १८ शश्वद्विषयोपरक्तमनसोचलत्वेनधारणंदुष्करमपिप्रयत्नेनभाव्यमितिभावेनाह धार्यम.

एवंविद्वान्पुरामृत्योरभावायघटेतसः ॥ अप्रमत्तइदंज्ञात्वामर्त्यमप्यर्थसिद्धिदम् १४ छिद्यमानंकालावयवैःकृतनीडंवनस्पतिम् ॥ खगःस्वदेहमुत्सृज्य क्षेमंयातिह्यलंपटः १५ अहोरात्रैश्छिद्यमानंबुद्ध्वायुर्भयवेपथुः ॥ मुक्तसंगःपरंबुद्ध्वानिरीहउपशाम्यति १६ नृदेहमाद्यसुदुर्लभंयःध्रुवंसुकल्पंगुरुकर्ण धारम् ॥ मयानुकूलेननभस्वतेरितंपुमान्भवाब्धिनतरेत्समार्गणः १७ यदारंभेषुनिर्विण्णोविरक्तःसंयतेंद्रियः ॥ अभ्यासेनात्मनोयोगीधारयेदचलंमनः १८ धार्यमाणंमनोयर्हिभ्राम्यदाश्वनवस्थितम् ॥ अतंद्रितोनुरोधेनमार्गेणात्मवशंनयेत् १९ मनोगतिंनविसृजेज्जितप्राणोजितेंद्रियः ॥ सत्त्वसंपन्नयाबु द्ध्यामनआत्मवशंनयेत् २० एषवैपरमोयोगोमनसःसंग्रहःस्मृतः ॥ हृदयज्ञत्वमन्विच्छन्दमश्चैवेच्छतोमुहुः २१ सांख्येनसर्वभावानांप्रतिलोमानुलोमतः ॥ भवाप्ययावनुध्यायेन्मनोयावत्प्रसीदति २२ निर्विण्णस्यविरक्तस्यपुरुषस्यात्मवेदिनः ॥ मनस्त्यजतिदौरात्म्यंचिंतितस्यानुचिंतया २३

णमिति । यर्हियदाधार्यमाणमपि आशुविषयेषुभ्राम्यल्लक्ष्येनावस्थितंतदाप्यतंद्रितोनिरालस्योभूत्वानुरोधेनानुकूलेनमार्गेणमनआत्मवशंनयेदित्यन्वयः १९ दाढर्चार्थंपुनरुक्तमाह मनइति । अगतिं विरुद्धगतिंविषयगतिंप्रति नाभावान्यविरोधेष्वितियादवः सत्वगुणसंपन्नया २० सर्वस्मान्मनसःसंयमनंप्रधानमित्युपसंहरति एषइति अभ्यासेनतुकौंतेयवैराग्येणचगृह्यतइति एतस्यसंवादमाह वाइत्यनेनयोगउपायःसंग्रहःसंयमःमनःसंग्रहेणकिंस्यादत्राह हृदयेति हृदयज्ञत्वंमत्प्रियत्वंअन्विच्छन्मनोयच्छेदितिशेषः ततःकिमत्राह दमश्चेति मत्प्रियत्वमिच्छतःपुंसःमत्प्रसादेनेतरेंद्रि यनिग्रहश्चभवतीतिशेषःमुहुरित्यनेनक्षणमपिविषयानुगतंनस्यादितिध्वनयति २१ अस्तुमनोवशंनयेदितितत्केनप्रकारेणस्यादितितत्राह सांख्येनेति यावन्मनःप्रसीदतितावत्सर्वभावानां ब्रह्मादिसर्वपदार्थानांसांख्येनतत्त्वज्ञानेनप्रतिलोमानुलोमतः भवाप्ययौक्रमतःसृष्टिंव्युत्क्रमतःसंहारमनुध्यायेद्धरेरितिशेषः २२ अनेनयोगेनमनःप्रसन्नंस्यात्किमत्राह निर्विण्णस्येति । निर्विण्ण स्यस्वर्गादिभोगोऽनित्यइतिज्ञानवतोऽतएवतस्मिन्विरक्तस्यशोभनाध्यासबुद्धिरहितस्यात्मवेदिनः । आत्मानात्मविवेकज्ञस्यदौरात्म्यंकामकश्मलादिचिंतितस्यध्यानविषयस्यहरेरनुचिंतयापुनःपुनर्नि रंतरस्मरणेनमनस्त्यजतीत्यन्वयः २३

स्मरणात्पूर्वभाविनायमादयोप्यावश्यकाइतिभावेनाह यमादिभिरिति प्रयत्नसाध्ययमादिभ्यःसुखसाध्योपायांतरमाह ममार्चात । अर्चामूर्तिमाहारं सान्निध्यस्यमुख्याधिष्ठानत्वात्मातमातस्तत्राप्यवि वक्षिताइतिज्ञातव्यं तत्राप्यशक्तानांस्थावरंचग्राह्यम् । पुनरपिविकल्पोस्तिकिनेत्याह नेति एतैरुक्तैरुपायैर्विनान्यैरुपायैश्चित्तवृत्तिनिरोधलक्षंयोगंमनोनस्मरेदित्यर्थः २४ योगिनःग्रामादिकपापप रिहारोपायप्रकारमाह यदीति योगेनध्यानेन अन्यंयत्नंनकुर्यादितिशेषः यंत्रमितिपाठेअन्यन्साधनंनास्तीत्यर्थः २५ विहिताविहितकरणयोर्गुणदोषत्वाभावेकयोर्भगवत्प्रियाप्रियनिबंधनत्वेन गुणदोषत्वेइत्युद्धवप्रश्नंपरिहरति स्वेस्वेइति उभयोर्गुणदोषयोरेपनिर्णयइत्यन्वयः विधिनिषेधबद्धेदेवादिजनंप्रतिमयायमधिकारस्तुम्पंदत्तोयमधिकारस्तवेति यथायथोपदिष्टंतथातथास्वेधिकारेविहि तकर्मणियानिष्ठात्रतंनियमःसगुणःमत्प्रीतिजनकत्वात्परिकीर्तितोमयेतिशेषः विपर्ययोऽनधिकारेअविहितेकर्मणियानिष्ठासदोषःपरिकीर्तितोमदप्रीतिहेतुत्वात्तुशब्देननिषिद्धस्यवृत्रहत्यादेः गुण त्वंविहितस्याप्यसुरादिकृतस्यदोषत्वंचवक्ति इंद्रोवैवृत्रंहत्वामहानास यईशृणोत्यलंकशृणोतीत्यादिवचनात् २६ विहिताविहितकरणदुगदोषनियमोक्तिर्भगवत्प्रियाप्रियविषयेत्याशयेनाह कर्मणामि ति विधिनिषेधात्मकोवेदोजात्यशुद्धानांस्वतःअशुद्धानांकर्मणांनियमेनगुणदोषभेदमपेक्षतइतियोनियमस्त्वयोक्तः सनियमोमदिष्टोगुणोमदनिष्टोदोषइति विवेकमजानतांपुसां नतुविदुषांपक्षइ तिविहितकरणेनगुणोनिषिद्धकरणेनदोषइत्यनेनगुणदोषविधानेनांहसांत्याजनेच्छयानियमोमयाकृतः । स्वतोऽशुद्धानांगुणत्वंकथंस्यादित्यतउक्तंत्विति विध्यनुसारेणानुष्ठानेगुणत्वमेवस्यादि

यमादिभिर्योगपथैरान्वीक्षिक्याचविद्यया ॥ ममार्चोपासनाभिर्वानान्यैर्योगंस्मरेन्मनः २४ यदिकुर्यात्प्रमादेनयोगीकर्मविगर्हितम् ॥ योगेनैवदहेदंहोनान्यंयत्नंकदाचन २५ स्वेस्वेधिकारेयानिष्ठासगुणःपरिकीर्तितः ॥ विपर्ययस्तुदोषःस्यादुभयोरेषनिर्णयः २६ कर्मणांजात्यशुद्धानामनेननियमःकृतः ॥ गुणदोषविधानेनत्वंहसांत्याजनेच्छया २७ जातश्रद्धोमत्कथासुनिर्विण्णःसर्वकर्मसु ॥ वेददुःखात्मकान्कामान्परित्यागेप्यनीश्वरः २८ ततोभजेतमांप्रीतःश्रद्धालुर्दृढनिश्चयः ॥ जुषमाणश्चतान्कामान्दुःखोदर्कांश्चगर्हयन् २९

त्यर्थः । विध्यनुसारित्वंचमत्प्रियोपहितत्वमित्यपिविशेषंतुशब्दएववक्ति । भगवत्प्रियाप्रियत्वेगुणदोषयोःकारणत्वंचेद्वेदेतद्विधानंकिमर्थंक्रियतइत्यतोवाह कर्मणामिति । गुडजिह्विकान्यायेनांहसां त्याजनेच्छयास्वतोऽशुद्धानांकर्मणां अनेनगुणदोषविधानेननियमःकृतोनतुप्रियाप्रियत्वनिषेधेन कर्मबहिर्मुखानांकर्मणिबुद्धच्यवतारार्थशाखाचंद्रन्यायवदन्यथाजात्यशुद्धानांशुद्धत्वंनस्यादतोमत्प्रियाप्रि यत्वेगुणदोषयोःकारणं अनेवंवित्महत्पुण्यंकर्मकरोतितद्धास्यांततःक्षीयतएवेतिश्रुतेरित्यर्थःगुणदोषयोःकारणंभगवत्प्रियाप्रियत्वनियमःकस्मादित्यतोवाह कर्मणामिति अंहसांत्यागेच्छयाजात्यशुद्धा नांकर्मणामनेनगुणदोषविधानेनमत्प्रियत्वाप्रियत्वनियमःकषायोपरिचूर्णवदन्यथाजात्यशुद्धानांपापहरणसामर्थ्यानुदयादचिकित्सितौषधवत् यथापंकेनपंकांभइतिवत्स्यादतोमत्प्रियत्वेनमदर्पणेनकर्मक व्यमितिभावः २७ मत्प्रियाप्रियविवेकज्ञानेनगुणदोषविदोभक्तियोगिनोदेवाइत्याशयेनभक्तियोगिनांस्थितिंविदधानोनिगमयति जातश्रद्धइति यतोमत्प्रियाप्रियनिबंधौगुणदोषौततोमांभजेतेत्यन्वयः कीदृशोभक्तियोगीप्रारब्धादृष्टाद्विषयपरित्यागेनीश्वरोपिशास्त्रज्ञानेनमत्कथासुजातश्रद्धत्वेनसर्वकर्मसुनिर्विण्णोयःकामान्विषयान्दुःखानांप्रापकान्वेद २८ यश्चप्रीतःश्रद्धालुःअत्यापिभगवदुपास्तिंनमुंच तीत्यर्थःअतएवदृढनिश्चयोभजन्विरोधिनःकामान्जुषमाणश्च दुःखोदर्कान्निषिद्धान्कामान्गर्हयंश्चसइत्यर्थः २९

---

१ यदिभगवत्प्रीतिकरएवधर्मःतदप्रीतिकरएवाधर्मःसचवेदविहितोस्तुमावा तर्हिवेदविधामस्यैवय्यर्थ्यमित्यतोज्ञानवतांदेवानामेवेयंव्यवस्था अज्ञानांमानुषादीनांवेदविधिरपेक्षितएवेत्याशयेनभक्तियोगिनोदेवाइत्युक्तम्॥

प्रोक्तेनभक्तियोगेनभजतोमासकृन्मुनेः ॥ कामाहृदिस्थानश्यंतिसर्वेमयिहृदिस्थिते ३० भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः ॥ क्षीयंतेचास्यकर्माणिम
यिदृष्टेखिलात्मनि ३१ तस्मान्मद्भक्तियुक्तस्ययोगिनोवैमदात्मनः ॥ नज्ञानान्नचवैराग्यात्प्रायःश्रेयोभवेदिह ३२ यत्कर्मभिर्यत्तपसाज्ञानवैराग्य
तश्चयत् ॥ योगेनदानधर्मेणश्रेयोभिरितरैरपि ३३ सर्वंमद्भक्तियोगेनमद्भक्तोलभतेंजसा ॥ स्वर्गापवर्गंमद्धामकथंचिद्यदिवांछति ३४ नकिंचित्सा
धवोधीराभक्ताह्येकांतिनोमम ॥ वांछंत्यपिमयादत्तंकैवल्यमपुनर्भवम् ३५ नैरपेक्ष्यंपरंप्राहुर्निःश्रेयसमकल्मषम् ॥ तस्मान्निराशिषोभक्तिर्निरपेक्षस्यमे
भवेत् ३६ नमय्येकांतभक्तानांगुणदोषोद्भवागुणाः ॥ साधूनांसमचित्तानांबुद्धेःपारमुपेयुषाम् ३७ एवमेतान्मयादिष्टाननुतिष्ठंतिमेपथः ॥ क्षेमंविंदंति
मत्स्थानंयद्ब्रह्मपरमंविदुः ॥ ३८ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेविंशोध्यायः ॥ २० ॥ ॥ ७ ॥ ॥ ७ ॥

विषयतेविनोयोगिनःकर्दमगर्तेपतत्पर्णवत्ततःकदाप्युत्थानंनस्यादित्यतस्तद्भजनफलमाह प्रोक्तेनेति । उक्तलक्षणेनभक्तियोगेनासकृत्सदानिरंतरं मांभजतोमुनेरपरोक्षज्ञानिनोभक्तियोगिनोहृदिस्थिता अनभीष्टाःकामाःसर्वेनिर्मूलतयानश्यंति कदा मयित्हादिस्थितेप्रकाशमानेसति ३० एतदेवविवृणोति भिद्यतइति हृदयग्रंथिःप्राकृतांतःकरणाख्योबंधःलिंगशरीरलक्षणः अखिलात्मनिसर्वगतेमयिदृष्टे अपरोक्षितेसतीतिशेषः ३१ यस्मात्पूर्वकर्मणांविनाशेनकिंचिद्विरुद्धस्योपमर्देनउत्तरस्यभक्तेरेवाकृतेयोगिनःसर्वपुरुषार्थोतमः तस्मादिहजीवराशौमदात्मनोमदेकचित्तस्यमद्भक्तियुक्तस्ययोगिनोदेवजा तेर्ज्ञानाच्छ्रेयोनभवेत्वैराग्याच्चतस्मादित्यन्वयः । नन्वेवंतर्हिज्ञानवैराग्याभ्यांश्रेयउक्तिःकथमित्यतउक्तं प्रायइति भक्त्यनुसारिज्ञानवैराग्येविनाअन्यस्माज्ज्ञानाद्वैराग्याच्चश्रेयोनिषिध्यते देवानांरागित्वे पिमुक्तिसंभवात् । रागिणोपिविमुच्यंतेदेवानास्त्यत्रसंशयः । रागापनोदनार्थंचज्ञानंसाध्यंयतीश्वरैरितिवचनात् किंच स्मर्तव्याविषयेदोषायतिभिर्नतुदैवतैः । हरिरेवसदापूज्यइत्यर्थेदैवतैरपीतिच ३२ कर्मादिनाप्राप्यंयच्छ्रेयोनतत्त्वद्भक्त्यास्यादित्याशंकामाभूदित्याह यत्कर्मभिरिति यदिवांछतितर्हिलभतेनतत्रेतरापेक्षास्तीत्यर्थः योगेनप्राणायामलक्षणेनध्यानेनवा ३३ ३४ ननुयदीतिव्यर्थरा गिणांतेषांसर्वाभिलाषसंभवादितितत्राह नाकिंचिदिति रागिणोपितेभक्तिफलबुद्ध्यानाकिंचिद्वांछंति ३५ सुखंनवांछंतिचेत्तेदुःखयोग्याःकिंनेत्याह नैरपेक्ष्यमितिनैरपेक्ष्यमकल्मषंनिष्पापंपरंपूर्णंनिःश्रे यसंप्राहुरितियस्मात्तस्मात् । त्वदेकपरायणानांतेषांत्वत्तःकिंसुखलक्षणंफलंअन्यथापाषाणत्वमपिश्रेयःस्यादित्याशंकांपरिहरन्नुपसंहरति तस्मादिति निराशिषःसंसारविषयैर्निर्मुक्तस्येमसकाशा

न्निरपेक्षस्यतस्यभक्तिरानंदरूपिणीभवेदित्यन्वयः । यतोभक्तिविषयेणभक्तायफलंदेयमतइति । यदिदद्याद्भक्तियोगफलंमोक्षमपीश्वरः । भक्तियोगफलत्वेनतत्तद्वृद्धयुरेवते । इत्यस्माद्वाक्यात्मुक्ति फलाद्भक्तिलक्षणसाधनस्याधिकानंदबुद्ध्येत्यर्थः ३६ भक्तियोगिनोरागिणश्चेतेषांविषयागुणदोषोद्भावकाःस्युरितितत्राह नेति । कामित्वेपितेषांभक्तिफलात्मनाविषयभोगाभावाद्गुणा विषयागुणदो षोद्भावकानभवंति । कुतःसमचित्तानांसमत्वेनमात्प्रियविहितकरणान्मदप्रियनिषिद्धवर्जनाच्च एतदपिकुतइत्यतउक्तं बुद्धेरिति बुद्धेःप्रकृतेःपारमाप्तुकामानां मदेकहितकरणत्वस्ययुक्तत्वादित्यर्थः । अ नेनैषांवैराग्यमपिअधिकमित्युक्तंभवति तदुक्तं कामिनोपिस्वयंकामान्भुंजतेनफलात्मना । तस्माद्विरागेप्यधिकोदेवाएवहिताद्दशाइति ३७ त्रयाणामपियोगिनांफलमाह एवमेतानिति कर्मयोगिनः क्षेमंविंदंति ज्ञानयोगिनोवैकुंठादिमत्स्थानं भक्तियोगिनोब्रह्म तत्रापिमुख्यभक्तिभाकब्रह्मापरमंब्रह्मावेंदतीति । उत्तमोभक्तियोगस्तुज्ञानयोगस्तुमध्यमः । अधमःकर्मयोगश्चब्रह्मैकोमुख्यभक्तिभाक् । ज्ञानमप्यधिकंतेषांनियतंभक्तियोगिनां । उदीतभगवद्भक्त्यातद्भक्तज्ञानयोगिनः । भक्त्यंशकंयतोज्ञानंज्ञानस्नेहात्मिकाहिसा । तथापिज्ञानयोगित्वंमानुषज्ञानतोधिकं । भक्तियोगेततोयत्नःकार्योविद्वद्भिरं जसा । इत्यतःफलतारतम्यमवगंतव्यम् ३८ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेविजयध्वजकृतटीकायांविंशोध्यायः ॥ २० ॥

कर्मयोगिनांभगवत्प्रियत्वेनद्रव्यदेशादिशुद्धिकथनपूर्वकंकर्मकरणप्रकारंवक्तुपस्मिन्नध्याये । तत्रकथितानांत्रयाणामप्येकमननुतिष्ठतांगतिमाह यएतामिति भक्तिज्ञानक्रियात्मिकांभक्तिज्ञानकर्मयोग
विषयाम् १ यथागुणदोषौमत्प्रियाप्रियोपहितविहिताविहितकरणानिबंधनौ । एवंगुणदोषमूलेपुण्यपापनिबंधनेशुद्धचशुद्धीअपिमत्सन्निधानविशेषतदभावकृतेनब्राह्मणजात्यधिकृतेइतिपू
र्वोक्तानुवादपूर्वशुद्धचशुद्धिव्यवस्थामाह स्वेस्वेइति उक्तार्थोयम् २ पंचभूतात्मकत्वेनसमानेष्वपिवस्तुषु द्रव्यस्यशुद्धिःअशुद्धिःगुणदोषौशुभाचशुभौचमत्सन्निधानाविशेषतदभावकृतत्वेनविधीय
ते । किमर्थमतउक्तं । विचिकित्सार्थंशुद्धचशुद्धीविवेकज्ञानेनपुण्याधिक्येनसुखाधिक्यंभवतिइतिज्ञापनार्थमिति पंचभूतात्मकत्वेनसमतासर्ववस्तुषु । हरिसन्निधिवैशेष्याद्विशेषश्चमहान्सदेतिवचनात् ३
एतदेवविवृणोति धर्मार्थमिति । सुकृतादिप्रयोजनमुद्दिश्यधर्म्यंधर्मसाधनंधुरमुद्वहतामया यात्रार्थशरीरयापनार्थं ४ शुद्धचशुद्धीइत्युक्तमेवविवृणोति भूमीति । स्थावरादीनांआब्रह्मपर्यंतानांजीवानां
आत्मनासंयुताःशारीराःभूम्यादयःपंचधातवोमहाभूतानि ५ पंचभूतात्मकत्वेनसमानेष्वपिस्थावरादिब्रह्मांतेषुधातुःपरमेश्वरः यउक्तिधातुरथिवीमितिश्रुतिः तस्यसन्निधानविशेषाच्छुद्धचैतदसंनिधानविशे
षादशुद्धचैचभेदेनतारतम्यलक्षणेनविषमाणिनामरूपाणिविकल्प्यंतेविविधत्वेनकल्प्यंतेव्यवहारयोग्यायोग्यानिक्रियंते विद्वद्भिर्मयाचेतिशेषः । किमर्थमेतेषांदेहित्वेनप्रत्यक्षलक्षणानांजीवानांस्वार्थसिद्ध
येस्वयोग्येपुरुषार्थसिद्धयेइति । आब्रह्मस्थावरादीनांआस्मृतिलक्षणज्ञानयोग्यानामित्यर्थःवाक्यस्मरणयोरङ्गिदितिवचनात् । यद्यद्धरेःसन्निहितंतत्तच्छुद्धितरंमतम् । स्वतःशुचितमोविष्णुःसान्निध्यं

श्रीभगवानुवाच ॥ यएतांमत्कथांहित्वाभक्तिज्ञानक्रियात्मिकाम् ॥ क्षुद्रान्कामान्बलैःप्राणैर्जुषंतःसंसरंतिते १ स्वेस्वेधिकारेयानिष्ठासगुणःपरिकीर्ति
तः ॥ विपर्ययस्तुदोषःस्यादुभयोरेषनिश्चयः २ शुद्धचशुद्धीविधीयेतेसमानेष्वपिवस्तुषु ॥ द्रव्यस्यविचिकित्सार्थंगुणदोषौशुभाशुभौ ३ धर्मार्थं
व्यवसायार्थंयात्रार्थमितिवानघ ॥ दर्शितोयंमयाचारोधर्म्यमुद्वहताधुरम् ४भूम्यंबग्न्यनिलाकाशाभूतानांपंचधातवः ॥ आब्रह्मस्थावरादीनांशारीराआ
त्मसंयुताः ५ भेदेननामरूपाणिविषमाणिसमेष्वपि ॥ धातुशुद्धचैविकल्प्यंतएतेषांस्वार्थसिद्धये ६ देशकालादिभावानांवचनान्ममसत्तम ॥ गुणदो
षौविधीयेतेनियमार्थंहिकर्मणाम् ७ कृष्णसारोयदेशानांब्राह्मणानांशुचिर्भवेत् ॥ कृष्णसारोप्यसौवीरकीकटासंस्कृतेरिणः ८ कर्मण्योगुणवान्कालो
द्रव्यतःस्वतएववा ॥ यतोनिवर्ततेकर्मसदोषोकर्मकःस्मृतः ९

चस्वभावतइतिवचनात् ६ देशादीनांश्रुतिस्मृतिलक्षणंममसुखोद्वर्तवचनमेवगुणदोषयोर्विवेकेमित्याह देशेति अयंदेशोयंकालएतद्द्रव्यमितिइमानिकर्मयोग्यानिनेतराणीतिममवचनादेशादीनांगुण
दोषौविधीयेते कर्मणांनियमार्थंफलसाधनार्थम् ७ कीदृशादेशाःशुचयइत्यतस्तानाह कृष्णसारइति । ब्राह्मणानांकर्मकरणायकृष्णसारोनाममृगोदेशानांशुचिःशुद्धिकरोभवेत् कृष्णसारोयंदेश
मधिवसतिसदेशःशुचिरित्यर्थः अथशब्देनकृष्णसारविधुरोपिदेशःशुचिरितिसूचयति नदीसमुद्रगिरयआश्रमाश्चवनानिच । नगराणिचदिव्यानिशालग्रामादयस्तथा । तेषांसमीपगाश्चैवदेशायोजनमा
त्रतः । कर्मण्यास्तुसमाख्यातास्तदन्येकीकटाःस्मृताः । तदन्योपितुयेदेशाःकृष्णसारोपिताःस्वतः । कर्मण्याएवतेज्ञेयाइतिववनात् । उक्तस्यापवादमाह कृष्णसारोपीति कृष्णसारोपिसौवीरकीकटासं
स्कृतेरिणेभ्योन्यदेशस्यशुचिहेतुः एषांस्ववासोपशुचिकरोनेत्यर्थः खर्पराद्युषितोदेशोऽसंस्कृतइत्युच्यतेतदुक्तं यदिनाध्युषिताःखलैरिति तत्रापिविशेषोस्तीत्युक्तं खलैरध्युषिताश्चापियदिसद्भिरधिष्ठि
ताः । कर्मण्याइतिविज्ञेयाविष्णुलिंगानियत्रचइति ईरणदेशःलावणिकउद्वीपादिकः ८ देशान्निरूप्यकर्मयोग्यंकालमाह कर्मण्यइति विज्ञेयाइत्यादिप्रमाणसिद्धोयमर्थइतिप्रकटनाय कर्मण्यइति
स्मृत्युक्तशब्दानुवादः गुणवान्वृत्तिमान् कालःकर्मण्यःयज्ञादिकर्मयोग्यःसवद्विविधःद्रव्यवःस्वतइति वाशब्देनद्वावपियोग्यावितिवक्ति एवशब्देनतृतीयोनास्तीतिनिश्चीयते द्रव्यतः कर्मण्योवसंतादि

लक्षणः स्वतःकर्मण्यः संध्यादिलक्षणः । कालस्यगुणवत्त्वंनामकिं येनकर्मावर्ततइतिवंविनक्ति यतइति । यतोयस्मिन्कालेनिषिद्धात्कर्मनिवर्ततेतेनक्रियतेसकालःसदोषोनिषिद्धोकर्मकःकर्मानहा निशीथादिलक्षणःस्मृतः। निशीथोमध्यमारात्रीराक्षसानांतुगोचरः इत्यादिना यतोदोषात्कर्मनिवर्ततेतेनदोषेणयुक्तःकालःसदोश्त्वादकर्मकः९ द्रव्यस्यशुद्ध्यशुद्धिप्रकारोपिबहुविधइत्याह द्रव्यस्येत्यादि ना ताम्रादेर्द्रव्यस्याम्लादिद्रव्यसंयोगेनशुद्धिः भांडादिद्रव्यस्यतूच्छिष्टामेध्यसुरादिसंयोगेनाशुद्धिःमहतांवचनेनचशुद्ध्यशुद्धीस्तः तद्यथा अभक्ष्यत्वंयतिपात्रत्वंचालाबुनोदृष्टं केषांचित्प्रक्षालनादि संस्कारेणशुद्धिः असंस्कारेणाशुद्धि गर्दभयानमसंस्कृतवाणीत्यादेः केषांचिदयोग्यापहृतगृहादिद्रव्यविशेषाणांकालतःशुद्धिःअन्नादीनांकालेनाशुद्धिःअन्नादीनांमहत्त्वेश्वादिस्पर्शेपृस्टांशत्यागेनशिष्ट स्यशुद्धिःअथवान्नस्याल्पतयाल्पत्वेनशुनास्पृष्टस्यतस्याशुद्धिः अल्पस्यापिपापस्यपिपीलिकाहननादेरशुचित्वंन । महतोद्रव्यस्यवधादशुद्धिः १० शक्त्याशुद्धिः शक्तस्यपुंसःतीर्थयात्रादिनाब्राह्मण्यात्र तादिनावाशुद्धिः अशक्तस्यज्वरादिरोगपीडितस्यदेवार्चनादिलक्षणेननित्यकर्मानुष्ठानेनशुद्धिः अशुद्धस्यापिमहतांवाचाशुद्धिःशुद्धस्यापिबहूनांवाचात्वशुद्धिः बुद्धिरपिशुद्ध्यशुद्धिहेतुस्तथाहिसुरा पानादिपापानिश्चयेअशुद्धिः हरिकथाश्रवणादिषुपुण्यानिश्चयेशुद्धिःतथाहिसमृद्धिःसंपदात्मनःशुद्ध्यशुद्ध्योःकारणं सत्पात्रदानादिसद्भ्यंयेनशुद्धिःअसत्पात्रप्रदानगणिकादिभोगविषयादशुद्धिः अन्येषां सविशेषाः सोमादिद्रव्यविशेषाश्चदेशावस्थानुसारतःशुध्यंत्यशुध्यंतिहि तथाहि मांसविशेषाविध्यादुत्तरदेशेशुद्धाःदक्षिणदेशेत्वशुद्धाःतथासोमादिद्रव्यविशेषायज्ञकर्माद्यवस्थायामेवशुद्धाःनान्यदा ११

द्रव्यस्यशुद्ध्यशुद्धीचद्रव्येणवचनेनवा ॥ संस्कारेणाथकालेनमहत्त्वाल्पतयाथवा १० शक्त्याशक्त्याचवाग्बुद्ध्यासमृद्ध्याचतथात्मनः ॥ अन्येशुद्ध्यंति हितथादेशावस्थानुसारतः ११ धान्यदार्वस्थितंतूनांरसतैजसचर्मणाम् ॥ कालवाय्वग्निमृत्तोयैःपार्थिवानांयुतायुतैः १२ अमेध्यलिप्तंयद्येनगंधलेपं व्यपोहति ॥ भजतेप्रकृतिंतस्यतच्छौचमुपदिश्यते १३ स्नानदानतपोवस्थावीर्यसंस्कारकर्मभिः ॥ मदभ्यासान्मनःशौचंकृत्वाकर्माचरेद्द्विजः १४ मंत्रस्यचपरिज्ञानंकर्मशुद्धिर्मदर्पणम् ॥ धर्मःसंपाद्यतेसद्भिरधर्मस्तुविपर्ययैः १५

पार्थिवानांपृथिवीविकाराणांधान्यादीनांयुतायुतैःकालादिभिःशुद्धिः धान्यानामामयुतेनैकेनकालेनदारुपात्राणामस्थनांशंखादीनांचयुताभ्यांमृत्तोयाभ्यांतंतूनामयुतेनकेवलेनतोयेनआज्यादिरसानांतै जसानांकांस्यादीनांचायुतेनाग्निना चर्मणांयुताभ्यांमृत्तोयाभ्यांशुद्धिरित्यर्थः १२ यदमेध्यलिप्तंयेनगंधलेपंचव्यपोहतितेनतस्यप्रकृतिंभजते तस्यवस्तुनस्तच्छौचंशुद्धिरुपादिश्यते १३ कर्मांगशु द्धिप्रकारमाह स्नानेति अवस्थायौवनादिलक्षणा वीर्यमाहात्म्यंशक्तिर्वा संस्कारउर्ध्वपुंड्रादिधारणं कर्मनित्यसंध्यावंदनादिमत्पूजावसानं एभिर्मनःशौचंचमनसःशुद्धिंकृत्वाभीक्ष्णंकर्माचरेत् म दभ्यासान्ममध्यानाभ्यासाच्च १४ ऋष्याद्युपेतस्यमंत्रस्यपरिज्ञानमापादनीयमितिशेषः कर्मणःशुद्धिःकथमित्यतउक्तं कर्मेति मदर्पणंब्रह्मार्पणमस्त्विति.एतैःसाध्यंकिमत्राह धर्मइति धर्मोमद्भ क्तिलक्षणःसंपाद्यते तत्राधिकारिणआह सद्भिरिति विपर्ययैर्मदर्पणमकुर्वाणैरसद्भिरेतैरधर्मःपापलक्षणःसंपाद्यतइत्यन्वयः आंतरःसन्निधिर्विष्णोर्बाह्यःसन्निधिरेवच । द्विविधःसन्निधिःप्रोक्तःकृत्रिमोबाह्यउच्यते । स्वाभाविकस्त्वांतरःस्यात्प्रतिमाजीवगोयथेतिवचनेनसान्निध्यानार्थंब्रह्मार्पणंकर्तव्यमितिज्ञायते १५

१ अयोग्यामोक्षानधिकारिणः ।

इतोपिभगवदर्पणंकर्तव्यमन्यथाकृतहान्यकृताभ्यागमौस्यातामितिभावेनाह क्वचिदाति क्वचित्कर्मागोवाहतत्वनगुणोपदोषः स्यात् मदमक्तनापतत्वनागुणत्वादतवादतरप· । ब्राह्मणोपिनहंतव्यइतिनिषेधाविधिनादोषेपिगुणःस्यात् यथेंद्रस्यवृत्रहत्याऋषिनारायणप्रीतिजनकत्वात् ननुगुणदोषविधाननियमः कथमत्राह गुणेति गुणदोषाभ्यामर्थनियमःस्वर्गनरकादिफलानि यमस्तौगुणदोषौ विदंतिजानंतीतितद्विदःमनुष्यादयस्तेषामेववाधतेशकरोभवति प्रयत्नसाध्यत्वात् एवशब्देनतिर्यगादयोव्यावर्त्यतेश्रुतेर्ग्रहणशक्त्यभावात्तेषामतोमनुष्यादीन्प्रतिविधीयमानौगुण दोषौभगवदर्पणाभावेस्वर्गनरकादिफलंदत्तइत्युक्तं तद्विधानंतद्विदामित्यनेनमनुष्यादिष्वपिशुभाशुभज्ञानयोग्यवयसां तदजानतांमहानज्ञानजोदोषोमूर्खाणांतिर्यगादीनांतदभावश्चेतिसूच्यते । वर्षाच्चतुर्द शादूर्ध्वंयेनविद्युःशुभाशुभं । तेषामज्ञानजोदोषः सुमहान्कर्मजादपीति । तिरश्चामिंद्रियाशक्तेर्नदोषोज्ञानजोभवेत् । गुणोपिनैवकाश्चित्स्याद्यतोज्ञानबहिष्कृताइतिवचनात् १६ गुणदोषनिमित्तबाधायथानस्या संप्रकारंवक्ति संमानेति अपतितानांविप्रादीनांसमानकर्माचरणेमदर्पणेनात्मयोग्यकर्माचरणेपातकंनस्यात् तथापूर्वमपतितावाप्रादयोयेनकर्मणापतंतितेषांतत्समानकर्माचरणेतन्नसुरापानतन्नस्त्रीमूर्त्या र्यालिंगनादिकेदेहत्यागिवदोषलक्षणंतत्कर्मपातकंचनभवति तथाशपानःशूद्रश्चब्राह्मणादिपातित्यहेतुभिःलशुनभक्षणादिभिरयोनपतति अधइतिविशेषणात्सुरापानादिभिरेवपतति कुतोनपततीत्यत उक्तंऔत्पत्तिकइति तस्यशूद्रस्यलशुनभक्षणादिलक्षणैर्गुणैरमुख्यैःकर्मभिःसंगःऔत्पत्तिकःस्वभाविकोयतस्तस्मात्स्वायोग्यएवकर्मणिपततीत्यर्थः । त्रैवर्णिकाःसंचरंतोवेदकर्मप्रवर्तनात् । शयानःशूद्रउदि ष्टोवेदकर्माप्रवर्तनात् । नतस्याभक्ष्यजोदोषःशुश्रूषायांप्रवर्ततः । यथासुवर्णस्यमलंशुक्तंताम्रस्यनैवतत् । एवंविप्रादिदोषैस्तुनशुद्रोदोषतामियात् । मलंतुतस्यापिमलंपथैवंशूद्रजन्मनः । स्वधर्मप्रतिरूपस्यच

क्वचिद्गुणोपिदोषःस्याद्दोषोपिविधिनागुणः ॥ गुणदोषार्थनियमस्तद्विदामेवबाधते १६ समानकर्माचरणेपतितानांनपातकम् ॥ औत्पत्तिकोगुणैः संगोनशयानःपतत्यधः १७ यतोयतोनिवर्तेतविमुच्येततततस्ततः ॥ एषधर्मोनृणांक्षेमःशोकमोहभयापहः १८ विषयेषुगुणध्यानात्पुंसःसंगस्त तोभवेत् ॥ संगादेवभवेत्कामःकामादेवकलिर्नृणाम् १९ कलेर्दुर्विषहःक्रोधस्तमस्तदनुवर्तते ॥ तमसाग्रस्यतेपुंसश्चेतनाव्यापिनीततः २० तयाचरहितः साधोजंतुःशून्यायकल्पते ॥ ततोस्यस्वार्थविभ्रंशोमूर्छितस्यमृतस्यच २१

रणंदोषदंमतामितिवचनात् १७ किंबहुनोक्तेनसर्वतोप्यभिमानपरित्यागेनश्रीनारायणसमर्पणमेवसमस्तदोषनाशकरमित्याह यतोयतइति यतःयतःकर्मणोनाहंकर्तेति निवर्तेत अहंकाररहित्येनयद्य त्कर्मपरमेश्वरार्पणबुद्ध्याकरोतिततस्ततःकर्मणोविमुच्येत तत्तत्कर्मबंधकंनस्यादित्यर्थः तत्कर्तव्यतायाबुद्धयवतारार्थस्तौति एषइति एषःपरमेश्वरसमर्पणलक्षणोधर्मःक्षेमःसंसारमुक्तिहेतुः मयिस र्वाणिकर्माणिसंन्यस्याध्यात्मचेतसेत्यादेः १८ विपक्षेबाधकमनर्थलक्षणमाह विषयेष्विति अयमर्थः भगवदर्पणबुद्धिराहित्येनक्रियमाणंकर्मशब्दादिविषयेषुगुणबुद्धिंजनयति मृगतृष्णिकायपःपूर मतीवतदनुनिरंकुशस्यपुंसोविषयेषुगुणध्यानात्सुखसाधनत्वध्यानात्तेषुस्नेहलक्षणःसंगःस्यात् ततस्तेषुकामःइच्छास्यादिच्छातःकलिःकलद्रावणइतिधातोः चेतनधर्मज्ञानद्रावणहेतुरधर्मोज्ञानात्मा विशति १९ कलेरावेशात्स्वाभीष्टपरिपंथिषुसत्सुदुर्विषहःक्रोधःस्याच्चदनुद्वेषानंतरंतमोवर्तते ततस्तमसिमग्नस्यपुंसःव्यापिन्यींद्रियसंततचेतनासुखानुभवशक्तिस्तमसादुःखोद्रेकेणग्रस्यतेनष्टाभवति २० तयानुभवशक्त्यारहितोजंतुरासुरोजीवःशून्यायमुखनाशायकल्पतेनित्यत्वाच्चेतनस्यनस्वरूपेणनाशःकिंतुसर्वात्मनासुखनाशएवेत्याह ततइति । चशब्दएवार्थेततोमृतस्यअंधंतमःपतनानंतरंअस्यमू र्छितस्यदुःखसमुद्राभिभूतत्वेननिःसंज्ञस्य । स्वार्थस्यसुखस्यविभ्रंशःस्वरूपतोहानिर्भवति २१

---

१ तद्विदामेवेत्यनेनावधारणेनगुणदोषपरिज्ञानशून्यानांगुणदोषार्थनियमोनबाधतेइत्युच्यते इतिभाति अतस्तदनुवादेनतात्पर्यमनुव्याख्याति तद्विदइति । २ शंसुञ्चेनोनंशूनंतस्यभावःशून्यं तस्मैदुःखायेत्यर्थः पृषोदरादित्वात्साधुः

नकेवलं सर्वात्मनासुखनाशःतस्यनिरतिशयदुःखमपिभवतीत्याह विषयेति।विषसाम्यंयातीतिविषयोदुःखंतस्याभिनिवेशेनसमुद्रेकेणात्मानंनवेद अपरंप्रतियोगिनंचनवेत्ति स्वानुभवमंतरेणनाकिंचिद्वेत्तीत्यर्थः स्वपरविषयज्ञानंनास्तिचेच्छून्यवादप्रवेशआपन्नइतितत्राह वृक्षेति भगवद्भागवतप्रद्वेषातिशयेननित्यंतमःपतितोनिरंतरंदुःखमेवानुभवन्यमकिंकरैरीक्षितंवृश्यमानत्वेनवृक्षजीविकयावृक्षजीवनवद्व्यर्थजीवन् निष्प्रयोजनोग्रस्तवयाः दुःखपरीतायुःहतिवच्छ्वसन्नास्ते इत्यन्वयः दोषिणोगुणवत्त्वेनश्रूयंतेविषयाःसदा। असतांसंगतेस्तेषुदोषाःश्रोतुंदुसुर्लभाः।अतोनित्यगुणध्यानात्तद्गुणेप्रीतिमान्भवेत्। अतस्तत्रभवेत्कामःकामिनंकलिराविशेत्। अधर्माज्ञानरूपेणकलिनाविष्टदेहिनः। सत्सुक्रोधोदुर्विषहस्ततस्तमसिपात्यते। अंधेतमसिमग्नस्यचेतनेंद्रियसंगता। सुखानुभवशक्तिर्यासाविनश्यतिसर्वदा। तदाशमूनभावेनशून्यइत्युच्यतेनरः। सर्वात्मनातुशंश्रंशस्तस्यदुःखविवर्धनः। अमूर्छितस्यचभवेत्मृत्यनंतरमेवच। दुःखाख्यविषयावेशान्नात्मानंपरमेवच। यथावद्वेत्तिपतितस्तमस्यंधेकदाचन। वृक्षवद्दृश्यतेनित्यंनिष्प्रयोजनजीवनः। नित्यदुःखपरीतायुर्हतिवत्प्रश्वासित्यपि। इतिवचनादासुरजनविषयोयमितिज्ञायते २२ श्रुतिविहितत्वात्स्वर्गादिविषयेच्छासतांस्यादित्याशंक्यैतद्विषयदृष्टांतेनस्वर्गादिविषयस्यानित्यसुखहेतुत्वेननतत्रेच्छाकार्या श्रुतिर्भैषज्यरोचनार्थमिक्षुदंडदानवत्स्वर्गादिवादिनीमुख्यतोमुक्तिपरेत्याह फलश्रुतिरिति इयंफलश्रुतिः मोक्षफलश्रवणत्वेनचरितार्थत्वात् नस्वर्गादिकुसुमश्रुतिस्तथात्वेवेदस्यानर्थहेतुत्वंस्यान्नतद्युक्तम्। स्वर्गादिकामनायुक्तस्त्वैहिकेष्वपिसज्जते। तत्रापिदेवकामेभ्योविशेषंचाभिवांछति। ततस्तमसिपातःस्यादतोवेदःकथंहितान्।

विषयाभिनिवेशेननात्मानंवेदनापरम् ॥ वृक्षजीविकयाजीवन्व्यर्थंग्रस्तवयाःश्वसन् २२ फलश्रुतिरियंनॄणांनःश्रेयोरोचनंपरम् ॥ श्रोतुर्विक्षयाप्रोक्तंयथा भैषज्यरोचनम् २३ उत्पत्त्यैवहिकामेषुप्राणेषुस्वजनेषुच ॥ आसक्तमनसोमर्त्याआत्मनोनर्थहेतुषु २४ नतानविदुषःस्वार्थंभ्राम्यतोवृजिनाध्वनि ॥ कथंयुंज्यात्पुनस्तेषुतांस्तमोविशतोबुधः २५ एवंव्यवसितंकेचिदविज्ञायकुबुद्धयः ॥ फलश्रुतिंकुसुमितामवेदज्ञावदंतिहि २६ कामिनःकृपणालुब्धाःपुष्पेषु फलबुद्धयः ॥ अग्निमुग्धाधूमितांताःस्वलोकंनविदंतिते २७

काम्यत्वेनाभिचक्षीतसर्वंजानन्स्वयंसदेतिवचनात् तदुपपादयति नइति नोस्माकंसकाशाच्छ्रेयोमोक्षाख्यंतदेवरोचयतिकामयति स्वर्गादेरनित्यतादिदोषज्ञानान्मोक्षस्यादोषताज्ञानाच्चेति भैषज्यरोचनंप्रतीक्षुदंडंददातीति यथातथाईषदुत्तमस्यमंदाधिकारिणःश्रोतुर्विवक्षयाभिमुखीकरणायप्रोक्तं नतुतत्रतात्पर्यविवक्षया मंदाधिकारिणानित्यंतपसैवप्रतीक्षितुं। मोक्षोनशक्यतेधैर्यात्ततःस्वर्गादिकंवदेत्। स्वर्गादिष्वल्पफलतांज्ञापयित्वापिमोक्षदं। वेदंवक्तुंतूत्तमानांनित्योवेदःप्रवर्तते। इक्षुदंडंददातीतियथाभैषज्यरोचनं। एवंमंदेषूत्तमेषुमोक्षमाहात्म्यमुच्यते। नह्यल्पफलभाग्वेदोवासुदेवैकसंश्रयइतिवचनात् २३ फलश्रुतेर्मोक्षैकार्थत्वेयुक्तिमाह उत्पत्त्येति उत्पत्त्यास्वभावतएवात्मनोनर्थत्वेहेतुषुकामादिष्वासक्तमनसोयेमर्त्यास्तान्वृजिनाध्वनिसंसारेभ्राम्यतोतएवस्वार्थमविदुषोजनास्तेषांस्वार्थोपायंबुधोजानन्वेदस्तेषुननियुंज्यात् नियुंजानश्चेदुन्मत्तवाक्यवदप्रमाणंस्यादित्याशंक्याह कथमिति विषयाभिनिवेशेनतमोविशतस्तान्पुनस्तेषुविषयेषुवेदःकथं युंज्यान्नकथमपियुनक्तिउन्मत्तवाक्यसाम्यप्राप्तिभयादितिशेषः कामादिषुनतान्मग्नान्इतिवापदच्छेदः तथाचैक्यवाक्यंप्राप्नोति २४ २५ स्वमतंप्रदर्श्यासुरमतंप्रदर्शयति एवमिति केचिदसुरपक्षीयावेदस्यैवमुख्यंव्यवसितंनिश्चयमविज्ञायफलश्रुतिंफलंमोक्षस्तद्विषयांश्रुतिंकुसुमितांस्वर्गविषयांवदंति अतएवावेदज्ञाइति २६ एतदेवोपपादयति कामिनइति कामिनोनिषिद्धकामिनः नतुयोग्यकामवंतोनिषेध्याः अयोग्यभार्यापुत्रादिकामितानर्थसाधिनी। योग्यकामाद्धरेःप्रीतिरतोब्रह्मादयोमलाः।भार्यापुत्रादिसंयुक्तावासुदेवमुपासतइतिप्रमाणात्। ऐवंविधाअसुराइत्याभिप्रेत्यकृपणादिशब्दाः प्रयुक्ताः। ननुस्वर्गकामइतिश्रुतेः

---

१ नृणांइतिसामानाधिकरण्यनान्वयेकृष्णोपिमनुष्येषुकश्चनेतिभातीत्यतोतःसकाशादितिपदमध्याहार्यतात्पर्यमनुसृत्य। २ अयोग्यकामवंतः।

स्वर्गादिष्वेवस्पष्टार्थत्वात्कथंपुष्पेषुफलबुद्धयइतिनिंदाक्रियतेइतितत्राह अग्निमुग्धाइति । मामविज्ञायाग्निरेवेज्यतेइतिमुग्धाःमध्याज्ञाननःप्रत्यक्षफलमाह धूमात । ।मध्याज्ञाननरकप्रमाह स्व
लोकमितिस्वलोकंस्वाश्रयंपरमात्मानंनविदंति अनेनस्वर्गकामाःस्वर्गकामशब्दार्थमपिनविदंतीतिज्ञापितं । नित्यानंदोहरेर्भक्तिज्ञानाद्याःस्वर्गशब्दिताः । पुत्रभार्याप्रवित्ताद्याःसर्वमोक्षगतंफलं । उद्दिश्य
स्वर्गकामस्ययजनंश्रुतिचोदितं । तदविज्ञायपुष्पाख्यमनित्यंस्वर्गमिच्छवः । यजंतिमंदमतयोवेदवादपरायणाइतिमानेनस्वर्गशब्दविवरणात् स्त्रीभिर्वायानैर्वाइत्यादिचात्रमानम् २७ कोसावाश्रयइतित
त्राह नतइति । येउक्थेनप्रोणेनशाःशासनंयेपांतेउक्थशासःअंधेतमसिपातयित्वाप्राणेनदंड्याअसुतृपःकेवलेंद्रियारामास्तेयइंद्र्याप्रेयतश्चदंजातंहृदिस्थंमांनजानंतीत्यन्वयः विष्ण्वभक्तान्सदावायुः
श्वासयेत्तमासिक्षिपन् । विष्णुभक्तान्विमोक्षायप्रापयित्वासुखंनयेदितिच अज्ञानंनिदर्शयति यथेति यथानीहारचक्षुषःनीहारावृतदृष्टयःपदार्थान्यथावन्नविंदंति २८तथा तेमेमतमविज्ञाय । मोक्षाख्यंफलमे
वाहस्वर्गादिवचनंतुयत् ।असुराणामयंस्वर्गशब्दःपुष्पात्मकंवदेत् । देवानांहरिसंप्राप्तिर्वेदोविष्णुपरोयतः । इत्येतत्सिद्धंअविदित्वा ततःकिमत्राह परोक्षेति परोक्षमंधंतमःतद्विषयःतत्प्राप्तियोग्यः आत्मा
स्वरूपंयेषांतेतथा अंधंतमःपरोक्षंचपंचकष्टंतथोच्यते । इतिवाक्यसिद्धं कामिनःकृपणाइत्यादिनैवंविधाअसुराइत्यर्थतउक्ताःइदानींस्पष्टयति हिंसायामिति अयंभावः येकामिनःतेषामसुराणांयदियदा
हिंसायांकामः तदायज्ञएवनचोदना । यद्यदात्मनोहिंसनमिष्टंतत्तद्धिंसितमितिकुतर्कैःप्रतिपाद्ययज्ञंपापयंति आसुरोविहितांहिंसांविहितत्वेनवर्णयेत् । आसुरायाज्ञिकाःसर्वेनारायणपराङ्मुखाइति

नतेमामंगजानंतिहृदिस्थंयइदंयतः ॥ उक्थशासोह्यसुतृपोयथानीहारचक्षुषः २८ तेमेमतमविज्ञायपरोक्षविषयात्मकाः ॥ "वृथापशून्विनिघ्नंतिहिंस्यंते प्रेत्यतैस्तुते ॥ " हिंसायायदिकामःस्यादज्ञएवनचोदना २९ हिंसाविहाराह्यालब्धैःपशुभिःस्वसुखेच्छया ॥ यजंतेदेवतायज्ञैःपितॄन्भूतपतीन्खलाः ३० स्वप्नोपममसुंलोकमसंतंश्रवणप्रियम् ॥ आशिषोहृदिसंकल्प्यत्यजंत्यर्थान्यथावणिक् ३१ रजःसत्वतमोनिष्ठारजःसत्वमभोजुषः ॥ उपासतेइंद्रमुख्यान्देवादीन्नतथैवमाम् ३२ इष्ट्वेहदेवतायज्ञैर्गत्वारंस्यामहेदिवि ॥ तस्यांतइहभूयास्ममहाशालामहाकुलाः ३३

वचनात् २९ एषांप्रत्यक्षान्यथानुपपत्त्यासुरत्वंस्पष्टमित्याह हिंसाविहाराइति आलब्धैःहिंसितैः ३० अमुंलोकमुद्दिश्यअसंतमनित्यं अर्थहानिरेवैषांनस्वाभीष्टप्राप्तिरित्याह आशिषइति हृदिस्व
र्गाशिषः संकल्प्ययास्वामइतिनिरूप्यवणिग्यथातथाअर्थास्त्यजति ३१ संतुवापितृभूतपतींनांयष्टारोसुराः इंद्रादिदेवतार्चकाःकथमित्याशंक्यायथावत्तदर्चनाभावादित्याह रजइति एवंविधायाज्ञि
कास्तामसाः कुतः विष्णुंविहाययेदेवान्पितॄन्भूतेशमेवच । साम्येनवापूजयंतितेज्ञेयाआसुरागणाइतिस्मृतेः तेष्वपिविशेषोस्ति तामससात्विकास्तामसराजसास्तामसतामसाइति तत्रतेसर्वेइंद्रमुख्या
न्देवादीन्मांचयथोपासतेरजःसत्वतमोनिष्ठाःरजःसत्वतमोजुषोभवंति कथं तामससात्विकव्रताः किंचित्स्वर्गादिसुखोपेतानिरयदुःखोद्रिक्तान्लोकान्जुषंते तामसराजसव्रताःकेवलंनिरयदुःखाकुल
लोकान् तामसतामसव्रताः अंधंतमोदुःखाविलान्लोकान्सेवंतइत्यन्वयः तामसेपुतुयेसत्वानिरयप्रचुरास्तुते । ईषत्स्वर्गादिसंयुक्तास्तमोनिष्ठास्तुतेस्मृताः । केवलंनिरयेनिष्ठायेतेतामसराजसाः । अंधंतम
सियेनिष्ठास्तेवैतामसतामसाः । एवंत्रिभेदयुक्तास्तुयाज्ञिकाविष्णुवर्जिताः । इत्यनेनत्रैविध्यंप्रामाणिकं निष्ठोत्कर्षेण्यवस्थायांनाशेतेव्रतयाच्ञयोरितिवचनात् रजआदिव्रतयुक्तारजआदिलोकांश्चप्रार्थयं
तइत्यर्थः ३२ तत्प्रार्थनाप्रकारमाह इष्ट्वेति रंस्यामहेरंतुमिच्छामः इहभूमौ अनेनायथोपासनंचदर्शितंनित्यानंदलक्षणमोक्षाकांक्षानुगुणगुणोपसंहाराभावात् ३३

---

१ इदमर्धंप्रक्षिप्तमितितात्पर्यदीपिकाश्रीनिवासतीर्थीयेत्यादिग्रंथविमर्शनेनऋतेसतिभाति क्वचित्मूलकोशेष्वनुपलंभाच्च । २ अत्रमनुष्याधमाःतामससात्विकाः । प्रधानदैत्यानुगाःतामसराजसाःकल्पादिप्रधानदैत्याः
तामसतामसाइतिविवेकोगीतातात्पर्यानुसारेणमंतव्यः

अपथोपासनेनिमित्तमाह एवमिति पुष्पितयास्वर्गादिपुष्पविषययावाचाव्याक्षिप्तंमनोयेषांतेतथातेषांमानिनांअतिस्तब्धानामितिविशेषणद्वयेन मनःसमीचीनत्वजनकत्त्वङ्गुर्वादिसेवापिदूरीभूते तिध्वनयति ३४ स्वर्गादिपरस्यवेदस्यमुक्तिपरत्वंकथंघटतइत्यत्राहवेदाइति स्वतएवपूर्णस्वरूपत्वात् ब्रह्मात्माविष्णुःसएवविषयोयेषांतेब्रह्मात्मविषयावेदाः नारायणपरावेदाइत्यादेः ब्रह्मत्वंपूर्णतामोक्षातत्त्वस्यस्वतएवतु । सत्रब्रह्मात्मासमुद्दिष्टोवासुदेवःसनातनइतिव अनेनब्रह्मात्मप्राप्तिलक्षणमोक्षपरत्वमविनाभूतंवेदस्येतिज्ञायते उक्तशंकायाःपरिहारःकथमायातइत्यतउक्तं त्रिकांडविषयाअपीति यद्यपि ब्रह्मदेवकर्मकांडविषयाअधिकारिभेदेनप्रतीयंतेतथाप्युत्तमाधिकारिणांकांडद्वयपरत्वंविहायब्रह्मगुणप्रतिपादनद्वारामोक्षपरत्वंस्पष्टमितिभावः सर्ववेदानांब्रह्मात्मपरत्वंसत्यंचेन्मुख तःकिमितिप्रतीत्यभावइतितत्राह परोक्षेति किमनेनप्रयोजनमत्राह परोक्षमिति परोक्षप्रियाइवहिदेवाइतिश्रुतिः चशब्दान्मद्भक्तानांदेवादीनांप्रियामित्यर्थोवगम्यते ३५ परोक्षत्वान्ममप्रसादंविनावेदार्थोदुरवबोधइत्याह शब्दब्रह्मेति तर्हिनिरधिकारित्वात्डित्थडित्थादिशब्दवद्धेयोवेदइत्यतउक्तं प्राणेति अत्रप्राणादिशब्दैर्ब्रह्मादयोविवक्ष्यंते प्राणेंद्रियमनोभिःमीयतेज्ञायतइतिप्राणेंद्रियमनोमयं मेयत्वान्मयउद्दिष्टोवेदःप्राणादिभिःसदेतिवाक्यात्वाक्यत्वेपौरुषेयत्वेनचलौकिकवाक्यवदनित्यंपरिमितंचनेत्याह अनंतेति अंतोविनाशउद्दिष्टःपारःपरिमितिस्तथा । अनंतपारोवेदोयंताभ्यांसरहितोयतइतिवचनमत्रोदाहृत्यार्थोवक्तव्यः समुद्रवदित्यल्पाधिकारिणोपेक्ष्योक्तंनतूत्तमाधिकारिणइति ३६ वेदस्यप्रतीयमानोर्थोनचेद्वाच्याभावेनवैयर्थ्यमापन्नमत्राह मयेति अनंतगुण पूर्णत्वाद्भूम्नाब्रह्मादिशब्दवाच्येनमयोपबृंहितंमत्प्रतिपादकत्वेनपूर्णार्थोपेतं किमत्रप्रमाणमत्राह भूतेष्विति भूतेषुघोषरूपेणलक्ष्यतेकथमिवाविसेषूर्णेवशब्दब्रह्मेतिशेषः ३७ प्राणादिभिर्मीयतइत्यु

एवंपुष्पितयावाचाव्याक्षिप्तमनसांनृणाम् ॥ मानिनांचातिस्तब्धानांमद्वार्तापिनरोचते ३४ वेदाब्रह्मात्मविषयास्त्रिकांडविषयाअपि ॥ परोक्षवादोवेदोयंपरोक्षंममचप्रियम् ३५ शब्दब्रह्ममुदुर्बोधंप्राणेंद्रियमनोमयम् ॥ अनंतपारंगंभीरंदुर्विगाह्यंसमुद्रवत् ३६ मयोपबृंहितंभूम्नाब्रह्मणानंतशक्तिना ॥ भूतेषुघोषरूपेणबिसेषूर्णेवलक्ष्यते ३७ यथोर्णनाभिर्हृदयादूर्णामुद्वहतेमुखात् ॥ आकाशाद्घोषवान्प्राणोमनसास्पर्शरूपिणा ३८

क्तंप्रकारमाह यथेति यथोर्णनाभिर्हृदयादूर्णामुद्धृत्यमुखादुद्वहतेनिष्कासयतिपुनर्ग्रसतिच एवंघोषवानाकाशगुणशब्दव्यक्तिमान्छंदांसिमयितेनेनेतिछंदोमयोमृतमयोमत्प्रसादेनमोक्षदःप्राणःआस्पर्शोविष्णुःतंरूपयतीत्यास्पर्शरूपिप्राणस्यमनस्तेनस्वमनसासहस्वपदवींमदनंतरूपविषयांओंकारेषुत्रिमात्राद्यनंतमात्रावसानप्रणवेष्वंजितांस्पष्टव्यक्तांतद्व्याख्यानरूपांस्पर्शादिवर्णैरलंकृतांगुह्यदर्शनादिभेदेनविचित्राभिर्नानाविधाभिरकाशीतिसंख्याताभिर्भाषाभिर्वितंतां चतुरुत्तरैश्चतुर्वर्णैरधिकोष्णिग्युक्तैर्गायत्र्यादिच्छंदोभिश्चवितंतांअनंतपारांविनाशपरिमाणरहितांबृहतींश्रुतिंहृदयाकाशादुद्धृत्यसृजतिउच्चारयतिरुद्रादिभ्यउपदिशतिपुनःकल्पांतेस्वस्मिन्नेवाक्षिपतेविदधातीत्यन्वयः चतुरुत्तरत्वनियमोजगत्यंतानामेवगायत्र्याउष्णिक्चतुर्वर्णाधिकेत्यादिचतुरुत्तरैःजगत्यंतानामेवचतुरुत्तरत्वनियमः भुंक्तेयदाखिलान्स्पर्शानास्पर्शोविष्णुरुच्यते । तस्यप्रकाशकंनित्यंनमस्येप्राणमेकलं । प्राणस्यैवमनोनित्यंवासुदेवंप्रकाशयेदितिच । मीयतेनेनछंदांसिप्राणश्छंदोमयस्ततइतिच त्रिमात्रमादितःकृत्वायावच्चानंतमात्रकाः । प्रणवास्तेपिभेदेनह्यनंताःपरिकीर्तिताः । एकमात्रोत्तराःसर्वेवासुदेवाभिधायकाः । तेषांव्याख्यानरूपाहिसर्ववेदाःप्रकीर्तिताः । ओंकारेणान्वितास्तस्मात्सदोच्चार्याहरेःप्रियैरिति उक्तार्थेप्रमाणं गुह्यदर्शनभाषेचभाषाचैवसमाधिका । तिस्रस्तुमूलभाषाःस्युरेकैकाचत्रिधापुनः । गुह्यदर्शनसंज्ञाचगुह्यगुह्यातथापरा । एवमादिक्रमेणैवत्वेकाशीतिविभेदिताः । भाषास्तत्रचगुह्याचप्रसिद्धार्थैश्चनन्विता।गुह्यार्थतत्परैवांधोमणिमित्यादिकाचसा ।दर्शनान्यवलंब्येवपशुपत्यादिनांतुया। बहुश्रुतिविरुद्धंतुवदेत्सादर्शनात्मिका।अंतेनिषेधसंयुक्ताभस्मस्नानादिकाचसा ।यथाप्रदृश्य

१ ॐकारस्यैकत्वेनोंकारेष्वितिबहुवचनायोगादित्यतः ॐकाराणांबहुत्वाद्बहुवचनमित्यत्रप्रमाणमाह ॥ त्रिमात्रेति ॥ ॐकारेव्यंजितामितिपाठःकाल्पनिकः । २ अंधोमणिमविंददित्यादिका प्रतीतार्थे योग्यता । भावात्भगवज्ज्ञानेनांधःगुरूपदेशादिनामणिज्ञानोत्तमंलब्धवानितिगोप्यार्थः मणिर्मूर्खप्रधानंचेत्युत्तमस्यवचोभवेदित्यभिधानम् ॥

भानार्थासमाधिःसाप्रकीर्तिता ।विष्णुःपरमइत्याद्यासाचविद्वद्भिरीरितेतिवचनात् संप्रदायज्ञैर्गुरुचरणशरणैरवपुरुषैस्तंपाषंमथइतं भस्ममन्त्रानांवेधानंतुश्रुत्युक्तदर्शनानुग।भस्मस्नानततोग्राह्यंवेधानतुनृसिंह
गंइतिवाक्यादंतेनिषेधयुक्तत्वात्भस्मस्नानानादरोपिकर्तव्यइति ३८ ३९ ४० गायत्र्यादिच्छंदसांक्रमोपिछंदोविचित्र्याद्युक्तविधइत्याशयवानाह गायत्रीति छंदस्तुनवपादंयज्जगदित्युच्यतेबुधैरितिवचना
ज्जगन्नामच्छंदोनवपादात्मकमित्यर्थः ४१ मुख्यप्राणोपिमत्प्रसादादेववेदार्थंजानाति मुख्यतः सर्ववेदार्थतत्त्वमहमेवजानामीत्याशयवानाह किंविधत्तइति विकल्पयेत्विविधरूपत्वेनकल्पयेत् लोकेवि
द्वज्जनमध्येमदन्यःकःपुरुषःइत्यस्याःश्रुतेःहृदयंतात्पर्यार्थवेदकोपिनवेदचेत्कोवापुर्मत्प्रसादाद्वेत्तीत्यर्थः४२ संध्यामुपासीतेत्यादेःसंध्योपासनादिविधिलक्षणमर्थमंतरेणान्यमर्थंभगवान्कथंवेत्तीतित्राह
मामिति संध्यामुपासीतेत्यादिविधिलक्षणोवेदोमामुद्दिश्यविधत्तेसंध्यावंदनादेर्मद्विषयत्वात् ध्येयःसदासवितृमंडलमध्यवर्तीत्यादेःयदादित्यगतंतेजोजगद्भासयतेऽखिलमित्यादेश्च सत्यंज्ञानमनंतंब्रह्मे
त्यादिसत्यत्वादिगुणवाचकोवेदः सत्यत्वादिगुणविशिष्टंमामभिधत्ते चत्वारिवागित्यादिपुवेदादिवाच्यत्वाद्वागाख्यंमांवागित्यनूद्यचत्वारीतिमांविविधंकल्पयित्वावासुदेवसंकर्षणादिरूपविशिष्टत्वेनध्येय
इति नसुरांपिबेत्ब्राह्मणोनहंतव्यइत्याद्यपोहभागोसुरऐश्वर्यइतिधातोःसुराणामैश्वर्यादिमद्गुणानांपानंममस्यादिविचिंतनं वेदैकवेद्यत्वेनब्राह्मणोविष्णुर्नास्तीतिचिंतनमित्यादिमदप्रियमपोह्यनिषिध्या
त्मानमेवलोकमुपासीतेत्यादिमद्विषयोपासनंवेदतात्पर्यार्थइत्यस्याःश्रुतेःहृदयमेववेदेतिगतेनान्वयः । विधिभागेहरेःपूजैशाभिधानेचतद्गुणाः । विकल्पेतद्बहुत्वंचाप्यपोहेतुतदप्रियं । उच्यतेसर्ववेदेषुतच्चवे

छंदोमयोमृतमयःसहस्रपदवींप्रभुः॥ ओंकारेष्वंजितांस्पर्शस्वरोष्मांतस्थभूषिताम् ३९ विचित्रभाषावितताछंदोभिश्चतुरुत्तरैः॥ अनंतपारांबृहतींसृजत्या
क्षिपतेस्वयम् ४० गायत्र्युष्णिगनुष्टुप्चबृहतीपंक्तिरेवच॥ त्रिष्टुप्जगत्यतिच्छंदोह्यष्टयत्यष्टिजगद्विराट् ४१ किंविधत्तेकिमाचष्टेकिमनूद्यविकल्पयेत्॥
इत्यस्याहृदयंलोकेनान्योमद्वेदकश्चन ४२ मांविधत्तेभिधत्तेमांविकल्प्यापोह्यइत्यहम् ४३ एतावान्सर्ववेदार्थःशब्दआस्थायमाऽभिदाम्॥ मायामात्रमनू
द्यांतेप्रतिषिध्यप्रशाम्यति ४४॥ इतिश्रीभागवतेमहा०एकादशस्कंधेएकविंशोध्यायः॥ २१॥ उद्धवउवाच॥ कानितत्त्वानिविश्वेशसंख्यातान्यृषि
भिप्रभो॥ नवैकादशपंचत्रीण्यात्थत्वमिहशुश्रुम १

दसएवहीतिवचनात् सुराहरेर्गुणाःप्रोक्तास्तेमेस्पुरितिचिंतनं । सुरापानमितिप्रोक्तंतन्नकुर्यात्कथंचन । ब्राह्मणोविष्णुरुद्दिष्टःसनास्तीत्यभिचिंतनं। ब्रह्महत्यासमुद्दिष्टांनकुर्यात्कथंचन। इत्याद्यपोहवाक्या
र्थश्चित्योविष्णुर्बुधैर्जनैरितिवचनाच्च ४३ नकेवलंकतिपयवाक्यार्थःसर्ववेदार्थोप्येवमेवेतिभावेनोपसंहरति एतावानिति कदानुवेदस्यविश्रमइतितत्राह शब्दइति निर्दोषःशब्दोवेदः अभिदांमामास्थाय
सर्वावतारेषुभेदरहितोविष्णुरितिप्रतिष्ठाप्यमायामात्रंमदिच्छोद्बुद्धादृष्टनिर्मितंशरीरादिकंबंधमनूद्यनिरूप्यतस्यप्रतिषेधार्थयुक्तासनादिकंविधायांतेमोक्षेज्ञानोदयेनजीवस्यशरीरादिकंप्रतिषिध्यप्रशाम्यति
स्तिमितसमुद्रवत्स्वभावोपास्तिरूपेणतिष्ठतीत्यन्वयः नभिदायस्यसोभिदः अभिदश्चायमश्चेत्यभिदाःतमभिदां अइतिब्रह्मेति अनिषेधेपुमान्विष्णाविति यादवः प्रपंचनिषेधोवेदस्यार्थोनेनोच्यतइतिमतं
सर्वावतारेषुनिर्भेदत्वाददोषतः । अभेदोविष्णुरुद्दिष्टस्तमेवोक्तादिच्छया । निर्मितंदैहिकंबंधंतस्योपासनयैवतु। प्रतिषिध्यविमोक्षेतुस्वभावोपास्तिरूपतः।प्रतिशाम्यतिवेदोयंवासुदेवैकसंश्रयइतिसमा
ख्यानिरस्तमितिज्ञातव्यंविद्यात्मनिभिदाबोधइतिभेदज्ञानस्यविद्यात्वोक्तेश्चेति ४४ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेविजध्वजकृतटीकायांएकविंशोध्यायः॥ २१ ॥ भगवत्सृष्टानांतत्त्वानांसं
ख्यानंजीवस्यहरेश्चभेदंनिरूपयत्यस्मिन्नध्याये तत्रादौभगवदुपदेशाज्जाततत्त्वस्वरूपोद्धवोऋषिभिस्तत्त्वानांबहुत्वसंख्यापमानत्वात् युक्तीर्ज्ञातुकामःपृच्छति कानीति त्वंनवेत्त्यादीनितत्त्वान्याह त्थ
वयंचशुश्रुम तत्रऋषिभिःसंख्यातानितान्येवउतेतराणि १

संशयनिमित्तमाह केचिदिति २ ऋषयस्तत्त्वानांसंख्यानामेतावत्त्वंयद्विवक्षयाकयायुक्त्यापृथग्गायंतिनोस्माकमिदंसयुक्तिकंवक्तुमर्हसि ३ ऋषयइतित्वयोक्तत्वात्सर्वेषुपक्षेषुयुक्तिशंकानकार्येत्या
शयेनपरिहरति युक्तयइति यथाब्राह्मणावेदविचारकुशलाऋषयोभाषंतेसंक्षेपविस्ताराभ्यांवदंति तथासर्वेषुपक्षेषुयुक्तयःसंतीत्यन्वयः स्वकपोलकल्पितत्वेनवदतांमतंप्रमाणंकथंस्यादितितत्राह
मायामिति मदीयांमायांममसामर्थ्यमुद्गृह्यालंख्यनानाविधांतत्तत्संख्यांवदतांऋषीणांमतंकिन्नुदुर्घटं किमनुपपन्नं सर्वंप्रामाणिकमेवेत्यर्थः विष्णोःसामर्थ्यमालंख्यतत्त्वसंख्यांमुनीश्वराः । चक्रुर्हि
तदाविज्ञायविवदंत्यल्पबुद्धयः । तत्रापिकारणंविष्णोःशक्तिर्यस्याविकारतः । अव्यक्तादेर्विकल्पोयंमनसःसंप्रजायते । विरुद्धकल्पनंतच्चवासुदेवैकनिष्ठया । निरहंकारयानश्येद्विवादैकाश्रयंहितदितिवाक्या
च्छ्रीनारायणस्यामर्थ्यमेवमायोच्यते नानिर्वाच्याविद्येति ४ ननुप्रामाणिकंचेत्किमितिविप्रतिपद्यंतेइत्याशंक्यतन्मततत्त्वापरिज्ञानादितिभावेनाह नैतदिति त्वंयथात्थ एतदेवंनभवति दुष्ट
त्वादहंयद्वक्ष्मितत्तथानिर्दोषत्वादिति तदविज्ञायविदंत्यल्पबुद्धयःइत्यत्रापिमच्छक्तिरेवहेतुरित्याह एवमिति तत्रापिकारणंविष्णोःशक्तिरिति ५ सत्वादिभेदेनयासाग्रामितिबहुवचनं यासांमच्छक्ती
नांसकाशाज्जातादव्यक्तादितत्त्वानांव्यतिकराद्विकारान्मनसोयोविकल्पःविरुद्धकल्पोमिथ्याज्ञानलक्षणः सएवाविवदतांविवदमानानांपदमाश्रयआसीत् तत्त्वसंख्याविवक्षाभेदेनबहुविधान्मनोविका
राद्भवतीत्यर्थः यस्याविकारतः अव्यक्तादेर्विकल्पोयंमनसःसंप्रजायते । विरुद्धकल्पनमिति कदानुविकल्पोपशमइत्यतआह प्राप्तइतिदमःइंद्रियनिग्रहःतद्द्वाराशमेप्राप्तेमन्निष्ठायांप्रवृद्धायांसविकल्पो

केचित्षड्विंशतिंप्राहुरपरेपंचविंशतिम् ॥ सप्तैकेनवषट्केचिच्चत्वार्येकादशापरे ॥ केचित्सप्तदशप्राहुःषोडशैकेत्रयोदश २ एतावत्त्वंहिसंख्यानमृषयोयद्विव
क्षया ॥ गायंतिपृथगायुष्मन्निदंनोवक्तुमर्हसि ३ श्रीभगवानुवाच ॥ युक्तयःसंतिसर्वत्रभाषंतेब्राह्मणायथा ॥ मायांमदीयामुद्गृह्यवदतांकिंनुदुर्घटम् ४ नैतदेवं
यथात्थत्वंयदहंवक्ष्मितत्तथा ॥ एवंविवदतांहेतुःशक्तयोमेदुरत्ययाः ५ यासांव्यतिकरादासीद्विकल्पोविदतांपदम् ॥ प्राप्तेशमदमेऽप्येतिविवादस्तमनुशाम्यति
६परस्परानुप्रवेशात्तत्त्वानांपुरुषर्षभ ॥ पौर्वापर्यप्रसंख्यानंयथावक्तुर्विवक्षितम् ७ एकस्मिन्नपिदृश्यंतेप्रविष्टानितराणिच ॥ पूर्वस्मिन्नुवापरस्मिन्वातत्त्वे
तत्त्वानिसर्वशः ८ पौर्वापर्यमतोमीषांप्रसंख्यानमपीप्सताम् ॥ यथाविविक्तंयद्युक्तंगृह्णीमोयुक्तिसंभवात् ९ अनाद्यविद्यायुक्तस्यपुरुषस्यात्मवेदनम् ॥
स्वतोनसंभवेद्यस्मात्ततोन्यःपुरुषोभवेत् १०

व्येतिश्नयाति ६ तमनुविकल्पनाशानंतरंविवादोपिशाम्यति तच्चवासुदेवैकनिष्ठयानिरहंकारयानश्येत्तविवादैकाश्रयंहितदिति ६ तत्त्वानामनेकविधसंख्यानेयुक्तिमाह परस्परानुप्रवेशादिति कार्य
कारणरूपाणांतत्त्वानांपरस्परानुप्रवेशात् कारणेषुकार्यानुप्रवेशात्क्वचित्कार्येषुकारणानुप्रवेशात्अंतर्भावाच्चतथाप्रवेशेनपृथगेवावस्थनाच्च पौर्वापर्यप्रसंख्यानंन्यूनाधिकत्वेनतत्त्वानांगणनंवक्तुर्विवक्षि
तंयथातथाक्रियतेपूर्वासंख्याअल्पाअपराबह्व्यीतत्संबंधित्वंपौर्वापर्यम् ७ एतदेवविवृणोति एकस्मिन्निति इतराणितत्त्वानिएकस्मिन्पूर्वस्मिन्कारणेतत्त्वेअपरस्मिन्कार्यंतत्त्वेवाप्रविष्टानिदृश्यंतेपि
यस्मात्तस्मादमीषांतत्त्वानांगणनमिच्छतांपौर्वापर्यपूर्वापरसंबंधिप्रसंख्यानमपियुज्यतइत्यर्थः नन्विदमार्षमतंतवचित्तेगीकार्यमुतनेतितत्राह यथेति ऋषिभिरुक्तमिदंयथावदेवविविक्तंपृथक्पृथक्स्पष्टं अ
तएवयुक्तंचेति यद्यस्मात्तस्माद्गृह्णीमः हेतुंस्पष्टयति युक्तिसंभवादिति यद्युक्तंयथाविविक्तंतत्तथागृह्णीमःकुतोयुक्तिसंभवादितिवा ८ ९ तैर्ऋषिभिरप्यनाद्यविद्याबद्धादस्वतंत्राज्जीवात्सर्वथान्यःपरमेश्वरः
स्वीकर्तव्यइतिभावेनाह अनादीतिअनादिकालंआरभ्याविद्याकामकर्मयुक्तपुरुषस्यपुराणिशरीराणिसरतोजीवस्यात्मवेदनंस्वस्वरूपाविर्भावलक्षणंज्ञानंतथात्मनःपरमात्मनोऽपरोक्षलक्षणंज्ञानंचस्वतःस्वश
क्त्यानसंभवेत्उक्तहेतोरितियस्मात्तस्मात्पुरुषःपूर्णषड्गुणोविष्णुस्ततोजीवादन्योभवेदित्यंगीकर्तव्यम् १०

अत्रेदमप्यनुसंधेयमित्याह पुरुषेति हृदिस्थित्वाजीवानांज्ञानोत्पादनात्पुरुषनाम्नाबहिःस्थित्वाज्ञानफलभुक्तदानादाश्रयणाच्चाश्रयाप्वापवक्षलक्ष्यनद्रष्टव्य मदद्दशनऽनयमाह तदन्यात तथापुरुषस्य
अन्यत्वकल्पनाभेददृष्टिलक्षणाअपार्था तत्स्वरूपादपगमनप्रयोजनानर्थकारिणीत्यर्थः ज्ञानात्मनोजीवस्यज्ञानोत्पादनंकथंघटतइतितत्राह ज्ञानंचेति प्रकृतेर्गुणः सत्वगुणजन्यं स्वरूपभूतंज्ञानंतुस
दाजीवस्यविष्णुना। नियतंप्राकृतंज्ञानंभक्त्यातेनैवदीयतइतिवचनात् २१ जन्यज्ञानस्यप्राकृतत्वंसाधयति प्रकृतेरिति तुशब्दोविशेषद्योतकः प्रकृतेर्गुणसाम्यप्रलयेवर्तमानस्यआत्मनोजीवस्ययथा
सत्वंरजस्तमइतिप्रकृतेर्गुणाआवरकानभवंतिईश्वरेच्छानियतप्रवृत्तिशून्यत्वात् तदास्वरूपज्ञानादिगुणाअपिभवंति तथासृष्टिकालेजीवस्वरूपंतेर्गुणैरावृतंभवति गुणानांवीर्यमाह स्थितीति १२ किमा
यातंअनेनप्रकृतइत्यत्राह सत्वमिति इहसृष्टिकालेसत्वंज्ञानंसत्वगुणजन्यं रजोगुणजन्यंकर्म तमोगुणजन्यमज्ञानमित्युच्यते प्रलयकालात्सृष्टिकालेऽयंविशेषइतिबाह्यज्ञानंप्राकृतमितिसिद्धं पद्मा प्रलयेतुसृ
ष्टवपिप्रकृतेर्गुणाःआत्मनःपरमात्मनोनाविशेषापादकाःकिंतुजीवस्यैव कथमत्राह सत्वमिति सत्वादयोजीवस्यबाह्यज्ञानादिविशेषजनकाइति अंतस्थःपुरुषोनामज्ञानदःसर्वदेहिनां । बहिस्थईश्वरो
नामज्ञानादिफलदोहरिरितिवाक्यात् । पुरुषाख्योहृदस्तुविष्णुर्जीवविबोधकः । फलदातातुबाह्येनयईशेनाभिदांवदेत् । तथैवान्यस्वरूपेपुविष्णोर्योभेददर्शकः । येचजीवेश्वराभेदंपश्यंतेनर्थभागिनइति
वाक्याच्चपुरुषेश्वरावुक्तार्थाविति सिद्धं इदानींऋषिभिरुक्ततत्त्वानांसंख्याभेदंवक्ष्यन्तत्त्वकारणस्वरूपंतावदाह गुणव्यतिकरइति सत्वादिगुणानांमहदाद्यात्मनाव्यतिकरोयस्मात्सभगवान् गुणव्यति

पुरुषेश्वरयोरत्रनवैलक्षण्यमण्वपि ॥ तदन्यकल्पनापार्थाज्ञानंचप्रकृतेर्गुणः ११ प्रकृतेर्गुणसाम्येतुप्रकृतेर्नात्मनोगुणाः ॥ सत्वंरजस्तमइतिस्थित्युत्प
त्त्यंतहेतवः १२ सत्वंज्ञानंरजःकर्मतमोऽज्ञानमिहोच्यते ॥ गुणव्यतिकरःकालःस्वभावःसूत्रमेवच १३ पुरुषःप्रकृतिर्व्यक्तमहंकारोनभोनिलः ॥ ज्योतिरा
पःक्षितिरितितत्त्वान्युक्तानिमेनव १४ श्रोत्रंत्वग्दर्शनंघ्राणोजिह्वेतिज्ञानशक्तयः ॥ वाक्पाण्युपस्थपाय्वंघ्रिकर्माण्यंगोभयंमनः १५ शब्दःस्पर्शोरसोगंधो
रूपंचेत्यर्थजातयः ॥ गत्युक्तयुत्सर्गशिल्पानिकर्मायतनसिद्धयः १६ सर्गादौप्रकृतिर्ह्यस्यकार्यकारणरूपिणी ॥ सत्वादिभिर्गुणैर्धत्तेपुरुषोऽव्यक्तमीक्षते १७

करःकिंनामधेयइत्यतउक्तं कालइति कालकामधेनाविितिधातोःसर्जनेनब्रह्मादीनामभीष्टदोग्धृत्वात्कालनामाइत्यर्थः अनेनकारणत्वानुपपत्तिरपिपरिहृतेतिज्ञायते कारणस्यनामांतरंचाह स्वभावइति
स्वतंत्रोभावःस्वभावःस्वरूपभूतोभावोभूतिरैश्वर्यंयस्यसतथाइतिवास्वाधीनोभावःसत्तायस्यसतथेतिवा स्वनियतोभावोजन्मादिलीलायस्यसतथेतिवा वायुनावैगौतमसूत्रेणेत्यादेर्वायोरेवसर्जना
दिप्रतीतेःकथमत्रभेवसर्वकर्तेतितत्राह सूत्रमिति सूत्रंसर्वाधारः अक्षरमंबरांतधृतेरितिसूत्रादेतल्लिंगंभगवदेकनिष्ठमित्येवशब्देनावधारयतिचशब्देनयोदेवानामितिश्रुतेर्वायुशब्दःसावकाशइतिदर्शयति
१३ नवैकादशपंचत्रीनित्यत्रनवतत्त्वानिवक्ति पुरुषइत्यादिना पुरुषोहिरण्यगर्भःप्रकृतिर्गायत्रीव्यक्तोरुद्रःअहंकारःस्कंदः यदापुरुषशब्देनविरिंचस्यैववाच्यता। परस्यपृथगुक्त्यैवव्यक्तस्तत्रतुशंकरः।तदा
हंकारशब्देनस्कंदस्यैववचोभवेदितिवाक्यादयंनियमःप्रामाणिकइत्यर्थः १४ एकादशतत्त्वान्याह श्रोत्रमित्यादिना ज्ञानशक्तयःज्ञानेंद्रियाणिकर्माणिकर्मेंद्रियाणिउभयंसंकल्पविकल्पात्मकंमनः १५
एषांविषयानाह शब्देति अर्थजातयःविषयसामान्यानि अनेनपंचतत्त्वान्युक्तानि कर्मायतनसिद्धयःकर्मेंद्रियविषयाःपायूपस्थयोर्विषयावुत्सर्गशब्देनोक्तौ द्विविधत्वात्पंचकद्वयंपंचेत्यनेनद्विरावृत्तिर्ग्राह्या
पंचपंचेति तथाचशब्दादिशिल्पांतानिदशतत्त्वानि १६ त्रीणितिसत्वादिगुणास्त्रीणितत्त्वानिइतिवक्तुंसत्त्वादिगुणप्रवृत्तिमाह सर्गादाविति अस्यजगतःसर्गादौउपादानकारणात्मकजडप्रकृत्यभिमानिनी
चित्प्रकृतिर्हरिवन्निमित्तकारणरूपिणीअंतर्नियंतृरूपेणप्रवेशात्कार्यरूपिणीचसत्वादिभिःश्रीर्भूर्दुर्गेतिरूपभेदेनसत्वादिगुणाभिमानिनीधत्तेजगदितिशेषः एवंचपुरुषादितमोगुणांतानिहरिणासहचतुस्त्रिंश

त्तत्त्वानीतिभागवतंमतं परस्परानुप्रवेशादित्युक्तयुक्तिंविवृणोति पुरुषइत्यादिना कालादिनाम्नाहरिणानुगृहीतःपुरुषनामाहिरण्यगर्भःसृष्टयर्थमव्यक्तनाम्नींसरस्वतीमीक्षतेसंक्षोभ्यइतिमत्वाव्यक्तादित त्त्वानिसरस्वतींनिमित्तीकृत्यसृजतीत्यर्थः १७ अतएवकार्यकारणरूपेणसृष्टाव्यक्तादयोधारणशीलत्वाद्धातुनामानस्तत्त्वविशेषाः पुरुषेक्षयापुरुषस्यहरेःकटाक्षगोचरत्वेन संहताःसंश्लिष्टाःप्रकृते र्बलाद्विकुर्वाणाः लब्धवीर्याःकार्यकारणशक्त्यन्विताः अंडंब्रह्मांडंसृजंतीत्यन्वयः यद्वा जडप्रकृतिरस्यजगतःसर्गादौसत्त्वादिगुणैर्जगद्धत्ते पुरुषोविष्णुरव्यक्तंप्रकृतिमीक्षते तन्नियंताधातवोंडसृजं तीतिकार्यकारणभावादन्योन्यानुप्रवेशोयुक्तइतिवक्तुंसृष्टिकथनं सृज्यसृष्टिस्वरूपत्वादन्योन्यानुप्रवेशिनः । तिष्ठंतितात्विकादेवाविशेषप्रीतिकारणादितिवचनात् अतस्तत्त्वानामल्पसंख्यावत्त्वंयुक्तं १८ तत्रसत्त्वादीन्गत्यादींश्चविनाहरिणासहितानिषड्विंशतितत्त्वानि महदहंकारौब्रह्मरुद्रावंगीकृत्यस्कंदंविनापरमात्मनासहपंचविंशतिः । व्यक्तंविनाचतुर्विंशतिरित्येतानि न्यूनसंख्याकतत्त्वानिसिद्धवत्क त्यसप्तैकइत्यादिन्यूनसंख्यानिकथयति सप्तैवेति यत्रयस्मिन्पक्षेसप्तैवधातवस्तदैवंगणनंकर्तव्यं शब्दाद्यर्थाःखादयश्चैकीकारंगताःपंचषष्ठोज्ञाननामाब्रह्मासप्तमउभयाधारः अभिमन्यमानाभिमा निनांआधारःआत्मापरमात्माइतिसप्तत्वं ततःशब्देनज्ञानात्मनावनुकृष्येते दशेंद्रियाण्येकीकृत्यैकंतत्वमसवःपंचप्राणाः देहइति देहाभिमानीदिवाकरः ज्ञानात्मानाविंतिनवतत्त्वानि ज्ञानशब्दो दितोब्रह्मातदाधारोहरिःस्मृतइति सर्वदेहाभिमानीतुदेहिनांतुदिवाकरइतिच इंद्रियात्मेंद्रएवैकः प्राणोनामप्रजापतिरितिचदेहप्राणौपंचेंद्रियाणिवा ज्ञानात्मभ्यांनवेतिवा यद्वा वागादीनांमनोधीन

व्यक्तादयोविकुर्वाणाधातवःपुरुषेक्षया ॥ लब्धवीर्याःसृजंत्यंडंसंहताःप्रकृतेर्बलात् १८ सप्तैवधातवइतियत्रार्थाःपंचखादयः ॥ ज्ञानमात्मोभयाधारस्त तोदेहेंद्रियासवः १९ षडित्यत्रापिभूतानिपंचषष्ठःपरःपुमान् ॥ तैर्युक्तआत्मसंभूतैःसृष्ट्वेदंसमुपाविशत् २० चत्वार्येवेतितत्रापितेजआपोन्नमात्मनः ॥ जातानितैरिदंजातंजन्मावयविनःखलु २१ संख्यानेसप्तदशकेभूतमात्रेंद्रियाणिच ॥ पंचपंचैकमनसाआत्मासप्तदशःस्मृतः २२ तद्वत्षोडशसंख्यानिआ त्मनामनउच्यते ॥ भूतेंद्रियाणिपंचैवमनआत्मात्रयोदश २३ इतिनानाप्रसंख्यानंतत्त्वानामृषिभिःकृतम् ॥ सर्वंन्याय्ययुक्तिमत्त्वाद्विदुषांकिमशोभनम् २४ उद्धवउवाच ॥ प्रकृतिःपुरुषश्चोभौयद्यप्यात्मविलक्षणौ ॥ अन्योन्यापाश्रयात्कृष्णदृश्यतेनाभिदातयोः २५

त्वेनमनसैकत्वंपंचश्रोत्रादींद्रियाणिदेहप्राणौपरमात्मनासहेतिनव १९ षडित्यत्रैवंसंख्यानं महदादिकारणानांकार्यानुप्रवेशेनपंचाकाशादिभूतानिपरमपुरुषःषष्ठइतिषट् नवसप्तत्रयोदश त्वेकेषांचित्कार्याणांकारणानुप्रवेशइतिज्ञेयं आत्मनःसंभूतैस्तैराकाशादिपंचभूतैर्युक्तःआत्माइदंसृष्ट्वासमुपाविशत् २० चत्वार्येवेति तानिकानीत्यत्राह तत्रापीति तत्रापिपंचस्व प्यात्मनोजातानितेजआपोन्नमितित्रीणिआत्मैकइतिचत्वारि अन्नंपृथिवी अवयविनइदंजन्मतैः तेजआदिभिर्जातंव्यक्तंखलुअवयवीदेहः २१ सप्तदशसंख्यानेत्वेवंगणनंपंचभूतानिपंचमात्राः पंचश्रोत्रादींद्रियाणिइतिपंचदशएकेनमनसासहआत्मापरमात्मासप्तदशइतिसप्तदशकं भूतमात्रेत्यनेनैकादशतत्वसंख्यानमपिज्ञेयं पंचभूतानिपंचमात्राश्चैकःपरमात्मेति । भूतानिमात्राश्चपरस्तत्त्वै कादशकंस्मृतमिति २२ षोडशसंख्यानितत्वानितद्वत्भूतमात्रेंद्रियाणिपंचपंचेत्युक्तवत् तर्हिपूर्वस्मात्कोविशेषइत्यतउक्तं आत्मनेति आत्मनःसन्निधिस्थत्वान्मनसस्तयोरेकत्वेन आत्मनःस न्निधिस्थत्वान्मनसस्तुतदुक्तिः । उक्तोभवेत्परात्मातुतत्त्वंषोडशकंयदेत्युक्तेः एवशब्दोवीप्साद्योतकःभूतानिपंचेंद्रियाणिपंचमनआत्माब्रह्मापरमात्माचेति त्रयोदशतत्वानि भूतेंद्रियाणिचमनाब्रह्मा विष्णुस्तथैवच । एवंत्रयोदशैवाहुस्तत्त्वानिमुनयोवराइति आत्मेतिपरमात्माचविरिंचश्चापिकथ्यते । वायुर्मनश्चदेहश्चस्वयमित्यापिकुत्राचिदिति २१ उपसंहरति इतीति २४ उद्धवएवंतत्वसंख्या विषयानुपपत्तिशंकापरिहारश्रवणेनतद्विषयेनिःशंकोपीदानींप्रकारांतरेणशंकते प्रकृतिरिति अत्रपुरुषोविष्णुःप्रकृतिर्जडसंज्ञातावुभौयद्यप्यात्मविलक्षणौस्वरूपतएवभिन्नौ अंतरंचभिदाचेतिवैलक्षण्यं

प्रकीर्तितमिति अतोवैलक्षण्यभेदःतथाप्यनयोरन्योन्याश्रयात्मिथःतद्दृश्यतेतत्कृतइतिचोद्यमभिप्रायः २५ अन्यान्याश्रयत्वंविवृणोति प्रकृतावात्महशब्दाहता हरःप्रकृतेराधारत्वेनतत्त उत्तमत्वंप्रकृतेस्तदधीनत्वेनतवरत्वमंतरेणानयोरन्योन्याधारत्वमेवदृश्यते हियस्मात्तस्मान्मंदमतेर्मसंशयंछेत्तुमर्हसीत्यन्वय पद्मेशेत्यनेनहरेःप्रकृत्युत्तमत्वंकिंवक्तव्यमितिजानन्नप्युद्धवोलोकविषयमं दमतित्वमात्मन्युपचरतीतिज्ञातव्यम् २६ एतदेवप्रामाणिकमितिभावेनाह त्वत्तइति तनुशक्तितोऽल्पबुद्धित्वात्तामसादिशरीरबलाद्वाज्ञानस्यप्रमोषोपित्वत्तः शक्तिःकामूर्बलंलक्ष्मीरिति कामूर्बुद्धौकुवा च्यस्तुइत्यभिधानाच्छक्तिशब्देनबुद्धिरित्युच्यते आत्ममायायाःस्वसामर्थ्यस्यत्वदधीनप्रकृतेर्वागतिःस्थिति आधारःप्रकृतेर्विष्णुर्नाधारस्तुहरेःक्वचित् । तथाप्यव्यक्तगोयद्वद्दृश्यतेमंदचेतसामितिपाद्मोक्तव चनान्मुख्याधारत्वंहरेरितरत्रमंदमतिविवक्षयेतिहिशब्दद्वयेनदर्शयति २७ आत्मविलक्षणावितियच्चदुक्तंतत्तथैवेतिभावेनपरिहरति प्रकृतिरिति चशब्दोवैलक्षण्यानुकर्षार्थोवधारणार्थश्च प्रकृतिपुरुषा वन्योन्यविलक्षणावेवेत्यर्थःवैलक्षण्याविवेकःकिंकृतइतितत्राह विकल्पइति मिथ्याज्ञानकृतः ननुविकल्पःकिंकारणकइतितत्राह एषइति एषविकल्पःतमःकारणकइतिप्रतिज्ञायते तथाहि गुणव्यतिकरात्मकएषसर्गोवैकारिकःविकारनिमित्तःसचगुणव्यतिकरश्त्रिविधः सत्वरजस्तमसामेकैकप्राधान्येनत्रैविध्यं तत्रतमःप्रधानानामेवसत्वानांविरुद्धकल्पनंयस्मात्तस्मात्तमएवकारणम् २८ नकेवलंतमएवप्रकृतिरीश्वरेच्छाचकारणमित्याह ममेति अंगउद्धव मममायामयेच्छागुणमयीज्ञानादिगुणमयी सत्वादिगुणमयी मममायामदधीनाप्रकृतिश्च गुणैर्गुणभूतैर्महदहंकारादिभिः

प्रकृतौलक्ष्यतेह्यात्माप्रकृतिश्चतथात्मनि ॥ एतन्मेपुंडरीकाक्षमहांतंसंशयंहृदि ॥ छेत्तुमर्हसिपद्मेशवचोभिस्तत्त्वनैपुणैः २६ त्वत्तोज्ञानंहिजीवानांप्रमोष स्तनुशक्तितः ॥ त्वमेवह्यात्ममायायागतिंवेत्थनचापरः २७ श्रीभगवानुवाच ॥ प्रकृतिःपुरुषश्चेतिविकल्पःपुरुषर्षभ ॥ एषवैकारिकःसर्गोगुणव्याति करात्मकः २८ ममांगमायागुणमय्यनेकधाविकल्पबुद्धिंचगुणैर्विधत्ते ॥ वैकारिकस्त्रिविधोध्यात्ममेकमथाधिदैवमधिभूतमन्यत् २९ दृग्रूपमर्कश्चपरत्ररंध्रेपरस्परंसिध्यतिनस्वतोसौ ॥ आत्मायदैषामुपरामआद्यःस्वयानुभूत्याखिलसिद्धसिद्धिः ३०

सत्वादिगुणैर्वानेकधाविकल्पबुद्धिंविधत्तेकरोति महत्तत्त्वविकाराज्जातत्वाद्वैकारिकोहंकारस्त्रिविधः महत्तत्त्वाद्विकुर्वाणादहंतत्वमजायतइत्यादिनाप्रसिद्धं वैकारिकोमहांश्चैवतथाहंकारएवच । त थैवसात्विकश्चांशोवैकारिकइतित्रिधेतिच सोयंत्रिविधोपित्रिविधः अध्यात्मादिभेदेन २९ एतत्त्रैविध्यंशृंगग्राहिकयैवदर्शयति दृग्रूपमिति रंध्रेगोलके दृक्चक्षुरिंद्रियंतदध्यात्ममुपलक्षण मेतत् अध्यात्मंइंद्रियाणितैजसाहंकारस्वरूपाणि तैरेवविपरीतज्ञानंजायते अहंकारेविद्यमानेभ्रमोभवतिनान्यदेतिवचनात् परत्रदेहाद्बहिर्यद्रूपंतदधिभूतम् तामसंपरत्रादेवियोर्कस्तदधिदैवतं वैकारिकं अनेनकिंप्रयोजनमत्राह परस्परमिति अध्यात्मादिगतचक्षुरादीतरेतरापेक्षयासिद्धयति ज्ञानाख्यंप्रयोजनंभवति असौसिद्धिःस्वतोन एकैकस्मान्नस्यात् चक्षुराद्यन्यतमाभावेज्ञानं नोदेतीत्यर्थः नैतावतापरस्परासिद्धिःपूर्यतइत्याह आत्मेति यदात्माप्रयत्नोजडाहंकारोवास्तितदाध्विदंवैकारिकंज्ञानं । प्रकृतिप्राकृतव्यतिरिक्तंजीवपरमात्मस्वरूपंकथानुविशदंदृश्यतइत्यत्राह ए षामिति आत्मेत्यनुवर्तते यदैषांप्रकृतिप्राकृतानांउपरामःअत्यंतोच्छेदनलक्षणामुक्तिस्तदास्वयानुभूत्यास्वरूपज्ञानेनात्माजीवआद्यःआत्मापरमात्मावज्ञायतइतिशेषः कीदृशोहरिरखिलस्यसिद्धयसि द्धीज्ञानाज्ञानेयस्मात्सतथा सर्वस्यज्ञानाज्ञानहेतुरित्यर्थः सम्यक्ज्ञानंहरेःशक्त्यातन्मुक्तस्यविशेषतः । देवतानुग्रहोनित्योमुक्तस्यापिह्यपेक्ष्यते । नित्यंतत्प्रतिबिंबत्वाज्जीवानामेवकृत्स्नशः । बाह्यज्ञा नंचमुक्तस्यनजडाहंकृतेःक्वचित् । किंतुस्वरूपशक्त्यैवदेवेभ्यश्चाभिजायत इतिवचनात् २०

उक्तन्यायमतिदिशति एवमिति चक्षुर्जिह्वादिनासहत्वगादिश्रवणादिचैवमध्यात्मादिभेदेनत्रिविधंसादिचानित्यमन्योन्यापेक्षत्वात् कीदृशंत्वगादि चित्तयुक्तं अनेनचित्तंमनोपित्रिविधमितिज्ञातते चक्षुरितिपुनर्वचनमवधारणार्थम् ३१ तामसाहंकारोपिविकल्पहेतुरितिसूचितंपुरस्तात्तदिदानींस्पष्टयति योसाविति योसौमोहविकल्पहेतुरज्ञानान्यथाज्ञानहेतुर्विकारःसत्वादिगुणक्षोभोमहत्तत्वंतेनकृतःसोहमहंकारस्त्रिवृत्त्रिरूपत्वेनवर्तते त्रिःप्रकारमाह वैकारिकइति वैकारिकस्तामसऐंद्रियइंद्रियोत्पत्तिहेतुः तैजसश्चेति प्रयोजनमाह जगतइति जगतःप्रसूतिःसृष्टिर्यस्मात्सतथा जगत्सृष्टिहेतुरित्यर्थः अनेनप्रकृतेःकारणत्वंगतमत्राह प्रधानेति प्रधानंप्रकृतिर्मूलंमहत्तत्वद्वाराकारणंयस्यसतथा ३२ महदादिकार्यानुगतस्यहरेरपिगुणक्षोभकृतोविकारःस्यादितितत्राह आत्मेतिआत्मापरमात्मागुणक्षोभकृतविकारवान्नपरिज्ञानमयत्वात् पूर्णज्ञानस्वरूपत्वात्विकाराभिमानित्वमंतरेणज्ञानस्वरूपत्वेनआत्माजीवोपिनगुणक्षोभकृतविकारइति विकल्पस्वरूपमाह विवादइति जीवेश्वराभेदंजगन्मिथ्यात्वादिकमसदस्ति जीवेश्वरभेदप्रपंचादिकंसन्नास्तीतिभिदयावस्तुयाथार्थ्यादिविपर्ययेणार्थनिष्ठःपदार्थनिष्ठोविवादोविकल्पोभवति केषामित्यतउक्तंव्यर्थइति सविकल्पोव्यर्थोप्यविद्यमानविषयोपितथानिष्प्रयोजनोपिस्वलोकात्स्वाश्रयान्मत्तःपरावृत्तधियामपगतबुद्धीनांपुसांनोपरमेतपुनःपुनर्वर्द्धतइत्यर्थः असदस्तिचसन्नास्तीत्येवंभेदाद्विवादनं। सदैवहरिपादाब्जविमुखानांप्रवर्तते इतिमानहिशब्दगृहीतम् ३३ त्वद्विमुखानांस्वकृतकर्ममूढानामेषांपुनर्भवोस्तीतिसिद्धं तत्रनित्यानांजीवानांजन्ममृतीकीदृश्यौकर्मेतरकारणंचकिमितिपृच्छत्युद्धवः । त्वत्तइति त्वत्तःपरावृत्तधियः

एवंत्वगादिश्रवणादिचक्षुर्जिह्वादिनासादिचचित्तयुक्तम् ३१ योसौगुणक्षोभकृतोविकारःप्रधानमूलोजगतःप्रसूतिः ॥ अहंत्रिवृन्मोहविकल्पहेतुर्वैकारिकस्तामसऐंद्रियश्च ३२ आत्मापरिज्ञानमयोविवादोह्यस्तीतिनास्तीतिभिदार्थनिष्ठः ॥ व्यर्थोपिनैवोपरमेतपुंसांमत्तःपरावृत्तधियांस्वलोकात् ३३ उद्धवउवाच ॥ त्वत्तःपरावृत्तधियःस्वकृतैःकर्मभिःप्रभो ॥ उच्चावचान्यथादेहान्गृह्णंतिविसृजंतिच ३४ तन्ममाख्याहिगोविंददुर्विभाव्यमनात्मभिः ॥ न ह्येतत्प्रायशोलोकेविद्वांसोचंतिवंचिताः ३५ श्रीभगवानुवाच ॥ मनःकर्ममयंनृणामिंद्रियैःपंचभिर्युतम् ॥ लोकाल्लोकंप्रयात्यन्यमात्मातदनुवर्तते ३६ ध्यायन्मनोहिविषयान्दृष्टान्वानुश्रुतानथ ॥ उद्यत्सीदत्कर्मतंत्रंस्मृतिस्तदनुशाम्यति ३७ विषयाभिनिवेशेननात्मानंयत्स्मरेन्मनः ॥ जंतोर्वैकस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः ३८

स्वतोनित्याजीवाअहंजातोहंमृतइत्यभिमानेनस्वकृतैः कर्मभिर्यथोच्चावचान्देहान्गृह्णंतिविसृजंतिच ३४ तद्ग्रहणादिकंतथाममाख्याहि बुद्धिबलविधुरैर्दुर्ज्ञेयंचेदपिबुद्धिमद्वचःश्रोतुंशक्यत्वात्किमितिममाख्येयमितिनिर्बंधइतितत्राह नहीति नांचंतिनावगच्छंतिनजानंतीत्यर्थः अंचुगतिपूजनयोरितिधातुः गतिर्ज्ञानार्थः वंचितामोहितास्त्वयेतिशेषः ३५ नित्यानांजीवानांदेहग्रहणादौ कारणंकर्मइतरन्मनोपीत्याशयवान्परिहरति मनइति मरणकालेकर्ममयंकर्मसंस्कारोपचितंलिंगात्मकंसूक्ष्मैःपंचभिरिंद्रियैर्युतंमनोलोकादेहादन्यंलोकंदेहंप्रयाति तदात्माजीवः । तन्मनोनुवर्तते कर्मेश्वरस्तन्मयंतत्प्रधानंतत्प्रेरितमितिवाअनादितःप्रकृतिमयेनतेनबद्धत्वात्तदनुवर्तनंयुक्तम् ३६ मनःप्रधानःपुरुषोनुवर्ततइत्यनेनमनसःप्रयोजकत्वंप्रतीयतेतत्कथमत्राह ध्यायन्निति मनोदृष्टानथश्रुतान्विषयान्ध्यायन्स्यादितिहियस्मात्तस्मात्पुरुषप्रवृत्तौमनःप्रयोजकमितिशेषः । इतोपिमनःप्रयोजकमित्याह अथेति अथपदाकर्मतंत्रंविषयसंस्कारसमुद्रमग्नंमनःसीदद्विपन्नमात्मनोदेहादुद्गतंभवति तदातदनुमनोनुजीवस्यस्मृतिरर्थस्मरणंशाम्यतिनश्यति देहांतराभिमानपर्यंतमितिशेषः ३७ मरणमेवस्पष्टयति विषयेति कस्यचित्कर्महेतोरुत्तरदेहंप्रवेक्ष्यन्विषयाभिनिवेशेनउत्तरदेहनिवेशेनजंतोर्मनआत्मानंपूर्वदेहंनस्मरेत्स्मरणसमर्थनस्यादितियत् सात्यंतविस्मृतिर्मृत्युरित्यन्वयः वाइत्यनेनजातस्यहिध्रुवोमृत्युरितिस्मृतिप्रसिद्धिद्योतयति ३८

इदानींजन्मस्पष्टयति जन्मांत पुंसादेहादिष्वहममदामत्याद्यात्मतयात्मायत्वनसवभावनसवचष्टयातसमस्तानमापपापिवरवाकृतिवलिन नाकुरु नत्वादिति तुशब्देनविशेषितेर्थेउदाहरति यथेति जाग्रादेदमित्थंस्वप्नोयथाअविद्यमानोयथाचमनोरथविषयोप्यविद्यमानोनत्वनिर्वचनीयः परस्यापिजीवस्यातोजन्ममृतियुक्तेइतिभावः स्वाप्नइतिपाठे स्वप्नेजायत्रानोजाग्रत्त्वप्रत्ययोयथाअविद्यमानइत्यर्थः ३९ अत्यंतविस्मृतिंसोदाहरणंस्पष्टयति स्वप्नामिति यथास्वप्नादेरुत्थितःस्वप्नस्पष्टंमनोरथंचप्राक्तनमर्थंतद्विषयंचासौस्वप्नादिदृक्नस्मरतितथातत्रदे हांतराभिमानेसतिपूर्वंपुरातनमात्मानं देहंनस्मरति इवशब्दःकेषांचिन्महात्मनांस्मरणंसंभवतीत्यस्मिन्नर्थे अस्मरणेकारणमाह अपूर्वमितिचशब्दएवार्थेअपूर्वंपश्चात्तनंनूतनंदेहमेवानुपश्यति यत्तत्तइति यद्वा विषयाभिनिवेशमेवस्पष्टयति स्वप्नमिति प्राक्तनंस्वप्नमनोरथंचयथानस्मरति असौतथाप्राक्तनजन्माचनुभूतमर्थंविषयंचनस्मरति किंतत्रानिमित्तमत्राह तत्रेति तत्र देहांतरप्राप्तौपूर्वमनादिमेवात्मानंअपूर्वसा दिमिवानुपश्यतिइतियस्मात्तस्माद्विषयाभिनिवेशएवकारणमित्यर्थः ४० अत्रजीवस्यानादिनित्यत्वंदेहस्यसादित्वेनानित्यत्वंतत्राभिमानानभिमानलक्षणेजन्ममृतीइत्युक्तं तत्रजीवस्यानादिनित्यत्वेयुक्त मुक्तंत्वदेवकथमत्राह ईदृशेति वस्तुनिजीवतत्त्वेविज्ञायविचारेणज्ञातेसति जीवस्यानादिनित्यत्वंज्ञायते तथाहि · ईदृशःइदानींतनकालवर्त्येवायास्यतीत्यायएष्यत्कालवर्तीचायमेवसःअतीतकाल संबंधइतित्रैविध्यंजीवस्यत्रिकालवर्तित्वंभाति तदेवानादिनित्यत्वंदेहस्यतदभावादतोयुक्तमुक्तं ईदृशायासइत्यत्रयासइतिदीर्घस्यलोपोवक्तव्यः क्षैप्रेदीर्घलोपइति यत्ज्ञानमंतरेणपुरुषार्थोनस्यात्तत्रक्षि प्रंप्रवर्त्तनीयमितिज्ञापनायप्रयुक्तदीर्घोलुप्यतइतिसूत्रादत्रातइतिप्रयोगाच्च अनित्यशरीरसंबंधेनजीवस्याप्यनित्यत्वमापद्यतइतितत्राह बहिरिति बहिर्नारिकेलकपालवत् बहिष्ठोदेहोजीवाद्भिन्नोनारिकेल

जन्मत्वात्मतयापुंसःसर्वभावेनभूरिद ॥ विषयस्वीकृतिंप्राहुर्यथास्वप्नमनोरथः ३९ स्वप्नंमनोरथंचार्थंप्राक्तनंनस्मरत्यसौ ॥ तत्रपूर्वमिवात्मानमपूर्वं चानुपश्यति ४० ईदृशायासविज्ञायत्रैविध्यंभातिवस्तुनि ॥ बहिरंतर्भिदाहेतुर्जनोसज्जनकृद्यथा ४१ नित्यदाह्यंगभूतानिभवंतिनभवंतिच ॥ कालेना लक्ष्यवेगेनसूक्ष्मत्वात्तन्नदृश्यते ४२ यथार्चिषांस्रोतसांचफलानांवावनस्पतेः ॥ तथैवसर्वभूतानांवयोवस्थाचतत्कृता ४३

वदंतःस्वांतर्वर्तिनोजीवस्यभिदायाअनित्यत्वादिविशेषस्याहेतुः आपादकोनभवति भेदोविशेषदलनइत्यभिधानं जीवस्यानादिनित्यत्वेपरमात्मनाअभेदःप्राप्नइत्यतोवाह बहिरिति बहिरंतर्वर्तिनोहरे र्भिदायाहेतवोदुःखादयोयस्यसबहिरंतर्भिदाहेतुः अस्तुहरेर्भेदोजीवस्यदेहाद्भेदःकथमित्यतोवाह बहिरिति अयमेवबहिरंतस्थत्वधर्मःआत्मानात्मनोर्वैलक्षण्येभेदाहेतुर्विशेषहेतुरित्यर्थः देहस्यानात्म त्वंसोदाहरणमाह जनइति यथाअसज्जनोऽसज्जनकृत्प्रायोसज्जनोसज्जनंपुत्रमेवजनयतीतिपितृज्ञानात्पुत्रदौरात्म्यंज्ञायते एवमनित्योदेहोनित्यंदेहंजनयतीति अतोदेहस्यानित्यत्वाज्जीवस्यत्रैकालिकन र्तित्वंनानित्यत्वात् देहस्यानात्मत्वमतएवजीवाद्भिन्नत्वंचसिद्धं असाधुजनएवजीवपरयोरभेदंवक्तीतिसोदाहरणमाह जनइति यथाऽसाधुजनएवासाधुजनंकरोतिनसाधुःएवमासुरोजनोपिसंतंभेदमसंतंकरो तिअतोऽसाधुजनपरंपरादौरात्म्यंसाधुजनवाक्याज्ज्ञायतइत्यर्थः ४१ देहस्यानित्यत्वप्रकारमाह नित्यदेति नित्यदाप्रतिक्षणंभूतानिजीवाधिष्ठितदेहाअंशतोभवंत्युपचितानिभवंतिनभवंतिच अपाचि तानिभवंतिच किमितिनदृश्यतेइतितत्राह कालेनेति उपचयापचययोःसूक्ष्मत्वाल्लिंगवेद्यत्वाच्चक्षुपातन्नदृश्यते ४२ तदेवसोदाहरणंवक्ति यथेति यथार्चिरादीनांसेयंज्वालेत्यादिप्रतीतिः कालकृ तातथासर्वभूतानांसर्वप्राणिदेहानांवयोवस्थाबाल्यकौमाराद्यवस्थातेनकालेनकृता ४३

---

१ महाव्याकरणमिदंसूत्रं । २ संहिततयाउच्चारणकालेउच्चार्यमाणोदीर्घः पदकालेलुप्यतइत्यत्रप्रयोगंदर्शयति अत्रातइति अत्रातआहुःपरमंजरित्रमित्यत्र अत्रतेआहुः परमंजारित्रमितिपदच्छेदात् ।

नन्वस्तुकालरूपत्वमत्रविवेकःकथमित्यतउक्तमेवविवृणोति सोयमिति यथाप्रतिक्षणमग्निज्वालादीनामागमापायभावेपत्सोयंदीपइतिप्रत्यभिज्ञानंमृषेति तत्रोध्याहारः सएवायं दीपइत्यादिप्रत्यभिज्ञामृषा तथामृषागीर्भिर्मृषा युषांपुंसांकेषांचिद्विशेषाणामागमात् केषांचिदपगमात् सएवायंपुमानितिदेहविषयोव्यवहारोमृषाविवेकिनांसचायंदेहइत्यादिकोनमृषा सचायमितितुज्ञानंनमृषायंसएवतुइतिज्ञानंमृषैवस्यादित्यादेर्विशेषविवेकोयुज्यते ४४ ननुदेहस्यैवविकारश्चेदहंजातोहंमृतइतिप्रतीतिः कथमत्राह आद्यइति आद्यउत्पत्तिरहितोमरोमरणरहितः आद्यंतशून्यइत्यर्थः अव्ययःशरीरसंयोगवियोगयोरपि वृद्धिक्षयादिरहितःसजीवः स्वकृतकर्मबीजेनजायतेम्रियतेचेतिव्यवहारोभ्रांत्याविवेकज्ञानराहित्येनयथादारुसंयुक्तोग्निरुत्पत्तिविनाशवानित्युच्यते तस्मान्नित्यस्यजीवस्यजननमरणप्रतीतिरविवेककृतेत्यर्थः सचायमितितुज्ञानंनमृषायंसएवतु। इतिज्ञानंमृषैवस्याद्भेदाभेदौयतस्तनोः। अभेदएवजीवस्यनित्यंप्रत्येकशःपृथक्। देहदीपनदीवारिफलादीनांपृथक्कृतः। भेदाभेदौपरिज्ञेयौकार्यकारणयोरपि।गुणस्य गुणिनश्चैवजातिव्यक्त्योस्तथैवच। तथावयव्यवयवयोःक्रियायास्तद्वतस्तथा। एवंजडेषुनियमश्चिद्रूपेष्वभिदैवतु।येधर्मानियमेनैवधर्मिणोनवियोगिनः। जडस्थाअप्यभिन्नास्तेभिन्नाभिन्नावियोगिनइतिवचनात् यावद्द्रव्यभाविनामभेदोयावद्द्रव्यभाविनांभेदाभेदाविति निर्णयइति ४५ जन्मादिकंजीवस्यनैवेत्युक्त्यादेहस्यासिद्धंद्रढयति निषेकेति ४६ चिद्रूपस्यजीवस्यजडशरीरसंबंधःकथंघटतइतितत्राह एताइति अन्यस्यहरेरधीनामनोरथमयीरेतास्तनूःसत्त्वादिगुणसंगादुपादत्तेअभिमनुते अभिमानंजहातिच हरेरिच्छागुणसंगश्चघटकइत्यर्थः ४७ अभिमानस्वीकारोजन्मतदत्यंतविस्मृतिर्मरणमित्यु

सोयंदीपोर्चिषांयद्वत्स्रोतसांतादिदंजलम् ॥ सोयंपुमानितिनृणांमृषागीर्भिर्मृषायुषाम् ४४ आद्यःस्वकर्मबीजेनजायतेसोव्ययःपुमान् ॥ म्रियतेचामरो भ्रांत्यायथाग्निर्दारुसंयुतः ४५ निषेकगर्भजन्मानिबाल्यकौमारयौवनम् ॥ वयोमध्यंजरामृत्युरित्यवस्थास्तनोर्नव ४६ एतामनोरथमयीर्ह्यन्यस्योच्चाव चास्तनूः ॥ गुणसंगादुपादत्तेक्वचित्काश्चिज्जहातिच ४७ आत्मनःपितृपुत्राभ्यामनुमेयौभवाप्ययौ ॥ भवाप्ययौहिवस्तूनांअभिज्ञाद्वयलक्षणौ ४८ तरोर्बीजविकाराभ्यांयोविद्वान्जन्मसंयमौ ॥ तरोर्विलक्षणोद्दष्टएवंद्रष्टातनोःपृथक् ४९

क्तंद्वयंनिष्प्रमाणकत्वेनमायामयंकिंनस्यादत्राह आत्मनइति आत्मनोदेहस्यभवाप्ययौजन्मनाशौपितृपुत्राभ्यांलिंगाभ्यांअनुमेयौ तथाहिस्वदेहात्पुत्रदेहोजातः यत्तस्माज्जन्मसिद्धंयथाचपितृश रीरंविनष्टंपुत्रेणदृष्टंयत्तस्मात्तदपिप्रत्यक्षसिद्धमेवंदेहस्यजननमरणेसिद्धेइतिभावः ननुतर्हिदेहस्यविद्यमानेजातोमृतइतिचेतनविषयत्वेनकथंव्यपदिश्यतइतितत्राह भवाप्ययाविति वस्तूनांनित्यानां जीवानांजातोहंमृतोहमितिव्यपदिश्यमानौभवाप्ययौअभिज्ञाद्वयलक्षणौअभिज्ञाद्वयंजातोमृतइतिअभिमानद्वयमेवलक्षणंययोस्तौ तथाहियस्मात्तस्माद्व्यपदेशइतिभावः ४८अभिमानमात्रसमर्थनेनकिंप्रयो जनमित्याशंक्यअभिमानपरित्यागेनैवसंयमलक्षणोर्थइतिभावेनाह तरोरिति यस्तरोर्जन्मसंयमौबीजविकाराभ्यांबीजाद्विकाराच्चविद्वान्जानाति यथातेनविदुषातर्वतःस्थितआत्मातन्नियामकः पर मात्माचतरोर्विलक्षणोदृष्टः एवंदेहस्यजन्मसंयमौद्रष्टाजीवःतन्नियामकःसर्वज्ञःपरमात्माचतनोःपृथक्भिन्नइत्यर्थः अनेनतरोर्बीजविकारदृष्टांतेनविद्वान्देहाभिमानंत्यक्त्वासंयमंयाति सर्वस्माद्धरेर्भेदं जाना तीत्युक्तमत्रकिंप्रमाणमित्यतोवाह तरोरिति विद्वद्दर्शनंमानमित्यर्थः योबीजविकाराभ्यांजन्मसंयमौविद्वांस्तरोरवस्थांगतस्तरोर्विलक्षणोयथादृष्टएवंदेहस्यजन्मादेर्द्रष्टाजीवाच्छरीराद्भिन्नइतिस्वानुभव सिद्धमुक्तमितिभावः बीजाद्यवस्थासंयुक्ताद्वृक्षाद्द्रष्टायथापृथक्। एवंविकारिणोविष्णुर्जीवश्चपृथगेवत्वितिवचनात् ४९

---

१ सोयमितिश्लोकेसोयंपुमानितिदेहविषयकप्रत्यभिज्ञायाःभ्रांतित्वमुच्यतेतदनुपपन्नं तथात्वेदेहस्यक्षणिकत्वापत्तेरितिशंकानिरासकत्वेनप्रवृत्तत्तात्पर्यानुरोधेनप्रत्यभिज्ञाद्वयंप्रदृश्ययोजयति । तथाचप्रत्यभिज्ञासाव धारणानिरवधारणाच्चेतिद्विविधा । आद्याभ्रमरूपा । जडेभेदाभेदसद्भावात् । द्वितीयाभेदाविरोधित्वात्प्रमैव २ तथाचायंप्रयोगःमदीयोदेहःउत्पतिमान्पुत्रदेहत्वात्मःपुत्रदेहवत् । मदीयोदेहःविनाशवान् पितृदेहत्वान्मत्पितृदेहवत्इति ।

विकारिणोदेहाज्जीवपरमात्मादिभेदेनज्ञानंमुक्तिसाधनंतद्भेदज्ञानंसंसारकारणमित्याह प्रकृतीरिति प्रकृतदेहादरात्मानजीवपरमात्मानचतत्त्वनाशावस्यसम्यक्प्रमममज्ञात्वाअतएवाशुध० पुनरुत्तरस्म
तिपद्यते अज्ञानेनिमित्तमाह स्पर्शेति स्पर्शाविषयाःतत्रासक्तत्वान्मूढः ५० संसारतारतम्यमपिसत्त्वादिगुणनिमित्तमित्याह सत्त्वसंगादिति सत्त्वसंगात्सात्विकसंगलब्धपुण्यकर्मणाऋष्यादीन्प्राप्नोति र
जसाराजसकर्मणाआसुरमानुषानासुरादिकंप्राप्नोति तामसकर्मणाब्रह्मराक्षसादिभूततिर्यग्योनित्वमाप्नोति ५१ स्वतःसात्विकानासुरादीनांदुःखित्वमितरेषांसुखित्वमित्यादिविपरीतानुभवःकथमत्राह
नृत्यतइति यथालोकेनर्तनादिकुर्वतःपश्यन्स्वयंचतान्पुरुषाननुकरोति नृत्यादिकरोति एवमनीहोपिदुःखाद्यनुभवायोग्योपिबुद्धिगुणान्दुःखादीन्पश्यन्नुभवन्नहंदुःखीत्यादिममत्वेनानुकार्यतेहरिणेति
शेषः दुःखशोकादयःसर्वेज्ञेयाबुद्धिगुणाइति । सुखज्ञानेतुजीवस्यशक्तिस्तेहस्तथैवच । विपर्ययेणासुराणांजीवबुद्धिगुणामताः । आत्मनोपिगुणाबुद्धिकृताबुद्धिगुणाइति । उच्यंतेसुखदुःखाद्याःपरमात्म
कृताइति । इतिवचनात् ५२ स्वतःसुखादिरूपाणांचेतनानांदुःखादिरूपत्वप्रत्ययोभ्रांतइत्येवंबहुदृष्टांतैःसमर्थयते यथेत्यादिना यथाप्रचलताजलेनतीरस्थास्तरवोपिचलाश्चलनधर्मवंतइवदृश्यंते यथाच
भ्राम्यमाणेनचक्षुषाभूम्र्याम्यतीवदृश्यते ५३ यथाचमनोरथधियोमनोरथविषयाःमृषावृथा यथाचस्वप्नदृष्टोविषयानुभवोपिमृषा हेदाशार्हउद्धव आत्मनोजीवस्यसंसारोपिवृथाअल्पप्रयोजनः अल्पप्रयोजनं

प्रकृतेरेवमात्मानमविविच्यापबुधःपुमान् ॥ तत्त्वेनस्पर्शसंमूढःसंसारंप्रतिपद्यते ५० सत्त्वसंगादृषीन्देवान्रजसासुरमानुषान् ॥ तमसाभूततिर्यक्त्वंभ्रा
मितोयातिकर्मभिः ५१ नृत्यतोगायतःपश्यन्यथैवानुकरोतितान् ॥ एवंबुद्धिगुणान्पश्यन्नहीहोप्यनुकार्यते ५२ यथांभसाप्रचलतातरवोपि
चलाइव ॥ चक्षुषाभ्राम्यमाणेनदृश्यतेभ्राम्यतीवभूः ५३ यथामनोरथधियोविषयानुभवोमृषा ॥ स्वप्नदृष्टश्चदाशार्हतथासंसारआत्मनः ५४
अर्थेह्यविद्यमानेपिसंसृतिर्ननिवर्तते ॥ ध्यायतोविषयान्पुंसःस्वप्नेप्यर्थागमोयथा ५५ तस्मादुद्धवमामुंक्ष्वविषयानसदिंद्रियैः ॥ आत्माग्रहणनिष्प
न्नंपश्यन्वैकल्पिकंभ्रमम् ५६ क्षिप्तोवमानितोसद्भिःप्रलब्धःशापितोपिवा ॥ ताडितःसन्निरुद्धोवावृत्त्यावापरिहापितः ५७ विष्ठितोमूत्रितोवाज्ञैर्बहुधैवं
प्रकंपितः ॥ श्रेयस्कामःकृच्छ्रगतआत्मनात्मानमुद्धरेत् ५८ उद्धवउवाच ॥ यथैवमनुबुद्ध्येयंवदनोवदतांवर ॥ सुदुसहमहंमन्येआत्मन्यसदतिक्रमम् ५९

यत्तन्मृषेत्येवतदुच्यते । इतिवचनात् ५४ अस्वरूपत्वेकिमितिननिवर्ततइतितत्राह अर्थइति अर्थेदुःखित्वादिलक्षणेविषयेअविद्यमानेपिसंसृतिःसंसृष्टदुःखित्वादिप्रत्ययोननिवर्ततेकिंतुवर्ततएव अनिवृत्तौनिमि
त्तमाह ध्यायतइति निरंतरंशब्दादिविषयध्यानमनिवृत्तौकारणमित्यर्थःतत्कुत्रदृष्टमत्राह स्वप्नइति ध्यायतइत्यनुवर्ततेजाग्रद्दृष्टतुरगाद्यर्थंध्यानात्स्वप्नेप्यर्थागमस्तुरगाद्यर्थागमोयथाननिवर्ततेउपादानादि
व्यवहारानुभवात् अत्रयथांभसेत्यादिदृष्टांतानांप्रपंचमिथ्यात्वेनतात्पर्यं किंतुदेहसंबंधात्सुखरूपाणांजीवानांअहंदुःखीत्यादिप्रत्ययस्य यथास्वतःशुक्लःशंखोपिजपाकुसुमसन्निधानाल्लोहितइतिशंखविषये
लोहित्यप्रत्ययस्यमिथ्यात्वंइदंतथात्रापीतिसंतोष्टव्यम् ५५ फलितमाह तस्मादिति आत्मनोजीवस्यपरमात्मनोःस्वरूपाग्रहणेननिष्पन्नंवैकल्पिकंविरुद्धकल्पनाजनितंभ्रमंपश्यन् ५६ दुःसहविषयोपद्रवेपित
त्परिहारश्रयत्नोनकार्यःकिंतु विषयेभ्यःप्रत्याहृतमनसास्वात्मानंसंसारादुद्धर्तुंप्रयतेतेतिशिक्षयति क्षिप्तइत्यादिना ५७ ५८ विषयाःसोढव्याइतियद्धरिणोक्तंतत्रोद्धवश्चोदयति यथेति यथाव
त्स्पष्टीकुरु तेतवचरणाब्जयान्चरणैकशरणानृतेइतरेषांविदुषामप्यसतामात्मन्यतिक्रमंदुःसहंमन्ये तत्रहेतुगर्भविशेषणमाह प्रकृतिरिति प्रकृतिर्बलीयसीहि अहंममेतिदेहादिमानस्वभावोबलिष्ठोऽ
परिहार्योयस्मात्तस्मादितिशेषः ५९

६०॥इतिश्रीभागवतेमहापुराणेएकादशस्कंधेवि०कृ०टी०द्वाविंशोध्यायः॥२२॥भक्तिमंतरेणसर्वसंन्यासोदुःखहेतुरितरःसुखहेतुरित्येतस्मिन्नध्यायेसमर्थयते तपृष्टःकृष्णः उद्धवंकिमाहेतिराज्ञोमानसींशं कांपरिहराति सएवमिति आशंसितःप्रष्टुरभीष्टाभिवदनायाकांक्षाकारितः १ किमाहेतितत्राह बाह्येति अत्रजीवराशौबाह्यांतर्भजनः बाह्यांतःशत्रुशोषकरःसाधुर्वैसाधुश्चेत्यभिमतश्चसज्जनोवादुर्जनोचरिते दुरुक्तैर्भिन्नमात्मानंमनःसमाधातुमीश्वरःसमर्थःयद्वा योदुरुक्तैर्भिन्नमात्मानंसमाधातुमीश्वरःससाधुःसज्जनोवैकुतःबाह्यांतर्भजनोहीति २ ३ अत्रश्रीकृष्णःसुखबोधायेतिहासंवक्ति कथयंतीति इहत्वत्पृष्टेर्थे ४ विपाकंफलनिष्पत्तिं ५ वार्त्तावृत्तिःकुसीदादिवैश्यजीवनोपायवान्कदर्यःदारिद्र्यभावेनोपेतःकामीपरवित्तस्पृहावान् ६ लुब्धत्वेहेतुमाह ज्ञातयइति अत्रैकैमृत्यमाह शून्येति निजधनजातमन्यत्रनिधा यस्वंधनशून्यगृहेतिष्ठन्आत्मास्वयंकामैःकाम्यैरशनादिभिः ७ पुत्रादिभिरपिकृतप्रियेनभवतिकिमुतान्यैरितिभावेनाह दुःशीलस्येति ८ नकेवलंकुपिताःपुत्रादयःप्रियंनचेरुःपंचयज्ञभागभुजोदेवाअ

विदुषामपिविश्वात्मन्प्रकृतिर्हिबलीयसी ॥ ऋतेत्वद्धर्मनिरताञ्छांतांस्तेचरणालयान् ६० ॥ इतिश्रीभागवतेमहा०एकादशस्कंधेद्वाविंशोध्यायः ॥ २२ ॥
श्रीशुकउवाच ॥ सएवमाशंसितउद्धवेनभागवतमुख्येनदशार्हवर्यः ॥ सभाजयन्भृत्यवचोमुकुंदस्तमाबभाषेश्रवणीयवीर्यः १ श्रीभगवानुवाच ॥
बाह्यांतर्भजनोह्यत्रसाधुर्वैदुर्जनेरितैः ॥ दुरुक्तैर्भिन्नमात्मानंयःसमाधातुमीश्वरः २ नतथातप्यतेविद्धःपुमान्बाणैर्हिमर्मगैः ॥ यथातुदंतिमर्मस्थाअस तांपरुषेषवः ३ कथयंतिमहापुण्यमितिहासमिहोद्धव ॥ तमहंवर्णयिष्यामिनिबोधसुसमाहितः ४ केनचिद्भिक्षुणागीतंपरिभूतेनदुर्जनैः ॥ स्मर ताधृतियुक्तेनविपाकंनिजकर्मणः ५ अवंतिषुद्विजःकश्चिदासीदाढ्यतमःश्रिया ॥ वार्तावृत्तिःकदर्यस्तुकामीलुब्धोतिकोपनः ६ ज्ञातयोतिथय स्तस्यवाङ्मात्रेणाप्यनर्चिताः ॥ शून्यावसथआत्मापिकालेकामैरनर्चितः ७ दुःशीलस्यकदर्यस्यहृद्यतःपुत्रबांधवान् ॥ दारादुहितरोभृत्याविषण्णाना चरन्प्रियम् ८ तस्यैवंयक्षवित्तस्यच्युतस्योभयलोकतः ॥ धर्मकामविहीनस्यचुक्रुधुःपंचभागिनः ९ तदवध्यानविस्रस्तपुण्यस्कंधस्यभूरिद ॥
अर्थोप्यगच्छन्निधनंबह्वायासपरिश्रमः १० ज्ञातयोजगृहुःकिंचित्किंचिद्दस्यवउद्धव ॥ दैवतःकालतःकिंचिद्ब्रह्मबंधोर्नृपार्थिवात् ११ सएवंद्रविणेनष्टध र्मकामविवर्जितः ॥ उपेक्षितश्चस्वजनैश्चिंतामापदुरत्ययाम् १२ तस्यैवंध्यायतोदीर्घमगादायुस्तपस्विनः ॥ खिद्यतोबाष्पकंठस्यनिर्वेदःसुमहानभूत् १३ सचाहेदमहोकष्टंवृथात्मामेसुतापितः ॥ नधर्मायनकामायययस्यार्थायासईदृशः १४ प्रायेणार्थःकदर्याणांनसुखायकदाचन ॥ इहचात्मोपतापा यमृतस्यनरकायच १५ यशोयशस्विनांशुद्धंश्लाघ्यायेगुणिनांगुणाः ॥ लोभःस्वल्पोपितान्हंतिश्वित्रोरूपमिवेप्सितम् १६

पीतिवक्ति तस्येति तस्यार्थैयक्षवित्तस्ययक्षवित्तवदनुपभोगवित्तस्य ९ ततःकिमभूदत्राह तदवध्यानेति तदवध्यानेनतेषांदेवानांअवज्ञाजातकोपेनविस्रस्तःक्रमेणविनष्टः पुण्यस्कंधः पुण्यसमूहो यस्यसतथातस्य । पुण्यस्कंधःपुण्यलक्षणभुजशिरोवा विस्रस्तंशिथिलबंधनंवा सुकृतनाशबलमाह अर्थइति १० नाशप्रकारमाह ज्ञातयइति नृपार्थिवात्नृराजात् ११ योग्य स्यधननाशोवैराग्यहेतुरित्याशयेनाह सइति १२ तपस्विनःसंतापवतः १३ निर्वेदप्रकारमाह सचेति आत्मादेहोयस्यमे १४ नसुखायेत्युक्तंस्पष्टयति इहचेति १५ अर्थलोभोपि यज्ञआदिगुणसर्वस्वहानिकरइत्याह यशइति श्वित्रःश्वेतकुष्ठम् १६

आत्मोपतापपेत्युक्तंविवृणोति अर्थस्यसाधनेइति साधनेआयासः सिद्धेसाधितेउत्कर्षेरक्षणेचत्रासचिंते व्ययेचचिंता नाशेत्रासः उपभोगेचभ्रमोबुद्धिभ्रंशः पिशाचावेशेनेतिशेषः १७ किंच इदंवक्ष्यमाणंवित्तत्यागेकारणंभवतीतिभावेनाह स्तेयमिति स्मयोहंकारःमदोदर्पःभेदोद्वैधीभावःराजादिभ्योव्यसनानिविविधनिरसनानि १८ ततःकिंकर्तव्यमत्राह तस्मादिति १९ अर्थःकथंद्वैधीभावंकरोतीतितत्राह भिद्यंतइति भिद्यंतेदीर्यंते प्राणिमात्रमपिप्रतिपक्षीभवतीत्याह एकयेति २० संतुशत्रवस्तेकिंकुर्वतीतितत्राह अर्थेनेति हिरप्यर्थोवधारणार्थोवा २१ जन्मांतरैर्देवादिजन्माविशेषैरपिप्रार्थ्यमानुषंलब्ध्वातत्तत्रद्विजाःयतोलब्ध्वातद्विजाः पत्वमनादृत्यपेर्थोजनादिकर्मणासर्वंशुभंप्रतितेअशुभांगतिंगच्छंति २२ इदमेवविशिनष्टि स्वर्गेति तस्मादेवामानुष्यंप्रार्थयंतेइत्यतोवाह स्वर्गेति धामनिधास्निग्रहे लोकंशरीरं २३ कथमनर्थधामत्वंवित्तस्येत्याशंक्ययोग्येभ्योऽप्रदानेनाधःपातहेतुत्वादित्याह देवेति भागिनःअंशभागयोग्यानुद्दिश्यात्मानंपततिपातयति २४ वित्तवयोबलैःकुशलसाधन

अर्थस्यसाधनेसिद्धउत्कर्षेरक्षणेव्यये ॥ नांशोपभोगआयासस्त्रासश्चिंताभ्रमोनृणाम् १७ स्तेयंहिंसानृतंदंभःकामःक्रोधःस्मयोमदः ॥ भेदोवैरमविश्वासःसंस्पर्धाव्यसनानिच १८ एतेपंचदशानर्थाह्यर्थमूलामतानृणाम् ॥ तस्मादनर्थमर्थाख्यंश्रेयोर्थीदूरतस्त्यजेत् १९ भिद्यंतेभ्रातरोदाराःपितरःसुहृदस्तथा ॥ एकयार्थेच्छयासद्यःसर्वेचाप्यरयःकृताः २० अर्थेनाल्पीयसाह्येतेसंरब्धादीप्तमन्यवः ॥ त्यजंत्यसून्वृथाघ्नंतिसहसोत्मृज्यसौहृदम् २१ लब्ध्वा जन्मांतरैःप्रार्थ्यमानुष्यंतद्विजाग्र्यताम् ॥ तदनादृत्ययेसर्वेघ्नंतियांत्यशुभांगतिम् २२ स्वर्गापवर्गयोर्द्वारंप्राप्यलोकमिमंपुमान् ॥ द्रविणेकोनुषज्जेत मर्त्योनर्थस्यधामनि २३ देवर्षिपितृभूतानिज्ञातीनन्यांश्चभागिनः ॥ असंविभज्यचात्मानंयक्षवित्तःपतत्यधः २४ व्यर्थयार्थेहयावित्तंप्रमत्तस्यवयोबलम् ॥ कुशलायनसिध्यंतिजरठःकिंनुसाधयेत् २५ तस्मात्संक्लिश्यतेऽविद्वान्व्यर्थयार्थेहयासकृत् ॥ कस्यचिन्मायया नूनंलोकोयंसुविमोहितः २६ किंधनैर्धनदैर्वाकिंकामैर्वाकामदैरुत ॥ मृत्युनाग्रस्यमानस्यकर्मभिर्वोतजन्मदैः २७ नूनंमेभगवांस्तुष्टःसर्वदेवमयोहरिः ॥ येननीतोदशामेतांनिर्वेदश्चात्मनःध्रुवः २८ सोहंकालावशेषेणशोषयिष्येंगमात्मनः ॥ अप्रमत्तोखिलार्थेषुयदिस्यात्सिद्धआत्मनि २९

स्यशक्यत्वादधःपातःकथमत्राह व्यर्थयेति व्यर्थयार्थेहयाऐहिकामुष्मिकार्थेप्रमत्तस्ययस्यवित्तादीनिकुशलायनसिध्यंतिसाधनानिनभवंति सजरठःजरसंगतःकिंनुसाधयेत् नाकिमपि २५ निगमयति तस्मादिति अविद्वान्संक्लेशेकारगमनुमिनोति कस्यचिदिति दिच्छब्दएवार्थे अथकस्यपरमानंदरूपस्यहरेर्माययैवसामर्थ्येनैवविषयसुखेविमोहितइतितर्कयामि कस्यचिल्लोकविलक्षणस्येवा २६ एवंतर्कयतस्तस्यपरमात्मप्रसादायत्तंवैराग्यस्थैर्यवक्ति किंधनैरिति मृत्युनाकालेन २७ अत्रहेतुमाह येनेति एतांदशांविरक्तिलक्षणांनीतइतियेनतेनहेतुनायेनहरिणाप्रसन्नेनेतिवा कीदृशो निर्वेदइतितत्राह निर्वेदइति आत्मनःसंसारनदीतरणध्रुवःतरीरूपः २८ निर्वेदस्यकिंलक्षणमित्यतःसंन्यासइति तन्निश्चयंवक्ति सोहमिति शेषेणकिंसाध्यमत्राह यदीति यदियेनशोषणेनसंन्यासलक्षणेनानिर्वेदसाध्येनतपसात्मनिपरमात्मविषयेसिद्धःज्ञानीस्यांतादृशमंगशोषणंकरिष्यामीत्यर्थः २९

---

१ द्वंद्वैक्यम् । २ स्त्रीद्यूतमद्यविषयाणित्रीणित्रीणिएवंचपंचदशेत्यर्थः ।

नेदंदंभवचनमित्याह तत्रेति अल्पेनकिंसाध्यमितिनमंतव्यमित्याह मुहूर्तेनेति३०विरज्यानेनकिमकारीत्यत्राह इतीति हृदयग्रंथिंमनोबंधम् ३१ अलक्षितःअज्ञातः ३२ ३३ त्रिवेणुदंडंचारीणिजर्णिवस्त्राणि ३४ दर्शितानिप्रदायपुनरादद्युः३५वाचयंतिवादयंते ३६ ३७ ३८ ३९ दौर्वादयंतिदुर्वचनंकारयंति ४० ४१ किमकरोदेवंपरिभूतइतितत्राह परिभूतइति सात्विकींस्वाभाविकीं ४२ कीदृशींगाथामगायतेतितत्राह नायमिति अयंजनःपरितोवर्तमानःतर्हिकिंदेवादयइतितत्राह नदेवतेति देवतादेवाःआत्मादेहः ग्रहाःआदित्यादयःतर्हिकिंकारणमत्राह मनइति यत्संसारचक्रंपरिवर्तयेत्तन्मनःपरंकारणमामनंतीत्यन्वयः ४३ मनसःकारणत्वंविवृणोति मनइति प्राक्तनींलिंगशरीररूपंप्रलयेसूक्ष्मरूपेणस्थितंमनःसृष्टिकालेगुणानात्मनिसृजते वै सात्विकादिभेदेनत्रिविधंबाह्यावयवोपचितंभवतीत्यर्थः अतएवबलीयः कार्यकारणसमर्थंततस्तस्माच्चमनसःसात्विकादिभेदेनत्रिविधानिविलक्षणानिकर्माणिभवंति विलक्षणानीत्युक्तंविवृणोति शुक्लानीति तेभ्यःकर्मभ्यःसवर्णाःशुक्लादिवर्णयोग्याःगतयोभवंतिअनेनसर्व

तत्रमामनुमोदेरन्देवास्त्रिभुवनेश्वराः ॥ मुहूर्तेनब्रह्मलोकंखड्गांगःसमसाधयत् ३० श्रीभगवानुवाच ॥ इत्यभिप्रेत्यमनसाह्यावंत्योद्विजसत्तमः ॥ उन्मुच्यहृदयग्रंथिंशांतोभिक्षुरभून्मुनिः ३१ सचचारमहीमेतांसंयतात्मेंद्रियानिलः ॥ भिक्षार्थंनगरग्रामानसंगोऽलक्षितोविशत् ३२ तंवैप्रवयसंभिक्षुमवधूतमसज्जमाः ॥ दृष्ट्वापर्यभवन्भद्रवह्वीभिःपरिभूतिभिः ३३ केचित्त्रिवेणुंजगृहुरेकेपात्रंकमंडलुम् ॥ पीठंचैकेक्षसूत्रंचकंथांचीराणिकेचन ३४ प्रदायचपुनस्तानिदर्शितान्यादद्युर्मुनेः ॥ अन्नंचभैक्षसंपन्नंभुंजानस्यसरित्तटे ३५ मूत्रयंतिचपापिष्ठानिष्ठीवंत्यस्यमूर्धनि ॥ यतवाचंवाचयंतिताडयंतिनवक्तिचेत् ३६ तर्जयंत्यपरेवाग्भिस्तेनोयमितिवादिनः ॥ बध्नंतिरज्ज्वातंकेचिद्बध्यतांबध्यतामिति ३७ क्षिपंत्येकेवजानंतएषधर्मध्वजःशठः ॥ क्षीणवित्तइमांवृत्तिमगृहीत्स्वजनोज्झितः ३८ अहोएषमहासारोधृतिमान्नगिरिराडिव ॥ मौनेनसाधयत्यर्थंबकवद्दृढनिश्चयः ३९ इत्येकेविहसंत्येनमेकेदौर्वादयंतिच ॥ तंबबंधुर्निरुरुधुर्यथाक्रीडनकंद्विजम् ४० एवसभौतिकदुःखंदैविकंदैहिकंचयत् ॥ भोक्तव्यमात्मनोदिष्टंप्राप्तंप्राप्तमबुध्यत ४१ परिभूतइमांगाथामगायतनराधमैः ॥ पातयद्भिःस्वधर्मस्थोधृतिमास्थायसात्विकीम् ४२ भिक्षुरुवाच ॥ नायंजनोमेसुखदुःखहेतुर्नदेवतात्माग्रहकर्मकालाः ॥ मनःपरंकारणमामनंतिसंसारचक्रंपरिवर्तयेद्यत् ४३ मनोगुणान्वैसृजतेबलीयस्ततश्चकर्माणिविलक्षणानि ॥ शुक्लानिकृष्णान्यथलोहितानितेभ्यःसवर्णागतयोभवंति ४४ अनीहआत्मामनसःसमीहितंहिरण्मयोमत्सखउद्विचष्टे ॥ मनःस्वलिंगंपरिगृह्यकामान्जुषन्निबद्धोगुणसंगतोऽसौ ४५

स्यसुखादीनांपरंकारणंमनइत्यवगतम् ४४ ननुमनसःपरमकारणत्वंविवक्षितंचेत्परमात्मनःकारणत्वमपहस्तितंस्यादितितत्राह अनीहइति आत्मापरमात्मामनसःसमीहितंसंसारावृत्तिहेतुभूतंकर्मउद्विचष्टे उत्कृष्टसाक्षित्वेनपश्यतिकीदृशः अनीहःमनोवत् क्लिष्टकारीनभवतीत्यनेनहरेःप्रशस्तकर्तृत्वंज्ञायते साक्षित्वेनदेहांतर्वर्तमानस्यदुःखादिकंस्यादित्यतउक्तंहिरण्मयइति पूर्णस्वरूपानंदःस्वस्यदुःखाभावेहेतुमाह मत्सखइतिपूर्णानंदोहरिर्मत्सखेतियस्मात्तस्मात्परेषांदुःखकारणंमनइतिभावः अचेतनत्वेनस्वतःप्रवृत्त्यनुपपन्नस्यमनसःकारणत्वंकथमत्राह मनइति असौनिबद्धोदेहाभिमानीजीवः स्वालिंगंलिंगशरीररूपंमनःपरिगृह्यगुणसंगतःविषयस्नेहतःकामान्विषयान्जुषन्नास्तइति विषयानुरक्तचेतनानुगृहीतस्याचेतनस्यापिमनसःकारणत्वंयुक्तमितिभावः नह्यमनाःपुमांस्तिष्ठतीति श्रुतेःमनसःसंसारकारणत्वमुक्तं तत्रकिंप्रमाणमित्यतोवाह अनीहइति परमात्मनोदर्शनंप्रेरणंचप्रमाणम् ४५

एवंविधसंसारनिवृत्तौकउपायइत्यतस्तस्यमनसोनिग्रहएवेत्याह दानमिति मनोनिग्रहलक्षणांताःमनोवशीकरणस्वरूपनिर्णयाः कुतइत्यत्राह परइति ४६ मनःसमाधानस्यपरमयागत्वमुपपादयति समाहितमिति यस्यमनःसमाहितंपरमात्मध्यानयोगयुक्तंतस्यदानादिभिःकिंकृत्यंवद यस्यमनोदानादिभिरसंयतंविनश्येच्चेदेभिर्दानादिभिरपरंसाध्यांकिंनकिमपि ४७ ननुतर्हिमनःसंयमयनंकस्तव्यंतच्चाशक्यांकिमित्याशंक्यस्वतंत्रत्वान्नशक्यमितिभावेनाह मनइति ब्रह्मश्रीविष्णुभ्योन्येदेवामनोवशेभवंति तत्रगुणभूतस्यमनसःपुरुषबंधकत्वप्रकारःकथमित्यतोवाह मनइति हिशब्देन ऋते द्वेब्रह्मणीकस्यमनोयातिवशंकाचित् । श्रियंसरस्वतींचापियातिवातत्प्रसादतइतिवाक्यप्रमाणयति विष्ण्वादींश्चतुरोविनाअन्यस्यवशंनयांति कुतोत्राह भीमइति सहसःसहनशक्तिमतः सहीयानतिशयितसहनशक्तिमान् भीमोरुद्रस्तन्मनइतिविद्वन्मतं ततःकिमत्राह नेति विष्ण्वादीन्विनान्यःकश्चित्तन्मनोनात्याविशत्नातिक्रांतवान् तत्रहेतुः सहिदेवदेवः सभीमोदेवस्यसात्विकमनसोदेवोभिमानीयस्मात्तस्मात् ४८ रुद्रेणाभिमन्यमानंवैकारिकमपिमनोद्विविधंसात्विकंतामसमिति प्रथमंविष्ण्वादिदेवताप्रसादेनजय्यंद्वितीयंविष्णुप्रसादंविनादुर्जयं । विष्णुवध्यकालनेमिनाभिमतत्वात् । अतोमित्रैर्मर्त्यैःसहविग्रहोऽसतांभवतीत्याशयेनाह तमिति । अयमक्षरार्थः अत्रजीवराशौकेचिद्विमूढास्तामसाःपूर्वापरादिदिगनभिज्ञास्तत्तयोर्मनसोस्तंतामसमनोलक्षणंशत्रुंसुखविरोधिनंनविजित्यमित्रैर्मर्त्यैरसद्विग्रहंकुर्वंति । कीदृशंशत्रुं दुर्जयंदुष्टेनपापिनाकालनेमिनाजितत्वाद्वशीकृतत्वाज्जेतुमशक्यत्वात् । अतएवासह्यवेगवायुवन्मुष्टिग्रहणायोग्यमरुंतुदंक्षतनिहितलवणवत्दुःखकरं अनेनशत्रुशब्दोपिविवृतः ।

दानंस्वधर्मोनियमोयमश्चश्रुतानिकर्माणिचसद्व्रतानि ॥ सर्वेमनोनिग्रहलक्षणांताःपरोहियोगोमनसःसमाधिः ४६ समाहितंयस्यमनःप्रशांतंदानादिभिः किंवदतस्यकृत्यम् ॥ असंयतंयस्यमनोविनश्येद्दानादिभिश्चेदपरंकिमेभिः ४७ मनोवशेन्येहिभवंतिदेवामनश्चनान्यस्यवशंसमेति ॥ भीमोहिदेवःसहसःसहीयान्नात्याविशत्तत्सहिदेवदेवः ४८ तंदुर्जयंशत्रुमसह्यवेगमरुंतुदंतन्नविजित्यकेचित् ॥ कुर्वंत्यसद्विग्रहमत्रमर्त्यैर्मित्रैरुदासीनरिपुंविमूढाः ४९ देहंमनोमात्रमिदंगृहीत्वाममाहमित्यंधधियोमनुष्याः ॥ एषोहमन्योयमितिभ्रमेणदुरंतपारेतमसिभ्रमंति ५०

विष्णुप्रसादेनजय्यइत्याह । उदासीनेति । विष्णुभक्तावुदासीनानांरिपुंनतुभक्त्यातदुपास्तौयतमानानामित्यर्थः । प्रस्तुतसात्विकंमनोविहायतामसमनःपरामर्शः कथंयुज्यतइतीयमाशंका एकस्थानाधिपत्येतुभिन्नानामपियुज्यते । अभेदेनपरामर्शःसादृश्येचापिवस्तुनोरित्यनेनापिपरिहर्तव्या । यद्वा तन्मनस्तंतमोभिमानिनंकालनेमिनंनविजित्यमित्रैरसद्विग्रहंकुर्वंति कीदृशंतंशत्रुं । अनेनशत्रुमजित्वामित्रकलहोबालकलहवत्परिहासहेतुरित्युक्तंभवति ४९ दुष्टाभिमानबलोपचितशक्तितामसमनोनिर्मितदेहाभिमानमात्रेणैवोत्पन्नमिथ्याज्ञानेनजीवस्यनित्यनिरयप्राप्तिहेतुत्वात्सएवजेतव्यइतिभावेनाह देहमिति । इदमित्यव्ययं मनोमात्रंमनसानिर्माणमुपगतंदेहंगृहीत्वाममेदमहमितिस्वार्तव्यभ्रमेणएषदेहोहमित्यनात्मनः आत्मभ्रमेणान्योदेहोयमित्यापिभ्रमेणाहमन्यइतिआत्मनोऽनात्मभ्रमेणमिथ्याज्ञानेनांधधियोस्तंगतयथार्थज्ञानामनुष्याःदुरंतपारेतमसिपतित्वाभ्रमंतिपुनःपुनर्दुःखसमुद्रएवमग्नावर्ततइत्यतोबुद्धिमतातज्जयेएवप्रयतितव्यमितिभावः देहमात्रंस्वमात्मानंयःपरं चप्रपश्यति । अंधेतमसिमग्नस्यनोत्थानंतस्यकुत्रचिदितिवचनान्मिथ्याज्ञानिनामंधंतमोनिपतमितिज्ञायते ५०

---

१ भीमोरुद्रः व्योमकेशोभवोभीमइत्यभिधानात् । २ सहसःवायोःसकाशात् तदनुग्रहेणेतियावत् । देवस्यभर्गःसहसोयतोजनीतिश्रुतौसहःशब्दस्यवायौप्रयोगदर्शनात् ।

एवंमनसःसुखदुःखकारणत्वमुक्तंतत्रतर्हितस्यप्रतीयमानंसुखदुःखकारणत्वंअभिमाननिमित्तमेवेतिजानतास्वकृतंभुंजानेनपुरुषेणसोढव्यं तत्रकोपोनकार्यइत्याह जनइत्यादिनाग्रंथेन । अस्यजीवस्यसुखदुःखयोर्हेतुर्जनःपरदेहश्चेद्यदितर्हिअत्रदेहेवर्तमानस्यदेहव्यतिरिक्तस्यात्मनोनिर्मुक्तकपालनारिकेलवत्स्थितस्यकिंस्यान्नकिमपिदुःखंस्यात्तर्हिकस्यतदत्राह हीति । तदुःखंविवेकेनाविचारितेसतिभौमयोःपृथिवीकार्ययोस्ताड्यताडकयोरेवहियस्मात्तस्मात्तदात्मनोभिमानकृतंदुःखमितिजानन्नेषांमध्येकतमायकुप्येदित्यन्वयः । तत्रोदाहरणंजिह्वामिति । स्वदद्भिःस्वदंतैःतस्यांजिह्वायांवेदनायांसत्यामनेनदेहस्याचेतनत्वेनाभिमानजन्यंदुःखमित्युक्तंभवति । जनशब्दःस्वतोजीवेकचिद्देहेवर्तते । इतिवचनाज्जनशब्दोत्रदेहवाची ५१ देहस्याचेतनत्वेनदुःखहेतुप्रवृत्त्ययोगात् अभिमानस्वचपरार्थीनत्वेनायुक्तमुक्तं किंतु देवतायाःसर्वस्मात्माधान्येनतद्धेतुत्वमुचितमित्यत्राह दुःखस्येति । यदिदुःखस्यहेतुर्देवतेत्युच्यतेतद्वचनमस्तुविचारितेनघटते तथाहि विकारयोर्विकाराभिमानिनोर्देवयोःसकाशादुत्पद्यमानंतदुःखमभिमाननिमित्तमेव तत्रनिरभिमानस्यात्मनस्तेनकिंस्यादतःस्वामिदेवान्प्रतिकोपोनकार्यइतिभावःतत्रोदाहरणं यदंगमिति यदास्वदेहेविकाराभिमानींद्रादिदेवताभिमन्यमानहस्ताद्यंगेनचक्षुराद्यंगंकचिद्विहन्यतेतत्तदातत्सोढव्यमेव अन्यथापुरुषःकस्मैक्रुध्येत हस्तादेरकारणत्वादयोग्यक्रोधादेर्मनएवकारणमत्रेति अविकाराश्चतेदेवाविकाराइतिशब्दिताः।अभिमानाद्विकारस्यस्वतःशक्ताअपिधुवमिविवाक्याद्विकारशब्दवाच्यत्वंयुक्तंदेवानां ५२ मनसोपिसुखादिहेतुत्वमभिमानमंतरेणविचारासहमित्याह आत्मेति यद्यात्मामनोदुःखादिकारणंस्यादितिमतंतत्रपृच्छामःदुःखादिकारणंभवन्म

जनोस्यहेतुःसुखदुःखयोश्चेत्किमात्मनश्चात्रहिभौमयोस्तत् ॥ जिह्वांकचित्संदशतिस्वदद्भिस्तद्वेदनायांकतमायकुप्येत् ५१
दुःखस्यहेतुर्यदिदेवतास्तुकिमात्मनस्तत्रविकारयोस्तद्व ॥ यदंगमंगेनविहन्यतेक्वचित्क्रुध्येतकस्मैपुरुषःस्वदेहे ५२ आ
त्मायदिस्यात्सुखदुःखहेतुःकिमन्यतस्तत्रनिजःस्वभावः ॥ नह्यात्मनोन्यद्यदितन्मृषास्यात्क्रुध्येतकस्मैनसुखंनदुःखम् ५३
ग्रहानिमित्तंसुखदुःखयोश्चेत्किमात्मनोजस्यजनस्यतेवै ॥ ग्रहैर्ग्रहस्यैवभवंतिपीडाःक्रुध्येतकस्मैपुरुषस्ततोन्यः ५४

नःस्वतोवापरतोवानाद्यइत्याह । किमन्यतइति । अन्यतोदुःखस्वभावत्वेनविलक्षणान्मनसस्तत्रसुखस्वभावेआत्मनिचेतनेकिंभवतिनकिमपि उभयोःसुखादिस्वभावःसिद्धइतिभावेनाह निजइति । चेतनस्यसुखस्वभावोमनसोदुःखस्वभावोनिजोनित्यःसदातनइत्यर्थः । निजमात्मीयानित्ययोरितियादवः । द्वितीयंप्रत्याह नहीति । आत्मनोन्यत्दुःखकारणंनहिअहंदुःखीस्यामितिदुःखंहृश्येतयादितथापितन्मृषास्यात्शुक्तिरजतवत् । अन्यस्यान्यात्मत्वंनदृष्टचरमित्याह नसुखमिति । सुखंसुखरूपंदुःखंदुःखरूपंनभवति दुःखरूपंसुखरूपंनभवत्यतोभिमानंविनान्यन्निरूपणंअप्रामाणिकमितिविद्वान्कस्मैक्रुध्येतेत्यन्वयः । जीवस्यसुखरूपस्यनदुःखंकचिदिष्यते । अतोमनोभिमानेनदुःखीभवतिनान्यथेतिवाक्यमत्रमानं । यद्वा यदिमनःसुखादिहेतुस्तर्हितत्स्यादुक्तंहिमनोभिमाननिमित्तंतत्दुःखंविनातत्रसुखस्वभावआत्मन्यन्यतोमनसोदुःखंस्यात्किंनस्यादेव कुतोत्राह निजइतिमनोधर्मोदुःखमात्मनोनिजस्वभावोनहिकुतःतदात्मनोन्यद्धि प्रतीयमानस्यकागतिरत्राह यदीति । जपाकुसुमसामीप्याच्छंखस्यलौहित्यमिवमृषास्यादतोन्यस्यान्यत्वंनेत्याह नसुखमिति जीवस्यसुखरूपस्यनदुःखंकचिदिष्यतइत्यादेरभिमाननिमित्तंदुःखमनएवदर्शयतीत्यंगीकार्यम् ५३ देहस्यदुःखादिहेतुत्वेबाधकमाह ग्रहाइतिगृह्यमाणत्वाद्ग्रहाःदेहाःआत्मनोदुःखादेर्निमित्तंचेदविवेकदशायांअस्तुअजस्यस्वतोजन्मादिरहितस्यनममेतिविवेकिनोजनस्यजीवस्यतेदेहाःदुखादेर्निमित्तंस्युः किंवैनैवस्युःअतोग्रहैर्देहैःपीडाःदेहानिमित्तपीडाःग्रहस्यविषयग्रहणरूपस्यमनसएवभवंति मनोभिमानेसत्येवतेस्युरित्यर्थः ततोदेहादन्यःपुरुःपुरुषब्रह्मसरतीतिब्रह्मज्ञानीकस्मैक्रुध्येतेत्यन्वयः ५५

कर्मत्वावन्सुखदु खयोर्हेतुरस्तुतथाप्यात्मनोजीवस्याजडत्वंसत्यतोनेनानिष्टंस्यात्किमितिशेषस्तर्हि कस्यैदमत्राह तद्धीति तद्दुःखादिकंजडेजडात्मकेमनसिहियस्मात्तःकत्राह देहइति ५६ वर्तमानोयंस्वतंत्रेपरमात्मानंस्वंस्वस्यस्वरूपंचवेत्तीतिस्वविन् । सुपर्णःसुखात्मकःपुरुषःकस्मैकुध्येत कर्मणकुप्यतीत्यत्राह नहीति । जडात्मकमनआद्याभिमाननिमित्तदुःखादिकंकर्ममूलंनहियस्मात्क र्मणेपिनकुप्येत यद्वा कर्ममूलमनआदेरभिमाननिमित्तंदुःखदिरवतस्तस्यनास्तीति ५५ यदिदुखादेर्हेतुःकालोस्तीतिमतंतर्हिनित्यसुखरूपस्यविवेकिनःआत्मनःकिमनिष्टंतत्बलात्मनोदुःखा दिलक्षणमनिष्टंप्राप्तमत्राह तत्रेति तत्रतथासत्यसौदुखादिस्तदात्मनःकालाधीनदेहस्थेतिप्राप्तमात्मनोनित्यत्वेनकालानधीनत्वादेहस्यतदधीनाश्च तत्तनयुक्तंदेहस्यजडत्वात् तत्सोदाहरणमाह नाग्नेरिति लुप्तोपममेतत् यथाग्नेस्तापनिमित्तंदुःखंयथाचहिमस्यतद्धिमनिमित्तंदुःखंनजडत्वादेवंदेहस्यापिकालादिसंबंधेविद्यमानेपिनदुःखंयुक्तं ननुतर्हितदंतर्वर्तिनोहरेस्तदुःखंस्यादत्राह नपरस्येति परस्य प्रकृतिविलक्षणस्यवोदुःसर्वज्ञस्यहरेस्तदुःखंनयुज्यते तस्माज्जीवस्यमनोभिमानमात्रंदुःखकारणमतःकस्मैकुध्येतेति । सदाकालादिसंबंधादुःखंदेहस्पयुज्यते । तथापिनैवदुःखीसजडत्वान्नियमेनतु आत्मनःसुखरूपत्वान्नदुःखंयुज्यतेकचित् । तस्मान्मनोभ्रमेणैवदुःखीजीवोनचान्यथा । सर्वेषांमनसोनेतामनोरूपास्त्रिलोचनः । तद्वशाःसर्वदेवाश्चतेनैवसुखदुःखिनः । नियंतातस्यचप्राणस्ततोपिबलवत्त

कर्मस्तुहेतुःसुखदुःखयोर्वैकिमात्मनस्तद्विजडेजडत्वे ॥ देहेस्ववित्पुरुषोयंसुपर्णःकुध्येतकस्मैनहिकर्ममूलम् ५५ कालोस्तुहेतुःसुखदुःखयोश्चेत्किमा त्मनस्तत्रतदात्मनोसौ ॥ नाग्नेर्हितापोनहिमस्यतत्स्यात्कुध्येतकस्मैनपरस्यबोद्धुः ५६ नकेनचित्क्वापिकथंचनास्यद्वंद्वोपरागःपरतःपरस्य ॥ यथात्म नःसंसृतिरूपिणःस्यादेवंप्रबुद्धोनबिभेतिभूतैः ५७ एतांसमास्थायपरात्मनिष्ठामध्यासितांपूर्वतमैर्महर्षिभिः ॥ अहंतरिष्यामिदुरंतपारंतमोमुकुंदांघ्रि निषेवयैव ५८ श्रीभगवानुवाच ॥ निर्विद्यनष्टद्रविणोगतक्लमःप्रव्रज्यगांपर्यटमानइत्थम् ॥ निराकृतोसद्भिरपिस्वधर्मादकंपितोसौमुनिराहगाथाम् ५९ सुखदुःखप्रदोनान्यःपुरुषस्यात्मविभ्रमः ॥ मित्रोदासीनरिपवःसंसारःस्वमनस्ततः ६० तस्मात्सर्वात्मनातातनिगृहाणमनोधिया ॥ मय्यावेशितया युक्तएतावान्योगसंग्रहः ६१ यएतांभिक्षुणागीतांब्रह्मनिष्ठांसमाहितः ॥ धारयन्श्रावयन्शृण्वन्द्वंद्वैर्नैवाभिभूयते ॥ ६२ ॥ इतिश्रीभागवतेमहापुराणे एकादशस्कंधेत्रयोविंशोध्यायः ॥ २३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

रः । तन्नियंताहरिःसाक्षात्परमानंदलक्षणः । इतिवाक्यमुक्तार्थेप्रमाणम् ५६ नपरस्येत्येतद्विवृणोति नकेनचिदिति यथासंसृतिरूपिणःसंसारकारणस्वभाववतःआत्मनोमनसोयथाद्वंद्वोपरागःद्वंद्वाख्यराहु ग्रहणंतथास्यपरतःपरस्यहरेर्द्वंद्वोपरागोनस्यात् इदमेवश्रद्धेयमितिभावेनाह एवमिति । एवंप्रबुद्धःएवंविधज्ञानी एवंविधैरज्ञानिभूतैःस्वैःकृतादुपद्रवान्नबिभेति ५७ एवंविरक्तिर्भगवदंघ्रिभक्तिद्वारासंसार निर्मोकहेतुरित्याह एतामिति मुकुंदांघ्रिनिषेवयैव एतांपरमात्मनिष्ठांमनःसंयमलक्षणव्यवस्थांसमास्थायस्थिरीकृत्यपरमात्मज्ञानलक्षणांवाप्राप्य अत्रप्रमाणमाह अध्यासितामिति सम्यगनुष्ठितां तमःअ ज्ञाननिमित्तंसंसारम् ५८ श्रद्धेयेयंगाथेतिभावेनाह निर्विद्येति ५९ गाथायास्तात्पर्यार्थमाह सुखेति आत्मनिमनसिरूढोविविधभ्रमएवसुखदुःखप्रदःअन्योनैव ततोमित्रोदासीनरिपुलक्षणश्चसंसारःस्व मनःस्वमनोहेतुकः ६० मनोनिग्रहयोगमाह तस्मादिति एतावान्मनःसंयमनलक्षणः ६१ फलमाह यइति ब्रह्मनिष्ठांब्रह्मोत्कर्षज्ञानपूर्वकमनोनिग्रहलक्षणाम् ॥ ६२ ॥ इतिश्रीभागवतेमहापुराणे एकादशस्कंधेविजयध्वजयकृतटीकायांत्रयोविंशोध्यायः ॥ २३ ॥ ॥ ७ ॥ ॥

सृष्ट्यादिपाथार्थ्यज्ञानंमिथ्याज्ञाननिवर्तकमितिकथयत्यस्मिन्नध्याये तत्रव्यर्थोपिनैवोपरमेतेत्युक्तविकल्पनिवर्तकोपायः कइत्युद्धवस्यहार्दशंकांपरिहर्तुकामआह अथेति सांख्यंयथार्थज्ञानंपूर्वैःपुरातनैः विकल्पनिवर्तकत्वेननिश्चितम् १ ननुविकल्पेसतितद्धानायसांख्यवचनप्रतिज्ञानंसंगच्छतेसएवनसंभवति तथाहि किमुत्पत्तिप्रभृतिसांख्यंविकल्पितमुतांतराले नाद्यःस्वभावस्यनिवृत्त्यनुपपत्तेरिति तत्राह आसीदिति अथोआरंभेसृष्टिसमयेज्ञानमर्थश्चैकमेवयथैकार्थोविषयः तथैवज्ञानंविषयमनतिक्रम्यवर्तमानमासीत् किमनेनोक्तंभवतीत्यत्राह अकल्पितमिति संशयविपर्ययाविषयत्वमुक्तंभवति कस्मिन्कालेइदमुत्पन्नमत्राह कृतयुगइति तत्रापिकदेत्यतउक्तं आदाविति संशयाद्यन्यथाभावःकस्मान्नाभूदितित्रत्राह यदेति कृतयुगमारभ्यत्रेतायुगजनाविवेकनिपुणाइतियदायस्मात्तस्मादितिशेषः पुरुषबुद्धिदौर्बल्यनिमित्तंज्ञानस्यान्यथात्वं सात्त्विकत्वेनतदानींतनानांतदभावादेकप्रकारमेवज्ञानमितिभावः अथाथोनंतराप्यर्थेविकल्पारंभमंगलइतियादवः। यथैवार्थस्तथाज्ञानंज्ञानार्थैक्यमुदाहृतं। तथाकृतयुगेप्रायस्तदन्येष्वकुत्रचिदितिवाक्येनविज्ञानवादिमतमत्रोच्यतइत्येतन्निरस्तम् २ द्वितीयेकिंकारणमत्राह तन्मयेति तत्सत्यंज्ञानार्थैक्येनमिथोविरोधराहित्येनाबाधितंज्ञानंपश्चात्त्रेतायांद्विधाइदंवादोवेतिसंशयमापन्नंसमभवत्संजातंततद्द्वापरादौइदमेवनान्यदितिविपरीतप्रत्ययेनसमभिन्नमभवदित्यन्वयः समभेदेसमीचीनेसुष्ठुपूजासुखेष्विति। कालस्वभावयोःसदातनत्वेनसदाविकल्पसंभवात् चेतनस्यापिदेवदत्ताद्यन्यतमस्याल्पबुद्धित्वेनानंतवेदादिशब्दराश्यर्थस्वरूपस्यावगाहुमशक्यत्वेनकारणत्वानुपपत्तेस्तत्तद्योग्यफलदानसमर्थेन वैषम्यादिदोषविधुरेणसर्वज्ञेनकारणेनभाव्यमितिभावेनाह मयेति फलंरूपयतीतिफलरूपःतेनतामसादिजीवानांस्वस्वयोग्यतमआदिफलदात्रेत्यर्थः केवलेनमयातथास्त्वितिविकल्पितंतामसादिजीवबुद्धिमनुसृत्यनानेवकल्पि

श्रीभगवानुवाच ॥ अथतेसंप्रवक्ष्यामिसांख्यंपूर्वविनिश्चितम् ॥ यद्विज्ञायपुमान्सद्योजह्याद्वैकल्पिकंभ्रमम् १ आसीज्ज्ञानमथोह्यर्थश्चैकमेवाविकल्पितम् ॥ यदाविवेकनिपुणाआदौकृतयुगेजनाः २ तन्मयाफलरूपेणकेवलेनविकल्पितम् ॥ वाङ्मनोगोचरंसत्यंद्विधासमभवद्बृहत् ३ तयोरेकतरोह्यर्थःप्रकृतिःसोभयात्मिका ॥ ज्ञानंत्वन्यतमोभागःपुरुषःसोभिधीयते ४

तंअनंतशब्दराशिगोचरस्यबृहत्तरस्यदुर्ज्ञेयत्वेनअश्रद्धेयत्वंनेतिभावेनोक्तं वागिति शब्दोवाग्गोचरोर्थोमनोगोचरस्ताभ्यामुत्पाद्यमानत्वेनचकल्पितमितिशेषः यद्वा तच्छब्दार्थात्मकमुभयंबृहत्तरामितियस्मात्तस्माद्वाङ्मनसयोरगोचरत्वाच्चद्विधाभूदिति ३ सम्यग्विषयविषयीकरणमंतरेणज्ञानार्थैक्यमत्रनोच्यतइतिभावेनज्ञानार्थाभिमानिदेवतास्वरूपंतावदाह तयोरिति तयोर्ज्ञानार्थयोरेकतरोयोर्थो विषयलक्षणःसप्रकृतिर्गायत्रीनाम्न्याप्रकृत्याभिमन्यमानइत्यर्थः सापिनस्वतंत्रेत्याह सेति सामप्रकृतिरुभयोर्लक्ष्मीविष्णुसंज्ञयोरावयोरात्मादेहःप्रयत्नश्चयस्याःसातथामयाश्रियाचसृष्टानुग्राह्या चेत्यर्थःअन्यतमोभागोज्ञानंयत्सोपिपुरुषः पुरुषनाम्नाब्रह्मणाभिमन्यमानमित्यर्थः सोप्युभयात्मकइत्यनुसंधेयं मयाश्रियाचसृष्टःअनुग्राह्यश्चेत्यभिधीयते। ज्ञानाभिमानीपुरुषःसब्रह्मासमुदाहृतः। अर्थाभिमानीप्रकृतिर्गायत्रीसाप्रकीर्तिता। तयोर्नियामकोविष्णुःश्रीश्चानुग्राहिकास्मृता। वायुस्तुब्रह्मणःपुत्रःप्रकृतौसमजायत। त्रिगुणात्मासमुद्दिष्टःप्रायःसत्वात्मकस्तथा। गायत्रीचैवसावित्रीतथैवचसरस्वती। एवंत्रिरूपाप्रकृतिरेकासत्वादिभेदतः। तासुर्वीयंसमुत्सृष्टंब्रह्मणैकत्वमागतं। ससूत्रात्मासमुद्दिष्टोवायुर्लोकप्रणायकः। तस्यापिसूत्रंभगवान्धारणाद्विष्णुरव्ययः। सूत्रपुत्रस्त्वहंकारःसरुद्रःसमुदाहृतः। सूत्रात्मनामहांश्चैवसहजातश्चतुर्मुखः। तस्यापिपुत्रोहंकारःसचानंतउदाहृतः। अनंतादपिरुद्रोभूद्ब्रह्मणश्चेतिसत्रिधा। वैकारिकोब्रह्मजस्तुतैजसोवायुजःस्मृतः। तामसोनंतजश्चैवसएकोगुणभेदतः। इति स्मृतिसूचकेनहिशब्देनकिमत्रप्रमाणमितिशंकांपरिहरति ४

---

२ ज्ञायतेअनेनेतिज्ञानं साधनं शास्त्रं प्रसिद्धंज्ञानंचग्राह्यं एवमुत्तरत्रापि एवंसतिवाङ्मनोगोचरत्वंसंभवति।३ उत्पत्तिप्रभृतिविकल्पितस्यसांख्यंनिवर्तकमुतेतिकचित्पाठः।

प्रतिज्ञातसांख्यप्रवचनंविनाज्ञानार्थैक्यादिकथनंकिंकेनसंगतामित्यतस्तत्स्वरूपंवांके तमोरजइत्यारभ्यइषसांख्यइत्यतनं वायुस्तुब्रह्मणःपुत्रःप्रकृतासमजायत ।।त्रगुणात्मासमुदष्टःभाषःसत्त्वात्मकस्व
थेत्यादिव्याख्यातमपिमंदमत्युपकारायैवचिद्वचाक्रियते तथाहि सृष्टचादौमत्तोगुणत्रयाभिमानिन्यालक्ष्म्यापुरुषप्रकृतीब्रह्मगायत्र्याख्येजाते वाशब्दश्चार्थे तदनुमयालक्ष्म्याचपुरुषानुमतेनपुरुषना
भ्रोब्रह्मणःस्वभर्तुःप्रेरणयाचप्रक्षोभ्यमाणायास्तस्याःप्रकृतेः तमोरजःसत्त्वमितिगुणाभिमानानित्रीणिरूपाणिगायत्रीसावित्रीसरस्वतीसंज्ञान्यभवन् ५ ततःकिमभूदत्राह तेभ्यःसमभवत्सूत्रामिति अयंभा
वः तेषुरूपेषुपुरुषनाम्नाब्रह्मणागर्भाधानेकृतेसतितेभ्यःपृथक्पृथक्जातंपश्चादेकत्वमापन्नंसूत्रमभवत् कीदृशं मत्सूत्रेणचसंयुतं ममसर्वाधारेणरूपेणसंयुतंसर्वजगदाधारत्वायुतत्त्वमुत्पन्नमित्यर्थः वायु
नावैगौत्वमसूत्रेणेत्वादिनावायोःसर्वाधारत्वंप्रसिद्धं अत्रसूत्रशब्देनमहतत्त्वाभिमानिनोब्रह्मणोद्वितीयंचतुर्मुखाख्यंरूपंवायुनासहोत्पन्नमितिज्ञातव्यं सूत्रात्मनामहांश्चापिइतिप्रमाणानुगुण्यात् ततो
विकुर्वतइत्यस्यापमर्थः तस्माद्विकुर्वतः सृष्टिकामात्सूत्रनाम्नोब्रह्मणःसाजज्ञे योविमोहकोहंकारोनंतः अयमेवसूत्रनाम्नोवायोरपिजज्ञे विकुर्वतःसूत्रनाम्नोब्रह्मणोयोविमोहकोवैकारिकोद्रुरुःसो
पिजज्ञे पुनश्चविकुर्वतः सूत्रनाम्नोवायोर्विमोहकस्तैजसरुद्रःसजज्ञे योब्रह्मजोनंतःतस्मादपिविकुर्वतःयोविमोहकोहंकारस्तामसःसजज्ञेइतिवैकारिकोब्रह्मजस्तैजसोवायुजस्तामसोनंतइतिरुद्रस्त्रिधाजातः

तमोरजःसत्त्वमितिप्रकृतेरभवन्गुणाः ॥ मयाप्रक्षोभ्यमाणायाःपुरुषानुमतेनवा ५ तेभ्यः समभवत्सूत्रंमत्सूत्रेणचसंयुतम् ॥ ततोविकुर्वतोजातोयोहंकारो
विमोहकः ६ वैकारिकस्तैजसश्चतामसश्चेत्यहंत्रिवृत् ॥ तन्मात्रेंद्रियमनसांकारणंचिदचिन्मयः ७ अर्थस्तन्मात्रकोजज्ञेतामसादिंद्रियाणिच ॥ तैजसाद्देवता
आसन्नेकादशचवैकृतात् ८ मयासंचोदिताभावाःसर्वेसंहत्यकारिणः ॥ अंडमुत्पादयामासुर्मायतनमुत्तमम् ९ तस्मिन्नहंसमभवमंडेसलिलसंस्थिते ॥
ममनाभ्यामभूत्पद्मंविश्वाख्यंतत्रचात्मभूः १० सोसृजत्तपसायुक्तोरजसामदनुग्रहात् ॥ लोकान्सपालान्विश्वात्माभूर्भुवःस्वरितित्रिधा ११ देवानामो
कआसीत्स्वर्भूतानांचभुवःपदम् ॥ मर्त्यादीनांचभूर्लोकःसिद्धानांत्रितयात्परम् १२ अधोसुराणांनागानांभूमेरोकोसृजत्प्रभुः ॥ त्रिलोक्यांगतयःसर्वाः
कर्मणांत्रिगुणात्मनाम् १३

६ इदमेवस्पष्टयति वैकारिकइति त्रैविध्यस्यप्रयोजनमाह तन्मात्रेति तन्मात्रशब्देनपंचभूतानिलक्षितानि श्रोत्रादींद्रियाणिमनःशब्देनइंद्रियाभिमानिनोदेवाश्चैषांकारणंतामसाच्चाहंकारत्रयं त्रिविधो
रुद्रःकीदृशःचिदचिन्मयःवशीकृतचेतनाचेतनप्रपंचः चिदाचिच्चद्वशेसर्वसरुद्रश्चिदचिन्मयइतिमानं ७ उक्तमेवविवृणोति अर्थइति तामसादहंकारात्तन्मात्रकोर्थःपंचभूतलक्षणःतैजसाहंकारादींद्रिया
णिवैकृताद्वैकारिकान्मनसासहतदभिमानिन्यएकादशदेवताआसन् ८ एवंसृष्टेश्चतुर्विंशतिसंख्यैर्महदादितत्त्वैःकिंकृत्यमत्राह मयेति ९ आयतनत्वंदर्शयति तस्मिन्निति चिदानंदशरीरस्तुप्रविष्टोंडेह
रिःस्वयं । तन्नाभेर्भूतदेहोभूत्पद्मादपिचतुर्मुखः । चतुर्मुखस्तुसर्वांडेव्याप्तदेहोमहातपाः । हरिस्तु सर्वव्याप्तोपिभूतदेहोनतुक्वचित् । नैवास्यप्राकृतोदेहःप्रादुर्भावेष्वपिक्वचित् । इत्यनेनहरेर्भूतदेहोनास्तीति
ज्ञायतेसमभवंसमीचीनतयाव्याप्तोभवं नतूत्पन्नोभवामीत्यर्थः १० तपसाज्ञानेन ११ ओकोनिवासस्थानं त्रितयात्परंमहरादिकं १२ कर्मभेदेनत्रिलोक्याःस्थानभेदमाह त्रिलोक्यामिति १३

महर्लोकादिप्राप्तौकिंसाधनमत्राह योगस्येति मद्गतिर्मत्प्राप्तिः नैवविष्णावभक्तस्यमहर्लोकादिकागतिः। भक्त्युद्रेकात्क्रमादूर्ध्वंयावद्विष्णोःप्रवेशनं। एवंज्ञानंविनासापिमहर्लोकादिकागतिः। ज्ञानोद्रेकात्क्रमादूर्ध्वंयावद्विष्णोःप्रवेशनं। नित्यंशोभनस्वरूपस्यापरोक्षेणदर्शनं। मुहूर्तमात्रंज्ञानंस्यान्महाज्ञानंततोधिकं। ज्ञानेनब्रह्मलोकःस्यान्महाज्ञानाद्धरेर्गतिः। सदैवाखंडितंध्यानंतपइत्युच्यतेबुधैः। अपरोक्षदशायुक्तंनित्यंषण्मात्रकालया। अपरोक्षदशानित्यमेकमात्रायुजायुतं। योगनाम्नासमुद्दिष्टंध्यानंनित्यमखंडितं। तच्चतुर्भागयानित्यमपरोक्षदशायुतं। पादयोगंसमुद्दिष्टंध्यानंनित्यमखंडितं पादयोगान्महर्लोकोज नोलोकस्तुयोगतः। तपसस्तुतपोलोकःप्राप्यतेनान्यथाःक्वचिदिति स्मार्तवाक्येनमहर्लोकादिप्राप्तावपिसाधनविशेषाअवगंतव्याः १४ भक्तियोगरहितस्यकास्थितिरत्राह मयेति कालात्मनाज्ञानाद्या त्मनाधात्राकारकेणमयाप्रेरितकर्मयुक्तमिदंजगदेतस्मिन्गुणप्रवाहेउन्मज्जतिसृष्टंभवतिनिमज्जतिसंहृतंभवति १५ तमेवप्रेरणप्रकारंविवृणोति अणुरिति अतीतानागतवर्तमानत्वेनयोयोभावःपदार्थः प्रसि ध्यतिउत्पन्नोवर्तते तत्सर्वमुभयसंयुक्तंमयाचित्प्रकृत्याचसरस्वत्यापुरुषेणहिरण्यगर्भेणसंयुक्तमस्माभिः प्रविश्यप्रेरितंचयस्मात्तस्मादद्यापिसर्वंद्वंद्वीभूयस्थितंदृश्यते १६ ननुकार्याणांनिमित्तकारणेनभेदः कुलालेदृष्टइतिनतत्रशंका किंतूपादानकारणेनकथमितितत्राह यस्त्विति। तुःस्याद्देवधारणइतिवचनात्। तुशब्दोविशेषंव्यक्तियस्यमहदादिकार्यस्ययःसत्वादिकारणविशेषः आदिरुपादानकारणंघटस्य

योगस्यतपसश्चैवज्ञानस्यगतयोमलाः ॥ महर्जनस्तपःसत्यंभक्तियोगस्यमद्गतिः १४ मयाकालात्मनाधात्राकर्मयुक्तमिदंजगत्॥ गुणप्रवाहएतस्मिच्चुन्म ज्जतिनिमज्जति १५ अणुर्बृहत्कृशःस्थूलोयोयोभावःप्रसिद्ध्यति ॥ संवेह्युभयसंयुक्तंप्रकृत्यापुरुषेणच १६ यस्तुयस्यादिरंतश्चसवैमध्यंचतस्यतत् ॥ वि कारोव्यवहारार्थोयथातैजसपार्थिवाः १७ यदुपादायपूर्वस्तुभावोविकुरुतेपरम्॥ आदिरंतोयतोयस्मिंस्तत्सत्यमभिधीयते १८

मृदिव अंतश्चलयस्थानंचयस्मात्तस्मात्तस्यकार्यस्यमध्येचसवैनान्यःइत्यतउपादानकारणेनाभेदःकार्यस्येतिनिश्चीयते मृद्घटइतिभावानुरक्तप्रत्ययवेद्यत्वात्व्यवहारार्थः हानोपादानादिव्यवहारविष योविकारोविविधप्रकारइत्येकस्मिंस्तंतौनष्टेनष्टःपटइत्यौपचारिकासामानाधिकरण्येविनष्टंतंतुनैवपटस्यभेदः नान्यैरतोभेदाभेदइतिजानीहि कथमत्रोदाहरणमाह यथेति यथालोहमृदाद्युपात्तघटादिपदा र्थाः विनाशिस्वरूपेणभेदवंतोप्याद्यावंतेमध्येचकारणेनाभिन्नाअनुभूयंतेइति प्रकृतेस्तुविकाराणांकोव्यंशोभेदउच्यते। तथैवैकांशतोभेदःसोपिनाभेदवर्जितः। भेदाभेदमतःप्राहुरभेदंवातयोर्बुधाइतिप्रमा णसिद्धोविशेषस्तुनगृह्यते यद्वा व्यवहारार्थोव्यवहारनिवर्तकोविकारोविनाशलक्षणः तस्यावयवस्येतनभेदइतितन्मध्यइतिवा १७ ब्रह्मणोविकारात्प्रपंचइतिकेचित्तन्मतंप्रत्याह यदुपादायेति यद्वा मुख्यनिमित्तंब्रह्मइतरकारणेभ्योव्यावर्तयति यदिति तुशब्दोब्रह्मणोमुख्यत्वमभिप्रैतिपूर्वोभावःउपादानलक्षणःपदार्थः प्रकृत्यादिर्यद्ब्रह्मोपादायीनीमित्तकारणतयाआदाययस्यब्रह्मणःसामर्थ्यमाश्रित्यापरं कार्यरूपभावमुद्दिश्यविकुरुतेविकारयतिच यतोब्रह्मणोस्यआदिरंतश्चयस्मिन्ब्रह्मणिमध्येचावस्थितिस्तद्ब्रह्मसत्यंपरमार्थलक्षणंस्वतंत्रंविकारादिदोषविधुरंचेत्यर्थः पारमार्थिकसत्यत्वंस्वातंत्र्यमभिधीयते। तद्विष्णोरेवनान्यस्यतदन्येषांसदास्तितेतिवचनात् १८

---

१ योगस्तपोज्ञानमितित्रीणिसाधनान्युक्तानि महरादिर्वैकुंठांतानि पंचफलान्युक्तानि अतःकथमितिचेत्सत्यं योगपदेन पादयोगः योगश्चेतिद्वयं तपइत्येकं ज्ञानंमहाज्ञानंचेतिद्वयं क्रमेणमहरादिलोकसाधनानी-त्याशयेन तत्तत्साधनलक्षणमाह नित्यशइत्यादिना।

इतोपिविकारमंतरेणमुख्यंकारणंब्रह्मैव प्रकृत्यादीनांसत्तायास्तदधीनत्वादितिभावेनाह प्रकृतिरिति सत्वादिगुणरूपाप्रकृतिरस्यजगतःउपादानमात्रपरःपुरुषःहरण्यगर्भः आधारःकालाग्निरुद्रान्तरात्मा हरण्यगर्भएवसतोजगतोभिव्यंजकःनिमित्तकारणंउपादानमाधारोव्यंजकइतिकारणत्रयंब्रह्मसर्वशक्तिपूर्णोहमेवतेषांतच्छक्तिप्रदोहमित्यर्थः हिशब्देन ।कालाभिमानीब्रह्मातुकालइत्याभिशब्दितः।सर्वजीवाभिमानीसपरःपुरुषउच्यते । प्रकृतिर्नामतत्पत्नीप्रकृतेरभिमानिनी।साप्रसूतेजगत्सर्वंसूत्रमारभ्यसर्वंशइतिसूचयति तुशब्दःप्रकृत्यादिभ्योब्रह्मणोमहान्विशेषोस्तीतिसूचयति तदुक्तं आधारोव्यंजकश्चैवप्रसवी ताचकेशवः । कालप्रकृतिपुंसांचतन्मूलप्रकृतेरपि।आधारोव्यंजकश्चैवसर्वस्यापिनियामकइति १९ इतोविजगतःसृष्ट्यादेर्मुख्यकारणंब्रह्मैवइतिभावेनसृष्ट्यादेःकालावधिमाह सर्गइति अयमर्थःयावत्तास्थितिरस्तितावत्सर्गउत्पत्तिरपिपौर्वापर्येणप्रवर्ततेयावदीक्षणंयदालयःस्यादितिहरेःस्मरणंतदास्थित्यंतःस्थितेरंतःप्रलयोभवतीति उत्पत्यादिकंभगवत्कर्तृकमित्यर्थः २० अधुनाक्रमप्राप्तंलयंनिरूपयति विराडिति विराडंडकोशःभुवनैःसहपंचत्वायकल्पतेपंचत्वानंतरमपिअविशेषायसत्वादिगुणानुद्रेकायनाशायेत्यर्थः विशेषेगगुणोद्रेकाद्विशेषंपृथिवीस्मृतेतिवचनात् अंडकोशनाशानंतरंपृथिवीलयोपिसूच्यतेनेनेतिलोकानांचतुर्दशसंख्योपेतानांकल्पःविकल्पनाविकल्पोवांतरकल्पोविविधकल्पनाचयस्मिन्सतथा समयासाद्यमानःविनाशायप्रेर्यमाणः २१ अविशेषायेतिप्रस्तुतंपृथिव्या

प्रकृतिर्ह्यस्योपादानमाधारःपुरुषःपरः ॥ सतोभिव्यंजकःकालोब्रह्मतत्त्रितयंत्वहम् १९ सर्गःप्रवर्ततेतावत्पौर्वापर्येणनित्यशः ॥ महान्गुणविसर्गोर्थःस्थित्यंतोयावदीक्षणम् २० विराण्मयासाद्यमानोलोककल्पविकल्पकः ॥ पंचत्वायाविशेषायकल्पतेभुवनैःसह २१ अन्नेप्रलीयतेमर्त्यअन्नंधानासुलीयते ॥ धानाभूमौप्रलीयंतेभूमिर्गंधेप्रलीयते २२ अप्सुप्रलीयतेगंधआपश्चस्वगुणेरसे ॥ लीयतेज्योतिषिरसोज्योतीरूपेप्रलीयते २३ रूपंवायौसचस्पर्शेलीयतेसोपिचांबरे ॥ अंबरंशब्दतन्मात्रइंद्रियाणिस्वयोनिषु २४ योनिर्वैकारिकेसौम्यलीयतेमहतीश्वरे ॥ शब्दोभूतादिमप्येतिभूतादिर्महतिप्रभुः २५ सलीयतेमहान्स्वेषुगुणेषुगुणवत्तमः ॥ तेव्यक्तेसंप्रलीयंतेतत्कालेलीयतेव्यये २६ कालोमायामयेजीवेजीवआत्मनिमय्यजे ॥ आत्माकेवलआत्मस्थोविकल्पापायलक्षणः २७ एवमन्वीक्षमाणस्यकथंवैकल्पिकोभ्रमः ॥ मनसोहृदितिष्ठेतव्योम्नीवार्कोदयेतमः २८

दिलयंविविच्याह अन्नइति अन्नाभिमानिनामभिमन्यमानानांचएकोक्त्यानिरूप्यमाणोलयोभिमानिनोभिमन्यमानस्यस्वकारणेभिमन्यमानेविवक्षितइतिदेव्यामौषधिमानिन्यांलयितेन्नाभिमानिनित्युक्तेः अन्नमन्नाभिमानिनीधानास्वौषधीषुऔषध्यभिमानिन्यांदेव्यांगंधेस्वसूक्ष्मरूपे २२ २३ इंद्रियाणिस्वयोनिषुतैजसाहंकारेइंद्रियाभिमानिनश्चस्वयोनौवैकारिकाहंकारे २४ योनिर्वैकारिकस्तैजसश्चाहंकारःविकारजत्वाद्वैकारिकेमहति चतुर्मुखेलीयतेईश्वरेईशनशक्तिमति विकारजत्वात्तुमहान्वैकारिकउदाहृतः । ईशनादीश्वरश्चैवब्रह्मावृंहगतस्मृतइतिस्मृतेः । भूतादितामसाहंकारंसभूतादिरनंतद्वारेणमहतिमहत्तत्वाभिमानिनि २५ समहान्स्वेषुगुणेषुकारणेषुगुणाभिमानिनीषुगायत्रीसावित्रीसरस्वतीषुतेगुणास्ताःसत्वादिगुणवाच्यास्तिस्रःअव्यक्तेप्रकृत्याख्यस्वमूलरूपेतदव्यक्तमव्यक्ताभिमानिनीगायत्रीपुरुषाभिधेविरिंचेपत्यौलीयते सपुरुषःकालनाम्निस्वास्मिन् २६ कालाख्योविरिंचःमायामयेजीवेमूलप्रकृत्यभिमानिन्यांमहालक्ष्म्यांजीवनाम्नीश्रीरजेआत्मनिमायेविशेषरतिलक्षणंलयमाप्नोति आत्मस्वरूपंवक्ति आत्मेति आत्मापूर्णगुणःकेवलःप्रकृतिसंबंधविधुरोसमाधिकश्चआत्मस्थअनन्याधारःअतएवलयादिहीनः विकल्पापायलक्षणःसम्यक्ज्ञानस्वरूपः मिथ्याज्ञानापगमोलक्षणंयस्यसतथेतिवा २७ कथितसृष्ट्यादिस्मरणफलमाह एवमिति वैकल्पिकोभ्रमःविरुद्धकल्पनालक्षणमन्यथाज्ञानंमनसउत्पन्नंहृदिबुद्धौ २८

उक्तार्थंउपसंहरति एषइति प्रतिलोमेनविपरीतक्रमेणसंहारकथनंअनुलोमेनयथाक्रमेणसृष्टिकथनंसंशयग्रंथिहेतिकःसंसारबंधत्वनदहनेअग्नेर्ज्वालायमानःपरावरदृशासर्वज्ञेन गायत्रीचैवसावित्रीसथैवतुसरस्वती। एवंत्रिरूपाप्रकृतिर्ब्रह्मपत्नीप्रकीर्तिता। महत्तत्वात्मकोब्रह्मातज्जत्वात्तत्रलीयते। गुणाधिकःपतिरपितस्याःसत्वादिभेदतः।त्रिविधामूलरूपायांप्रकृत्यांसाप्रलीयते। प्रकृतिर्मूलरूपासाब्रह्मपत्नीजगन्मया पुरुषाभिधेविरिंचेतुसस्वस्मिन्कालसंज्ञके। कालाभिधोविरिंचस्तुमहालक्ष्म्यांविलीयते। जीवमायेतियामाहुःसाचसत्वादिभेदतः। त्रिविधैकत्वमापद्यविष्णावेवविलीयते। हरेरत्यंतसामीप्यंलयोलक्ष्म्याःप्रकीर्तितः। पुरुषेणातिसामीप्यंप्रकृतेर्लयउच्यते। ब्रह्माचप्रकृतिश्चैवमुक्तिगौविलयेयतः। अतस्तौभिन्नदेहौनुज्ञानमात्रौसमीपगावित्यादिप्रमाणसिद्धत्वात् सर्वज्ञेनपरमप्रेमनमयाप्रोक्तत्वाच्चेदंबुभूषुभिरवश्यंग्राह्यमितिभावः २९ इतिश्रीभाग०महा०एकादशस्कंधेविज०टी०चतुर्विंशोध्यायः॥ २४॥ उक्तज्ञानाधिकारीसात्विकएवेत्यभिप्रेत्यसत्वादिगुणानांवृत्तीर्विवक्त्यस्मिन्ध्याये तत्रप्रथममिश्रावृत्तीराह गुणानामिति सत्वादिगुणानामभिश्राणांचमध्येयेनगुणेनपुमान्यथाभवेत्तथातच्छंसतोमेसकाशादिदमुपधारय १ इतराभ्यामभिश्रागुणवृत्तिराह शमइति ईक्षाज्ञानं स्मृतिरखंडशास्त्रार्थस्मरणं त्यागोनिषिद्धस्यं अ

एषसांख्यविधिःप्रोक्तःसंशयग्रंथिहेतिकः ॥ प्रतिलोमानुलोमाभ्यांपरावरदृशामया ॥ २९ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेचतुर्विंशोध्यायः ॥ २४ ॥ श्रीभगवानुवाच ॥ गुणानामप्यमिश्राणांपुमान्येनयथाभवेत् ॥ तन्मेपुरुषवर्यैदमुपधारयशंसतः १ शमोदमस्तितिक्षेक्षातपःसत्यंदयास्मृतिः तुष्टिस्त्यागोस्पृहाश्रद्धाह्रीःक्षमानिस्तुतिर्धृतिः २ कामईहामदस्तृष्णास्तंभआशीर्भिदासुखम् ॥ मनोत्साहोयशःप्रीतिर्भार्थ्यवीर्यबलोद्यमाः ३ क्रोधोलोभोनृतंहिंसामायादंभोक्षमाकलिः ॥ शोकमोहौविषादार्त्तीनिद्राशाभीरनुद्यमः ४ सत्वस्यरजसश्चैवतमसश्चानुपूर्वशः ॥ वृत्तयोवर्णितप्रायाःसन्निपातमथोशृणु ५ सन्निपातस्त्वहमितिममेत्युद्धवयामतिः ॥ व्यवहारःसन्निपातेमनोमात्रेंद्रियासुभिः ६ धर्मेचार्थेचकामेचयदासौपरिनिष्ठितः ॥ गुणानांसन्निकर्षोयंश्रद्धारतिधनावहः ७

स्पृहानिर्बुद्धेच्छाराहित्यं निस्तुतिरात्मप्रशंसावर्जनं धृतिर्विषयेचित्तस्यानुद्वेगः एतेगुणायस्यसंतिससात्विकःसांख्यज्ञानाधिकारीत्युक्तमनेन २ रजोगुणवृत्तीराह कामइति कामोविषयरागःईहा निषिद्धचेष्टा तृष्णानलंबुद्धिः स्तंभउक्तानंगीकारित्वं आशीःधनाकांक्षा भिदाभेदकरणंअन्यथाज्ञानंवा असुखंदुःखं राजसस्यदुःखं तामसस्यदुःखंभवतीतिकिंवक्तव्यमित्यभिप्रायेणोक्तं तदुक्तं राजसेपि यदादुःखंतामसेकिमुतेतितत्। राजसेदुःखवचनंतामसेतिविवक्षयेति। एवंविधगुणोराजसइत्यर्थः ३ तमोगुणवृत्तीराह क्रोधइति मायाकपटेअविद्यमानमहिमप्रकटनंदंभः अस्थानेऽपिक्रोधोऽक्षमा कलिः कलहः मोहोऽज्ञानं आशोत्कंठा एवंविधस्तामसाधिकारीति ४ उक्तवृत्तीःविविनक्ति सत्वस्येति सन्निपातंगुणानांमिश्रतांपुरुषनिष्ठतयाह संन्निपातइति देहेकलत्रादौयोहंकारः ममकारश्चसत्वादिगुणानांमिश्रतालक्षणः मात्राःशब्दादयः सन्निपातेसति ५ ६ मनोमात्रेंद्रियासुभिर्व्यवहारोभिज्ञानादिलक्षणोभवतीत्युक्तंविवृणोति धर्मेचेति यदासौपुरुषोधर्मादौपरिनिष्ठितोभवतितदातस्यायंगुणानांसन्निकर्षः श्रद्धादिकरोभवति यदाधर्मेनिष्ठातदाश्रद्धा यदार्थेनिष्ठातदाधनकारी यदाकामेनिष्ठातदारतिंकरोतीत्यर्थः ७

यर्हिगृहाश्रमेपुमान्प्रवृत्तिलक्षणांनिष्ठांभजमानःस्वधर्मेचानुतिष्ठेततत्रसागुणानांसमितिःमिश्रीभावइतिद्रष्टव्यं ८ व्यवहाररयसन्निपातमूलत्वेऽयसात्वेवकः इत्यादिकथंघटतइतितत्राह पुरुषाभ
ति शमादिभिः लिंगैःपुरुषंसत्वगुणयुक्तंअनुमापयात् अनुमानेनजानातु कामादिभिरप्येवं ९ स्वमक्तेष्वेवसात्विकादिविवेचनप्रकारंदर्शयति यदेत्यादिश्लोकद्वयेन १० आशिषःसंपदआशास्य
मनस्यभिसंधाय ११ एवंविधविभागस्यगुणहेतुत्वेतवापितत्स्यात्किमितितत्राह सत्वमिति सत्वादयोगुणाउक्तवक्ष्यमाणाविशेषापादकाजीवस्यैवमेनैव तत्रहेतुगर्भाविशेषणमाह चित्तजाइति
भूतानांपंचानांसमुदायरूपबाह्यांतःकरणेचित्तेजायंतेव्यंजंतइतिचित्तजाःममप्रकृत्यादिसंबंधराहित्यात् जीवेतुक्तंतत्संबधसद्भवादित्याह यैस्त्विति भूतानामुपादानानांसकाशादुत्पन्नैश्चित्तेभि
व्यक्तैःसज्जमानोनिबध्यतइतितस्मान्ममगुणकृतानर्थनशंकयेतिभावः १२ संक्षिप्योक्तंसत्वादिगुणानांवृत्तिप्रपंचयति यदेति इतरौरजस्तमसी सत्वस्यस्वरूपमाह भास्वरमिति १३ रजस्त
मःसत्वगुणौजयेत्रजःस्वभावमाह संगेति विषयसंगकारिभेदकारिचपलताकारिच १४ तमोगुणोरजःसत्वेगुणौजयेत् आशयाअतितृष्णयामूढइत्यनेनतमःस्वभावोदर्शितः १५ यदाचित्तंप्रसन्न

प्रवृत्तिलक्षणांनिष्ठांपुमान्यर्हिगृहाश्रमे ॥ स्वधर्मेचानुतिष्ठेतगुणानांसमितिर्हिसा ८ पुरुषंसत्वसंयुक्तमनुमायाच्छमादिभिः ॥ कामादिभीरजोयुक्तंक्रो
धाद्यैस्तमसावृतम् ९ यदाभजतिमांभक्त्यानिरपेक्षःस्वकर्मभिः ॥ तंसत्वप्रकृतिंविद्यात्पुरुषंस्त्रियमेववा १० यदाआशिषआशास्यमांयजेतस्वकर्मभिः ॥
तंरजःप्रकृतिंविद्याद्धिंसामाशास्यतामसम् ११ सत्वंरजस्तमइतिगुणाजीवस्यनैवमे ॥ चित्तजायैस्तुभूतानांसज्जमानोनिबध्यते १२ यदेतरौजये
त्सत्वंभास्वरंविशदंशिवम् ॥ तदासुखेनयुज्येतधर्मज्ञानादिभिःपुमान् १३ यदाजयेत्तमःसत्वेरजःसंगंभिदाचलम् ॥ तदादुःखेनयुज्येतकर्मणायशसा
श्रिया १४ यदाजयेद्रजःसत्वेतमोमूढोह्ययंजनः ॥ युज्यतेशोकमोहाभ्यांनिद्रयाहिंसयाशया १५ यदाचित्तंप्रसीदेतइंद्रियाणांचनिर्वृतिः ॥ देहेभयंम
नोसंगंतत्सत्वंविद्धिमत्पदम् १६ विकुर्वनक्रिययाचाधीरनिवृत्तिश्चचेतसः ॥ गात्रास्वास्थ्यंमनोभ्रांतंरजएतैर्निशामय १७ सीदच्चित्तंविलीयेतचेत
सोग्रहणेक्षमम् ॥ मनोनष्टंतमोग्लानिस्तमस्तदुपधारय १८ एधमानेगुणेसत्वेदेवानांबलमेधते ॥ असुराणांचरजसितमस्युद्धवरक्षसाम् १९ सत्वा
ज्जागरणंविद्याद्रजसास्वप्नमादिशेत् ॥ प्रस्वापंतमसाजंतोस्तुरीयंत्रिष्वसंगतम् २० उपर्युपरिगच्छंतिसत्वेनाब्रह्मणोजनाः ॥ तमसाधोधआमुख्या
द्रजसांतरचारिणः २१ सत्वेप्रलीनाःस्वर्यांतिनरलोकंरजोलयाः ॥ तमोलयास्तुनिरयंयांतिमामेवनिर्गुणाः २२

मिंद्रियाणांनिर्वृतिराह्लादश्चदेहअभयंमनःअसंगंचभवति तदातन्मत्पदंमत्स्थानंसत्वंविद्धि १६ क्रिययाविकुर्वन्भवतिचेतसोविषयादानिवृत्तिश्चभवति गात्रास्वास्थ्यंशरीरावयवानांविजृंभणं एतैर्लिंगैरि
दंरजइतिनिशामयपश्य १७ तमोगुणवर्तनप्रकारंस्पष्टयति सीदादिति यदाचित्तंस्मरणकारणंअंतःकरणंसीदत्नश्यत् अथवाविलीयेतचेतसोग्रहणेबहुस्मरणशक्तेश्चेतनायाग्रहणेअक्षममसमर्थंमनोनष्टं
भवति तमःअज्ञानंग्लानिर्ग्लानताचभवतितदातमोगुणवर्तनमुपधारय १८ बुभूषुणासत्वमेवसेवनीयमितिभावेनाह एधमानइति १९ तुरीयमवस्थास्वरूपंत्रिषुगुणेष्वसंगतंसंबद्धंनभवति २०
इतोपिसत्वमेवश्रेयःसाधनमित्याह उपरीति आब्रह्मणोब्रह्मलोकपर्यंतंआमुख्यादंधतमःपर्यंतअंतरचारिणःस्वर्गादौचरंति २१ सत्वेसत्वगुणप्रवृद्धौप्रलीनाःमृताःस्वर्गं रजसिप्रवृद्धेलयोयेषांतेरजोलयाः
तमोलयाःइत्येतदनेनव्याख्यातंनिर्गुणास्तमआदिगुणानभिभूताआत्यंतिकभक्तिसाधनाः २२

मदर्पणंनिष्फलंवासात्विकंनिजकर्मतत् ॥ राजसंफलसंकल्पंहिंसाप्रायादितामसम् २३ कैवल्यंसात्विकंज्ञानंकर्मनिष्ठंतुराजसम् ॥ प्राकृतंतामसंज्ञानंमन्निष्ठंनिर्गुणंस्मृतम् २४ वनंतुसात्विकोवासोग्रामोराजसउच्यते ॥ तामसंद्यूतसदनंमन्निकेतंतुनिर्गुणम् २५ सात्विकःकारकोसंगीरागांधो राजसःस्मृतः ॥ तामसःस्मृतिविभ्रष्टोनिर्गुणोमदपाश्रयः २६ सात्विक्याध्यात्मिकीश्रद्धाकर्मश्रद्धातुराजसी ॥ तामस्यधर्मेयाश्रद्धामत्सेवायांतुनिर्गुणा॥ २७ पथ्यंयुक्तमनायस्तमाहार्यंसात्विकंस्मृतम् ॥ राजसंचेंद्रियप्रेष्ठंतामसंचार्तिदाशुचि २८ सात्विकंसुखमात्मोत्थंविषयोत्थंतुराजसम् ॥ तामसंमोहदैन्योत्थंनिर्गुणंमदपाश्रयम् २९ द्रव्यंदेशःफलंकालोज्ञानंकर्मचकारकः ॥ श्रद्धावस्थाकृतिर्निष्ठात्रैगुण्याःसर्वएवाहे ३० सर्वेगुणमयाभावाःपुरुषाव्यक्तनिष्ठिताः ॥ दृष्टंश्रुतमनुध्यायेद्बुद्ध्यावापुरुषर्षभ ३१ एताःसंसृतयःपुंसांगुणकर्मनिबंधनाः ॥ येनेमेनिर्जिताःसौम्यगुणाजीवेनचित्तजाः ३२ भक्तियोगेनमन्निष्ठोमद्भावायप्रपद्यते ३३ तस्माद्देहमिमंलब्ध्वाज्ञानविज्ञानसंभवम् ॥ मय्यैवब्रह्मणापूर्णेानबहिर्नांतरश्चरेत् ॥ ३४ ॥ ॥ इतिश्रीभागवते महापुराणेएकादशस्कंधेपंचविंशोध्यायः ॥ २५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

वाशब्दश्चार्थे मदर्पणत्वेननिष्फलत्वेनफलानुसंधानराहित्येनयत्कर्मतन्निजकर्मवर्णाश्रमविहितंकर्मसात्विकंकर्म २३ गुणनिमित्तकर्मभेदंनिरूप्यज्ञानभेदमाह कैवल्यामिति कैवल्यंकेवलंयथाशास्त्रप्रतिपादितंतत्त्वंतद्विषयंज्ञानंकेवलंकेवलमेवकैवल्यंज्ञानंसात्विकंअग्निष्टोमादिकर्मनिष्ठंप्राकृतंबहिर्मुखजनप्रियंवैषयिकंनिर्गुणंमुक्तिसाधनं तदुक्तं नैर्गुण्यसाधनंयत्तन्निर्गुणंपरिकीर्तितमिति यथाशास्त्रोक्तविज्ञानंकेवलंज्ञानमुच्यते । स्वदृष्टशास्त्रानुकूल्याददृष्टानांतुभक्तितः । गुणानांतुहरौभावंविनिश्चित्यतदाश्रयात् । यथाशास्त्रानुसंधानंज्ञानं चहरिसंश्रयमितिच २४ इदानींगुणनिमित्तंक्षेत्रभेदमाह वनमिति मन्निकेतनंमदाश्रयंदेवालयादि २५ इदानींकर्तृभेदमाह सात्विकइति असंगीकारकःकर्तानिष्कामत्वेनकर्मणांकर्तेत्यर्थः स्मृतिविभ्रष्टःश्रुत्याद्यविहितकारित्वेनसत्कर्मणःभ्रष्टःनिर्गुणो मोक्षगामी २६ श्रद्धाभेदमाह सात्विकीति आध्यात्मिकीयथाश्रुतशास्त्रविषया श्रुतशास्त्रानुसारेणयाश्रद्धापरमात्मनि । सासात्विकीतदन्यस्याप्यनुसारेणनिर्गुणा । अश्रुत्वापिप्रमाणंयोवासुदेवैकसंश्रयः । सनिर्गुणोभागवतःसमुद्दिष्टोमनीषिभिरितिस्मृतेः । श्रुतशास्त्रार्थश्रद्धावत्तदनुसारेणअश्रुतशास्त्रार्थेषुतदुक्तप्रकारेणमत्सेवायांमत्सेवार्थंयाश्रद्धासानिर्गुणा तदन्यस्याप्यनुसारेणनिर्गुणेत्युक्तेः २७ आहारभेदमाह पथ्यमिति अनायस्तमक्लिष्टं इंद्रियप्रेष्ठंइंद्रियप्रीतिकरं आर्तिदंचाशुचिच २८ सुखभेदमाह सात्विकमिति आत्मोत्थंपरोक्षज्ञानंशास्त्रश्रवणसंजातं यत्तस्मादात्मनोमतेर्ज्ञाना

दुत्थंसुखंसात्विकं परोक्षज्ञानमात्मोत्थमित्यादेःमदपाश्रयंमदपरोक्षज्ञानजन्यसुखंनिर्गुणं । अपरोक्षेणदर्शनं विष्ण्वाश्रयंसुखंनित्यंगमयेत्तत्प्रसादतइतिभगवतःस्वरूपसुखमिदंनेत्यतोमदपाश्रयमित्युक्तं नतुविष्णोःस्वरूपंतुसुखंकेनचिदाप्यते । तस्यैवविषयत्वात्तुतत्सुखंचेतिभण्यते । परोक्षज्ञानगोयस्माद्विषयःस्वमनोगतः । अतआत्मोत्थमित्येवसुखमाहुर्विपश्चितइतिच २९ किंबहुनासर्वेपदार्थास्त्रिगुणसंबंधेनात्रिविधाइत्याह द्रव्यमिति फलंस्वर्गादि कालःमातरादिः अवस्थाजाग्रदादिलक्षणा कृतिःक्रिया निष्ठात्रतम् ३० तदेवविवृणोति सर्वइति पुरुषेणविष्णुनाअव्यक्तेनाश्रियास्वयं निष्ठिताःव्यवस्थापिताः सत्वादिकृतसंसारजयोपायमाह दृष्टमिति वाशब्दश्चार्थे शास्त्रेणश्रुतंबुद्ध्याचशास्त्रार्थरूपेणदृष्टंचपरंब्रह्मानुध्यायेन्निरंतरंस्मरेत् ३१ अनेनध्यानेनकिंफलमत्राह एता इति एवमुपासकेनयेनजीवेनाचित्तजाताःसत्वादिगुणाःनिर्जिताःतेनगुणकर्मनिबंधनाःसंसृतयश्चशमंगुक्ताःनिर्जिताभवंतीतिशेषः ३२ ननुत्वत्प्राप्तिमंतरेणसंसृतिजयेनकिंतत्राह भक्तीति ३३ माथितार्थमाह तस्मादिति ज्ञानविज्ञानयोःसंभवोयस्मात्सतथातं व्यवधानेनशास्त्रद्वारा जातंज्ञानंपरोक्षज्ञानं अपरोक्षेणजातंविज्ञानंनिर्गुणमितिसंगिरंते सत्वाद्गुणाज्जातमपिव्यवधानान्नैवब्र

मुक्तिदंनिर्गुणंप्रोक्तंव्यवधानेनसात्विकमित्युक्तेः यतःसंसारमोक्षोमद्भावस्तस्मान्मानुषंदेहंलब्ध्वासर्वोत्तमंमांविज्ञायब्रह्मणासर्वगुणपूर्णनमयेवपूर्णश्चरितार्थोनापुरुषार्बहिर्विषयेषुनाचरेत् आंतरएवइंद्रियैर्मत्यगात्मविषयत्वेनैवचरेदित्यर्थःसंसारस्यांतत्वादंतोहंतस्मिन्मयिरतोभूत्वेतिवा अंतरच्छिद्रःइंद्रियव्याजीनचरेन्नस्यादितिवा अंतोरुपवसितेमृत्यौस्वभावेपरमात्मनिइतिआंतरोमांविनानचरेदितिवा ३४
इतिश्रीभागवतेमहापुराणेएकादशस्कंधेविजयध्वजकृतटीकायांपंचविंशोध्यायः ॥ २५ ॥ अनंतरातीताध्यायेसर्वतःसंगमुत्सृज्यमन्निष्ठेकार्येत्युक्तंतमेवार्थमितिहासपूर्वंकमपंचयत्यस्मिन्नध्याये तत्रादावुक्तमपिब्रह्मध्यानफलंविश्वासजननायपुनराह मल्लक्षणमिति मांलक्षयतीतिमल्लक्षणंमुद्रायस्यसतथातंमद्धर्मभागवतसंज्ञंआत्मस्थंहृदिस्थंसमुपैतिदर्शनेनेतिशेषः पश्यतीत्यर्थः १ दृष्टतत्त्वस्यतस्ययावद्देहपातंस्थितिप्रकारमाह गुणमय्येति पुमान्सज्ञानीअवस्तुभिरमंगलैःगुणैःशब्दादिभिर्नयुज्यतेनसंबध्यतेयोग्यतातिरेकेणासेवनात् तत्रकारणमाह ज्ञानेति परतत्त्वाद्यशेषतत्त्वापरोक्षज्ञाननिष्ठयागुणमय्यासत्त्वादिगुणरूपयाजीवयोन्यालिंगशरीराख्यमायययाविमुक्तस्तदभिमानरहितइत्यर्थः मायामात्रेपुपकृतिनिमित्तेष्ववस्तुतोस्वातंत्र्येणदृश्यमानेषुगुणेषुशरीरेषुवर्तमानोपि वस्तुत्वतंत्रमुद्दिष्टमस्वतंत्रमवस्तुचेतिवचनादवस्तुतइत्यनेननमिथ्यत्वमुच्यते तन्निवृत्त्यर्थसाधनसामग्रीविधानवैयर्थ्यापत्तेः २ ज्ञानिनायोग्यतातिरेकेणविषयनिषेवानकार्येत्युक्तं किमुतज्ञानार्थिनेत्यत्रकैमुत्यमाह संगामिति शिश्नोदर

श्रीभगवानुवाच ॥ मल्लक्षणमिमंकायंलब्ध्वामद्धर्ममास्थितः ॥ आनंदंपरमात्मानमात्मस्थंसमुपैतिमाम् १ गुणमय्याजीवयोन्याविमुक्तोज्ञाननिष्ठया॥
गुणेषुमायामात्रेषुदृश्यमानेष्ववस्तुतः ॥ वर्तमानोपिनपुमान्युज्यतेऽवस्तुभिर्गुणैः २ संगंनकुर्यादसतांशिश्नोदरतृपांक्वचित् ३ तस्यानुगस्तमस्यंधेपतत्यंधानुगांधवद् ४ ऐलःसम्राडिमांगाथामगायतबृहच्छ्रवाः ॥ उर्वशीविरहान्मुह्यन्निर्विण्णःशोकसंयुतः ५ त्यक्त्वात्मानंव्रजंतींतांनग्नउन्मत्तवन्नृपः ॥
विलपन्नन्वगाज्जायेघोरेतिष्ठेतिविक्लवः ६ कामानतृप्तोनुजुषन्क्षुल्लकान्वर्षयामिनीः ॥ नवेदगणनांयांतीमुर्वश्याकृष्टचेतनः ७ ऐलउवाच ॥ अहोमेमोहविस्तारःकामकश्मलचेतसः ॥ देव्यागृहीतकंठस्यनायुःखंडाअनुस्मृताः ८ नाहंवेदाभिनिर्मुक्तःसूर्येणाभ्युदितोमृषा ॥ मुषितोवर्षपूगानांबताहानिगतान्युत ९ अहोमेआत्मसंमोहोयेनात्मायोषिताहृतः ॥ क्रीडामृगश्चक्रवर्तीनरदेवशिखामणिः १० सपरिच्छदमात्मानंहित्वातृणमिवेश्वरम् ॥ यांतींस्त्रियंचान्वगतंनग्नउन्मत्तवद्रुदन् ११ कुतस्तस्यानुभावःस्यात्तेजईशित्वमेवा ॥ योन्वगच्छंस्त्रियंयांतींस्मरबाणविताडितः १२

एवर्तपयंतीतिशिश्नोदरतृप्तःतेषामसतांसंगंस्त्रेहलक्षणंनकुर्यात् ३ करणेबाधकमाह तस्येति तस्यासतइतिजातावेकवचनं अनेनविषयसंगोनकर्तव्यइतिकिवक्तव्यमित्युक्तंभवति ४ संगात्कस्यानर्थःकस्यचसुखकरोनिर्वेदश्चाभूदितिउद्धवस्यमानसींशंकांपरिहर्तुमैलोपाख्यानमाह ऐलइति गाथांशिक्षाकरंवचनम् ५ जायेघोरेतिष्ठेत्यनेन हयेजायेमनसातिष्ठघोरेवचांसिमिश्राकृणवावहैन्वितीदंसूचयति ६ वर्षयामिनीःवर्षरात्रीःउद्दिश्ययांतींगणनांनवेद अज्ञानेहेतुमाह उर्वशीति ७ मोहाविस्तारःअज्ञानविस्तार. आयुःखंडाःअहोरात्रविभागाः ८ उक्तमेवविवृणोति नाहमिति अहंवर्षपूगानांसंख्यानयोग्यानिगतानिअहान्युतनवेदकिमुतान्यानि सूर्योदयादिनाज्ञातुंशक्यत्वात् कथमेतदत्राह अभिनिर्मुक्ता इति सूर्येणाभ्युदितोऽहरंशःसूर्येणाभिनिर्मुक्तःकालोरात्र्यंशइतिमृषाविवेकज्ञानाभावात्कुतोत्राह मुषितइति तत्संगेनज्ञानस्यमुष्टत्वात्अभिनिर्मुक्तइत्यादिराजविशेषणंवा ९ पुनरपिपश्चादनुतपन्नाह अहोइति आत्मामनोधृतिगुणोवा क्रीडामृगश्चकृतइतिशेषः १० क्रीडामृगत्वंलक्षयति सपरिच्छदमिति हस्त्यश्वादिपरिकरोपेतम् ११ अनुभावादिगुणैःस्त्रीसंगदोषलेपोनस्यादिति तत्राह कुतइति अनुभावस्तत्त्वनिश्चयःतेजःसामर्थ्यं ईशित्वंयोगशक्तिविशेषः अनेनसंगदोषंमार्ष्टुनसमर्थाएतेगुणाइत्युक्तंभवति स्मरबाणेत्यनेनानुगमनेहेतुरुच्यते १२

विद्यादयोपिसंगदोषमार्छुनप्रभवाइत्याह किंविद्ययेति १३ जातनिर्वेदोराजास्वात्मानंधिक्करोति स्वार्थस्येति स्वार्थविषयेअकोविदंस्वप्रयोजनज्ञानपाटवरहितामित्यर्थः १४ आत्मभूशब्दस्यानेकार्थत्वेनअत्रकइतिशंकानिवृत्तयेकामइति १५ संसारकामवैरिणिशार्ङ्गिणिजाग्रतिप्रभुर्नास्तीतिवचनंकथंयुज्यतइतित्राह आत्मारामइति १६ बोधकाभावादेवमभूदितिनेत्याह बोधितस्येति किमेतयावाचेत्यादिसूक्तवाक्येन १७ एतयोर्वश्यारहसिरतयाकिनुसुखंनकिमपिप्रत्युतदुःखमेवतत्रदृष्टांतःरज्ज्वांवैसर्पचेतसइति यथारज्ज्वांसर्पबुद्धेर्भयलक्षणंदुःखंतथा अन्यथाबुद्धैःकिंकारणमत्राह द्रष्टुरितिद्रष्टुरीश्वरस्यस्वरूपाविदुषःकिंचयोहंयादृशईश्वराधीनसत्ताकोहंतस्यममईश्वरस्वरूपाज्ञानंमत्स्वरूपाज्ञानेकारणमित्यर्थः रथांगपाणेःस्वरूपाज्ञानेस्वस्वरूपाज्ञानेवाजितेंद्रियत्वमेवकारणमित्याह यदिति १८ इतोपिसर्वस्याप्यज्ञानमेवकारणमित्याह कायामिति सौमनस्यंसौंदर्यं दौर्गंध्यादिदुर्गुणाधिकरणस्यदेहस्यसौमनस्यादिगुणसमवायोनघटतइतियस्मात्तस्मादनाद्यविद्ययाभगवत्स्वरूपाज्ञानेनाध्यासःअस्मिन्नतद्बुद्धिरभूदित्यर्थः १९ अध्यासंप्रपंचयति पित्रोरिति भार्यायाअपिभोगार्हत्वाद्विषयकोटयंतर्भावःयोदेहःपित्रादीनामस्येतिनावसीयतेननिश्चीयते २० तस्मिन्नुत्तुच्छानांपंचानांभूतानांनिष्ठोत्कर्षाय

किंविद्ययाकिंतपसाकिंत्यागेनश्रुतेनवा ॥ किंविविक्तेनमौनेनस्त्रीभिर्यस्यमनोहृतम् १३ स्वार्थस्याकोविदंधिङ्मांमूर्खंपंडितमानिनम् ॥ योहमीश्वरतां
प्राप्यस्त्रीभिर्गोखरवज्जितः १४ सेवतोवर्षपूगान्मेउर्वश्याअधरासवम् ॥ नतृप्तआत्मभूःकामोवह्निराहुतिभिर्यथा १५ पुंश्चल्यापहृतंचित्तंकोन्वन्यो
मोचितुंप्रभुः ॥ आत्मारामेश्वरमृतेभगवंतमधोक्षजम् १६ बोधितस्यापिदेव्यामेसूक्तवाक्येनदुर्मतेः ॥ मनोगतोमहामोहोनापयात्यजितात्मनः १७
किंन्वेतयामएकांतेरज्ज्वांवैसर्पचेतसः ॥ द्रष्टुःस्वरूपाविदुषोयोहंयदजितेंद्रियः १८ क्वायंमलीमसःकायोदौर्गंध्याद्यात्मकोशुचिः ॥ क्वगुणाःसौमनस्या
द्याह्यध्यासोविद्ययाकृतः १९ पित्रोःकिंस्विन्नुभार्यायाःस्वामिनोग्नेःश्वगृध्रयोः ॥ किमात्मनःकिंसुहृदामितियोनावसीयते २० तस्मिन्कलेवरेमेध्ये
तुच्छनिष्ठेविषज्जते ॥ अहोसुभद्रंसुनसंसुस्मितंचमुखंस्त्रियः २१ त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ ॥ विण्मूत्रपूयेरमतांकृमीणांकियदंतरम्
२२ अथापिनोविषज्जेतस्त्रीषुस्त्रैणेषुचार्थवित् ॥ विषयेंद्रियसंयोगान्मनःक्षुभ्यतिनान्यदा २३ अदृष्टादश्रुताद्भावान्नभावउपजायते ॥ असंप्रयुंजतः
प्राणाञ्छाम्यतिस्तिमितंमनः २४ तस्मात्संगोनकर्तव्यःस्त्रीषुस्त्रैणेषुचेंद्रियैः ॥ विदुषांचाप्यविश्रब्धःषड्वर्गःकिमुमादृशाम् २५ ॥ श्रीभगवानुवाच ॥
एवंप्रगायन्नृपदेवदेवःसउर्वशीलोकमथोविहाय ॥ आत्मानमात्मन्यवगम्यमावैउपारमज्ज्ञानविधूतमोहः २६

स्मिन् तुच्छानिष्ठाव्यवस्थाचयस्यसतथेतिवा तस्मिन्नमेध्यकलेवरेसुभद्रमितिविषज्जतेपुरुषःअहोभ्रांतिरिति २१ इतोपिस्त्रीष्वर्थबुद्धिकुर्वन्भ्रांतइत्याह त्वगिति संहतौत्वगादिसान्निबिडदेहेरमतांरममाणानांकृमीणांकीटकानांचांतरंयवच्छेदनंकियत् २२ स्त्रीष्वभिरमणमपिगर्हितंयस्मात्अथतस्मात्अर्थवित्स्वप्रयोजनवित्स्त्रीषुस्त्रीलोकेषुचनोविषज्जेतयद्यपिविशेषोनास्तितथापीदंनकर्तव्यमित्यतोवाह अथापीति स्त्रीसंगादिवर्जनेमनोवशीकरणमेवप्रथमसाधनं अन्यथासर्वंकुंजरस्नानवन्निष्फलंस्यादितिभावेनाह विषयेतिअन्यदाविषयेंद्रियसंयोगाभावेमनःक्षोभोनास्ति २३ तदुपपादयति अदृष्टादिति भावोमनः अदृष्टादश्रुताद्भावाद्वस्तुनोनोपजायते विकारविशिष्टंभवति संयोगलक्षणसंबंधाभावात् अतोदृष्टश्रुतवस्तुन्येवसंबंधसमर्थंमनः ततश्चप्रकृतेकिमनेनेतित्राह असंप्रयुंजतइति यतोविषयेंद्रियसंयोगात्तुक्षुब्धंभवत्यतःप्राणानींद्रियाणिविषयेषुअसंप्रयुंजतःविषयेभ्य आकृष्यस्ववशेकुर्वतःपुंसःआकर्षणपाशाभावात्तास्तिमितंनिश्चलंमनःशाम्यति भगवदेकनिष्ठंभवतीत्यर्थः २४ उक्तं निगमयति तस्मादिति कुतइतित्राह विदुषामिति२५ २६

जन्मप्रभृत्यभ्यस्तस्यदुःसंगस्यत्यागोदुःशकइतिनमंतव्यःसत्संगेनस्वपमेवाशिथिलीभूतस्यसुलभइतिभावेनाह ततइति तृणगुहावलंबरहितकूपपतनवत्दुःसंगोनथकरणंइतिपत्तत्तःतोकमस्यकुर्वतीति तत्राह संतइतिसंतएतस्यमनोवाक्कायकर्मभिःसम्यक्शरणंगतस्यपुंसोमनोव्यासंगमनसोदुष्टेषुसंगउक्तिभिःश्छिदंति २७ एवंविधमाहात्म्यार्थंतेकथंज्ञातव्याइतितल्लक्षणमाह संतइति २८ अनपेक्षतादिगुणानामन्यत्रापिदर्शनात्तेषामपिदुःसंगनिवर्तकत्वंस्यादित्याशंक्यतच्छक्तपुद्रोधकगुणसद्भावादन्यत्रतदभावादितिभावेनाहतेष्विति ततःकिमत्राह ताइति ताःकथाख्याउक्तयोमनोव्यासंगं छिंदंतीत्यर्थः २९ त्वद्भक्तिर्हिसमस्तव्यसनच्छेत्रीतदनुदयेताभिःकिमत्राह तायेशृण्वंतीति ३० भक्तेःसाधनोत्तमत्वमाह भक्तिमिति ३१ एतमर्थंसोदाहरणंसमर्थयते यथेति विभावसु मग्निंनिषेवमाणस्यशीतादिकंयथानश्यतितथासाधुंसत्पुरुषंसेवमानस्यमनोव्यासंगविनाशोभवतीत्यर्थः ३२ इतोपिसंतःसेव्याइत्याह निमज्ज्येति तथातेसंतःपुंसांपरायणमप्सुमज्जतां दृढानौरिव ३३ सत्स्वपिप्रधानःसन्नहमेवेतिसोदाहरणमाह अन्नमिति लुप्तोपमेपंक्षुधितानांअन्नंप्राणोयथाप्रकृष्टचेष्टाप्रदंयथाप्रेत्यमरणानंतरंधर्मोवित्तंनृणांसुखायस्याद्यथावार्तानांशरणंरक्षि

ततोदुःसंगमुत्सृज्यसत्सुसज्जेतबुद्धिमान् ॥ संतएवास्यछिंदंतिमनोव्यासंगमुक्तिभिः २७ संतोनपेक्षामच्चित्ताःप्रशांताःसमदर्शनाः ॥ निर्ममानिरहंकारानिर्द्वंद्वानिःपरिग्रहाः २८ तेषुनित्यंमहाभागमहाभागेषुमत्कथाः ॥ संभवंतिहितानृणांजुषतांप्रपुनंत्यघम् २९ तायेशृण्वंतिगायंतिह्यनुमोदंतिचादृताः ॥ मत्पराःश्रद्दधानाश्चभक्तिंविंदंतितेमयि ३० भक्तिलब्धवतःसाधोकिमन्यदवशिष्यते ॥ मय्यनंतगुणेब्रह्मण्यानंदानुभवात्मनि ३१ यथोपाश्रयमाणस्यभगवंतंविभावसुम् ॥ शीतंभयंतमोप्येतिसाधुंसंसेवतस्तथा ३२ निमज्ज्योन्मज्जतांघोरेभवाब्धौतेपरायणम् ॥ संतोब्रह्मविदःशांतानौर्दृढेवाप्सुमज्जतां ३३ अन्नंहिप्राणिनांप्राणआर्तानांशरणंत्वहम् ॥ धर्मोवित्तंनृणांप्रेत्यसंतोऽतोबिभ्यतोरणम् ३४ संतोदिशंतिचक्षूंषिबहिरर्कःसमुत्थितः॥ देवताबांधवाःसंतःपितामाताहमेवच ३५ चेतसेलासुतोप्येवमुर्वश्यालोकनिःस्पृहः ॥ मुक्तसंगोमहीमेतामात्मारामश्चचारह ३६ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेषड्विंशोध्यायः ॥ २६ ॥ उद्धवउवाच ॥ क्रियायोगंसमाचक्ष्वभवदाराधनंप्रभो ॥ येनत्वांयेयथार्चंतिसात्वताःसात्वतर्षभ १ एतद्वदंतिमुनयोमुहुर्निश्रेयसंनृणाम् ॥ नारदोभगवान्व्यासआचार्योंगिरसःसुतः २

ताहमेवयदतःसंसाराद्भिभ्यतोजनस्यारणंशरणंसंतइति ३४ तदुपपादयति ॥ संतइति ॥ यथासमुत्थितउदितोर्कोबहिश्चक्षुर्दिशति तथासंतःआंतरंचक्षुर्दिशंति बहुवचनादादित्यादधिकप्रयोजकत्वं सूचयति सत्प्रधानोहरिरित्यस्यावगतिःकथमभूदित्यत्राह देवताइति देवतादयोहमेवेत्यनेनसत्प्रधानत्वंअवगतंहरेरिति विष्णोश्चसत्प्रधानत्वान्नसतांविद्यतेपरं । इत्याहुर्वेदविदुषःसहिसर्वेश्वरेश्वरइतिवाक्यंचशब्देसूचयति ३५ स्वोक्तमर्थमितिहासेनसंगमयति चेतसेति चेतसैवंनिरूप्यैवेतिशेषः ॥ ३६ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेविजयध्वजकृतटीकायांषड्विंशोध्यायः ॥ २६ ॥ कर्मयोगानुष्ठानप्रकारंप्रपंचयत्यस्मिन्नध्याये तत्रोद्धवोधिष्ण्येष्वित्यादिनासंक्षिप्योक्तंक्रियायोगंविस्तरतोविविदिषुःपृच्छति क्रियायोगमित्यादिना क्रियातुनिष्कृतौशिक्षाचिकित्सापायकर्मसु । कारणारंभपूजासुसंप्रधारणचेष्टयोरित्यतोविवक्षितमाह भवदाराधनमिति येसात्वताःसात्वततंत्रोक्तविधानंविद्वांसस्तेयेनकेनत्वांयथाकथमर्चंति १ इदमेववक्तव्यंइतिकिंकिमन्यत्रस्यादितितत्राह एतदिति मुनयःएतद्भगवदाराधनंनृणां निःश्रेयसंपुरुषार्थसाधनंमुहुर्मुहुरनुक्षणंवदंति ग्राह्यत्वेतान्निर्दिशति नारदइत्यादिना अंगिरसःसुतःआचार्योबृहस्पतिः २

इतोपिइदमेवश्रोतव्यंनान्यदित्याह निःसृतमिति ऋषिवचनानांविकल्पसंभवात्कथंनिर्णयइत्यतोवाह निःसृतमिति भवदाज्ञयाअसुरजनमोहनायान्यथावदिच्छवोपिइदंग्राह्यत्वेनाह देव्याइति देव्याइत्यनेनाप्तमूलत्वंसूचयति २ उत्तमश्रोतृणामर्थायोक्तमस्तु नापरेषामधिकारइतिनाश्रद्धेयमितिभावेनाह एतद्वैसर्वेति संमतंसमानम् ४ अनेनकर्मबंधविध्वंसाभावान्नानुष्ठानार्हमितिने त्याह कर्मेति ५ कर्मकांडस्यापरिमितत्वेनतज्ज्ञानस्यचदुःसाधनत्वेनमंदमतीनांतदुक्तानुष्ठानंदूरोत्सारितमित्यतोनादरणीयमितिन मतिकुरुकिंतुयत्संक्षिप्योक्ततत्त्वत्प्रश्नपरिहारत्वेनवक्ष्यामीत्याह नहीति कर्मकांडस्यपंचरात्रागमस्य चशब्दोनसमुच्चये किंतु केषांचिदेवानंतपारत्वंनसर्वेषामस्मदादिबुद्धिविषयत्वादित्यस्मिन्नर्थे ६ वैदिकोवेदाधिकारिविषयोग्निष्टोमादिस्तांत्रिकःतंत्राधिकारिवि षयःपुष्पांजल्यादिमिश्रःस्त्रीशूद्रादिविषयोनामसंकीर्तनादिःमखोयागःपूजालक्षणः तत्तदधिकारिणमाह त्रयाणामिति ईप्सितेनयोग्येन ७ स्वनिगमेनस्वशाखयाविहितंयथातथाद्विजत्वमुपनयनं प्राप्य ८ अर्चादीन्यधिष्ठानानिउत्तरोत्तरंशस्तानियथायोग्यम् ९ उभयैर्वैदिकैस्तांत्रिकैरपिमंत्रैः १० संध्योपास्त्यादिकर्माणियानितैःममपूजांप्रकल्पयेत् किमर्थमेवंसंकल्पइतितत्राह सम्यगिति

निःसृतंतेमुखांभोजाद्यदाहभगवानजः ॥ पुत्रेभ्योभृगुमुख्येभ्योदेव्यैचभगवान्भवः ३ एतद्वैसर्ववर्णानामाश्रमाणांचसंमतम् ॥ श्रेयसामुत्तमंमन्येस्त्रीशूद्राणां चमानद ४ एतत्कमलपत्राक्षकर्मबंधविमोचनम् ॥ भक्तायचानुरक्तायब्रूहिविश्वेश्वरेश्वर ५ श्रीभगवानुवाच ॥ नह्यंतोनंतपारस्यकर्मकांडस्यचोद्ध व ॥ संक्षिप्तंवर्णयिष्यामियथावदनुपूर्वशः ६ वैदिकस्तांत्रिकोमिश्रइतिमेत्रिविधोमखः ॥ त्रयाणामीप्सितेनैवविधिनामांसमर्चयेत् ७ यथास्व निगमेनोक्तंद्विजत्वंप्राप्यपूरुषः ॥ यथायजेतमांभक्त्याश्रद्धयातन्निबोधमे ८ अर्चायांस्थंडिलेग्नौवासूर्येप्सुहृदिवाद्विजे ॥ द्रव्येणभक्तियुक्तोर्चेत्स्वगुरुं माममायया ९ पूर्वंस्नानंप्रकुर्वीतधौतदंतोंगशुद्धये ॥ उभयैरपिचस्नानंमंत्रैर्मृद्ग्रहणादिभिः १० संध्योपास्त्यादिकर्माणिवेदतंत्रोदितानिमे ॥ पूजांतैःक ल्पयेत्सम्यक्संकल्पःकर्मपावनः ११ शैलीदारुमयीलौहीलेप्यालेख्याचसैकती ॥ मनोमयीमणिमयीप्रतिमाष्टविधास्मृता १२ चलाचलेतिद्विविधाप्र तिष्ठाजीवमंदिरं ॥ उद्वासावाहनेनस्तःस्थिरायामुद्ववार्चने १३ अस्थिरायांविकल्पःस्यात्स्थंडिलेतुभवेद्वयम् ॥ स्नपनंतुविलेप्यायामन्यत्रपरिमार्जनम् १४ द्रव्यैःप्रसिद्धैर्मद्यागःप्रतिमादिष्वमायया ॥ भक्त्याचैवयथालब्धैर्हृदिभावेनचैवहि १५ स्नानालंकरणंप्रेष्ठमर्चायामेवतूद्धव ॥ स्थंडिलेतत्त्वविन्यासो वह्नावाज्यप्लुतंहविः १६ सूर्येचाभ्यर्हणंप्रेष्ठंसलिलेसलिलादिभिः ॥ श्रद्धयोपाहृतंश्रेष्ठंभक्तेनममवार्यपि ॥ गंधोधूपःसुमनसोदीपोन्नाद्यंचकिंपुनः १७

सम्यक्ममपूजात्वेनसंकल्पःकर्मशुद्धिकरइत्यर्थः ११ अर्चायामित्युक्तप्रतिमाभेदमाह शैलीति शैलीशिलामयी लोहेनकांस्यताम्रादिनानिर्मितालौही लेप्याऔषधरससंलिप्तशिला लेख्यापटादिलिखि तचित्रलक्षणा सैकतीतत्तत्कालोचितलिखितयाकृता मनोमयीध्यानकालोचितप्रतिबिंबिताकृतिः मणिमयासूर्यकांतादिरचिता १२ जीवमंदिरंदेहःइदमपिचलांतर्भूतंस्थिरायांप्रतिमायामर्चनेउद्वासावा हनेनस्तः १३ अन्यत्रशिलादिष्वेव स्नपनंविलेप्यायां तुशब्दात्स्थंडिलादावपिपरिमार्जनंस्नपनमित्युच्यते १४ प्रसिद्धैस्तंत्रेषुप्रशस्तत्वेननिरूपितैःसामग्र्यभावेयथालब्धैः हृदिभक्त्याभावेनध्यानेन द्रव्य ध्यानसमुच्चयेचशब्दः एवशब्दोभक्तेःसार्वत्रिकत्वे हिशब्दोज्ञानाद्याधिक्ये १५ तत्त्वस्यहरेःसच्चिदानंदरूपस्यविन्यासःसन्निधानंतत्त्वानांप्राणश्रद्धादीनांविन्यासोवा १६ सूर्येपुष्पादिभिरभ्यर्हणंप्रेष्ठंअ तिशयितप्रीतिजनकं सर्वस्माद्भक्तिपूर्वकमुपाहृतंप्रेष्ठमित्याह श्रद्धयेति १७

प्रागुदग्वासीनःसंमुखःअभिमुखः १८ कृतषडंगन्यासः कलशमप्रोदकपात्रं प्रोक्षणीयंपुण्यादिपात्रत्र १९ २० देशिकोमंत्रज्ञः हृदादिमंत्रैर्नमआदिलक्षणैः २१ ध्येयस्वरूपमाह पिंडइति प्राणायामा
उज्वलितवाय्वग्निसंशुद्धेपिंडेदेहहृत्पद्मस्थां जीवःकलायस्याःसाजीवकलातांबिंबस्वरूपमित्यर्थः हृदिस्थापाहरमूर्तिर्जीवोयत्प्रतिबिंबकः । यद्वशेवर्ततेजीवःसातुजीवकलास्मृतेतिवचनात् ध्याये
त् । नादांतेसिद्धभावितां नादःशब्दःअंतोवसानं सर्वात्मनाशब्देनुरक्तत्वात् शब्दागोचरतयासिद्धैःसनकादिनिरूपासितां शब्दैःसर्वात्मनानुकूर्नादांतस्थातुसाप्रतेत्युक्तेः २२ आत्मव्याप्तिभूता
नित्यंवर्तमाना याजीवकला तयाशरीरव्यापिन्याभगवन्मूर्त्यव्याप्तेपिंडेदेहेसंपद्यसम्यक्प्रतिपत्तिकृत्वातन्मयःएवंध्यानेनभगवत्प्रधानोभूत्वाअर्चादिषुआवाह्यसंस्थाप्यसंनिरुध्यन्यस्तांगमातृका
दिमंत्राक्षरैर्न्यस्ततत्तदवयवंमांप्रपूजयेदित्यन्वयः व्याप्तोभूतश्चनित्यंयदात्मभूतोहरिस्ततः । जीवस्यतत्प्रधानत्वंतन्मयत्वमुदाहृतमितिवचनात् । अतसातत्यगमनइतिधातोःमन्प्रत्ययादात्मेतिरूपं व्याप्तो

शुचिःसंभृतसंभारःप्राग्दर्भैःकल्पितासनः ॥ आसीनःप्रागुदग्वार्चेदर्चायांत्वथसंमुखः १८ कृतन्यासोमदर्चांचपाणिनाभिमृजेद्बुधः ॥ कलशंप्रोक्षणी
यंचयथावदुपसादयेत् १९ तदद्भिर्देवयजनंद्रव्याण्यात्मानमेवच ॥ प्रोक्ष्यपात्राणित्रीण्यद्भिस्तैस्तैर्द्रव्यैश्चसादयेत् २० पाद्यार्घ्याचमनीयार्थत्रीणि
पात्राणिदेशिकः ॥ हृदाशीर्ष्णाथशिखयागायत्र्यावाभिमंत्रयेत् २१ पिंडेवाय्वग्निसंशुद्धेहृत्पद्मस्थांपरांमम ॥ अण्वींजीवकलांध्यायेन्नादांतेसिद्धभा
वितम् २२ तयात्मभूतयापिंडेव्याप्तेसंपद्यतन्मयः ॥ आवाह्यार्चादिषुस्थाप्यन्यस्तांगंमांप्रपूजयेत् २३ पाद्योपस्पर्शनार्घ्यादीनुपचारान्प्रकल्पयेत् ॥
धर्मादिभिश्चनवभिःकल्पयित्वासनंमम २४ पद्ममष्टदलंतत्रकर्णिकाकेसरोज्ज्वलम् ॥ उभाभ्यांवेदतंत्राभ्यांमह्यंतूभयसिद्धये २५ सुदर्शनंपांचजन्यं
गदासीषुधनुर्हलान् ॥ मुसलंकौस्तुभंमालांश्रीवत्संचानुपूजयेत् २६ नंदंसुनंदंगरुडंप्रचंडंचंडमेवच ॥ महाबलंबलंचैवकुमुदंकुमुदेक्षणम् २७ दुर्गांविना
यकंव्यासंविष्वक्सेनंगुरून्सुरान् ॥ स्वेस्वेस्थानेत्वभिमुखान्पूजयेत्प्रोक्षणादिभिः २८ चंदनोशीरकर्पूरकुंकुमागुरुवासितैः ॥ सलिलैःस्नापयेन्मंत्रैर्नित्यदा
विभवेसति २९ स्वस्यधर्मानुवाकेनमहापुरुषविद्यया ॥ पौरुषेणापिसूक्तेनधामनीराजनादिभिः ३० वस्त्रोपवीताभरणपत्रस्रग्गंधलेपनैः ॥ अलंकुर्वीतस
प्रेममद्भक्तोमांयथोचितैः ३१ पाद्यमाचमनीयंचगंधंसुमनसोज्ज्वलम् ॥ धूपदीपोपहाराणिदद्यान्मेश्रद्धयार्चकः ३२ गुडपायससर्पींषिशष्कुल्यापूपमो
दकान् ॥ संयावंदधिसूपांश्चनैवेद्यंसातिकल्पयेत् ३३ अभ्यंगोन्मर्दनादर्शदंतधावाभिषेचनम् ॥ अन्नाद्यनृत्यगीतानिसर्वाणिस्युस्तथान्वहम् ३४

पिभगवान्विष्णुर्देहेसर्वगगत्वतः । भक्तस्यफलदोयस्माद्व्याप्तिकृत्तस्यतेनसइति अनेनमयिस्थित्वास्वयमेवस्वात्मानंआवाहयत्यर्चयत्यहंतदधीनतयावाहनादिकरोमीत्याद्युक्तंभवति २३ धर्मादिभिः
विमलादिभिःनवभिःशक्तिभिश्चासनंपीठंकल्पयित्वा २४ तत्रधर्मादिरूपेपीठेअष्टदलंपद्मंध्यात्वातत्रप्रकृतिसन्निहितेपद्मेमांपूजयेत्वेदतंत्राभ्यांमह्यंमहनीयंपूजनीयंउभयसिद्धयेवेदतंत्रप्रोक्तफलसिद्धये २५
अन्वनंतरम् २६ २७ मध्यावाहितप्रधानदेवताभिमुखान् प्रोक्षणीयादिभिःअर्घ्यादिभिः २८ २९ स्वस्यसूक्तेनविष्णुसूक्तेनधर्मानुवाकेन धर्मासमंताच्चितंव्यापतुरित्यादिसूक्तेन । महापुरुष
विद्यया जितंतेपुंडरीकाक्षेत्यादिकयापौरुषेणसूक्तेनापि धामसूक्तं समुद्रादूर्मिरिति पावमानंसूक्तं नीराजनं । नितरांरंजयेद्यस्मात्पावमानंतुमंडलं । विष्णुंनीराजनंतस्माद्विद्वद्भिःसमुदाहृतमिति
वचनात्आदिशब्दोक्तैरुद्रोजज्ञेवीर्यायेत्यादिसूक्तैःस्तुतिंकुर्यात् ३० ३१ ३२ संयावंगोधूमपायसंराजान्नंवा विद्येति ३३ ३४

मेखलावर्तवेदिभिःसहविहिते उदितंज्वलितम् ३५ ३६ ३७ ३८ हविषासर्पिषाभियुतानिग्निश्रितानिदारुणिसमिधःप्रास्यहुत्वाआधार्यकोणात्कोणंप्रतिहुत्वार्चाविधानतःपूजाविधानतः ३९ धर्मादिमंत्रैःधर्मादिभ्यश्चयथान्यायंहविर्जुहुयादितिशेषः पुनःस्विष्टकृतंकुर्यात् ४० अभ्यर्चायामितिपाठे अभिमुखोभूत्वाअर्चायांसन्निहितंभगवंतंनमस्कृत्यत्यर्थः ४१ सुरभिमन्मुखवासतांबूलाद्यं चदत्वानंतरंचामराद्युपचारैःअर्हयेत्संभावयेत् ४२ नकेवलंउपगायन्गृणञ्छृण्वंश्चकिंतुममकर्माणिअन्यैःकीर्तयित्वाभिनयन् सर्वेषांप्रकाशयन् अर्थांतरंचाह मत्कथाइति अनेनाभिनयशब्दार्थो पिविवृतः किमुक्तंस्यादत्राह मुहूर्तःक्षणिकइति मत्कथार्थमेवमुहूर्तः क्षणश्चास्येत्यस्मिन्नर्थेठप्रत्ययः मत्कथातिवाहितसर्वकालोभवेदित्यर्थः ४३ स्तवैर्मुक्तकश्लोकनिबंधनैः ४४ परस्परंबद्धाभ्यांबा हुभ्यांसहशिरःमत्पादयोः ४५ शेषांमालाक्षतादिदानेशेषोस्त्री अन्यस्मिन्नुपयुक्तः माल्याक्षतादिदानेस्त्रीतियादवः ४६ यत्रयेष्वर्चादिषुयथाश्रद्धातथामामर्चयेत् ४७ अर्चानुभावतःप्रतिमासा

विधिनाविहितेकुंडेमेखलावर्तवेदिभिः ॥ अग्निमाधायपरितःसमूहेत्पाणिनोदितम् ३५ परिस्तीर्याथपर्युक्षेदन्वाधाययथाविधि ॥ प्रोक्षणीयानिद्रव्या णिप्रोक्ष्याग्नावावहेतमाम् ३६ तप्तजांबूनदप्रख्यंशंखचक्रगदांबुजैः॥ लसच्चतुर्भुजंशांतंपद्मकिंजल्कवाससम् ३७ स्फुरत्किरीटकटककटिसूत्रवरांगदम् ॥ श्रीवत्सवक्षसंभ्राजत्कौस्तुभंवनमालिनम् ३८ ध्यायन्नभ्यर्च्यदारुणिहविषाभियुतानिच ॥ प्रास्याज्यभागावाघार्यदत्वाचाज्यप्लुतंहविः ३९ जुहु यान्मूलमंत्रेणषोडशार्चाविधानतः ॥ धर्मादिभ्योयथान्यायंमंत्रैःस्विष्टकृतंबुधः ४० अभ्यर्च्याग्निंनमस्कृत्यपार्षदेभ्योबलिंहरत् ॥ मूलमंत्रंजपेद्ब्रह्मस्मरन्ना रायणात्मकम् ४१ दत्त्वाचमनमुच्छेषंविष्वक्सेनायकल्पयेत् ॥ मुखवासंसुरभिमत्तांबुलाद्यमथार्हयेत् ४२ उपगायन्गृणन्नृत्यन्कर्माण्यभिनयन्म म ॥ मत्कथाःश्रावयन्शृण्वन्मुहूर्तक्षणिकोभवेत् ४३ स्तवैरुच्चावचैःश्रौतैःपौराणैःप्राकृतैरपि ॥ स्तुत्वाप्रसीदभगवन्निति वंदेतदंडवत् ४४ शिरोमत्पा दयोःकृत्वाबाहुभ्यांचपरस्परम् ॥ प्रपन्नंपाहिमामीशभीतंमृत्युग्रहार्णवात् ४५ ततःशेषांमयादत्तांशिरस्य धायसादरम् ॥ उद्वासयेच्चेदुद्वास्यंज्योति र्ज्योतिषितत्पुनः ४६ अर्चादिषुयथायत्रश्रद्धामांतत्रचार्चयेत् ॥ सर्वभूतेष्वात्मनिचसर्वात्माहमवस्थितः ४७ एवंक्रियायोगपथैःपुमान्वैदिकतांत्रिकैः ॥ अर्चानुभावतःसिद्धिंमत्तोविंदत्यभीप्सिताम् ४८ मदर्चांसंप्रतिष्ठाप्यमंदिरंकारयेद्दृढम् ॥ पुष्पोद्यानानिरम्याणिपूजांतत्रोत्सवाश्रिताम् ४९ पूजादीनां प्रवाहार्थंमहापर्वसुचान्वहम् ॥ क्षेत्रापणपुरोग्रामान्दत्वामत्सार्ष्टितामियात् ५० प्रतिष्ठयासार्वभौमंसद्मनाभुवनत्रयम् ॥ पूजादिनाब्रह्मलोकंत्रिभिर्म त्साम्यतामियात् ५१ मामेवनैरपेक्ष्येणभक्तियोगेनविंदति ॥ सभक्तियोगंलभतेएवंयःपूजयेतमाम् ५२

मर्थात् ४८ ४९ ५० प्रवाहरूपेणप्रवर्तनार्थं प्रतिष्ठागृहकरणपूजानांफलतारतम्यमाह प्रतिष्ठयेत्यादिना मत्साम्यतांनिर्दुःखानंदानुभवरूपताम् ५१ ज्ञानंविनाप्रतिष्ठादिभिरेवसाम्यताकथं स्यादत्राह मामेवेति नैरपेक्ष्येणभक्तियोगेनैवमांविंदति साम्यंलभते । निर्दुःखत्वंहरेःसाम्यंनताद्दशसुखात्मता । सर्वोत्तमस्तदानंदःकथंकस्यचिदाप्यते । आधिपत्यंत्रिलोकस्ययोग्यानामींद्रतास्मृता अयोग्यानांत्रिलोकेपिपूज्यत्वंसमुदाहृतं । तद्भवेत्परयाभक्त्याविष्णोरालयकारिणः । ततोप्युद्रिक्तयाभक्त्याविष्णुंपूजयतःसदा । अवाप्यतेब्रह्मलोकस्तदुद्रिक्तश्चमुच्यत इतिमानाद्विशेषोऽवगंतव्यः ॥ नन्वेवंतर्हिप्रतिमादिपूजाव्यर्थेतितत्राह एवमिति यएवंमांपूजयेत्सभक्तियोगंलभते तेनमामाप्नोतीतिशेषः अनेनज्ञानभक्तिद्वारेणभगवत्प्राप्तिरित्युक्तंभवति ५२

देवस्वापहरणेमहान्दोषइत्याह यइति ५३ नकेवलंप्रतिमादिपूजाकर्तुरुक्तफलंसाहाय्यकर्तॄणांयथायोग्यंफलंभवतीत्याह कर्तुरिति सारथेःकायहेतोःप्रेत्यकर्मणांफलभागिनाभवतीत्यथः फलतारतम्यमाह भूयइति भूयसिमहतितत्फलंभूयोभवति ५४ इतिश्रीभागवतेम०एकादशस्कंधेवि०टी०सप्तविंशोध्यायः ॥ २७ ॥ हरेःपरमस्वातंत्र्यंतदधीनसत्ताकत्वेनजगतोत्यंतमस्वातंत्र्यमेतादृशतत्त्वज्ञानेनसत्यबंधनिवर्तनंनाभेदज्ञानेनेत्यादिकमुपदिशत्यस्मिन्नध्याये तत्रादौदुर्जनस्वभावतत्कृतपापकर्मप्रशंसननिंदाभ्यांसज्जनस्वभावतदनुष्ठितपुण्यकर्मस्तुत्यनिंदाभ्यांचावश्यमवस्थेयंपुरुषेणेतिशिक्षयति परस्वभावेत्यादिना परोरिपरमात्मनोरित्यतःपरःशत्रुः जीवब्रह्मणोर्वैलक्षण्यसत्यतायाःअसहमानित्वादितिशेषः तस्यःस्वभावःयानितदाचरितानिपापकर्माणितानिसर्वाणिनप्रशंसेत्नप्रशंसयेच्चानिंदयेन्निंदेच्चकिंचपरःपरमात्मापरेश्रीनारायणेस्वभावःआत्मामनोयस्यसतथा यद्वा परोलोकबाह्योज्ञानीतस्यस्वभावःतेनाचीर्णानिपुण्यकर्माणिचइतरैर्नगर्हयेत्स्वयंनगर्हेच्चप्रत्युतप्रशंसेत्प्रशंसयेच्च एतादृशःपुरुषोदुर्लभइतितत्राह विश्वमिति प्रकृत्याचेतनयापुरुषेणहिरण्यगर्भेणसहस्थितंविश्वमेकेनपरमात्मनात्मकंव्याप्तमेकात्मकंपश्यन्सयथार्थज्ञानीभवितेवातोनदुर्लभइति अनेनतथापश्यतएवयथार्थज्ञानंभवतीत्युक्तंभवति नप्रशंसेतनिंद्यांस्तुप्रशंस्यान्नैवनिंदयेत् । उभयंयःकरोत्येतदसत्यात्सपतत्यधः॥ यःप्रशंस्यान्नप्रशंसेन्निंद्योयेननिंद्यते । सोपित्वद्वदधोपातियतोरिवदुदासकइतिवाक्यात् परस्वभावकर्मणांप्रशंसानिंदाचनकार्येतिप्रतीत्यार्थःकिंनस्यादितीपंशंकादूरोत्सारितेतिज्ञातव्यं १ उक्तार्थानंगीकारेबाधकमाह परस्वभावेति परोन्योहरिर्विमुखत्वेननिंद्यस्तस्यस्वभावकर्माणिस्तौति परोवरणीयःस्तुत्यःश्रीहरिपरायणः तस्यस्वभावकर्माणिनिंदतिसपुरुषःअसत्याभिनिवेशतोमिथ्याज्ञानाभिनिवेशतःस्वस्थानाद्भ्रश्यतेअंधंतमोयातीत्यन्वयः यःप्रशंस्यान्नप्रशंसेदित्यादेरस्याप्युक्तएवार्थः २

यःस्वदत्तांपरैर्दत्तांहरेतसुरविप्रयोः ॥ वृत्तिंसजायतेविड्भुक्वर्षाणामयुतायुतम् ५३ कर्तुश्चसारथेर्हेतोरनुमोदितुरेवच ॥ कर्मणांभागिनःप्रेत्यभूयोभूयसितत्फलम्५४ ॥ इतिश्रीभागवतेम०एकादशस्कंधेसप्तविंशोध्यायः॥२७॥ श्रीभगवानुवाच ॥ परस्वभावकर्माणिनप्रशंसेन्न गर्हयेत्॥विश्वमेकात्मकंपश्यन्प्रकृत्यापुरुषेणच १ परस्वभावकर्माणियःप्रशंसतिनिंदति ॥ सआशुभ्रश्यतेस्थानादसत्याभिनिवेशतः २ तैजसेनिद्रयापन्नेपिंडस्थोनष्टचेतनः ॥ मायांप्राप्नोतिमृत्युंवातद्विनानार्थदंमनः ३ किंभद्रंकिंमभद्रंवाद्वैतस्यावस्तुनःकियत् ॥ वाचोदितंतदनृतंमनसाध्यातमेवच ४

असत्याभिनिवेशेनिमित्तमाह तैजसइति निद्राशब्देननिद्रासुनिद्रेतिद्विविधानिद्रोच्यते तत्रनिद्रास्वापापरपर्यायासुनिद्रामरणकालीना तथाचैवमस्यश्लोकस्यार्थः तैजसेतैजसाहंकारकार्येश्रोत्रादींद्रियगणेमनीसचनिद्रयादैनंदिनस्वापेनापन्नेसुप्तेसतिपिंडस्थोजीवोनष्टचेतनःसुप्तोभवति सदास्वापेजाग्रतामन्वीश्वरेच्छयाप्रबोधितमनोगतसंस्कारजन्यत्वान्मायांस्वप्नंप्राप्नोति सुनिद्रयापन्नेमृत्युंमरणंप्राप्नोति नानाविधसंस्काराविष्टंमनःस्वप्नदशायांनानार्थप्रदंदृष्टंहिजाग्रदाद्यवस्थायांकिमुवर्णनीयमितिभावेनाह तदिति तन्मनएवनानार्थदंनानाविधविषयप्रत्ययकंहिप्रसिद्धत्वान्मनएवमिथ्याप्रत्ययनिमित्तमितिभावः तैजसाहंकृतेर्जातइंद्रियग्रामकेवरात् । निद्रयावशमापन्नेजीवःस्यान्नष्टचेतनः । अतोविष्णोर्विशेसर्वंतेनव्याप्तमितिस्मरेदिति । निद्राचैवसुनिद्राचद्विधानिद्राप्रकीर्तिता । तत्रनिद्राभवेन्नित्यासुनिद्रामृतिकालगेति । मनोमात्रस्वरूपत्वात्स्वप्नोमायेतिकथ्यते । इत्येतैर्वाक्यैरुक्तएवार्थोंगीकार्यइति १ अवस्तुनोनित्यप्रतिहतलक्षणवस्त्वजानतोद्वैतस्याशुभस्यमिथ्याज्ञानिनःपुंसआशीर्वादादिनाकिंभद्रंभवति कालगुणात्स्वाद्गुणाद्वाभवतिचेदपितत्किंयदेवात्यल्पमेव भद्रवदभद्रमपिविशेषापादकंनभवतीत्याह किंमभद्रमिति नित्यमशुभात्मनःतस्याविशेषतःअभद्रंकिनकिमपि भवतिचेदपितत्किंयदेव यन्नवतोपिमायावादिनःस्वयोग्यादाधिक्येननभवतीतियस्मात्तत्तस्मादशुभंजीवमुद्दिश्यसज्जनवाचोदितमुक्तंमनसाशुभादिकंभवत्वितिध्यातंचिंतितमपिअनृतमसत्यमेवविशेषापादकंनभवतीत्यर्थः अनेनवैष्णवेनावैष्णवमुद्दिश्यतत्प्रशंसादिवदाशीर्वादादिकंनकर्तव्यमित्युक्तंभवति उच्यतेध्यायतेवापिकुनरंप्रतियच्छुभं । असत्यमेवभवतिस्वभावोऽसत्वमेवयदितिवचनात्

द्वैतनिषेधोत्रक्रियतइत्यन्यथाव्याख्यानंचशब्दसूचितेन एकंतुशुभमुद्दिष्टमशुभंद्वैतमुच्यते । पुंसोऽशुभस्यकिंभद्रंकिमभद्रंविशेषतः । सर्वदाशुभरूपत्वाद्विशेषोत्यल्पएवहीतिवाक्येननिरस्तत्वादुपेक्षणीय मितिभावः ४ ननुस्वभावतोऽशुभजीवस्यसदाप्यशुभरूपत्वात् अन्यस्माच्छुभाशुभयोरत्यल्पत्वात्तद्विषयशुभवचनादेरप्यनृतत्वादशुभदेहादिकमपिनाशुभकारणमितितत्राह छायाप्रत्युदकाभासाइति हि शब्दोयाथार्थ्ये यथाछायाप्रत्युदकाभासाजीवमपेक्ष्यासंतोपिनिःशक्ताअप्यर्थकारिणोऽर्थक्रियाकारिणोदृष्टाः एवंदेहादयोभावाअमंगलाअप्यामृत्युतोंधतमःप्रवेशपर्यंतंभयमित्युपलक्षणं शुभाशुभफलंयच्छं ति अशुभजविनामितिशेषः नीहारःप्रत्युदंचैवधूम्रमित्यपिशब्दतइत्यतः प्रत्युदकंनीहारः आभासाःसूर्यकांतादयः नेदंरजतमितिबाधेयंछायेतिबाधकप्रत्ययानुदयात् एतदृष्टांतेननदेहादीनां मिथ्यात्वंविवक्षितं किंतुनिःशक्तित्वमेव व्यपेक्ष्यजीवंदेहादिनिःशक्तत्वादवस्त्वपि । पुनःशुभाशुभंनृणांयच्छेदेवशुभाशुभं । छायानीहारकाभासानिःशक्ताअपिकार्यदाः । एवंशुभादिदेहादेर्भवेत्कार्यं शुभादिकं । एतद्वचनाद्वयमभयमितिवापदच्छेदः ५ सत्यसंकल्पेनसत्यकर्मणानिरस्तकुहकेनपरमेश्वरेणसृष्ट्वादिदंसर्वसत्यंनमिथ्याभूतमितिभावेनाह आत्मैवेति प्रकृत्याद्युपसर्जनंविनासजनादि कंकर्तुसमर्थइत्यर्थेएवशब्दः परमात्मैवेदंसर्वंसृजतित्रातिहरतिविश्वात्मास्वयमेवस्वात्मनैवसृज्यतेत्रायतेहियतेचदीपादीपांतरवत् ईश्वरइत्यनेनकर्मकर्तृत्वाविरोधंपरिहरति प्रभुरित्यनेनचमानुषेष्वेतावंत कालंस्थास्यामीतिचिंतनमेवात्मनस्त्राणंनान्यदखंडस्वामित्वात्समर्थत्वाच्चेतिसूचयति दीपादीपांतरंयद्वत्सृष्टिरीशस्यकीर्त्यते । एतावत्कालंमाशिष्येमानुषेष्वितिचिंतनं । विष्णोस्त्राणंसमुद्दिष्टंस्वस्यैवस्वेच्छ यवतु । दीपादीपांतरस्येवह्येकीभावश्चसंहृतिरितिवचनात् अविद्ययाक्षिप्तमतिःस्वात्मानंसृजतीत्यादिदुर्मतंनिरस्तमित्यादिबोद्धव्यं ह्रियतइत्यनेनदीपांतरस्यदीपइवैकीभावःसंहारइतिदर्शयति प

छायाप्रत्युदकाभासाह्यसंतोप्यर्थकारिणः ॥ एवंदेहादयोभावायच्छंत्यामृत्युतोभयम् ५ आत्मैवैतदिदंविश्वंसृज्यतेसृजतिप्रभुः ॥ त्रायतेत्रातिविश्वात्मा ह्रियतेहरतीश्वरः ६ तस्मान्नह्यात्मनोमुष्मादन्योभावोनिरूपितः ॥ निरूपितेयंत्रिविधानिर्मूलामतिरात्मनि ७ इदंगुणमयंविद्धित्रिविधंमायया कृतम् ८

र्णमदःपूर्णमिदंपूर्णात्पूर्णमुदुच्यते । पूर्णस्यपूर्णमादायपूर्णमेवावशिष्यतइतिश्रुतेः ६ ननुहिरण्यगर्भादेःस्रष्टृत्वादिवादिनिवेदजाप्रतिकथंहररेवस्रष्टृत्वादिकमवधीयतइतिशंकांधिक्कुर्वन्निवपरिहरन्नुपसंह रतितस्मादिति । यस्मान्निरवकाशप्रमाणबलाद्धरिरेवसृष्ट्यादिकर्तातस्मादमुष्मात् आत्मनोहररन्योभावःसृष्ट्यादिकर्तानिरूपितःकुत्रापिवेदइत्यन्वयः । ननुपितेवपुत्रादेर्हरेरपिसृष्ट्यादिकर्तान्यःकिं नस्यादित्यादित्यवोवाह तस्मादिति । यस्मात्स्वात्मनैवस्वयंसृज्यतेइत्यादिकंप्रमाणिकंतस्मादात्मनःपरमेश्वरस्यभावःसृष्ट्यादिकर्तामुष्माद्धरेरन्योनास्ति सृष्टिस्थितिश्चसंहरोभावनंसमुदाहृतं । तद्यःकरोतिपुरुषःसभावइतिकीर्तितइतिवचनात् भावशब्दस्यसृष्ट्यादिकर्तृत्वशब्दवाच्यत्वंसिद्धं अनेनोक्तशंकायाःकःपरिहारआयातइतितत्राह निरूपितेति अन्येनसृष्टिस्थितिसंहारइतित्रिवि धामतिर्विद्वद्भिर्नैवनिरूपितानिर्मूलाप्रमाणबर्जिता अन्यस्मात्सृष्टिसंहारौस्थितिश्चपरमात्मनः । निरूपितानाविद्वद्भिःप्रमाणाभावतोहरोरिति विद्वद्भिरितिविशेषणादासुरमतएवतथाप्रतिभातमितिज्ञाय ते ७ परमात्मनःसत्वादिगुणरहितत्वादन्यैतःसृष्ट्यादिकंनयुक्तंगुणस्यगुणबद्धत्वादन्यैतोयुज्यतइत्याशयेनाह इदमिति माययाहरोरिच्छयाकृतमिदंत्रिविधंसृष्टिस्थितिसंहाराइतित्रित्वसंख्याविशि ष्टमात्मनिजीवेगुणमयंसत्वादिगुणाधीनंविद्धि नपरमात्मनइतिशेषः गुणसंबधयोग्यानामुत्पत्त्याद्याःस्युरन्यतः । सर्वदानिर्गुणस्यास्यसर्गाद्याःस्युःकुतोन्यतइति अतोविशेषःकल्प्यतइति अनेनसत्वा दिगुणेषुकारणत्वेसिद्धेषुकथमन्योभावोनास्तीतिसमंजसंस्यादितीयमाशंकापरिहृताविद्धीतिपुरुषार्थोपायांगत्वादिदमेवावश्यंज्ञेयमितिनिर्द्धारयति माययेत्यनेनगुणानामचेतनत्वेनस्वतःप्रवृत्त्यनुपपत्तेः । कार्येषुप्रवर्तकत्वेनहरेर्मुख्यकारणत्वमेवधृतम् ८

१ अन्यपुरुषात् । २ गुणवतोजीवस्य । ३ परमात्मनःसकाशात् ।

परस्वभावेत्यादेशिक्षितज्ञानफलमाह एतद्विद्वानिति मदुदितमेतद्विद्वान् ९ सूर्यवादित्युक्तदार्ष्टीतिकेकथमित्यतोविवृणोति प्रत्यक्षेणेति प्रत्यक्षादिप्रमाणबलेनेदंगुणमयमाद्यंतवत्त्वादसदसमर्थमस्वतं त्रमितिज्ञात्वा असमर्थमसत्प्रोक्तंसमर्थसत्यकीर्तितमितिववनात् असत्यंजगशून्यत्वमत्राभिप्रेतं इहजगतिनिःसंगोनिर्लेपः निगमेनवेदेनात्मसंविदासाक्षिगा १० स्वप्रकाशत्वेनजडत्वेनदेहपरमा त्मनोः संसारासंभवंजानन्नप्युद्धवोविवेकार्थंलोकदयालुःपृच्छति नैवेति निःसंगइत्यनेनप्रस्तुतःसंगलक्षणःसंसारःकस्यात्मनोहरेरुतदेहस्यद्रष्टृदृश्ययोरुभयोरपिनसंभवति अनात्मस्वदृशोरना त्मत्वाज्जडत्वात्दृश्यस्य स्वदृक्त्वात्स्वयंप्रकशत्वात्द्रष्टुरतःकस्येयंसंसृतिरुपलभ्यते ११ देहस्थस्यहरेरिपमपिनयुज्यतइत्याह आत्मेति अग्निवदीश्वरःदारुवद्देहःजीवपक्षस्तुपरमात्मकोटावंत र्भूतत्वान्नपृथगुक्तः कस्येतिपुनरुक्तिरवश्यपरिहारवक्तव्यार्था १२ जीवस्यैवसंसृतिरितिभावेनाह यावदिति आत्मनोजीवस्ययावद्देहेंद्रियप्राणैःसन्निकर्षणंसंबंधःतावत्संसारःकस्येत्यतउक्तम् अ विवेकिनइति नित्यानंदादपार्थोपिअविवेकिनइतिविशेषणाद्विवेकिनोमोक्षहेतुत्वात्फलवानपि फलवान्मोक्षहेतुत्वान्नित्यानंदादपार्थकः । जीवात्मनस्तुसंसारःस्वप्नवच्चंचलत्वतइतिवचनात् १३ संसृत्यभावस्यैवफलरूपत्वान्निरर्थएवसंसारइतिअवधारयति अर्थेपीति अपिशब्दोअल्पफलार्थःउच्यते निष्फलत्वेनयदल्पफलंभवेदितिवचनात् अर्थेअविद्यमानेपि अस्मात्संसारात्प्रयो जनाभावेपिपुंसःसंसृतिर्ननिवर्तते तत्रेदंनिमित्तंध्यायतोविषयानिति कथमिव अस्यस्वप्नदर्शिनोयथानर्थागमःप्रयोजनविधुरव्यवहारावाप्तिर्भवति अत्रापिनिमित्तंध्यायतइति यथास्वप्ना

एतद्विद्वान्मदुदितंज्ञानविज्ञाननैपुणः ॥ ननिंदतिनचस्तौतिलोकेचरतिसूर्यवत् ९ प्रत्यक्षेगानुमानेननिगमे नात्मसंविदा ॥ आद्यंतवदसज्ज्ञात्वानिःसंगो विचरेदिह १० उद्धवउवाच ॥ नैवात्मनोनदेहस्यसंसृतिर्द्रष्टृदृश्ययोः ॥ अनात्मस्वदृशोरीशकस्येयमुपलभ्यते ११ आत्माव्ययोगुणःशुद्धःस्वयंज्योतिरनावृ तः ॥ अग्निवद्दारुवदपिदेहःकस्येतिसंसृतिः १२ श्रीभगवानुवाच ॥ यावद्देहेंद्रियप्राणैरात्मनःसंनिकर्षणम् ॥ संसारःफलवांस्तावदपार्थोप्यविवेकिनः १३ अर्थेप्यविद्यमानेपिसंसृतिर्ननिवर्त्तते ॥ ध्यायतोविषयान्स्वप्नेऽनर्थागमोयथा १४ यथाह्यप्रतिबुद्धस्यप्रस्वापोबह्वनर्थकृत् ॥ सएवप्रतिबुद्धस्यनवै मोहायकल्पते १५ शोकहर्षभयक्रोधलोभमोहस्पृहादयः ॥ अहंकारस्यदृश्यंतेजन्ममृत्युश्चनात्मनः १६ देहेंद्रियप्राणमनोभिमानोजीवोंतरात्मागुण कर्ममूर्तिः ॥ सूत्रंमहानित्युरुधेहगीतःसंसारआधावतिकालतंत्रः १७ ॥

र्थानांअस्थिरत्वेपिनिरंतरविषयानुस्मरणसंततसंस्कारसंतत्यानर्थागमोननिवर्तते एवंसंसारोपि १४ अज्ञानिनएवसंसारोऽनर्थकरःनज्ञानिनइत्याह यथाहीति अप्रतिबुद्धस्यस्वप्नावस्थामास्थितस्ययथाप्रस्वापोबह्वनर्थकृत्सएवप्रस्वापःप्रतिबुद्धस्यप्रमोहायनकल्पते एवंसंसृतिरज्ञानिनामनर्थकृत् सैवज्ञानिनांमोहायनैव विषयलोलुपत्वेनदुर्जनस्याफलःसज्जनस्यस्वस्वरूपानंदोपक्षयाफलोपिमज्ज्ञानेनस्वरूपानंदसाधनत्वेनसफलत्वादल्पफलइतिहेयःसंसारइत्यवधारणार्थपुनर्वचनमितिभावः १५ जीवस्यापिसंसारःअभिमानिकएवनस्वाभाविकःअन्यथातन्निवृत्तिसाधनविधानानुपपत्तिरित्याशयेनाह शोकेति शोकादयोजन्ममृत्युश्चाहंकारस्यसकाशाज्जीवस्यदृश्यंतेनस्वतः परमात्मनस्त्वन भिमानात्सुतरामसंभवइत्यर्थः परमात्मनएवनिषेधोनजीवस्येत्येतत् अहंकारस्यसकाशात्दृश्यतेनात्मनःस्वतः । अहंकारात्तुसंसारोभवेज्जीवस्यनस्वतः । कुतश्चिदानंदतनोःस्वरूपेच्छायुतस्यसइत्यनेन निरस्तम् १६ कयापुक्त्याजीवस्यैवंसंसारइतितत्राह देहेति देहेंद्रियप्राणमनसांसंघतोभिमानोयस्यसतथासर्वेषांअंतःस्थित्वासर्वादृत्तइत्यंतरात्मावगुणैःकर्मभिश्चारब्धामूर्तिर्यस्यसतथा सूत्रंमहा नित्याद्यधिकारनामभिर्बहुधापुराणेषुगीतश्चकालतंत्रःकालाभिमानीदुर्गाधीनोजीवःपुरुषोहिरण्यगर्भोपिसंसारआधावतिकिमुतान्येजीवाइतिकैमुत्यन्यायलक्षणयापुक्त्याजीवस्यैवसंसारइतिनिश्चीयते । सं सारयुक्तब्रह्मापिसर्वजीवेश्वरेश्वरः । विष्ण्वधीनःसदाज्ञानीकिमुतान्येल्पचेतनाइति अनेनजीवोपाध्यवच्छिन्नस्यपरमात्मनःसंसारइतिमतंनिरस्तमितिज्ञातव्यम् १७

नन्वेवंप्रबलस्यसंसारस्यसमुच्छेदःकथंकार्स्यादत्राह अमूलमिति मुनिर्निरंतरानुस्मरणसमर्थःपुरुषःएतत्संसारकारणमज्ञानंमदुपासनयाजातत्वात् निशितेनज्ञानेनाछित्त्वापुनस्तत्रातृष्णोनिःसंगोभूत्वा गांविचरति यावच्छरीरानिपातमितिशेषः यदज्ञानेनोत्पन्नंतज्ज्ञानेननिवर्ततइतितत्कारणमाह अमूलमिति विष्णुकारणककर्ममूलं बलवत्कारणेनजन्यस्यानिवृत्तिःकथमितिचोद्यमनेनपरिहृतं ज्ञानस्यापितत्कारणकत्वात् अज्ञानस्यतत्कारणकत्वेकथितंयुक्तंतदेवकथमित्यतउक्तंबहुरूपोति मनआदिषुसन्निहितबहुरूपेणतेनरूप्यतेतदद्दष्टानुगुणंनिरूप्यतेप्रेर्यतइतिबहुरूपरूपंमनोवचःप्राणशरीराणि कर्मविषयोयस्यसतथाअहंममतावक्तेत्याद्याकारेणजायमानमित्यर्थः १८ ज्ञानासिश्चकिमाकारोनिशितःस्यादितितद्विषयप्रकारमाह ज्ञानमिति सत्यंज्ञानमनंतंब्रह्मेतिश्रुतेरखंडंब्रह्मैवविजानीहीत्यन्वयः कथमस्यजगतःआद्यंतयोःकेवलंस्वतंत्रमेववर्तते यच्चकालःपूर्णगुणत्वात्फलपाचकत्वात् यच्चहेतुर्निमित्तकारणंयच्चजगतोमध्येपितदेवतत्त्वेनवर्ततेनान्यथा यच्चान्यतोविविक्तत्वाद्विवेकः यच्चनितरां गमयतिप्रापयतीतिनिगमः यच्चसर्वैरालोच्यत्वात्तपःतपआलोचनइतिधातुः प्रतिप्रतिअक्षेष्विंद्रियेषुस्थितत्वात्प्रत्यक्षं आचार्यसंप्रदायासिद्धत्वादैतिह्यं अथवेदादिप्रमाणसिद्धत्वादनुमीयमानत्वादनु मानं अनेनास्मिन्नर्थेप्रत्यक्षादिप्रमाणमुक्तंभवति १९ जगतआदिमध्यावसानेषुब्रह्मणएवाप्रतिहतस्वातंत्र्यंसोदाहरणंस्पष्टयति यथेति यथाहिरण्यंरथाद्युपरिस्वकृतंअतिचित्रितंपुरस्ताच्चित्रितायाः पूर्वरथादेःपृथगितिशेषः पश्चाच्चसर्वस्यहिरण्मयस्यद्रव्यस्यहिरण्यत्यागलक्षणनाशानंतरंचपृथगेवमध्येचस्वर्णखचितदशायां तदेवस्वर्णरथःस्वर्णशंखइत्यादिनानापदेशैर्व्यवहारयोग्यंतदेवहिरण्यंदार्वा दिपृथगेव तद्वत्तथास्वतंत्रोहमस्यजगतोप्यादावंतेमध्येसुरनरादिनानाव्यपदेशैस्तत्तदंतर्यामितयामुख्यतयाव्यवहार्यःपृथगेवस्थितः । रथोपस्थेपरिकरात्पूर्वदारुमयाद्रथात् । सुवर्णव्यवहारायमुख्यंरथ परिष्कृतं । मध्येचांतेरथोपस्थान्निष्कृष्यपृथगास्थितं । यद्वदेवंहरिःसाक्षाज्जगद्देहात्पृथक्स्थितः । पूर्वजगतिसंस्थश्चजगदंतेपृथक्स्थितः । सएवमुख्योजगतःस्वातंत्र्यात्परमेश्वरइति तत्तन्नियामकस्यै

अमूलमेतद्बहुरूपरूपंमनोवचःप्राणशरीरकर्म ॥ ज्ञानासिनोपासनयाशितेनछित्त्वामुनिर्गांविचरत्यतृष्णः १८ ज्ञानंविवेकोनिगमस्तपश्चप्रत्यक्षमैतिह्य मथानुमानम् ॥ आद्यंतयोरस्ययदेवकेवलंकालश्चहेतुश्चतदेवमध्ये १९ यथाहिरण्यंस्वकृतंपुरस्तात्पश्चाच्चसर्वस्यहिरण्मयस्य ॥ तदेवमध्येव्यवहार्यमा णंनानापदेशैरहमस्यतद्वत् २० विज्ञानमेतत्त्रिपदस्थमंगगुणत्रयंकारणकार्यकर्तृ ॥ समन्वयेनव्यतिरेकतश्चयेनैवतुर्येणतदेवसत्यम् २१

वनामसर्वंसुरादिकं । तत्संबंधादुदीर्यैतव्यवहृत्यैसुरादिषुइतिच एकलंकेवलंचेतिस्वातंत्र्यमभिधीयते । स्वतंत्रस्तुहरिःसाक्षात्परिष्कृतहिरण्यवदितिचेति सुरनराद्युपाधीनांनानात्वेप्यहमेक एवयथाहिरण्मयकृतंपिंडीकृतंकुंडलाद्याकारेणविविधंपुनरेकमेवतथाहमपि यथासुवर्णमकृतंक्रियतेकुंडलादिकं । पुनरेकीभवत्यद्धातद्वद्विष्णुरजोपिसन् । सुराद्यंतःस्थितोभूत्वापुनरेकीभवेद्विभुरितिव चनात् किंचदार्वाद्यल्पफलंसुवर्णमेवतन्निमित्तकारणंमहाफलंतथाजगदल्पफलमस्वतंत्रंचनाहंतथार्किंतुस्वतंत्रोमहाफलहेतुश्चेति प्रत्येकंनतुदार्वादिस्वतंत्रंविक्रियागतं । महाफलंस्यात्स्वर्णंतुस्वतंत्रंविक्रि योपगं । तद्वत्स्वतंत्रोभगवान्प्रवृत्तावन्यदन्यथेतिवाक्यात् २० इतोपिमोक्षादिदातृत्वेननिरुपचरितस्वातंत्र्यंहरेरेवेत्याह विज्ञानमिति अंगएतद्ब्रह्मविज्ञानं निर्दोषज्ञानस्वरूपंकृत्स्नंत्रिपदस्थंत्रीनुत्त माधममध्यमान्जीवान्त्रिषुपदेषुमोक्षादिषुस्थानेषुस्थापयतीतिमोक्षसंसारतमआख्यपददातृइत्यर्थः चेतनानामपिज्ञानात्मत्वेनमोक्षदातृत्वंकिंनस्यादित्याशंक्यतत्सत्तादेर्यदिच्छाधीनत्वेनप्रतीतिः त देवविज्ञानं विज्ञानमानंदंब्रह्मेतिश्रुतेरितिभावेनाह गुणत्रयमिति येनेतितृतीयाषष्ठ्यर्थे येनयस्यतुर्येणतुर्यस्यजाग्रदाद्यवस्थातीतस्यविशुद्धज्ञानमूर्तेःसमन्वयेनइच्छायाः सत्वेनानुग्राहकलक्षणा भिमुख्येनगुणत्रयादिकं सर्वमस्तीतिशेषः व्यतिरेकतोऽसत्वेनास्तितदेवकेवलमित्युक्तं केवलपदंसर्वत्रानुवर्तनीयं तत्केवलमेवसत्यंसदास्तित्वेनस्वतंत्रमेव सत्यपदंचानुवर्तनीयंविज्ञानंसत्यंत्रिपद स्थंसत्यमिति गुणत्रयंसत्वादिकारणंमहदहंकाराद्युपादानंकार्यदेहादिकर्तृकालकर्मादिनिमित्तकारणं स्वतंत्र्यमेवसत्यत्वंविष्णोरन्यस्यसत्यता । प्रवाहतःसदास्तित्वंपुंप्रकृत्योःसदास्तितेतिवचनात् ईश्वरेच्छासदसद्भावाभ्यांअस्तित्वनास्तित्वेइतितस्यस्वातंत्र्यमनुपहतमिति २१

ननुब्रह्मवादितरस्यस्वातंत्र्यसंभवेकथंतस्यस्वातंत्र्यमनुपहतमितितत्राह नयदिति यदुत्पत्तेःपुरस्तात्केवलंनयन्नाशात्पश्चादुतस्वतंत्रंनयच्चमध्येचस्थितंकालेचकवलनयत्परणभूतमुत्पन्नयत्परणभास
द्धंसत्तादिमत्तद्व्यपदेशमात्रंस्वतंत्रमितिवाह्यमात्रं अतस्तद्ब्रह्मैवसत्परमसत्यमितिमेमनीषा तस्यस्वातंत्र्येणनैवास्तियदुत्पत्तिविनाशवत् । स्वातंत्र्येणास्तितातस्ययत्सत्ताज्ञानदंसदेति । अनेनकालत्रय
सत्वप्रतिषेधेनसदसद्विलक्षणंजगदितिनिरस्तं नन्वसच्चेन्नप्रतीयेतसच्चेन्नबाध्येतेत्यन्यथानुपपत्तिप्रमाणसद्भावात्सदसद्वैलक्षण्यापलापोनयुज्यतइत्याशंक्यप्रपंचस्यासत्वोक्त्यास्वातंत्र्यमेवानिषिध्यते न
नुप्रतीत्यन्यथानुपपत्त्यानिर्वचनीयत्वंपरमार्थसत्वाभावेननाशोपपत्तेः २२ सच्चेन्नबाध्येतेत्यस्याप्यन्यथोपपत्तेरितिभावेनाह अविद्यमानइति सदसद्वैलक्षण्यमनुपपन्नंचेज्जगदसदेवस्यादितिशून्य
वादिमतंवानेनप्रत्याह. अविद्यमानइत्यादिना वैकारिकःविकारयोग्योराजसःसर्गःरजोगुणसंबंधीसर्गोयस्यप्रपंचस्यसतथाएषःप्रपंचः अविद्यमानोपिअसन्नप्यस्वतंत्रोपिअवभासते स्वतंत्रइतिअज्ञा
नामितिशेषः यतःस्वयंज्योतिर्ब्रह्मपरमार्थसत्स्वतंत्रंविभातिविदुषामितिशेषः इतोप्यविद्यमानत्वमस्वातंत्र्यमेवनत्वन्यादितिभावेनाह अतइति ब्रह्ममूलप्रकृतिश्चोत्रादीद्रियाणि अर्थाः शब्दादयः
आत्माजीवः विकाराइंद्रियाभिमानिदेवाः एवमादिभिश्चित्रंविचित्रंजगदतोब्रह्मतएवविभातीत्यतोनानिर्वाच्यंनशून्यमित्यर्थः तस्यभासासर्वमिदंविभातीतिश्रुतेः अविद्यमानतानामजगतःपरतंत्रता । यथा
शक्तस्तुपुत्रादिरसन्नित्युच्यतेजनैरिति जगतोनास्तितासैवयापराधीनतासदा । अभावस्तुकुतस्तस्ययद्विभातीहसर्वदेति । प्रमाणद्वयेनकथितएवार्थःनस्वकपोलकल्पितः २३ एवंतावज्ज्ञातव्यांशंज्ञात्वा
मुनिनापरंकर्तव्यंकिमित्यत्राह एवमिति एवमुक्तप्रकारेणविवेकबुद्ध्यासर्वस्माद्वैलक्षण्यज्ञानेनानुगृहीतैर्हेतुभिःनिर्दोषोपपत्तिभिः परापवादेनपरस्यापवादेननेदंनेदमितिनिषेधमुखेन एषआ

नयत्पुरस्तादुतयन्नपश्चान्मध्येचयन्नव्यपदेशमात्रम् ॥ भूतंप्रसिद्धंचपरेणयद्यत्तदेवसत्स्यादितिमेमनीषा २२ अविद्यमानोप्यवभासतेयोवैकारिकोराज
सस्सर्गएषः ॥ ब्रह्मस्वयंज्योतिरतोविभातिब्रह्मेंद्रियार्थात्मकविकारचित्रम् २३ एवंस्फुटंब्रह्मविविच्यहेतुभिःपरापवादेनविवेकबुद्ध्या ॥ छित्त्वात्मसंदेहमु
पारमेतस्वानंदतुष्टोखिलकामुकेभ्यः २४ नात्मावपुःपार्थिवमिंद्रियाणिदेवाह्यसुर्वायुजलंहुताशः ॥ मनोन्नमात्रंधिषणाचसत्वमहंकृतिःखंकृतिरर्थसाम्य
म् २५ समाहितैःकःकरणैर्गुणात्मभिर्गुणोभवेत्तत्सुविविक्तधाम्नः ॥ विक्षिप्यमाणैरुतकिंनुदूषणंवनैरुपेतैर्विगतैरवेःकिम् २६

त्मानेतिनेतीतिश्रुतेः स्फुटंब्रह्मविविच्यपृथक्कृत्यज्ञात्वात्मसंदेहंमनसिस्थितंसंशयंछित्त्वाखिलकामुकेभ्यः अनल्पतृष्णाजननशीलेभ्योविषयेभ्यउपारमेत शब्दादिविषयोपरमेसुखानुत्पत्तिरत्राह
स्वानंदतुष्टइति स्वानंदानुभवेनालंबुद्धिप्राप्तः अनेनजीवपरभेदज्ञानमेवमुक्तिसाधनंनाभेदज्ञानमतःश्रेयोर्थिभिरभेदमतंसर्वथाहेयमितिदर्शितं २४ परापवादप्रकारंविवृणोति नात्मेति
अत्रनेतिप्रत्येकंसंबंधितव्यं पार्थिवंवपुःशरीरं आत्मापरमात्मानभवति इंद्रियाणिनहिदेवाइंद्रियाभिमानिनोनहिवायुजलंहुताशः वायुजलहुताशनकृतशरीरासुःमुख्यप्राणश्चन वायुरेवस्वयंप्रा
णस्तत्रस्थेचोदतेजसी । उदेनतेजसाचैवप्राणस्यहिकृतंवपुरित्यस्मात् प्राणस्यवायुरूपस्यभूतत्रयकृतंवपुः । यतोहिपार्थिवंनात्रखंचात्यल्पमुदाहृतमित्यस्माच्चोक्तंयुक्तंमनश्चात्मानअन्नमात्रंअन्नंपृथिवीमात्रं
गंधादिमात्राचन एकवद्भावविवक्षयाह्यस्वत्वं धिषणाप्राकृतबुद्धिश्चनसत्वंमूलबुद्धिः अहंकृतिरहंकारतत्त्वंखंमहाकाशंन कृतिर्दर्शनादिक्रियाचनअहंशृणोम्यहंस्पृशाम्यहंपश्यामीतिसर्वार्थेषुसमानत्वादहंका
रोभिमानविशेषोर्थसाम्यंचात्मानभवतीत्यर्थः नदेहोनेंद्रियप्राणमनोबुद्ध्यहमादयः । विष्णुश्चिदानंदतनुःसहिजीवाधिपःसदेतिवाक्यात् सवाएषआत्मानेतिनेतिश्रुत्यर्थएवविव्रियते २५ इंद्रियस
माधानविक्षेपयोर्हीरिप्रियाप्रियसाधनत्वेनोच्यमानत्वात्ताभ्यांहरेरपिगुणदोषौस्यातांकिंतत्राहसमाहितैरिति गुणात्मभिःशब्दादिविषयमनस्कैःपुरुषैःस्वविषयत्वेनसमाहितैरेकाग्रचित्तत्वेनस्थापितैःकरणै
रिंद्रियैःतत्सुविविक्तधाम्नःतेभ्यइंद्रियेभ्योविषयेभ्यश्चपृथक्भूतस्वरूपस्यप्राकृतेंद्रियरहितस्यभगवतः कोगुणोभवेत्नकोपि विषयेषुविक्षिप्यमाणैरितस्ततःआकृष्यमाणैरिंद्रियैर्हरेःकिंदूषणंनाकिमपिदूषणं

अत्रोदाहरणमाह घनैरिति आह्लादरूपैर्घनैरुपेतैःसर्वाह्लादगुणरूपस्यरवेःकिंभवेत्नाकिमपिप्रयोजनं विगतैर्दोषोपिभवेत्किंनभवेदेव यथारवेःगुणदोषाभावेपिअन्येषांघनैरुपेतैश्छाययासुखंभवेत् विगतैस्तापेनदुःखंभवेत् तथासमीहितकरणैःसमाधानकर्तुःसुखंविक्षिप्तैर्दुःखंभवेदितिभावः समाहितोपिजीवेनाविक्षिप्तेवानतुकचित् । विशेषोविद्यतेविष्णोस्तथापितुसमाहिते । प्रीतोभवतिवैनित्यंसर्वधर्मकृतोपिचेतिएतदुक्तार्थंमानम् २६ ननुहरेरपिसत्वादिगुणकार्येषुदेहादिषुस्थितस्यतत्कृतगुणदोषौजीववर्त्तिकनस्यातामित्याशंक्यआकाशवदसंगएवनदोषवानित्याह यथेति यथानभोवाय्वादीनांगुणैःस्पर्शादिभिर्नसज्जतेतत्कृतविशेषवन्नभवति वाशब्दश्चार्थः अत्रनभसिगतागतैश्चदेहादिभूतकार्यैर्गुणैश्चसत्वादिगुणतत्कार्याणामसारतयातदंतर्वर्तमानमक्षरंब्रह्मसंसृतिहेतुभिःसत्वादिगुणैस्तन्मयैरागादिदोषैश्चासंगतमसंबद्धमेवअत्रहेतुःपरमिति सत्वादिगुणेभ्यःउत्तमस्वेनविलक्षणं अनेननिःसंगत्वेनमनःसमाधानासमाधानाभ्यांहरेर्गुणदोषाभावेपिविषयसंगाज्जीवस्यतौस्यातामितिदर्शितम् २७ तर्हिमुमुक्षोःसाधनविधानंव्यर्थमितिनमंतव्यं सर्वदोषाणांसंगमूलत्वात्सएवमुमुक्षुणापुरुषेणनिर्मूलनीयइत्याह तथापीति हरेर्गुणदोषाभावेपितावन्मायारचितेषुप्रकृतिनिर्मितेषुगुणेषुविषयेषुसंगःपरितोवर्जनीयःकियंतं कालंवर्जनीयोन्यथास्त्रीभिर्वायानैर्वेत्यादिश्रुतिःसगुणविषयास्यादित्यतोवधिमाह मद्भक्तीति दृढेनमद्भक्तियोगेनयावद्रजस्तमश्चतज्जनितं कषेणकर्षणेनायतेगच्छतीतिकषायंपापंचनिरस्येतमुक्तिपर्यंतमितिशेषः अयगतावितिधातुः २८ व्यतिरेकेदोषमाह यथेति यथानृणामसाधुचिकित्सितआमयःसम्यक्चिकित्सामावात्पुनःपुनः प्ररोहन्नंकुरीकुर्वन्नामयिनं संतुदति एवमपक्वकषायकर्मसर्वेषुविषयेषुसंगोयस्यतत्सर्वसंगमनःकुयोगिनंअपरिपक्वयोगयुक्तंपुरुषंविध्यतितस्यभगवद्ध्यानाविघ्नंकरोतिपुनःपुनर्विषयाभिलाषप्ररोहादितिभावः २९ नन्वेवंतर्हिअपरिपक्वयोगवतामनादिकर्ममूलांतराय

यथानभोवाय्वनलांबुभूगुणैर्गतागतैर्वात्रिगुणैर्नसज्जते ॥ तथाक्षरंसत्वरजस्तमोमलैरसंगतंसंसृतिहेतुभिःपरम् २७ तथापिसंगःपरिवर्जनीयोगुणेषुमायारचितेषुतावत् ॥ मद्भक्तियोगेनदृढेनयावद्रजोनिरस्येततमःकषायम् २८ यथामयोसाधुचिकित्सितोनृणांपुनःपुनःसंतुदतिप्ररोहन् ॥ एवंमनोपक्वकषायकर्मकुयोगिनंविध्यतिसर्वसंगम् २९ कुयोगिनोयेविहताह्यंतरायैर्मनुष्यभूतैस्त्रिदशोपसृष्टैः ॥ तेप्राक्तनाभ्यासबलेनभूयोयुंजंतियोगंनतुकर्मतंत्रम् ३० करोतिकर्मक्रियतेचजंतुःकेनाप्यसौचोदितआनिपातात् ॥ नतत्रविद्वान्प्रकृतौस्थितोपिनिवृत्ततृष्णःस्वसुखानुभूत्या ३१ तिष्ठंतमासीनमुतव्रजंतंशयानमुद्यंतमदंतमन्नम् ॥ स्वभावमन्यत्किमपीहमानमात्मानमात्मस्थमतिर्नवेद ३२

विहतानांयोगापरिपाकेनभगवत्प्राप्तिरापतितेतित्राह कुयोगिनइति कुयोगिनोध्यानपरिपाकरहितास्त्रिदशोपसृष्टैराधिदैविकैर्मनुष्यभूतैर्मनुष्यैर्वैनिताभिराध्यात्मिकैर्भूतैराधिभौतिकैरंतरायैर्विहताहियस्मात्तस्मात्तेअपक्वयोगिनःप्राक्पूर्वजन्मनिकृतध्यानाभ्यासबलात्तत्वेनयोगंध्यानंयुंजंतिकुर्वंति भूयोमत्प्रसादेनतत्परिपाकेनमामवाप्नुवंतीतिशेषःकर्मलक्षणतंत्रंसाधनंनानुतिष्ठंतीत्यन्वयः अतोमद्योगाभ्यासोनव्यर्थोनमदप्राप्तिश्चेतिभावः ३० नन्वत्रकैश्चित्कर्मैवपूर्वाभ्यासेनावशैःक्रियतेनयोगोभ्यस्यतेकैश्चित्पूर्वाभ्यासेनयोगएवाभ्यस्यतेनकर्मक्रियतइत्यत्रवासनातिरिक्तप्रयोजकेनभाव्यं सकइतिचोद्यंपरिहरति करोतीति योग्ययोगिलक्षणोजंतुर्जीवःकर्मकरोतीतिप्रत्यक्षं तत्रासौकेनापिपुरुषेणचोदितःप्रेरितएवक्रियतेकार्यतेआनिपाताच्छरीरापातपर्यंतं अनेनवासनाद्यतिरिक्तप्रयोजककर्तास्तीत्यवगतं सचपूर्णानंदोहरिरेवएषउएवसाधुकर्मकारयति यदेषआकाशआनंदोनस्यादितिश्रुतेः ननुतर्हिविद्वदविदुषोःकोविशेषइत्यत्राह नतत्रेति इदंसर्वंविद्वान्प्रकृतौप्रकृतिविकृतमहदादिविकृतपंचभूतैर्निर्मितदेहेस्थितोपिस्वसुखानुभूत्याभगवदनुग्रहाविर्भूतस्वरूपानुभवानंदेनविषयेभ्योनिवृत्ततृष्णःकर्माणिकुर्वन्नपितत्रकर्मसुनसज्जतइतिशेषः ३१ अधुनायोगिनोऽसंप्रज्ञातसमाध्यवस्थामाह तिष्ठंतमिति ममदेहेतिष्ठन्नासीनोव्रजञ्छयानइत्यादिक्रियाःकुर्वन्हरिरेवेत्यात्मस्थमतिः परमात्मन्येवस्थितमतिस्तिष्ठंतमासीनमित्यादिक्रियाकरमात्मानंदेहंनवेद किंबहुनापारतंत्र्याद्यंतरेणपरमात्मनोन्यत्किमपिनवेदेत्यर्थः स्वभावंदेहस्यप्रेयाप्रियलक्षणम् ३२

यदिकश्चित्प्रारब्धकर्मवशात्तद्धितमिवपश्यतितथापिस्वतंत्रतयानपश्यतीत्याह यदिस्मेति यदिस्मरणवासनयाहरेरन्यदसदिंद्रियार्थंमनोगतमिंद्रियांविषयंदेहगेहादिजगत्कमानबध्नतयापश्यात म नीषीतथापिवस्तुतयास्वतंत्रतयानमन्यते तत्कुतइत्यतउक्तं नानेति तत्स्वतंत्रत्वंनानानुमानेनोत्पत्त्यादिमत्त्वविधानानुमानेनविरुद्धंहि एतमर्थंनिदर्शयति स्वप्नमिति यथास्वप्नदृक्स्वप्नादु त्थायास्थितस्तिरोदधानंअनित्यंपरतंत्रंस्वस्वप्नंजाग्रत्त्वेननमन्यतेस्वप्नजाग्रत्त्वस्यनानानुमानविरुद्धत्वात् नहिस्वप्नंपश्यन्स्वप्नंबाध्यतेमन्यतेअपिनुस्वप्नमद्राक्षमित्यबाध्यमेवजानातिस्वातंत्र्यमारोपितं पश्यतीतिभावः तथाविद्वानपिजगदबाध्यमेवस्वातंत्र्यमारोपितंपश्यतीतिभावः नानामानविरुद्धंहिस्वातंत्र्यंजगतः सदा । स्वतंत्रोभगवान्विष्णुरेकएवनसंशयइत्यनेन अस्त्येवस्वाप्नमखिलंवासनारू पमात्मनि । जाग्रदेतदितिज्ञानंयत्तदेवभ्रमादिकं । तद्वज्जगदिदंसर्वंविद्यमानंनसंशयः । स्वतंत्रमेतदिहतुयज्ज्ञानंतद्ब्रह्मात्मकमित्यनेनच । उत्थितोनैवजाग्रत्त्वंक्वचित्स्वप्नस्यपश्यति । स्वातंत्र्यमेवजगतो ज्ञानवानेवपश्यतीत्यनेनासिद्धत्वात् स्वप्नदृष्टांतबलेनजगतोबाध्यत्वमुच्यतइत्येतदासुरमतमित्यवगम्यते ३३ ननुजगत्स्वातंत्र्यप्रतीतौकिकारणमित्याशंक्याज्ञानंकारणमित्याशयेनाह पूर्वमितिज्ञानोद यात्पूर्वमात्मनिपरमात्मनिअज्ञानंगृहीतंपरमात्मस्वरूपविषयत्वेनाज्ञानमार्जितंजीवेनेतिशेषःनकेवलंतत्स्वरूपविषयमेवेत्यतउक्तं गुणकर्मचित्रमितिभगवतोगुणविषयत्वेनकर्मविषयत्वेनचचित्रंनानाविधं अ ज्ञानसद्भावेप्रमाणमाह अविविक्तमिति एतमहंनजानामीतिविवेकशून्यं नन्वेतदज्ञाननिवृत्तौकाप्रतिभटीतितत्राह अंगेति अंगेत्यामंत्रणेनभयंनाकार्षीरित्याह पुनःपुनरीक्षयाहरेःस्वरूपस्य गुणानांकर्मणांचालोचनलक्षणोपासनाजनितज्ञानेनतदज्ञानंनिवर्ततेपुनस्तदज्ञानंनगृह्यते ज्ञानोदयानंतरंआत्मापरमात्मापिनविसृज्यःस्वस्वरूपसुखाविष्कारादिलक्षणापरोक्षज्ञानेनापरोक्षीकृतोनपरोक्षी

यदिस्मपश्यत्यसदिंद्रियार्थंनानानुमानेनविरुद्धमन्यत् ॥ नमन्यतेवस्तुतयामनीषीस्वप्नंययोत्थायतिरोदधानम् ३३ पूर्वंगृहीतंगुणकर्मचित्रमज्ञानमा त्मन्यविविक्तमंग ॥ निवर्ततेतत्पुनरीक्षयैवनगृह्यतेनापिविसृज्यआत्मा ३४ यथाहिभानोरुदयोनृचक्षुषांतमोनिहन्यान्नचसंविधत्ते ॥ एवंसमीक्षानिपुणा सतीमेहन्यात्तमिस्रंपुरुषस्यबुद्धेः ३५ एषस्वयंज्योतिरजोप्रमेयोमहानुभूतिःसकलानुभूतिः ॥ एकोद्वितीयोवचसांविरामोयेनेरितावाग्रचनाश्चरंति ३६ एतावानात्मसंमोहोयद्विकल्पस्तुकेवले ॥ आत्मामृतेस्वमात्मानमचलंयन्नपश्यति ३७

भवति तस्यजगत्स्वातंत्र्यंचनप्रतीयतइत्यर्थः अन्यैर्ज्ञातेपिचाज्ञातेनविशेषोहरेःक्वचित् । तेषामेवविशेषःस्यादज्ञानापगमेनत्विति वचनाज्जीवस्यैवविशेषोनहरेरपिशेषइतिचज्ञातव्यंज्ञानार्थिनेतिभा वः ३४ ममसाक्षात्कारेणाज्ञानंनिवर्ततेइत्युक्तं तत्रतेनममकश्चनविशेषोनास्तीतिसमर्थितंसोदाहरणमाह यथेति हिशब्दःसाक्षिसूचकोयथाभानोःसूर्यस्योदयोनृचक्षुषांतमोनिहन्याच्चतुतमः संविधत्तेकमप्यतिशयंनाधत्ते एवंवैराग्यादिसाधनसामग्र्यानिपुणासतीमेसमीक्षापुरुषस्यसर्वदाश्रीनारायणशरणंगतस्यबुद्धेस्तमिस्रंहन्यात्ननुममकंचनविशेषंकुर्यात् ३५ बहुशःश्रुतपरमात्मस्वरूप स्यापितवस्वरूपंकीदृशमित्युद्धवस्यांतरंचोद्यंपरिहरति एषइति एषोहंस्वयंज्योतिःस्वतएवपूर्णप्रकाशः अतएवाजःअतएवाप्रमेयःमहतीअनुभूतिर्ज्ञप्तिर्यस्यसमहानुभूतिः सर्वज्ञइत्यर्थः सकलानु भूतिः पूर्णसुखानुभवएकःज्ञानानंदादिगुणाभिन्नत्वात्स्वगतभेदरहितः अद्वितीयःसर्वोत्तमःअप्रमेयत्वाद्वेदादिवाचामगोचरः वाचामगोचरश्चेत्तदीयज्ञापनंकथंवरीवर्तीतितत्राह येनेति वाग्रच नाःवैदिकलौकिकसर्ववाग्व्यवहारायेनेरिताःवर्ततइत्यनेनभगवदनुगृहीतवाग्व्यवहारविषयत्वेनतज्ज्ञानमुदेतीतिज्ञातव्यं ज्ञानानंदाद्यभिन्नत्वादेकःसर्वोत्तमत्वतः । अद्वितीयोमहाविष्णुःपूर्णत्वात्पुरुषः स्मृतइतिवचनात् ३६ एवंज्ञानंज्ञेयस्वरूपंनिरूप्यमिथ्याज्ञानस्वरूपंतत्कारणाज्ञानस्वरूपंचविविच्यनिरूपयति एतावानिति यद्विकल्पःप्रमाणविरुद्धंकल्पनंजीवस्वातंत्र्यपरमात्मास्वातंत्र्यजी वपराभेदादिविषयोयएतावानात्मसंमोहःमनोभ्रमः भ्रमत्वंबाधकज्ञाननिश्चेयं तत्कथमत्राह केवलइति आत्माजीवःकेवलेस्वतंत्रेअमृतेनित्यमुक्तपरमात्मनिस्थितंमदाधारतयास्थितंस्वमा

त्मानंस्वस्वभावंकदाप्यनपनोद्यास्वातंत्र्यमचलंस्थिरंनपश्यतियद्यावत्तावद्भ्रमोननिवर्ततइत्यतःस्वस्वभावाज्ञानंनिमित्तंतन्निवृत्तौभ्रमोनिवर्ततइतिनिश्चीयते । एतावानात्मसंमोहोयद्विरुद्धस्यकल्पनं । यत्परात्माश्रयान्जीवान्निश्चयेननपश्यतीतिवचनात् नाद्वैतज्ञानेनभेदभ्रमोनिवर्ततइत्यर्थः ३७ इतोपिपंचविधभेदभ्रमअद्वैतज्ञानेननिवर्ततइत्युपदेशोनविदुषांपरिषदिस्वारस्यमाधत्तेइतिभावेनाह य न्नामाकृतिभिरिति नामाकृतिभिर्नामरूपैर्ग्राह्यज्ञेयंपंचवर्णंपंचभूतात्मकंपंचभेदात्मनावर्तनीयंजगत्तदबाधितमद्वैतज्ञानबाध्यंनभवति जगदबाधितमित्ययं व्यर्थोवादोनभवति किंत्वर्थवादः यथार्थवाद एवकुतःसूरयोजीवंपरमात्मानंचद्वयंद्वित्वसंख्याविशिष्टंविंदंतिज्ञात्वापरमानंदंलभंतइतिभावः अनेनजगत्ज्ञानबाध्यमितिवदंतोऽपंडिताःअन्येतुपंडिताइत्युक्तंभवति पंचभूतात्मकंविश्वंभ्रांतिसिद्धमपंडिताः । वदंतिपंडितास्त्वद्धाजगदाहुरबाधितं । प्रवाहरूपेणसदाविष्णोरिच्छावशेस्थितमितिवचनात् ३८ पूर्वमंतरायहतयोगाःकुयोगिनोजन्मांतरेपियोगमभ्यसंतीत्युक्तमधुनातस्मिन्जन्मन्येव प्राप्तयोगांतरायपरिहारंवक्तुमाह योगिनइति कालेयोगाभ्यासविहितसमयेप्रभातादिलक्षणे योगंयुंजतउपसर्गैरुपद्रवैर्विधिर्वक्ष्यमाणः ३९ कोयमितितमाह योगधारणयेति योगधारणयायमनियमादीनामावर्तनेन ४० अनुध्यानेनतत्तदंतरायविहितपरिहारसमर्थहरिस्मरणेननामसंकीर्तनादिभिरित्यनेनाधिकारिणःकालविशेषांश्चलक्षयति अशुभदान्विघ्नान् ४१ रसायनादिनानाविधोपायैः

यन्नामाकृतिभिर्ग्राह्यंपंचवर्णमबाधितम् ॥ व्यर्थोनाप्यर्थवादोयंद्वयंविंदंतिसूरयः ३८ योगिनोपक्वयोगस्ययुंजतःकालउत्थितैः ॥ उपसर्गैर्विहन्येततत्रायं विहितोविधिः ३९ योगधारणयाकांश्चिदासनैर्धारणान्वितैः ॥ तपोमंत्रौषधैःकांश्चिदुपसर्गान्विनिर्दहेत् ४० कांश्चिन्ममानुध्यानेननामसंकीर्तनादिभिः योगेश्वरानुवृत्त्यावाहन्यादशुभदाञ्छमैः ४१ केचिद्देहमिमंधार्यंसुकल्पंवयसिस्थितम् ॥ विधायाविविधोपायैरथयुंजंतिसिद्धये ४२ इहवर्षशताशी त्यातदायासोह्यपार्थकः ॥ अंतवत्त्वाच्छरीरस्यफलस्येववनस्पतेः ४३ योगंनिषेवतोनित्यंकायश्चेत्कल्पतामियात् ॥ तच्छ्रद्दध्यान्नमतिमान्योगमुत्सृज्यमत्परः ४४ योगचर्यामिमांयोगीविचरन्मत्पदाश्रयः ॥ नांतरायैर्विहन्येतनिस्पृहःस्वसुखानुभूः ४५ ॥ इतिश्रीभागवतेमहापुराणेएकादश स्कंधेअष्टाविंशोध्यायः ॥ २८ ॥ ॥ ॥ ७ ॥ ॥ ॥ ॥ ७ ॥ ॥

शरीरस्यनाशावंतरायपरिहारस्यसुशक्तत्वेनासिद्धसाधनसौलभ्यार्थंयोगधारणादिविधानमत्राह केचिदिति केचिदविवेकिनःपरेणधार्यंसुकल्पमिंद्रियसामर्थ्योपेतंवयसिस्थितंतारुण्यवयसोपेतं अ थशरीरस्याचिरस्थायित्वानंतरंयोगसिद्धयेयुंजंतिमनइतिशेषः ४२ तेषामविवेकित्वंकुतइतितत्राह इहेति तदायासःतस्यदेहस्यपोषणायासः अपार्थकत्वमाह अंतवत्त्वादिति ४३ योगस्यशरीररक्षण योगत्वाभावात्तत्तदायासस्यतत्तत्फलदत्वान्नवैय्यर्थ्यंशरीररक्षणायासस्येत्याशंक्याह योगमिति नित्ययोगंभगवद्ध्यानलक्षणंरसायनंनिषेवतःसेवमानस्यपुंसश्चेद्यदिकायःकल्पतांसमर्थत्वमियात्प्रा प्नोति तत्तर्हिसमतिमान्योगमेवश्रद्दध्यात् तंयोगमुत्सृज्यान्यत्ररसायनादौश्रद्धांनकुर्यादित्यन्वयःमत्परइत्यनेनमतिमत्त्वंविवृतं अनेनयोगस्यापिशरीररक्षणफलवत्त्वात् रसायनादौप्रवर्तमानाअविवे किनोऽतोमतिमद्भिर्मद्योगएवाभ्यसनीयइतिसिद्धं ४४ अतउक्तयोगांतरायपरिहारमाचरन्नेवयोगपारंगमिष्यतीतिभावेनाह योगचर्यामिति स्वसुखंस्वस्वरूपसुखमनुभवतीतिस्वसुखानुभूरित्यनेनयोगः सर्वापेक्षिताशेषपुरुषार्थसाधनमित्युक्तंभवति ४५ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेविजयध्वजकृतटीकायांअष्टाविंशोध्यायः ॥ २८ ॥ ॥ ॥ ७ ॥ ॥

निर्विघ्नयोगाचरणसाधनंहरेर्भक्तानुकंपितत्वंकथिततत्त्वज्ञानप्रशंसांतन्निरतानांश्रेयस्त्वंउद्धवस्यहरौभक्तयतिशयलक्षणंतस्यभगवद्भक्तिमाप्तिंचकथयत्यास्मिन्नध्याये आदावुद्धवउक्तयोगाचरणस्यअशक्त
त्वंमनसिकृत्वातात्सिद्धयुपायंपृच्छति सुदुश्चरामितिअनात्मनोमनोजयरहितस्याधीरस्यवा पुमान्यथाभवदुक्तोपायेनसिध्येत्पुरुषार्थवान्भवेत्तथातद्योगसाधनंमेबूहीत्यन्वयः १ तदकथनेकोन
र्थइतितत्राह प्रायशइति मौनसंयमाभ्यां कर्षितंविषीदतिविशेषान्नष्टंभवति योगाचरणसाधनेऽज्ञातेमनोविषीदति २ अथोतस्मात्तज्ज्ञाःपरमहंसाएवभवदुक्तयोगाधिकारिणइतिभावेनाह अथो
इति योगकर्मभिःयोगाख्यकर्मभिःअतएवमानिनोज्ञानिनस्त्वन्मायायाहंकारादिरूपयानविहतइत्यर्थः ३ प्रकृतौस्थित्वापिप्रकृत्यविहतत्वंत्वदासेषुचित्रमितिविज्ञापयति किंचित्रमिति त्वन्मनन्य
शरणेषुदासेषुआत्मदइतियदतोच्युतअशेषबंधोस्तवैतच्चित्रंकिं एतत्कुत्रदृष्टमितितत्राह यइति ईश्वराणांब्रह्मादीनांश्रीमत्किरीटमणिसंघट्टितपादपीठः स्वयंयोगोकुलेपशुभिः पशुपालैश्चसहात्म
वत्वेनरोचयःप्रकाशितवान्तस्यतवदासेष्वेतच्चित्रंकिमित्यन्वयः ४ भगवद्भक्तमाहात्म्यंतन्माहात्म्याविनाभूतमुक्तंतद्विशदयन्संसारासारज्ञानमाह तंत्वेति योब्रह्मादिशिरोभिःश्रीमत्किरीटमणिघट्टित
पादपीठःतंत्वांसुकृतवित्सुष्ठुकृतोपकारज्ञःसारज्ञःकःविसृजेत् कीदृशंत्वांअखिलानांआत्मनांजीवानांदयितंप्रेष्ठमीश्वरमणिमाद्यैश्वर्याकारमाश्रितानांसर्वार्थदंअभीष्टाशेषपुरुषार्थप्रदम् किंच कोवा

उद्धवउवाच ॥ सुदुश्चरामिमांमन्येयोगचर्यामनात्मनः ॥ यथांजसापुमान्सिध्येत्तन्मेब्रूह्यंजसाच्युत १ प्रायशःपुंडरीकाक्षयुंजतोयोगिनोमनः ॥ विषी
दत्यसमाधानान्मौनसंयमकर्षितम् २ अथोतआनंददुघंपदांबुजंहंसाःश्रयेरन्नरविंदलोचन ॥ सुखंचविश्वेश्वरयोगकर्मभिस्त्वन्मायायामीविहतानमानि
नः ३ किंचित्रमच्युततवैतदशेषबंधोर्दासेष्वनन्यशरणेषुयदात्मदस्त्वम् ॥ योरोचयश्चपशुपैःस्वयमीश्वराणांश्रीमत्किरीटमणिघट्टितपादपीठः ४ तं
त्वाखिलात्मदयितेश्वरमाश्रितानांसर्वार्थदंसुकृतविद्विसृजेतकोनु ॥ कोवाभजेत्किमपिविस्मृतचित्तवित्तःकिंवानवेदतवपादरजोमृतांभः ५ नैवोपयांत्य
पचितिंकवयस्तवेशब्रह्मादयोपिनतमूर्द्धसदास्मरंतः ॥ योंतर्बहिस्तनुभृतामशुभंविधुन्वन्नाचार्यचैत्यवपुषास्वगतिंव्यनक्षि ६ श्रीशुकउवाच ॥ इत्युद्ध
वेनात्यनुरक्तचेतसापृष्टोजगत्क्रीडनकःस्वशक्तिभिः ॥ गृहीतमूर्तित्रयईश्वरेश्वरोजगादसप्रेममनोहरस्मितः ७ श्रीभगवानुवाच ॥ हंततेवर्णयिष्यामि
ममधर्मान्सुमंगलान् ॥ याञ्छ्रद्धानाचरन्मर्त्योमृत्युंजयतिदुर्जयम् ८ कुर्यात्सर्वाणिकर्माणिमदर्पणनकैःस्मरन् ॥ मय्यर्पितमनश्चित्तोमद्धर्मात्ममनोरतिः
९ देशान्पुण्यान्संश्रयेतमद्भक्तैःसाधुभिःश्रितान् ॥ देवासुरमनुष्येषुमद्भक्ताचरितानिच १०

पुरुषःकिमप्यस्वतंत्रैर्दैवंभजेत्यदिभजेत्तर्हिअसौविस्मृतचित्तवृत्तिरसारज्ञःचित्तवृत्तिविस्मृतिमुपपादयति किंवेति तवशिवशिरोमौलिमालायितंपादरजोमृतांभोनवेदकिंवानैववेदेत्यतोऽसौपशुरेवेत्यर्थः
५ एवमनिमित्तबंधुत्वेनसर्वस्मादुपकारकस्यभवतःप्रत्युपकारंकर्तुकवयोपिनसमर्थाइत्याह नैवेति नतमूर्द्धत्वेनसदास्मरंतःकवयोब्रह्मादयोपितवापचितिंप्रत्युपकारंनैवोपयांति क्रियमाणउपकारः
कीदृशइतितंप्रकारमाह यइति तनुभृतामंतर्बहिःस्थित्वाअशुभंविधुन्वन्यस्त्वमाचार्यश्चैत्यःचित्तस्थश्चाचार्यचैत्यःब्रह्मातस्यांतर्यामिवपुषास्वगतिंस्वयोग्यज्ञानंव्यनक्षिव्यक्तीकरोषि आचार्यस्यचि
त्तस्यवपुषेतिवा ६ उद्धवेनपृष्टोभगवान्किमकरोदितिपरीक्षितोमानसंचोद्यंपरिहरति शुकइत्याह इतीति जगत्क्रीडनकंजगत्क्रीडासाधनंयस्यसतथा जगत्क्रीडनस्वशक्तिभिरित्येकंवापदम्
गृहीतंमूर्तीनांआत्मांतरात्मापरात्माइतिसंज्ञानांत्रयंयेनसतथा जाग्रत्स्वप्नसुषुप्तिप्रेरकत्वेनतत्स्थत्वेपिजाग्रदाद्यवस्थाक्लेशपरिहारसमर्थइत्यतईश्वरेश्वरइति आत्मांतरात्मापरमात्मेतिमूर्तित्रयंहरेः ।
जाग्रत्स्वप्नसुषुप्तीनांसृष्ट्यादेश्चप्रवर्तकमित्यत्रप्रमाणम् ७ मृत्युंजननमरणात्मकंसंसारंजयति ८ मद्धर्मेषुमदात्मसुमद्रूपेषुचमनोरतिर्यस्यसतथा ९ मद्भक्तानांआचरितानि १०

पृथक्स्वयमेवसत्रेणबहुभि सहवामह्यंमत्प्राप्त्यर्थंममयात्रामहोत्सवंअयनादिलक्षणंकुर्यात् ११ आत्मनिहृदिआत्मानमंतर्यामिणं यथाशरीरस्थंस्वंआकाशंनिर्लेपंतथा १२ इत्येवंपूर्वोक्तगुणविशि
ष्टत्वेनसर्वभूतानिप्रविश्यस्थितइतिभावनामद्भावःतेनमन्यमानः । सर्वभूतेष्वस्तिविष्णुरितिमद्भावेनसर्वाणिभूतानिममालयत्वेनमन्यमानःइतिवायोजनाभेदः सर्वभूतेष्वस्तिविष्णुरितिभावःसतांमतः ।
अर्चनेसर्वभूतानामादित्येतद्वतात्मनेतिवचनात्सर्वभूतार्चनायांविशेषोज्ञातव्यःकेवलमप्राकृतंज्ञानमेवाश्रयन् १३ केवलज्ञानप्रकारंदर्शयति ब्राह्मणइति ब्राह्मणादिषुसर्वत्रावस्थितं ब्रह्मसममेकप्रका
रंपश्यन्समदृक्मतःसतामितिशेषः १४ एवंभावनाफलमाह नरेष्विति नरेषुमामभीक्ष्णंभावयतःपुंसोसद्भावःमयिभक्तिःस्याद्वास्यादेव योमत् मत्तोभावोमुक्तिलक्षणाभूतिश्चस्यादेव भगवद्भंधकशक्तिलक्ष
णप्रतिबंधकेसतिकथंमुक्तिःस्यादत्राह मायेतिसाहंकाराअहंकारसहकारिणीमायापि तिरस्कारंयाति हिशब्देन भक्त्याप्रसन्नोभगवान्दद्यान्मुक्तिंतथाधुशामितिस्मृतिंसूचयति १५ भक्तिमताएवंभाव्यमित्या
ह विसृज्येतिभक्तःस्वयंदैहिकींआत्मस्थांमनसिस्थितांदृश्यव्रीडांदृश्यमानांलज्जांविसृज्य आश्वचंडालगोखरंदंडवद्भूमौप्रणमेदित्यन्वयःब्राह्मणादीन्प्रतिभूमौदंडवन्नमनंअन्यांश्चंडालादीन्प्रतिमानसस्मरण
मितिभेदः अत्राप्यंतर्यामिणःस्मरणंप्रणामइतिशेषः (प्राणइतिविशेषः) १६ एतदुपासनावधिमाह यावदिति यावत्सर्वेषुभूतेषुविष्णुरस्तीति । मद्भावोमद्विषयंज्ञानंनोपजायते तावद्वाङ्मनःकायवृ

पृथक्सत्रेणवामह्यंममयात्रामहोत्सवम् ॥ कारये नृत्यगीताद्यैर्महाराजविभूतिभिः ११ मामेवसर्वभूतेषुबहिरंतरवस्थितम् ॥ ईक्षेतात्मनिचात्मानंयथा
खममलाशयः १२ इतिसर्वाणिभूतानिमद्भावेनमहाद्युते ॥ सभाजयेन्मन्यमानोज्ञानंकेवलमाश्रयन् १३ ब्राह्मणेपुल्कसेस्तेनेब्रह्मण्यर्केस्फुलिंगके ॥अ
क्रूरेक्रूरकेचैवसमदृक्पंडितोमतः १४ नरेष्वभीक्ष्णंमद्भावःपुंसोभावयतोचिरात् ॥ स्याद्वामायातिरस्कारंसाहंकारापियातिहि १५ विसृज्यस्वयमात्मस्थां
दृश्यव्रीडांचदैहिकीम् ॥ प्रणमेद्दंडवद्भूमावाश्वचंडालगोखरम् १६ यावत्सर्वेषुभूतेषुमद्भावोनोपजायते ॥ तावदेवमुपासीतवाङ्मनःकायवृत्तिभिः १७
सर्वंब्रह्मात्मकंतस्यविद्ययात्ममनीषया ॥ परिपश्यतिचपंरपरमात्मानमच्युतम् १८ अयंहिसर्वकल्पानांसध्रीचीनोमतोमम ॥ मद्भावःसर्वभूतेषुमनो
वाक्कायकर्मभिः १९ नह्यंगोपक्रमेध्वंसोनधूरस्योद्धवाण्वपि ॥ मयाव्यवसितंसम्यक्निर्गुणत्वादनाशिषः २० योयोपरोमनोधर्मःकल्पतेनिष्फलायते ॥
तदायासोनिरर्थःस्यान्नयादेरिवसत्तम २१

त्तिभिरेवमुपासीतेत्यन्वयः १७ एवमुपासीनस्यपरोक्षज्ञानिनोमतिप्रकारमाह सर्वमिति तस्योपासकस्यसर्वंजगत्ब्रह्मात्मकं ब्रह्मणासंस्वीकृतमधीनत्वेनवर्तितमितिमननंहरेःप्रीतिजनकमित्यर्थः
ब्रह्मणात्तमिदंसर्वंयत्किंचित्सचराचरं । इतिपश्येतयोविद्वान्सहिब्रह्मात्मविन्मतः । इतिविशिष्टवचनात्रब्रह्मैक्यमुच्यतइतिसिद्धं फलमाह विद्ययेति विद्ययाज्ञानेनात्ममनीषयास्वरूपभूतबुद्ध्यावाच्यु
तंपरमात्मानंस्वात्मादेःपरमन्यंपरिपश्यतीत्यन्वयः चशब्देनान्यमीशामितिश्रुतिंप्रमाणयति १८ अन्येनापिमुक्तिःस्यात्किमनेनेतित्राह अयंहीति सर्वकल्पानांसर्वमोक्षोपायानांमध्येअयमुपायोहि
सध्रीचीनोमतइतिममसिद्धांतइत्यनेनाप्रिमूलत्वेनान्योक्तानामाभासत्वंसूचयति अयमिति कइत्यतउक्तं मद्भावइति १९ अंगोद्धवास्यधर्मस्योपक्रमेकृतेपितन्मात्रस्यध्वंसोनाशोनैवभवति अस्यधर्म
स्यकर्तुःअण्वपिअणुमात्रोपिधूर्भारआयासलक्षणोनास्ति कुतः अनाशिषःनिष्कामस्यमद्धर्मस्यनिर्गुणत्वान्मुक्तिसाधनत्वान्मयासम्यग्व्यवसितंनिश्चितमतोनान्यधर्मसमोमद्धर्मइत्यर्थः २० अस्यैवोत्तम
त्वमुपपादयति योयइति अन्यदेवतोद्देशेनक्रियमाणोयोयोधर्मोध्यानार्चनादिलक्षणःक्रियतेपुंभिरितिशेषः सतेतवनिष्फलायकल्पते एतदेवाह तदायासइति तदायासस्तत्रक्रियमाणप्रयत्नोनिरर्थः
स्यात्कथमिदनयादेरिवदुर्नयरूपाधर्मस्येव नयादिर्दुर्नयःप्रोक्तोयत्रयंसोतिसर्वंदेतिवचनात् २१

बुद्धिमतांनिश्चयज्ञानवतांबुद्धिर्निश्चयात्मिकैषामनीषिणांमनसासारेच्छावतांमनीषामनसासारान्वेषणमेतत् अनृतेनक्षणेक्षणेअन्यथाभवताअतएवमर्त्येनशरीराख्यजगताऋतंशश्वदेकप्रकारंसत्यब्रह्ममा
माप्नोतीतियत्तस्मात् एकदाज्ञानरूपेणयंनतिष्ठतिसर्वदा । चपलत्वात्सत्यमपिह्यनृतंजगदुच्यतइति । सर्वदैकप्रकारत्वात्सत्यंब्रह्मसदोच्यतइतिवाक्यद्वयेनसत्यानृतशब्दयोरुक्तएवार्थइति २२ सु
गमोयोगोवक्तव्यइतित्वयापृष्टेनमयायोगउक्तइत्युपसंहरति एषइति २३ ब्रह्मवादःसंसारमोचकंब्रह्मज्ञानमेवेत्याशयेनाह अभीक्ष्णशइति २४ सुविविक्तंतवप्रश्नमवधार्यमयोक्तंसनातनं
ब्रह्मगुह्यंवेदरहस्यंपरिहारमपिधारयन्पुरुषःपरंब्रह्मजानातिज्ञात्वाप्राप्नोतिचेत्यन्वयः २५ प्रत्ययगमनंफलमाह यएतदिति सुपुष्कलंयावदपेक्षितंतावज्ज्ञानंब्रह्मैवदायःपितृधनंयस्यसब्रह्मदायः
तस्य यद्वा ब्रह्मदश्चायोअर्थागमोयस्यसतथातस्यआत्मनाप्रसन्नेनमनसाआत्मानंमद्विषयंज्ञानंदत्वामत्स्वरूपंददामि २६ अध्येतुःफलमाह यइति मांदर्शयन् २७ श्रोतुःफलमाह य
इति २८ अज्ञातांशंसम्यग्वक्तुंस्वोक्तज्ञानेअवधृतिंपृच्छति अपीति समुपधारितमपिकिं मोहश्चविगतोप्यसौमनोभवःमनःशल्यत्वेनजातःशोकश्चनष्टःकिम् २९ एतस्यज्ञानस्योपदेष्टुर्महाफल

एषाबुद्धिमतांबुद्धिर्मनीषाचमनीषिणाम् ॥ यत्सत्यमनृतेनेहमर्त्येनाप्नोतिमामृतम् २२ एषतेभिहितःकृत्स्नोब्रह्मवादस्यसंग्रहः ॥ समासव्यासविधिनादे
वानामपिदुर्गमः २३ अभीक्ष्णशस्तेगदितंज्ञानंविस्पष्टयुक्तिमत् ॥ एतद्विज्ञायमुच्येतपुरुषोनष्टसंशयः २४ सुविविक्तंतवप्रश्नंमयोक्तमपिधारय
न् ॥ सनातनंब्रह्मगुह्यंपरंब्रह्माधिगच्छति २५ यएतन्ममभक्तेषुसंप्रदद्यात्सुपुष्कलम् ॥ तस्याहंब्रह्मदायस्यददाम्यात्मानमात्मना २६ यएतत्समधी
यीतपवित्रंपरमंशुचि ॥ सपूयेताहरहर्मांज्ञानदीपेनदर्शयन् २७ यएतच्छ्रद्धयानित्यमव्यग्रंशृणुयान्नरः ॥ मयिभक्तिपरांकुर्वन्कर्मभिर्नसबध्यते २८
अप्युद्धवत्वयाब्रह्मसखेसमुपधारितम् ॥ अपितेविगतोमोहःशोकश्चासौमनोभवः २९ नैतत्त्वयादांभिकायनास्तिकायशठायच ॥ अशुश्रूषोरभक्ता
यदुर्विनीतायदीयताम् ३० एतैर्दोषैर्विहीनायब्रह्मण्यायप्रियायच ॥ साधवेशुचयेब्रूयाद्भक्तिःस्याच्छूद्रयोषिताम् ३१ नैतद्विज्ञायजिज्ञासोर्ज्ञात
व्यमवशिष्यते ॥ पीत्वापीयूषममृतंपातव्यंनावशिष्यते ३२ ज्ञानेकर्मणियोगेचवार्तायांदंडधारणे ॥ यावानर्थोनृणांतातावान्मोहश्चतुर्विधः ३३
मर्त्योयदात्यक्तसमस्तकर्मानिवेशितात्माविचिकीर्षितोमे ॥ तदामृतत्वंप्रतिपद्यमानोमयात्मभूयायचकल्पतेसौ ३४ ॥ श्रीशुकउवाच ॥ सएवमादर्शि
तयोगमार्गस्तदोत्तमश्लोकवचोनिशम्य ॥ बद्धांजलिःप्रीत्युपरुद्धकंठोनाकिंचिदूचेश्रुपरिप्लुताक्षः ३५

संभवेपियोग्यायैवोपदेष्टव्यंनायोग्यायेत्याह नैतदिति ३० शूद्राणांयोषितांचयदिभक्तिःस्यान्मयितर्हितेभ्योपिब्रूयादित्यन्वयः ३१ इदमेवमुक्तिसाधनंनान्यदित्याशयेनाह नैतादि
ति ३२ तर्हिलोकाएतत्किमितिनविविदिषंतीतितत्राह यावानिति नृणांयावान्ज्ञातव्यार्थोभवेत्तावांश्चतुर्विधोमोहइत्येतदुपलक्षणंपंचपर्वाविद्याप्रतिरुद्धत्वान्नज्ञातुमिच्छंतीत्यर्थः ३३ नन्वे
वंचेद्विविदिषाभावेनकदाप्यनुदयोमुक्तेरत्राह मर्त्यइति अयंमोक्षंप्राप्नोत्विति मोक्षोपायंप्रतिमेमयाचिकीर्षितोभवेत् यदामदुद्देशेनमर्त्यस्त्यक्तसमस्तकर्माहरिरेवमयिस्थित्वासर्वकर्मकरोतिअहंतदधी
नएवकर्मकरोमिनस्वतंत्रइतिहरावेवनिवेशितात्माचभवतितदाऽमृतत्वंप्रतिपद्यमानःप्राप्तुंयोग्योभवन्नसौमयात्मभूयायनिर्दुःखानंदानुभवरूपमोक्षायैवकल्पतइत्यन्वयः यमेवैषवृणुतेतेनलभ्यइतिश्रुतेः ३४
उद्धवस्यभक्त्यतिशयलक्षणमाह सएवमिति ३५

३६ अप्युद्धवेत्याद्युक्तंपरिहरति विद्रावितइति योमोहमयांधकारोमेमनआश्रितः सएवतवसन्निधानान्मोहांधकारापगमःकथमत्राह विभावसोरिति हेऽजाद्यतमश्चाभिप्रभवति किंतुनैव ३७ हरेःस्वात्मन्यनुकंपातिशयेहेतुंकरोति प्रवर्द्धितेति हिशब्दोहेतौ अनुकंपितामयिप्रवर्धितेतिमन्ये विज्ञानमयःप्रदीपोदत्तोहियस्मात्तस्मादितिशेषः अतःसर्वस्पादुपकारत्वाद्भवानेवानिषेव्यइति भावेनाह हित्वेति ३८ कीदृशोमोहांधकरोयोसौज्ञानासिनाछिन्नइतितत्राह वृक्णश्चेति योसृष्टिविवृद्धयेत्वयाप्रसारितोविस्तारितःसएषस्वमायायाएनंसंसारंयामीत्युद्धतनिजेच्छयाप्रादुर्भूतात्मावि बोधाख्यहेत्यावृक्णश्चेत्यन्वयः ३९ स्वात्मनोभगवदेकशिष्यत्वंप्रकटयन्नाह नमइति ४० भगवाननुशाधीत्युक्तंविवृणोति गच्छेति ईक्षयाज्ञानेनमत्पादतीर्थोदैःमिश्रितत्वेनप्रवृद्धाशेषपापविध्वंसशक्ति

विष्टभ्यचित्तंप्रणयेनपूर्णंधैर्येणराजन्बहुमन्यमानः ॥ कृतांजलिःप्राहयदुप्रवीरंशीर्ष्णास्पृशंस्तच्चरणारविंदम् ३६ ॥ उद्धवउवाच ॥ विद्रावितोमोहमयोंधकारोयआश्रितोमेतवसन्निधानाद् ॥ विभावसोःकिन्नुसमीपगस्यशीतंतमोभिप्रभवत्यजाद्य ३७ प्रवर्धितामेभवतानुकंपितादत्तोहिविज्ञानमयःप्रदीपः ॥ हित्वाकृतज्ञस्तवपादमूलंकोज्ञःसमीयाच्छरणंत्वदन्यम् ३८ वृक्णश्चमेसुदृढस्नेहपाशोदाशार्हवृष्ण्यंधकसात्वतेषु ॥ प्रसारितःसृष्टिविवृद्धयेत्वयास्वमायायाह्यात्मसुबोधहेतिना ३९ नमोस्तुतेमहायोगिन्प्रपन्नमनुशाधिमाम् ॥ यथात्वच्चरणांभोजेरतिःस्यादनपायिनी ४० श्रीभगवानुवाच ॥ गच्छोद्धवमयादिष्टोबदर्याख्यंममाश्रमम् ॥ तत्रमत्पादतीर्थोदैःस्नानोपस्पर्शनैःशुचिः ४१ ईक्षयालकनंदायाविधूताशेषकल्मषः ॥ वसानोवल्कलान्यंगवन्यभुक्सुखनिस्पृहः ४२ तितिक्षुर्द्वंद्वमात्राणांसुशीलःसंयतेंद्रियः ॥ शांतःसमाहितधियाज्ञानविज्ञानसंयुतः ४३ मत्तोनुशिक्षितंयत्तेविविक्तमनुभावयन् ॥ मय्यावेशितवाक्चित्तोमद्धर्मनिरतोभव ४४ अतिक्रम्यगतीस्तिस्रोमामेष्यसिततःपरम् ४५ श्रीशुकउवाच ॥ सएवमुक्तोहरिमेधसोद्धवःप्रदक्षिणंतंपरिसृत्यपादयोः ॥ शिरोनिधायाश्रुकलाभिरार्द्रधीःसिंचन्पदद्वंद्वमथोनुचक्रमे ४६ सुदुस्त्यजस्नेहवियोगकातरोनशक्नुवंस्तत्परिहातुमातुरः ॥ कृच्छ्रंययौमूर्धनिभर्तृपादुकेबिभ्रन्नमस्कृत्ययौपुनःपुनः ४७ ततस्तमंतर्हृदिसन्निवेश्यगतोमहाभागवतोविशालाम् ॥ यथोपदिष्टंजगदेकबंधुनातपःसमास्थायहरेरगाद्गतिम् ४८ यदेतदानंदसमुद्रसंभृतंज्ञानामृतंभागवतायभाषितम् ॥ कृष्णेनयोगेश्वरसेवितांघ्रिणासच्छ्रद्धयासेव्यजगद्विमुच्यते ४९ श्रीशुकउवाच ॥ भवभयमपहर्तुंज्ञानविज्ञानसारंनिगमकुमुददभ्रंभृंगवद्वेद्यसारम् ॥ अमृतमुदधिकल्पंपाययन्भृत्यवर्गान्पुरुषऋषभमाद्यंविष्णुसंज्ञंनतोस्मि ॥ ५० ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेउद्धवबदरीप्रवेशोनामएकोनत्रिंशोध्यायः ॥ २९ ॥ ॥ ॥ ७ ॥ ॥

युक्तायाअलकनंदायाःजलस्नानोपस्पर्शनैःशुद्धः ४१ ४२ ४३ ४४ तिस्रःगतीःजाग्रत्स्वप्नसुषुप्तिलक्षणाः ४५ हरिमेधसाविष्णुनाआत्मनोहारित्वमेवयतीतिहरिमेधास्तेन ४६ अनुचक्रम इत्युक्तेस्वाभिप्रायंविवृणोति सुदुस्त्यजेति ४७ विशालांबदरीं ४८ नकेवलमेतज्ज्ञानमुद्धवस्यैवफलप्रदंनिषेवमाणानामितरेषामपीत्याह यदेतदिति आसेव्य ४९ भगवतोभक्तानुकंपितां विस्मयमानःशुकःउत्तरग्रंथानुवर्तनार्थंभगत्प्रसादमाकांक्षमाणोभगवंतंनमति भवभयमितिअहंतमाद्यंसर्वज्ञंपुरुषर्षभंपुरुषोत्तमंनतोस्मीत्यन्वयः योभवभयमपहर्तुंउन्मूलयितुंनिजयशोमृतंभृत्यवर्गान्पालयन्नास्तेकीदृशंज्ञानविज्ञानेएवसारंवरंवरणीयंस्वादुयस्मिंस्तत्तथा निगमकुमुददभ्रंवेदलक्षणकुमुदैकदेशासिद्धं अनेनवेदानामनंतत्वेपितत्तच्चोग्यानुसारेणोदितमितिज्ञायते अतएववेचसारंवेद्येषुज्ञातव्येषुसारं

श्रेष्ठं ननुवेदैकदेशसिद्धंचेत्स्वापेक्षितसामग्र्यभावान्नेदमुपादेयमितितत्राहउदधिकन्यामिति योग्यताविशेषादधिकारिणांपूर्णत्वेनसमुद्रसमानं भृंगवत्पथाभृंगोभृंगीमधुपायथातंतथात ५० इतश्रीभाग
वतेमहापुराणेएकादशस्कंधेविजयध्वजकृतटीकायांएकोनत्रिंशोध्यायः ॥ २९ ॥ भगवतोमायालक्षणमाहात्म्यंप्रकटयितुंयादवानांमिथोवधनिमित्तनिधनंसज्जनचेतोनुरागजननायचतुर्भुजत्वादिनिज
रूपलक्षणदर्शनंदुर्जनमनोमोहनायजराख्यव्याधशरविद्धपादत्वंतत्स्वर्गदानमित्येतत्सर्वमस्मिन्नध्यायेवक्ति तत्रादौपरीक्षित्प्रश्नप्रकारंभगवद्वाक्येनयादवानांद्वारकायाःनिर्गत्यप्रभासप्रयाणंतीर्थस्नानपूर्व
कंविप्रादिपूजनंचवक्ति ततोमहाभागवतइत्यादिना १ अत्यजत् अतिरत्नातिशयेवर्तते अतिःस्यादधिकार्थोक्तौप्रशंसायामतिक्रमइतियादवः । अजहरणइतिधातोर्भूलोकात्स्वर्गलोकंप्रत्यहरत् २ प्राकृत
रूपवत्अप्राकृतरूपंचदिव्यं त्यक्तुमयोग्यंस्वात्मैकत्वेनसतांश्रवणमनोगोचरत्वात्साक्ष्यमुक्तिदत्वाचेतिभावेनाहप्रत्याक्रष्टुमितिअबलायत्रयस्मिन्हरेरंगेमग्नंनयनंप्रत्याक्रष्टुंततआनेतुंनशेकुः सतांकर्णा

राजोवाच ॥ ततोमहाभागवतेउद्धवेनिर्गतेवनम् ॥ द्वारवत्यांकिमकरोद्भगवान्भूतभावनः १ ब्रह्मशापोपसंसृष्टेस्वकुलेयादवर्षभः ॥ प्रेयसींसर्वनेत्राणां
तनुंसकथमत्यजत् २ प्रत्याक्रष्टुंनयनमबलायत्रमग्नंनशेकुःकर्णाविष्टंनसरतियशोयत्सतामात्मलग्नम् ॥ यच्छ्रीवाक्यंजनयतिरतिंकिन्नुमानंकवी
नांदृष्ट्वाजिष्णोर्युधिरथगतंयच्चतत्साम्यमीयुः ३ श्रीशुकउवाच ॥ दिविभुव्यंतरिक्षेचमहोत्पातान्समुत्थितान् ॥ दृष्ट्वासीनान्सुधर्मायांकृष्णःप्राहयदूनि
दम् ४ श्रीभगवानुवाच ॥ एतेघोरामहोत्पाताद्वार्वयांत्यमकेतवः ॥ मुहूर्तमपिनस्थेयमत्रवोयदुपुंगवाः ५ स्त्रियोबालाश्चवृद्धाश्चशंखोद्धारंव्रजंत्वितः ॥
वयंप्रभासंयास्यामोयत्रप्रत्यक्सरस्वती ६ तत्राभिषिच्यशुचयउपोष्यसुसमाहिताः ॥ देवतापूजयिष्यामःस्नपनालेपनार्हणैः ७ ब्राह्मणांस्तुमहाभागा
न्कृतस्वस्त्ययनावयम् ॥ गोभूहिरण्यवासोभिर्गजाश्वरथवेश्मभिः ८ विधिरेषह्यरिष्टघ्नोमंगलायनमुत्तमम् ॥ देवद्विजगवांपूजाभूतेषुपरमादया
९ इतिसर्वेसमाकर्ण्ययदुवृद्धामधुद्विषः ॥ तथेतिनौभिरुत्तीर्यप्रभासंप्रययूरथैः १० तस्मिन्भगवतादिष्टंयदुदेवेनयादवाः ॥ चक्रुःपरमयाभक्त्यासर्वश्रेयो
पबृंहितम् ११ ततस्तस्मिन्महापानंपपुर्मैरेयकंमधु ॥ दिष्टविभ्रंशितधियोयादवानष्टमंगलाः १२ महापानाभिमत्तानांवीराणांदृप्तचेतसाम् ॥ कृष्णमा
यांविमूढानांसंघर्षःसुमहानभूत् १३

विष्टमात्मलग्नंमनोमंदिरंयच्चशःकंसहंतृत्वादिलक्षणंनसरतिकर्णादेर्नापिसराति ततोयत्सतामितिकेचित्पठंति यद्रूपंचयच्छ्रीवाक्यंयस्यश्रीमद्वाक्यंमनःकर्णयोरतिंनिर्दुःखमु खंजनयतिकरोतिवा श्री
वाचामितिपाठेलक्ष्म्यावचसांरतिंजनयति श्रोतॄणामितिशेषः यच्चकिंतृतीयोतिशयइतिसूत्रात् सुखपूर्णकवीनांनुमानंमानानुसारिचइदंसर्वस्मिन्नुक्तार्थेमानंभवति कोनुमानइतिपाठेदेहःकःसुखात्मकःकवी
नांमानानुसारीत्यर्थःयच्चयुधिभारताख्येजिष्णोर्जयमूर्तेरर्जुनस्यरथगतंदृष्ट्वातत्साम्यंतस्यस्वरूपस्यनिर्दोषत्वादिलक्षणसाम्यमीयुरापुः भीष्मादयइतिशेषःइत्यतएतादृशंरूपंकथमाहरदित्यन्वयः ३
राज्ञापृष्टःशुकोत्राह दिवीति ४ द्वारवत्यांदृश्यंते ५ ६ ७ ८ ९ १० ११ कदंबरसधारातुमदिरानिर्मितंमधु । मैरेयमितिसंप्रोक्तंयत्पानाद्भ्रश्यतेमनइति दिष्टेनदैवसंज्ञेनभगवता
१२ संघर्षःकलहः १३

वेलायांसमुद्रजलसीम्नि १४ अर्वाणोऽश्वाः दद्रिर्दैतैः १५ १६ १७ अध्वर्युदाइतिकेचिद्यादवाविशेषाः १८ १९ एरकाःसमुद्रतीरुहःसूचीमुखतृणानिजघ्नुरुदपाटयन् २० २१ २२ एरकायुक्तमुष्ट्याख्यपरिघैः २३ २४ २५ पौरुषंपूर्णषड्गुणभगवद्विषयंयोगंध्यानंसमास्थायसम्यगेकाग्रचित्तत्वेनकृत्वायोगंयोगनामानंविष्णुमाविश्यात्मानंस्वांतर्यामिणमात्मनिव्यापेभगवद्रूपेसंयोज्यैकीभवतीतिसांचिंत्यदेहंतत्यजेइत्यन्वयः आत्मनेपदप्रयोगेणसुखेनदेहत्यागंसूचयति २६ २७ भगवतादेहंत्यक्त्वादिवंनगततंत्प्रदर्शनमसुरजनमोहनार्थंकृतमितिज्ञापयन्शुकोहरे

युयुधुःक्रोधसंरब्धावेलायामाततायिनः ॥ धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः १४ पतत्पताकैरथकुंजरार्वभिःखरोष्ट्रगोभिर्महिषैर्नरैरपि ॥ मिथः समेत्याश्वतरैःसुदुर्मदान्यहञ्छरैर्दद्विरिवद्विपावने १५ प्रद्युम्नसांबौयुधिरूढमत्सरावक्रूरभोजावनिरुद्धसात्यकी ॥ सुभद्रसंग्रामजितौसुचारुगदौसुमित्रासुरथौसमीयतुः १६ अन्येचयेवैनिशठोल्मुकादयःसहस्रजिच्छतजिद्भानुमुख्याः ॥ अन्योन्यमासाद्यमदांधकारिताजघ्नुर्मुकुंदेनविमोहिताभृशम् १७ दाशार्हवृष्ण्यंधकभोजसात्वताअध्वर्युदामाधुरशूरसेनाः ॥ विसर्जनाःकुकुराकुंतयश्चमिथस्तुजघ्नुःसुविसृज्यसौहृदम् १८ पुत्रास्त्वयुध्यन्पितृभिर्भ्रातृभिश्च स्वस्रीयदौहित्रपितृव्यमातुलैः ॥ मित्राणिमित्रैःसुहृदःसुहृद्भिर्ज्ञातींस्त्वहन्ज्ञातयएवमूढाः १९ शरेषुहीयमानेषुभज्यमानेषुधन्वसु ॥ शस्त्रेषुक्षीयमाणेषुमुष्टिभिर्जघ्नुरेरकाः २० तावज्रकल्पाह्यभवन्परिघामुष्टिनाहृताः ॥ जघ्नुर्द्विषस्तेकृष्णेनवार्यमाणास्तुतंचते २१ प्रत्यनीकंमन्यमानाबलभद्रंचमोहिताः ॥ हंतुंकृतधियोराजन्नापन्नाजाततायिनः २२ अथतावपिसंक्रुद्धावुद्यम्यकुरुनंदन ॥ एरकामुष्टिपरिघैश्चरंतौजघ्नतुर्युधि २३ ब्रह्मशापोपसृष्टानांकृष्णमायावृतात्मनाम् ॥ स्पर्द्धाक्षोभःक्षयंनिन्येवैणवोग्निर्यथावनम् २४ एवंसर्वेषुनष्टेषुकुलेषुस्वेषुकेशवः ॥ उत्तारितोभुवोभारइतिमेनेऽवशेषितः २५ रामःसमुद्रवेलायांयोगमास्थायपौरुषम् ॥ तत्यजेयोगमाविश्यसंयोज्यात्मानमात्मनि २६ रामनिर्याणमालोक्यभगवान्देवकीसुतः ॥ निषसादधरोपस्थेतूष्णीमासाद्यपिप्पलम् २७ बिभ्रच्चतुर्भुजंरूपंभ्राजिष्णुप्रभयास्वया ॥ दिशोवितिमिराःकुर्वन्नविधूमइवपावकः २८ श्रीवत्साकंघनश्यामंतप्तहाटकवर्चसम् ॥ कौशेयांबरयुग्मेनपरिवीतंसुमंगलम् २९ सुंदरस्मितवक्त्राब्जंनीलकुंतलमंडितम् ॥ पुंडरीकाभिरामाक्षंस्फुरन्मकरकुंडलम् ३०कटिसूत्रब्रह्मसूत्रकिरीटकनकांगदैः ॥ हारनूपुरमुद्राभिःकौस्तुभेनाविराजितम् ३१ वनमालापरीतांगंमूर्तिमद्भिर्निजायुधैः ॥ कृत्वोरौदक्षिणंपादमासीनंपंकजारुणम् ३२ मुसलावशेषायःखंडकृतेषुर्लुब्धकोजरः ॥ मृगाकारंतच्चरणंविव्याधमृगशंकया ३३ चतुर्भुजंतंपुरुषंदृष्ट्वासकृतकिल्बिषः ॥ भीतःपपातशिरसापादयोरसुरद्विषः ३४ व्याधउवाच ॥ अजानताकृतामिदंपापेनमधुसूदन ॥ क्षंतुमर्हसिपापस्यउत्तमश्लोकमेनघ ३५

स्तदानींतनस्वरूपप्रकारंब्रूते बिभ्रादिति २८ २९ ३० ३१ ३२ अत्रश्रीकृष्णोसुरजनमोहकरींमायांप्रकटयतिजराख्यव्याधेनेत्याह मुसलेति मुसलावशेषायःखंडेनकृतइषुःशरोयस्यसमुसलावशेषायःखंडकृतेषुःचूर्णितमुसलावशिष्टायःखंडेनकृतशरवानित्यर्थः मृगाकारंमृगत्वबुद्धिजनकम् ३३ ३४ अजानतामया ३५

आसाध्वनुचितम् ३६ तंमृगलुब्धकंमृगलोभिनमिति ३७ तत्रकृतब्रह्महत्यादिदोषपरिहारसद्भावेप्यत्रकृतदोषपरिहारोनास्त्येवतेनाधःपातएवातोमद्बधएवश्रेयानितिभावेनाह यस्येति वि रिंचरुद्रादयोस्याविरिंचस्यतनयामरीच्यादयोगिरांपतयःबृहस्पत्यादयःतेऐतेयस्यतवात्मयोगरचितंस्वरूपसामर्थ्योपायेनकृतंसृष्ट्यादिकंनविदुः तत्रनिमित्तमाह त्वन्मायेति त्वन्माययाबंधकशक्त्या विहतदृष्टयःप्रलुप्तज्ञानाःयस्मात्तस्मादितिशेषः असद्व्रतयोऽप्रशस्तव्याधयोनिर्गताःअतएवज्ञानशून्याः वयंतस्यतेतवएतच्चरितमंजोगृणीमिःकिं नैवज्ञातुंशक्ताइत्यतःएतत्स्तुत्यादिकर्मणाप्येतत्पापप रिहारोपायाज्ञानादधःपातात्पूर्वमेवमांजहीत्यर्थः सुमतयइतिकेचित्पठंति अनेनकैमुत्यन्यायोदर्शितइतिज्ञायते ३८ भगवान्भक्तवत्सलत्वान्मयिभक्तिरेवास्मिलपापध्वंसिनीतिभावंकृत्वावाक्ति माभै रिति माभैर्भयंमाकार्षीः एषकृतःशरवेधोमेकामःकामितःकांक्षितइत्यर्थः हिशब्देनदुष्टजनमोहनंप्रयोजनंसूचयति अतःकिमस्मैफलंददासीतितत्राह याहीति सुकृतिनांपदमित्यनेनइदमपिसुकृतमेवा स्त्वतिध्वनयति ३९ नेदंप्राकृतपुरुषोक्तवत्कालांतरेपिसंदेहकरमितिभावेनाह इतीति ४० प्रासंगिकंसमाप्यकथाशेषंप्रस्तौति दारुकइति अन्विच्छन्वेषणंकुर्वन्तंकृष्णंनाधिगम्याविज्ञाय

यस्यानुस्मरणंनृणामज्ञानध्वांतनाशनम् ॥ वदंतितस्यतेविष्णोमयाऽसाधुकृतंविभो ३६ तमाशुजहिवैकुंठपाप्मानंमृगलुब्धकम् ॥ यथापुनरहंत्वेवंन कुर्यांसदतिक्रमम् ३७ यस्यात्मयोगरचितंनविदुर्विरिंचरुद्रादयोस्यतनयाःपतयोगिरांये ॥ त्वन्माययाविहतदृष्टयएतदंजःकिंतस्यतेवयमसद्व्रतयोगृणी मः ३८ ॥ श्रीभगवानुवाच ॥ माभैर्जरत्वमुत्तिष्ठकामएषकृतोहिमे ॥ याहित्वंमदनुज्ञातःस्वर्गंसुकृतिनांपदम् ३९ ॥ श्रीशुकउवाच ॥ इत्यादिष्टोभग वताकृष्णेनेच्छाशरीरिणा ॥ त्रिःपरिक्रम्यतंनत्वाविमानेनदिवंययौ ४० दारुकःकृष्णपदवीमन्विच्छन्नाधिगम्यतम् ॥ वायुंतुलसिकामोदमाघ्रायाभिमु खंययौ ४१ तंतत्रतिग्मद्युतिमायुधैर्वृतंह्यश्वत्थमूलेकृतकेतनंपतिम् ॥ स्नेहप्लुतात्मानिपपातपादयोरथादवप्लुत्यसबाष्पलोचनः ४२ अदृश्यतस्तेचरणांबुजंप्रभोदृष्टिःप्रनष्टातमसिप्रविष्टा ॥ दिशोनजानेनलभेचशांतियथानिशायामुडुपेप्रनष्टे ४३ ॥ ॥ श्रीशुकउवाच ॥ ॥ इतिब्रुवतिसूतेवैरथोगरुडलांछ नः ॥ खउत्पपातराजेंद्रसाश्वध्वजउदीक्षितः ४४ तमन्वगच्छद्दिव्यानिविष्णुप्रहरणानिच ॥ तेनातिविस्मितात्मानंसूतमाहजनार्दनः ४५ श्रीभगवा नुवाच ॥ गच्छद्वारवतींसूतज्ञातीनांनिधनंमिथः ॥ संकर्षणस्यनिर्याणंबंधुभ्योब्रूहिमद्दशाम् ४६ द्वारकायांनचस्थेयंभवद्भिश्चस्वबंधुभिः ॥ मयात्यक्तां यदुपुरींसमुद्रःप्लावयिष्यति ४७ स्वंस्वंपरिग्रहंसर्वेआदायपितरौचनः ॥ अर्जुनेनान्विताःसर्वेइंद्रप्रस्थंगमिष्यथ ४८

पुनस्तुलसिकामोदोयस्यसतथातं वायुमाघ्रायज्ञात्वातुलसिकामोदवाख्वभिमुखम् ४१ तत्राश्वत्थमूलेकृतकेतनंतंकृष्णंदृष्ट्वा ४२ प्रभातेतवचरणांबुजमदृश्यतोऽपश्यतोममदृष्टिःप्रनष्टाअस्तंगता दृश्यमानायाःकथंनाशइत्यतउक्तं तमसीति फलमाह दिशइति शांतिर्मंगलं शांतिःप्रशममंगलइतियादवः उडुपेचंद्रेप्रनष्टेअस्तंगते अत्रोडुभिःसचंद्रस्यादर्शनंविवक्षितं अन्यथानक्षत्रप्रेक्षणेनापि दिगादिविवेकोपपत्तेरित्यतउडुपपदप्रयोगइति आहाश्रितइतिपाठे पादप्रपन्नःसूतःकृष्णमाहयोहंतेचरणांबुजमाश्रितःतस्यमेदृष्टिःप्रनष्टेतियोजना ४३ इदमप्यतिमाहात्म्यंहरेरितिभावेनाह इती ति उदीक्षितःहरिणाऊर्ध्वंगतोदृष्टःअत्रचेतनानियतरथाद्यचेतनप्रवृत्तिदर्शनलौकिकानांभगवन्माहात्म्यबुद्धिरितरेषांज्ञानिनांमेमलक्षणसंज्ञपागतिंपश्यतांचैतन्यात्मकानिअच्युतरथादीनिइत्यहोविश्वमूर्तेर्मा हात्म्यमितिज्ञातव्यम् ४४ तेनरथादिगमनेन ४५ ४६ ४७ ४८

पुत्रादावुपेक्षकःएतांसंसारवृत्तिंमन्मायययामोदिच्छयारचनाप्रकारोयस्याःसामन्मायारचनातां ४९ दुर्मनाःदुःखितांतःकरणः पुरींद्वारवतीसंज्ञां ५० इतिश्रीभागवतेमहापुराणेएकादशस्कंधेविज यध्वजकृतटीकायांत्रिंशोध्यायः ॥ ३० ॥ हरेःस्वनिर्याणप्रकारादिकंकथयत्यस्मिन्नध्याये तत्रादौब्रह्मादीनामागतिमाह अथेति भवान्यारुद्राण्योमया १ द्विजाऋषयः २ ३ ४ विभूतीः स्वसन्निधानस्थानविशेषानिंद्रादीन् आत्मानंस्वमात्मनिमूलरूपे ५ आग्नेय्यायोगधारणयाजातेनाग्निनातनुमदग्ध्वापरंपदंस्वकंधामाविशत् आग्नेय्यान्येधारणयादेहंदग्ध्वापरंपदं । यांतिदेवाःस मस्ताश्चतेषामन्यांतनुंहरेः । नृसिंहरूपीसर्वेषांभित्वाताभिरलंकृतः । नृत्यतेप्रलयेदेवःस्वयंकृष्णादिरूपवान् । अदग्ध्वैवतनुंयातिनित्यानंदस्वरूपतइतिवचनादुक्तार्थएवांगीकरणीयइतिभावः ६ तंकृष्ण मनु ७ अत्राप्येकंमाहात्म्यातिशयमाह देवादयइति ८ यथामर्त्यैरभ्रमंडलंभित्त्वाकाश्येयांत्याःसौदामिन्याःगतिर्नलक्ष्यतेतथाकृष्णस्यगतिर्दैवतैर्नलक्ष्यते ९ १० जन्मादिमतोहरेस्तनुमदग्ध्वेतिकथं

त्वंतुमद्धर्ममास्थायज्ञाननिष्ठउपेक्षकः ॥ मन्मायारचनामेतांविज्ञायोपशमंव्रज ४९ श्रीशुकउवाच ॥ इत्युक्तस्तंपरिक्रम्यनमस्कृत्यपुनःपुनः ॥ तत्पादौ शीर्ष्ण्युपाधायदुर्मनाःप्रययौपुरीम् ५० इतिश्रीभागवतेमहापुराणेएकादशस्कंधेत्रिंशोध्यायः ॥ ३० ॥ श्रीशुकउवाच ॥ अथतत्रागमद्ब्रह्माभवान्याचसमं भवः ॥ महेंद्रप्रमुखादेवामुनयःसप्रजेश्वराः १ पितरःसिद्धगंधर्वाविद्याधरमहोरगाः ॥ चारणायक्षरक्षांसिकिन्नराप्सरसोद्विजाः २ द्रष्टुकामाभगवतोनि र्याणंपरमोत्सुकाः ॥ गायंतश्चगृणंतश्चशौरेःकर्माणिजन्मच ३ ववृषुःपुष्पवर्षाणिविमानावलिभिर्नभः ॥ कुर्वंतःसंकुलंराजन्भक्त्यापरमयायुताः ४ भगवानपितान्वीक्ष्यविभूतीरात्मनोविभुः ॥ संयुज्यात्मनिचात्मानंपद्मनेत्रेन्यमीलयत् ५ लोकाभिरामांस्वतनुंधारणाध्यानमंगलाम् ॥ योगधारणयाग्नेय्यादग्ध्वाधामाविशत्स्वकम् ६ दिविदुंदुभयोनेदुःपेतुःसुमनसश्चखात् ॥ सत्यंधर्मोधृतिर्भूतिःकीर्तिश्रीश्चानुतंययुः ७ देवादयोब्रह्ममुखाआविशंतंस्व धामनि ॥ अविज्ञातगतिंकृष्णंदद्दशुश्चातिविस्मिताः ८ सौदामिन्यायथाकाशेयांत्याभित्त्वाभ्रमंडलम् ॥ गतिर्नलक्ष्यतेमर्त्यैस्तथाकृष्णस्यदैवतैः ९ ब्र ह्मरुद्रादयस्तेतुदृष्ट्वायोगगतिंहरेः ॥ विस्मितास्तांप्रशंसंतःस्वंस्वंलोकंययुस्तदा १० राजन्परस्यतनुभृज्जनन्नाप्ययेहांमायाविडंबनमवैहियथानटस्य ॥ सृष्ट्वात्मनेदमनुविश्यविहृत्यचांतेसंहृत्यचात्ममहिमोपरतःसआस्ते ११ मर्त्येनयोगुरुसुतंयमनीतलोकंत्वांचानयच्छरणदःपरमास्त्रदग्धम् ॥ जिग्येपुरेंत कमपीशतनावनीशःकिंस्वावनेस्वरनयन्मृगयुंसदेहम् १२

धटतइतितत्राह राजन्निति परस्यसर्वविलक्षणस्यपरमात्मनस्तनुभृद्भज्जननवदप्ययवच्चइहाचेष्टायातांमायाविडंबनंस्वेच्छानुकरणमवैहियथानटस्यराजादिरूपग्रहणविषयचेष्टा प्रजापतिश्वरतिगर्भेअंतः अजायमानोबहुधाविजायते । अजातोजातवद्विष्णुरमृतोमृतवत्तथा । मायायादर्शयन्नित्यमज्ञानांमोहनायचेतिप्रमाणबाहुल्याद्धरेरयंस्वभावइत्यर्थः स्वतोदेहाद्यभावेहरेःसर्जनादिकंकथंयुज्यतइतितत्राह सृष्ट्वेति सहरिरात्मनास्वरूपशक्त्येदंजगत्सृष्ट्वानुविश्यावतारैर्निहृत्यांतेप्रलयेसंहृत्यचात्ममहिमोपरतःस्वमहिम्निस्थितआस्ते अनेनस्वमहिम्नैवसर्वंघटतइत्युक्तंभवति ११ एवमपिमृगयुविद्धत्वंहरे र्जननादिकमापादयतीत्यत्राह मर्त्येनेति यःकृष्णःमर्त्येनशरीरेणसहयमनीतलोकंयमेननीतोलोकंसमुद्दिश्ययःसतथातं यमेनस्वलोकानीतामित्यर्थः गुरोःसांदीपनेःसुतं द्रौणेःपरमास्त्रदग्धंत्वांचानय त् तथायोबाणपुरेंतकंरुद्रमपिजिग्ये रुद्रोमाविशांतकइतिश्रुतेः यद्वापारिजातहरणेअंतकंयममपिजिग्येइति अंतकांतकामितिपाठेयमस्याप्यंतकंरुद्रमित्यर्थः सोनीशोअन्येशरहितःश्रीकृष्णईशत्

नौसर्वेशानांरुद्रादीनामपिईशत्वंतनोतीतिईशतनुस्तस्मिन्देहेमृगयोरनीश्वरःस्यात्कि नस्यादेवातोपिसामर्थ्यप्रकटनायविप्रशापमनुस्मरन्नविद्धएवस्वभक्तंव्याधशरीरान्मोचयंस्तेनशल्येषुणाविद्धइवतस्य स्वात्मानंप्रकाशयतेनप्रसादितस्तस्मैस्वलोकंददावित्यर्थः १२ तर्हिकिमितिबलभद्रादीन्सदेहान्स्वलोकंनानैषीदितितत्राह तथापीति यद्यपिअशेषस्थितिसंभवाप्ययेषुअनन्यहेतुःस्वयमेवहेतुर्हेत्वंतरविव र्जितः कुलालस्यमृद्दंडादिशक्त्यपेक्षावत्प्रकृत्यादिशक्त्यपेक्षितत्वेनकथंहेत्वंतरंनास्तीत्यतउक्तं अशेषशक्तिधृगितितथापिबलभद्रादीनांवपुःप्रणेतुंनैच्छत्भगवान्मर्त्येनमरणशीलेनशरीरेणकिंप्रयोजन मितिभावेनात्रशेषितंहरिणेतिशेषः अनेनापिकिंप्रयोजनमतउक्तं स्वस्थगतिंस्वभक्तानांस्वविषयज्ञानलक्षणयोगगतिंप्रदर्शयन्नेवंप्रदर्शनमेवंप्रयोजनमित्यर्थः अतःसमर्थोपिप्रयोजनाभावान्ननीतवानित्यर्थः

तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक् ॥ नैच्छत्प्रणेतुंवपुरत्रशेषितंमर्त्येनार्किंस्वस्थगतिंप्रदर्शयन् १३ यएतांप्रातरुत्थायकृष्ण स्यपदवींपराम् ॥ प्रयतःकीर्तयेद्भक्त्यातामेवाप्नोत्यनुत्तमाम् १४ दारुकोद्वारकामेत्यवसुदेवोग्रसेनयोः ॥ पतित्वाचरणावस्रैर्न्यषिंचत्कृष्णविच्युतः १५ कथयामासनिधनंवृष्णीनांकृत्स्नशोनृप ॥ तच्छ्रुत्वोद्विग्नहृदयाजनाःशोकविमूर्छिताः १६ तत्रवैत्वरिताजग्मुःकृष्णविश्लेषविह्वलाः ॥ व्यसवःशेरतेयत्र ज्ञातयोध्नंतआयुधैः १७ देवकीरोहिणीचैववसुदेवस्तथासुतौ ॥ कृष्णरामावपश्यंतःशोकार्तावित्यजहुःस्मृतिम् १८ प्राणांश्चविजहुस्तत्रभगवद्विरहातुराः उपगूह्यपतींस्तातचितामारुरुहुःस्त्रियः ॥ रामपत्न्यश्चतंदेहमुपगूह्याग्निमाविशन् १९ ॥ ॥ ॥ ॥ ॥

अतःस्वशरीरंनेतुंनैच्छदित्यर्थोनुपपन्नःउक्तहेतुविरुद्धत्वात् असंभवाच्चेति जगतोमोहनार्थायभगवान्पुरुषोत्तमः । दर्शयन्मानुषीचेष्टांतथामृतकवद्विभुः । प्रकाशयेददेहोपिमोहायचदुरात्मनां । माय यामृतकंदेवस्तदासृष्ट्वाप्रदर्शयेत् । कुतोहिमृतकंतस्यमृत्यभावात्परात्मन इतिप्रमाणसद्भावाच्च १३ एतज्ज्ञानस्यस्वप्राप्तिहेतुत्वाच्चोक्तएवार्थइतिभावेनोक्तमुपसंहरति यएतामिति १४ कृष्णोक्तोदारुकः किमकरोदितितत्कथाशेषमाह दारुकइति १५ १६ १७ भगवद्विषयांस्मृतिंविजहुःक्षणमितिशेषः १८ १९

तदात्मिकास्तदेकचित्ताः अम्रावंतर्दधेभैष्मीसत्यभामावनेतथा । नतुदेहवियोगोस्तितयोःशुद्धचिदात्मनोरितिप्रमाणाद्रुक्मिणीसत्यभामयोरंतर्धानमवगंतव्यम् ॥ अन्याःषण्महिष्योऽग्रौदेहंत्यक्तवंत्यइतिभावः २० आत्मानंस्वम् २१ सांपरायिकंपरलोकविषयंकर्म २२ २३ २४ २५ २६ २७ अन्यत्रग्रंथांतरेइहास्मिन्ग्रंथेपरमहंसगतौपरमहंसानामाश्रयेहरौशरणेवा २८ ॥ यत्तत्वंनिगमो

वसुदेवपत्न्यस्तद्वात्रेप्रद्युम्नादीन्हरेःसुषाः ॥ कृष्णपत्न्योविशन्नग्निरुक्मिण्याद्यास्तदात्मिकाः २० अर्जुनःप्रेयसःसख्युःकृष्णस्यविरहातुरः ॥ आत्मानंसांत्वयामासकृष्णगीतैःसदुक्तिभिः २१ बंधूनांनष्टगोत्राणामर्जुनःसांपरायिकम् ॥ हतानांकारयामासयथावदनुपूर्वशः २२ द्वारकांहरिणात्यक्तां समुद्रोप्लावयत्क्षणात् ॥ वर्जयित्वामहाराजश्रीमद्भगवदालयम् २३ नित्यंसन्निहितस्तत्रभगवान्मधुसूदनः ॥ स्मृत्याशेषाशुभहरःसर्वमंगलमंगलः २४ स्त्रीबालवृद्धानादायहतशेषान्धनंजयः ॥ इंद्रप्रस्थंसमावेश्यवज्रंतत्राभ्यषेचयत् २५ श्रुत्वासुहृद्वधंराजन्नर्जुनात्तेपितामहाः ॥ त्वांतुवंशधरंकृत्वाज गमुःसर्वेमहापथम् २६ यएतद्देवदेवस्यविष्णोःकर्माणिजन्मच ॥ कीर्तयेच्छ्रद्धयामर्त्यःसर्वपापैःप्रमुच्यते २७ इत्थंहरेर्भगवतोरुचिरावतारवीर्याणि चास्यचरितानिचसंमतानि ॥ अन्यत्रचेहचश्रुतानिगृणन्मनुष्योभक्तिंपरांपरमहंसगतौलभेत २८ इतिश्रीभागवतेमहापुराणेपारमहंस्यांसंहितायामेकादशस्कंधेमौसलंनामएकत्रिंशत्तमोध्यायः ॥ ३१ ॥ ॥ एकादशस्कंधःसमाप्तः ॥ ॥ ॥ ६ ॥ ॥ ॥ ६ ॥

पिवक्तुमनलंशाखेंदुवल्लक्षितंब्रह्माद्याःकिमुतावलंबविधुरानिर्दोषचित्ताअपि ॥ अप्येवंजलवेगवन्मतिगतेरेषांसदैकंपदंतद्ब्रह्माख्यमखंडबुद्धिहृदयावासंप्रवंदेपरम् ॥ १ ॥ एकादशस्कंधगतापदरत्नावलि स्त्वियम् ॥ अधिग्रीवंमुकुंदस्यवनमालेवराजताम् ॥ इतिश्रीमन्महेंद्रतीर्थपूज्यपादशिष्यविजयध्वजतीर्थभट्टारकस्यकृतौश्रीमद्भागवतटीकायांपदरत्नावल्यामेकादशस्कंधेएकत्रिंशोध्यायः ॥ ३१ ॥

॥ इति श्रीमद्भागवते एकादशः स्कंधः समाप्तः ॥

॥ अथ श्रीमद्भागवते द्वादशः स्कंधः प्रारभ्यते ॥

श्रीवेदव्यासायनमः ॥ पद्मवासालयंनत्वापद्मभूपूर्वस्वर्गीडयं ॥ द्वादशस्कंधंव्याकुर्वेद्वादशात्मप्रीत्यैनित्यम् ॥ २ ॥ श्रीनारायणकृप्राशिष्टवंशादिकथनेनतन्माहात्म्यमेवकथयत्यस्मिन्स्कंधे तत्रप्रथमेध्या येवंशशेषंकथयति यइति अंत्यःवंशावसानभवः कस्यवंशांतभवइत्यतउक्तं बार्हद्रथइति स्वामिनंरिपुंजयमात्मजंस्वस्येतिशेषः १ यद्यस्यप्रद्योतस्यसुतःपालकोनाम यत्तादित्यस्याव्ययत्वात्षष्ठी यद्वा यःपालकोयस्ययत्पालकःसतस्यसुतइति २ प्रद्योतनेनसाकंपंच तेषांराज्यावधिकालमाह अष्टेति भोक्ष्यंति पालयंति भुजोनवनइत्यतःपरस्मैपदंपूर्ववंशवैलक्षण्यद्योतनार्थोवाव्यत्यासः ३ ४ ५ ६ महानंदिविशिनष्टि महानंदिरिति ७ महानंदिवंशभवःकइति कश्चिदिति महापद्मसंरुरुयासंरुयातासेनामहापद्मातस्याःपतिः कुलक्षत्रविनाशकृत्ततःकुलक्षत्राभावात् ८

श्रीवेदव्यासायनमः॥ श्रीशुकउवाच ॥ योंत्योरिपुंजयोनामभविष्योथबार्हद्रथः ॥ तस्यामात्यस्तुशुनिकोहत्वास्वामिनमात्मजम् १ प्रद्योतसंज्ञंराजानंक र्तायत्पालकःसुतः ॥ विशाखयूपस्तत्पुत्रोभविताचाजकस्ततः २ नंदिवर्धनस्तत्पुत्रःपंचप्रद्योतनाइमे ॥ अष्टत्रिंशोत्तरशतंभोक्ष्यंतिपृथिवीमिमाम् ३ शिशुनागस्ततोभाव्यःकाकवर्णस्तुतत्सुतः ॥ क्षेमधर्मातस्यसुतःक्षेत्रज्ञःक्षेमधर्मजः ४ विधिसारःसुतस्तस्याजातशत्रुर्भविष्यति ॥ दर्भकस्तत्सुतोभा व्योदर्भकस्याजयस्ततः ५ नंदिवर्धनआजेयोमहानंदिश्चतत्सुतः ॥ शैशुनागादशैतेवैषष्टयुत्तरशतत्रयम् ६ समाभोक्ष्यंतिपृथिवींकुरुश्रेष्ठकलौनृपाः ॥ महानंदिसुतोराजन्शूद्रीगर्भोद्भवोबली ७ महापद्मापतिःकश्चित्कुलक्षत्रविनाशकृत् ॥ ततोनृपाभविष्यंतिशूद्रप्रायाअधार्मिकाः ८ सएकच्छत्रांपृथिवी मनुल्लंघितशासनः ॥ शासिष्यतिमहापद्मोद्वितीयइवभार्गवः ९ तस्यचाष्टौभविष्यंतिसुमालिप्रमुखाःसुताः ॥ यइमांपृथिवींराजन्भोक्ष्यंतिस्मशतं समाः १० नवनंदान्द्विजःकश्चित्प्रपन्नानुद्धरिष्यति ॥ तेषामभावेजगतींमौर्याभोक्ष्यंतिवैकलौ ११ सएवइंद्रगुप्तोवैद्विजोराज्येभिषेक्ष्यति ॥ तत्सुतो वारिराजस्तुततश्चाशोकवर्धनः १२ सुयशाभवितायस्यसंगतःसुयशःसुतः ॥ शालिशूकस्ततस्तस्यसोमशर्माभविष्यति १३ शतधन्वाततस्तस्यभ वितातुबृहद्रथः ॥ मौर्याह्येतेनवनृपाःसप्तत्रिंशच्छतोत्तरम् १४ समाभोक्ष्यंतिपृथिवींकलौकुरुकुलोद्वह ॥ हत्वाबृहद्रथंमौर्यंतस्यसेनापतिःकलौ १५ पु ष्यमित्रस्तुशुंगाह्वःस्वयंराज्यंकरिष्यति ॥ अग्निमित्रस्ततस्तस्मात्सुधेष्टोभवितातः १६ वसुमित्रोभद्रकश्चपुलिंदोभवितातः ॥ ततोघोषःसुतस्त स्माद्वज्रमित्रोभविष्यति १७ ततोभागवतस्तस्माद्देवभूतिःकुरूद्वह ॥ शुंगादशैतेभोक्ष्यंतिभूमिंवर्षशताधिकम् १८ ततःकण्वानियंभूमिर्यास्यत्यल्प गुणानृपान् ॥ शुंगंहत्वादेवभूतिंकण्वोमात्यस्तुकामिनम् १९

समहापद्मोनाम्नानंदः ९ १० नंदेनसहनवसंख्यान्नंदान्नंदवंशजानुद्धरिष्यत्यापदइतिशेषः मौर्यामुरवंशजाःहीनजातयःकैवर्ताः ११ कथंभोक्ष्यंतीत्यतआह सएवेति सएवनवनंदाचार्यः १२ १३ मौर्यसंज्ञाअपिमौर्याः १४ वंशव्यत्यासंकथयति हत्वेति १५ पुष्यमित्रइत्यादिजातिप्रयुक्तनाम शुंगइत्यादिविशेषनाम १६ १७ शुंगाःशुंगवंशजाः १८ कण्वाः कण्ववंशजाः तान्नृपा न्यास्यति अल्पगुणाओषध्यादिगुणसंपत्तिरहिता कथंकण्वान्यास्यतीत्यतआह शुंगमिति शुंगंशुंगाख्यंराजानंदेवभूतिंहत्वा नाम्नावसुदेवःकण्वः तस्यशुंगस्यामात्यःकामिनंग्राम्यकर्मासक्तम् १९

कण्वायनाःकण्ववंशभवाः कण्वानांचतुर्थःसुशर्माइमेचवसुदेवादयःकाण्वायनाःवर्षाणांत्रीणिशतानिपचचत्वारिंशद्वर्षाणिचभूमिंभोक्ष्यंति तस्य सुशर्मणोभृत्यः २० २१ २२ तस्यवृषलस्यभ्राता २३ २४ हालेयःहलान्मेयः २५ २६ २७ २८ २९ ३० एतेआभीरादयोमौनव्यतिरिक्ताःपंचषष्टिनृपाएकोनशताधिकंवर्षसहस्रंपृथिवींभोक्ष्यंति ततःपूर्वोक्ताएवैकादशमौनाः त्रीण्यब्दशता निक्षितिंभोक्ष्यंतिमौनाःमौनकुलेजाताःएकादशत्रीणिअब्दशतानि ३१ कुलेमौनकुलेसंस्थितेनष्टेकिलिकिलायांनगर्यांतस्यशिशुनंदेर्भ्रातामूतवंशोपवंगरैर्युक्ताःषट्षट्वर्षाण्यधिकानि ३२ ३३ वा

स्वयंकरिष्यतेराज्यंवसुदेवोमहामतिः ॥ तस्यपुत्रस्तुभूमित्रस्ततोनाराणःसुतः २० सुशर्माख्योथनृपतिःकण्वानांभवितातः ॥ काण्वायनाइमेभू मिंचत्वारिंशच्चपंचच २१ शतानित्रीणिभोक्ष्यंतिवर्षाणांचकलौयुगे ॥ हत्वाकण्वंसुशर्माणंतद्भृत्योवृषलोबली २२ गांभोक्ष्यत्यधंजातीयःकंचित्काल मसत्तमः ॥ कृष्णनामाचतद्भ्रातामवितापृथिवीपतिः २३ श्रीशांतकर्णस्तत्पुत्रःपौर्णमासस्तुतत्सुतः ॥ लंबोदरस्तुतत्पुत्रस्तस्माच्छिबिलकोनृप २४ मे घस्वनःशिबिलकादटमानस्तुतस्यच ॥ अनिष्टकर्माहालेयस्तलकस्तस्यचात्मजः २५ पुरीषसेरुस्तत्पुत्रस्ततोराजासुनंदनः ॥ चकोरोदृढकोयस्यशि वस्वातिरारिंदमः २६ तस्यापिगोमतीपुत्रःपरीमान्भवितातः ॥ शिवशिराःशिवस्कंदोयज्ञश्रीस्तत्सुतस्ततः २७ विजयस्तत्सुतोभाव्यश्चंद्रबीजः सुलोमधीः ॥ एतेत्रिंशन्नृपतयश्चत्वार्यष्टशतानिच २८ षट्पंचाशच्चपृथिवींभोक्ष्यंतिकुरुनंदन ॥ सप्ताभीराआंध्रभृत्यादशगर्दभिनोनृपाः ॥ कंकाः षोडशभूपालाभविष्यंत्यतिलोलुपाः २९ ततोष्टौयवनाभाव्याश्चतुर्दशतुरुष्कराः ॥ भूयोदशपुरुंडाश्चमौनाएकादशैवतु ३० एतेभोक्ष्यंतिपृथिवींदशव र्षशतानिच ॥ नवाधिकांचनवतिंमौनाएकादशाक्षितिम् ३१ भोक्ष्यंत्यब्दशतान्यंगत्रीणिवैसंस्थितेकुले ॥ किलिकिलायांनृपतयोभूतवंशोपवंगरैः ३२ शिशुनंदिश्चतद्भ्रातायशोनंदिःप्रवीरकः ॥ युक्ताएतेवर्षशतंभविष्यंत्यधिकानिषट् ३३ तेषांत्रयोदशसुताभवितारोथबाह्लिकाः ॥ पुष्पमित्रोथराजन्यो दुर्मित्रोस्यतथैवच ३४ एककालाइमेभूपाःसप्तांध्राःसप्तकोसलाः ॥ वैदूरपतयोभाव्यानैषधास्तत एवहि ३५ नैषधानांतुभविताविश्वस्फूर्जिःपुरंजयः ॥ करिष्यत्यवरान्वर्णान्पुलिंदयदुमद्रकान् ३६ प्रजाश्चब्रह्मभूयिष्ठाःस्थापयिष्यतिदुर्मतिः ॥ वीर्यवान्क्षत्रमुत्साद्यपद्मवत्यांसवैपुरि ३७ अनुगंगमाप्रया गंगुप्तांभोक्ष्यतिमेदिनीम् ॥ सौराष्ट्रावंत्याभीराश्चशूद्राश्चार्बुदमालवाः ३८

ह्लीकाःबाह्लीकदेशपतयः ३४ तथाआंध्राअंध्रदेशपतयःकोसलाःकोसलविषयपतयः । वैदूरयःवैदूराख्यनगरपतयोनिषधाश्च एतेतत्तद्देशनामभिःप्रख्याताःतुल्यकालाःअखंडमंडलेषुभूपाःततएवते भ्योबाह्लीकेभ्यएवभाव्याभविष्यंति ३५ ततश्चनैषधानांविषयाणांराजापुरंजयःशत्रूणामितिशेषः सपुलिंदयदुमद्रकानवरान्नीचान्वर्णान्करिष्यति किंबहुनासर्वाःप्रजाश्चापिविवक्षिताः ३६ ब्रह्मभूयि ष्ठाःबहुलवेदाविदः स्थापयिष्यतिस्थिरीकरिष्यति ३७ अनुगंगंगंगासमीपे आप्रयागंप्रयागाख्यक्षेत्रपर्यंतं दीर्घांमेदिनींपद्मवत्यांपुरिस्थितिंकृत्वाआप्रयागंगुप्तांपालितांतदनंतरंसौराष्ट्राश्चआवंत्या श्चआभीराश्चशूद्राश्चअर्बुदाश्चमालवाश्च ३८

व्रात्याःसंस्कारहीनाःद्विजाःशूद्रप्रायाःजनाधिपतयोभविष्यंति ३९ ४० किंचएतेसर्वेअधर्मानृतपराःअधर्मेअनृतेचपरिनिष्ठिताःफल्गुदाःअल्पदातारः ४१ उदितास्तमितप्रायाबहुलंसूर्योदयमस्त गतमेवजानंतिनापरंअल्पकालावस्थायिनोवा असंस्कृताःगर्भाधानादिसंस्कारहीनाः ४२ प्रजाभक्षयिष्यंतिधनाद्यपहारादिनापीडयिष्यंति किंच एवंविधायेतएवनाथायेषांतेतन्नाथाजनपदादेशवर्तिनो मनुष्याःतच्छीलाचारवादिनःतेषांशीलंआचारश्चवादश्चतद्वंतः ४३ ४४ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेविजयध्वजकृतटीकायांप्रथमोध्यायः ॥ १ ॥ कल्क्यवतारंतच्चरितंचयुगविभागलक्षणं चवक्तव्यस्मिन्नध्याये तत्रादौकलिवैभवमाह ततश्चेति कालक्षयानंतरंधर्मादयोनंक्ष्यंतीत्यन्वयः कारकाभावादितिशेषः १ यदिकलौनृणांवित्तमस्तितर्ह्येवतेषांजन्मादयःपूज्याःस्युरितिशेषः अयंधर्मोयं न्यायइतिव्यवस्थायांबलमेवकारणं धनमितिवापाठः २ अभिरुचिरन्योन्यस्नेहलक्षणेच्छाहेतुःनकुलगोत्रादिशास्त्रीययोगः व्यावहारिकेक्रयविक्रयादिव्यवहारविषयेमायैवहेतुः अतिरतिःअतितरांम

व्रात्याद्विजाभविष्यंतिशूद्रप्रायाजनाधिपाः ॥ सिंधोस्तटंचंद्रभागांकांचींकाश्मीरमंडलम् ३९ भोक्ष्यंतिशूद्राव्रात्याश्चम्लेच्छाअब्रह्मवर्चसः ॥ तुल्यकालाइमेराजन्म्लेच्छप्रायाश्चभूभृतः ४० एतेधर्मानृतपराःफल्गुदास्तीव्रमन्यवः ॥ स्त्रीबालगोद्विजघ्नाश्चपरदारधनादृताः ४१ उदितास्तमितप्रायाअल्पसत्त्वाल्पकायुषः ॥ असंस्कृताःक्रियाहीनारजसातमसावृताः ४२ प्रजास्तेभक्षयिष्यंतिम्लेच्छाराजन्यरूपिणः ॥ तन्नाथास्तेजनपदास्तच्छीलाचारवादिनः ४३ अन्योन्यतोराजभिश्चक्षयंयास्यंतिपीडिताः ४४ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेप्रथमोऽध्यायः ॥ १ ॥ श्रीशुकउवाच ॥ ततश्चानुदिनंधर्मःसत्यंशौचंक्षमादया ॥ कालेनबलिनाराजन्क्षीयत्यायुर्बलंस्मृतिः १ वित्तमेवकलौनृणांजन्माचारगुणोदयाः ॥ धर्मन्यायव्यवस्थायांकारणंबलमेवहि २ दांपत्येऽभिरुचिर्हेतुर्मायैवव्यवहारिके ॥ स्त्रीत्वेपुंस्त्वेचातिरतिर्विप्रत्वेसूत्रमेवहि ३ लिंगमेवाश्रमख्यातावन्योन्यापत्तिकारणम् ॥ अवृत्त्यन्यायदौर्बल्ये पांडित्येचापलंवचः ४ अनाढ्यतैवासाधुत्वेसाधुत्वेदंभएवतु ॥ स्वीकारएवचोद्वाहेस्नानमेवप्रसाधनम् ५ दूरेवार्यटनंतीर्थंलावण्येकेशधारणम् ॥ उदरंभरतास्वार्थःसत्यत्वेधार्ष्ट्यमेवहि ६ दाक्ष्यंकुटुंबभरणेयशोऽर्थेधर्मसेवनम् ॥ एवंप्रजाभिर्दुष्टाभिराकीर्णेक्षितिमंडले ७ ब्रह्मविट्क्षत्रशूद्राणांयोबलीभवितानृपः ॥ प्रजाहिलुब्धैराजन्यैर्निर्घृणैर्दस्युधर्मभिः ८

नोदर्शनीयताविशेषःसूत्रंतंतुलक्षणम् ३ आश्रमाणांख्यातौज्ञानेब्रह्मचर्याद्याश्रमइतिवक्तव्येअन्योन्यापत्तिकारणंआश्रमादाश्रमांतरप्राप्तिकारणंलिंगमुपाध्यायादिलक्षणंलांछनं अन्यायदौर्बल्ये अन्यायाकरणेअवृत्तिवृत्तिराहित्यंवृत्त्यभावएवहेतुः कृतोन्यायोन्यायइत्यर्थःअचापलंअचंचलतालक्षणंवचःकारणमित्यनुवर्तते ४ अनाढ्यतादरिद्रत्वं असाधुत्वेदुष्टत्वे त्वंममजायाइतिस्वीकारःहेतुःप्रसाधनंशरीरस्यशुद्धिरलंकारोवा ५ दूरेवार्यटनंदूरतरजलयात्रायत्रक्रियतेतत्तीर्थं नतुगुर्वादि केशधारणंधंमिल्लधारणंउदरंभरतास्वोदरपूर्णता स्वार्थःस्वप्रयोजनं ६ ७ ब्रह्मब्राह्मणःदस्यूनांधर्माणिचौर्यादीनियेषांतेतथातैः ८

आच्छिन्नदारद्रविणाःबलादाकृष्टभार्याविताः क्षौद्रंमधु । मधुमद्यंमधुक्षौद्रंमधुपुष्परसंविदुरित्यभिधानं । शाकादिभोजनंयेषांतेतथा ९ दुर्भिक्षकरनिमित्तपीडिताः हिमंनीहारः १० तृषयातृष्णयाव्याधिभिःकुष्ठादिभिः ११ १२ चौर्यादिवर्धनानावृत्तयोयेषांतेतथा १३ छागअत्रतुगभावोलिंगव्यत्यासं प्रति गृहयोनाएववंधुत्वंयोनिसंबंधमात्रं १४ अणुप्रायेषुकक्षमाषप्रचुरासु जनशून्यप्रायेषु १५ १६ विष्णोर्जन्मकर्मचसाधूनांधर्मत्राणायदुष्कर्मापनुत्तयेचस्यादितिशेषः १७ शंबलग्रामेमुख्यस्यप्रधानस्यनाम्नाविष्णुयशसःब्राह्मणस्यभवनेगृहे १८ आशुगंशीघ्रगामिनं १९ नृपलिंगच्छदःराजलक्षणच्छन्नान् २० वासुदेवस्यांगरागस्यवंदनाद्यनुलेपनस्यप्रशस्तपुण्यगंधेनयुक्तंवायुंस्पृशंतीतिवासुदेवांगरागातिपुण्यगंधानिलस्पृशःतेषां २१ प्रजाविसर्गःसंततीनामुत्पात्तिःस्थविष्ठःबहुलः २२ प्रजासूतिःसंतानोत्पत्तिः २३ कृतप्रारंभलक्षणांतरमाह यदेति तिष्यःपुष्यःचंद्रसूर्यबृहस्पतीनांपदापुष्यनक्षत्रयोगःतदाकृतयुगंभविष्यति यद्यपिप्रतिद्वादशाब्देर्कराशौबृहस्पतौवर्तमानेद्वित्रास्वभावा

आच्छिन्नदारद्रविणायास्यंतिगिरिकाननम् ॥ शाकमूलामिषक्षौद्रफलपुष्पादिभोजनाः ९ अनावृष्ट्याविनंक्ष्यंतिदुर्भिक्षकरपीडिताः ॥ शीतवातातपः प्रावृड्हिमैरन्योन्यतःप्रजाः १० क्षुत्तृषाव्याधिभिश्चैवसंतप्स्यंतेचचिंतया ॥ त्रिंशद्विंशतिवर्षाणिपरमायुःकलौनृणाम् ११ क्षीयमाणेषुदेहेषुदेहिनां कलिदोषतः ॥ वर्णाश्रमवतांधर्मेनष्टेवेदपथेनृणाम् १२ पाखंडप्रचुरेधर्मेदस्युप्रायेषुराजसु ॥ चौर्यानृततथाहिंसानानावृत्तिषुनृषु १३ शूद्रप्रायेषुवर्णेषुछागप्रायासुधेनुषु ॥ गृहप्रायेष्वाश्रमेषुयोनिप्रायेषुबंधुषु १४ अणुप्रायेष्वौषधीषुशमिप्रायेषुस्थास्नुषु ॥ विद्युत्प्रायेषुमेघेषुशून्यप्रायेषुसद्मसु १५ इत्थंकलौगतप्रायेजनेषुपरधर्मसु ॥ धर्मत्राणायसत्वेनभगवानवतरिष्यति १६ चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः ॥ धर्मत्राणायसाधूनांजन्म कर्मापनुत्तये १७ शंबलग्राममुख्यस्यब्राह्मणस्यमहात्मनः ॥ भवनेविष्णुयशसःकल्किःप्रादुर्भविष्यति १८ अश्वमाशुगमारुह्यदेवदत्तंजगत्पतिः ॥ असिनासाधुदमनमष्टैश्वर्यगुणान्वितः १९ विचरन्नसिमान्क्षोण्यांहयेनाप्रतिमद्युतिः ॥ नृपलिंगच्छदोदस्यून्कोटिशोनिहनिष्यति २० अथतेषांभविष्यंतिमनांसिविशदानिवै ॥ वासुदेवांगरागातिपुण्यगंधानिलस्पृशाम् २१ पौरजानपदानांवैहतेष्वखिलदस्युषु ॥ तेषांप्रजाविसर्गश्चस्थविष्ठःसंभविष्यति २२ वासुदेवेभगवतिसत्वमूर्तौहृदिस्थिते ॥ यदावतीर्णोभगवान्कल्किर्धर्मपतिर्हरिः ॥ कृतंभविष्यतितदाप्रजासूतिश्चसात्त्विकी २३ यदाचंद्रश्चसूर्यश्चतथातिष्येबृहस्पतिः ॥ एकराशौसमेष्यंतितदाभवतितत्कृतम् २४ येतीतावर्तमानायेयेभविष्यंतिपार्थिवाः ॥ तेतउद्देशतःप्रोक्तावंशजाःसूर्यसोमयोः २५ आरभ्यभवतोजन्मयावन्नंदाभिषेचनम् ॥ एतद्वर्षसहस्रंतुशतंपंचदशोत्तरम् २६

स्यासुतेषांत्रयाणामपिपुष्येयोगःसंभवतितथापितेषांसहप्रयोगोत्रविरक्षितःसमेष्यंतीतिवचनात् २४ एवंनवमस्कंधमारभ्यानुक्रांतंवैवस्वतमनोर्वंशद्वयमुपसंहरति येतीताइति उद्देशतःसंक्षेपतः २५ कलियुगावांतरविशेषमाह आरभ्येति वर्षसहस्रंपंचदशोत्तरशतंचेतिकयापिविवक्षयावांतरसंख्येयं वस्तुतःपरीक्षिन्नंदयोरंतरंद्वाभ्यामनंतवर्षाणांसाधसहस्रंभवति यतःपरीक्षित्समकालंमागधमार्जारिमारभ्यरिपुंजयांताविंशतिराजानःसहस्रवत्सरंभोक्ष्यंतीत्युक्तंनवमस्कंधे येवार्हद्रथभूपालाभाव्याःसहस्रवत्सरमिति ततःपरंचप्रद्योतनाअष्टत्रिंशच्छतं शिशुनागाश्चषट्युत्तरशतत्रयंभोक्ष्यंतिपृथिवीमित्यत्रैवोक्तम् २६

कलेःप्रवृत्तिर्वृद्धिर्वनिरूपयितुंकालज्ञानोपलक्षणमाह सप्तर्षीणामिति अयमर्थः प्रागग्रशकटाकारं तारासप्तकंसप्तर्षिमंडलं तत्रैकचिदुन्नतरेखायाअग्रस्थानीयोमरीचिः ततःपश्चादानम्रयुगंधराकरोवसिष्ठःसभार्यःततःपश्चादीषदुन्नतस्तेषांमूलस्थानीयोंगिराः ततःपश्चाच्चतुरस्रताराचतुष्केईशान्येत्रिः ततोदक्षिणतःपुलस्त्यःपुलस्त्यात्पश्चिमतःपुलहःततउत्तरतःक्रतुःएवंस्थितेतेषांमध्येयौपूर्वौउदयसमयेप्रथममुदितौपुलहक्रतुसंज्ञौतयोस्तुमध्येतयोःपूर्वयोश्चमध्येयत्समंदक्षिणतःसमदेशावस्थितमश्विन्यादिषुयदन्यतमंनक्षत्रंदृश्यते २७ यत्तेनतथैवयुक्ताःनृणामब्दशतंतिष्ठंति तेचद्विजास्त्वदीयेकालेअधुनामघांआश्रितावर्तते २८ तेपुऋषिषुमघासुवर्तमानेषुसत्सु २९ पराक्रांतुंस्वसामर्थ्यंदर्शयितुम् ३० कियंतंकालंविरणमित्यतउक्तं द्वादशेति ३१ अस्तुकलेःपरंकंचित्कालंहित्वापश्चाद्वृत्तिःसाकदेतित्राह यदेति ३२ कृष्णस्वर्गारोहणानंतरंकंचित्कालंहित्वापश्चादाविष्टःकिंकलिरुततस्मिन्नेवाहनीति संदेहंव्यवच्छिनत्ति यस्मिन्निति ३३ ततःकियान्कालःकृतमारं

सप्तर्षीणांतुयौपूर्वौदृश्येतेउदितौदिवि ॥ तयोस्तुमध्येनक्षत्रंदृश्यतेयत्समंनिशि २७ तेनैतेऋषयोयुक्तास्तिष्ठंत्यब्दशतंनृणाम् ॥ तेत्वदीयेद्विजाःकालेअधुनाचाश्रितामघाम् २८ विष्णुस्तुभगवान्भानुःकृष्णाख्योसौदिवंगतः ॥ तदाविशत्कलिर्लोकंपापेयद्रमतेजनः २९ यावत्सपादपद्माभ्यांस्पृशन्नास्तेरमापतिः ॥ तावत्कलिर्वैपृथिवींपराक्रांतुंनचाशकत् ३० यदादेवर्षयःसप्तमघासुविचरंतिहि ॥ तदाप्रवृत्तस्तुकलिर्द्वादशाब्दशतात्मकः ३१ यदामघाभ्योयास्यंतिपूर्वाषाढांमहर्षयः ॥ तदानंदात्प्रभृत्येषःकलिर्वृद्धिंगमिष्यति ३२ यस्मिन्कृष्णोदिवंयातस्तस्मिन्नेवतदाहनि ॥ प्रतिपन्नंकलियुगमितिप्राहुःपुराविदः ३३ दिव्याब्दानासहस्रेतुप्रतियातेपुनःकृतम् ॥ भविष्यतियदानृणांमनआत्मप्रकाशकम् ३४ इत्येषमानवोवंशोयथासंख्याय तेभुवि ॥ तथाविट्शूद्रविप्राणांवंशाज्ञेयायुगेयुगे ३५ एतेषांनामलिंगानांपुरुषाणांमहात्मनाम् ॥ कथामात्रावशिष्टानांकीर्तिरेवस्थिताभुवि ३६ देवापिःशंतनोर्भ्रातामरुश्चेक्ष्वाकुवंशजः ॥ कलापग्रामआसातेमहायोगबलान्वितौ ३७ तावितैत्यकलेरंतेवासुदेवानुशिक्षितौ ॥ वर्णाश्रमयुतंधर्मं पूर्ववत्प्रथयिष्यतः ३८ कृतंत्रेताद्वापरंचकलिश्चेतिचतुर्युगम् ॥ अनेनक्रमयोगेनभुविप्राणिषुवर्तते ३९ राजन्नेतेमयाप्रोक्तानरदेवास्तथापरे ॥ भूमौमम त्वंकृत्वांतेहित्वेमांनिधनंगताः ४० कृमिविड्भस्मसंज्ञांतेराजनाम्नोपियस्यच ॥ भूतध्रुक्मनुतेस्वार्थंकिंवेदनिरयोयतः ४१ कथंसेयमखंडाभूःपूर्वैर्मत्पुरुषैर्धृता ॥ मत्पुत्रस्यचपौत्रस्यमत्पूर्ववंशजस्यच ४२

भाषेतितत्राह दिव्येति यदायस्मिन्कृतयुगेआत्मप्रकाशकंपरमात्मप्रकाशकंभवतीतिशेषः ३४ इतिशब्दःसमाप्तिपर्यंतंकथितः एषमानवोवंशःवैवस्वतमनुसंबंधीभुवियथासंख्यायतेतथाविट्शूद्रविप्राणांवंशाअपियुगेयुगेज्ञेयाबोद्धव्याइत्यतिदेशोयम् ३५ एतेषांसत्त्वेकिंज्ञापकमत्राह एतेषामिति नामलिंगयुक्तानांअनेनैतिह्यंप्रमाणमुक्तंभवति ३६ कृतेधर्मप्रतिष्ठापकःकइतितत्राह देवापिरितिमहायोगबलान्वितौमहाज्ञानबलयुक्तौअणिमाद्यैश्वर्ययुक्तौवा ३७ ३८ कतियुगानीत्यत्राह कृतमिति ३९ एषामज्ञानमाह राजन्निति ४० राजन्नाम्नापियस्यशरीरस्यांतेनाशेकृमिविड्भस्मसंज्ञातादृशंशरीरंप्राप्यभूतध्रुक्स्वार्थमनुतेनपरप्रयोजनंयतोभूतद्रोहान्निरयोभवतितंवेदकिंन्नवेदैव यस्यपुरुषशरीरस्यांतइतिवा ४१ स्वार्थमननप्रकारमाह कथमिति भवंत्यस्यांसत्त्वानीतिभूःदेयंमत्पूर्वैःपुरुषैःधृतासेयंभूर्ममासंडाराजांतरानधिकृताकथंस्यान्मत्पुत्रस्यमत्पौत्रस्यचमद्वंशजस्य अहंपूर्वोयस्यांसामत्पूर्वाचकथंस्यादितिमत्वा ४२

तेजोबन्नमयंकायमात्मतयानित्यत्वेनमुधागृहीत्वाअमीराजानोममत्वेनगृहीत्वाउभौमहींचदेहंच हित्वाअदर्शनंमरणंगताभवंतीत्यन्वयः ४३ सांप्रतंतेष्वेकोपिनास्तीत्याशयेनाह यइति पुराणा दिगतकथासुकथामात्राःसर्वात्मनाकथैवयेषांतेतथाकृताःस्वरूपतोनसंतीतिशेषः ४४ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेविजयध्वजकृतटीकायांद्वितीयोध्यायः ॥ २ ॥ चतुर्युगधर्मविभागःकलिदो षपरिहारश्चेत्येतदस्मिन्नध्यायेभिधीयतेतत्रादौराज्ञांमौढ्यदर्शनेनभूमेःपरिहासप्रकारमाह दृष्ट्वेति आत्मनोनितरांजयेव्यग्रांस्तदेकरायगान् १ मौढ्यत्वमुपपादयति येनेति २ कीदृशस्तेषांका मइतितत्राह पूर्वमिति षड्वर्गसंख्यादिलक्षणं निर्जयोनामोत्कर्षःपंडिद्रियविषयंवाअनेनभूम्येकसाधनाग्रहंसूचयति राजमंत्रिणःराजाचमंत्रिणश्चराजमंत्रिणः मंत्रीबुद्धिसहायःस्यादिति ततोमं त्रिजयानंतरंसचिवःकर्मसहायः अमात्याःकर्मसचिवाइत्यमरः आप्ताःविश्वस्ताः । अथपश्चात्कंटकान्क्षुद्रशत्रून् ३ एवंक्रमेणराज्ञोजित्वापृथिवींजेष्यामःवशीकरिष्यामःइत्याशयातितृष्णया अंतकंमृ त्युम् ४ एवंकेचित्पुनःमांजित्वाप्यतितृष्णयाब्धिंविशंतीत्यनेनद्वितीयादिजयाद्यंसूचयति भूजयादिनाकिमपिप्रयोजनमपित्वंततोनर्थएवावशिष्यतेमनोजयफलापेक्षयेत्याह ·कियदितिआ

तेजोबन्नमयंकायंगृहीत्वात्मतयामुधा ॥ महींममतयाचोभौहित्वांतेदर्शनंगताः ४३ येयेभूपतयोराजन्भुंजतेभुवमोजसा ॥ कालेनतेकृताःसर्वेकथामात्राः कथासुवै ४४ इतिश्रीभागवतेम०द्वादशस्कंधेद्वितीयोध्यायः ॥ २ ॥ ॥ छ ॥ श्रीशुकउवाच ॥ दृष्ट्वात्मनिजयव्यग्राञ्नृपान्हसतिभूरियम् ॥ अहोमांवि जिगीषंतिमृत्योःक्रीडनकानृपाः १ कामएषनरेंद्राणांमोघःस्याद्विदुषामपि ॥ येनफेनोपमेपिंडेयेनविस्रंभितानृपाः २ पूर्वंनिर्जित्यषड्वर्गंजेष्यामोराजमं त्रिणः ॥ ततःसचिवपौराप्तकरींद्रानथकंटकान् ३ एवंक्रमेणजेष्यामःपृथ्वींसागरमेखलाम् ॥ इत्याशाबद्धहृदयानपश्यंत्यंतिकंतकम् ४ समुद्रावरणंजि त्वामांविशंत्यब्धिमोजसा ॥ कियदात्मजयस्यैतन्मुक्तिरात्मजयेफलम् ५ यांविसृज्यैवमनवस्तत्सुताश्चकुरुद्वह ॥ गतायथागतंयुद्धेतांमांजेष्यंत्यबुद्धयः ६ मत्कृतेपितृपुत्राणांभ्रातृणांचापिविग्रहः ॥ जायतेह्यसतांराज्येममताबद्धचेतसाम् ७ ममैवेयंमहीकृत्स्नाननेमूढेतिवादिनः ॥ स्पर्धमानामिथोध्नंति म्रियंतेमत्कृतेनृपाः ८ पृथुःपुरूरवागाधिर्भरतोनहुषोर्जुनः ॥ मांधातासगरोरामःखट्वांगोधुंधुहारघुः ९ तृणबिंदुर्ययातिश्चशर्यातिःशंतनुर्गयः ॥ भगी रथःकुवलयाश्वःककुत्स्थोनैषधोनृपः १० हिरण्यकशिपुर्वृत्रोरावणोलोकरावणः ॥ नमुचिःशंबरोभौमोहिरण्याक्षोथतारकः ११ अन्येचबहवोदैत्याराजा नोयेप्रजेश्वराः ॥ सर्वेसर्वविदःशूराःसर्वेसर्वजितोजिताः १२ ममतांमय्यमर्त्यायांकृत्वोच्चैर्मर्त्यधर्मिणः ॥ कथावशेषाःकालेनह्यकृतार्थाःकृताअहो १३

त्मजयस्यमनोजयस्यफलापेक्षयैतद्भूजयादिकंकियत्फलं आत्मजयेकिंफलंयेनायमेवसाध्यःस्यादितितत्राह मुक्तिरिति आत्मजयेमुक्तिरेवफलंयस्मात्तस्मादितिशेषः ५ इतोपिमज्जयकामा अज्ञाएवेत्याह यामिति मनवस्तत्सुताश्चयांमांविसृज्ययथागतायाताःअबुद्धयःतांमांजेष्यंतीत्यन्वयःआत्मजयवतांत्यागशक्तिरन्येषामन्यथेतिसूचयति ६ नकेवलमितरेषांमत्कृतेविग्रहोपितुशरीर संबंधिनामपिस्यादित्याह मत्कृतइति अपिशब्दःपुत्रादीनामित्यनेनसंबंधयितव्यः अयमपिप्रायिकइत्याह असतामिति असतामप्रशस्तकर्मणां ७ किंप्रकारोविग्रहइतितत्राह ममेति ८ तत्रकांश्चिन्नृपान्निर्दिशति पृथुरित्यादिना ९ १० ११ १२ एतेमर्त्यशरीरधर्मिणः सर्वेप्यमर्त्यायांनित्यायांमयिविषयेममतांकृत्वाअकृतार्थाःअसाधितपुरुषार्थाःकालेनबलिनाकथावशे षाःकृताहियस्मात्तस्मादमीषांअज्ञानमहो अतआत्मजयेनभाव्यमित्यर्थः १३

निगमयति कथाइतिलोकेषुयशोवितायविस्तृत्यपरेयुषांलोकंप्राप्तानांमहीयसांमन्वादीनांउत्तमानांपुरुषाणामिमाःकथास्तेकथितामयेतिशेषः किमर्थंकथिताइतितत्राह विज्ञानेति वचोविभूतिः वचसांविभूतयोविविधभवनविषयावा विज्ञानवैराग्यविवक्षयायोग्यस्यपुंसोविज्ञानंवैराग्येस्यातामित्यभिप्रेत्यविवृताः नतुपारमार्थ्यंपरमार्थउत्तमार्थोवेदमुख्यार्थोभगवांस्तत्संबंधविवक्षयानैवतस्याविधिनिषेधाविषयत्वात्विज्ञानविवक्षयाअपिमदुक्तएवग्राह्योनान्योक्तइत्याह वचोविभूतीरिति अन्यवाचोविभूतयोवचसांबहुत्वान्नपारमार्थ्यमुत्तमपुरुषार्थसाधनज्ञानमुद्दिश्यनभवंतीत्यर्थः वाचोविग्लापनंहितादितिश्रुतेः १४ कुतइतरावाचोविभूतयःपुरुषार्थोपयोगिन्योनस्युरित्यतआह यत्रेति यत्रयस्यांवाचिउत्तमश्लोकगुणानुवादःसंगीयतेपुरुषस्तामेववाचंशृणुतात्शृणोत्वित्यर्थः श्रीहरिभक्त्युत्पादकत्वादितरावाचोहेयाइत्यर्थः अन्यावाचोविमुंचथेतिश्रुतेः १५ ज्ञातकलिदोषपरिहारोपिराजालोकोपकारायपृच्छति केनेति कलेरुत्पन्नान्दोषान्विधमिष्यंतिपरिहरिष्यंतिउपचितान्संवृद्धान्तदुपायस्वरूपंयथायथावत् १६ कालस्यविष्णोर्गतिंगमनप्रकारंच १७ सूचीकटाहन्यायेनयुगधर्मस्वरूपमादौवक्ति कृतइति तज्जनैःकृतयुगजनैः केचत्वारःपादाइत्यत्राह सत्यमिति वि

कथाइमास्तेकथितामहीयसांवितायलोकेषुयशःपरेयुषाम् ॥ विज्ञानवैराग्यविवक्षयाविभोयशोविभूतीर्नतुपारमार्थ्यम् १४ यत्रोत्तमश्लोकगुणानुवादःसंगीयतेभीक्ष्णममंगलघ्नः ॥ तमेवनित्यंशृणुतादभीक्ष्णंकृष्णेमलांभक्तिमभीप्समानः ॥ १५ ॥ राजोवाच ॥ केनोपायेनभगवन्कलेर्दोषान्कलौजनाः ॥ विधमिष्यंत्युपचितांस्तन्मेब्रूहियथामुने १६ युगानियुगधर्मांश्चमानंप्रलयकल्पयोः ॥ कालस्येश्वररूपस्यगतिंविष्णोर्महात्मनः १७ श्रीशुकउवाच ॥ कृतेप्रवर्ततेधर्मश्चतुष्पात्तज्जनैर्धृतः ॥ सत्यंदयातपोदानमितिपादाविभोर्दृप १८ संतुष्टाःकरुणामैत्राःशांतादांतास्तितिक्षवः ॥ आत्मारामाःसमदृशःप्रायआश्रमिणोजनाः १९ त्रेतायांधर्मपादानांतुर्यांशोहीयतेशनैः ॥ अधर्मपादैरनृतहिंसासंतोषविग्रहैः २० तदाक्रियातपोनिष्ठानातिहिंस्रानलंपटाः ॥ त्रैवर्गिकास्त्रयीवृद्धावर्णाब्रह्मोत्तरानृपाः २१ तपःसत्यदयादानेष्वर्धंह्रसतिद्वापरे ॥ हिंसातुष्ट्यनृतद्वैर्धर्मस्याधर्मलक्षणैः २२ यशस्विनोमहाशालाःस्वाध्यायाध्ययनेरताः ॥ आढ्याःकुटुंबिनोहृष्टावर्णाःक्षत्रद्विजोत्तमाः २३ कलौतुधर्महेतूनांपर्यासोधर्महेतुभिः ॥ एधमानैःक्षीयमाणोह्यंतेसोपिविनंक्ष्यति २४ तस्मिन्लुब्धादुराचारानिर्दयाःशुष्कवैरिणः ॥ दुर्भगाभूरिदर्पाश्चशूद्रदासोत्तराःप्रजाः २५

भोर्धर्मस्यतेपादाः १८ तत्राश्रमिणांस्वभावमाह संतुष्टाइति समदृशःवस्तुयाथार्थ्यज्ञानिनःकरुणयंतीतिकरुणाः आश्रमिणइत्यनेनभार्याद्वियोगमाह नित्यगृहस्थाइत्यर्थः १९ तुर्यांशश्चतुर्थांशोदानलक्षणःपादोहीयतेह्रसति पादहानौप्रतिपक्षमाह अधर्मेति २० तदात्रेतायांयज्ञादिक्रियातपोनिष्ठाभवंतिनलंपटाःविषयरागिणोनभवंति त्रैवर्गिकाःत्रिवर्गसहिताःत्रयीवृद्धाःवेदविद्यायांविशारदात्रैविद्याइत्यर्थः ब्रह्मोत्तराब्राह्मणोत्तराः ब्राह्मणाधिकाः २१ अधर्मलक्षणैःअधर्मस्वरूपपादैःहिंसातुष्ट्यनृतद्वैधैः हिंसातुष्ट्यनृतलक्षणद्वैधंद्वित्वंयेषांतेतथातैःअतुष्टियुतमनृतमतुष्ट्यनृतं धर्मस्यतपःसत्यदयादानेषुपादेष्वर्धंह्रसति अनेनद्वापरशब्दोनिरुक्तः २२ महाशालाइत्यनेनयज्ञकर्तारः २३ पर्यासोनिरासः सोपिसत्यलक्षणोपिधर्मोवा २४ शुष्कवैरिणःनिष्प्रयोजनवैरिणः शूद्रदासोत्तराःप्राधान्येनशूद्राणांदासाः २५

सत्त्वादपोगुणाआत्मनिमनसिपरिवर्ततेपर्यायेणवर्तते २६ कथंतत्राह प्रसीदतीति यदासत्त्वंप्रसीदतितदामनआदीनिप्रसन्नानिभवंति लक्षणांतरमाह ज्ञानइति यद्यदाज्ञानादिरुचिस्तदा कुतएत त्कल्प्यतइत्यत्राह यादिति मनआदिप्रसादेनज्ञानाद्यभिरुचिर्ज्ञायतइतिपदयोजना यस्मात्तत्तस्मादिति २७ देहिनांयदा काम्यंतइतिकामास्तेषुकर्मसुप्रशंसिचापादनीयमितिस्नेहविशेषोभवति तदाबुद्धिमान् रजोवृत्तिस्त्रेत्रेतिजानीतजानातु २८ यदाआत्मनिलोभादयोदृश्यंतेतदारजस्तमःरजस्तमोगुणवृत्तियुतंद्वापरंजानातु २९ यदामायादयोदृश्यंतेयत्रसकलिस्तामसस्तमोगुणवृत्तिमानित्युपलक्ष्यते विषादनंविषण्णता ३० यस्मात्कलिदोषात्क्षुद्रदृशअल्पज्ञानाःलोकोपद्रवकर्मज्ञानावा वृत्तिहीनाजीवनोपायरहिताःअसतीरसत्यः ३१ दस्यूत्कृष्टाःदस्यूपद्रुताः कृषहिंसायामिति

सत्त्वंरजस्तमइतिदृश्यंतेपुरुषेगुणाः ॥ कालसंचोदितास्तेवैपरिवर्ततआत्मनि २६ प्रसीदतियदासत्त्वंमनोबुद्धींद्रियाणिच ॥ तदाकृतयुगंविद्याज्ज्ञानेत पसियद्रुचिः २७ यदाधर्मेपुकामेषुभक्तिर्यशसिदेहिनाम् ॥ तदात्रेतारजोवृत्तिरितिजानीतबुद्धिमान् २८ यदालोभस्त्वसंतोषोमनोदंभोथमत्सरः ॥ कर्म णांचापिकाम्यानांद्वापरंतद्रजस्तमः २९ यदामायानृतंतंद्रानिद्राहिंसाविषादनम् ॥ शोकोमोहोभयंदैन्यंसकलिस्तामसःस्मृतः ३० यस्मात्क्षुद्रदृ शोमर्त्याःक्षुद्रभाग्यामहाशनाः ॥ कामिनोवृत्तिहीनाश्चस्वैरिण्यश्चस्त्रियोऽसतीः ३१ दस्यूत्कृष्टाजनपदावेदाःपाखंडदूषिताः ॥ राजानश्चप्रजाभक्षाः शिश्नोदरपराद्विजाः ३२ अव्रताबटवोशौचाभिक्षवश्चकुटुंबिनः ॥ तपस्विनोग्रामवासान्यासिनोत्यर्थलोलुपाः ३३ ह्रस्वकायामहाहाराभूर्यप त्यागवह्नियः ॥ शश्वत्कटुकभाषिण्यश्चौर्यमायोरुसाहसाः ३४ पणयिष्यंतिवैक्षुद्राःकिराटान्कूटकारिणः ॥ अनापद्यपिमंस्यंतेवार्तांसाधुजुगुप्सिताम् ३५ पतिंत्यक्ष्यंतिनिर्द्रव्यंभृत्याअप्यखिलोत्तमम् ॥ भृत्यंविपन्नंपतयःकौलंगाश्चापयस्विनीः ३६ पितॄन्भ्रातॄन्स्वसॄर्ज्ञातीन्हित्वासौरतसौहृदाः ॥ श्वशुर श्यालसंवादादीनाःस्त्रैणाःकलौनराः ३७ शूद्राःप्रतिग्रहीष्यंतितपोवेषोपजीविनः ॥ धर्मंवक्ष्यंत्यधर्मज्ञाअधिरुह्योत्तमासनम् ३८ नित्यमुद्विग्नम नसोदुर्भिक्षकंरकर्शिताः ॥ निरन्नेभूतलेराजन्ननावृष्टिभयातुराः ३९ वासोन्नपानशयनव्यवायस्नानभूषणैः ॥ हीनाःपिशाचसंदर्शामविष्यंतिकलौप्रजाः ४० कलौकाकिणिकेप्यर्थेविगृह्यत्यक्तसौहृदाः ॥ त्यक्ष्यंतिहिप्रियान्प्राणान्हनिष्यंतिस्वकानपि ४१ नरक्षिष्यंतिमनुजाःस्थविरौपितरावपि ॥ पु त्रींभार्यांचकुलजांक्षुद्राःशिश्नोदरंभराः ४२ कलौनराजञ्जगतांपरंगुरुंत्रिलोकनाथंनतपादपंकजम् ॥ प्रायेणमर्त्याभगवंतमच्युतंयक्ष्यंतिपाख ंडविभिन्नचेतसः ४३

धातुः ३२ बटवोब्रह्मचारिणः अव्रताःमहाव्रतादिव्रतहीनाःअग्निकार्यादिव्रतहीनावा ३३ भूर्यपत्याःबहुसंतानाः ३४ क्षुद्राःदरिद्राःकिराटान्परिणतफलानिपणयिष्यंतिविक्रेष्यंति कूटकारिणःधातुवादकरणशीलाःवार्ताकुसीदादिवैश्यवृत्तिं ३५ अखिलोत्तमंकुलादिनेतिशेषः कौलंकुलेविद्यमानंविपन्नंआपदंप्राप्तंभृत्यंपतयस्त्यक्ष्यंति अपयस्विनीःक्षीररहितागाश्चत्य क्ष्यंतीतिशेषः ३६ सौरतेसुरतमंत्रविषये सौहृदंप्रेमयेषांतेतथा श्वशुरश्यालाभ्यांसहसम्यक्कृवादोयेषांतेतथा ३७ ३८ ३९ पिशाचवत्संदर्शोदर्शनंयेषांतेतथा ४० विगृह्यविग्र हंवैरंकृत्वाकाकिणिकेर्थेअत्यल्पधनविषये ४१ ४२ पाखंडशास्त्रेणाद्वैतविषयेणविभिन्नचेतसःव्यामोहितचित्ताः ४३

किंमाहात्म्योयंभगवान्येनतद्यजनंसप्रयोजनंस्यादितितत्राह यन्नामधेयमिति विमुक्तंकर्मलक्षणमर्गलंतालकीलंयस्यसतथाविध्वस्तकर्मबंधनइत्यर्थः ४४ केनोपायेनेत्यादिनापृष्टंपरिहर्तुमाह पुंसामित्यादिना द्रव्यदेशात्मसंभवान्द्रव्यदेशस्वभावोद्भूतान्किमपिनावशिष्यतेतःसर्वमित्युक्तम् ४५ चित्तस्थितिभावेनानासाधनमाह श्रुतइत्यादिना अशुभमित्युपलक्षणम् प्रथमकर्मभोगायतनप्रारंभप्रभृतिसंपादिताशुभमित्यर्थः ४६ मंदाधिकारिणःक्षिप्रप्रवृत्त्यर्थंसदृष्टांतमाह यथेति शास्त्रोक्ताष्टादशदोषादुर्वर्णमित्यनेनगृह्यते धातुजंगैरिकसमुद्भूतंवा आत्मगतःचित्तगतःअशुभाशयंपापराशिंपापसंपृक्तजडमनोवा ४७ विद्यादिनांतःकरणशुद्ध्याश्रेयःस्यात्किंचित्तस्थेनहरिणेतितत्राह विद्येत्यादिनाप्राणनिरोधःप्राणायामःअंतरात्माअंतःकरणं हृदिस्थेसति ४८ उपसंहरति तस्मादिति ४९ आत्मभावंआत्मनिभक्तिंनयतिप्रापयति सर्वमादत्तइतिसर्वात्मा सर्वस्यसंभवोयस्मात्ससर्वसंभवः ५० कलिःकेवलंनदोषाकरएवापितुगुणापादकोपिभवति औषधोपचितद्रव्यवदित्याह

यन्नामधेयंम्रियमाणआतुरःपतन्स्खलन्वाविवशोगृणन्पुमान् ॥ विमुक्तकर्मार्गलउत्तमांगतिंप्राप्नोतियक्ष्यंतिनतंकलौजनाः ४४ पुंसांकलिकृतान्दोषान्द्रव्यदेशात्मसंभवान् ॥ सर्वेहरतिचित्तस्थोभगवान्पुरुषोत्तमः ४५ श्रुतःसंकीर्तितोध्यातःपूजितश्चादृतोपिवा ॥ नृणांधुनोतिभगवान्हृत्स्थोजन्मायुताशुभम् ४६ यथाहेम्निस्थितोवह्निर्दुर्वर्णंहंतिधातुजम् ॥ एवमात्मगतोविष्णुर्योगिनामशुभाशयम् ४७ विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजाप्यैः ॥ नात्यंतशुद्धिंलभतेंतरात्मायथाहृदिस्थेभगवत्यनंते ४८ तस्मात्सर्वात्मनाराजन्हृदिस्थंकुरुकेशवम् ॥ म्रियमाणोह्यवहितस्ततोयासिपरांगतिम् ४९ म्रियमाणैरभिध्येयोभगवान्परमेश्वरः ॥ आत्मभावंनयत्यंगसर्वात्मासर्वसंभवः ५० कलेर्दोषनिधेराजन्नस्तिह्येकोमहान्गुणः ॥ कीर्तनादेवकृष्णस्यमुक्तबंधःपरंव्रजेत् ५१ कृतेयद्ध्यायतोविष्णुंत्रेतायांयजतोमखैः ॥ द्वापरेपरिचर्यायांकलौतद्धरिकीर्तनात् ५२॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेयुगानुवर्णनंनामतृतीयोऽध्यायः ॥ ३ ॥ श्रीशुकउवाच ॥ कालस्तेपरमाण्वादिर्द्विपदार्धावधिर्नृप ॥ कथितोयुगमानंचशृणुकल्पलयावथ १ चतुर्युगसहस्रंतुब्रह्मणोदिनमुच्यते ॥ सकल्पोयत्रमनवश्चतुर्दशविशांपते २ यदंतेप्रलयस्तावद्ब्राह्मीरात्रिरुदाहृता ॥ त्रयोलोकाइमेयत्रकल्पंतेप्रलयायहि ३ एषनैमित्तिकःप्रोक्तःप्रलयोयत्रविश्वसृक् ॥ शेतेनंतासनोविश्वमात्मसात्कृत्यचात्मभूः ४ द्विपरार्धंत्वतिक्रांतेब्रह्मणःपरमेष्ठिनः ॥ तदाप्रकृतयःसप्तकल्पंतेप्रलयायवै ५

कलेरिति ५१ ध्यानादिप्रधानसाधनमंतरेणकीर्तनमात्रेणसंसारबंधनिर्मोकःकथमित्याशंक्यतत्तद्युगेषुभगवत्कृत्यत्वेनयुक्तमित्यभिप्रेत्याह कृतइति कृतेयत्तत्स्यादित्यर्थः ॥ ५२ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेविजयध्वजकृतटीकायांतृतीयोध्यायः ॥ ३ ॥ भगवत्कटाक्षप्रेक्षणाक्षिप्तकल्पप्रलयप्रकारंतत्स्वरूपंभागवतप्रवृत्तिंचकथयत्यस्मिन्नध्याये तत्रादावुक्तमनूद्यवक्तव्यप्रतिविधत्ते कालइति कथितस्तृतीयस्कंधे अथकल्पप्रलययोरपिकालाधीनत्वेनतत्स्वरूपश्रवणानंतरं १ यत्रदिने २ यस्यदिनस्यांते ब्राह्मीब्रह्मसंबंधिनीयत्ररात्रौ ३ यत्रप्रलयेआत्मसात्कृत्य आत्मनिनिधाय ४ सप्तप्रकृतयः महदहंकारावाकाशादिपंचभूतानि ५

यत्रप्रकृतिप्रलयेसंघातश्चतुर्विंशतितत्त्वसमूहात्मकः प्रलयप्रकारमाह विघातइति विघातेप्रलयेउपसादितेआसन्नेसति ६ फलद्रवणइतिधाताःकालनद्रवणहतुना ७ सामुद्रलसमुद्रस्पायक्ष
नंरसंजलं दैहिकंदेहस्यविद्यमानंरसंरेतोलक्षणंवीर्यं भूमेरसंतिक्तादिलक्षणम् ८ सांवर्तकःप्रलयकालीनः सत्वशून्यान्प्राणिरहितान्भूविवरान्पातालादीन् ९ १० राजसावृतंसंधूम्रस्थानम् ११
चित्रवर्णानिनीलादिमानाविधानि १२ ब्रह्मांडविवरांतरंब्रह्मांडबिलविशेषंब्रह्मांडबिलोदरंवा एकोदकंउदकात्मकंभवति पंचभूतगुणलयप्रकारमाह तदेति उपप्लवेप्रलये १३ नीरसाःआपः
१४ तद्रहितंरूपरहितंतेजोवायौलीयते १५ सवायु संविशतितदनुशब्दगुणलयानंतरंतैजसानींद्रियाणितैजसाहंकारेलीयंतेइतिशेषः १६ वैकारिकादेवाःवैकारिकाहंकारेस्वगुणैःसह १७ तंमहां
तं बीजंव्यंजकंअव्याकृतंमूलप्रकृतिः कालेनहरिणाचोदितंप्रेरितंसत्वादिगुणान्प्रसते १८ मूलप्रकृतिस्वरूपंवक्ति नतस्येति तस्याव्यक्तस्यत्रुटिलवादिकालावयवैःपरिणामादयोगुणानसंति

एषप्राकृतिकोराजन्प्रलयोयत्रलीयते ॥ आंडकोशस्तुसंघातोविघातउपसादिते ६ पर्जन्यःशतवर्षाणिभूमौराजन्नवर्षति ॥ तदानिरन्नेह्यन्योन्यंभक्ष्यमा
णाःक्षुधार्दिताः ॥ क्षयंयास्यंतिशनकैःकालेनोपद्रुताःप्रजाः ७ सामुद्रंदैहिकंभौमरंससांवर्तकोरविः ॥ रश्मिभिःपिबतेघोरैःसर्वंनैवविमुंचति ८ ततःसांवर्त
कोवह्निःसंकर्षणमुखोत्थितः ॥ दहत्यनिलवेगोत्थःशून्यान्भूविवरानथ ९ उपर्यधःसमंताच्चशिखाभिर्वह्निसूर्ययोः ॥दह्यमानंविभात्यंडंदग्धगोमयपिंडव
त् १० ततःप्रचंडपवनोवर्षाणामधिकंशतम् ॥ परःसांवर्तकोवातिधूम्रंखंरजसावृतम् ११ ततोमेघकुलान्यंगचित्रवर्णान्यनेकशः ॥ शतवर्षाणिवर्षंतिन
र्दंतिरभसस्वरैः १२ ततएकोदकंविश्वंब्रह्मांडविवरांतरम् ॥ तदाभूमेर्गंधगुणंग्रसत्यापउपप्लवे १३ग्रस्तगंधातुपृथिवीप्रलयत्वायकल्पते ॥ अपांरसमथोते
जस्तालीयंतेथनीरसाः १४ ग्रसतेतेजसोरूपंवायुस्तद्राहितंतदा ॥ लीयतेचानिलेतेजोवायोःखंग्रसतेगुणम् १५ सवैविंशतिखंराजंस्ततश्चनभसोगुणम् ॥
शब्दंग्रसतिभूतादिर्नभस्तमनुलीयते १६ तैजसानींद्रियाण्यंगदेवावैकारिकागुणैः १७ महान्ग्रसत्यहंकारंगुणाःसत्वादयश्चतम् ॥ ग्रसतेव्याकृतंबीजंगु
णान्कालेनचोदितम् १८ नतस्यकालावयवैःपरिणामादयोगुणाः ॥ अनाद्यनंतमव्यक्तंनित्यंकारणमव्ययम् १९ नयत्रवाचोनमनोनसत्वंतमोरजोवा
महदादयोमी ॥ नप्राणबुद्धींद्रियदेवतावानसन्निवेशःखलुलोककल्पः २० नस्वप्नजाग्रन्नचतत्सुषुप्तंनखंजलंभूरनिलोऽग्निरर्कः ॥ सुषुप्तवच्छून्यवदप्रतर्क्यं
तन्मूलभूतंपदमामनंति २१ लयःप्राकृतिकोह्येषपुरुषाव्यक्तयोर्यदा ॥ शक्तयःसंप्रलीयंतेविवशाःकालविद्रुताः २२

तदव्यक्तंमूलप्रकृतिं विश्वसृजांकारणंआमनंतीतिशेषः इतरविशेषणमुक्तयोःसमभित्याशयेनाह अनादीति १९ कालेनेत्युक्तस्यहरेःस्वरूपंदर्शयति नयत्रेति वागादगोयत्रकंचनविशेषंनापादयंती
तिशेषः २० आकाशाद्यन्यतमवच्चनभवतीत्याह नस्वप्नेति सवाएषआत्मानेतिनेतीतिश्रुतेः सुषुप्तवत्सुखरूपं सुखमस्वाप्समितिसुप्तिपदेनसुखंलक्ष्यतेशून्यवत्सूक्ष्मंअतएवाप्रतर्क्यंदर्कागोच
रंमूलभूतंसर्वस्यप्रधानकारणंयद्यतइतिपदंगम्यमित्यर्थः २१ कालाख्यपरमात्मस्वरूपमुक्तालयंनिर्दिशति लयइति यदायस्मिन्लयेकालविद्रुताःकालेनसमाप्तजीवनावधयःअतएवविवशाःहर्य
धीनाःपुरुषाव्यक्तयोर्ब्रह्मप्रकृत्योःशक्तयःपृथिव्यादयःसंप्रलीयंतेएषलयःप्राकृतिकोहिनामेतिशेषः २२

चराचरेवशिष्यमाणंकिंतत्राह बुद्धीति तदाप्रलयेआश्रयंतेऽनेनचराचरेणेत्याश्रयंप्रपंचाधारभूतंज्ञानंनित्यनिर्दोषज्ञानात्मकंब्रह्म बुद्धींद्रियार्थरूपेणबुद्ध्याज्ञानात्मिकयालक्ष्म्याज्ञानहेतुत्वेनबुद्धिशब्द वाच्ययात्र्यामुक्तश्रेण्यावाचक्षुरादींद्रियविषयसौंदर्यातिशयेनभातिज्योतीरूपेणवर्तते कथंकारंवर्ततइतितत्राह अन्वयव्यतिरेकाभ्यामिति प्रपंचसद्भावासद्भावाभ्यांकालाभ्यांवर्ततइति पद्वा बुद्धींद्रियात्मकदेहाकारेणबुद्धिवान्मनोवानित्यादिश्रुतेः अनेनसंविदेवपरितोविराजतेइतिपूर्वाचार्यवचनाज्ज्ञातृज्ञयविवर्जितज्ञानमितिव्याख्यानंप्रत्युक्तं तादृक्ज्ञानस्यपाषाणकल्पत्वेनहेयत्वात् नासदासीदितीतरवस्तुनिषेधाद्धात्रादिसद्भावःकथमत्राह आद्यंतवदिति यच्छरीरयोगवियोगवत्तदवस्त्वस्वतंत्रंयदादावंतेचवर्तमानंलक्ष्म्यादित्वंतदप्यस्वतंत्रंयदादिनिधनयुक्तंउत्पत्तिनाशवत्तद्भस्तुनोब्रह्मणो व्यतिरिक्तंनभवतितदध्यस्तत्वेनतत्ज्ञानेलीयतइतियन्मतंतदासुरं तदुक्तं जीवविष्ण्वोरभेदश्चदेहयोगवियोजने । विष्णोर्दुःखव्रणित्वादिपराभावस्तथैवच । अस्वातंत्र्यंचवेदादावुक्तवद्भासतेविभोः । क्वचित्क्वचिद्विमोहायदैत्यादीनांदुरात्मनामिति २३ एतमर्थंसोदाहरणमाह दीपइति दीपादिकंज्योतिषस्तेजसस्तत्वात्तच्छक्तिमंतरेणपृथक्स्वातंत्र्येणप्रकाशकंनभवेत्एवंबुद्ध्यादिकमपिमारुतान्मुख्यप्रा णादपिपृथक्ज्ञानजननशक्तिमन्नवायुनावैगौतमसूत्रेणप्राणेनहीदमित्यादिश्रुतेः किमुतपरब्रह्मणः एतस्माज्जायतेप्राणआत्मनएवप्राणोजायतेब्रह्मणोवाएतानिकरणानीतिश्रुतेः २४ नस्वप्नेप्रत्यत्र स्वप्नाद्यवस्थाअपिनब्रह्मणइत्युक्तंतर्हिकस्यताइतितत्राह बुद्धेरिति बुधंज्ञानंधीयतेस्मिन्निितिबुद्धिर्जीवःतस्यजागरणादिकमुच्यतेह सतासोम्येत्यादिश्रुतिसिद्धंअथहैतत्पुरुषःस्वपितिनामेतिचअ नेनजाग्रदादीनांनिरालंबनतयामिथ्यात्वमपास्तं ननुसुप्त्याद्यवस्थावद्विश्वादीनामपिनानात्वंसत्यंस्यादितितत्राह मायामात्रमिति प्रत्यगात्मनिपरमात्मनिस्थितंनानात्वंमायायास्वेच्छयामात्रंनिर्मि

बुद्धींद्रियार्थरूपेणज्ञानंभातितदाश्रयम् ॥ अन्वयव्यतिरेकाभ्यामाद्यंतवदवस्तुयत् २३ दीपश्चक्षुश्चरूपंचज्योतिषोनपृथग्भवेत् ॥ एवंधीःखानिमा त्राश्चनस्युरप्युतमारुतात् २४ बुद्धेर्जागरणंस्वप्नंसुषुप्तिरितिहोच्यते ॥ मायामात्रमिदंराजन्नानात्वंप्रत्यगात्मनि २५ यथाजलधराव्योम्निभवंतिनभवंति च ॥ ब्रह्मणीदंतथाविश्वमुपयात्युदयाप्ययम् २६ एतेह्यवयवाःप्रोक्ताःसर्वावयविनामिह ॥ विनार्थेनप्रतीयेरन्पटस्येवांगतंतवः २७ यत्सामान्य विशेषाभ्यामुपलभ्येतसभ्रमः ॥ अन्योन्यापाश्रयात्सर्वमाद्यंतवदवस्तुच २८

तंत्रांतनस्वाभाविकंएतेनकृष्णरामादिरूपाणांमिथोमूलरूपेणभेदोनिरस्तःतदुक्तं प्रत्येकंविष्णुरूपाणांभ्रांतिमात्राभिदामता । जगतश्चैवविष्णोस्तुसत्योभेदःसदैवतु । यथाकाशघनौनित्यंभिन्नावेवपरस्परं एवमीशोजगच्चैवभिन्नाबेवपरस्परमिति २५ नन्वेवंतर्हिजगद्ब्रह्मणोश्चभेदोनपारमार्थिकःस्यादित्यतःसोदाहरणंभेदस्यसत्यत्वंसमर्थयते यथेति उदयाप्ययोर्मिथोविरुद्धधर्मत्वादेकवद्भावः इदंवि श्वंब्रह्माधारतयासृष्टिसंहारौयातिगगनघनयोराधाराधेययोर्भेदोयथासत्यस्तथाजगद्ब्रह्मणोरपीतिएतदप्युक्तं यथाकाशघनावित्यादिना २६ ननुजगद्ब्रह्मणोरिवावयवावयविनामपिभेदःसन्नेव किंनस्यात्पटस्यामीतंतवइतितत्प्रतीतेरितितत्राह एतइति सर्वेषामवयविनांमहदादिनांयेअवयवाःप्रोक्ताःखादयःएतेर्थेनविनाभेदव्यवहारमंतरेणप्रतीयेरन् हियस्मात्तस्मादभिन्नाइतिशेषः कथ मभेदइत्यत्राह पटस्येति पटस्यावयवास्तंतवोवयविनापटेनाभिन्नाइतियथांगीकर्तव्यंतंतुःपटःमृद्घटःशुक्लःपटइत्याद्यभेदव्यवहारदर्शनात् प्रत्येकंतंतुनाभेदेपिसमुदायरूपेणाभेदइतिप्रकटनायतंतवइ तिबहुवचनं अतएव अवयव्यवयवोभेदात्कोटयंशोभेदईरितः । सोपिभेदोनचाभेदात्पृथगेवप्रवर्ततइतिवाक्यमत्रगृहीतं अनेनकार्यकारणादीनांभेदइतिमतमपास्तं पटस्यतंतवइतिप्रयोगःपट स्यशौक्ल्यमितिवान्निष्कर्षणार्थः सोपिश्रीहरिनियतइतिनयुक्तिविरोधः अवयव्यवयवानांतुकार्यकारणवस्तुनां । एकएवनियंतासौहरिर्नारायणःपरइतिवाक्यादवगंतव्यः २७ नन्वेवंचेदवयवि निसत्यवयवनाशेतस्यापितदभेदःस्यादत्राह यदिति यावद्द्रव्यभाविसामान्यमित्युच्यते अयावद्द्रव्यभाविविशेषइति तत्रयद्यस्तुनष्टावयवाभिन्नमित्युपलभ्येतसामान्यावयववत्सबुद्धेर्भ्रमःकुतः

अन्योन्यापाश्रयाद्विश्लेषात्तस्मादाद्यंतवदवस्त्वेव यद्वा हनुमद्भीमांशानांवाव्याद्यंशिनांसामान्यविशेषशक्तिदर्शनात्कथमभेदःसंगच्छतइतितत्राह यदिति अन्योन्यापाश्रयाअन्याश्रयाभेदावधृय
माणात् असुरजनमोहाधिकृतत्वेनाद्यंतवत्त्वादवस्तुसर्वमविद्यमानमेव २८ यथावयव्यवयवादीनांअभेदोदुरवबोधःएवंपदार्थानामनंतत्वात्तत्स्वरूपभेदोपिपरमात्मानमंतरेणदुर्ज्ञेयइत्याशयेना
ह विकारइति विनिषेधेपृथग्भावइत्यतःपृथक्कारोनानाविधोभेदः प्रत्यगात्मानंसाक्षीभूतंश्रीनारायणंअंतरेणाणुरल्पोपिनिरूप्योनास्तिसएवनिरूपयितुंशक्तः । नासत्त्वान्नेत्याह ख्यायमानइति
प्रतीयमानस्यासत्वंजुगुप्सितंप्रमाणविरोधादित्यपिशब्दः २९ नन्वेकस्यप्रतिभानंतुकृतकान्नविशिष्यतइतिवन्निर्धारणायोग्यइतितत्राह नहीति यद्यविद्वान्ब्रह्मरूपाणांनानात्वंमन्यतेतर्ह्यपिसत्यस्य
ब्रह्मणोरूपाणां नानात्वंसत्यंनभवति अविद्वन्मतत्वात् ननुयुक्ताह्यस्यहरयःशतादशेतिश्रुतेःकथंसत्यंनेत्यत्राह नानात्वमिति नेत्यनुवर्तते छिद्रयोर्बाह्यांतस्थाकाशयोः यद्वयथामाना
त्वंनास्ति एकएवमहाकाशोघटेजायमानेबहिरंतश्चेतिद्वित्वसंख्यामुरैतिउत्पद्यमानोनीलिमाकरोप्याकाशोद्वित्वमिति तत्रप्रागुक्तोहरेरुपमितियातःपश्चादुक्तोजीवानामित्यर्थविशेषोहिशब्देनोपात्तः
उक्तंच महाकाशोबहिस्थश्चघटाद्यंतस्थएवच । द्वेधासमुदितोन्यौचद्वावाकाशौप्रकीर्तितौ । घटरूपस्तदन्यश्चमहाकाशात्परोऽघुः । महाकाशवदेवात्रपरमात्मासनातनः । घटांतस्थमहाकाशप्रतिमो
तर्गतोविभुः । घटस्यांतर्गताकाशोमहाकाशात्परोमतः । तद्वद्देवादयःसर्वेजीवामुक्तयुपयोगिनः । तमोगाश्चैवयेसर्वेघटरूपस्थवन्नराइति ज्योतिषोरधिदैवाध्यात्मसंज्ञयोः सहस्रंवाआदित्यस्यरश्मयआसु

विकारःख्यायमानोपिप्रत्यगात्मानमंतरा ॥ ननिरूप्योह्यणुरपिस्याच्चेत्सभ्रमआत्मनः २९ नहिसत्यस्यनानात्वमविद्वान्यदिमन्यते ॥ नानात्वंछिद्रयो
र्यद्वज्ज्योतिषोर्वातयोरपि ३० यथाहिरण्यंबहुधासमीयतेनृभिःक्रियाभिर्व्यवहारवर्त्मसु ॥ एवंवचोभिर्भगवानधोक्षजोव्याख्यायतेवैदिकलौकिकैर्जनैः
३१ यथाघनोर्कप्रभवोर्कदर्शनोह्यर्कांशभूतस्यचचक्षुषस्तमः ॥ एवंत्वहंब्रह्मगुणस्तदीक्षितोब्रह्मांशकस्यात्मनआत्मबंधनः ३२ घनोयदार्कप्रभयाविदीर्य
तेचक्षुःस्वरूपंपरमीक्षतेतदा ॥ यदाह्यहंकारउपाधिरात्मनोजिज्ञासयानश्यतितर्ह्यनुस्मरेत् ३३ यदैवमेतेनविवेकहेतिनामायामयाहंकरणात्मबंधनम् ॥
छित्त्वाच्युतात्मानुभवोवतिष्ठतेतमाहुरात्यंतिकमंगसंप्लवम् ३४

नाडिष्वाततइतिश्रुतेर्वातयोर्वातप्राणसंज्ञयोरधिदैवमथाध्यात्ममितिश्रुतेश्च अत्रापिविशेषःपूर्ववदवगंतव्यइति ३० बहुत्वसंख्यावाचिन्याःश्रुतेःकिंविनिगमकमत्राह यथेति बहुधाकटककुं
डलाद्यात्मनाहेमनानासंज्ञाविषयंसमीयतेतथाभगवानापदेवोनरोवराहःशुक्लःपीतोऽह्रस्वोणुर्दीर्घोमहानितिविविधाकारेणव्याख्यायतेप्रकाश्यतइति ३१ हरेस्तत्त्वस्वरूपंनिरूप्यसंसारप्रकारमाह य
थेति अर्कशब्देनाग्नेजोवायवउच्यंते तेजःसंबंधेनधूमउपलक्ष्यतेअर्कप्रभवःधूमतेजोजलमरुद्वचःप्रभवउत्पांत्तेःयस्यसतथाअर्केणनभसिदर्शितःसूर्यप्रकाशेसत्येवदृश्यतेनान्यथायथाघनःसूर्यदर्शनप्रतिबं
धकः आपोवाअर्कइतिश्रुतेः यथार्कांशस्यचक्षुषस्तमःसूर्यदर्शनेप्रतिबंधकंआदित्यश्चक्षुर्भूत्वाक्षिणीप्राविशदितिश्रुतेःएवमेवाहंकारोब्रह्मापेक्ष्यगुणोऽमुख्यःतदीक्षितःतेनप्रकाशितःब्रह्मांशकस्यजीवस्य
पादोस्यविश्वाभूतानीतिश्रुतेः ब्रह्मणोभिन्नांशस्यआत्मनोजीवस्यात्मानंमतिंज्ञानंबध्नातीत्यात्मबंधनः आत्मादेहेधृतौजीवइत्यादौयादवप्रकाशेनमतौप्रयुक्तत्वात्तद्ब्रह्मावेदाहंब्रह्मास्मीतिश्रुतेःब्रह्म
णोविशेषभूतइतिवा ३२ यदाघनोर्कप्रभयातिव्रयासूर्यप्रभयाविदीर्यतेनष्टोभवतितदासूर्यांशंचक्षुःस्वरूपंस्वबिंबंरविमीक्षतेयथायदाजीवस्यात्मनः परमात्मनोदर्शनेउपाधिनिमित्तभूतोहंकारोजिज्ञासया
परमात्मोपासनयातथानश्यतितर्हितदाजीवः परंपरमात्मानमनुस्मरेत्अनुकूलस्मरणसमर्थोभवतीत्यन्वयः हिशब्देनभिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाइतीदंवाक्यमग्राहि ३३ असंप्रज्ञा
तसमाधिस्थलक्षणमाह यदेति एवमुक्तविधयोद्भूतयैतयाविवेकहेतिनानिशितज्ञानायुधेनमायामयाहंकरणात्मबंधनंभगवदिच्छानिर्मितंलिंगशरीरलक्षणाहंकारजनितसंसारहेतुंछित्त्वाअच्युतात्मा

नुभवः नित्यमुक्तपरमात्मापरोक्षदर्शनेनासंप्रज्ञातसमाधिस्थोनिर्मुक्तलिंगशरीराभिमानोवतिष्ठते एतमंगआत्यंतिकंसंप्लवंप्रलयमाहुः असंप्रज्ञातसमाधिस्थावस्थायाःनामांतरमिदम् ३४ इदानीं दैनंदिनजन्मप्रलयावाह नित्यदेति दिनेदिनेब्रह्मादीनांसर्वभूतानामुत्पत्तिलयौस्तइतिएकेसूक्ष्मज्ञावदंतीत्यनेनान्वयः ३५ चेतनानांनिर्विकारत्वेनजन्माद्यसंभवात्कथमुच्यतेनित्यदाजन्माद्यस्तीतितत्राह कालेति कालस्रोतोजवेनकालनदीप्रवाहवेगेनक्षिप्रंह्रियमाणस्यनीयमानस्यदेहस्य ३६ प्रतिदिनंजीवस्योर्ध्वारुकविकारवत्परिमाणाद्यवस्थाःकिंनस्युरिति तत्राह अनाद्यंतवतेतिआकाशेज्योतिषांन क्षत्राणांयथास्थितेर्लयोनास्तितथाचेतनस्येतिशेषः ३७ उक्तमुपसंहराति नित्यइत्यादिना कालस्यकालांतर्यामिणोहरेर्गतिःस्थितिरीदृशीदुरवबोधेति ३८ परमप्रमेयमुपसंहरति एताइति यत्रोद्यतः क्षितितलोद्धरणायविभ्रत्क्रोडतनुमित्यारभ्ययाःकथाःएताःजगद्विधातुस्वंचतुर्मुखस्यास्तीतिअतोखिलसत्वधाम्नइतिसत्वगर्भमुदरंभरत्वमित्यतोनारायणस्येति सत्वोल्बणंजनुष्कीबेइतियादवःविस्तरतः कथनंकिंनस्यादितितत्राह कात्स्न्र्येनेति अजोब्रह्मा ३९ कथाकथनप्रयोजनमाह संसारेति ध्रुवोनौः ४० कथारसनिषेवणायभागवतपुराणमेवंमुख्यसाधनमित्यभिप्रेत्यतस्यान्निमूलत्वज्ञापनाय

नित्यदासर्वभूतानांब्रह्मादीनांपरंतप ॥ उत्पत्तिप्रलयावेकेसूक्ष्मज्ञाःसंप्रचक्षते ३५ कालस्रोतोजवेनाशुह्रियमाणस्यनित्यदा ॥ परिणामाद्यवस्थास्तज
न्मप्रलयहेतवः ३६ अनाद्यंतवतानेनकालेनेश्वरमूर्तिना ॥ अवस्थानैवदृश्यंतेवियतिज्योतिषामिव ३७ नित्योनैमित्तिकश्चैवतथाप्राकृतिकोलयः ॥
आत्यंतिकश्चकथितःकालस्यगतिरीदृशी ३८ एताःकुरुश्रेष्ठजगद्विधातुर्नारायणस्याखिलसत्वधाम्नः ॥ लीलाकथास्तेकथिताःसमासतःकात्स्न्र्येननाजो
प्यभिधातुमीशः ३९ संसारसिंधुमतिदुस्तरमुत्तितीर्षोर्नान्यःप्लवोभगवतःपुरुषोत्तमस्य ॥ लीलाकथारसनिषेवणमंतरेणपुंसोभवेद्विविधदुःखदवार्दितस्य
४० पुराणसंहितामेतांऋषिर्नारायणोव्ययः ॥ नारदायपुराप्राहकृष्णद्वैपायनायसः ४१ सचैमह्यंमहाराजभगवान्बादरायणः ॥ इमांभागवतींप्रीतःसं
हितांवेदसंमिताम् ४२ एतांवक्ष्यत्यसौसूतऋषिभ्योनिमिषालये ॥ दीर्घसत्रेकुरुश्रेष्ठसंपृष्टःशौनकादिभिः ४३ अत्रानुवर्ण्यतेऽभीक्ष्णंविश्वात्माभगवान्ह
रिः ॥ यस्यप्रसादजोब्रह्मारुद्रःक्रोधसमुद्भवः ४४ त्वंचराजन्मरिष्येतिपशुबुद्धिमिमांजहि ॥ नजातःप्रागभूतोद्यदेहवत्त्वंननंक्ष्यसि ४५ नभविष्यसिभू
त्वात्वंपुत्रपौत्रादिरूपवान् ॥ बीजांकुरवद्देहादेर्व्यतिरिक्तोयथानलः ४६

मूलंदर्शयति पुराणेति ४१ संहितोर्यंविदसाहतात्वज्ञापनायवेदसंमितामिति ४२ ४३ अस्याःविषयमाह अत्रेति कुतोस्याइतरेभ्यःश्रैष्ठ्यं येनादरेणग्राह्यास्यादित्यतोवाह अत्रेति विष्ण्वभिन्नत्वेन ब्रह्मान्यतमःकिंनस्यादित्यत्राह यस्येति अनेनात्मावैपुत्रनामासीदितिवाक्यप्राप्ततदात्मशंकापिदूरीकृतेति ४४ ननुजातोमृतोहमितिबुद्धेर्विक्रियायाःकथंचेतनस्यपरिणामाद्यवस्थाभावइत्याशंक्यासि द्धालोकनन्यायेनतस्याविकारित्वमाह त्वंचेति मरिष्येतिसंधिभावेनघटादिनाशवैलक्षण्यंदेहवियोगस्यदर्शयति वैलक्षण्यमेवदर्शयति नेति नजायतेम्रियतेवाकदाचिदित्यादेःदेहवदित्येतत्प्रत्येकमभि संबध्यते,नेतिचत्वदेहवत्नजातःतर्हिप्रागसन्नेत्याह प्रागिति देहवत्प्रागभूतोनुत्पन्नअद्यदेहवन्नपरिणमसि ४५ देहांतरवन्नभविष्यसिपुत्रपौत्रादिरूपवान्भूत्वात्वंदेहवन्ननंक्ष्यसि कथमिवपुत्रादिरूप वानसीतितत्राह बीजेति बीजांकुरपरंपरायथातथा कस्मान्नाशाभावइतितत्राह देहादेरिति हेतुगर्भविशेषणंअत्रापिनिदर्शनंयथानलइति दार्वादेरितिशेषः पुत्रादिरूपत्वेत्वभेदोपिप्राप्तइत्यतोवाह य थाबीजपरंपरायाभेदःप्रमितः तथाप्रकृतइति शेषःप्राग्वत् ४६

ननु जातोमृतइत्यभेदप्रतीतेस्तद्व्यतिरेकः कथमनलदृष्टांतःपरमात्मनिसंगतइतिचत्राह स्वप्नइति आत्मनोजीवस्यस्वप्नेस्वशिरश्छेदोयथामिथ्यातथापंचत्वादि इदंस्वानुभवसिद्धमित्याह यस्मादि
ति त्वंदेहस्यपंचत्वादिपश्यसीतियस्मात्ततआत्माअजोनजातोऽमरोनमृतश्चेतितस्मादेहस्यैवजन्मादयोनचेतनस्येतिसिद्धम् ४७ अधुनाप्रसंगात्सामान्यविशेषमरणावस्थामाह घटइति घटेभिन्नेक
पालीभूतेघटाकारपरिमितोघटाकाशोनीलिमाकारबहिस्थाकाशःस्यात्पुरायथातथेत्यर्थः एवंदेहेमृतेससिजीवःसंसारीब्रह्मतत्त्वंयथाकर्मस्वर्गनरकादिकंसंपद्यते घटांतस्थमहाकाशैकदेशेबहिस्थव्याप्ताका
शोभवति यथातथापुराजीवःप्राणधारकः परमात्मांतर्यामीब्रह्मव्याप्तस्वरूपमाप्नोतिघटांतर्गतभूताकाशःपुरायथामहाकाशाधीनःपश्चादपितदधीनतामापद्येत तथाचरमेदेहांतींलगशरीरेमृतेनष्टेजीवोमु
क्तियोग्यआत्मापरंज्योतिःसंपद्यते अयमर्थोमहाकाशोबहिःस्थश्चघटाद्यंतस्थएवचेति तत्त्वसंहितावचनादवगंतव्यइतिब्रह्मयोक्षपुनरावृत्तिशून्यंवा ४८ प्रकरांतरेणसंसारावस्थामाह मनइति आत्म
नोजीवस्यमनःसुरनरादिदेहान्गुणान्कर्माणिआवृत्तिहेतुभूतानिपुण्यपापलक्षणानिचसृजतिआपादयति शब्दादिविषयासक्तिहेतुभूतानिवा एवंविधंमनःसत्कितत्राह तदिति मायाजडप्रकृतिः तन्मन
उत्पादयतिसृजतइत्यात्मनेपदप्रयोगेणचिन्मिश्रंमनइतिसूचयति ततोजडमनसोजीवस्यसंसारोवर्ततइतिशेषः ४९ कियंतंकालंजन्मात्मकःसंसारइतित्राह स्नेहेति यावद्यावंतंकालंतैलादिस्नेह
द्रव्याधिष्ठानस्थितवर्त्यग्निसंयोगस्तावत्तावंतंकालंदीपस्यदीपत्वंप्रकाशसामर्थ्यं एवंदेहकृतोदेहादिकर्मनिमित्तकृतोभवइत्यन्वयः ५० तैलाद्यभावेनयथादीपादेःशून्यताएवंजीवस्यापिदेहाद्यभावेनशून्य

स्वप्नेयथाशिरश्छेदःपंचत्वाद्यात्मनस्तथा ॥ यस्मात्पश्यसिदेहस्यततआत्माह्यजोऽमरः४७ घटेभिन्नेयथाकाशआकाशःस्याद्यथापुरा ॥ एवंदेहेमृतेजीवो
ब्रह्मसंपद्यतेपुनः ४८ मनःसृजतिवैदेहान्गुणान्कर्माणिचात्मनः ॥ तन्मनःसृजतेमायाततोजीवस्यसंसृतिः ४९ स्नेहाधिष्ठानवर्त्यग्निसंयोगोयावदीयते ॥
तावद्दीपस्यदीपत्वमेवंदेहकृतोभवः ५० रजःसत्त्वतमोवृत्त्याजायतेतैधेतनश्यति ॥ नतत्रात्मास्वयंज्योतिर्योव्यक्ताव्यक्तयोःपरः ५१ आकाशवद्ध्रुवाधारोध्रु
वोनानामितस्ततः ॥ एवमात्मानमात्मस्थमात्मनैवामृशप्रभो ५२ बुद्ध्यानुमानगर्भिण्यावासुदेवानुचिंतया ॥ चोदितोविप्रवाक्येननत्वांधक्ष्यतितक्षकः
५३ मृत्यवोनोपसर्पंतिमृत्यूनांमृत्युमीश्वरम् ॥ अहंब्रह्मपरंधामब्रह्माहंपरमंपदम् ५४ एवंसमीक्ष्यचात्मानमात्मन्याधायनिष्कले ५५

स्वमायातमत्राह रजइति मनसोरजआदिगुणोपजीवनेनदेहोजायतेइत्यादि तत्रतस्यामवस्थायामपियोव्यक्ताव्यक्तयोर्देहप्रकृत्योः परोविलक्षणःसआत्माजीवोनजायतेनवर्धतेननश्यति कुतःस्वयंज्यो
तिर्ज्ञानात्मा ५१ इदानींमुपास्तिप्रकारंविधत्ते आकाशइति आकाशवत्ततोव्याप्तोध्रुवाधारोनित्याधारोध्रुवोनित्यश्चयः नानामितः तत्तद्वस्तुपरिमाणपरिमितश्चैवंविधमाहात्म्योपेतमात्मस्थंस्वहृदयकुहर
निलयमात्मानंपरमात्मानमात्मनैवसर्वप्रयत्नेनामृश सम्यग्विचार्योरास्व प्रभोइत्युपास्तिसामर्थ्यमाह ५२ दुर्धरणदोषदुष्टस्यममदेहत्यागेपिमोक्षोनास्तीतिनाचिंतयेत्याशयेनाह बुद्ध्येति आत्मा
स्वस्वेतरवृत्तित्वानाक्रांतनित्यनिष्ठाधिकरणंमेयत्वादात्मवदितिदेहःस्वस्वेतरवृत्तित्वानाक्रांतनित्यनिष्ठाधिकरणंमेयत्वात्घटवदित्यनुमानगर्भिण्यावासुदेवानुचिंतयाहरोर्निरंतरसदुपासनयावर्तमानंत्वांवि
प्रकुमारवाक्येनचोदितःप्रेरितस्तक्षकोनधक्ष्यति - दष्टदोषंनापादयतीत्यन्वयः ५३ मृत्यूनांमारकाणांमृत्युंमारकंईश्वरंउपसमीपेस्थितंमृत्यवोनसर्पंतित्वांनप्राप्नुवंति दंशदोषास्पर्शनेप्रकरांतरेणो
पायमाह अहमिति नहन्यतइत्यहं नहीयतइतिवाकदापिनजहातिस्वशक्तिमितिवाएवंविधमीश्वरंविहायकदापिनतिष्ठत्यस्वातंत्र्यादित्यर्थः ५४ उपासनाफलमाह एवमिति एवंविधस्त्वंनिष्कले
आत्मनिपरमात्मानंसमाधायसंयुज्यसमीक्ष्यसम्यगूह्यायन्विषयुक्ताननैःपदेदशंतंतक्षकंलेलिहानंसर्पनद्रक्ष्यसिइतरसर्पवादितिशेषः आत्मनोहरेःपृथक्स्वातंत्र्येणस्थितंविश्वंशरीरंचनपश्यसीत्यन्वयः ५५

५६ अवांतरप्रमेयमुपसंहराति एतदिति चेष्टेतिपाठेसाकथितेतिशेषः ५७ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेविजयध्वजकृतटीकायांचतुर्थोध्यायः ॥ ४ ॥ ७ ॥ श्रीनारायणानुग्रहेणपरीक्षितोदेहवि
योगलक्षणंमरणं जनमेजयस्यापितृभक्तिप्रदर्शनायसर्पयागःशक्तस्यचशक्रस्यस्वविमानपातोपेक्षांकथयत्यस्मिन्नध्याये तत्रादौपरीक्षितःशुकानुज्ञानदानप्रार्थनाप्रकारंवक्तुमाह एतदिति एतत्पुराणंनिखि
लंपूर्णमात्मानंपश्यतीतिनिखिलात्मदृक्तेनसमस्तस्वामिदृशावा १ सिद्धःसंपादितपुरुषार्थदेहः २ दीनेष्वग्रहइतियत्तदिदं ३ कोयमनुग्रहइतितमाह पुराणेति ४ भयाभावेनिमित्तमाह प्रविष्टइतिनिर्वा

दशंतंतक्षकंपादेलेलिहानंविषाननैः ॥ नद्रक्ष्यसिशरीरंचविश्वंचपृथगात्मनः५६ एतत्तेकथितंतातयथात्वंपृष्टवान्नृप ॥ हरेर्विश्वात्मनश्चेष्टांकिंभूयःश्रोतुमि
च्छसि ५७ इतिश्रीभा०म०द्वादशस्कंधेचतुर्थोऽध्यायः ॥४॥ सूतउवाच ॥ एतन्निशम्यमुनिनाभिहितंपरीक्षिद्व्यासात्मजेननिखिलात्मदृशासमेन ॥ तत्पा
दपद्ममुपसृत्यनतेनमूर्ध्नाबद्धांजलिस्तमिदमाहसविष्णुरातः १ परीक्षिदुवाच ॥ सिद्धोस्म्यनुगृहीतोस्मिभवताकरुणात्मना ॥ श्रावितोयच्चमेसाक्षादना
दिनिधनोहरिः २ नात्यद्भुतमिदंमन्येमहतामच्युतात्मनाम् ॥ दीनेषुतापतप्तेषुभूतेषुयदनुग्रहः ३ पुराणसंहितामेतामश्रौषंभवतोह्यहम् ॥ यस्यांखलूत
मश्लोकोभगवाननुवर्ण्यते ४ भगवंस्तक्षकादिभ्योमृत्युभ्योनबिभेम्यहम् ॥ प्रविष्टोब्रह्मनिर्वाणमभयंदर्शितंत्वया ५ अनुजानीहिमांब्रह्मन्वाचंयच्छाम्य
धोक्षजे ॥ मुक्तकामाशयंचेतःप्रवेक्ष्येविसृजाम्यमून् ६ अज्ञानंचनिरस्तंमेज्ञानविज्ञाननिष्ठया ॥ भवतादर्शितंक्षेमंपरंभगवतःपदम् ७ ॥ सूतउवाच ॥
इत्युक्तस्तमनुज्ञायभगवान्बादरायणिः ॥ जगामभिक्षुभिःसाकंनरदेवेनपूजितः ८ परीक्षिदपिराजर्षिरात्मन्यात्मानमात्मना ॥ समाधायपरंद
ध्यावस्पंदासुर्यथातरुः ९ प्राक्कूलेबर्हिष्यासीनोगंगाकूलउदङ्मुखः ॥ ब्रह्मभूतोमहायोगीनिःसंगश्छिन्नसंशयः १० तक्षकःप्रहितोविप्राःक्रुद्धेनद्विज
सूनुना ॥ हंतुकामोनृपंगच्छन्ददर्शपथिकाश्यपम् ११ तंतर्पयित्वाद्रविणैर्निवर्त्यविषहारिणम् ॥ द्विजरूपप्रतिच्छन्नःकामरूपोऽदशन्नृपम् १२ ब्रह्म
भूतस्यराजर्षेर्देहोहिगरलाग्निना ॥ बभूवभस्मसात्सद्यःपश्यतांसर्वदेहिनाम् १३ हाहाकारोमहानासीद्भुविखेदिक्षुसर्वतः ॥ विस्मिताअभवन्सर्वेदेवा
सुरनरादयः १४ देवदुंदुभयोनेदुर्गंधर्वाप्सरसोजगुः ॥ ववृषुःपुष्पवर्षाणिविबुधाःसाधुवादिनः १५ जनमेजयःस्वपितरंश्रुत्वातक्षकभक्षितम् ॥ अथा
जुहावसंक्रुद्धःसर्पान्सत्रेसहद्विजैः १६ सर्पसत्रेसमिद्धेग्नौदह्यमानान्महोरगान् ॥ दृष्ट्वेंद्रंभयसंविग्नस्तक्षकःशरणंययौ १७ नापश्यत्तक्षकंतत्रराजापारीक्षि
तोद्विजान् ॥ उवाचतक्षकःकस्मान्नदह्येतोरगाधमः १८ तंगोपायतिराजेंद्रईंद्रःशरणमागतम् ॥ तेनसंस्तंभितःसर्पस्तस्मान्नाग्नौपतत्यसौ १९

णमानंदंप्राकृतशरीररहितंवा ५ कामानामाशयःशयनंयस्मात्तज्जडचेतोनिगृह्याधोक्षजेप्रवेक्ष्ये ६ क्षेमंमंगलं क्षेमोनाप्राप्तरक्षणंमोक्षेप्यस्तीतुमंगलइतियादवः ७ ८ अस्पंदासुर्निश्चलेंद्रियःविषयव्या
पारशून्येंद्रियइत्यर्थः ९ ब्रह्मणिभूतः १० हेविप्राः ११ १२ अहिगरलाग्निनासर्पविषाग्निना १३ १४ १५ कथांतरमारभ्यते जनमेजयइत्यादिना १६ १७ तत्रयज्ञे कुंडाग्नौ १८ १९

हेविप्राःपात्यतामितिशेषः २० मरुत्वतामरुद्भिर्युक्तेन २१ ब्रह्मोदिताक्षेपैःब्राह्मणोत्कर्षणमंत्रवचनैः २२ आंगिरसोंगिरोगोत्रप्रभवः किमित्यत्रेंद्रेणोपेक्षाकारिस्वपातेनहींद्रस्यब्राह्मणेभ्योभिभवोभवेदेवोक्तमत्वादितिशंकानकार्या जनमेजयस्यस्वसंतानोद्भवत्वेनतत्प्रीतिकामेनेंद्रेणेयमुपेक्षाकृता स्वसंतानोद्भवंकीर्त्यायाजयन्जनमेजयं । शक्रोप्यशक्तवच्चटुरिंद्रआसीदुपेक्षकः । एवमेवऋषीणांचकीर्तियोजयतामुना । कृतोपेक्षामहेंद्रेणकिमुविष्णुःपरात्परः । तस्माद्विष्णोरशक्त्यैनभूतभव्यभवत्स्वपि । नचानिष्टंगुणैरेवपूर्णोनारायणःसदेति २३ अथतस्मात् २४ मरणंदेहवियोगलक्षणंगतिःपरलोकावाप्तिलक्षणास्वेनस्वर्तंत्रेणहरिणैवोह्योधितेनस्वानुष्ठितेनकर्मणातेनस्वकर्मोद्बोधकेनहरिणाविनासुखदुःखयोःप्रदातान्योनास्ति २५ कर्मणःकारणत्वेसर्पादिनामृतोविष्णुमित्रइतिकथमुपपद्येतेत्याशंक्यतेपिकर्मनिमित्तीकृत्यकारणमितिभावेनाह सर्पेति आदिशब्देनवृक्षादिभ्यःपतनंगृह्यते सुखादिभोगहेतुत्वाच्चकर्मप्रधानकारणमित्याह भुङ्क्ष्वेति २६ फलितमाह तस्मादिति संस्थीयतेसमाप्तंभवतु आभिचारिकंजनोपद्रवकारकंकर्म एकस्यापराधेनानपराधिबहुजननाशेनपापमेवस्यादितिभावेनाह सर्पाइति ननुतज्जातित्वात्तक्षकापराधएषामपराधस्तस्मादनागसोनस्युः । एकःपापानिकुरुतेफलंभुंक्तेमहाजनः । इत्याशंक्यतक्षकस्याप्यपराधोनास्तिदैवेनतद्दर्शनेनस्वकृतकर्मपूर्वकेणपरीक्षितोमरणस्यक्षत्रत्वादितिभावेनाहजनैरिति दिष्टंदैवकृतंकर्मफलम् २७ इत्यादिर्युक्तिपूर्वकेणवचसा वाक्पतिंबृहस्पतिं वाग्वैबृहती

पारीक्षितइतिश्रुत्वाप्राहर्त्विजउदारधीः ॥ सहेंद्रस्तक्षकोविप्रानाग्नौकिमितिपात्यते २० तच्छ्रुत्वाजुहुवुर्विप्राःसहेंद्रंतक्षकंमखे ॥ तक्षकाशुपतस्वेहसहेंद्रेणमरुत्वता २१ इतिब्रह्मोदिताक्षेपैःस्थानादिंद्रःप्रचालितः ॥ बभूवसंभ्रांतमतिःसविमानःसतक्षकः २२ तंपतंतंविमानेनसहतक्षकमंबरात् ॥ विलोक्यांगिरसःप्राहराजानंतंबृहस्पतिः २३ नैषत्वयामनुष्येंद्रवधमर्हतिसर्पराट् ॥ अनेनपीतममृतमथायमजरामरः २४ जीवितंमरणंजंतोर्गतिःस्वेनैवकर्मणा ॥ राजंस्तेनविनानान्योप्रदातासुखदुःखयोः २५ सर्पचोरादिवह्न्यंबुक्षुत्तृड्व्याध्यादिभिर्नृप ॥ पंचत्वमृच्छतेजंतुर्भुंक्तेजारब्धकर्मच २६ तस्मात्सत्रमिदंराजन्संस्थीयेताभिचारिकम् ॥ सर्पाअनागसोदग्धाजनैर्दिष्टंहिभुज्यते २७ इत्युक्तःसतथेत्याहमहर्षेर्मानयन्वचः ॥ सर्पसत्रादुपरतःपूजयामास वाक्पतिम् २८ सैषाविष्णोर्महामायाबाध्यबाधकलक्षणा ॥ ययामुह्यत्यसावात्माभूतेषुगुणवृत्तिभिः २९ नयत्रदुर्भाव्यतयाविराजतेमायात्मवादेसकृदात्मवादिभिः ॥ नयाद्विवादोविविधस्तदाश्रयोमनश्चसंकल्पविकल्पवृत्तियत् ३०

तिश्रुतेः तद्बृहतोःकरपत्योश्चोरदेवतयोरितिसुट्तलोपश्च २८ सुखादेर्जीवादृष्टमेवमुख्यंकारणंनान्यदित्याशंकांपरिहरति सैषेति यादृष्टोद्बोधिकासैषामहामायामहदपरिमितंमाहात्म्यंतस्यविष्णोस्तस्मान्न दुर्गात्रोच्यते बाध्येस्थितत्वाद्बाध्यात्मत्वेनजानाति सत्त्वादिगुणवृत्तिभिःकारणैःविषयवृत्तिभिर्व्यापारैरितिशेषः २९ मुह्यन्नात्मापरमात्मेतिशंकामपाकरोति नेति आत्मवादिभिःउपनिषद्विचारचतुरैःपुरुषैःअसकृद्बहुवारमात्मवादेपरमात्मविचारेकृतेसतिमायामोहनशक्तिर्यत्रहरौनविराजतेमोहकत्वेननप्रवर्ततेअन्यैर्दुर्विभाव्यतयास्थिताउपक्रमादितात्पर्यलिंगैः क्रियमाणएवविचारोनिर्णायकोनतु यथाप्रतीतार्थइत्याह नेति विविधोयाद्विवादःतदाश्रयोब्रह्मविषयोनभवति यद्वाचानभ्युदितमितिश्रुतेः तर्हिमननसमर्थस्यमनसोविषयत्वंस्यादत्राह मनश्चेति चोप्यर्थः मनोपिब्रह्मनविषयीकरोति यन्मनसानमनुतइतिश्रुतेः संकल्पविकल्पाभ्यांवृत्तिर्यस्यतत्तथाअनेनमनसोऽस्थिरत्वेनविषयीकरणसामर्थ्यंनास्तीतिसूचितं मनसावाअग्रेसंकल्पयत्यथवाचाव्याहरतीतिश्रुतेः वाचोविषयोनेतिकिंवक्तव्यमितिकैमुत्यन्यायोप्यदर्शि अत्रवागादिशब्देनतदभिमानिदेवताव्यपदिश्यंतेतासांजडत्वेनप्रवृत्त्यनुपपत्तेः ३०

सृज्यंविश्वंयत्रनवर्ततेबाधकतयेतिशेषः उभयोर्देवासुरयोःपरंविलक्षणंआनंदलक्षणंश्रेयःसृजतादत्तवायेनवैषम्यनैर्घृण्येनाप्येतेइतिशेषः त्रिभिःसत्वादिगुणैर्धर्मार्थकामैर्वान्वितोजीवःस्वयंचयत्रनकंचनविशेषमापादयतीतिशेषः यस्तदेतत्ब्रह्मजानातितन्मुनिः सज्ञानीषड्मीभिषिध्यविरमेतकृत्यादितिशेषः कीदृशंब्रह्मउत्सादितबाध्यबाधकंउत्सादितोबाध्यबाधकोयेनतत्तथा २१ किंनामधेयंब्रह्मेति तत्राह परंपदमिति यन्नेतिनेतिइत्यतदुत्सिसृक्षवोविचक्षणाःयदेवंस्थितंतद्वैष्णवंपदमामनंतिवदंतीत्यन्वयःकीदृशंतस्मिन्नेवसमाहितैःकरणैरवसितंसम्यग्वशीकृतम् ३२ अत्रप्रमाणमाह तदेतदिति ३३ अतिवादान्दुष्टवचनानि ३४ श्रेयःप्राप्तौतस्मादिदंप्रकृष्टसाधनमित्याशयेनाह नमइति श्रीकृष्णचरणारविंदप्रणतिस्मरणपूर्वकंभागवतपुराणलक्षणसंहिताश्रवणमननादिकंमुख्यसाधनमित्यर्थः ॥ ३५ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेविजयध्वजकृतटीकायांपंचमोध्यायः ॥ ५ ॥ भगवन्माहात्म्यप्रकटनायतत्प्रेरितेनचतुर्मुखेननादादिवेदांतशब्दराशिमुद्धृत्याध्यापनेनपुत्रेभ्योविश्राणनंतच्छिष्येभ्योविभज्यदानमनुयुगंपुनरपितद्विभागंपुराणप्रवर्तनंचनिगदतिअनेनाध्यायेन तत्रादौशौनकः सूतंवेदविभागंपृच्छति पैलादिभिरिति वैपदेनवेदादरभिव्यक्तिर्मूलवेदविभक्तिश्चकथंकेनेतिसूचयतिव्यासशिष्यैरित्यनेनकस्मिन्युगेकिंविभेक्तवेदान्व्यस्यन्नुताविभक्तानिति वेदाचार्यैरित्यनेनवेदोपयोगिकल्पप्रणयननिपुणैरिति महात्मभिरित्यनेनतपोबलाद्वेददर्शनसमर्थैरिति अभिधेहीत्यनेनान्वर्थ

नयत्रसृज्यंसृजतोभयोःपरंश्रेयश्चजीवस्त्रिभिरन्वितःस्वयम् ॥ तदेतदुत्सादितबाध्यबाधकंनिषिध्यचोर्मीनाविरमेतन्मुनिः ३१ परंपदंवैष्णवमामनंतियन्नेतिनेतीत्यतदुत्सिसृक्षवः ॥ विसृज्यदौरात्म्यमनन्यसौहृदाहृदोपगुह्यावसितंसमाहितैः ३२ तदेतदधिगच्छंतिविष्णोर्यत्परमंपदम् ॥ अहंममेतिदौर्जन्यंनयेषांदेहगेहजम् ३३ अतिवादांस्तितिक्षेतनावमन्येतकंचन ॥ नचेमंदेहमाश्रित्यवैरंकुर्वीतकेनचित् ३४ नमोभगवतेतस्मैकृष्णायाकुंठमेधसे ॥ यत्पादांबुरुहध्यानात्संहितामध्यगामिमाम् ॥ ३५ ॥ इतिश्रीभागवतेमहा०द्वादशस्कंधेपंचमोऽध्यायः ॥ ५ ॥ शौनकउवाच ॥ पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः ॥ वेदावैकतिधाव्यस्ताएतत्सौम्याभिधेहिनः ॥१॥ सूतउवाच ॥ समाहितात्मनोब्रह्मन्ब्रह्मणःपरमेष्ठिनः ॥ हृद्याकाशादभून्नादोवृत्तिरोधाद्विभाव्यते २ यदुपासनयाब्रह्मन्योगिनोमलमात्मनः ॥ द्रव्यक्रियाकारकाख्यंधूत्वायांत्यपुनर्भवम् ३ ततोभूत्रिवृदोंकारोयोव्यक्तप्रभवःस्वराट्॥ यत्तल्लिंगंभगवतोब्रह्मणःपरमात्मनः ४

नामपूर्वकंवदेत्रि १ तत्रादौसूचितःसूतःप्रश्नंपरिहर्तुंकथामाह समाहितात्मनइति संसर्गीचीनेनिर्दुःस्वानंदानुभवेहरावाहितआत्मामनोयस्यसतथातस्य ब्रह्मपदस्यानेकार्थेवृत्तेर्विवक्षितमर्थमाह परमेष्ठिनइतिशब्दस्याकाशविशेषगुणत्वेनततोभिव्यक्तिर्युक्तेतिसूचयति हृद्याकाशादिति तत्सत्वेकिंप्रमाणमत्राह वृत्तिरोधादिति सनादःसर्वेंद्रियवृत्तिस्तंभाद्वायुवृत्तिनिरोधाच्चविभाव्यतेज्ञायते योगिनेति शेषः २ किमनुनानादेनशून्यकल्पेनफलमितितत्राह यदुपासनयेति यस्यनादस्योपासनयायोगिनोद्रव्याणिपंचभूतानितन्निर्मितदेहोवा क्रियाकर्मेंद्रियं कारकंज्ञानेंद्रियंएभ्यआख्यातंप्रकाशितंउत्पन्नमितियावत्आत्मनोमनसोमलंधूत्वाअपुनर्भवंमोक्षंयांतीत्यन्वयः स्त्रीपुंनपुंसकात्मायंनादोब्रह्मविनिर्मितः । घंटादिनादसदृशोमुक्तिस्वर्गादिदोविभुरितिवचनादपुनर्भवंतारतम्योपेतंफलमाप्नुवंतीतिभावः ३ ततोनादात्घंटानादानुकारात् त्रीन्अकारोकारमकाराख्यान्वर्णान्वृणोतीतित्रिवृत् ओंकारोभूदभिव्यक्तःव्यक्तस्यप्रपंचस्यप्रभवउत्पत्तिर्यस्यसतथा भूतभवद्भविष्यदितिसर्वमोंकारएवेतिश्रुतिः वर्णपक्षेअव्यक्तस्यहरेःसकाशात्प्रभावोयस्यसतथा स्वतएवराजतीतिस्वराट्स्वयंप्रकाशमानइत्यर्थःस्वयंपरमात्मानंराजयतीतिवा एतदेवाह यत्तदिति यत्तदोंकाराख्यंवस्तुहरेर्लिंगंज्ञापकं ओंतत्त्ववाचीत्योंकारोवक्त्यत्रौतद्गुणोततांइतिवचनात् चतुर्मुखव्यावृत्तयेपरमात्मनइति ४

संऊनंयापयतिदैत्यादेरितिशून्यंपरंब्रह्मपश्यतीतिशून्यदृक् सोब्रह्मापरोक्षीयश्चमुप्रःब्रह्मप्राप्रःसइमंस्फोटंप्रणवलक्षणंध्वनिंशृणोति कइवश्रोतेवभगवानिव श्रोतामंताइतिश्रुतेः अनेनास्यसत्त्वंप्रमाण मुक्तंभवति किंचयेनोंकारेणवाग्वेदलक्षणाव्यज्यतेअकारस्यप्रणवात्मकत्वादकारोवैसर्वावागितिश्रुतेःप्रणवस्यवेदादित्वादकारस्यापिसर्वादित्वादाप्तेरादिमत्त्वाद्वेतिश्रुतेः आत्मनःपरमात्मनःउत्पद्यमान आकाशोयस्यव्यक्तिःस्थानं आत्मनआकाशःसंभूतइतिश्रुतिःआकाशात्सर्वमुत्पद्यतइतिच ५ पूर्वलिंगत्वेनतद्विषयत्वमुक्तंअधुनावाचकत्वेवाह स्वधाम्नःस्वयंप्रकाशस्य ॐकारस्यसर्वानुगतत्वमाह स इति सओंकारःसनातनंसदातनंसर्वमंत्रोपनिषद्वेदानांबीजंफललक्षणांकुरजनकशुक्रस्थानीयंस्त्रीघंटानादवदच्छिन्नत्वेनोच्चार्यमाणंसर्वमंत्रादीनांजप्तानांफलदानसामर्थ्यं जनयतीतिभावः ६ त्रि वृदित्युक्तंविवृणोति तस्येति अकाराद्यास्त्रयोवर्णास्तस्योंकारस्यावयवाआसन्नित्यन्वयः हेत्यनेनसोयमात्माध्यक्षरमोंकारोधिमात्रंपादानांमंत्राःअकारोकारमकाराइत्यादिप्रसिद्धिमाहयद्वावृत्त्य भिव्यक्तौप्रत्यारंभःक्रियतइतिसूचयति । प्रत्यारंभे प्रसिद्धौहेत्यभिधानं एभ्यःभूर्भुवःस्वरितिनामाभिव्यक्तिवक्ति धार्यतइति चैरकारादेस्त्रयोभावाव्याहृतिलक्षणाधार्यतेऽव्याहृतिभ्योक्षरसमाम्नायोव्य ज्यतेज्ञानादिगुणानामर्थोविषयभूतेहरौवृत्तिर्येषांतेतथोक्ताः सर्ववेदोक्तगुणार्णवनारायणलीलाव्याहरणाद्वाचाहृतयइत्यर्थः यद्वाभूरादिलोकेषुशब्दादिगुणानांभोगलक्षणप्रयोजनप्रवर्तकाः ७ ततोव्याहृति

शृणोतियइमंस्फोटंसुप्रःश्रोतेवशून्यदृक् ॥ येनवाग्व्यज्यतेयस्यवक्तिराकाशआत्मनः ५ स्वधाम्नोब्रह्मणःसाक्षाद्वाचकःपरमात्मनः ॥ ससर्वमंत्रोपनि षद्वेदबीजंसनातनम् ६ तस्यहासंस्त्रयोवर्णाअकाराद्याश्चगूढह ॥ धार्यंतेयैस्त्रयोभावागुणानामर्थवृत्तयः ७ ततोक्षरसमाम्नायमसृजद्भगवानजः ॥ अंतस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम् ८ तेनासौचतुरोवेदांश्चतुर्भिर्वदनैर्विभुः ॥ सव्याहृतिकान्सोंकारांश्चातुर्होत्रविवक्षया ९ पुत्रानध्यापय त्तांस्तुमहर्षीन्ब्रह्मकोविदान् ॥ तेतुधर्मोपदेष्टारःस्वपुत्रेभ्यःसमादिशन् १० तेपरंपरयाप्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः ॥ चतुर्युगेष्वथव्यस्ताद्वापरादौ महर्षिभिः ११ क्षीणायुषःक्षीणसत्त्वान्दुर्मेधान्वीक्ष्यकालतः ॥ वेदान्ब्रह्मर्षयोव्यस्यन्हृदिस्थाच्युतनोदिताः १२ अस्मिन्नप्यंतरेब्रह्मन्भगवाँल्लोकभावनः ॥ ब्रह्मेशाद्यैर्लोकपालैर्याचितोधर्मगुप्तये १३ पराशरात्सत्यवत्यामंशांशकलयाविभुः ॥ अवतीर्णोमहाभागवेदंचक्रेचतुर्विधम् १४ ऋ गथर्वयजुःसाम्नांराशीनुद्धृत्यवर्गशः ॥ चतस्रःसंहिताश्चक्रेसूत्रैर्मणिगणानिव १५

म्योक्षरसमाम्नायमकारादिहकारांतानामक्षराणांसमीचीनंसंप्रदायंगुरुपारंपर्यक्रममसृजदित्यन्वयः । कोसौक्रमइतितंस्पष्टयति अंतस्थेति यरलवाअंतस्थाः शषसहाऊष्माणः अचःस्वराः कादयोमाव सानाःस्पर्शाः । एकमात्रोभवेद्ह्रस्वोद्विमात्रोदीर्घउच्यते । त्रिमात्रस्तुप्लुतोज्ञेयोव्यंजनंत्वर्धमात्रकंइत्यतआदिशब्दोविवृतः ८ तेनाक्षरसमाम्नायेनसव्याहृतिकान्भूर्भुवःसुवरितिवाएतास्तिस्रोव्याहृतयइत्या दिव्याहृतिसहितान्सोंकारानोमित्येतदक्षरमिदंसर्वमित्याद्योंकारसहितान् विनियोगमाह चातुर्होत्रेति चतुर्भिर्होतृभिःक्रियमाणंकर्मचातुर्होत्रम् ९ ब्रह्मकोविदान्वेदविचारविचक्षणान् तेपुत्राः १० तेवेदाःचतुर्युगेषुतत्तच्छिष्यैःपरंपरयाप्राप्ताःयथाचतुर्मुखेनाधीताअध्यापितास्तथा अध्ययनंप्राप्ताइत्यर्थः । उक्तापवादमाह अथेति अथत्रेतानंतरंद्वापरादौमहर्षिभिर्वेदाव्यस्ताअभूवन् ११ एतदेवविवृणोति क्षीणायुषइति नन्वेषांस्वातंत्र्यमागतमितिमितित्राह हृदिस्थेति १२ ननुसत्यवतीसुतेनवेदाःकस्मिन्युगेव्यस्ताइत्यत्राह अस्मिन्निति अस्मिन्श्राद्धदेवमन्वंतरे १३ १४ एतदेवविवृणोति ऋगिति ऋगादीनांराशीन्वर्गशोवर्गसंख्ययोद्धृत्यचतस्रःसंहिताश्चक्रे सूत्रैःस्यूतान् १५

तासांसंहितानांमध्येएकैकाम् १६ एकैकामित्युक्तंविशिनष्टि पैलायेति १७ तथासाम्नापुनृतांछंदोगसंहितांजैमिनयेप्राह १८ १९ इंद्रप्रमितिरपिस्वसंहितांचतुर्द्धाव्यस्यविभज्यशि
ष्यान्साम्नानिर्दिशति बोध्यायेति हेभार्गवइंद्रप्रमितिरपिआत्मवान्परमात्मज्ञानी २० कविनाम्नामांडूकेयमृषिंचस्वसंहितांअध्यापयत्तस्यमांडूकेयस्य २१ तस्यसुतोवेदमित्रस्यपुत्रः वात्स्याादिषुपंचसु
अधाददात् २२ तस्यशाकल्यस्यशिष्यःसनिरुक्तांनिरुक्तसहितां २३ बाष्कलिःपूर्वोक्तबाष्कलपुत्रःप्रतिशाखाभ्यःपूर्वोक्तसर्वशाखाभ्यः उद्धृत्यबालखिल्याख्यसंहितांचक्रेतांनाम्नाबालखि
ल्यसंहितांबालायनिप्रभृतयोदधुःअधीतवंतः २४ उक्ताएताःसंहितानाम्नाविशिनष्टि बह्वृचाइतिऋग्वेदसंहिताः किमनेनछंदसाव्यासेनश्रुतेनाधीतेननिःश्रेयसानुपयुक्तेनेतितत्राह श्रुत्वेति २५
चरकास्तीर्थसेवकाःअध्वर्यवोयज्ञकर्मणिनिपुणाःऋत्विग्विशेषाः २६ तस्यवैशंपायनस्यशिष्योयाज्ञवल्क्योगुरुमित्याह हेभगवन्गुरोब्रह्महत्यांहःक्षपणायव्रतंचेरुरितियस्मात्तस्मादंहःप्रत्यल्पसारा

तासांसचतुरःशिष्यानुपहूयमहामतिः ॥ एकैकांसंहितांब्रह्मन्नेकैकस्मैददौविभुः १६ पैलायसंहितामाद्यांबह्वृचाख्यामुवाचह ॥ वैशंपायनसंज्ञायनिग
दाख्ययजुर्गणम् १७ साम्नांजैमिनयेप्राहतथाछंदोगसंहिताम् ॥ अथर्वांगिरसांनामस्वशिष्यायसुमंतवे १८ पैलःस्वसंहितामूचेइंद्रप्रमितयेमुनिः ॥
बाष्कलायचसोप्याहशिष्येभ्यःसंहितांस्वकाम् १९ चतुर्धाव्यस्यबोध्यायययाज्ञवल्क्यायभार्गव ॥ पराशरायाग्निमित्रेइंद्रप्रमितिरात्मवान् २० अ
ध्यापयत्संहितांस्वांमांडूकेयमृषिंकविम् ॥ तस्यशिष्योवेदमित्रःसौभर्यादिभ्यऊचिवान् २१ शाकल्यस्तत्सुतस्तांतुपंचधाव्यस्यसंहिताम् ॥ वात्स्य
मौद्गल्यशालीयगोसत्यशिशिरेष्वधात् २२ जातूकर्ण्यश्चताच्छिष्यःसनिरुक्तांस्वसंहिताम् ॥ व्यलीकपैंगिपैलालविरजेभ्योददौमुनिः २३ बाष्कलिः
प्रतिशाखाभ्योबालखिल्याख्यसंहिताम् ॥ चक्रेबालायनिर्गाम्यकासाराश्चैवतांदधुः २४ बह्वृचाःसंहिताह्येताएभिर्ब्रह्मर्षिभिर्धृताः ॥ श्रुत्वैतच्छंदसां
व्यासंसर्वपापैःप्रमुच्यते २५ वैशंपायनशिष्यावैचरकाध्वर्यवोभवन् ॥ यच्चेरुर्ब्रह्महत्यांहःक्षपणायगुरोर्व्रतम् २६ याज्ञवल्क्यस्तुतच्छिष्यआहांहोभगव
न्कियत् ॥ चरितेनाल्पसाराणांचरिष्येहंसुदुष्करम् २७ इत्युक्तोगुरुरप्याहकुपितोयाह्यलंत्वया ॥ विप्रावमंत्राशिष्येणमदधीतंत्यजाश्विति २८ देवरा
तसुतःसोपिछर्दित्वायजुषांगणम् ॥ ततोगतोथमुनयोददृशुस्तान्यजुर्गणान् २९ भूत्वातित्तिरयोब्रह्मंस्तल्लोलुपतयाददुः ॥ तैत्तिरीयाइतियजुःशाखाआ
सन्सुपेशलाः ३० याज्ञवल्क्यस्ततोब्रह्मन्छंदांस्यधिगवेषयन् ॥ गुरोरविद्यमानानिसूपतस्थेर्कमीश्वरम् ३१ याज्ञवल्क्यउवाच ॥ ॐनमोभगवतेआ
दित्यायाखिलजगदात्मस्वरूपेणकालरूपेणचचतुर्विधभूतनिकायानांब्रह्मादिस्तंबपर्यंतानामंतर्हृदयेषुबहिरपिआकाशइवोपाधिनाव्यवधीयमानोभगवा
नेकएवक्षणलवनिमेषाद्यवयवोपचितसंवत्सरगणेनतोयादानविसर्गाभ्यामिमांलोकयात्रामनुवहति १

णोमेतेषांचरितेनकियत्किंप्रयोजनंस्यादहंदुश्चरंव्रतचरिष्येकरिष्यामीति २७ ततोगुरुणाकिमुक्तमत्राह इतीति विप्रावमंत्राब्राह्मणावज्ञाकर्त्राशिष्येणत्वयालं इतोयाहिकिंचमदधीतंआशुत्य
जउत्सृजेति २८ देवरातसुतःयाज्ञवल्क्यः ततोगुरुकुलात् २९ तल्लोलुपतयायजुर्गणग्रहणेच्छावत्त्वेनाददुःस्वीचक्रुः ३० छंदांस्यधिगवेषयन्भ्येतुंमृगयन्नर्कपरमानंदरूपत्वादद्रिरात्मार्च
नाच्चसूर्यतर्यामित्वाच्चतन्नामानमीश्वरंनारायणंसुष्टूपतस्थेतुष्टाव ३१ ॐब्रह्मनाम्ने ॥ ॐस्याद्ब्रह्मण्यनुज्ञायामितियादवः अथकस्मादुच्यतेब्रह्मेतिबृहंतोह्यस्मिन्गुणाइतिश्रुतेः गुणैरोतत्वादोंकार

स्याप्ययमेवार्थःइममेवार्थंसूचयति भगवतइति भगवतेपद्मुपपर्णायअयंवसिष्ठादिवदिदानींतनोभगवान्नेत्याह आदित्यायआदिभवायपुरातनाय यद्वा अखंडितैश्वर्यायएततद्रूपमुपपादयति अखिलेति योभगवान्ब्रह्मादिस्तंबपर्यंतानांअंडजादिभेदेनचतुर्विधभूतसमूहानांहृदयेष्वंतरखिलजगदात्मस्वरूपेणसमस्तजगदंतर्यामिस्वरूपेणस्थितोबहिरपिक्षणलवनिमेषाद्यवयवोपचितसंवत्सरगणलक्षणेनकालरूपेणाकाशइवव्यवधीयमानः तोयादानविसर्गाभ्यांप्रत्यब्दंतापस्यआदानंशोषणंविसर्गोवृष्टिस्ताभ्यामिमांलोकयात्रामनुवहति यद्वा घटाद्युपाधिनाकाशइवसुरनरादिशरीरोपाधिनाव्यवधीयमानःपरिच्छिद्यमानइति १ हेविबुधर्षभेहसवितःतवयद्दामंडलमनुसवनंतपतिप्रकाशतेइहवावेत्यलंकारार्थः हेतपनप्रकाशनशील तत्समभिधीमहिसम्यक्चिंतयामः कीदृशंमंडलंअहरहराम्नायविधिनावेदोक्तप्रकारेणोपतिष्ठमानानांसेव्यमानानामखिलानांदुरितानांदुष्पापानांदुःसहानांवृजिनानांदुःखानांबीजानिदुष्कर्माण्यवभर्जयितुंशीलमस्यास्तीति अस्मिन्नेवार्थेल्युट्प्रत्ययः २ इहभुवियोवावस्वनिकेतनानांस्वाश्रयाणांस्थिरचरनिकराणामात्मास्वामीअंतःस्थित्वासुखप्रकश्चतत्वमनारोपितस्वभावःस्वयंतेषामनात्मनअचेतनमायान्मनइंद्रियासुगणान्प्रचोदयतिप्रेरयति अनेनविशेषणद्वयेन तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि । धियोयोनःप्रचोदयादित्यर्चिवृतःयोनोधियोज्ञानसाधनत्वाद्रिंद्रपाणिप्रचोदयात्तस्यसवितुर्जगत्स्रष्टुः भर्गःसकलदुःखबीजभर्जनकंवरेण्यंरमणीयंतन्मंडलंधीमहीति आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्चेति ३ अतिकरालंवदनंयस्यसतथासएवांधकारःअज्ञानलक्षणस्तन्नाम्नाजगरग्रहेणगृहीतंग्रस्तंमृतकमिवशव

यदिहवावविबुधर्षभसवितरदस्तपत्यनुसवनमहरहराम्नायविधिनोपतिष्ठमानानांअखिलदुरितवृजिनबीजावभर्जनंभगवतःसमभिधीमहितपनमंडलम् ॥ २ यइहवावस्थिरचरनिकराणांस्वनिकेतनानांमनइंद्रियासुगणाननात्मनस्तत्त्वंस्वयमात्मांतर्यामीप्रचोदयति ३ यएवेमंलोकमतिकरालवदनांधकारसंज्ञाजगरग्रहगृहीतंमृतकमिवविचेतनमवलोक्यानुकंपयापरमकारुणिकईक्षयैवोत्थाप्याहरहरनुसवनंश्रेयसिस्वधर्माख्यआत्मावस्थानेप्रवर्तयत्यनिमिषाधिपतिरसाधूनांभयमुदीरयन्नटतिपरितआशापालैस्तत्रतत्रकमलकोशांजलिभिरुपहृतार्हणः ४ अथहभगवंस्तवचरणनलिनयुगलंत्रिभुवनगुरुभिरभिवंदितमहमयातयामयजुःकामउपसरामीति ५ सूतउवाच ॥ एवंस्तुतःसभगवान्वाजिरूपधरोरविः ॥ यजूंष्ययातयामानिमुनयेऽदात्प्रसादितः ३२ यजुर्भिरकरोच्छाखादशपंचसुतैर्विभुः ॥ जगृहुर्वाजसन्यस्ताःकाण्वमाध्यंदिनादयः ३३ जैमिनेःसामगस्यासीत्सुमंतुस्तनयोमुनेः ॥ सुमन्वांस्तत्सुतस्ताभ्यामेकैकांप्राहसंहिताम् ३४ सुकर्माचापितच्छिष्यःसामवेदतरोर्महान् ॥ सहस्रसंहिताभेदंचक्रेसाम्नांततोद्विजः ३५

वत्तचेतनकल्पमिमंलोकंजनमवलोक्यद्रवीकृतचित्तवृत्त्यापरमकारुणिकोयोभवानीक्षयैवकटाक्षनिरीक्षणेनैवतमुत्थाप्यानुदिनमात्मनः परमात्मनोवस्थानंप्राप्तियेस्मात्तत्तथातस्मिन्स्वधर्माख्येश्रेयसिप्रवर्तयत्येव चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेरितिश्रुतेः कालप्रणायकोपश्चभवानाशापालैरिंद्रादिभिःकमलकुड्मलांजलिभिस्तत्रतत्रसमुपाचितोऽसाधूनांमरणभयमुदीरयन्परितःअटतिपरिवर्तते आप्राद्यावापृथिविअंतरिक्षमितिश्रुतिः तस्मैतुभ्यंनमइतिपूर्वेणान्वयः ४ स्वाभिप्रायमुद्गलयति अथेति यस्मादयातयामयजुष्कामोथतस्मात्त्रिभुवनगुरुभिरभिवंदितंतवचरणनलिनयुगलमुपसरामिशरणंगतोस्मीतितुष्टावेत्यर्थः ५ वाजिरूपधरः अश्वरूपधरःअयातयामानिअगतसाराणिवीर्यवंतीत्यर्थः ३२ वाजसनःसूर्यस्ततःआगताःशाखावाजसन्यःताःशाखाःकाण्वादयोमाध्यंदिनादयश्च ३३ सामगायतीतिसामगःतस्यजैमिनेस्तनयःसुमंतुर्नामतस्यसुमंतोःसुतःसुमन्वान्नामताभ्यांसुमंतुसुमन्वभ्यांपुत्रपौत्राभ्यांक्रमेणैकामेकांप्राह ३४ सुकर्मापितस्यजैमिनेःशिष्यःमहानतिप्रज्ञावान्सामवेदाख्यतरोःसाम्नांसहस्रसंहितारूपंभेदंचक्रे ३५

कौसल्यःकोसलपुत्रः हिरण्यनाभश्चपौष्यंजिश्चसुकर्मणःशिष्यौजगृहतुःसामशाखामितिशेषः . अन्यआवंत्यउदीच्यश्चसामशाखांजगृहतुरितिशेषःपौष्यंज्यावंत्ययोश्चापिसामगाःपंचशतानिशिष्याआसन् ३६ ३७ तेषांसमुदितानांमतानांनामानीतिपौष्यंजिशिष्यालौगाक्ष्यादयःनाम्नाशतंशतंसंहिताजगृहुः३८ हिरण्यनाभस्यशिष्यःनाम्नाकृतःचतुर्विंशतिसंहिताःस्वशिष्येभ्यऊचेशेषाअन्याःसंहिताआत्मज्ञा नवानावंत्यःस्वशिष्येभ्यऊचे ३९ सोपिसुमंतोः शिष्योपिपथ्याय ४० कुमुदादयःपथ्यशिष्याः ४१ बभ्रुसैंधवायनौपथ्यशिष्यस्यअंगिरसोंगिरोगोत्रेविद्यमानस्यशुनकस्यशिष्यौअधीयेतांअधीतवंतौ शुनकस्तुद्विधाकृत्वाददावेकांतुबभ्रवे । द्वितीयांसंहितांप्रादात्सैंधवायनसंज्ञितेइति सावर्ण्याद्याश्चसैंधवादीनांशिष्याः ४२ आथर्वणाचार्याःअथर्ववेदाचार्याःषाठतोर्थतश्चाथर्ववेदप्रवर्तकाइत्यर्थः पौराणि कान्पुराणाचार्यान् ४२ ४४ मत्पितुर्मुखात्पुराणसंहितामधीयंत त्रय्यारुण्यादयःकथंएकैकामधीतवंतःत्वंतुकथंसर्वानधीतवानितितत्राह अहमिति अहमेतेषांशिष्यःसर्वांपुराणसंहितामपठं ४९ व्या

हिरण्यनाभःकौसल्यःपौष्यंजिश्चसुकर्मणः ॥ शिष्यौजगृहतुश्चान्यआवंत्योब्रह्मवित्तमः ३६ उदीच्याःसामगाःशिष्याआसन्पंचशतानिवै ॥ पौष्यं ज्यावंत्ययोश्चापितांश्चोदीच्यान्प्रचक्षते ३७ लौगाक्षिर्लांगलिःकुल्यःकुसीदःकुक्षिरेवच ॥ पौष्यंजिशिष्याजगृहुःसंहितास्तेशतंशतम् ३८ कृतोहि रण्यनाभस्यचतुर्विंशतिसंहिताः ॥ शिष्यऊचेस्वशिष्येभ्यःशेषाआवंत्यआत्मवान् ३९ अथर्ववित्सुमंतुश्चशिष्यमध्यापयत्स्वकाम् ॥ संहितांसोपिप थ्यायवेददर्शायचोक्तवान् ४० शौक्लायनिर्ब्रह्मबालिर्मोदोषःपिप्पलायनिः ॥ वेददर्शस्यशिष्यास्तेपथ्यशिष्यानथोशृणु ॥ कुमुदःशुनकोब्रह्मन्नजाज लिश्चाप्यथर्ववित् ४१ बभ्रुःशिष्योप्यंगिरसःसैंधवायनएवच ॥ अधीयेतांसंहितेद्वेसावर्ण्याद्यास्तथापरे ४२ नक्षत्रकल्पःशांतिश्चकश्यपांगिरसाद यः ॥ एतेआथर्वणाचार्याःशृणुपौराणिकान्मुने ४३ त्रय्यारुणिःकश्यपश्चसावर्णिरकृतव्रणः ॥ शिंशपायनहारितौषड्वैपौराणिकाइमे ४४ अधीयंतव्यासशिष्यात्संहितांमत्पितुर्मुखात् ॥ एकैकामहमेतेषांशिष्यःसर्वासमध्यगाम् ४५ काश्यपोहंचसावर्णीरामशिष्योकृतव्रणः ॥ अधीमहि व्यासपुत्राच्चतस्रोमूलसंहिताः ४६ पुराणलक्षणंब्रह्मन्ब्रह्मर्षिभिर्निरूपितम् ॥ शृणुष्वबुद्धिमाश्रित्यवेदशास्त्रानुसारतः ४७ सर्गश्चैवविसर्गश्चवृत्तिरक्षां तराणिच ॥ वंशोवंशानुचरितंसंस्थाहेतुरपाश्रयः ४८ दशभिर्लक्षणैर्युक्तंपुराणंतद्विदोविदुः ॥ क्वचित्पंचविधंब्रह्मन्महदल्पव्यवस्थया ४९ अव्याकृतगुणक्षोभान्महतस्त्रिवृतोहमः ॥ भूतसूक्ष्मेंद्रियार्थानांसंभवःसर्गउच्यते ५० पुरुषानुगृहीतानामेतेषांवासनामयः ॥ विसर्गोयःसमाहारोजी वोजीवश्चराचरः ५१

सपुत्राच्छ्रीशुकात् ४६ प्रसंगात्पुराणलक्षणंवक्तुंप्रतिजानीतेपुराणेति ४७ वृत्तिश्चरक्षाचअंतराणिचवृत्तिरक्षांतराणि ४८ पुराणस्यमहदल्पव्यवस्थयाक्वचित्स्थलेपंचविधंपंचलक्षणप्रकारो पेतम् ४९ तत्रसर्गादिकंक्रमेणलक्षयति अव्याकृतेति अव्याकृतगुणक्षोभात्प्रकृतिगुणानामन्योन्यसंयोगलक्षणसंचलनान्महतःमहत्तत्वस्यवैकारिकादिभेदेनात्रिवृतोहमः अहंकारस्यभूतसूक्ष्मेंद्रियार्थानांपं चभूतसूक्ष्मेंद्रियविषयाणांसंभवोजन्ममात्रेंद्रियधियांजन्मेत्यधस्तादुक्तम् ५० पुरुषेणभगवतानुगृहीतानांअनुप्रवेशलक्षणानुग्रहवतामेतेषांतत्त्वानांसकाशाद्वासनामयोयःसमाहारस्तत्तत्कर्मवासनानुरू तिःसृष्टिःसविसर्गोजीवः अजीवश्चेतनाचेतनलक्षणःचराचरःचराचरात्मकोब्रह्मांडसर्गः ब्रह्मणोगुणवैषम्याद्विसर्गःपौरुषःस्मृतइति ५१

पंचानांभूतानांपंचभूतान्येवान्योन्यंवृत्तिर्जीवनमत्रमित्यर्थः तेजोवृत्तिःपार्थिवानिदारुगीत्यादि यद्वा भूतानांपिशाचानांभूतानिमनुष्यलोकस्थानिशरीररुधिराणि पिशाचोगुह्यकःसिद्धोभूतोमीदेवयोनय इत्यमरः। चराणांगतिमतां अचराणिस्थावरतुल्यानिव्रीह्यादीनिवृत्तिः इंधनहरिणाकृताकल्पिता। अहस्तानिसहस्तानांसहस्तानिचपुष्पदां। अणूनितातमहतांजीवोजीवस्यजीवनमित्युक्तं तत्रैवंस्थितिर्नृणांवृत्तिःकामादिच्छातःफलमूलादीनिचोदनयाविधिनातत्तत्क्रियानुसारेणविहिताधरुपुरोडाशादिलक्षणा ५२ युगेयुगेविश्वस्यअनुयोग्याअच्युतावतारेहा हरेरवतारेणचेष्टा परिरक्षणंरक्षा यदापदाहिधर्मस्येतिगीतायां कुत्रेति तत्राह तिर्यगिति यैरवतारैस्त्रयीद्विषः वेदवैरिणोऽसुराहन्यंतेतेषांचरितवर्णनंरक्षणमित्यर्थः स्थितिर्वैकुंठविजयइतिपोषणंतदनुग्रहइतिच ५३ एतन्मन्वंतरंषड्विधमुच्यते षण्णांकथाकथनंमन्वंतरमित्यर्थः तत्रांशकानामितिशेषः मन्वंतरेषुतद्धर्माइतिमन्वादिधर्मकथनमित्यर्थः ५४ मनुप्रसूतानांराज्ञामन्वयोवंशइत्युच्यते कीदृशस्त्रैकालिकोभूतभविष्यद्वर्तमानविषयः एतत्कथनमत्रेतिवंशस्यानुचरितंनामतेषांराज्ञांवृत्तिकथनंयेवंशधराउत्सन्नवंशंधृतवंतस्तेषांचवृत्तम् ५५ अस्यजगतःस्वभावतश्चतुर्धालयःसंस्थेतिकविभिःप्रोक्ता ५६ यंचप्रलयेपरमात्मानमनुविशयशायिनंस्वपंतमाहुःअपरेअव्याकृतंअव्याकृताकाशवन्निर्विकारंप्राहुःसोऽविद्ययाकर्मकारकःकर्मकर्ता अस्यजगतःसर्गादिनिमित्तभूतोजीवोहेतुरित्युच्यते जीवसमुदायःसुखदुःखप्राप्तयेतंहेतुंकृत्वाज

वृत्तिर्भूतानिभूतानांचराणामचराणिच ॥ कृतेशेननृणांतत्रकामाच्चोदनयापिवा ५२ रक्षाच्युतावतारेहाविश्वस्यानुयुगेयुगे ॥ तिर्यङ्मर्त्यर्षिदेवेषुहन्यंतेयैस्त्रयीद्विषः ५३ मन्वंतरंमनुर्देवामनुपुत्राःसुरेश्वराः ॥ ऋषयोंशावताराश्चहरेःषड्विधमुच्यते ५४ राज्ञांमनुप्रसूतानांवंशस्त्रैकालिकोन्वयः ॥ वंशानुचरितंतेषांवृत्तंवंशधराश्चये ५५ नैमित्तिकःप्राकृतिकोनित्यआत्यंतिकोलयः ॥ संस्थेतिकविभिःप्रोक्ताचतुर्धास्यस्वभावतः ५६ हेतुर्जीवस्यसर्गादेरविद्याकर्मकारकः ॥ यंवानुशायिनंप्राहुरव्याकृतमुतापरे ५७ व्यतिरेकान्वयोयस्यजाग्रत्स्वप्नसुषुप्तिषु ॥ मायामयासुतद्ब्रह्मजीववृत्तिष्वपाश्रयः ५८ पदार्थेषुयथाद्रव्यंतन्मात्रंरूपनामसु ॥ बीजादिपंचतांतासुह्यवस्थासुयुतायुतम् ५९ विरमेतयदाचित्तंहित्वावृत्तित्रयाश्रयम् ॥ योगेनवातदात्मानंवेदनात्मानिवर्तते ६० एवंलक्षणलक्ष्याणिपुराणानिपुराविदः ॥ मुनयोष्टादशप्राहुःक्षुल्लकानिमहांतिच ६१

गतःसृष्ट्यादिकंप्रवर्ततइतिनिरोधोस्यानुशयनमात्मनःसहशक्तिभिरिति ५७ अपाश्रयंलक्षयति व्यतिरेकान्वयाविति अपगताश्रयोयस्यसतथाअद्वितीयइत्यर्थःअद्वितीयत्वंकथमुच्यते अन्वयव्यतिरेकाभ्यांज्ञायतइति यस्यहेरर्जीववृत्तिषुजीवानांजीवनोपायभूतासुजाग्रत्स्वप्नसुषुप्तिषुव्यतिरेकान्वयौस्तः जाग्रदाद्यभावोपिविद्यतइतिव्यतिरेकःतद्भावेप्यस्तीत्यन्वयः मायामयासुश्रीहरीच्छारचितासुतद्ब्रह्मव्यपाश्रयइत्युच्यते ५८ प्रकारांतरेणआश्रयंलक्षयति पदार्थेष्विति रूपनामयुक्तेषुपदार्थेषुयद्द्रव्यमुपादानादिकारणभूतंप्रकृत्याख्यंतन्मात्रंपदार्थस्वरूपंतस्मिन्द्रव्येबीजादिपंचतांतासुजन्मादिमरणावसानास्ववस्थासुयुतायुतं अन्वयव्यतिरेकाभ्यांयद्वर्ततेतद्ब्रह्मापाश्रयं यद्वा रूपनामप्रपंचपदार्थेषुयुतायुतमन्वयव्यतिरेकलक्षणानुमानेनयत्तन्मात्रंविज्ञानानंदमात्रंद्रव्यंद्रुतंज्ञेयंयद्धीजत्वाद्यवस्थासुवस्तुनः पंचत्वावसानलक्षणावस्थासुयुतायुतंवर्ततेतद्ब्रह्मेति ५९ एतादृशब्रह्मप्राप्तिःकदास्यादितित्राह विरमेतेति वृत्तित्रयाश्रमंजाग्रत्स्वप्नसुषुप्तिलक्षणवृत्तित्रयविरूढंचित्तंहित्वावृत्तित्रयाद्विरमेतउपरतंभवति तदायोगेनध्यानलक्षणयोपासनायानिरंतरंश्रीनारायणकथाश्रवणलक्षणोपासनयाचात्मानं परमात्मानंवेदजानातिलभतेप्राप्नोतिच ततःकिमत्राह नेति आत्माजीवःपुर्नानिवर्ततेनैवनचपुनरावर्ततेनचपुनरावर्ततइतिश्रुतेः ६० उपसंहरन्नेवपुराणानांक्षिप्रप्रवृत्तयेसंख्यामाह एवमिति क्षुल्लकानिलोकसंख्ययापरिमितानिनत्वर्थतःकानिचिदर्थतःशब्दतःफलतोपिमहांति ६१

तानिक्रमेणनिर्दिशति ब्राह्ममित्यादिना ६२ त्रिषट्अष्टादश ६३ अत्रशिष्यप्रशिष्यैःशाखाप्रणयनंवेदपुराणकर्तुर्ब्रह्मणोनाभिमतंकृतमितिमाशंकीत्याह ब्रह्मणेति शिष्यादीनामेतच्छा
खाप्रणयनंब्रह्मणैवसमाख्यातंकथितं कीदृशंब्रह्मतेजोविदीपनंब्रह्मतेजसःप्रकाशकं निरर्थकंप्रणयनंकिमर्थंकृतमित्यतोवाह ब्रह्मेति ब्रह्मणःपरमात्मनस्तेजसःप्रभावस्यविदीपनंप्रकाशनकरम् ६४ इति
श्रीभागवतेमहापुराणेद्वादशस्कंधेविजय०टीकायांषष्ठोऽध्यायः ॥ ६ ॥ अस्मिन्नध्यायेमार्कंडेयकथाव्याजेनहरेर्निरतिशयमाहात्म्यंब्रूते पुराणविभागप्रसंगेनपुराणकर्तुर्मार्कंडेयस्यचरितंतत्रशौनकःसू
तंपृच्छतिसूतेति वदभगवत्कथाद्योतिनींकथामितिशेषः १ येनकल्पांतेनइदंजगद्भस्तंतास्मिन्कल्पांतेप्युर्वरितःअवशिष्टः २ अस्मत्कुलसंबंधित्वात्तच्चरितमवश्यंश्रवणार्हमित्याशयवानाह
सवाइति तस्यभूतानांमध्येकोपिसंप्लवोलयोनजायते लुङ्त्वेलट् पंचभूतानांकोपिसंप्लवोनाशइतिवा ३ तस्यामवस्थायांप्रलयइवार्णवेपुरुषंददर्शकेलेतिवा यतःसंशयान्महाकौतूहलविष

ब्राह्मंपाद्मंवैष्णवंचशैवंलिंगंचगारुडम् ॥ नारदीयंभागवतमाग्नेयंस्कंदसंज्ञितम् ६२ भविष्यंब्रह्मवैवर्तंमार्कंडेयंसवामनम् ॥ वाराहंमात्स्यंकौर्म्यंचब्रह्मां
डाख्यमितित्रिषट्६३ब्रह्मणैतत्समाख्यातंशाखाप्रणयनंमुने ॥ शिष्यशिष्यप्रशिष्याणांब्रह्मतेजोविदीपनम् ६४॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधे
वेदशाखाप्रणयनंनामषष्ठोध्यायः ॥ ६ ॥ शौनकउवाच ॥ सूतजीविचिरंसाधोवदनोवदतांवर ॥ तमस्यपारेभ्रमतांनृणांत्वंपारदर्शनः १ आहुश्चिरायुष
मृर्षिमृकंडुतनयंजनाः ॥ यःकल्पांतेप्युर्वरितोयेनग्रस्तामिदंजगत् २ सवाअस्मत्कुलोत्पन्नःकल्पेस्मिन्भार्गवर्षभः ॥ नैवाधुनापिभूतानांसंप्लवःकोपिजाय
ते ३ एकएवार्णवेभ्राम्यन्ददर्शपुरुषंकिल ॥ वटपत्रपुटेतोकंशयानंत्वेकमद्भुतम् ४ एषनःसंशयोभूयान्जातःकौतूहलंयतः ॥ तन्नश्छिंधिमहायोगिन्पु
राणेष्वपिसंमतः ॥ ५ ॥ सूतउवाच ॥ प्रश्नस्त्वयामहर्षेयंकृतोलोकभ्रमापहः ॥ नारायणकथायत्रगीताकलिमलापहा ६ प्राप्तद्विजातिसंस्कारोमार्कं
डेयःपितुःक्रमात् ॥ छंदांस्यधीत्यधर्मेणतपःस्वाध्यायसंयुतः ७ बृहद्व्रतधरःशांतोजटिलोवल्कलांबरः ॥ बिभ्रत्कमंडलुंदंडमुपवीतंसमेखलम् ८ कृ
ष्णाजिनंसाक्षसूत्रंकुशांश्चनियमैर्युतः ॥ अभ्यर्कगुरुविप्रांश्चस्वर्चयन्संध्ययोर्हरिम् ९ सायंप्रातःसगुरवेभैक्ष्यमाहृत्यवाग्यतः ॥ बुभुजेगुर्वनुज्ञातःसकृन्नो
चेदुपोषितः १० एवंतपःस्वाध्यायपरोवर्षाणामयुतायुतम् ॥ आराधयन्हृषीकेशंजिग्येमृत्युंसुदुर्जयम् ११ ब्रह्माभृगुर्भवोदक्षोब्रह्मपुत्राश्चयेपरे ॥
नृदेवपितृभूतानितेनासन्नतिविस्मिताः १२ इत्थंबृहद्व्रतधरस्तपःस्वाध्यायसंयमैः ॥ दध्यावधोक्षजंयोगाद्ध्वस्तक्लेशोंतरात्मना १३ तस्यैवंयुंजतश्चित्तंम
हायोगेनयोगिनः ॥ व्यतीयायमहान्कालोमन्वंतरषडात्मकः १४ एतत्पुरंदरोज्ञात्वासप्तमेस्मिन्किलांतरे ॥ तपोविशंकितोब्रह्मन्नारभेतद्विघातनम् १५
गंधर्वाप्सरसःकामंवसंतंमलयानिलम् ॥ मुनयेप्रेषयामासरजस्तोभमदौतथा १६

योर्थःममसंशयच्छेदनंकथमुपपद्यपतइतितत्राह पुराणेष्विति ज्ञातृत्वेनसंमतोभवानिति ५ मार्कंडेयकथायालोकाज्ञाननिवारणसामर्थ्यंकुतइत्यत्राह नारायणेति यत्रमार्कंडेयकथायांत
त्कथाविषयःप्रश्नः ६ पितुर्मृकंडोःप्राप्तद्विजातिसंस्कारःअन्नप्राशनोपनयनांतब्राह्मणसंस्कारान्प्राप्तः ७ बृहद्व्रतधरःब्रह्मचारिव्रतधरः ८ हरिंस्मरन्निितिशेषः ९ नोचेदनुज्ञाभावे १० ११
तेनकर्मणा १२ मनोयोगादंतरात्मनांतर्यामिणाध्वस्तक्लेशः १३ १४ अस्मिन्सप्तमेमन्वंतरेतपसोविशंकितस्तद्विघातनंतस्यतपसोविघ्नम् १५ रजोगुणं स्तोभमदौव्यर्थकर्मदर्पौच अ
त्रकामादयोमूर्तिमंतोनिर्दिश्यंते १६

१७ १८ आटोपंसविलासनृत्यम् १९ उत्तंभयन्वर्धयन् २० उद्यच्चंद्रोयस्यसतथासचनिशावक्त्रःप्रदोषोयस्यसतथा कुसुमाकरः वसंतःप्रवालस्तबकालिभःभृंगगायन्द्रुमलताभुजैः सहासीदाविरितिशेषः २१ आत्तचापेपुर्धनुर्ज्यासहितबाणःस्वःस्त्रीयूथपतिःस्वर्गस्त्रीगणनाथः २२ अग्निंहुत्वोपासीनमग्निसखींपतिष्ठंतं दुराधर्षंचलितेंद्रियंकर्तुमशक्यम् २३ २४ २५ पुंजकस्थल्याःअप्सरसांप्रधानायाःकस्याश्चिदप्सरसःकेशविभ्रंशितस्रजःकेशभागात्विभ्रंशितावविभ्रष्टास्रक्कयस्याःसातथातस्याः २६ अनुकंदुकंउत्पतत्कंदुकानुकूलंयथाभवतितथाचलंत्याःसूक्ष्मम णुतरं त्रुटितमेखलंत्रुटिताछिन्नामेखलाकांचीयस्यतत्तथातत् २७ स्वेनात्मनाजितम् २८ अर्भकाअहिंप्रबोध्येव २९ अहमोऽहंकारस्यभावंनागात्कपालमुक्तनारिकेलफलवद्देहाभिमानरहितइत्यर्थः

तेवैतदाश्रमंजग्मुर्हिमाद्रेःपार्श्वउत्तरे ॥ पुण्यभद्रानदीयत्रचित्राख्याचशिलाविभो १७ तत्राश्रमपदंपुण्यंपुण्यद्रुमलतान्वितम् ॥ पुण्यद्विजकुलाकीर्णंपु ण्यामलजलाशयम् १८ मत्तभ्रमरसंगीतंमत्तकोकिलकूजितम् ॥ मत्तबर्हिनटाटोपंमत्तद्विजकुलाकुलम् १९ वायुःप्रविष्टआदायहिमनिर्झरसीक रान् ॥ सुमनोभिःपरिष्वक्तोववावुत्तंभयन्स्मरम् २० उद्यच्चंद्रनिशावक्त्रःप्रवालस्तबकालिभिः ॥ गायद्भिर्द्रुमलताजालैस्तत्रासीत्कुसुमाकरः २१ अन्वीयमानो गंधर्वैर्गीतवादित्रयूथपैः ॥ अदृश्यतात्तचापेषुःस्वःस्त्रीयूथपतिःस्मरः २२ हुत्वाग्निंसमुपासीनंददृशुःशक्रकिंकराः ॥ मीलिताक्षंदुराधर्षंमूर्तिमंतमिवानलम् २३ ननृतुस्तस्यपुरतःस्त्रियोऽथोगायकाजगुः ॥ मृदंगवीणापणवैर्वाद्यंचक्रुर्मनोरमम् २४ संदधेस्त्रंस्वधनुषिकामःपंचमुखंतदा ॥ मधुर्मदोरजस्तोभइंद्रभृत्याह्य कंपयन् २५ क्रीडंत्याःपुंजकस्थल्याःकंदुकैःस्तनगौरवात् ॥ भृशमुद्विग्नमध्यायाःकेशविभ्रंशितस्रजः २६ इतस्ततोभ्रमद्दृष्टेश्चलंत्याअनुकंदुकम् ॥ वा युर्जहारतद्वासःसूक्ष्मंत्रुटितमेखलम् ॥ २७ विससर्जततोबाणंमत्वातंस्वजितंस्मरः ॥ सर्वेतत्राभवन्मोघमनीशस्ययथोद्यमः २८ तइत्थमपकुर्वंतोमुने स्तत्तेजसामुने ॥ दह्यमानानिवर्तुःप्रबोध्याहिमिवार्भकाः २९ इतींद्रानुचरैर्ब्रह्मन्धर्षितोपिमहामुनिः ॥ यत्रागादहमोभावंनतच्चित्रंमहत्स्वपि ३० दृष्ट्वानिस्तेजसंकामंसगणंभगवान्स्वराट् ॥ श्रुत्वानुभावंब्रह्मर्षेर्विस्मयंसमगात्परम् ३१ तस्यैवंयुंजतश्चित्तंतपःस्वाध्यायसंयमैः ॥ अनुग्रहायाविरासीन्नरना रायणोहरिः ३२ तौशुक्लकृष्णौनवकंजलोचनौचतुर्भुजौरौरववल्कलांबरौ ॥ पवित्रपाणीउपवीतकंत्रिवृत्कमंडलुंदंडमृजुंचवैणवम् ३३ पद्माक्षमालामुतजंतु मार्जनंवेदंचसाक्षात्तपएकरूपिणौ ॥ तपत्तडिद्वर्णपिशंगरोचिषाप्रांशूदधानौविबुधर्षभार्चितौ ३४ तेवैभगवतोरूपेनरनारायणावृषी ॥ वीक्ष्योत्थायादरे णोच्चैर्ननामांगेनंदडवत् ३५ एतत्संदर्शनानंदनियतात्मेंद्रियाशयः ॥ हृष्टरोमाश्रुपूर्णाक्षोनसेहेतावुदीक्षितुम् ३६ उत्थायप्रांजलिःप्रह्वऔत्सुक्यादाश्लिष न्निव ॥ नमोनमइतीशानौबभाषेगद्गदाक्षरम् ३७

३० निस्तेजसंदुर्बलं स्वराडिंद्रः ३१ नरेणयुक्तोनारायणःनरनारायणः ३२ रुरोर्विद्यमानंरौरवंवल्कलंचांबरंवाययोस्तौ ३३ जंतुमार्जनंपिंजरचितपुंजिचामरविशेषमित्यर्थःवेदंदर्भमुष्टिं तपतीप्रकाशमानातडित्तपत्तडित्तद्वद्वर्णेनपिशंगरोचिषाकपिलप्रभयातपएकरूपिणौप्रांशूअत्युच्छ्रितौदधानौजग्मतुरितिशेषः उपवीतादिकंचदधानौरूपविशेषणम् ३४ तौनरनारायणावृषीवीक्ष्यन नाम नमनेहेतुमाह तेइति तेहरेरूपेवैयस्मात्तस्मात् ३५ तयोःसंदर्शनादुत्पन्नेनानंदेननियतात्मेंद्रियाशयायस्यसतथा ३६ गद्गदाक्षरंवचः १७

३८ पादाभ्यांपादावुद्दिश्यगरिष्ठौ गुरूणांब्रह्मादीनामपिगुरू ३९ अपरिमितमहिम्नोर्युवयोःपुरतोयत्किंचिद्वर्णनंकिंवर्णये नकिमपि माहात्म्यानामनंतत्त्वात्तदेकदेशमपिवर्णयितुंनशक्तोस्मि वागादींद्रियाणांत्वन्नियतत्वेनत्वत्प्रसादायत्तत्वादितिशेषः एतत्कथमित्याशंक्यसर्वेंद्रियनायकःप्राणोपिभगवन्नियतएवचेष्टतेकिमुतान्यानीतिभावेनाह यदुदीरितइति येनत्वयोदीरितःप्रेरितोसुःप्राणः तमनुप्राणमनुतनुभृतांमनइंद्रियाणिमत्प्रेरितानिस्पंदंतिचेष्टंते किंचाजशर्वयोश्चेंद्रियाणियेनप्रेरितानि अनेनाजशर्वयोःसमत्वेनत्वदप्रेरितानिविषयेषुप्रवर्ततेअतोन्यभिचीर्णोहेतुरितिनिरस्तं अथापित्वदिंद्रियप्रवृत्तौहेतोर्व्यभिचारस्तदवस्थइतिमंदाशंकांपरिहरति स्वस्येति स्वस्येंद्रियाण्यपित्वत्प्रेरितानि यद्यप्येवंस्वतंत्रोसिसत्वमथापिभजतांपुंसांभाववद्धोसिभक्तिबद्धोसि तस्मात्परतंत्रइव प्रतीयसेमादृशानामित्यर्थः ४० भावबद्धत्वंदर्शयति मूर्तीइति हेभगवन्भक्तवत्सलस्यभगवतइमेमूर्तीनरनारायणसंज्ञेत्रिलोक्याःक्षेमायरक्षायै शत्रुकृतसंतापनाशायमृत्युजित्यैसंसाराख्यशत्रुजयायभवंतः किंच त्वंनानाअनुपमान्यतनूर्नानाविधाअनुपमाअसदृशीरन्याअनयोरितरास्तनूर्मूर्तीर्बिभर्षि त्रिलोकीक्षेमादिकार्यायेतिशेषः किंच ऊर्णनाभिरिवइदंसर्वंयथापूर्वंसृष्ट्वापुनर्यथापूर्वंग्रससि अनेनमायाविवृतबहुरूपग्रहणंनचित्रंस्यादितिशंकापरिहृता सत्यप्रपंचस्रष्टुरीश्वरस्यतन्नियमनार्थतावद्रूपग्रहणोपपत्तेः तत्सृष्ट्वातदेवानुप्राविशादितिश्रुतेः यद्वा अतनूरप्राकृतशरीरस्त्वंयथासर्वंमिदंसृष्ट्वापुनर्ग्रससितथानुपमानिनानाविधानिशरीराणिबिभर्षिग्रससिअंतर्गतानिकरोषि । त्रिलोकीक्षेमोदयेभरणं । क्षेमानद्यंतरभेकीकरणमितिविशेषः भगवतइमेमूर्तीश्चतथेति ४१ एतमर्थंप्रमाणय

तयोरासनमादायपादयोरवनिज्यच ॥ अर्हणेनानुलेपेनधूपमाल्यैरपूजयत् ॥ ३८ सुखमासनमासीनौप्रसादाभिमुखोमुनिः ॥ पुनरानम्यपादाभ्यांगरिष्ठाविदमब्रवीत् ३९ मार्कंडेयउवाच ॥ किंवर्णयेतवविभोयदुदीरितोसुःसंस्पंदतेतमनुवाङ्मनइंद्रियाणि ॥ स्पंदंतिवैतनुभृतामजशर्वयोश्चस्वस्याप्यथापिभजतामसिभावबद्धः ४० मूर्तीइमेभगवतोभगवंस्त्रिलोक्याःक्षेमायतापविरमायचमृत्युजित्यै ॥ नानाबिभर्ष्यनुपमान्यतनूर्यथेदंसृष्ट्वापुनर्ग्रससिसर्वमिवोर्णनाभिः ४१ तस्याविदुःस्थिरचरेशितुरंघ्रिमूलंयत्स्थंनकर्मगुणकालरजःस्पृशंति ॥ यद्वैस्तुवंतिनिनमंतियजंत्यभीक्ष्णंध्यायंतिवेदहृदयामुनयस्तदास्यै ४२ नान्यत्तवांघ्र्युपनयादपवर्गमूर्तेक्षेमंजनस्यपरितोभयईशविद्मः ॥ ब्रह्माबिभेत्यलमतोद्विपरार्ध्यधिष्ण्यःकालस्यतेकिमुततत्कृतभौतिकानाम् ४३

ति तस्येति यत्स्थंयस्मिन्पादमूलेस्थितंपुरुषं कर्मगुणकालरजःदुष्कर्मगुणाःसत्वादयः कालोजन्मादिहेतुःरजः आर्तवंशुक्रशोणिताख्यं एकवद्भावविवक्षयैकवचनं नस्पृशंतिनोत्तपंतिनदुःखमापादयंति वेदस्यहृदयंयेषांतेवेदहृदयाःवेदतात्पर्यज्ञामुनयोब्रह्मादयःस्थिरचरेशितुरवितुःपालकस्यतवअंघ्रिमूलंस्तुवंति पादोस्यविश्वभूतानित्रिपादस्यामृतंदिवीतिनितरांनमंति नमोविष्णवेमहतेकरोमीतियजंति त्रियंबकंयजामहेसुगंधिंपुष्टिवर्धनमितिध्यायंत्यात्मानमेवलोकमुपास्तइतियद्यस्मात्तस्मात्त्वदंघ्रिसेवायांतदेवमानंवाइत्यर्थः तस्ययदंघ्रिमूलंयत्स्थंकर्मादयोनस्पृशंति तत्तवपादमूलंभजाभीत्येकवाक्यंवा ४१ किमर्थमेतदेवस्तुवंतिनिर्दुःखसुखावाप्तयेऽन्यत्किंनस्यादितितत्राह नेति हेईशअपवर्गमूर्तेपुरुषार्थस्वरूप यस्त्वंपरितोऽभयःसर्वस्मादभयःजनस्यतवांघ्र्युपनयादंघ्रिशरणप्राप्तेरन्यत्क्षेमंनविद्मः परितोभियइतिवापाठः जनस्येतिविशेषणंसर्वस्माद्भीर्भयंयस्यसतथातस्यननुत्वदन्यःक्षेमकर्ताब्रह्मास्ति प्रजापतेनत्वदेतान्यन्यइतिश्रुतेः अत्राह ब्रह्मेति यतःपरितोभयःअतोद्विपरार्धसंबंधिधिष्ण्यंयस्यसतथासब्रह्माकालस्यतेतवसकाशाद्भिमेति यन्मांनिशम्यसदनादुरुकंपमानं योअस्कभायदुत्तरंसवस्थंविचक्रमाणस्त्रेधोरुगायइतिश्रुतेः भूतग्रामस्यविचित्रादृष्ट्वात्कस्यचिन्निर्भयत्वोपपत्तेर्ब्रह्मणस्तुलोकविडंबनत्वेनतथाभावःकिंनस्यादितिमंदाशंकांकैमुत्यन्यायेनपरिहरति किमुतेति अतइत्युत्तरत्रापिसंबध्यते ब्रह्माप्यलंबिभेतियतोतस्तत्कृतभौतिकानांतेनब्रह्मणाकृतानिभौतिकानिशरीराणियेषांतेतथातेषांप्राणिनांभयमस्तीतिकिमुतेत्यन्वयः ४३

सेवायामित्थंभावमाह तद्वैइति ऋतधियः एकप्रकारबुद्धेर्निश्चलबुद्धेरित्यर्थः आत्मगुरोःजीवगुरोःपरस्यपरमात्मनस्तवपादमूलमेतदेहाद्यभिमानंहित्वापादिभजामितर्हि तेतवप्रसादात्सर्वमनीषितार्थंविंदेयइत्यन्वयः कीदृशंआत्मच्छिदंआत्मनाशहेतुंअतएवापार्थंपुरुषार्थलक्षणप्रयोजनशून्यं असदभद्रंअनभिज्ञमात्रंकेवलाज्ञाननिर्मितंकेवलाविद्यत्कृतंवा अनेनदेहेऽहंभावोभवहेतुस्तदभावोमुक्तिहेतुरितिकथितंभवति ४४ देहाहंभावस्यनिमित्तेरजस्तमसीतदभावस्यसत्त्वंत्वत्रियतामितिभावेनाह सत्वमिति हेईशआत्मबंधो सत्वंरजस्तमइतिगुणास्त्वयालीलाधृताः जगन्निर्माणक्रीडायैधृताः अंगीकृताः ननुजीववदनिष्टांकिंकर्तुशक्तायेनधार्याःस्युरितितत्राह स्थितीति अस्यजगतःस्थित्यादिहेतवः किमात्मकाइतितत्राह मायामयाइति इच्छात्मकाःपदपिपचपितथापि सत्वमयःसात्विकःप्रशांत्यैमुक्तयेभवति अन्येराजसतामसाःप्रशांत्यैनस्युः किंतुदेहाहंभावेनसंसारायस्युरित्यर्थः यद्वा सत्वादन्येरजस्तमसीशांत्यैनस्यातां पुनःकस्मैभवतइतितत्राह नृणामिति याभ्यांरजस्तमोभ्यांनृणांव्यसनादयः स्युःचएवार्थे त्रिविधानांनृणांमध्येसत्वमयएवइतिवा ४५ उपसंहरन्नेदसत्वंस्तौति तस्मादिति यस्मात्सत्वमेवनिःश्रेयसहेतुस्तस्मादिहकुशलाःभगवन्मथकल्याणानांतावकानांउपासायोग्यांस्वतोदयितांशुक्लांतवतनुंभजंति तावकानामितिकिंविशिष्योच्यतइतितत्राह यत्सात्वताइति सात्वताःसाधुगुणयुक्ताःपुरुषाःसत्वंसत्वगुणप्रवर्तकंपुरुषइतिरूपंशब्दोयस्यतत्तथा पुरुषशब्दवाच्यमित्यर्थः उशंति कामयंतइतियद्यस्मात्तस्माद्विशेषवचनम् यतःपुरुषरूपात्लोकोऽभयंविंदतिआत्मसुखमुतापिलभतेततस्मादन्यदभयादिदंन पद्वा यतःसत्वाल्लोकोरक्षितोभवति अभयमुतात्मसुखमाप्नोतिअन्यद्रज

तद्वैभजाम्युतधियस्तवपादमूलंहित्वैतदात्मच्छिदमात्मगुरोःपरस्य ॥ देहाद्यपार्थमसदित्यनभिज्ञमात्रंविंदेयचेत्तर्हिसर्वमनीषितार्थम् ४४ सत्त्वंरजस्तमइतीशतवात्मबंधोमायामयाःस्थितिलयोदयहेतवोस्य ॥ लीलाधृतायदपिसत्त्वमयःप्रशांत्यैनान्येनृणांव्यसनमोहभियश्चयाभ्याम् ४५ तस्मात्त्वेहभगवन्नथतावकानांशुक्लांतनुंस्वदयितांकुशलाभजंति ॥ यत्सात्वताःपुरुषरूपमुशंतिसत्वंलोकोयतोभयमुतात्मसुखंनचान्यत् ४६ तस्मैनमोभगवतेपुरुषायभूम्नेविश्वायविश्वगुरवेपरदेवतायै ॥ नारायणायऋषयेचनरोत्तमायहंसायसंयतगिरेनिगमेश्वराय ४७ यंवैनवेदवितताक्षपथैर्भ्रमद्धीःसंतंस्वखेष्वसुषुहृद्यपिदक्पथेषु ॥ त्वन्माययावृतमतिःसउएवसाक्षाद्यस्तवाखिलगुरोरुपपद्यवेदम् ४८ यद्दर्शनंनिगमआत्मरहःप्रकाशंमुह्यंतियत्रकवयोजपरायतंतः ॥ तंसर्ववादविषयप्रतिरूपशीलंवंदामहेपुरुषमात्मनिगूढबोधम् ४९ ॥ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेमार्कंडेयोपाख्यानेनारायणस्तवोनामसप्तमोध्यायः ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥७॥

स्तमइतियद्वयंस्वरूपसुखादिहेतुर्नभवति ४६ निरंतरध्यानासमर्थस्योपास्तिप्रकारमाह तस्माइति विश्वाय विश्वनाम्ने अस्यसर्वनामसंज्ञानास्तिअर्थांतरत्वात्तत्प्रेक्षणशीलत्वेन ॥ संयतगिरेमितभाषणाय ४७ भवत्साक्षात्कारोभवत्प्रसादायत्तोनस्वप्रयत्नसाध्यइत्याह यमिति हेवितत यःपुरुषोक्षपथैः शब्दादिभिः भ्रमद्धीर्यस्त्वांनवेद कीदृशंस्वखेषुस्वेंद्रियेषुअसुषुप्राणेषुहृद्यपिदक्पथेषुदृग्विषयेषुवसंतंनिर्दोषत्वेनवर्तमानं ज्ञापकाभावान्नजानंतीतिनेत्याह तवेति अखिलगुरोस्तववेदंज्ञापकप्रमाणंउपपद्यापिसःसाक्षाद्यः अदनयोग्यःविषयभोगशीलः तस्यतवमाययाबंधकशक्त्याआवृतमतिःआच्छादितज्ञानस्तस्माच्चत्प्रसादेनत्वज्ज्ञानंसुलभमित्यर्थः ४८ त्वज्ज्ञानस्यकिंमाहात्म्यंयेनत्वदनुग्रहेणसर्वथापाद्यंस्यादितितत्राह यद्दर्शनमिति यस्यतवदर्शनंज्ञाननिगमेतत्वनिर्णायकेवेदेप्रतिपादितं आत्मरहःप्रकाशोयस्मात्तत्तथातत् अजपराः विष्णुपरायणायतंतःकृतोपास्तिप्रयत्नाः कवयोयत्रपरमात्मरहस्येमुह्यंतिइदमित्थमिति ज्ञातुंउपदेष्टुंचनशक्नुवंतितं भगवंतंवंदामहइत्यन्वयः सर्ववादानांसर्वसिद्धांतानांविषयाणांप्रतिपाद्यानांअर्थानांप्रतिरूपशीलंविरुद्धस्वभावंतदुक्तान्यथास्थितस्वभावमित्यर्थः आत्मनिजीवविषयेगूढबोधंजीवेनाज्ञातस्वरूपमित्यर्थःआत्मनास्वेनेतिवा ४९ ॥ इति श्रीभागवतेमहापुराणेद्वादशस्कंधेविजयध्वजकृतटीकायांसप्तमोऽध्यायः ॥ ७ ॥

संस्तुतइति १ आत्मनोहरेःसमाधिनोपासनाजन्यज्ञानेनसिद्धःकृतकृत्यः २ प्रतीच्छस्वीकुरु ३ भवन्माहात्म्यप्रकटनेवरंवरयिष्यन्नपिभगवद्दर्शनादितरोवरोऽनभीष्टोमुमुक्षोरितिहृदिकृत्वाप्रतिवक्ति जितमिति ४ यदाकांक्षापूरकंमायस्तदेवसाध्यमस्यतदभावात्पथितृणमिवेदमपिवंध्यामितितत्राह वांछंतीति भक्तियोगपक्वेनभक्त्युपासनाभ्यांपरिपाकंप्राप्तनवाक्षगोचरोभूदितिशेषः ५ ननूक्तंस त्यंतथापिभवत्समाधेरेतदेवफलंनान्यदस्तीतिभातिकिमत्राह अथापीति मायांघटमानघटकशक्तिलक्षणांलोकोपकारकयथार्थज्ञानजनकत्वेनेंद्रजाललक्षणानेतिभावेनाह ययेति सतःपरब्रह्मणःसर्वस्मा त्भिदांवैलक्षण्यंवेद तादृशीं द्रष्टुमिच्छामिनेंद्रजालंलक्षणामित्यर्थः ६ सस्मयंसस्मितंतथाद्रक्ष्यसीत्युक्त्वा ७ आत्मनिस्वस्मिन् ८ किंबहुनासर्वत्रचव्याप्तंभावद्रव्यैःमनःकल्प्यपुष्पादिद्रव्यैः अहिंसाद्यै

सूतउवाच ॥ संस्तुतोभगवानित्थंमार्कंडेयेनधीमता ॥ नारायणोनरसखःप्रीतआहभृगूद्वहम् १ श्रीभगवानुवाच ॥ भोभोब्रह्मर्षिवर्योसिसिद्धआत्मसमाधिना ॥ मयिभक्त्यानपायिन्यातपःस्वाध्यायसंयमैः २ वयंतेपरितुष्टाःस्मत्वद्दृढव्रतचर्यया ॥ वरंप्रतीच्छभद्रंतेवरदेशादभीप्सितम् ३ ॥ ऋषिरुवाच ॥ जितंतेदेवदेवेशप्रपन्नार्तिहराच्युत ॥ वरेणैतावतालंनोयद्भवान्समदृश्यत ४ वांछंत्यजादयोयस्यश्रीमत्पादाब्जदर्शनम् ॥ मनसायोगपक्वेनसभवान्मेऽक्षगोचरः ५ अथाप्यंबुजपत्राक्षपुण्यश्लोकशिखामणे ॥ ईक्षमायांययालोकःसपालोवेदसङ्दिशम् ६ सूतउवाच ॥ इतीरितोर्चितःकाममृषिणाभगवान्मुने ॥ तथेतिसस्मयंप्रागाद्बदर्याश्रममीश्वरः ७ तमेवंचिंतयन्नर्थमृषिःस्वाश्रमएवसः ॥ वसन्नग्न्यर्कसोमांबुभूवायुवियदात्मसु ८ ध्यायन्सर्वत्रचहरिंभावद्रव्यैरपूजयत् ॥ क्वचित्पूजांविसस्मारभक्तिप्रसरसंप्लुतः ९ तस्यैकदाभृगुश्रेष्ठपुष्पभद्रातटेमुनेः ॥ उपासीनस्यसंध्यायांब्रह्मन्वायुरभून्महान् १० तंचंडशब्दंसमुदीरयंतंबलाहकाअन्वभवन्कराला ॥ अक्षस्थविष्ठामुमुचुस्तडिद्भिःस्वनंतउच्चैरविवर्षधाराः ११ ततोन्यदृश्यंतचतुःसमुद्राःसमंततःक्ष्मातलमाग्रसंतः ॥ समीरवेगोर्मिभिरुग्रनक्रभयानकावर्तगभीरघोषाः १२ अंतर्बहिश्चाद्रिरभिद्युभिर्घनैःशतह्रदाभीरुपतापितंजगत् ॥ चतुर्विधंवीक्ष्यमहामनामुनिर्जलप्लुतांक्ष्मांविमनाःसमत्रसत् १३ तस्यैवमुद्वीक्षतउर्मिभीषणःप्रभंजनाघूर्णितवार्महार्णवः ॥ आपूर्यमाणःप्रवर्षद्भिरंबुदैःक्ष्मामप्यधाद्द्वीपवर्षादिभिःसमम् १४ सक्ष्मांतरिक्षंसदिवंसभागणंत्रैलोक्यमासीत्सहसाद्रिराप्लुतम् ॥ सएकएवोर्वरितोमहामुनिर्बभ्रामविक्षिप्तजटोजडांधवत् १५ क्षुत्तृट्परीतोमकरैस्तिमिंगिलैरुपद्रुतोवीचिनभस्वताहतः ॥ तमस्यपारेपतितोभ्रमद्दिशोनवेदखंगांचपरिश्रमोषितः १६ क्वचिन्मग्नोमहावर्तेतरलैस्ताडितःक्वचित् ॥ यादोभिर्भक्ष्यतेक्वापिस्वयमन्योन्यघातिभिः १७

रित्यर्थः क्वचित्कदाचित् विस्मरणेकारणंभक्तिप्रसरसंप्लुतइति ९ वरदानफलंत्वक्तुमुपक्रमते तस्योति तस्याश्रमेमहान्वायुरभूत् १० तंवायुमन्वनंतरंतेबलाहकाःअभ्यभितःअक्षस्थविष्ठाः अक्षोरथांगनीपोदंडस्तद्वत्स्थूलतमावर्षधारामुमुचुःतडिद्भिःसह ११ समीरवेगेनोन्नतोर्मिभिःसहउग्रनक्रैर्भयानकस्यभयंकरस्यावर्तस्यगभीरागंभीराघोषायेषांतेतथा १२ घनैर्मेघैरभिवृष्टाभिराद्रिरुपतापितमप्लुवितमभितोद्युतिमतीभिःशतह्रदाभिस्तडिद्भिश्चोपद्रावितंदग्धवत्कृतं क्ष्मामब्धिजलप्लुतांवीक्ष्य १३ अप्यधात्छादितवांस्तस्यमुनेरुद्वीक्षतः १४ सादिवंस्वर्गेणसहितं सभागणंसनक्षत्रगणंजडवत्अंधवत् १५ वीचिनभस्वतातरंगवायुनाभ्रमंत्यादिशोपस्यसतथा वष्टिभागुरिरल्लोपमितिवचनात् टाबंतोदिशाशब्दः परिश्रमोषितःदुःखसमुद्रवासी १६ तरलैस्तरंगैः १७

१८ १९ ककुदिउन्नतस्थले २० तस्यवटस्य २१ २२ श्वासेनमुखवायुनाएजतांकंपमानानामलकानांव्रातेनमिश्रयाश्रियायुक्तं कर्णदाडिमंकर्णाभरणंयस्यसतथातं ईषच्छोणाश्लिष्टा २३ पद्मगर्भ
वत्अरुणावपांगौनेत्रांतौयस्यतंश्वासैरेजंत्यश्चलंत्पोवलयस्तिर्यक्रेस्वास्ताभिः संविग्नंभीरानाभिर्यस्यसतथाचलमुदरंयस्यसतथा श्वासैजद्वलिसंविग्ननिम्ननाभिश्चलोदरश्चसतथातं दलोदरमितिवापाठः
दलवदश्वत्थकलवत्पत्रवत्उदरंयस्येति २४ धयंतंपिबंतं २५ अद्भुतभावेनाश्चर्यलीलाचेष्टयाशंकितःसन्नपिपुरःप्रसप्तारसमीपंगतः २६ सभार्गवःमार्कंडेयःतावत्ततःपूर्वमेवश्वसितेनांतर्गच्छतासहशि
शोरंतःशरीरंमशकोयथातथाविशदित्यन्वयः तत्रोदरांतर्विन्यस्तमदोविश्वंकृत्स्नशोऽचष्टदृष्टवान्दृष्ट्वाचपुरायथाबहिर्विस्मितोमुह्यत्तथा मुह्यदित्यन्वयः अत्रमोहोनामाश्चर्यबुद्धिरेवनत्वन्यथाज्ञानंतथात्वेभा
वीनाचीर्णपुण्यराशेर्वैयर्थ्यापत्तेरिति २७ विश्वंविशिनष्टि खंरोदसीइत्यादिना आश्रमवर्णवृत्तयोयास्ताश्च२८महांतिभूतानिपंचभूतानिनानायुगकल्पनयेनसतथातंकालंच अन्यद्यत्किंचिद्व्यवहारकारणं

क्वचिच्छोकंक्वचिन्मोहंक्वचिद्दुःखंसुखंभयम् ॥ क्वचिन्मृत्युमवाप्नोतिव्याध्यादिभिरुपद्रुतः १८ अयुतायुतवर्षाणांसहस्राणिशतानिच ॥ व्यतीयुर्भ्रमतस्त
स्मिन्विष्णुमायावृतात्मनः १९ सकदाचिद्भ्रमंस्तस्मिन्पृथिव्याःककुदिद्विजः ॥ न्यग्रोधपोतंददृशेफलपल्लवशोभितम् २० प्रागुत्तरस्यांशाखायांत
स्यापिददृशेशिशुम् ॥ शयानंपर्णपुटकेग्रसंतंप्रभयातमः २१ महामरकतश्यामंश्रीमद्वदनपंकजम् ॥ कंबुग्रीवंमहोरस्कंसुनासंसुंदरभ्रुवम् २२ श्वासै
जदलकव्रातमिश्रश्रीकर्णदाडिमम् ॥ विद्रुमाधरभासेषच्छोणायितसुधास्मितम् २३ पद्मगर्भारुणापांगंहृद्यहासावलोकनम् ॥ श्वासैजद्वलिसंविग्नि
म्ननाभिंचलोदरम् २४ चार्वंगुलिभ्यांपाणिभ्यामुन्नीयचरणांबुजम् ॥ मुखेनिधायविप्रेंद्रधयंतंवीक्ष्यविस्मितः २५ तद्दर्शनाद्वीतपरिश्रमोमुदाप्रोत्फुल्ल
हृत्पद्मविलोचनांबुजः ॥ प्रहृष्टरोमाद्भुतभावशंकितःप्रष्टुंपुरस्तंप्रससारबालकम् २६ तावच्छशेर्वैश्वसितेनभार्गवःसोंतःशरीरंमशकोयथाविशत् ॥ त
त्राप्यदोन्यस्तमचष्टकृत्स्नशोयथापुरामुह्यदतीवविस्मितः २७ खंरोदसीभगणानद्रिसारान्द्वीपान्सवर्षान्ककुभःसुरासुरान् ॥ वनानिदेशान्सरितःपुराक
रान्स्वेटान्व्रजानाश्रमवर्णवृत्तयः २८ महांतिभूतान्यथभौतिकान्यसौकालंचनानायुगकल्पकल्पनम् ॥ यत्किंचिदन्यव्यवहारकारणंददर्शविश्वंसदिवा
वभासितम् २९ हिमालयंपुष्पवहांचतांनदींनिजाश्रमंयत्रऋषीनपश्यत् ॥ विश्वंविपश्यञ्छ्वसतःशिशोर्वैबहिर्निरस्तोन्यपतल्लयाब्धौ ३० तस्मिन्पृ
थिव्याःककुदिप्ररूढंवटंचतत्पर्णपुटेशयानम् ॥ तोकंचतत्प्रेमसुधास्मितेननिरीक्षितोपांगनिरीक्षणेन ३१ अथतंबालकंवीक्ष्यनेत्राभ्यांधिष्ठितंहृदि ॥
अभ्यगादतिसंहृष्टःपरिष्वक्तुमधोक्षजम् ३२ तावत्सभगवान्साक्षाद्योगाधीशोगुहाशयः ॥ अंतर्दधेऋषेःसद्योयथेहानीशनिर्मिता ३३ तमन्वथवटोब्रह्मन्स
लिलंलोकसंप्लवम् ॥ तिरोधायिक्षणादस्यस्वाश्रमेपूर्ववत्स्थितः ३४ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेभगवन्मायादर्शनंनामाष्टमोऽध्यायः ॥ ८ ॥

हानोपादानादिसमर्थंतच्चाद्राक्षीत् सदिवसत्त्वेनयथार्थत्वेनैवावभासितंप्रकाशितंनमिथ्याभूतत्वेन २९ पुनःकिमभूदत्राह विश्वमिति बहिःश्वसतःशिशोःश्वासेनबहिर्निरस्तोनुन्नःप्रलयाब्धौन्यपतत् ३०
वटंचतोकंचवीक्ष्यतस्यशिशोःप्रेमसुधायाःप्रेमामृतादुद्भूतस्मितसहितेनापांगनिरीक्षणेननिरीक्षितोभूदित्यन्वयः ३१ अथतंबालकंपरिष्वक्तुमभ्यगात् ३२ अनीशेनासमर्थेननिर्मिताइहमायालक्षणा
चेष्टायथाक्षिप्रमंतर्दधातितथेयमंतर्धानशब्दार्थेनिदर्शनमिदंनतुमिथ्यात्वे ३३ अंतर्हितंभगवंतमनुलोकस्यसंप्लवोयस्मात्तत्तथा तिरोधायितिरोहितमभूत् ३४ ॥ इतिश्रीभागवतेमहापुराणेद्वा

मार्कंडेयःपुनःकिमकार्षीद्यत्कथांशृण्वतांहरौभक्तिसमुद्रेककरीतिहार्दशौनकादीनांचोद्यंपरिहरति सएवमिति यःपूर्ववत्स्वाश्रमेस्थितःसःयोगमायायाःअणिमादिविभूतेःवैभवंव्याप्तिंस्वरूपशक्तेःप्रभा
वंवा १ यस्यहरेर्मायायामोहनशक्त्याविबुधाअज्ञानकातराइतिपदद्वयेनान्योन्यविरुद्धेनमायाशब्दोव्याख्यातइतिज्ञातव्यम् २ निभृतात्मानंपूर्णमनसं हरावेवनितरांधृतमनसंवा दिविव्योम्नि ३
४ निभृतोननुपूर्णएव तपापायेवर्षाकाले ऋषीणांव्रातोव्रतसमूहोयस्यसतथा पूर्वविशेषणार्थेहेतुरयं अस्यमुनेः ५ रुद्रःप्रतिवक्ति नैवेति मोक्षमपिनेच्छतिकिमुतान्याआशिषःतत्रहेतुमाह ॥
भक्तिमिति ६ यद्यप्येवंतथापिभवत्यावचनगौरवाद्यतिष्यामहइत्याशयेनाह अथापीति हेभवानीति एतेनसाधुना मुनिनासहसंकथनेन किंप्रयोजनमत्राह अयंहीति साधूनांसमागमःसंग
तिः ७ समुपेयायसंप्रापअयंसाधारणोभगवान्नकिंतुवेदसिद्धएवेत्याशयेनाह ईशानइति अनेनश्रीहरिज्ञानमपिरुद्रप्रसादात्फलवत्स्यादित्युक्तंभवति तत्कुतइत्यत्राह ईश्वरइति श्रोत्रादींद्रियवतांजी

सूतउवाच ॥ सएवमनुभूयेदंनारायणविनिर्मितम् ॥ वैभवंयोगमायायास्तमेवशरणंययौ १ ऋषिरुवाच ॥ प्रपन्नोस्म्यंघ्रिमूलंतेप्रपन्नाभयदंहरे ॥ य
न्मायययापिविबुधामुह्यंत्यज्ञानकातराः २ सूतउवाच ॥ तामित्थंनिभृतात्मानंवृषेणदिविपर्यटन् ॥ रुद्राण्याभगवान्रुद्रोददर्शस्वगणैर्वृतः ३ अथो
मातमृषिंवीक्ष्यगिरिशंसमभाषत ॥ पश्येमंभगवन्विप्रंनिभृतात्मेंद्रियाशयम् ४ निभृतोनन्वृषिव्रातस्तपापायेयथार्णवः ॥ कुर्वस्यतपसःसाक्षात्संसि
द्धिसिद्धिदोभवान् ५ श्रीभगवानुवाच ॥ नैवेच्छत्याशिषःक्वापिब्रह्मर्षिर्मोक्षमप्युत ॥ भक्तिंपरांभगवतिलब्धवान्पुरुषेऽव्यये ६ अथापिसंवदिष्यामो
भवान्येतेनसाधुना ॥ अयंहिपरमोलाभोनृणांसाधुसमागमः ७ इत्युक्त्वासमुपेयायभगवान्सप्तसांगतिः ॥ ईशानःसर्वविद्यानामीश्वरःसर्वदेहिनाम् ८
तयोरागमनंसाक्षादशियोर्जगदात्मनोः ॥ नवेदरुद्धधीवृत्तिरात्मानंविश्वमेवच ९ भगवांस्तदभिज्ञायगिरिशोयोगमायया ॥ आविशत्तद्बृहाकाशंवायुश्छ
द्रमिवेश्वरः १० आत्मन्यपिशिवंप्राप्तंतडिंत्पिंगजटाधरम् ॥ त्र्यक्षमष्टभुजंशंभुमुद्यंतमिवभास्करम् ११ व्याघ्रचर्मांबरंशूलधनुरिष्वसिचर्मभिः ॥ अ
क्षमालांडमरुकंकपालंपरशुंसह १२ बिभ्राणंसहसाभातंव्यचष्टहृदिविस्मितः ॥ किमिदंकुतएवेतिसमाधेर्विरतोमुनिः १३ नेत्रेउन्मील्यददृशेसगणंसोमया
गतम् ॥ रुद्रंत्रिलोकैकगुरुंननामशिरसामुनिः १४ तस्मैसपर्यांव्यदधात्सगणायसहोमया ॥ स्वागतासनपाद्यार्घ्यगंधस्रग्धूपदीपकैः १५ आहचात्मानुभा
वेनपूर्णकामस्यतेविभो ॥ करवामकिमीशानयेनेदंनिर्वृतंजगत् १६ नमःशिवायशांतायसत्त्वायप्रमृडायच ॥ रजोजुषेप्यघोरायनमस्तुभ्यंतमोजुषे १७

वानांशिवाधीनत्वेनतत्तदिंद्रियसाध्यस्यज्ञानस्यापितत्प्रसादायत्तत्वंयुक्तम् ८ तदामुनिनाकिमकारीतितत्राह तयोरिति अहंकाररूपेणजगदात्मनोरिति अज्ञानेकिंकारणमत्राह रुद्धधीवृत्ति
रिति धीपूर्वकत्वादिंद्रियवृतेस्तद्रोधेसर्वेंद्रियरोधोयुक्तइतिरुद्धधीवृत्तिरित्युक्तं आत्मानंस्वंविश्वंपुरोवर्तिसर्वम् ९ योगमायायाअणिमादियोगसामर्थ्येनछिद्ररोमकूपादिसुषिरम् १० नकेवलंबहिरे
वआत्मनिस्वास्मिन्नपि ११ इषुयुक्तंधनुश्चअसिश्चचर्मचतानितैर्युक्तं करेडमरुकंअणुतरंतुपर्वाढ्यंचर्मापिनद्धमुखंदारुवाद्यम् १३ व्यचष्टअपश्यत् १३ सहउमयासोषामविंदादित्यादेः १४
१५ पूर्णकामत्वंव्यनक्ति येनत्वयाजगन्निवृतंभवति १६ सत्वायपराक्रमयुक्ताय सद्ब्रह्मशरणंवातिगच्छतीति सत्वस्तस्मैवा प्रमृडायप्रकृष्टपालाय तत्तद्वस्तुयोग्यतानुसारेणरक्षार्थंसत्वादिगुणप्र
वर्तकत्वात्सत्वायरजोजुषइत्युक्तम् १७

१८ त्रयोब्रह्मादयोयेषांत्रयाणांदर्शनममोवंतत्रहेतुमाह मर्त्यइति मर्त्योऽमृतंमुक्तिंविंदतेयच्चस्माद्दर्शनात्तेभ्योमृतंवा १९ ब्राह्मणभक्तिंदर्शयति ब्रह्मणाइति ब्राह्मणाब्रह्मवादकानष्ठाः साधवोरागादिदोषविधुराः शांताभगवन्निष्ठापारंगताः अतएवनिःसंगाःदुष्टसंगरहिताः अतएवभूतेषुसज्जनेषुवत्सलाःस्निग्धाः एकांतेनविष्णुरेवसर्वोत्तमोनान्यइतिनिर्णयेनास्मासुभक्ताःयोग्यतातिरेकेणवैरशून्याः समंब्रह्मतदर्शनंयेषांतेतथा २० यएवंविधांस्तान्वदंतिस्तुवंतीत्यादिसमर्थंकुर्वंतइत्यर्थःअहंब्रह्माचहरेःपृथक्स्वतंत्रौनतदधीनावेव तत्रहेतुरीश्वरइतिईर्लक्ष्मीः शंकरपः शतानंदस्तयोर्वरईशादीज्ञानाच्चवरइतियस्मात्तस्मात्तद्वयोर्वरइत्युक्तं यूयंकेइत्यतोवाह अहमिति स्वयमित्यनेनहरेरेवस्वातंत्र्यंनावयोरावांतदधीनावितिस्पष्टमुक्तंअत्राप्ययमेवहेतुरीश्वरइति ईशऐश्वर्यइति धात्वोरनुपहतैश्वर्यमूर्तित्वादीश्वरइत्युच्यते २१ इतोपिब्राह्मणाएवपूज्यायतएवंविधंतत्त्वंतवजानंतीत्याह नतइति तेब्राह्मणामयिस्थितत्वान्मयीत्युच्यमानेहरावजेचास्थितत्वादजशब्दवाच्येचपृथक्स्थितेअच्युतेचभिदामण्वपिपरमाणुमात्रमपिनचक्षतेनपश्यंति किंचजनस्यजननवतः स्थावरजंगमरूपस्यप्रपंचस्यात्मनोंतर्यामिणश्चभिदांनपश्यंति अपिशब्देनैकोदेवइतिश्रुतिंप्रमाणयति तत्तस्माद्वयंयुष्मानास्विलैःपूज्यानीमहिवुध्यामहे यद्वा मयिभिदामन्यथाज्ञानांविष्णुरयमितिकिंचित्साम्येनापिनपश्यंत्यपितुततोविलक्षणत्वेनतत्कटाक्षाहितशक्तित्वेनजगत्संहर्तृत्वेनततोनंतांशही

सूतउवाच ॥ एवंस्तुतःप्रभगवान्महादेवःसतांपतिः ॥ परितुष्टःप्रसन्नात्माप्रहसंस्तमभाषत १८ श्रीमहादेवउवाच ॥ वरंवृणीष्वनःकामंवरदेशावयंत्रयः ॥ अमोघंदर्शनंयेषांमर्त्योयद्विंदतेमृतम् १९ ब्राह्मणाःसाधवःशांताभिःसंगामृतवत्सलाः ॥ एकांतभक्ताअस्मासुनिर्वैराःसमदर्शनाः २० सलोकालोकपालास्तान्वंदंत्यर्चंत्युपासते ॥ अहंचनपृथक्ब्रह्मास्वयंचहरिरीश्वरः २१ नतेमय्यच्युतेऽजेचभिदामण्वपिचक्षते ॥ नात्मनश्चजनस्यापितद्युष्मान्वयमीमहि २२ नह्यम्मयानितीर्थानिनदेवामृच्छिलामयाः ॥ तेपुनंत्युरुकालेनयूयंदर्शनमात्रतः २३ ब्राह्मणेभ्योनमस्यामोयेऽस्मद्रूपंत्रयीमयम् ॥ बिभ्रत्यात्मसमाधानंतपःस्वाध्यायसंयमैः २४ श्रवणाद्दर्शनाद्वापिमहापातकिनोपिवः ॥ शुध्येरन्नंत्यजाश्चापिकिमुसंभाषणादिभिः २५ सूतउवाच ॥ इतिचंद्रललामस्यधर्मगुह्योपबृंहितम् ॥ वचोमृतायनमृषिर्नातृप्यत्कर्णयोःपिबन् २६ सचिरंमायया विष्णोर्भ्रामितःकर्शितोभृशम् ॥ शिववाग्मृतध्वस्तक्लेशपुंजस्तमब्रवीत् २७ ऋषिरुवाच ॥ अहोईश्वरचर्यैषादुर्विभाव्याशरीरिणाम् ॥ यन्नमंतीशितव्यानिस्तुवंतिजगदीश्वराः २८ धर्मंग्राहयितुंप्रायःप्रवक्तारश्चदेहिनाम् ॥ आचरंत्यनुमोदंतेक्रियमाणंस्तुवंतिच २९

नत्वेनैवमत्तस्त्वंपश्यंतिचशुर्मुखेयथास्थितंपश्यंति अच्युतेचतथायथाश्रुतिविहितमात्मनश्चेतनसमुदायस्य जन्यतइतिजनोदेहस्तदादिजडस्यापितत्त्वंयथातथाअन्यथानपश्यंति २२ सर्वस्माच्छुद्धिहेतुत्वाच्चब्राह्मणाएवपूज्याइत्याह नहीति २३ अस्मामिश्चसंभाव्यत्वाद्विप्राएवश्रेयांसइत्याह ब्राह्मणेभ्यइति ३ त्रयीमयंवेदमुख्यप्रतिपाद्यंआत्मनिसम्यगाधानमवस्थानंसन्निधानलक्षणंयस्यतत्तथातपआलोचनंस्वाध्यायोऽध्ययनंसंयमोवागादिनियमस्तैर्बिभ्रतिआचारहीनंनपुनंतिवेदाइत्यतस्तपइत्यादि २४ नकेवलंदर्शनाच्छुद्धिरपितुश्रवणादपीतिसमुच्चितत्वादाह श्रवणादिति तर्ह्यधिकशुद्धिःकस्मादितितत्राह किम्विति आदिपदेननामस्मरणंगृह्यते २५ चंद्रललामस्यचंद्रशेखरस्यधर्मगुह्योपबृंहितंधर्मरहस्यगूढंअमृतायनंअमृतवद्वर्तमानंकर्णयोर्हितम् २६ भ्रामितःसमाधेःसंचालितःअतएवकर्शितः अनेनसंयमिनांसमाधेरन्यत्सुखंनास्तीतिज्ञापितम् २७ इयंवाग्लक्षणाचेष्टाईशितव्यानिभवद्विर्नियम्यानिब्रह्मकुलानिस्तुवंतियच्चस्मात्तस्मात् २८ मुनिःस्वयमेवस्तवनादेराभिप्रायंवक्ति धर्ममिति नकेवलंदेहिनांधर्मस्यप्रवक्तारआचरंतिचआचरतोनुमोदंतेक्रियमाणंधर्मस्तुवंतिच २९

ननुविध्यादिवर्जितानांभवतांधर्माचरणादिनातेजःक्षतिःस्यादित्यत्राह नेति वृत्तिस्तुग्रंथसंदर्भइतिवचनात्स्वमायामयवृत्तिभिःस्वेच्छयाकृतावृत्तिर्येषांतेतथातैःस्तवादिभिर्विवृतेनैतावताकर्मणाभगवतोनुभावःप्रभावोनप्रदुष्यतेप्रदुष्टोनभवति कुहकैरिंद्रजालव्यापारैर्मायिनोनुभावःनिश्चयोयथातथेति ३० प्रकारांतरेणदोषाभावंवक्ति सृष्ट्वेति योभगवान्मनसास्वेच्छयाइदंविश्वंसृष्ट्वांतर्यामिरूपेणांतःप्रविश्यदर्शनादिकुर्वद्भिर्गुणैरिंद्रियैरहंकर्तेति निरूप्यजीवइवाभातीत्येतावताजीववत्दुष्टोनभवति कथमिवस्वप्रदृग्भगवदिच्छयोद्बोधितमानसवासनयाकरितुरगादिपदार्थान्सृष्ट्वायथातद्वदेवलिप्तोनभवति ३१ तस्मैभगवतेनमइत्यन्वयःत्रयःसत्वादयोगुणायस्यसतथातस्मैगुणित्वंदोषत्वेनव्याप्तंदृष्टत्वादत्राह केवलायेति निर्दोषाय निर्दोषत्वंमुक्तस्याप्यस्तीतितत्राह अद्वितीयायेति मुक्तनिर्दोषत्वंहरिप्रसादायत्तंनहरेस्तथातस्य समाधिकशून्यत्वात् कथमयमर्थःसंपद्यतइत्यत्राह गुरवइति ब्रह्मादीनांस्वात्वरहस्योपदेष्टृत्वेनगुरुत्वात्तेषांसिद्धइत्यर्थः निराकारस्योपदेष्टृत्वं कथंघटतइतितत्राह ब्रह्मेति ज्ञानादिगुणाकाराय बृहंतोह्यस्मिन्गुणाइतिश्रुतावस्मिन्नितिवचनादाकारःसिद्धइति ३२ यतएवंनिरूप्यमाणेहरेरधिकःसमोवानास्तिसर्वश्रेष्ठश्चातस्तद्भक्तिमंतरेण

नैतावताभगवतःस्वमायामयवृत्तिभिः ॥ प्रदुष्येतानुभावस्तेमायिनःकुहकैर्यथा ३० सृष्ट्वेदंमनसाविश्वंस्वात्मनानुप्रविश्ययः ॥ गुणैःकुर्वद्भिराभातिकर्तेवस्वप्रदृग्यथा ३१ तस्मैनमोभगवतोत्रिगुणायगुणात्मने ॥ केवलायाद्वितीयायगुरवेब्रह्ममूर्तये ३२ कंवृणेऽतःपरंभूमन्वरंत्वद्वरदर्शनात् ॥ यद्दर्शनात्पूर्णकामःसत्यकामःपुमान्भवेत् ३३ वरमेतंवृणेथापिपूर्णकामाभिवर्षणात् ॥ भगवत्यच्युतेभक्तिंतत्परेषुतथात्वयि ३४ सूतउवाच ॥ इत्यर्थितोभिष्टुतश्चमुनिनासूक्तयागिरा ॥ तमाहभगवाञ्छर्वःशर्वयाचाभिनंदितः ३५ कामस्तेमहर्षेसत्योभक्तिर्मांस्त्वमधोक्षजे ॥ आकल्पांतंयशःपुण्यमजरामरतातथा ३६ ज्ञानंत्रैकालिकंब्रह्मन्विज्ञानंचविरक्तिमत् ॥ ब्रह्मवर्चस्वितामूयात्पुराणाचार्यतास्तुते ३७ सूतउवाच ॥ एवंवरान्समुनयेदत्वागात्त्र्यक्षईश्वरः ॥ देव्यैतत्कर्मकथयन्ननुभूतंपुरामुना ३८ सोप्यवाप्तमहायोगमहिमाभार्गवोत्तमः ॥ विचरत्यधुनाप्यद्धाहरावेकांततांगतः ३९ अनुवर्णितमेतत्तेमार्कंडेयस्यधीमतः ॥ अनुभूतंभगवतोमायावैभवमद्भुतम् ४० एतत्केचिदविद्वांसोमायाप्रसृतिमात्मनः ॥ अनाद्यावर्तिनंनॄणांकादाचित्कंप्रचक्षते ४१

त्वत्परमन्यंकंवरंवृणे वरंवरेण्यंदर्शनंज्ञानंयस्यसतथातस्मात् एतदेवाह यद्दर्शनाच्चेनोपदिष्टज्ञानाद्वापुमान्पूर्णकामःस्यात्अतएवसत्यकामश्च ३३ मद्दर्शनात्पूर्णकामत्वेवरंवृणीष्वेतिमद्वचनं व्यर्थमभूदितिमाशंकीत्याह वरमिति यद्यपिवरोनप्रार्थनीयस्तथापित्वद्वचनसाफल्यायैतंवरंवृणेपूर्णकामाभिवर्षणादितिशेषःकोसौवरइतितत्राह भगवतीति तत्परेषुतद्भक्तश्रेष्ठत्वयिच ३४ शर्वयापार्वत्यासह ३५ त्वंअधोक्षजेभक्तिमान्भूयाइतिशेषःआकल्पांतंपुण्ययशोजरामरणताचभूयात्तवेतिशेषः ३६ किंच वरांतरंचस्यादित्याह ज्ञानमिति ३७ अमुनामार्कंडेयेन ३८ अवाप्तमहायोगमहिमा प्राप्तमहाज्ञानमहिमाप्राप्तमहाणिमादियोगमहिमावा एकांततांनियतभक्तताम् ३९ ज्ञानवतोमार्कंडेयस्ययदेतदनुभूतंहरेर्मायावैभवंतेनुवर्णितमेतन्नॄणांमध्येकेचिदविद्वांसआत्मनोहरेर्मायाप्रसृतिसामर्थ्यविस्तारंकादाचित्कंप्रचक्षते । अकालेप्रदर्शितत्वेनकादाचित्कंकिंनस्यादत्राह अनादीतिअनादिकालवर्तिनं ननूतनं यद्वोपसंहरतिअनुवर्णितामिति मार्कंडेयस्यैतच्चरितंतेनुवर्णितांकेतच्चरित्यत्राह अनुभूतमिति श्रद्धेयत्वेमतभेदमाह एतदिति ४० ४१

इतोप्येतच्छ्रद्धयमितिफलमाह यइति अनुभावनभावितंसंवर्द्धितंतयोरुभयोःश्रावयितृश्रोत्रोःकर्माशयसंसृतिः कर्मणामाशयःस्थानंदेहस्तन्निमित्तसंसारोनभवेदितिस्वरूपनाशएवोच्यते अस्यश्रीहरिभक्ति
मुख्यहेतुरतोच्युतांभक्तिमित्याह ४२ इतिश्रीभागवतेमहापुराणेविजयध्वजकृतटीकायांनवमाध्यायः ॥ ९ ॥ स्थूलमतीनामुपासनार्थंपुरुषरूपस्यहरेर्यजनप्रकारंवदत्यस्मिन्नध्याये तत्रतद्बुभुत्सयाशौ
नकःपृच्छति अर्थाति बुद्धिसन्निहितत्वादिममित्युक्तं समस्ततंत्रराद्धांतेसर्वपंचरात्रतंत्रलक्षणशास्त्रोक्तसिद्धांतेउक्तंयद्भागवतंभगवद्विषयंतत्त्वंतद्वेत्तीति १ तांत्रिकाःश्रीनारायणपूजाविधायकशास्त्रपटवः
श्रियःपतेःपत्युःप्रयोगरूढैःप्राबल्याद्विसंज्ञावैकल्पिकाइतिबोद्धव्यं परिचर्यायांपूजायांयैर्भूम्यादिपदार्थैःअंगोपांगायुधाकल्पंअंगानिपादादीनिउपांगानिगरुडादीनिकल्पयत्याकल्पमाभरणंकोस्तुभादि
२ तान्पदार्थान् क्रियायोगंपूजालक्षणंबुभुत्सतांज्ञातुकामानांक्रियानैपुण्येनक्रियापटुत्वेन अमर्त्यतांमरणराहित्यं मुक्तपाख्यं ३ वेदागमतंत्राभ्यांवेदाख्यागमेनतंत्रशास्त्रेणच पञ्चजादिभिराचार्यैः
प्रतिपादितायास्तांविभूतीः ४ मायाप्रकृतिःआदिशब्देनमहदहंकारमनांसिपंचभूतानिचगृह्यंते विकाराइंद्रियादयःविराट् ब्रह्मांडंसचित्केचेतनसहितेयस्मिन्ब्रह्मांडेभुवसत्रयंदृश्यते ५ एतद्ब्रह्मांडं

यएवमेतद्गुरुवर्यवर्णितंरथांगपाणेरनुभावभावितम् ॥ संश्रावयेत्संशृणुयादुतोभयोस्तयोर्नकर्माशयसंसृतिर्भवेत् ४२ ॥ इतिश्रीभागवतेमहापुराणेद्वादश
स्कंधेनवमोध्यायः ॥ ९ ॥ शौनकउवाच ॥ अथेममर्थंपृच्छामोभवंतंबहुवित्तमम् ॥ समस्ततंत्रराद्धांतेभवान्भागवततत्त्ववित् १ तांत्रिकाःपरिचर्यायांके
शवस्यश्रियःपतेः ॥ अंगोपांगायुधाकल्पंकल्पयंतियथैवयैः २ तान्नोवर्णयभद्रंतेक्रियायोगंबुभुत्सताम् ॥ येनक्रियानैपुणेनमर्त्योयायादमर्त्यताम् ३ सू
तउवाच ॥ नमस्कृत्वागुरून्वक्ष्येविभूतीर्वैष्णवीरपि ॥ यावेदागमतंत्राभ्यामाचार्यैःपञ्चजादिभिः ४ मायाद्यैर्नवभिस्तत्त्वैःसविकारैरयंविराट् ॥ निर्मि
तोदृश्यतेयस्मिन्साचित्केभुवनत्रयम् ५ एतद्वैपौरुषंरूपंभूःपादौद्यौःशिरोनभः ॥ नाभिःसूर्योक्षिणीनासेवायुःकर्णौदिशःप्रभोः ६ प्रजापतिःप्रजननमपा
नोमृत्युरीशितुः ॥ तद्वाहवोलोकपालामनश्चंद्रोभ्रुवोर्यमः ७ लज्जोत्तरोधरोलोभोद्युतिर्ज्योत्स्नास्मयोभ्रमः ॥ रोमाणिभूरुहाभ्रेमेघाःपुरुषमूर्धजाः ८
यावानयंसपुरुषोयावत्यासंस्थयामितः ॥ तावानसावपिमहान्पुरुषोलोकसंस्थया ९ कौस्तुभव्यपदेशेनस्वात्मज्योतिर्बिभर्त्यजः ॥ तत्प्रभाव्यापिनी
साक्षात्श्रीवत्समुरसाविभुः १० स्वमायांवनमालाख्यांनानागुणमयींदधत् ॥ वासश्छंदोमयंपीतंब्रह्मसूत्रंत्रिवृत्स्वरम् ११ बिभर्तिसांख्ययोगौचदेवो
मकरकुंडले ॥ मौलिंपदंपारमेष्ठ्यंसर्वलोकनमस्कृतम् १२ अव्याकृतमनंताख्यमासनंयदधिष्ठितम् ॥ धर्मज्ञानादिभिर्युक्तंसत्त्वंपद्ममिहोच्यते १३
ओजःसहोबलयुतंमुख्यतत्त्वंगदांदधत् ॥ अपांतत्त्वंदरवरंतेजस्तत्त्वंसुदर्शनम् १४

पौरुषंरूपंपुरुषसन्निधानयोग्यप्रतिमारूपं यैरंगादिकंकल्पयंतितानाह भूरिति अत्रविवरणंपूर्ववदूह्यं ६ प्रजापतिर्दक्षःप्रजननमुपस्थं ७ उत्तरोष्ठोलोभःलज्जाअधरोष्ठोद्युतिःस्वरूपकांतिः ज्योत्स्ना
भ्रमोभ्रांतिःस्मयोदर्पविशेषः एतावतीअंगकल्पना ८ सोयंपुरुषःब्रह्मांडाख्यःलोकसंस्थयायावत्यासंस्थयामितःपरिमितोसौमहान्पुरुषस्तदंतस्थपुरुषोभगवानपितावान्तावत्परिमाणोपेतः ९ उपां
गान्याह कौस्तुभेति अजोविष्णुःस्वात्मज्योतिःज्योतिःस्वरूपःयद्वा स्वाधीनब्रह्माख्यज्योतिः श्रीरित्यध्याहार्यसाक्षाच्छ्रीस्तस्य श्रीवत्सस्यप्रभांव्याप्नोतीतितत्प्रभाव्यापिनीतितादृशंश्रीवत्समुरसाबिभ
र्ति १० स्वांमायांश्रियंनानावर्णगुणमयीं छंदोमयंवेदस्वरूपं त्रिवृत्त्रिवर्णात्मकंस्वरंप्रणवलक्षणंब्रह्मसूत्रंदधत् ११ सांख्यंज्ञानंयोगंकर्मएतद्द्वयाख्येमकरकुंडले पारमेष्ठ्यंपदंस्थानंमौलिंकिरीटम्
१२ यदधिष्ठितमासनंपीठंतदनंताख्यंअव्याकृतंविकाररहितंसत्त्वंसत्त्वगुणाभिमानिनीश्रीःपद्मम् १३ मुख्यतत्त्वंमुख्यप्राणरूपंगदांदधत् १४

नभोनिभमाकाशवन्नीलवर्णनभस्तत्वरूपमसिंनंदकंतमोमयंतमोगुणवदाच्छादनकरंचर्मदधत् पुण्यकर्मस्वरूपेइषुधीच १५ अस्यहरेःस्यंदनमाकृतिःपृथिवअस्याभिव्यक्तिः तन्मात्राणिशब्दादीनि इंद्रियार्थाःकर्मेंद्रियविषयाःक्रियामताः विसर्गादीनिकर्माणिज्ञातव्यानि १६ देवयजनंहरेःपूजास्थानं चक्राब्जादिकंमंडलं आत्मनःपरमात्मनःसकाशात्संस्कारःशरीरशुद्धिर्दीक्षादीक्षया हिदेहशुद्धिः भगवतःपरिचर्याआत्मनःस्वस्यदुरितक्षयः पापनाशनं १७ भगवान्पूज्यःभगशब्दात्माभगशब्दस्वरूपऐश्वर्यादिगुणस्वरूपइत्यर्थः धर्मयशआख्येचामरव्यजने १८ निज धामतद्वैकुंठंतदभिमानिदेवता आतपत्रंत्रिवृत्त्रिविधोवेदः सुपर्णाख्योयज्ञंपुरुषंयज्ञपुरुषंवहति १९ साक्षादनपायिनीनित्यावियोगिनीश्रीर्हरेरात्मभूतार्धदेहानाम विष्वक्सेनःपार्षदाधिपोविदितःतं त्रमूर्तिः तंत्रग्रंथाभिमानी २० अष्टौनंदादयोद्वास्थाःहरेरणिमाद्यागुणास्तदाश्रिताःमूर्तिव्यूहेमूर्तिस्थापनेवासुदेवःसंकर्षणप्रद्युम्नोनिरुद्धःस्वयमभिधीयते २१ सभगवानेवविश्वादिशब्दवाच्यइतिभाष्यते अ र्थेंद्रियाशयज्ञानैःवृत्तिभिः अर्थज्ञानलक्षणवृत्त्याजाग्रदवस्थयाविश्वःमनआदींद्रियगतवासनालक्षणज्ञानवृत्त्यास्वप्नावस्थयातैजसः आशयःसुषुप्तिस्तदवस्थाज्ञानलक्षणवृत्त्यावर्तमानःप्राज्ञःएतावंतंका लंसुखमस्वाप्संइत्यनुभवात् किमेतेभिन्नाइत्यत्राह ततइतितेाव्याप्तोऽपरिच्छिन्नइत्यर्थः बहुत्वसंख्यामात्रयोगित्वंनतुमिथोभिन्नत्वम् २२ अंगादिकथनस्योपयोगमाह अंगेति अंगा

नभोनिभंनभस्तत्वमसिंचर्मतमोमयम् ॥ कालरूपंधनुःशार्ङ्गंतथाकर्ममयेषुधी १५ इंद्रियाणिशरानाहुराकृतिरस्यस्यंदनम् ॥ तन्मात्राण्यस्याभिव्य क्तिरिंद्रियार्थाःक्रियामताः १६ मंडलंदेवयजनंदीक्षासंस्कारआत्मनः ॥ परिचर्याभगवतआत्मनोदुरितक्षयः १७ भगवान्भगशब्दात्मालीलाकमल मुद्वहन् ॥ धर्मयशश्चभगवान्चामरव्यजनेभजत् १८ आतपत्रंतद्वैकुंठंनिजधामाकुतोभयम् ॥ त्रिवृद्वेदःसुपर्णाख्योयज्ञंवहतिपूरुषम् १९ अनपायिनी भगवतीश्रीःसाक्षादात्मनोहरेः ॥ विष्वक्सेनस्तंत्रमूर्तिर्विदितःपार्षदाधिपः २० नंदादयोष्टौद्वाःस्थाश्चतेणिमाद्याहरेर्गुणाः ॥ वासुदेवःसंकर्षणःप्रद्युम्नः पुरुषःस्वयम् ॥ अनिरुद्धइतिब्रह्मन्मूर्तिव्यूहेभिधीयते २१ सविश्वतैजसप्राज्ञतुरीयइतिवृत्तिभिः ॥ अर्थेंद्रियाशयज्ञानैर्भगवान्भाष्यतेततः ।२२ अं गोपांगायुधाकल्पैर्भगवांस्तच्चतुष्टयम् ॥ बिभर्तिस्मचतुर्मूर्तिर्भगवान्हरिरीश्वरः २३ द्विजवृषभसएषब्रह्मयोनिःस्वयंदृक्स्वमहिमपरिपूर्णोमायया द्यःस्व यैतत् ॥ सृजतिहरतिपातीत्याख्ययानावृताक्षोविसृजतइवनिरुक्तस्तत्परैरात्मलभ्यः २४

दिशब्दवाच्यवासुदेवाद्यावरणैर्भगवान्पूज्यइत्येतदर्थत्वेनकथनमित्यर्थः अंगादिचतुष्टयस्यापेहरिरेवाधारइत्याह तदिति चतुर्मूर्तिर्भगवानंगादिचतुष्टयंबिभर्त्तितत्रायंविभागःअंगात्मकाःवासुदेवाद्याः स्वयमुपांगादिषुब्रह्मादिषुसंनिहितत्वेनपूजाकालेतथास्मरणार्थस्येत्युक्तं भगवान्वसिष्ठाद्यन्यतमोनेत्याह हरिरिति हरिरपिपुरंदराद्यन्यतमःकिंनस्यादित्यतउक्तमीश्वरइति सोपिसदाशिवःस्यादत उक्तंचतुर्मूर्तिरिति सोष्टमूर्तीरितिप्रसिद्धः २३ यद्वेदांतवेद्यंतदेवात्रपुरुषरूपेणोच्यते तस्मादिदंमुमुक्षुभिःश्रद्धयोपास्यमितिश्लोकद्वयेनाह द्विजवृषभेति हेद्विजवृषभ तत्परैस्तद्भक्तैः आत्मलभ्यः आत्मनिमनसिलभ्यःप्रकाश्योभवति यद्वात्मनैवस्वानुग्रहेणैवलभ्यःप्राप्यःयमेवैषवृणुतेतेनलभ्यइतिश्रुतेः किंलक्षणकःकोयंपुरुषइतितत्राह मायययेति स्वयामायया स्वेच्छयैवसृजतीत्याद्याख्ययानि रुक्तःकथंसृजतीतिस्रष्टाहरतीतिहरःपातीतिपाता स्रष्टापातातथैवात्तानिखिलस्यैकएवत्वित्यादेः अत्रकिंप्रमाणंतत्राह ब्रह्मेति ब्रह्मवेदादिशब्दराशिर्योनिर्ज्ञप्तिकारणंयस्यसतथा वेदादिशब्दराशिर स्मिन्नर्थेमानमित्यर्थः चतुर्मुखस्यापिसृष्ट्यादिकर्तृत्वस्यप्रमितत्वात्कथंहरेरेवेतिनिश्चीयते ब्रह्मादेवानांप्रथमःसंबभूवेतिश्रुतिरित्यतोवाह ब्रह्मेति ब्रह्मणश्चतुर्मुखस्ययोनिःकारणं योब्रह्माणंविदधाती तिश्रुतेः लोकवत्परोपदेशेनकर्माणिनप्रवर्तते किंतुस्वरूपज्ञानेनेत्याशयेनाह स्वयंदृगिति स्वयंभूतज्ञानत्वेपिकर्मण्यपेक्षाविनाभूतंदृष्टमत्राह स्वमहिमेति स्वेमहिम्नीतिश्रुतेः स्वयंप्रकाशमानस्यप्रद्योतमानस्यु

मेवाद्यावरणेनेवहरेर्ज्ञानस्यापितस्यादित्यत्राह अनावृताक्षइति आवरणरहितदृष्टिःकथंप्रकाश्यतइत्यत्राह विसृजतइति स्रष्टापमित्युपासमानस्यविविधंसृजतइतिप्रकाशतेसंहर्तायमितिज्ञानवतःसंहर
तीव रक्षतीव इतरस्यउपलक्षणमेतत् यान्यान्गुणानुपसंहृत्यो गास्तेतत्तद्गुणत्वेनप्रकाशतइति २४ श्रीकृष्णकृष्णेत्युक्तार्थः २५ एवमुपास्तिंकुर्वतःफलमाह यइदमिति कल्पेउषसिमहापुरुषलक्षणं
जपतिसजन्वाहृदयगुहायांशेतइतिहृदयगुहाशयंब्रह्मजानाति कुंशेशयमितिवत् ॥ २६ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेविजयध्वजकृतटीकायांदशमोध्यायः ॥ १० ॥ सर्वोपास्यत्वेप्या
दित्यस्थस्यैवहरेर्गृहस्थैर्विशेषतउपास्तिःकर्तव्येतितत्स्थितिप्रकारंकथयत्यस्मिन्नध्याये तत्रशौनकः पृच्छति शुकइति शुकोभगवान्विष्णुरातायपृथङ्नामरूपादिसप्तकोगणोमासिमासिनानानामानं
सूर्यंभगवंतंनिषेवमाणः सौरैःसूर्यस्यविद्यमानेस्यंदनेरथेनानावसतितथा अन्येचऋषयोगंधर्वाप्सरसोनागाइत्यादिपंचमस्कंधेयदाह १ तदातेषांपृथङ्नामानिपृथक्कर्माणिचानुक्तान्यतःश्रद्दधाना
नोस्माकंतानिब्रूहीत्यन्वयः सूर्यात्मनःसूर्यांतर्यामिणोहरेर्व्यूहंस्थितिर्विशेषंचवद सूर्यात्मनोहरेःपरितःस्थितंतेषांव्यूहंपृथक्पृथगतिशेषइतिवा २ अयंकल्पोहरेर्बुद्धिपूर्वप्रणीतत्वान्नमिथ्याभूत
इतिभावेनाह अनादीति लोकंतंत्रयतिव्यापारयतीतिलोकतंत्रोलोकप्रवृत्तिहेतुरयंसूर्यादिः लोकेषुपरिवर्ततेउदयादिनिमित्तव्यापारायउदयादिकंगच्छतीत्यर्थः कीदृशः सर्वदेहिनामात्म

श्रीकृष्णकृष्णसखवृष्णिवृषावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य ॥ गोविंदगोद्विजसुरार्तिहरावतारतीर्थश्रवःश्रवणमंगलपाहिभृत्यान् २५ यइदंकल्पउ
त्थायमहापुरुषलक्षणम् ॥ तश्चित्तःप्रयतोजप्त्वाब्रह्मवेदगुहाशयम् ॥ २६ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेदशमोऽध्यायः ॥ १० ॥ शौनकउ
वाच ॥ शुकोयदाभगवान्विष्णुरातायपृच्छते ॥ सौरोगणोमासिमासिनानावसतिसप्तकः १ तेषांनामानिकर्माणिनियुक्तानामधीश्वरैः ॥ ब्रूहिनःश्रद्दधा
नानांव्यूहंसूर्यात्मनोहरेः २ सूतउवाच॥ अनाद्यविद्ययाविष्णोरात्मनःसर्वदेहिनाम् ॥ निर्मितोलोकतंत्रोयंलोकेषुपरिवर्तते ३ एकएवहिलोकानांसूर्यआ
त्मादिकृद्धरिः ॥ सर्ववेदक्रियामूलमृषिभिर्बहुधोदितः ४ कालोदेशःक्रियाकर्ताकारणंकार्यमागमः ॥ द्रव्यंफलमितिब्रह्मन्नवधोक्तोजयाहरिः ५ मध्वादि
षुद्वादशसुभगवान्कालरूपधृक् ॥ लोकतंत्रायचरतिपृथक्द्वादशभिर्गुणैः ६

नोविष्णोःअनाद्यविद्यपाकारणशून्येच्छयानिनिर्मितः सूर्याचंद्रमसौधातायथापूर्वमकल्पयदितिश्रुतेः ३ सरतीतिसूर्यइतिसूरिप्राप्यत्वात्सूर्यइतितच्छब्दप्रवृत्तिनिमित्तस्यतदेकाधीनत्वान्मुख्य
कर्ताहरिःएकएवेत्याह एकएवेति लोकानामुभयेषांआत्मासूर्यआत्माजगतस्तस्थुषश्चेतिश्रुतिः दिनस्यादिकृत्कृतीच्छेदनइतिधातोर्दिनादिच्छित् अस्तकर्ताच प्रातरुत्थायायथसंध्यामुपासीते
तिश्रुतेः सर्ववेदोक्तक्रियामूलमतएवऋषिभिर्बहुधोदितः उदितमितिपाठेतत्स्वरूपंनानात्वेनकथितं अत्रद्वादशसूर्येष्वेकःस्वयंहरिरन्यत्रांतर्यामित्वेनेतिविशेषः ४ नानात्वमुपपादयति का
लइति अजयामाययानाद्यविद्ययानवधोक्तःकालःप्रातरादिः देशःसमादिः क्रियाअनुष्ठानं कर्ताब्राह्मणादिः कारणमिंद्रियं कार्यंदेहः द्रव्यंचर्वादि भूतपंचकंवा आगमोवेदादिशास्त्रं फलंस्वर्गा
दि कालादिषुस्थित्वातत्कर्मकारकत्वेनकालादिशब्दवाच्यत्वेननवधाहरिरुक्तः इतिज्ञातव्यम् ५ एकएवहरिःसर्वप्रेरयतीत्युक्तंतत्प्रकारंदर्शयति मध्वादिष्विति कालरूपधृक्भगवान्लोकतंत्रायलोक
व्यापारायमध्वादिषुचैत्रादिषुद्वादशसुमासेषुद्वादशभिर्गुणैर्द्वादशविधकालगुणैःपृथक्पृथक्चरतीत्यन्वयः ६

---

१ गोपवनितावज्रभृत्यगीतेतिपाठांतरम् ।

इदानींतेषांनामान्याह धातेत्यादिना धातासूर्यः कृतस्थलीअप्सराःहेतीराक्षसः वासुकिर्नागः रथकृत्तक्षा पुलस्त्यःऋषिः तुंबुरुर्गंधर्वः अर्यमाधात्रादयोमधुमासंनयंति तेउक्तक्रियामवर्तकत्वेनत न्मासमतिपारयंति ७ अर्यमासूर्यः पुलहोऋषिः अथौजाःतक्षा प्रहेतीराक्षसःपुंजकस्थलीअप्सराःनारदोगंधर्वःकच्छनीरोनागः एतेमाधवमासाधिपतिंमाधवनामानंनयंति शरणंप्राप्योपास ते एवमुत्तरत्राप्यनुसंधेयं ८ मित्रःसूर्यःअत्रिःऋषिःपौरुषेयोराक्षसःतक्षकोनागःमेनकाप्सराः हाहागंधर्वःरथस्वनस्तक्षा ९ वसिष्ठऋषिःवरुणःसूर्यः रंभाप्सराः सहजन्योराक्षसः हूहूर्गंधर्वः शुक्रोनागःचित्रस्वनस्तक्षा १० इंद्रःसूर्यःविश्वावसुर्गंधर्वःस्रोतातक्षा एलापत्रोनागः अंगिराऋषिः प्रम्लोचाप्सराः स्वर्योनामराक्षसः ११ विवस्वानादित्यःउग्रसेनोगंधर्वः व्याघ्राराक्षसः आसारगणस्तक्षा भृगुर्ऋषिः अनुम्लोचाअप्सराः शंखपालोनागः १२ पूषाआदित्यः धनंजयोनागः वातोराक्षसःसुषेणस्तक्षा सुरुचिर्गंधर्वः घृताच्यप्सराः गौतमोऋषिः १३ ऋतुरप्स राः वर्चागंधर्वःभरद्वाजऋषिःपर्जन्यआदित्यःसेनजित्तक्षा विश्वोराक्षसः ऐरावतोनागः १४ अंशुरादित्यःकश्यपऋषिःतार्क्ष्यस्तक्षा धृतसनोगंधर्वः उर्वशीअप्सराः विद्युच्छंकुःराक्षसःमहाशंखो

धाताकृतस्थलीहेतिर्वासुकीरथकृन्मुने ॥ पुलस्त्यस्तुंबुरुरितिमंधुमासंनयंत्यमी ७ अर्यमापुलहोथौजाःप्रहेतिःपुंजकस्थली ॥ नारदःकच्छनीर श्चनयंत्येतेस्ममाधवम् ८ मित्रोत्रिःपौरुषेयोथतक्षकोमेनकाहाहाः ॥ रथस्वनइतिह्येतेशुक्रमासंनयंत्यमी ९ वसिष्ठोवरुणोरंभासहजन्यस्तथाहूहूः ॥ शुक्रश्चित्रस्वनश्चैवशुचिंमासंननंत्यमी १० इंद्रोविश्वावसुःस्रोताएलापत्रस्तथांगिराः ॥ प्रम्लोचाराक्षसःस्वर्योनभोमासंनयंत्यमी ११ विवस्वानुग्रसे नश्चव्याघ्रआसारणोभृगुः ॥ अनुम्लोचाशंखपालोनभस्याख्यंनयंत्यमी १२ पूषाधनंजयोवातःसुषेणःसुरुचिस्तथा ॥ घृताचीगौतमश्चेतितपोमासंनयं त्यमी १३ ऋतुर्वर्चाभरद्वाजःपर्जन्यःसेनजित्तथा ॥ विश्वऐरावतश्चैवतपस्याख्यंनयंत्यमी १४ अथांशुःकश्यपस्ताक्ष्योंधृतसेनस्तथोर्वशी ॥ विद्युच्छंकुर्महाशंखःसहोमासंनयंत्यमी १५ भगःस्फूर्जोरिष्टनेमिरूर्णआयुश्चपंचमः ॥ कर्कोटकःपूर्वचित्तिःसंहस्याख्यंनयंत्यमी १६ त्वष्टाऋचीकतनयः कंबलश्चतिलोत्तमा ॥ ब्रह्मरातोथशतजिद्धृतराष्ट्रइषंभराः १७ विष्णुरश्वतरोरंभासूर्यवर्चोश्वसत्यकौ ॥ विश्वामित्रमुखाएतऊर्जमासंनयंत्यमी १८ एता भगवतोविष्णोरादित्यस्यविभूतयः ॥ स्मरतांसंध्ययोर्नृणांहरंत्यंहोदिनेदिने १९ द्वादशस्वपिमासेषुदेवोसौषड्भिरस्यवै ॥ चरन्समंतात्तनुतेपरत्रेहचस न्मतिम् २० सामर्ग्यजुर्भिस्तल्लिंगैर्ऋषयःसंस्तुवंत्यमुम् ॥ गंधर्वास्तंप्रगायंतिनृत्यंत्यप्सरसोग्रतः २१

नागः १५ भगआदित्यः स्फूर्जोराक्षसःअरिष्टनेमिर्ऋषिःऊर्णोगंधर्वः आयुस्तक्षा कर्कोटकोनागः पूर्वचित्तिरप्सराः १६ त्वष्टाआदित्यःऋचीकतनयोराक्षसः कंबलाख्योनागःतिलोत्तामा प्सराः ब्रह्मरातऋषिःशतजित्तक्षा धृतराष्ट्रोगंधर्वइषंबिभ्रतीतिइषंभराः इषमासप्रणेतारइत्यर्थः १७ विष्णुरादित्यः अश्वतरोनागःरंभाप्सराः सूर्यवर्चोगंधर्वः अश्वोराक्षसः सत्यकस्तक्षा विश्वामित्रऋषिः १८ उपसंहरन्नेवतत्कथनप्रयोजनमाह एताइति आदित्यांतर्यामिणोहरेः ध्येयःसदासवितृमंडलमध्यवर्तीइतिवचनमत्रप्रमाणं १९ एतदभिप्रेत्यपुनरपिलोकद्वयोपभोज्य फलमाह द्वादशस्विति द्वादशसुमासेषुषड्भिर्गणैर्धात्रादीनृतेषट्संख्यामुपगतैःसहसमंताच्चरन् देवोस्यसेवकस्येहपरत्रचलोकेचसन्मतिंनिर्दुःखस्वानंदानुभवलक्षणांतनुते यथायोग्यंविस्तृत्यददाती त्यर्थः २० इदानींतेषांकर्माण्याह सामेति सामर्ग्यजुर्भिस्तल्लिंगैस्तल्लक्षणैस्तत्तत्स्वगमकैर्वाक्यैर्वाउच्चैंतिसम्यग्वियोजयंति ग्रामण्यस्तक्षाणःनैर्ऋताराक्षसाः २१

१ चैत्रं । २ वैशाखं । ३ ज्येष्ठं । ४ आषाढं । ५ श्रावणं । ६ भाद्रपदं । ७ मार्गं । ८ फाल्गुनं ९ मार्गशीर्षं । १० पुष्यमासं । ११ अश्विनमासं । १२ कार्तिकमासं । मासक्रमानुलंघनंकौर्मोक्तदिशा ।

२२ एवंगणनमंतरेणान्येपिसंतीत्याह वालखिल्याइति २२ अध्यायार्थमुपसंहरति एवमिति तपतिआवर्तयति २४ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेविजयध्वजकृतटीकायांएकादशोध्यायः ॥११॥ उपसंहारमुखेनानुसंधातुंद्वादशस्कंधात्मकंभागवतार्थंसंक्षिप्यकथयत्यस्मिन्नध्यायेएतद्वइत्यादिना एतद्विष्णोश्चरितं तद्वक्तव्यत्वेहेतुमाह भवद्विरिति प्रश्नेति विस्मितंसूचयति नराणामितिन राणांमध्येसतांपुरुषाणांमध्येश्रोतुमुचितं अनेनाधिकारसामर्थ्यंसूचितं १ २ श्रोतव्यार्थेमुख्यहेतुमाह अत्रेति अत्रश्रीभागवतेकस्मान्मुख्यत्वमत्राह सर्वेति वृत्रादिसर्वपापहंतृत्वामिंद्रस्याप्यस्तुत्य तउक्तंनारायणइति नायंसांकेतिकनारायणइत्याह हृषीकेशइति हृषीकाणामीशोजीवोपिस्यादतआह भगवानिति ऐश्वर्यादिगुणसमुद्रोहिभगवान्एवंविधोनान्यइत्याह सात्वतांपतिरिति ३ सगुण

उन्नह्यंतिरथंनागाग्रामण्योरथयोजकाः ॥ चोदयंतिरथंपृष्ठेनैऋंतावलशालिनः २२ वालखिल्याःसहस्राणिषष्टिर्ब्रह्मर्षयोमलाः ॥ पुरतोभिमुखंयांतिस्तुवंतःस्तुतिभिर्विभुम्२३एवंह्यनादिनिधनोभगवान्हरिरीश्वरः ॥ कल्पेकल्पेस्वमात्मानंव्यूह्यलोकान्तपत्यजः २४ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधे एकादशोध्यायः ॥११॥ सूतउवाच ॥ नमोधर्मायमहतेनमःकृष्णायवेधसे ॥ ब्राह्मणेभ्योनमस्कृत्यधर्मान्वक्ष्येसनातनान् १ एतद्वःकथितंविप्राविष्णोश्चरितमद्भुतम् ॥ भवद्भिर्यदहंपृष्टोनराणांपुरुषोचितम् २ अत्रसंकीर्त्यतेसाक्षात्सर्वपापहरोहरिः ॥ नारायणोहृषीकेशोभगवान्सात्वतांपतिः ३ यत्तद्ब्रह्मपरंगुह्यंजगतःप्रभवाप्ययम् ॥ ज्ञानंचसदुपाख्यानंप्रोक्तंविज्ञानसंयुतम् ४ भक्तियोगश्चव्याख्यातोवैराग्यंचतदाश्रयम् ॥ पारिक्षितमुपाख्यानंनारदाख्यानमेवच ५ प्रायोपवेशोराजर्षेर्विप्रशापात्परीक्षितः ॥ शुकस्यब्रह्मर्षभस्यसंवादश्चपरीक्षितः ६ योगधारणयोत्क्रांतिःसंवादोनारदाजयोः ॥ अवतारानुगीतंचसर्गःप्राधानिकोग्रतः ७ विदुरोद्धवसंवादःक्षत्तृमैत्रेययोस्ततः ॥ पुराणसंहिताप्रश्नोमहापुरुषसंस्थितिः ८ ततःप्राकृतिकःसर्गःसप्तवैकृतिकास्तथा ॥ ततोब्रह्मांडसंभूतिर्वैराजःपुरुषोयतः ९ कालस्यस्थूलसूक्ष्मस्यगतिःपद्मसमुद्भवः ॥ भुवउद्धरणंाप्योर्हिरण्याक्षवधोयतः १० ऊर्ध्वातिर्यगधःसर्गोरुद्रसर्गस्तथैवच ॥ अर्धनारीनरस्याथययास्वायंभुवोमनुः ११ शतरूपाचयास्त्रीणामाद्याप्रकृतिरुत्तमा ॥ संतानोधर्मपत्नीनांकर्दमस्यप्रजापतेः १२ अवतारोभगवतःकपिलस्यमहात्मनः ॥ देवहूत्याश्चसंवादःकपिलेनचधीमता १३ नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनम् ॥ ध्रुवस्यचरितंपश्चात्पृथोःप्राचीनबर्हिषः १४

मेवोक्तंनिर्गुणमतंनेत्याह यत्तदिति जगतःप्रभवाप्ययकृत्यत्परंगुह्यंब्रह्मतत्प्रोक्तंतद्विषयेज्ञानंसतांउपाख्यानयनेनतत् ४ साभक्तिराश्रयोयस्यतत्तदाश्रयं अत्रेत्येतत्प्रतिवाक्यमनुसंधातव्यम् ५ ६ योग धारणयाअखंडस्मरणलक्षणया नारदाजयोर्नारदब्रह्मणोः अवताराणामनुगीतंकथनं प्राधानिकःप्रकृतिसर्गःसिसृक्षुत्वविशेषः ७ ८ प्राकृतिकःप्रकृतिविकृतः तेसप्तमहदहंकारपंचभूतानीतिवैकृतिकाः इंद्रियविषयाःयतोयत्रब्रह्मांडे ९ पद्मसमुद्भवोनाभेरितिशेषःअंभोधेर्भुवउद्धरणाउद्धारः १० ऊर्ध्वतिर्यगधःसर्गःदेवतिर्यगसुरसृष्टिःअर्धनारीनरस्यब्रह्मणःसकाशात्स्वायंभुवोमनुर्यथोत्पन्नस्तथा ११ यास्त्रीणांमध्येआद्याप्रकृतिःस्त्रीसाशतरूपाचयथोत्पन्नातथा १२ १३ तवब्रह्मसमुत्पत्तिः नवप्रजापतीनांमरीच्यादीनांसकाशात्सृष्टिःतेषामुत्पत्तिर्वा १४

नारदस्यचसंवादस्ततःप्रैयव्रतंद्विजाः ॥ नाभेस्ततोनुचरितमृषभस्यभरतस्यच ॥ द्वीपवर्षसमुद्राणांगिरिनद्युपवर्णनम् १५ ज्योतिश्चक्रस्यसंस्थानंपाता १९
लनरकस्थितिः ॥ दक्षजन्मप्रचेतोभ्यस्तत्पुत्राणांचसंततिः १६ यतोदेवासुरनरास्तिर्यङ्नगखगादयः ॥ त्वाष्ट्रस्यजन्मनिधनंपुत्रयोश्चदितेर्द्विजाः १७ १२
दैत्येश्वरस्यचरितंप्रह्लादस्यमहात्मनः ॥ मन्वंतरानुचरितंगजेंद्रस्यविमोक्षणम् १८ मन्वंतरावतराश्चविष्णोर्हयशिरादयः ॥ कौर्म्यंमात्स्यंनारसिंहंवाम
नंचजगत्पतेः १९ क्षीरोदमथनंतद्वदमृतार्थंदिवौकसाम् ॥ देवासुरमहायुद्धंराजवंशानुकीर्तनम् २० इक्ष्वाकुजन्मतद्वंशःसुद्युम्नस्यमहात्मनः ॥ इलोपा
ख्यानमत्रोक्तंतारोपाख्यानमेवच २१ सूर्यवंशानुकथनंशशादाद्यानृपादयः ॥ सौकन्यमथशार्यातंककुत्स्थस्यचधीमतः २२ खट्वांगस्यचमांधातुःसौभ
रेःसगरस्यच ॥ कोशलेंद्रस्यचरितमद्भुतंकिल्बिषापहम् २३ निमेरंगपरित्यागोजनकानांचसंभवः ॥ रामस्यभार्गवेंद्रस्यनिःक्षत्रीकरणंभुवः २४ ऐ
लस्यसोमवंशस्यययातेर्नहुषस्यच ॥ दोष्यंतेर्भरतस्यापिशंतनोस्तत्सुतस्यच २५ ययातेर्ज्येष्ठपुत्रस्ययदोर्वंशोनुकीर्तितः ॥ यत्रावतीर्णोभगवान्कृष्णा
ख्योजगदीश्वरः २६ वसुदेवगृहेजन्मतस्यवृद्धिश्चगोकुले ॥ तस्यकर्माण्यपाराणिकीर्तितान्युसुरद्विषः २७ पूतनासुपयःपानंशकटोच्चाटनंशिशोः ॥ तृ
णावर्तस्यनिष्पेषस्तथैववकवत्सयोः २८ धेनुकस्यसहभ्रातुःप्रलंबस्यचसंक्षयः ॥ गोपानांचपरित्राणंदावाग्नेःपरिसर्पतः २९ दमनंकालियस्याहेर्महा
हेर्नदमोक्षणम् ॥ व्रतचर्याचकन्यानांयत्रतुष्टाव्रतैःप्रभुः ३० प्रसादोयज्ञपत्नीभ्योविप्राणांचानुतापनम् ॥ गोवर्धनोद्धारणंचशक्रस्यसुरभेरथ ३१ य
ज्ञाभिषेकःकृष्णस्यस्त्रीभिःक्रीडाचरात्रिषु ॥ शंखचूडस्यदुर्बुद्धेर्वधोरिष्टस्यकेशिनः ३२ अक्रूरागमनंपश्चात्प्रस्थानंरामकृष्णयोः ॥ व्रजस्त्रीणांविलापश्चम
थुरालोकनंततः ३३ गजमुष्टिकचाणूरकंसादीनांतथावधः ॥ मृतस्यानयनंसूनोःपुनःसांदीपनेर्गुरोः ३४ मथुरायांनिवसतायदुचक्रस्ययत्प्रियम् ॥ कृत
मुद्धवरामाभ्यांयुतेनहरिणाद्विजाः ३५ जरासंधसमानीतसैन्यस्यबहुशोवधः ॥ पातनंयवनेंद्रस्यकुशस्थल्यानिवेशनम् ३६ आदानंपारिजातस्यसुधर्मा
यांसुरालयात् ॥ रुक्मिण्याहरणंयुद्धेप्रमथ्यद्विषतोहरेः ३७ हरस्यजृंभणंयुद्धेबाणस्यभुजकृंतनम् ॥ प्राग्ज्योतिषपतिंहत्वाकन्यानांहरणंचयत् ३८
चैद्यपौंड्रकशाल्वानांदंतवक्रस्यदुर्मतेः ॥ शंबरोद्विविदःपीठोमुरःपंचजनादयः ३९ माहात्म्यंचवधस्तेषांवाराणस्याश्चदाहनम् ॥ भारावतरणंभूमेर्निमि
त्तीकृत्यपांडवान् ४० विप्रशापापदेशेनसंहारःस्वकुलस्यच ॥ वसुदेवस्यसंवादोनारदेनसुरर्षिणा ४१

यत्रोद्धववासुदेवसंवादेआत्मविद्या परमात्मविद्याः अखिलाअनुर्वरितत्वेनोक्ताः वर्णाश्रमविनिर्णयश्चोक्तः ४२ युगलक्षणंतदनुरूपावृत्तिश्च उपप्लवोनाशःराजसादिभेदेनोत्पत्तिस्त्रिविधा प्राकृतिकीनैमित्तिकीनित्यावा ४३ विष्णुदत्तस्यपरीक्षितः ४४ महापुरुषविन्यासः महापुरुषस्यांगोपांगादिस्थितिविशेषः सूर्यस्यस्थितिश्च इतिसमाप्तिपर्यंतंसर्वमुक्तं ४५ श्रुत्वाश्रुतंकृत्वा ४६ अतिशयितोवातःअभ्रंस नीरंनीरदमिव ४७ अधोक्षजोभगवान्याभिर्गीर्भिर्नकीर्त्यतेनागिरोऽसत्कथामृषानिष्फलाःअसतीरसत्योऽमंगलाः यद्वचोभगवद्गुणोदयंतदेवसत्यंयथोक्तफलम् ४८ पुनरपिस्तौति तदेवेति तदेव पुण्यंपुण्य करं रुचिरंसुंदरं महानुत्सवोयेनतत्तथा ४९ नयद्वचइत्यादिश्लोकत्रयंव्याख्यातार्थं ५० ५१ ५२ ननुवर्णाश्रमाचारादिनानिःश्रेयसंस्याद्वर्णाश्रमाचारयुतोगृहस्थोपिविमुच्यतइत्यतोच्युतभावेनकिंत

उद्धवस्यचसंवादोवासुदेवस्यचाद्भुतः ॥ यत्रात्मविद्याह्यखिलाःप्रोक्ताधर्मविनिर्णयाः ॥ ततोमर्त्यपरित्याग आत्मयोगानुभावतः ४२ युगलक्षणवृत्तिश्च कलौनॄणामुपप्लवः ॥ चतुर्विधश्चप्रलय उत्पत्तिस्त्रिविधातथा ४३ देहत्यागश्चराजर्षेर्विष्णुदत्तस्यधीमतः ॥ शाखाप्रणयनमृषेर्मार्कंडेयस्यसत्कथाः ४४ महापुरुषविन्यासःसूर्यस्यजगदात्मनः ॥ इतिचोक्तंद्विजश्रेष्ठायत्पृष्टोहमिहास्मिवः ४५ लीलावतारकर्माणिकीर्तितानीहसर्वशः ॥ पतितःस्खलितोवार्तःश्रुत्वावाविवशोब्रुवन् ॥ हरयेनमइत्युच्चैर्मुच्यतेसर्वपातकात् ४६ संकीर्त्यमानोभगवाननंतःश्रुतानुभावोव्यसनंहिपुंसाम् ॥ प्रविश्यचित्तंविधुनोत्यशेषंयथातमोर्कोभ्रमिवातिवातः ४७ मृषागिरस्ताह्यसतीरसत्कथानकथ्यतेयद्भगवानधोक्षजः ॥ तदेवसत्यंतदुहैवमंगलंतदेवपुण्यंभगवद्गुणोदयम् ४८ तदेवपुण्यंरुचिरंनवंनवंतदेवशश्वन्मनसोमहोत्सवम् ॥ तदेवशोकार्णवशोषणंनृणांयत्रोत्तमश्लोकयशोनुगीयते ४९ नयद्वचश्चित्रपदंहरेर्यशोजगत्पवित्रंयदिकर्हिचिद्भवेत् ॥ तद्ध्वांक्षतीर्थंनतुहंससेवितंयत्राच्युतस्तत्रहिसाधवोमलाः ५० सवाग्विसर्गोजनताघविप्लवोयस्मिन्प्रतिश्लोकमबद्धवत्यपि ॥ नामान्यनंतस्ययशोंकितानियच्छृण्वंतिगायंतिगृणंतिसाधवः ५१ नैष्कर्म्यमप्यच्युतभाववर्जितंनशोभतेज्ञानमलंनिरंजनम् ॥ कुतःपुनःशश्वदभद्रमीश्वरे नचार्पितंकर्मयदप्यकारणम् ५२ यशःश्रियामेवपरिश्रमःपरोवर्णाश्रमाचारतपःश्रुतादिषु ॥ अविस्मृतिःश्रीधरपादपद्मयोर्गुणानुवादःश्रवणादिभिर्हरेः ५३ अविस्मृतिःकृष्णपदारविंदयोःक्षिणोत्यभद्राणिशमंतनोतिच ॥ सत्वस्यशुद्धिंपरमांचभक्तिंज्ञानंचविज्ञानविरागयुक्तम् ५४ यूयंद्विजाग्र्याबतभूरिभागायच्छश्वदात्मन्यखिलात्मभूतम् ॥ नारायणंदेवमदेवमीशमबाह्यभावाभजताधिवेश्य ५५ अहंचसंस्मारितआत्मतत्त्वंश्रुतंपुरामेपरमर्षिवक्त्रात् ॥ प्रायोपवेशेनृपतेःपरीक्षितःसदस्यृषीणांमहतींचशृण्वताम् ५६ एतद्वःकथितंविप्राःकथनीयोरुकर्मणः ॥ माहात्म्यंवासुदेवस्यसर्वाशुभविनाशनम् ५७

त्राह यशइति यच्चच्युतभाववर्जितस्तर्हिवर्णाश्रमाचारतपःश्रुतादिषुपरः परिश्रमः यशःश्रियामेवार्थेनत्वात्यांतिकासिद्धयेभवति ननुअच्युतभावःकेनस्यादत्राह अविस्मृतिरिति गुणानुवादश्रवणादिभिरुद्धृताच्युताभक्तेःपुंसः श्रीधरपादपद्मयोरविस्मृतिः निरंतराभ्यासलक्षणंस्मरणंभवति ५३ साकर्तुःकिंकरोतिफलमित्याह अविस्मृतिरिति सत्वस्यांतःकरणस्य ५४ यूयमबाह्यभावाअनन्यभक्ताः अदेवंदेवेभ्योन्यंनारायणंदेवमात्मानमनस्याधिवेश्यभजतोतियद्यस्मात्तस्माद्बुरिभागाअतिभाग्यवंतः ५५ अहंचभूरिभागाइतिश्लोकनयति अहंचेति भवद्भिरहंचात्मतत्त्वंसंस्मारितःममापीदमात्मतत्त्वमाम्नायतः प्राप्तमित्याह श्रुतमिति प्रसंगोप्यनुकूलइत्याह प्रायेति ५६ ५७

यामंक्षणंचनान्यानंतरितार्थाद्वितीया आत्मानंमनः ५८ कालविशेषमाह द्वादश्यामिति ५९ देशविशेषमाह पुष्करइति पुष्करेवराहक्षेत्रे भयात्संसारभयात् ६० अत्रयेदेवादयःकीर्तितास्तेपिसंहितापाठादिकुर्वतोभीष्टानिददतीत्याह देवताइति ६१ किंचऋगादीन्यधीत्ययत्फलंस्यात्तदेतत्संहितामधीत्यस्यादित्याह ऋचइति मधुकुल्यामधुनद्यः मधुनद्यादिकथनंसुखविशेषार्थं ६२ नकेवलमैहिकंकिंतुमुक्तिरपीतिकथयति पुराणेति यद्विष्णोःपरमंपदंतद्व्रजेत् ६३ अंबुधिमेखलांभूमिम् ६४ इतरपुराणेभ्योस्यमाहात्म्याधिक्यात्फलाधिक्यंमाहात्म्याधिक्यंच प्रतिपदंप्रत्यक्षरंचश्रीनारायणस्यगुणरागप्रतिपाकत्वेनेत्याह कलिमलेति कलिमलंसंसारंचकालयति नाशयतीतिकलिमलसंसृतिकालनः इतरत्रपुराणेषु इहपुराणे अशेषमूर्तिः कथाप्रसंगैः ६३ सूतोग्रंथावसानेपिगुरुनमस्कारंकरोति स्वसुखेति स्वातंत्र्यात्स्वःपरमात्मातान्निष्ठंसुखंस्वसुखंतेननिभृतंपूर्णंचेतोयस्यसतथा स्वरूपसुखश्चनिभृतज्ञानश्चस्वसुखनिभृतचेताः चेतोज्ञानमितिवातेन सुखेनव्युदस्तान्यभावःनिरस्तान्यविषयबुद्धिःतेनविज्ञानेननिरस्तान्यज्ञानइतिवा अपिकृत्यकृत्योपि अजितस्यहरेरुचिरयालीलयाआकृष्टसारःविवशीकृताचित्तस्थैर्यःतस्यहरेःसंबंधि अतएवतत्त्वदीपकं

यश्चसंश्रावयेन्नित्यंयामंक्षणमनन्यधीः ॥ श्रद्धावान्यश्शृणुयात्पुनात्यात्मानमेवसः ५८ द्वादश्यामेकादश्यांवाशृण्वन्नायुष्यवान्भवेत् ॥ पठन्ननश्नन्प्रयतःपूतोभवतिपातकी ५९ पुष्करेमथुरायांचद्वारवत्यं यतात्मवान् ॥ उपोष्यसंहितामेतांपठित्वामुच्यतेभयात् ६० देवातामुनयःसिद्धाःपितरोमनवो नृपाः ॥ यच्छंतिकामान्बहुलान्शृण्वतोयेत्रकीर्तिताः ६१ ऋचोयजूंषिसामानिद्विजोधीत्यानुविंदते ॥ मधुकुल्याःपयःकुल्याघृतकुल्याश्चतत्फलम् ६२ पुराणसंहितामेतामधीत्यप्रयतोद्विजः ॥ प्रोक्तांभगवताविष्णोस्तत्पदंपरमंव्रजेत् ६३ विप्रोधीत्यानुयात्प्रज्ञांराजन्योंबुधिमेखलाम् ॥ वैश्योनिधिपतित्वं चशूद्रःशुद्ध्येतपातकात् ६४ कलिमलसंसृतिकालनोखिलेशोहरिरितरत्रनगीयतेह्यभीक्ष्णम् ॥ इहतुपुनर्भगवानशेषमूर्तिःपरिपठितोनुपदंकथाप्रसंगैः ६५ स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोप्यजितरुचिरलीलाकृष्टसारस्तदीयम् ॥ व्यतनुतकृपयायस्तत्त्वदीपंपुराणंतमखिलवृजिनघ्नंव्यासमूनुंनतोस्मि ६६ तमहमजमनंतमात्मतंत्रंजगदुदयस्थितिसंयमात्मशक्तिम् ॥ द्युपतिभिरजशक्रशंकराद्यैर्दुरवसितस्तवमच्युतंनतोस्मि ६७ उपचितनवशक्तिभिः स्वआत्मन्युपरचितस्थिरजंगमपालनाय ॥ भगवतउपलब्धिमात्रधाम्नेसुरऋषभायनमःसनातनाय ६८ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेपारमहंस्यांसंहितायांप्रतिसंक्रमणलक्षणंनामद्वादशोऽध्यायः ॥ १२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

पुराणं व्यतनुतव्याख्ययाविस्तृतवान्तंव्यासमूनुंशुकंनतोस्मि ६६ गुरुनमस्कारानंतरंतदुपदिष्टस्वरूपंश्रीनारायणंनमति तमिति योभागवतस्याद्यपद्यमारभ्यप्रतिपादितस्तंनतोस्मीत्यन्वयः जगदुदयादिषुआत्मशक्तिस्वरूपशक्ति आत्मतंत्रंस्वतंत्रं अजंसर्वज्ञंदेहवतएवज्ञानोत्पत्तेःअस्यतदभावात्स्वज्ञानेनैवसर्वंजानातीतिदेशतःकालतोगुणतश्चानंतंद्युपतिभिर्ज्ञानपतिभिरजशंकराद्यैःदुरवसितस्तवंअनिश्चितस्तुतिं अच्युतंमायानिमित्तच्युतिरहितम् ६७ उपचितनवशक्तिभिः मूलप्रकृतिमहदहंकारमनःपंचभूताख्यनवशक्तिभिः आत्मनिस्वाधारतयाऽपरचितयोः स्थिरजंगमयोःपालनंयेनसतथातस्मै उपलब्धिमात्रधाम्नेकेवलज्ञानस्वरूपाय सुरऋषभायदेवोत्तमाय सनातनायसदातनाय शब्दमात्रैकविषयायनमः अनेनश्लोकद्वयेनजन्माद्यस्ययइत्यादेरर्थोदर्शितइति ६८ ॥ सत्यंज्ञानमनंतमच्युतमजंनिर्दुःखसौख्योदधिनिर्दोषामितवेदवेदितमहंवंदेमुकुंदंसदा ॥ यद्वक्त्राकमलाब्जजेरगिरिशानंतादिदेवाःपदंसायुज्यंप्रसरंत्यनेकविधयासत्योविरत्याचतम् १ व्याख्याभागवतस्य

कृष्णरचितात्वत्प्रीतिकामात्मनाप्रीतश्चैत्यददासितत्प्रतिनिर्धितबीन्वारिष्येवरान् ॥ प्राद्विष्कचनतांतवप्रतिभवंपादारविंदात्मनासंसक्तिमुखतीर्थशास्त्रविजराहारस्यपारतया २ पदरत्नावलीकंठराज
तांहिमुरद्विषः । वनमालेवमालेवमौक्तिकीकृष्णवल्लभा ३ ॥ इतिश्रीमन्महेंद्रतीर्थपूज्यपादशिष्यविजयध्वजतीर्थयतींद्रकृतायांश्रीमद्भागवतटीकायांपदरत्नावल्यांद्वादशस्कंधेद्वादशोऽध्यायः ॥ १२ ॥
स्तवैर्वेदैश्चस्तुन्वंतिस्तुवंति उपनिषच्छब्दस्याकारांतत्वं ध्यानेनावस्थितंनिश्चलंतद्गतंयन्मनस्तेनयस्यांतंनविदुःसुरासुरगणाः १ पृष्ठेभ्राम्यत्अमंदोगरिष्ठोमंदरगिरिस्तस्याग्रावाणस्तेषामग्राणितैःकं
डूयनात्तेनसुखेनानिद्रालोःनिद्राशीलस्य येपांश्वासानिलानांसंस्कारास्तेषांकलाश्चलेशास्तदनुवर्तनवशात् जलनिधेरंभसांयातायातंनविश्राम्यति ननुसमुद्रक्षोभादेवतन्नसंस्काररवशात्तत्राह वेलाक्षो

सूतउवाच ॥ यंब्रह्मावरुणेंद्ररुद्रमरुतस्तुन्वंतिदिव्यैस्तवैर्वेदैःसांगपदक्रमोपनिषदैर्गायंतियंसामगाः ॥ ध्यानावस्थिततद्गतेनमनसापश्यंतियंयोगिनोय
स्यांतंनविदुःसुरासुरगणादेवायतस्मैनमः १ पृष्ठेभ्राम्यदमंदमंदरगिरिग्रावाग्रकंडूयनान्निद्रालोःकमठाकृतेर्भगवताश्वासानिलाःपांतुवः ॥ यत्संस्कार
वलानुवर्तनवशाद्वेलानिलेनांभसांयातायातमतंद्रितंजलनिधेर्नाद्यापिविश्राम्यति २ पुराणसंख्यासंभूतिमस्यवाच्यप्रयोजने ॥ दानंदानस्यमाहात्म्यं
पाठादेश्चनिबोधत ३ ब्राह्मंदशसहस्राणिपाद्मंपंचोनषष्टिकम् ॥ श्रीवैष्णवंत्रयोविंशच्चतुर्विंशतिशैवकम् ४ दशाष्टौश्रीभागवतंनारदंपंचविंशतिः ॥
मार्कंडेयंनवाग्नेयंदशपंचचतुःशतम् ॥ चतुर्दशभविष्यंस्यात्तथापंचशतानिच ५ दशाष्टौब्रह्मवैवर्तंलिंगमेकादशैवतु ६ चतुर्विंशतिवाराहमेकाशीतिस
हस्रकम् ॥ स्कांदंशतंतथाचैकंवामनंदशकीर्तितम् ७ कौर्मंसप्तदशख्यातंमात्स्यंतच्चचतुर्दश ॥ एकोनविंशत्सौपर्णंब्रह्मांडंद्वादशैवतु ८ एवंपुराणसंदोह
श्चतुर्लक्षउदाहृतः ॥ तत्राष्टादशसाहस्रंश्रीभागवतमिष्यते ९ इदंभगवतापूर्वंब्रह्मणेनाभिपंकजे ॥ स्थितायभवभीतायकारुण्यात्संप्रकाशितम् ॥ आ
दिमध्यावसानेषुवैराग्याख्यानसंयुतम् १० हरिलीलाकथाव्रातामृतानंदितसत्सुरम् ॥ सर्ववेदांतसारंयद्ब्रह्मात्मैकत्वलक्षणम् ॥ वस्त्वद्वितीयंतन्निष्ठंकैव
ल्यैकप्रयोजनम् ११ प्रौष्ठपद्यांपौर्णमास्यांहेमसिंहसमन्वितम् ॥ ददातियोभागवतंसयातिपरमांगतिम् १२ राजंतेतावदन्यानिपुराणानिसतांगणे ॥
यावन्नदृश्यतेसाक्षाच्छ्रीमद्भागवतंपरम् १३ सर्ववेदांतसारंहिश्रीभागवतमिष्यते ॥ तद्रसामृततृप्तस्यनान्यत्रस्याद्रतिःक्वचित् १४ निम्नगानांयथागंगा
देवानामच्युतोयथा ॥ वैष्णवानांयथाशंभुःपुराणानामिदंतथा १५ क्षेत्राणांचैवसर्वेषांयथाकाशीह्युत्तमा ॥ तथापुराणव्रातानांश्रीमद्भागवतंद्विजाः १६

भस्तस्यनिमेनामिषेण २ पुराणसंख्यास्तासांसंभूतिसमाहारंवा अस्यश्रीभागवतस्यवाच्यंविषयः प्रयोजनंदानंचतस्यपाठादेश्चमाहात्म्यंनिबोधत ३ त्रयोविंशत्त्रयोविंशतिः चतुर्विंशतिसहस्राणि
शैवकंशिवपुराणम् ४ मार्कंडेयंनव वाह्नेत्यितिवापाठः अग्निपुराणंदशपंचसहस्राणिचत्वारिंशतानि ५ ६ स्कांदंशताधिकैकाशीतिसाहस्रम् ७ सौपर्णंगरुडपुराणंएकोनविंशत्एकोनविंशतिः
८ पुराणानांसंदोहःसमूहःचतुःसंख्याकएव ९ १० हरिलीलाकथानांव्रातःसएवामृतंतेनानंदिताःसंतःसुराश्चयेनतत् तान्निष्ठंताद्विषयम् ११ प्रौष्ठपद्यांभाद्रपद्यांहेमसिंहसमन्वितंस्वर्णसिंहासना
रूढम् १२ १३ तद्रसएवामृतंतेनतृप्तस्य १४ १५ १६

श्रीमद्भागवतंपुराणममलंयद्वैष्णवानांप्रियंयस्मिन्पारमहंस्यमेकममलंज्ञानंपरंगीयते ॥ यत्रज्ञानविरागभक्तिसहितंनैष्कर्म्यमाविष्कृतंतच्छृण्वन्विपठन्विचारणपरोभक्त्याविमुच्येन्नरः १७ कस्मैयेनविभासितोयमतुलोज्ञानप्रदीपःपुरातद्रूपेणचनारदायमुनयेकृष्णायतद्रूपिणा ॥ योगींद्रायतदात्मनाऽथभगवद्रातायकारुण्यतस्तच्छुद्धंविमलंविशोकममृतंसत्यंपरंधीमहि १८ नमस्तस्मैभगवतेवासुदेवायसाक्षिणे ॥ यइदंकृपयाकस्मैव्याचचक्षेमुमुक्षवे १९ योगींद्रायनमस्तस्मैशुकायब्रह्मरूपिणे ॥ संसारसर्पदष्टंयोविष्णुरातममूमुचत् २० भवेभवेयथाभक्तिःपादयोस्तवजायते ॥ तथाकुरुष्वयोगेशनाथस्त्वंमेयतःप्रभो २१ नामसंकीर्तनंयस्यसर्वपापप्रणाशनम् ॥ प्रणामोदुःखशमनस्तंनमामिहरिंपरम् २२ ॥ इतिश्रीमद्भागवतेमहापुराणेपारमहंस्यांसंहितायांवैय्यासिक्यांअष्टादशसाहस्र्यांसंहितायांद्वादशस्कंधेसूतोक्तौत्रयोदशोऽध्यायः ॥ १३ ॥ ॥ ॥ ७ ॥ ॥ ॥ ७ ॥

१ ब्रह्मस्थब्रह्मरूपेण २ तस्मिन्नारदेनारदरूपमस्यास्तीतितद्रूपीतेनस्वात्मनैव ३ व्यासाय ४ तदात्मनाव्यासात्मना ५ अथ शुकस्थशुकरूपेणः ।

॥ श्रीः ॥

श्रीमद्भागवतम्

श्रीमन्महेन्द्रतीर्थपूज्यपादशिष्यश्रीविजयध्वजतीर्थमुनीन्द्रप्रणीतया
पदरत्नावल्याख्यया व्याख्यया समेतम् ।

वैराजस्थऐनापुरेउपाख्यवाळाचार्यतनूजन्मन उद्धवाचार्यतः
पित्रेउपाख्यकृष्णशास्त्रितश्च संशोध्य.

"गोपाळनारायणकम्पनी" नामजनताधिपेन विनायकनारायण
इत्याख्येन मुम्बय्यां स्वकीये मुद्रायन्त्रेऽङ्कित्वा प्रकाशितम् ।

शके १८१४ ख्रिस्ताब्दे १८९२.

विक्रीस तयार.

खालीं लिहिलेले ग्रन्थ चांगल्या जाड कागदावर मोठ्या सुन्दर टायपानीं आह्मीं छापिलेले विक्रीस तयार आहेत, प्रत्येक ग्रन्थाच्या दरएक अध्यायापूर्वी उत्कृष्ट चित्रें दिलीं आहेत, व प्रत्येक पृष्ठाखालीं कठीण शब्दांचे अर्थ दिले आहेत.

प्राकृत.

एकनाथी भागवत.....	रु. ४	८
जैमिनी अश्वमेध	३	८
संतलीलामृत	१	१२
नाथलीलामृत.	२	०
पांडवप्रताप.....	३	०
भक्तविजय	२	८
हरिविजय	१	६
रामविजय	१	६
काशीखंड.....	३	८
दासबोध	१	१२
कथासारामृत	२	८
शिवलीलामृत.	०	८
शनिमाहात्म्य	०	२
व्यङ्कटेशस्तोत्र	०	१
सिंहासनबत्तिशी	०	३
उपयुक्त सर्व संग्रह (४० विषय)..	१	४
गणेशप्रताप.....	३	०
वेषधारीपंजाबी (कादंबरी)	१—६	
विक्रमचरित्र	०—१०	

संस्कृत.

वाल्मीकि रामायण, सटीक	रु. १२	०
सुन्दरकाण्ड, वाल्मीकिरामायण	१	०
रामायणमाहात्म्य	०	८
श्रीमद्विष्णुपुराण सटीक	३	०
पौषमासमाहात्म्य	०	६
माघमासमाहात्म्य	०	१०
फाल्गुनमासमाहात्म्य.	०	८
मार्गशीर्षमासमाहात्म्य	०	६
ज्येष्ठमासमाहात्म्य	०	६
आषाढमासमाहात्म्य.....	०	६
श्रावणमासमाहात्म्य	०	८
कार्तिकमासमाहात्म्य.....	०	८
मलमासमाहात्म्य.	०	६
मेघदूत	०	३
समासचन्द्रिका.....	०	१
ममासचक्र.....	०	१
शब्दरूपावली	०	२
भावशतकम् टिप्पणीसहितम्	०	४
रघुनाथविजयचम्पूः.....	०	८

संस्कृत.

अमरसार (संस्कृत इंग्रेजी आणि इंग्रेजी संस्कृत कोश)	रु० १	०
धातुरूपावली	०	३
ग्रन्थरत्नमाला (मासिक पुस्तक) वर्षाची वर्गणी.....	४	०
श्रीभानुदत्तस्य-रसतरङ्गिणी टिप्पणीस	००	१०
श्रीनागनाथस्य-भावशतकं टिप्पणीस	०	४
शङ्कराचार्यस्य-सुन्दरलहरी टिप्पणीयुता.	०	४
अध्यात्मप्रदीपिका पाठान्तरैः समेता	०	६
भागवतचम्पूः टिप्पणीसमेता	१	४
कटाक्षशतकम् टिप्पणीयुतम्	०	४
कामाक्षिस्तुतिशतकम्.....	०	४
कृष्णामृततरङ्गिका सटीका.....	०	४
प्रश्नोत्तररत्नमाला सटीका	०	६
प्रशास्तिकाशिका	०	६
विष्णुसहस्रनाम शङ्कराचार्यकृतभाष्यास	००	८
हलायुधस्य कविरहस्यम्	०	८
शुकविरचितं निर्वाणाष्टकम्	०	२
भार्गवचम्पूः टिप्पणीसमेता	०	८

संस्कृत.

श्रीनिवासचम्पूः टिप्पणीसमेता....	रु० १	४
सुभाषितरत्नाकरः	२	०
आर्याशतकं टिप्पणीयुतम्	०	२
अम्बाष्टकं सटीकम्.....	०	२
नृसिंहपुराणं टिप्पणीयुतम्.....	२	८
चौरपञ्चाशिका	०	२
सिद्धांतचंद्रिका सटीका.....	०	६
कलिविडंबनं.	०	२
सटीकसचूर्णिकश्रीमद्भागवतं	१२	०
रसतरङ्गिणी टिप्पणीसमेता	०	१०
गीतगौरीपतिसटीक	०	१२
नाटवाटप्रहसन्नं टिप्पणीसमेतं	०	६
उत्तररामचरित्रचम्पूःटिप्पणीसमेता..	०	१०
धर्मविजयनाटकं छायासमेतं	०	१०
श्रीवाग्भट अलंकारशास्त्रं टिप्पणीसमेतम्	१	०
सूर्यसहस्रनामावली.....	०	२
देवीसहस्रनामावली	०	२
गणेशसहस्रनामावली	०	२
शिवसहस्रनामावली	०	२

संस्कृत.

विष्णुसहस्रनाम	रु०	० १॥
विष्णुसहस्रनामावली		० २
कृष्णभक्तिचन्द्रिका		० ५
वैद्यमनउत्सव		० ७
कुवलयाश्वविलासः		१ ०
नीतिवाक्यामृतम्		१ ०
राघवपान्डवीयंसटीकम्		२ ०
राधाविनोद सटीक		० २
रामार्यगुच्छा		० २
भागीरथीचम्पूः		१ ४
षट्पदमञ्जरी सटीक		० ४
धातुकारिकावली		० २
भाद्रपदमासमाहात्म्य		० १०
वैशाखमासमाहात्म्य		० ८
रघुवंश इंग्रजीभाषांतरासहित		२ १२
सप्तशती रेशमी		० ५
भगवतगीतारेशमी		० ५
हरिवंशसटीक		६ ०
अध्यात्मरामायणसटीक		२ ०
सत्यगणपतिव्रतकथा		० ४
चातुर्मासमाहात्म्य		० ८
गायत्रीपुरश्चरण		० ४
चैत्रमासमाहात्म्य		० १२
रतिमन्मथनाटकं छायासमेतम्		० १०
मुद्गलाचार्यकृतआर्यासटीक		० १०

संस्कृत.

भामिनीविलासः सटीकः	रु०	१ ०
महाभारत सटीक		४० ०
श्रीकृष्णजन्मखंड		३ ८
देवीभागवत		७ ०
गीताश्रीधरी टीका		१ ४
ऋग्वेदसंहिता		४ ०
ऋग्वेद सायनाचार्यकृतभाष्यासहीत		५० ०
धर्मसिंधु		३ ०
विजयध्वजी भागवत		१० ०
स्तोत्ररत्नाकर		१ ०
बोधायनसनिर्णयप्रयोगमाला		८ ०
मार्कंडेय पुराण		४ ८
ऋग्वेदी ब्रह्मकर्म		३ ८
हिरण्यकेशी ब्रह्मकर्म		४ ०
व्रतराज टिप्पणीसहीत		५ ०
पंचदशी सटीक		३ ०
यजुर्वेद (तैत्तिरेयकृष्ण) संहिता		३ ०
योगवासिष्ठ सटीक		२० ०
अमरकोश सटीक		१ ०
हटयोगप्रदीपिका सटीक		२ ८
बृहज्जातक सटीक		२ ०
वीरसिंहावलोकन		१ १२
शंकरानंदीगीता		५ ०
सतोपख्यानरामायण		१ ८
महाशिवपुराणम् सटीकम्		१६ ०

संस्कृत.

श्रीमद्भागवतं विजयध्वजीसं०	रु०	१० ०
आनन्द रामायणम्		५ ०
श्रीमद्भागवतं गुटकात्मकं		३ ८
गरुडपुराणं (प्रेतकल्पः) सटीकम्		१ ०
स्तोत्ररत्नाकर		१ ०
सिद्धान्तकौमुदी		२ ८
क्रियापद प्रकाशः		० १२
रामाश्वमेध		२ ८
कथासरित्सागर		६ ०
कुवलयानन्द सटीक		१ ८
दशकुमार चरित्र		१ ८
पञ्चदशी सटीक		३ ०
गीतगोविन्द सटीक		१ ०
श्रीवेङ्कटेश महात्म्य		५ ०
कुमार संम्भव		२ ०
मध्वविजयमूळ		० १२
भोजचम्पूः		१ ०
अमरकोशमूळ		० ८
मध्वविजय सटीक		५ ०
अनुभूति प्रकाश		२ ४
अमरकोश (रामाश्रमी टीका)		५ ०
बाणकृत कादंबरी सटीक		५ ०
रामाश्वमेध		३ ०
किरातार्जुनीय काव्य		२ ०
मनुस्मृति सटीक		२ ०

संस्कृत.

गीतामधुसुदनी टीका	रु०	४ ०
गीतामृततरङ्गिणी भाषाटीका		१ ४
बृहज्ज्योतिषार्णव सटीक		७ ०
सर्वार्थचिंतामणि		० १२
भोजप्रबंध		० ८
शाकुन्तलनाटक सटीक		१ ४
पञ्चरत्नीगीता		० ७
लघुकौमुदी		० ६
हितोपदेश		० ८
नलचम्पूः सटीक		२ ०
रघुवंश सटीक		१ ०
तर्कसंग्रह		० ६
साम्बपुराण		२ ०
गर्गसंहिता		४ ०
एकादशीमाहात्म्य		० १०
संस्कार भास्कर		३ ०
चिकित्साक्रमकल्पवल्ली		३ ०

याखेरीज आमुचे बुकडीपोंत मराठी, इङ्गजी संस्कृत, गुजराथी, हिन्दुस्थानी, शालोपयोगी, इत्यादि सर्व प्रकारचीं पुस्तकें माफक दरानें मिळतील.

गोपाळ नारायण आणि कंपनी,

बुकसेलर्स, मुंबई.

कालिकादेवी रोड,

इति श्रीमद्भागवतं विजयध्वजतीर्थव्याख्यासहितम्